चित्रं प्रभाचन्द्र इह क्षमायां मार्तण्डवृद्धौ नितरां व्यदीपित ॥
†सुखि···न्यायकुमुदचन्द्रोदयकृते नमः।
शाकटायनकृत्सूत्रन्यासकर्त्रे व्रतीन्दवे ॥"

जैनसिद्धान्तभवन आरामें वर्धमानमुनिकृत दशभक्त्यादिमहाशास्त्र है। उसमें भी ये श्लोक हैं। उनमें 'सुखि...' की जगह 'सुखीशे' तथा 'व्रतीन्दवे' के स्थानमें 'प्रमेन्दवे' पाठ है। यह शिलालेख १६ वीं शताब्दीका है और वर्धमानमुनिका समय भी १६ वीं शताब्दी ही है। शाकटायनन्यासके प्रथम दो अध्यायोंकी प्रतिलिपि स्याद्वादविद्यालयके सरस्वतीभवनमें मौजूद है। उसको सरसरी तौर से पलटने पर मुझे इसके प्रभाचन्द्रकृत होनेमें निम्नलिखित कारणों से सन्देह उत्पन्न हुआ है–

---

* न्यायकुमुदचन्द्र प्रथमभागकी प्रस्तावना पृ० १२५।

† इस शिलालेखके अनुवादमें राइस सा० ने आ० पूज्यपादको ही न्यायकुमुदचन्द्रोदय और शाकटायनन्यासका कर्ता लिख दिया है। यह गलती आपसे इसलिये हुई कि इस श्लोकके बाद ही पूज्यपादकी प्रशंसा करनेवाला एक श्लोक है, उसका अन्वय आपने भूलसे "सुखि" इत्यादि श्लोकके साथ कर दिया है। वह श्लोक यह है–

**"न्यासं जैनेन्द्रसंज्ञं सकलबुधनुतं पाणिनीयस्य भूयो
न्यासं शब्दावतारं मनुजततिहितं वैद्यशास्त्रं च कृत्वा।
यस्तत्त्वार्थस्य टीकां व्यरचयदिह तां भात्यसौ पूज्यपाद-
स्वामी भूपालवन्द्यः स्वपरहितवचः पूर्णदृग्बोधवृत्तः ॥"**

थोड़ी सी सावधानीसे विचार करने पर यह स्पष्ट मालूम होता जाता है कि 'सुखि' इत्यादि श्लोकके चतुर्थ्यन्त पदोंका 'न्यास' वाले श्लोकसे कोई भी सम्बन्ध नहीं है। ब्र० शीतलप्रसादजीने 'मद्रास और मैसूरप्रान्तके स्मारक' में तथा प्रो० हीरालालजीने 'जैनशिलालेख संग्रह' की भूमिका (पृ० १४१) में भी राइस सा० का अनुसरण करके इसी गलतीको दुहराया है।

१–इस ग्रन्थमें मंगलश्लोक नहीं है जब कि प्रभाचन्द्र अपने प्रत्येक ग्रन्थमें मंगलाचरण नियमित रूपसे करते हैं* ।

२–सन्धियोंके अन्तमें तथा ग्रन्थमें कहीं भी प्रभाचन्द्रका नामोल्लेख नहीं है जब कि प्रभाचन्द्र अपने प्रत्येक ग्रन्थमें 'इति प्रभाचन्द्रविरचिते' आदि पुष्पिकालेख या 'प्रमेन्दुर्जिनः' आदि रूप से अपना नामोल्लेख करनेमें नहीं चूकते ।

३–प्रभाचन्द्र अपनी टीकाओंके प्रमेयकमलमार्तण्ड, न्यायकुमुदचन्द्र, शब्दाम्भोजभास्कर आदि नाम रखते हैं जब कि इस ग्रन्थके इन श्लोकोंमें इसका कोई खास नाम सूचित नहीं होता–

"शब्दानां शासनाख्यस्य शास्त्रस्यान्वर्थनामतः ।
प्रसिद्धस्य महामोघवृत्तेरपि विशेषतः ॥
सूत्राणां च विवृतिर्लिख्यते च यथामति ।
ग्रन्थस्यास्य च न्यासेति (?) क्रियते नामनामतः ॥"

४–शाकटायन यापनीयसंघके आचार्य थे और प्रभाचन्द्र थे कट्टर दिगम्बर । इन्होंने शाकटायनके स्त्रीमुक्ति और केवलिभुक्तिप्रकरणोंका खंडन भी किया है । अतः शाकटायनके व्याकरणपर प्रभाचन्द्रके द्वारा न्यास लिखा जाना कुछ समझमें नहीं आता ।

५–इस न्यासमें शाकटायनके लिए प्रयुक्त 'संघाधिपति, महाश्रमणसंघप' आदि विशेषणों का समर्थन है । यापनीय आचार्यके इन विशेषणोंके समर्थनकी आशा प्रभाचन्द्र द्वारा नहीं की जा सकती । यथा–

"एवंभूतमिदं शास्त्रं चतुरध्यायरूपतः, संघाधिपतिः श्रीमानाचार्यः शाकटायनः । महतारभते तत्र महाश्रमणसंघपः, श्रमेण शब्दतत्त्वं च विशदं च विशेषतः ॥ महाश्रमणसंघाधिपतिरित्यनेन मनःसमाधानमाख्यायते । विषयेषु विक्षिप्तचेतसो न मनःसमाधि•••असमाहितचेतसश्च किं नाम शास्त्रकरणम्, आचार्य इति तु शब्दविद्याया गुरुत्वं शाकटायन इति अन्वयबुद्धिप्रकर्षः, विशुद्धान्वयो हि शिष्टैरुपलीयते । महाश्रमणसंघाधिपतेः सन्मार्गानुशासनं युक्तमेव•••"

६–प्रभाचन्द्रने अपने प्रमेयकमलमार्तण्ड और न्यायकुमुदचन्द्रमें जैनेन्द्रव्याकरणसे ही सूत्रोंके उद्धरण दिए हैं जिसपर उनका शब्दाम्भोजभास्कर न्यास है ।

---

* मैसूर यूनि० में न्यासग्रन्थकी दूसरे अध्यायके चौथे पादके १२४ सूत्र तक की कापी है (नं० A. 605) । उसमें निम्नलिखित मंगलश्लोक हैं–

"प्रणम्य जयिनः प्राप्तविश्वव्याकरणश्रियः । शब्दानुशासनस्येयं वृत्तेर्विवरणोद्यमः ॥ अस्मिन् भाष्याणि भाष्यन्ते वृत्तयो वृत्तिमाश्रिताः । न्यासा न्यस्ताः कृताः टीकाः पारं पारायणान्ययुः ॥ तत्र वृत्ता (त्या) द्वावयं मंगलश्लोकः श्रीवीरममृतमित्यादि ।"

परन्तु इन श्लोकोंकी रचनाशैली प्रभाचन्द्रकृत न्यायकुमुदचन्द्र आदि के मंगलश्लोकोंसे अत्यन्त विलक्षण है ।

यदि शाकटायनपर भी उनका न्यास होता तो वे एकाध स्थानपर तो शाकटायनव्याकरणके सूत्र उद्धृत करते।

७–प्रभाचन्द्र अपने पूर्वग्रन्थोंका उत्तरग्रन्थोंमें प्रायः उल्लेख करते हैं। यथा न्यायकुमुदचन्द्रमें तत्पूर्वकालीन प्रमेयकमलमार्तण्डका तथा शब्दाम्भोजभास्करमें न्यायकुमुदचन्द्र और प्रमेयकमलमार्तण्ड दोनोंका उल्लेख पाया जाता है। यदि शाकटायनन्यास उन्होंने प्रमेयकमलमार्तण्ड आदिके पहिले बनाया होता तो प्रमेयकमलमार्तण्ड आदिमें शाकटायनव्याकरणके सूत्रों के उद्धरण होते और इस न्यासका उल्लेख भी होता। यदि यह उत्तरकालीन रचना है तो इसमें प्रमेयकमल आदिका उल्लेख होना चाहिये था जैसा कि शब्दाम्भोजभास्करमें देखा जाता है।

८–शब्दाम्भोजभास्करमें प्रभाचन्द्रकी भाषाकी जो प्रसन्नता तथा प्रावाहिकता है वह इस दुरूह न्यासमें नहीं देखी जाती। इस शैलीवैचित्र्यसे भी इसके प्रभाचन्द्रकृत होनेमें सन्देह होता है। प्रभाचन्द्रने शब्दाम्भोजभास्कर नामका न्यास बनाया था और इसलिए उनकी न्यासकारके रूपसे भी प्रसिद्धि रही है। मालूम होता कि वर्धमानमुनिने प्रभाचन्द्रकी इसी प्रसिद्धिके आधार से इन्हें शाकटायनन्यासका कर्ता लिख दिया है। मुझे तो ऐसा लगता है कि यह न्यास स्वयं शाकटायनने ही बनाया होगा। अनेक वैयाकरणोंने अपने ही व्याकरण पर न्यास लिखे हैं।

शब्दाम्भोजभास्कर–श्रवणबेलगोलके शिलालेख नं० ४० (६४) में प्रभाचन्द्रके लिये 'शब्दाम्भोजदिवाकरः' विशेषण भी दिया गया है। इस अर्थगर्भ विशेषणसे स्पष्ट ज्ञात होता है कि प्रमेयकलमार्तण्ड और न्यायकुमुदचन्द्र जैसे प्रथिततर्क ग्रन्थोंके कर्ता प्रथिततर्कग्रन्थकार प्रभाचन्द्रही शब्दाम्भोजभास्कर नामक जैनेन्द्रव्याकरण महान्यासके रचयिता हैं। ऐलक पन्नालाल दि० जैन सरस्वतीभवनकी अधूरी प्रतिके आधारसे इसका टुक परिचय यहाँ दिया जाता है। यह प्रति संवत् १९८० में देहलीकी प्रतिसे लिखाई गई है। इसमें जैनेन्द्रव्याकरणके मात्र तीन अध्यायका ही न्यास है सो भी बीचमें जगह जगह त्रुटित है। ३९ से ६७ नं० के पत्र इस प्रतिमें नहीं हैं। प्रारम्भके २८ पत्र किसी दूसरे लेखकने लिखे हैं। पत्रसंख्या २२८ है। एक पत्रमें १३ से १५ तक पंक्तियाँ और एक पंक्तिमें ३९ से ४३ तक अक्षर हैं। पत्र बड़ी साइजके हैं।

मंगलाचरण–

"श्रीपूज्यपादमकलङ्कमनन्तबोधम्, शब्दार्थसंशयहरं निखिलेषु बोधम्।
सच्छब्दलक्षणमशेषमतः प्रसिद्धं वक्ष्ये परिस्फुटमलं प्रणिपत्य सिद्धम्॥ १॥
सविस्तरं यद् गुरुभिः प्रकाशितं महामतीनामभिधानलक्षणम्।
मनोहरैः स्वल्पपदैः प्रकाश्यते महद्भिरुपदिष्टि याति सर्वोपिमार्गे (?)
...तदुक्त कृतशिक्ष (?) श्लाघ्यते तद्धि तस्य।
किमुक्तमखिलज्ञैर्भाषमाणे गणेन्द्रो विविक्तमखिलार्थं श्लाघ्यतेऽतो मुनीन्द्रैः॥३॥

शब्दानामनुशासनानि निखिलान्याध्यायताहर्निशम्,
यो यः सारतरो विचारचतुरस्तल्लक्षणांशो गतः।
तं स्वीकृत्य तिलोत्तमेव विदुषां चेतश्चमत्कारकः,
सुव्यक्तैरसमैः प्रसन्नवचनैर्न्यासः समारभ्यते ॥ ४ ॥

श्रीपूज्यपादस्वामि (मी) विनेयानां शब्दसाधुत्वासाधुत्वविवेकप्रतिपत्त्यर्थं शब्दलक्षणप्रणयनं कुर्वाणो निर्विघ्नतः शास्त्रपरिसमाप्त्यादिकमभिलषन्निष्टदेवतास्तुतिविषयं नमस्कुर्वन्नाह–लक्ष्मीरात्यन्तिकी यस्य…"

यह न्यास अभयनन्दिकृत जैनेन्द्रमहावृत्तिके बाद बनाया गया है। इसमें महावृत्तिके शब्द आनुपूर्वीसे ले लिए गए हैं और कहीं उनका व्याख्यान भी किया है। यथा–

"सिद्धिरनेकान्तात्–प्रकृत्यादिविभागेन व्यवहाररूपा श्रोत्रग्राह्यतया परमार्थतोपेता प्रकृत्यादिविभागेन च शब्दानां सिद्धिरनेकान्ताद् भवतीत्यर्थोधिकार आशास्त्रपरिसमाप्तेर्वेदितव्यः। अस्तित्वनास्तित्वनित्यत्वसामान्यसामानाधिकरण्यविशेषणविशेष्यादिकोऽनेकः अन्तः स्वभावो यस्मिन् भावे सोऽयमनेकान्तः अनेकात्मा इत्यर्थः"–महावृत्ति पृ० २।

"द्विविधा च शब्दानां सिद्धिः व्यवहाररूपा परमार्थरूपा चेति। तत्र प्रकृतीत्य (?) विकारागमादिविभागेन रूपा तत्सिद्धिः तद्भेदस्यात्र प्राधान्यात्। श्रोत्रग्राह्यौ(ह्याः) परमार्थतो ये प्रकृत्यादिविभागाः प्रमाणनयादिभिरभिगमोपायैः शब्दानां तत्त्वप्रतिपत्तिः परमार्थरूपा सिद्धिः तद्भेदस्यात्र प्राधान्यात्, सामयिक्तेषां सिद्धिरनेकान्ताद्भवतीत्येपोऽधिकारः आशास्त्रपरिसमाप्तेर्वेदितव्यः। अथ कोऽयमनेकान्तो नामेत्याह–अस्तित्वनास्तित्वनित्यत्वानित्यत्वसामान्यसामानाधिकरण्यविशेषणविशेष्यादिकोऽनेकान्तः स्वभावो यस्यार्थस्यासावनेकान्तः अनेकान्तात्मक इत्यर्थः"–शब्दाम्भोजभास्कर पृ० २ A।

इस तुलनासे तथा तृतीयाध्यायके अन्तमें लिखे गए इस श्लोकसे अत्यन्त स्पष्ट हो जाता है कि यह न्यास जैनेन्द्रमहावृत्तिके बाद बनाया गया है–

"नमः श्रीवर्धमानाय महते देवनन्दिने।
प्रभाचन्द्राय गुरवे तस्मै चाभयनन्दिने ॥"

इस श्लोकमें अभयनन्दिको नमस्कार किया गया है। प्रत्येक पादकी समाप्तिमें "इति प्रभाचन्द्रविरचिते शब्दाम्भोजभास्करे जैनेन्द्रव्याकरणमहान्यासे द्वितीयाध्यायस्य तृतीयः पादः" इसी प्रकारके पुष्पिकालेख हैं।

तृतीय अध्यायके अन्तमें निम्नलिखित पुष्पिका तथा श्लोक है–

"इति प्रभाचन्द्रविरचिते शब्दाम्भोजभास्करे जैनेन्द्रव्याकरणमहान्यासे तृतीयस्याध्यायस्य चतुर्थः पादः समाप्तः ॥ श्रीवर्धमानाय नमः ॥

सन्मार्गप्रतिबोधको बुधजनैः संस्तूयमानो हठात्।
अज्ञानान्धतमोपहः क्षितितले श्रीपूज्यपादो महान् ॥

सार्वः सन्ततसन्निसन्धिनियतः पूर्वापरानुक्रमः ।
शब्दाम्भोजदिवाकरोऽस्तु सहसा नः श्रेयसे यं च वै ॥
नमः श्रीवर्धमानाय महते देवनन्दिने ।
प्रभाचन्द्राय गुरुवे तस्मै चाभयनन्दिने ॥ छ ॥

श्री वासुपूज्याय नमः । श्री नृपतिविक्रमादित्यराज्येन संवत् १९८० मासोत्तममासे चैत्रशुक्लपक्षे एकादश्यां ११ श्री महावीर संवत् २४४९ । हस्ताक्षर छाजूराम जैन विजेश्वरी लेखक पालम (सूबा देहली)"

जैनेन्द्रव्याकरणके दो सूत्र पाठ प्रचलित हैं—एक तो वह जिस पर अभयनन्दिने महावृत्ति, तथा श्रुतकीर्तिने पञ्चवस्तु नामकी प्रक्रिया बनाई है; और दूसरा वह जिस पर सोमदेवसूरिकृत शब्दार्णवचन्द्रिका है । पं० नाथूरामजी प्रेमीने[1] अनेक पुष्ट प्रमाणोंसे अभयनन्दिसम्मत सूत्रपाठको ही प्राचीन तथा पूज्यपादकृत मूलसूत्रपाठ सिद्ध किया है । प्रभाचन्द्रने इसी अभयनन्दिसम्मत प्राचीन सूत्रपाठ पर ही अपना यह शब्दाम्भोजभास्कर[2] नामका महान्यास बनाया है ।

आ० प्रभाचन्द्रने इस ग्रन्थको प्रमेयकमलमार्तण्ड और न्यायकुमुदचन्द्रकी रचनाके बाद बनाया है जैसा कि उनके निम्नलिखित वाक्यसे सूचित होता है—

"तदात्मकत्वं चार्थस्य अध्यक्षतोऽनुमानादेश्च यथा सिद्ध्यति तथा प्रपञ्चतः प्रमेयकमलमार्तण्डे न्यायकुमुदचन्द्रे च प्ररूपितमिह द्रष्टव्यम् ।"

प्रभाचन्द्र अपने न्यायकुमुदचन्द्र (पृ० ३२९) में प्रमेयकमलमार्तण्ड ग्रन्थ देखनेका अनुरोध इसी तरहके शब्दोंमें करते हैं—"एतच्च प्रमेयकमलमार्तण्डे सप्रपञ्चं प्रपञ्चितमिह द्रष्टव्यम् ।"

व्याकरण जैसे शुष्क शब्दविषयक इस ग्रन्थमें प्रभाचन्द्रकी प्रसन्न लेखनीसे प्रसूत दर्शनशास्त्रकी क्वचित् अर्थप्रधान चर्चा इस ग्रन्थके गौरवको असाधारणतया बढ़ा रही है । इसमें विधिविचार, कारकविचार, लिंगविचार जैसे अनूठे प्रकरण हैं जो इस ग्रन्थको किसी भी दर्शनग्रन्थकी कोटिमें रख सकते हैं । इसमें समन्तभद्रके युक्त्यनुशासन तथा अन्य अनेक आचार्योंके पद्योंको प्रमाण रूपसे

---

१ देखो—'जैनेन्द्रव्याकरण और आचार्य देवनन्दी' लेख, जैनसाहित्य संशोधक भाग १ अंक २ ।

२ पंडित नाथूलाल शास्त्री इन्दौर सूचित करते हैं कि तुकोगंज इन्दौरके ग्रन्थभण्डारमें भी शब्दाम्भोजभास्करके तीन ही अध्याय हैं । उसका मंगलाचरण तथा अन्तिम प्रशस्तिलेख बम्बईकी प्रतिके ही समान है । पं० भुजबलीजी शास्त्रीके पत्रसे ज्ञात हुआ है कि कारकलके मठमें भी इसकी प्रति है । इस प्रति में भी तीन अध्यायका न्यास हैं । प्रेमीजी सूचित करते हैं कि बंबईके भवनमें इसकी एक प्राचीन प्रति है उसमें चतुर्थ अध्यायके तीसरे पादके २११ वें सूत्र तकका न्यास है, आगे नहीं । हो सकता है कि यह प्रभाचन्द्रकी अन्तिमकृति ही हो और इसलिए पूर्ण न हो सकी हो ।

उद्धृत किया है। पृ० ९१ में 'विश्वदृश्वाऽस्य पुत्रो जनिता' प्रयोगका हृदयग्राही व्याख्यान किया है। इस तरह क्या भाषा, क्या विषय और क्या प्रसन्नशैली, हर एक दृष्टिसे प्रभाचन्द्रका निर्मल और प्रौढ़ पाण्डित्य इस ग्रन्थमें उदात्तभावसे निहित है।

प्रवचनसारसरोजभास्कर–यदि प्रभाचन्द्रने प्रमेयकमलको विकसित करनेके लिए मार्त्तण्ड बनानेके पहिले प्रवचनसारसरोजके विकासार्थ भास्करका उदय किया हो तो कोई अनहोनी बात न होकर अधिक संभव और निश्चित बात मालूम होती है। (प्रमेय) कमलमार्त्तण्ड, (न्याय) कुमुदचन्द्र, (शब्द) अम्भोजभास्कर जैसे सुन्दर नामोंकी कल्पिका प्रभाचन्द्रीय बुद्धिने ही (प्रवचनसार) सरोजभास्करका उदय किया है। इस ग्रन्थकी संवत् १५५५ की लिखी हुई जीर्ण प्रति हमारे सामने है। यह प्रति ऐलक पन्नालाल सरस्वती भवन बम्बईकी है। इसका परिचय संक्षेपमें इस प्रकार है–

पत्रसंख्या ५३, श्लोकसंख्या १७४६, साइज १३×६। एक पत्रमें १२ पंक्तियां तथा एक पंक्तिमें ४२-४३ अक्षर हैं। लिखावट अच्छी और शुद्धप्राय है। प्रारम्भ–

"ओं नमः सर्वज्ञाय शिष्याशयः।
वीरं प्रवचनसारं निखिलार्थं निर्मलजनानन्दम्।
वक्ष्ये सुखावबोधं निर्वाणपदं प्रणम्याप्तम्॥

श्रीकुन्दकुन्दाचार्यः सकललोकोपकारकं मोक्षमार्गमध्ययनरुचिविनेयाशयवशेनोपदर्शयितुकामो निर्विघ्नतः शास्त्रपरिसमाप्त्यादिकं फलमभिलषन्निष्टदेवताविशेषं शास्त्रस्यादौ नमस्कुर्वन्नाह॥ छ॥ एस सुरासुर···।"

अन्त–"इति श्रीप्रभाचन्द्रदेवविरचिते प्रवचनसारसरोजभास्करे शुभोपयोगाधिकारः समाप्तः॥छ॥ संवत् १५५५ वर्षे माघमासे शुक्लपक्षे पून्य(र्णि)मायां तिथौ गुरुवासरे गिरिपुरे व्या० पुरुषोत्तम लि० ग्रन्थसंख्या षट्चत्वारिंशदधिकानि सप्तदशशतानि॥ १७४६॥"

मध्यकी सन्धियोंका पुष्पिकालेख–"इति श्री प्रभाचन्द्रदेवविरचिते प्रवचनसारसरोजभास्करे···" है।

इस टीका में जगह जगह उद्धृत दार्शनिक अवतरण, दार्शनिक व्याख्यापद्धति एवं सरल प्रसन्नशैली इसे न्यायकुमुदचन्द्रादिके रचयिता प्रभाचन्द्रकी कृति सिद्ध करनेके लिए पर्याप्त हैं। अवतरण–(गा० २।१०) "नाशोत्पादौ समं यद्वन्नामोन्नामौ तुलान्तयोः" (गा० २।२८) "स्वोपात्तकर्मवशाद् भवाद् भवान्तरावाप्तिः संसारः" इनमें दूसरा अवतरण राजवार्तिक का तथा प्रथम किसी बौद्ध

ग्रन्थका है। ये दोनों अवतरण प्रमेयकमल० और न्यायकुमुद० में भी पाए जाते हैं। इस व्याख्याकी दार्शनिक शैलीके नमूने–

(गा० २।१३) "यदि हि द्रव्यं स्वयं सदात्मकं न स्यात् तदा स्वयमसदात्मकं सत्तातः पृथग्वा ? तत्राद्यः पक्षो न भवति; यदि सत् सद्रूपं द्रव्यं तदा असद्रूपं ध्रुवं निश्चयेन न तं तत् भवति। कथं केन प्रकारेण द्रव्यं खरविषाणवत्। हवदि पुणो अण्णं वा । अथ सत्तातः पुनरन्यद्वा पृथग्भूतं द्रव्यं भवति तदा अतः पृथग्भूतस्यापि सत्त्वे सत्ताकल्पना व्यर्था। सत्तासम्बन्धात्सत्त्वे चान्योन्याश्रयः–सिद्धे हि तत्सत्त्वे सत्तासम्बन्धसिद्धिः तस्याश्च सम्बन्धसिद्धौ सत्यां तत्सत्त्वसिद्धिरिति। तत्सत्त्वसिद्धिमन्तरेणापि सत्तासम्बन्धे खपुष्पादेरपि तत्प्रसङ्गः। तस्मात् द्रव्यं स्वयं सत्ता स्वयमेव सदभ्युपगन्तव्यम्।" (गा० २।१६) "...तथाहि-द्रवति द्रोष्यत्यदुद्रवत्तांस्तान् गुणपर्यायान् गुणपर्यायैर्वा द्रोष्यते द्रुतं वा द्रव्यमिति। गम्यते उपलभ्यते द्रव्यमनेनेति गुणः। द्रव्यं वा द्रव्यान्तरात् येन विशिष्यते स गुणः। इत्येतस्मादर्थविशेषात् यद् द्रव्यस्य गुणरूपे गुणरूपेण गुणस्य वा द्रव्यरूपेणाभवनं एसो एष हि अतद्भावः।" इन गाथाओंकी अमृतचन्द्रीय और जयसेनीय टीकाओंसे इस टीकाकी तुलना करने पर इसकी दार्शनिकप्रसूतता अपने आप झलक मारती है। इस टीकाका जयसेनीयटीका पर प्रभाव है और जयसेनीयटीकासे यह निश्चय ही पूर्वकालीन है।

अमृतचन्द्राचार्यने प्रवचनसारकी जिन ३६ गाथाओंकी व्याख्या नहीं की है प्रायः वे गाथाएँ प्रवचनसारसरोजभास्करमें यथास्थान व्याख्यात हैं। जयसेनीयटीकामें प्रभाचन्द्रका अनुसरण करते हुए इन गाथाओंकी व्याख्या की गई है। हाँ, जयसेनीयटीकामें दो तीन गाथाएँ अतिरिक्त भी हैं। इस टीकाका लक्ष्य है गाथाओंका संक्षेपसे खुलासा करना। परन्तु प्रभाचन्द्र प्रारम्भसे ही दर्शनशास्त्रके विशिष्ट अभ्यासी रहे हैं इसलिए जहाँ खास अवसर आया वहाँ उन्होंने संक्षेपसे दार्शनिक मुद्दोंका भी निर्देश किया है।

प्रो० ए० एन० उपाध्येने प्रवचनसारकी भूमिकामें भावत्रिभंगीकार श्रुतमुनिके 'सारत्रयनिपुण प्रभाचन्द्र' के उल्लेखसे प्रवचनसारसरोजभास्करके कर्त्ताका समय १४ वीं सदीका प्रारम्भिक भाग सूचित किया है। परन्तु यह संभावना किसी दृढ़ आधार से नहीं की गई है।

जयसेनीय टीकापर इसका प्रभाव होनेसे ये उनसे प्राक्कालीन तो हैं ही। आ० जयसेन अपनी टीका में (पृ० २९) केवलिकवलाहारके खंडनका उपसंहार करते हुए लिखते हैं कि–"अन्येपि पिण्डशुद्धिकथिता बहवो दोषाः ते चान्यत्र तर्कशास्त्रे ज्ञातव्या अत्र चाध्यात्मग्रन्थत्वान्नोच्यन्ते।" सम्भव है यहाँ तर्कशास्त्रसे प्रभाचन्द्रके प्रमेयकमलमार्त्तण्ड आदिकी विवक्षा हो। अस्तु, मुझे तो यह संक्षिप्त पर विशद टीका प्रभाचन्द्राचार्यकी प्रारम्भिककृति मालूम होती है।

गद्यकथाकोश–यह ग्रन्थ भी इन्हीं प्रभाचन्द्रका मालूम होता है । इसकी प्रतिमें ८९ वीं कथाके बाद "श्रीजयसिंहदेवराज्ये" प्रशस्ति है । इसके प्रशस्ति श्लोकोंका प्रभाचन्द्रकृत न्यायकुमुदचन्द्र आदिके प्रशस्तिश्लोकोंसे पूरा पूरा सादृश्य है । इसका मंगलश्लोक यह है–

"प्रणम्य मोक्षप्रदमस्तदोषं प्रकृष्टपुण्यप्रभवं जिनेन्द्रम् ।
वक्ष्येऽत्र भव्यप्रतिबोधनार्थमाराधनासत्सुकथाप्रबन्धः ॥"

८९ वीं कथाके अनन्तर "जयसिंहदेवराज्ये" प्रशस्ति लिखकर ग्रन्थ समाप्त कर दिया गया है । इसके अनन्तर भी कुछ कथाएँ लिखीं हैं । और अन्तमें "सुकोमलैः सर्वसुखावबोधैः" श्लोक तथा "इति भट्टारकप्रभाचन्द्रकृतः कथाकोशः समाप्तः" यह पुष्पिकालेख है । इस तरह इसमें दो स्थलों पर ग्रन्थसमाप्तिकी सूचना है जो खासतौरसे विचारणीय है । हो सकता है कि प्रभाचन्द्रने प्रारम्भकी ८९ कथाएँ ही बनाई हों और बादकी कथाएँ किसी दूसरे भट्टारकप्रभाचन्द्रने । अथवा लेखकने भूलसे ८९ वीं कथाके बाद ही ग्रन्थसमाप्तिसूचक पुष्पिकालेख लिख दिया हो । इसको खासतौरसे जाँचे बिना अभी विशेष कुछ कहना शक्य नहीं है ।

मेरे विचारसे प्रभाचन्द्रने तत्त्वार्थवृत्तिपदविवरण और प्रवचनसारसरोजभास्कर भोजदेवके राज्यसे पहिले अपनी प्रारम्भिक अवस्थामें बनाए होंगे यही कारण है कि उनमें 'भोजदेवराज्ये' या 'जयसिंहदेवराज्ये' कोई प्रशस्ति नहीं पाई जाती और न उन ग्रन्थोंमें प्रमेयकमलमार्त्तण्ड आदिका उल्लेख ही पाया जाता है । इस तरह हम प्रभाचन्द्रकी ग्रन्थरचनाका क्रम इस प्रकार समझते हैं–तत्त्वार्थवृत्तिपदविवरण, प्रवचनसारसरोजभास्कर, प्रमेयकमलमार्त्तण्ड, न्यायकुमुदचन्द्र, शब्दा-

---

१ न्यायकुमुदचन्द्र प्रथमभागकी प्रस्तावना पृ० १२२—

"यैराराध्य चतुर्विधमनुपमामाराधनां निर्मलाम् ।
प्राप्तं सर्वसुखास्पदं निरुपमं स्वर्गापवर्गप्रदा (?) ।
तेषां धर्मकथाप्रपञ्चरचनास्वाराधना संस्थिता ।
स्थेयात् कर्मविशुद्धिहेतुरमला चन्द्रार्कतारावधि ॥ १ ॥
सुकोमलैः सर्वसुखावबोधैः पदैः प्रभाचन्द्रकृतः प्रबन्धः ।
कल्याणकालेऽथ जिनेश्वराणां सुरेन्द्रदन्तीव विराजतेऽसौ ॥ २ ॥

श्रीजयसिंहदेवराज्ये श्रीमद्धारानिवासिना परापरपञ्चपरमेष्ठिप्रणामोपार्जितामलपुण्यनिराकृतनिखिलमलकलङ्केन श्रीमत्प्रभाचन्द्रपण्डितेन आराधनासत्कथाप्रबन्धः कृतः ।"

२ योगसूत्रपर भोजदेवकी राजमार्त्तण्ड नामक टीका पाई जाती है । संभव है प्रमेयकमलमार्त्तण्ड और राजमार्त्तण्ड नाम परस्पर प्रभावित हों ।

म्भोजभास्कर, महापुराणटिप्पण और गद्यकथाकोश। श्रीमान् प्रेमीजीने रत्नकरण्ड-

---

१ पं० जुगलकिशोर जी मुख्तारने रत्नकरण्डश्रावकाचार की प्रस्तावनामें रत्नकरण्ड-श्रावकाचारकी टीका और समाधितन्त्रटीकाको एकही प्रभाचन्द्र द्वारा रचित सिद्ध किया है; जो ठीक है । पर आपने इन प्रभाचन्द्रको प्रमेयकमलमार्त्तण्ड आदिके रचयिता तर्कग्रन्थकार प्रभाचन्द्रसे भिन्न सिद्ध करनेका जो प्रयत्न किया है वह वस्तुतः दृढ़ प्रमाणों पर अवलम्बित नहीं है । आपके मुख्यप्रमाण हैं कि-"प्रभाचन्द्रका आदिपुराणकारने स्मरण किया है इस लिए ये ईसाकी नवमशताब्दीके विद्वान् हैं, और इस टीकामें यशस्तिलकचम्पू (ई० ९५९) वसुनन्दिश्रावकाचार (अनुमानतः वि० की १३ वीं शताब्दीका पूर्व भाग) तथा पद्मनन्दि उपासकाचार (अनुमानतः वि० सं० ११८०) के श्लोक उद्धृत पाए जाते हैं, इसलिए यह टीका प्रमेयकमलमार्त्तण्ड आदिके रचयिता प्रभाचन्द्रकी नहीं हो सकती ।" इनके विषयमें मेरा यह वक्तव्य है कि-जब प्रभाचन्द्र का समय अन्य अनेक पुष्ट प्रमाणोंसे ईसाकी ग्यारहवीं शताब्दी सिद्ध होता है तब यदि ये टीकाएँ भी उन्हीं प्रभाचन्द्रकी ही हों तो भी इनमें यशस्तिलकचम्पू और नीतिवाक्यामृतके वाक्योंका उद्धृत होना अस्वाभाविक एवं अनैतिहासिक नहीं है। वसुनन्दि और पद्मनन्दिका समय भी विक्रमकी १२ वीं और तेरहवीं सदी अनुमानमात्र है, कोई दृढ़ प्रमाण इसके साधक नहीं दिए गए हैं। पद्मनन्दि शुभचन्द्रके शिष्य थे यह बात पद्मनन्दिके ग्रन्थसे तो नहीं मालूम होती। वसुनन्दिकी 'पडिगहमुच्चट्ठाणं' गाथा स्वयं उन्हीं की बनाई है या अन्य किसी आचार्यकी यह भी अभी निश्चित नहीं है। पद्मनन्दिश्रावकाचारके 'अध्रुवाशरणे' आदि श्लोक भी रत्नकरण्डटीकामें पद्मनन्दिका नाम लेकर उद्धृत नहीं हैं और न इन श्लोकोंके पहिले 'उक्तं च, तथा चोक्तम्' आदि कोई पद ही दिया गया है जिससे इन्हें उद्धृत ही माना जाय। तात्पर्य यह कि मुख्तार सा० ने इन टीकाओंके प्रसिद्ध प्रभाचन्द्रकृत न होने में जो प्रमाण दिए हैं वे दृढ़ नहीं हैं । रत्नकरण्डटीका तथा समाधितन्त्रटीकामें प्रमेयकमलमार्त्तण्ड और न्यायकुमुदचन्द्रका एक साथ विशिष्टशैलीसे उल्लेख होना इसकी सूचना करता है कि ये टीकाएँ भी प्रसिद्ध प्रभाचन्द्रकी ही होनी चाहिए। वे उल्लेख इस प्रकार हैं-

"तदलमतिप्रसङ्गेन प्रमेयकमलमार्त्तण्डे न्यायकुमुदचन्द्रे प्रपञ्चतः प्ररूपणात्"-रत्नक० टी० पृ० ६ । "यैः पुनर्योगसांख्यैर्मुक्तौ तत्प्रच्युतिरात्मनोऽभ्युपगता ते प्रमेयकमलमार्त्तण्डे न्यायकुमुदचन्द्रे च मोक्षविचारे विस्तरतः प्रत्याख्याताः ।"-समाधितन्त्रटी० पृ० १५ ।

इन दोनो अवतरणोंकी प्रभाचन्द्रकृत शब्दाम्भोजभास्करके निम्नलिखित अवतरणसे तुलना करने पर स्पष्ट मालूम हो जाता है कि शब्दाम्भोजभास्करके कर्त्ताने ही उक्त टीकाओंको बनाया है—

"तदात्मकत्वं चार्थस्य अध्यक्षतोऽनुमानादेश्च यथा सिद्ध्यति तथा प्रमेयकमलमार्त्तण्डे न्यायकुमुदचन्द्रे च प्ररूपितमिह द्रष्टव्यम् ।"-शब्दाम्भोजभास्कर ।

प्रभाचन्द्रकृत गद्यकथाकोशमें पाई जानेवाली अञ्जनचोर आदिकी कथाओंसे रत्नकरण्डटीकागत कथाओंका अक्षरशः सादृश्य है । इति ।

टीका, समाधितन्त्रटीका क्रियाकलापटीका*, आत्मानुशासनतिलक† आदि ग्रन्थोंकी

* क्रियाकलापटीकाकी एक लिखित प्रति बम्बईके सरस्वती भवनमें है। उसके मंगल और प्रशस्ति श्लोक निम्नलिखित हैं—

मंगल–"जिनेन्द्रमुन्मूलितकर्मबन्धं प्रणम्य सन्मार्गकृतस्वरूपम्।
अनन्तबोधादिभवं गुणौघं क्रियाकलापं प्रकटं प्रवक्ष्ये ॥"
प्रशस्ति–"वन्दे मोहतमोविनाशनपटुस्त्रैलोक्यदीपप्रभुः
संसृद्धर्तिसमन्वितस्य निखिलस्नेहस्य संशोषकः।
सिद्धान्तादिसमस्तशास्त्रकिरणः श्रीपद्मनन्दिप्रभुः
तच्छिष्यात्प्रकटार्थतां स्तुतिपदं प्राप्तं प्रभाचन्द्रतः ॥ १ ॥
यो रात्रौ दिवसे पृथि प्रयतां (?) दोपा यतीनां कुतो प्योपाताः (?)
प्रलये तु···रमलस्तेषां महादर्शितः।
श्रीमद्गौतमनाभिभिर्गणधरैर्लोकत्रयोद्द्योतकैः, सव्यक्त (?)
सकलोऽप्यसौ यतिपतेर्जातः प्रभाचन्द्रतः ॥ २ ॥
यः (यत्) सर्वात्महितं न वर्णसहितं न स्पन्दितौष्ठद्वयम्,
नो वाञ्छाकलितन्न दोषमलिनं न श्वासरुद्ध (रुद्ध) क्रमम्।
शान्तामर्थविषयैः (मर्षविषैः) समं परशु (पशु) गणैराकर्णितं कर्णतः,
तद्वत् सर्वविदः प्रणष्टविपदः पायादपूर्वं वचः ॥ ३ ॥"

इन प्रशस्तिश्लोकोंसे ज्ञात होता है कि जिन प्रभाचन्द्रने क्रियाकलापटीका रची है वे पद्मनन्दिसैद्धान्तिकके शिष्य थे। न्यायकुमुदचन्द्र आदिके कर्ता प्रभाचन्द्र भी पद्मनन्दि सैद्धान्तिकके ही शिष्य थे, अतः क्रियाकलापटीका और प्रमेयकमलमार्त्तण्ड आदिके कर्ता एक ही प्रभाचन्द्र हैं इसमें कोई सन्देह नहीं रह जाता। प्रशस्तिश्लोकोंकी रचनाशैली भी प्रमेयकमल० आदिकी प्रशस्तियोंसे मिलती जुलती है।

† आत्मानुशासनतिलककी प्रति श्री प्रेमीजीने भेजी है। उसका मंगल और प्रशस्ति इस प्रकार है–

मंगल–"वीरं प्रणम्य भववारिनिधिप्रपोतमुद्द्योतिताखिलपदार्थमनल्पपुण्यम्।
निर्वाणमार्गमनवद्यगुणप्रबन्धमात्मानुशासनमहं प्रवरं प्रवक्ष्ये ॥"

प्रशस्ति–"मोक्षोपायमनल्पपुण्यममलज्ञानोदयं निर्मलम्।
भव्यार्थं परमं प्रभेन्दुकृतिना व्यक्तैः प्रसन्नैः पदैः।
व्याख्यानं वरमात्मशासनमिदं व्यामोहविच्छेदतः।
सूक्तार्थेषु कृतादरैरहरहश्चेतस्यलं चिन्त्यताम् ॥ १ ॥

इतिश्री आत्मानुशासन(नं) सतिलक(कं) प्रभाचन्द्राचार्य-
विरचित(तं) सम्पूर्णम्।"

भी प्रभाचन्द्रकृत होनेकी संभावना की है, वह खास तौरसे विचारणीय है। यथावसर इन ग्रन्थोंके विषयमें विशेष प्रकाश डाला जायगा। अन्तमें मैं उन सब ग्रन्थकार विद्वानोंके प्रति अपनी हार्दिक कृतज्ञता प्रकट करता हूँ जिनके ग्रन्थोंसे इस प्रस्तावनामें सहायता मिली है।

फाल्गुनशुक्ल द्वादशी
आष्टाह्निकपर्व
वीर नि० सं० २४६७

न्यायाचार्य महेन्द्रकुमार शास्त्री.
स्याद्वाद विद्यालय काशी.

परीक्षामुखसूत्राणां तुलना ।

न्यायप्र०—न्यायप्रवेशः [बड़ौदा सीरिज़]
न्यायबि०—न्यायबिन्दुः [चौखम्बा सीरिज़]
न्यायविनि०—न्यायविनिश्चयः [अकलङ्कग्रन्थत्रयान्तर्गतः सिंघी सीरिज़ कलकत्ता]
न्यायसा०—न्यायसारः [एशियाटिक सो० कलकत्ता]
न्याया०—न्यायावतारः [श्वे० कान्फ्रेंस बम्बई]
प्रमाणनय०—प्रमाणनयतत्त्वालोकालङ्कारः [यशो० काशी]
प्रमाणप०—प्रमाणपरीक्षा [जैनसिद्धान्तप्र० कलकत्ता]
प्रमाणमी०—प्रमाणमीमांसा [सिंघी जैन सीरिज़ कलकत्ता]
प्रमाणसं०—प्रमाणसंग्रहः [सिंघी जैन सीरिज़]
लघी० स्ववृ०—लघीयस्त्रयं स्ववृत्तियुतम् [सिंघी जैन सीरिज़ कलकत्ता]

परीक्षामु०
१।१.—प्रमाणनय० १।२. प्रमाणमी० १।१।२.
१।२.—लघी० पृ० २१ पं० ६. प्रमाणनय० १।३.
१।३.—प्रमाणनय० १।६.
१।६,७,८.—प्रमाणनय० १।१६.
१।११.—प्रमाणनय० १।१७.
१।१३.—प्रमाणनय० १।२०. प्रमाणमी० १।१।८.
२।१,२.—लघी० का० ३. प्रमाणनय० २।१. प्रमाणमी० १।१।९,१०.
२।३.—न्याया० का० ४. लघी० का० ३. प्रमाणनय० २।३. प्रमाणमी० १।१।१३.
२।४.—लघी० का० ४. प्रमाणनय० २।३. प्रमाणमी० १।१।१४.
२।५.—लघी० स्व० का० ६१. प्रमाणमी० १।१।२०.
२।६.—लघी० स्ववृ० का० ५५. प्रमाणमी० १।१।२५.
२।७.—लघी० का० ५५.
२।११.—न्याया० का० २७. लघी० स्ववृ० का० ४. प्रमाणनय० २।२४. प्रमाणमी० १।१।१५.
३।१.—न्याया० का० ३१. लघी० का० ३. प्रमाणनय० ३।१. प्रमाणमी० १।२।१.
३।२.—लघी० का० १०. प्रमाणनय० ३।१. प्रमाणमी० १।२।२.
३।३,४.—प्रमाणप० पृ० ६९. प्रमाणनय० ३।१,२. प्रमाणमी० १।२।३.
३।५-१०.—प्रमाणप० पृ० ६९. प्रमाणनय० ३।४. प्रमाणमी० १।२।४.
३।११,१२,१३.—प्रमाणसं का० १२. प्रमाणप० पृ० ७०. प्रमाणनय० ३।५,६. प्रमाणमी० १।२।५.

३।१४.—न्याया० का० ५. लघी० का० १२. न्यायविनि० का० १७०. प्रमाणप० पृ० ७०. प्रमाणमी० १।२।७.

३।१५.—न्यायविनि० का० २६९. प्रमाणसं० का० २१. प्रमाणप० पृ० ७०. प्रमाणनय० ३।९.

३।१६.—प्रमाणमी० १।२।१०.

३।१९.—न्यायविनि० का० ३२९. प्रमाणमी० १।२।११.

३।२०.—न्यायप्र० पृ० १ पं० ७. न्यायबि० पृ० ७९ पं० ३,१२. न्यायविनि० का० १७२. प्रमाणसं० का० २०. प्रमाणनय० ३।१२. प्रमाणमी० १।२।१३.

३।२१.—प्रमाणनय० ३।१३.

३।२२.—प्रमाणनय० ३।१४,१५.

३।२५.—प्रमाणमी० १।२।१५.

३।२७.—न्यायप्र० पृ० १ पं० ६. प्रमाणनय० ३।१८. प्रमाणमी० १।२।१६.

३।२८-३०.—प्रमाणनय० ३।१९,२०. प्रमाणमी० १।२।१७.

३।३२.—प्रमाणनय० ३।१६.

३।३४,३५.—प्रमाणनय० ३।२२. प्रमाणमी० २।१।८.

३।३६.—प्रमाणनय० ३।२३.

३।३७.—न्यायबि० पृ० ११७ पं० ११. प्रमाणनय० ३।२६. प्रमाणमी० १।२।१८.

३।३८.—प्रमाणनय० ३।३१.

३।३९.—प्रमाणनय० ३।३२.

३।४०.—प्रमाणनय० ३।३३.

३।४१.—प्रमाणनय० ३।३४.

३।४४.—प्रमाणनय० ३।३७.

३।४५.—प्रमाणनय० ३।३८.

३।४६.—प्रमाणनय० ३।३९. प्रमाणमी० २।१।१०.

३।४७.—न्यायप्र० पृ० १ पं० १५. प्रमाणनय० ३।४१. प्रमाणमी० १।२।२१.

३।४८.—न्यायप्र० पृ० १ पं० १६. न्याया० का० १८. प्रमाणनय० ३।४२,४३. प्रमाणमी० १।२।२२.

३।४९.—न्यायप्र० पृ० २ पं० २. न्याया० का० १९. प्रमाणनय० ३।४४,४५. प्रमाणमी० १।२।२३.

४।५०.—प्रमाणनय० ३।४६,४७. प्रमाणमी० २।१।१४.

३।५१.—प्रमाणनय० ३।४८,४९. प्रमाणमी० २।१।१५.

३।५२,५३.—न्यायबि० २।१,२. न्याया० का० १०. न्यायसा० पृ० ५ पं० १०. प्रमाणनय० ३।७. प्रमाणमी० १।२।८.

३।५४.—न्यायबि० २।३. प्रमाणनय० ३।८. प्रमाणमी० १।२।९.

३।५५,५६.—न्यायबि० ३।१,२. न्याया० का० १०,१३. प्रमाणनय० ३।२१. प्रमाणमी० २।१।१,२.

३।५७.—प्रमाणनय० ३।५१.
३।५८.—प्रमाणनय० ३।५२.
३।५९.—प्रमाणनय० ३।६४,६५.
३।६०.—प्रमाणनय० ३।६६.
३।६१.—प्रमाणनय० ३।६७.
३।६२.—प्रमाणनय० ३।६८.
३।६३.—प्रमाणनय० ३।६९,७०.
३।६४.—प्रमाणनय० ३।७२.
३।६५.—प्रमाणनय० ३।७३.
३।६७.—प्रमाणप० पृ० ७२.
३।६८.—लघी० का० १४. प्रमाणप० पृ० ७३. प्रमाणनय० ३।७६.
३।६९.—प्रमाणप० पृ० ७३. प्रमाणनय० ३।७७.
३।७०.—प्रमाणनय० ३।७८.
३।७१.—प्रमाणनय० ३।८२.
३।७२,७३.—न्यायवि० पृ० ४९,५०. प्रमाणप० पृ० ७३.
३।७५.—प्रमाणप० पृ० ७३. प्रमाणनय० ३।८६.
३।७६.—प्रमाणप० पृ० ७३. प्रमाणनय० ३।८७.
३।७८.—प्रमाणनय० ३।९०,९१.
३।७९.—प्रमाणनय० ३।९२.
३।८०.—न्यायबि० पृ० ४९. प्रमाणप० पृ० ७४. प्रमाणनय० ३।९३.
३।८१.—न्यायबि० पृ० ४८. प्रमाणनय० ३।९४.
३।८३.—न्यायबि० पृ० ५३. प्रमाणप० पृ० ७४. प्रमाणनय० ३।९६.
३।८४.—प्रमाणप० पृ० ७४. प्रमाणनय० ३।९७.
३।८७.—प्रमाणनय० ३।१०१.
३।८८.—प्रमाणनय० ३।१०२.
३।८९.—प्रमाणनय० ३।१०३.
३।९४,९५.—न्यायबि० पृ० ६२-६३. न्याया० का० १७. प्रमाणनय० ३।२७-३०. प्रमाणमी० २।१।३-६.
३।९८.—न्याया० का० १४. प्रमाणमी० २।१।७.
३।९९.—प्रमाणनय० ४।१.
३।१००.—प्रमाणनय० ४।११.
३।१०१.—प्रमाणनय० ४।३.
४।१.—न्याया० श्लो० २९. लघी० का० ७. प्रमाणप० पृ० ७९. प्रमाणनय० ५।१. प्रमाणमी० १।१।३०.
४।२.—प्रमाणनय० ५।२. प्रमाणमी० १।१।३३.

४।३.—प्रमाणनय० ५।३.
४।४.—प्रमाणनय० ५।४.
४।५.—प्रमाणनय० ५।५.
४।८.—प्रमाणनय० ५।८.
४।९.—लघी० स्वबृ० का० ६७.
५।१.—आप्तमी० का० १०२. न्याया० का० २८. न्यायविनि० का० ४७६. प्रमाणप० पृ० ७९. प्रमाणनय० ६।३–५. प्रमाणमी० १।१।३८,४०.
५।३.—प्रमाणनय० ६।१०. प्रमाणमी० १।१।४१.
६।१.—प्रमाणनय० ६।२३.
६।२.—प्रमाणनय० ६।२४.
६।३,४.—प्रमाणनय० ६।२५,२६.
६।६.—प्रमाणनय० ६।२७,२९.
६।८.—प्रमाणनय० ६।३१.
६।९.—प्रमाणनय० ६।३३,३४.
६।१०.—प्रमाणनय० ६।३५.
६।११.—प्रमाणनय० ६।३७.
६।१२.—न्यायप्र० पृ० २ पं० १३. प्रमाणनय० ६।३८.
६।१३.—प्रमाणनय० ६।४६.
६।१४.—न्यायप्र० पृ० ३ पं० ४.
६।१५.—न्यायप्र० पृ० २ न्यायवि० पृ० ८४,८५. प्रमाणनय० ६।४०. प्रमाणमी० १।२।१४.
६।१६.—न्यायप्र० पृ० २ पं० १७. न्यायबि० पृ० ८४. प्रमाणनय० ६।४१.
६।१७.—न्यायप्र० पृ० २ पं १८. न्यायबि० पृ० ८४. प्रमाणनय० ६।४२.
६।१८.—न्यायप्र० पृ० २ पं० १९. प्रमाणनय० ६।४३.
६।१९.—न्यायप्र० पृ० २ पं० २०. प्रमाणनय० ६।४४.
६।२०.—न्यायप्र० पृ० २ पं० २१. प्रमाणनय० ६।४५.
६।२१.—न्यायप्र० पृ० ३ पं० ८. न्याया० का० २२. न्यायविनि० का० ३६६. प्रमाणनय० ६।४७. प्रमाणमी० २।१।१६.
६।२२.—न्याया० का० २३. प्रमाणनय० ६।४८. प्रमाणमी० २।१।१७.
६।२३.—न्यायप्र० पृ० ३ पं० १२. न्यायवि० पृ० ८९. न्यायविनि० का० ३६५. प्रमाणनय० ६।५०.
६।२५.—न्यायप्र० पृ० ३ पं० १४. न्यायबि० पृ० ९१.
६।२९.—न्यायप्र० पृ० ५ पं० ६. न्याया० का० २३. प्रमाणनय० ६।५२. प्रमाणमी० २।१।२०.
६।३०.—न्यायबि० पृ० १०५. न्याया० का० २३. प्रमाणनय० ६।५४. प्रमाणमी० २।१।२१.

§१३१.—प्रमाणनय० ६।५६.

§१३३.—प्रमाणनय० ६।५७.

§१३५.—न्यायविनि० का० ३७०.

§१४०.—न्यायप्र० पृ० ५ पं २०. न्यायबि० पृ० ११९. न्याया० का० २४. न्यायविनि० का० ३८०. प्रमाणनय० ६।५८. प्रमाणमी० २।१।२२.

§१४१.—न्यायप्र० पृ० ६ पं० १. न्यायबि० पृ० १२२. प्रमाणनय० ६।६०-६२. प्रमाणमी० २।१।२३.

§१४२.—न्यायप्र० पृ० ६. पं० १२. न्यायबि० पृ० १२४. प्रमाणनय० ६।६८. प्रमाणमी० २।१।२६.

§१४४.—न्यायप्र० पृ० ६ पं० १४. न्यायबि० पृ० १२५. न्याया० का० २५. प्रमाणनय० ६।६९. प्रमाणमी० २।१।२४.

§१४५.—न्यायप्र० पृ० ७ पं० ७. न्यायबि० पृ० १३०. प्रमाणनय० ६।७९. प्रमाणमी० २।१।२६.

§१५१.—प्रमाणनय० ६।८३.

§१५२.—प्रमाणनय० ६।८४.

§१५५.—प्रमाणनय० ६।८५.

§१६१.—प्रमाणनय० ६।८६.

§१६६.—प्रमाणनय० ६।८७.

प्रमेयकमलमार्त्तण्डस्य विषयानुक्रमः।

इति प्रथमः परिच्छेदः ।

विषयाः पृ०

विषयाः पृ०

विषयाः पृ०

इति द्वितीयः परिच्छेदः।

अथ तृतीयः परिच्छेदः (उत्तरार्धम्)

इति तृतीयः परिच्छेदः ।

विषयाः पृ०

इति चतुर्थः परिच्छेदः ।

विषयाः पृ०

इति पञ्चमः परिच्छेदः।

इति षष्ठः परिच्छेदः ।

श्रीमाणिक्यनन्द्याचार्यविरचित–परीक्षामुखसूत्रस्य व्याख्यारूपः

श्रीप्रभाचन्द्राचार्यविरचितः

प्रमेयकमलमार्त्तण्डः ।

श्रीस्याद्वादविद्यायै नमः ।

सिद्धेर्धाम[1] महारिमोहहननं कीर्त्तेः[2] परं मन्दिरम्,
मिथ्यात्वप्रतिपक्षमक्षयसुखं संशीतिविध्वंसनम् ।
सर्वप्राणिहितं प्रभेन्दुभवनं[3] सिद्धं प्रमालक्षणम्,
सन्तश्चेतसि चिन्तयन्तु सुधियः श्रीवर्द्धमानं जिनम्[4] ॥१॥ ५

शास्त्रं[5] करोमि वरमल्पतरावबोधो
माणिक्यनन्दिपदपङ्कजसत्प्रसादात् ।
अर्थं[6] न किं स्फुटयति प्रकृतं[7] लघीयाँ-
ल्लोकस्य[8] भानुकरविस्फुरितात्[9] गवाक्षः ॥ २ ॥

ये[10] नूनं प्रथयन्ति नोऽसमगुणा[11] मोहादवज्ञां जनाः, १०
ते तिष्ठन्तु न तान्प्रति प्रयतितैः[12] प्रारभ्यते प्रक्रमः ।
सन्तः सन्ति गुणानुरागमनसो ये धीधनास्तान्प्रति,
प्रायः[13] शास्त्रकृतो[14] यदत्र[15] हृदये वृत्तं[16] तदाख्यायते ॥ ३ ॥

१ भव्यसिद्धिं प्रति कारणं भवति भगवानत आश्रयत्वेनाभिधीयते । २ वाण्याः । ३ आश्रयम् । ४ शास्त्रादौ देवशास्त्रगुरवो नमस्करणीया अत एव देवनमस्कृतौ श्रीवर्द्धमानं विशेष्यं कृत्वा हेतुहेतुमद्भावतयाऽन्वयानुसारेणान्यानि विशेषणानि योजयेत्, ततः शास्त्रनमस्कृतौ प्रमालक्षणं विशेष्यं कृत्वा, गुरुनमस्कृतौ जिनं विशेष्यं कृत्वा, चान्यानि विशेषणानि योजयेत् । ५ इष्टदेवतामभिष्टुत्य शास्त्रं करोमीति प्रतिज्ञां कुर्वन्ति सूरयः । ६ अपि । ७ माहात्म्यात् । ८ दृष्टिगोचरं । ९ पश्यतः (इति शेषः) । १० यद्यप्ययं प्रक्रमो भवद्भिः क्रियते, तथापि भवत्कृते प्रक्रमे केचन जना अवज्ञां विदधानाः सन्तीत्याह । ११ वक्रगुणाः पुरुषाः । १२ औणादिकोऽयमिकारान्तस्ततस्तस् । प्रयत्नादित्यर्थः । १३ यद्यप्ययं प्रक्रमः प्रारभ्यते–तथापि स्वरुचिविरचितत्वात्सतामनादरणीयत्वं न स्यादित्याह प्राय इति बाहुल्येनेत्यर्थः । १४ माणिक्यनन्दिभट्टारकस्य । १५ परीक्षामुखालङ्कारे । १६ प्रवृत्तं ।

त्यजति[1] न विदधानः कार्यमुद्विज्य[2] धीमान्
खलजनपरिवृत्तेः[3] स्पर्धते किन्तु तेन ।
किमु न वितनुतेऽर्कः पद्मबोधं प्रबुद्ध-
स्तदपहतिविधायी शीतरश्मिर्यदीह ॥ ४ ॥

अजडमदोषं दृष्ट्वा मित्रं[4] सुश्रीकमुद्यतमतुष्यत्[5] ।
विपरीतबन्धु[6]सङ्गतिमुद्दिशति[7] हि कुवलयं[8] किं न ॥ ५ ॥

श्रीमदकलङ्कार्थोऽव्युत्पन्नप्रज्ञैरवगन्तुं न शक्यत इति तद्व्यु-त्पादनाय करतलामलक[9]वत् तदर्थमुद्धृत्य[10] प्रतिपादयितुकामस्त[11]-त्परिज्ञानानुग्रहेच्छाप्रेरितस्तदर्थप्रतिपादनप्रवणं[12] प्रकरणमिदमा[13]-चार्यः प्राह । तत्र[14] प्रकरणस्य सम्बन्धा[15]भिधेयरहितत्वाशङ्कापनोदार्थं[16] तदभिधेयस्य चाऽप्रयोजनवत्त्वपरिहारानभिमतप्रयोजनवत्त्वव्यु-दासाशक्यानुष्ठानत्वनिराकरणदक्षमक्षुण्णसकलशास्त्रार्थसङ्ग्रह-समर्थं 'प्रमाण' इत्यादिश्लोकमाह—

प्रमाणादर्थसंसिद्धिस्तदाभासाद्विपर्ययः ।
इति वक्ष्ये तयोर्लक्ष्म सिद्धमल्पं लघीयसः ॥ १ ॥

सम्बन्धाभिधेयशक्यानुष्ठानेष्टप्रयोजनवन्ति हि[17] शास्त्राणि प्रेक्षा-वद्भिराद्रियन्ते नेतराणि-सम्बन्धाभिधेयरहितस्योन्मत्तादिवाक्य-वत्; तद्वतोऽप्यप्रयोजनवतः काक[18]दन्तपरीक्षावत्; अनभिमत-प्रयोजनवतो वा मातृविवाहोपदेशवत्; अशक्यानुष्ठानस्य वा सर्वज्वरहरतक्षकचूडारत्नालङ्कारोपदेशवत् तैरनादरणीयत्वात् । तदुक्तम्[19]—

१ यद्यपि सतः प्रक्रमः प्रारभ्यते-तथापि दुष्टा दुष्टत्वं न मुञ्चेयुस्तत्तस्यायं प्रक्रमो नारब्धव्य इत्युक्ते त्यजतीत्याह । २ उद्वेगं प्राप्य । ३ व्यापारात् । ४ मित्रं सूर्यं, पक्षे प्रभाचन्द्रम् । ५ तुष्टिमगच्छत् । ६ चन्द्र-। ७ सूचयति । ८ कुमुदं, पक्षे भूमण्डलं (मिथ्यादृष्टिसमूहम्) । ९ मणिवत् । १० संगृह्य । ११ तयोरकलङ्कार्था-व्युत्पन्नयोः यौ परिज्ञानानुग्रहौ तयोर्या इच्छा तया प्रेरितः । १२ दक्षम् । १३ "शास्त्रै-कदेशसम्बन्धं शास्त्रकार्यान्तरस्थितम् । आहुः प्रकरणं नाम शास्त्रभेदं विपश्चितः" ॥ शास्त्रैकदेशेत्यादिविशेषणात् साकल्येन प्रतिपादकभाष्यादेः प्रकरणत्वं परास्तम् । शास्त्र-कार्यान्तरं तु वैशद्यं लघुत्वं च । तच्चोपोद्घातप्रतिपादनभेदाद्द्विविधम् । तत्र प्रतिपाद्यमर्थं बुद्धौ संगृह्य (आलोच्य) प्रागेव तदर्थमर्थान्तरवर्णनमुपोद्घातः । प्रतिपाद्यमर्थं बहिरेव परिज्ञाय पश्चात्तत्सिद्धये तद्धेतुवर्णनं प्रतिपादनम् । सकलप्रतिपादकशास्त्रकार्याद् (प्रकृत-शास्त्रकार्याद्) अन्यत्कार्यं कार्यान्तरम् । १४ शास्त्रावतारे सति । १५ प्रस्तुतस्यार्थस्य अनुरोधेनोत्तरोत्तरस्य विधानं सम्बन्धः । १६ पूर्वोक्तलक्षणः सम्बन्धः । १७ यस्मात् । १८ "काकस्य कति वा दन्ता मेषस्याण्डं कियत्पलम् । गर्दभे कति रोमाणीत्येवं मूर्ख-विचारणा" । १९ ज्ञाताभिधेयमेवेत्यवधारणं समर्थयमानः प्राह ।

"सिद्धार्थं[1][2] सिद्धसम्बन्धं[3] श्रोता श्रोतुं प्रवर्तते ।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः[4] ॥ १ ॥
[मीमांसाश्लो० प्रतिज्ञासू० श्लो० १७]

सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् ।
यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यताम् ॥ २ ॥ ५
[मीमांसाश्लो० प्रतिज्ञासू० श्लो० १२]

अनिर्दिष्टफलं[5] सर्वं न प्रेक्षापूर्वकारिभिः ।
शास्त्रमाद्रियते तेन वाच्यमग्रे[6] प्रयोजनम्[7] ॥ ३ ॥
[ ]

शास्त्रस्य[8] तु फले ज्ञाते तत्प्राप्त्याशावशीकृताः ।
प्रेक्षावन्तः प्रवर्त्तन्ते तेन[9] वाच्यं प्रयोजनम् ॥ ४ ॥ १०
[ ]

यावत्[10] प्रयोजनेन[11]नास्यसम्बन्धो नाभिधीयते ।
असम्बद्धप्रलापित्वाद्भवेत्तावदसङ्गतिः[12] ॥ ५ ॥
[मीमांसाश्लो० प्रतिज्ञासू० श्लो० २०] १५

तस्माद् व्याख्याङ्ग[13]मिच्छद्भिः सहेतुः[14] सप्रयोजनः[15] ।
शास्त्रावतारसम्बन्धो[16]वाच्यो नान्यो[17]ऽस्ति निष्फलः ॥ ६ ॥" इति ।
[मीमांसाश्लो० प्रतिज्ञासू० श्लो० २५]

तत्रा[18]स्य प्रकरणस्य प्रमाणतदाभासयोर्लक्षणमभिधेयम् । अनेन च सहास्य प्रतिपाद्यप्रतिपादकभावलक्षणः सम्बन्धः । शक्यानुष्ठानेष्टप्रयोजनं तु साक्षात्तल्लक्षणव्युत्पत्ति[19]रेव-'इति वक्ष्ये तयोर्लक्ष्म' इत्यनेनाऽभिधीयते । 'प्रमाणादर्थसंसिद्धिः' इत्यादिकं तु परम्परयेति समुदायार्थः[20] । अथेदानीं व्युत्पत्तिद्वारेणाऽवयवार्थोऽभिधीयते । अत्र[21] प्रमाणशब्दः कर्तृकरणभावसाधनः-द्रव्य[22]पर्यायेयो[23]र्भेदाऽभेदात्मकत्वात् स्वार्थैक्य[24]साधकतमत्वा[25]दिविवक्षापेक्षया २०, २५

१ यदाद्रियते । २ अर्थशब्देनाभिधेयं प्रयोजनं च । ३ शास्त्रम् (इति शेषः) । ४ प्रयुज्यते प्रतिपाद्यते इति प्रयोजनमभिधेयं प्रयुक्तिः, प्रयोजनं फलं ताभ्यां सह वर्त्तते । ५ ज्ञातफलमेवेति समर्थयते । ६ आदौ । ७ फलम् । ८ निरूपितेपि फले प्रवर्तनं न भविष्यतीति शङ्कायामाह । ९ कारणेन । १० सिद्धसम्बन्धमेव पदं समर्थयमानोऽग्रेतनश्लोके ब्रूते । ११ अभिधेयेन । १२ परस्परसम्बन्धरहितं शास्त्रम् । १३ सम्बन्धादित्रयम् । १४ साभिधेयः । १५ सफलः । १६ साभिधेयः सप्रयोजनश्च सम्बन्धो वाच्यः । १७ सम्बन्धादित्रयरहितः । १८ सम्बन्धादित्रये वक्तव्ये आदरणीयत्वे सति शास्त्रप्रारम्भकाले । १९ प्रमाणेतरलक्षणस्य व्युत्पत्तिमन्तरेणापवर्गादेः प्राप्तिर्न स्यादत एव साक्षात्त्वम् । २० श्लोकस्य । २१ श्लोके । २२ आत्मद्रव्यम् । २३ ज्ञानपर्यायः । २४ साक्षाद् व्यापारे । २५ भाव ।

तद्भावाऽविरोधात्। तत्र क्षयोपशमविशेषवशात्-'स्वपरप्रमेयस्वरूपं प्रमिमीते यथावज्जानाति' इति प्रमाणमात्मा, स्वपरग्रहणपरिणतस्यापरतन्त्रस्याऽऽत्मन एव हि कर्तृसाधनप्रमाणशब्देनाभिधानं[1] स्वातन्त्र्येण विवक्षितत्वात्-स्वपरप्रकाशात्मकस्य प्रदीपादेः प्रका-
५ शाभिधानवत्[2]। साधकतमत्वादि[3]विवक्षायां तु—प्रमीयते येन तत्प्रमाणं प्रमितिमात्रं वा-प्रतिबन्धापाये प्रादुर्भूतविज्ञानपर्यायस्य प्राधान्येनाश्रयणात् प्रदीपादेः[4] प्रभाभारात्मकप्रकाशवत्[5]।

भेदाभेदयोः[6] परस्परपरिहारेणावस्थानादन्यतरस्यैव[7] वास्तवत्वादुभयात्मकत्वमयुक्तम्; इत्यसमीक्षिताभिधानम्; बाधकप्रमाणा-
१० भावात्। अनुपलम्भो हि बाधकं प्रमाणम्, न चात्र सोऽस्ति-सकलभावेषू[8]भयात्मकत्वग्राहकत्वेनैवाखिलाऽस्खलत्प्रत्यय[9]प्रतीतेः। विरो[10]धो बाधकः; इत्यप्यसमीचीनम्; उपलम्भसम्भवात्। विरोधो[11] ह्यनुपलम्भ[12]साध्यो यथा-तुरङ्गमोत्तमाङ्गे शृङ्गस्य[13], अन्यथा स्वरूपेणापि तद्वतो[14] विरोधः स्यात्। न चानयो[15]रेकत्र वस्तुन्यनुपलम्भोस्ति-
१५ अभेदमात्रस्य भेदमात्रस्य वेतर[16]निरपेक्षस्य वस्तुन्यप्रतीतेः। कल्प[17]यताप्यभेदमात्रं भेदमात्रं वा प्रतीतिरवश्याऽभ्युपगमनीया-तन्निबन्धनत्वाद्वस्तुव्यवस्थायाः। सा चेदुभयात्मन्यप्यस्ति किं तत्र स्वसिद्धान्तविषमग्रहनिबन्धनप्रद्वेषेण[18]-अप्रामाणिकत्वप्रसङ्गादित्यलमतिप्रसङ्गेन, अनेकान्तसिद्धिप्रक्रमे विस्तरेणोपक्रमात्[19]।

२० वक्ष्यमाण[20]लक्षणलक्षितप्रमाणभेदमनभिप्रेत्या[21]नन्तर[22]सकलप्रमाणविशेषसाधारणप्रमाणलक्षणपुरःसरः 'प्रमाणाद्' इत्येकवचननिर्देशः कृतः। कौ[23] हेतौ। अर्थ्यतेऽभिलष्यते प्रयोजनार्थिभिरित्यर्थो हेय उपादेयश्च। उपेक्षणीय[24]स्यापि परित्यजनीयत्वाद्धेयत्वम्[25]; उपादानक्रियां प्रत्यकर्म[26]भावान्नोपादेयत्वम्, हानक्रियां प्रति विपर्ययात्[27]तत्त्व[28]-
२५ म्। तथा च लोको वदति 'अहमनेनो[29]पेक्षणीयत्वेन परित्यक्तः' इति।

---

१ कथनं। २ कर्तृसाधनोऽयम्। ३ भाव। ४ सम्बन्धिनः। ५ करणे भावे चात्र घञ्। ६ परः शङ्कते। ७ भेदस्याऽभेदस्य वा। ८ पदार्थेषु। ९ उपलम्भो यत्र भेदस्तत्राभेद इति। १० अभावः। ११ अभावोऽर्थधर्मोयम्। १२ ज्ञानधर्मोऽयम्। १३ विरोधः। १४ पदार्थस्य। १५ भावाभावयोः। १६ भेदस्याभेदस्य वा। १७ प्रतिवादिना। १८ अन्यथेति शेषः। १९ प्रारम्भात्। २० विशदं प्रत्यक्षमविशदं परोक्षमिति। २१ अविवक्षितत्वात्। २२ स्वापूर्वेत्यादि। २३ पञ्चमी। २४ अर्थस्य। २५ हेयत्वेऽर्थेऽन्तर्भावादित्यर्थः। २६ ज्ञानविषयभूतं वस्तु कर्माभिधीयते मध्यस्थभावेन स्थितत्वात्कर्मभावं न प्राप्त इत्यर्थः। २७ कर्मभावात्। २८ हेयत्वम्। २९ पुरुषेण।

सिद्धिरसतः[1] प्रादुर्भावोऽभिलषितप्राप्तिर्भावज्ञप्तिश्चोच्यते। तत्र[3] ज्ञा-[4]पकप्रकरणाद् असतःप्रादुर्भावलक्षणा सिद्धिर्नेह गृह्यते। समीचीना सिद्धिः संसिद्धिरर्थस्य संसिद्धिः 'अर्थसंसिद्धिः' इति। अनेन कार-णान्तरा[7]हितविपर्यासादिज्ञाननिबन्धनाऽर्थसिद्धिर्निरस्ता । जाति-प्रकृत्यादिभेदेनोपकारकार्थसिद्धिस्तु संगृहीता; तथाहि-केवल- ५
निम्बलवणरसादावस्मदादीनां द्वेषबुद्धिविषये निम्बकीटोष्ट्रादीनां जात्याऽभिलाषबुद्धिरुपजायते अस्मदाद्यभिलापविषये चन्दनादौ तु तेषां द्वेषः, तथा पित्तप्रकृतेरुष्णस्पर्शे द्वेषो-वातप्रकृतेरभिलाषः-शीतस्पर्शे तु वातप्रकृतेर्द्वेषो न पित्तप्रकृतेरिति। न चैतज्ज्ञानम-सत्यमेव-हिताऽहितप्राप्तिपरिहारसमर्थत्वात् प्रसिद्धसत्यज्ञानवत्। १०
हिताऽहितव्यवस्था चोपकारकत्वापकारकत्वाभ्यां प्रसिद्धेति । तदिव स्वपरप्रमेयस्वरूपप्रतिभासिप्रमाणमिवाभासत इति तदा-भासम्[12] सकलमतसम्मताऽववुद्ध्यक्षणिकाद्येकान्ततत्त्वज्ञानं सन्नि-कर्षाऽविकल्पक[14]-ज्ञानाऽप्रत्यक्षज्ञानज्ञानान्तरप्रत्यक्षज्ञानाऽनाप्तप्र-णीताऽऽगमाऽविनाभावविकललिङ्गनिबन्धनाऽभिनिबोधादिकं सं- १५
शयविपर्यासानध्यवसायज्ञानं च, तस्माद् विपर्ययोऽभिलषि-तार्थस्य स्वर्गापवर्गादेरनवद्यतत्साधनस्य वैहिकसुखदुःखादिसाध-नस्य वा सम्प्राप्तिज्ञप्तिलक्षणसमीचीनसिद्ध्यभावः। प्रमाणस्य प्रथ-मनोऽभिधानं प्रधानत्वात्। न चैतदसिद्धम्; सम्यग्ज्ञानस्य निःश्रे-यसप्राप्तेः सकलपुरुषार्थोपयोगित्वात्, निखिलप्रयासस्य प्रेक्षा- २०
वतां तदर्थत्वात्, प्रमाणेतरविवेकस्यापि तत्प्रसाध्यत्वाच्च। तदा-भासस्य तूक्तप्रकाराऽसम्भवादप्राधान्यम्। 'इति' हेत्वर्थे । पुरु-षार्थसिद्ध्यसिद्धिनिबन्धनत्वादिति हेतोः 'तयोः' प्रमाणतदाभा-सयो'लक्ष्म' असाधारणस्वरूपं व्यक्तिभेदेन[24] तज्ज्ञप्तिनिमित्तं लक्षणं

१ यथा कुलालाद्धटसिद्धिः। २ पदार्थे। ३ त्रिष्वर्थेषु मध्ये। ४ प्रमाणादर्थ-संसिद्धिरिति। ५ षष्ठी। ६ ज्ञापकपक्षस्य प्रकरणात् प्रस्तावात्। ७ चक्षुरादिकारणा-दन्यत्कारणं काचकामलादिमिथ्यात्वादि वा कारणान्तरम्। ८ अवस्थाक्षेत्रकालादि वा। ९ अन्यरससंयोगरहित। १० उष्ट्रादिजात्या कृत्वा। ११ निम्बकीटकस्य निम्बः कटुकोऽपि हितत्वात् स एव रोचते। १२ वैनयिकवादिज्ञानम्। १३ सकलमतानि सम्मतानि यस्य स सकलमतसम्मतो विनयवादी तस्यावबुद्धिर्ज्ञानं तदाभासमित्यर्थः। १४ निर्विकल्पक। १५ अपौरुषेय। १६ अनुमान। १७ लिङ्गाभिमुखनियतस्य लिङ्गिनो बोधनं वा। १८ उपमानार्थापत्त्यभावप्रमाणानि। १९ घटते। २० मर्या-दायां (का पञ्चमी)। २१ भेदस्य। २२ 'हेतावेवंप्रकारादौ व्यवच्छेदे विपर्यये। अधिकारे समाप्तौ च इतिशब्दः प्रकीर्तितः'। २३ तदाभासेभ्यः। २४ व्यक्तिभेदे-नाऽसाधारणत्वं स्वव्यक्त्यभेदेन साधारणत्वमिति स्याद्वादसिद्धिः।

'वक्ष्ये'[1] व्युत्पादनार्हत्वात्[2] तल्लक्षणस्य यथावत्तत्स्वरूपं प्रस्पष्टं कथयिष्ये। अनेन ग्रन्थकारस्य तद्व्युत्पादने स्वातन्त्र्यव्यापारोऽवसीयते-निखिललक्ष्यलक्षणभावावबो[3]धाऽन्योपकारनियतचेतोवृत्तित्वात्तस्य।

५ न[4]नु चेदं वक्ष्यमाणं प्रमाणेतरलक्षणं पूर्वशास्त्रप्रसिद्धम्, तद्विपरीतं वा? यदि पूर्वशास्त्राऽप्रसिद्धम्-तर्हि तद्व्युत्पादनप्रयासो नारम्भणीयः-स्वरुचिविरचितत्वेन सतामनादरणीयत्वात्, तत्प्रसिद्धं तु नितरामेतन्न व्युत्पादनीयं-पिष्टपेषणप्रस[5]ङ्गादित्याह-'सिद्धमल्पम्'। प्रथमविशेषणेन व्युत्पाद[6]नवत्तल्लक्षणप्रण[7]यने स्वातन्त्र्यं परिहृतम्।
१० तदेव आकलङ्क[8]मिदं पूर्वशास्त्रपरम्परा[9]प्रमाण[10]प्रसिद्धं ल[11]घूपायेन प्रतिपाद्य प्रज्ञापरिपाकार्थं व्युत्पाद्यते-न स्वरुचिविरचितं-नापि प्रमाणानुपपन्नं-परोपकारनियतचेतसो ग्रन्थकृतो विनेयविसंवाद[12]ने प्रयोजनाभावात्। तथाभूतं हि वदन् विसंवादकः[13] स्यात्। 'अल्पम्' इति विशेषणेन यदन्यत्र[14] अकलङ्कदेवैर्विस्तरेणोक्तं प्रमाणेतरलक्षणं-
१५ तदेवात्र[15] संक्षेपेण विनेयव्युत्पादनार्थमभिधीयत इति पुनरुक्तत्वनिरासः। विस्तरेणान्यत्रा[16]भिहितस्यात्र संक्षेपाभिधाने विस्तररुचिविनेयविदुषां नितरामनादरणीयत्वम्। को हि नाम विशेषव्युत्पत्त्यर्थी प्रेक्षावांस्तत्साधनाऽन्य[17]सद्भावे सत्यन्यत्रा[18]ऽतत्[19]साधने कृतादरो भवे[20]दित्या[21]ह-'लघीयसः'। अतिशयेन लघवो हि लघीयांसः
२० संक्षेपरुचय इत्यर्थः। कालशरीरपरिमाणकृतं तु लाघवं नेह गृह्यते-तस्य व्युत्पाद्यत्वव्यभि[22]चारात्, क्वचित्तथाविधे व्युत्पादकस्याऽप्युपलम्भात्। तस्मादभि[23]प्रायकृतमिह लाघवं गृह्यते। येषां संक्षेपेण व्युत्पत्त्यभिप्रायो विनेयानां तान् प्रतीदमभिधीयते-प्रतिपाद[24]कस्य

---

१ ब्रूञ् द्विकर्मकः। २ व्युत्पत्तिकरणार्हत्वात्। ३ भा कृत्वा (तृतीयान्तं तेन कृत्वेत्यर्थः)। ४ परः। ५ पुनरुक्तत्वप्रसङ्गात्। ६ ईप् यथा-(व्युत्पादने यथा)। ७ कथने। ८ प्रमाणतदाभासलक्षणम् अकलङ्केन प्रोक्तमाकलङ्कम्। कलङ्केन दोषेण रहितं वा। ९ पूर्वशास्त्रपरम्परा च प्रमाणं चेति पूर्वशास्त्रपरम्पराप्रमाणे ताभ्यामित्यर्थः। १० परम्पराप्रमाणप्रसिद्धमिति वा पाठः। ११ संक्षिप्तशब्दरूपेण। १२ प्रतारणे। १३ प्रतारकः। १४ प्रमाणसंग्रहादौ। १५ परीक्षामुखे। १६ प्रमाणसंग्रहादौ। १७ प्रमाणसंग्रहादिसद्भावे। १८ परीक्षामुखे। १९ विशेषव्युत्पत्त्यसाधने। २० न कोपि। २१ तर्हि कान् प्रतीत्याशङ्कायामाह। २२ विमतो व्युत्पाद्यः कालकृतलाघवादित्युक्ते गर्भाऽष्टमवर्षादिजातज्ञानसम्पन्नेन व्यभिचारात्। वीतः प्रतिपाद्यः कायकृतलाघवादित्युक्ते अधीतशास्त्रेण कुब्जादिनाऽनेकान्तात्। तयोर्व्युत्पादकत्वादिति भावः। २३ बुद्धि। २४ गुरोः।

प्रतिपाद्याशयवशवर्तित्वात्। 'अकथितम्' [पाणिनि सू० १।४।५१] इत्यनेन[2] कर्मसंज्ञायां सत्यां कर्मणीप्[3]।

ननु[4] चेष्टदेवतानमस्कारकरणमन्तरेणैवोक्तप्रकाराऽऽदिश्लोकाभिधानमाचार्यस्याऽयुक्तम्। अविघ्नेन शास्त्रपरिसमाप्त्यादिकं हि फलमुद्दिश्येष्टदेवतानमस्कारं कुर्वाणाः शास्त्रकृतः शास्त्रादौ प्रतीयन्ते; इत्यप्यसमीक्षिताभिधानम्; वाङ्नमस्काराऽकरणेपि कायमनोनमस्कारकरणात्। त्रिविधो हि नमस्कारो-मनोवाक्कायकारणभेदात्। दृश्यते चातिलघूपायेन[5] विनेयव्युत्पादनमनसां धर्मकीर्त्यादीनामप्येवंविधा[6] प्रवृत्तिः-वाङ्नमस्कारकरणमन्तरेणैव "सम्यग्ज्ञानपूर्विका सर्वपुरुषार्थसिद्धिः" [न्यायबि० १।१] इत्यादिवाक्योपन्यासात्। यद्वा[7] वाङ्नमस्कारोऽप्यनेनैवादिश्लोकेन कृतो ग्रन्थकृता; तथाहि-मा अन्तरङ्गबहिरङ्गानन्तज्ञानप्रातिहार्यादिश्रीः, अण्यते शब्द्यते येनार्थोऽसावाणः शब्दः, मा चाणश्च माणौ, प्रकृष्टौ महेश्वराद्यसम्भविनौ माणौ यस्याऽसौ प्रमाणो भगवान् सर्वज्ञो दृष्टेष्टाऽविरुद्धवाक् च, तस्मादुक्तप्रकारार्थसंसिद्धिर्भवति। तदभासात्तु महेश्वरादेर्विपर्ययस्तत्संसिद्ध्यभावः। इति वक्ष्ये तयोर्लक्ष्म 'सामग्रीविशेषविश्लेषिताऽखिलावरणमतीन्द्रियम्' इत्याद्यसाधारणस्वरूपं प्रमाणस्य। किंविशिष्टम्? सिद्धं वक्ष्यमाणप्रमाणप्रसिद्धम्, तद्विपरीतं तु तदाभासस्य; तच्चाऽल्पं संक्षिप्तं यथा भवति तथा, लघीयसः प्रति वक्ष्ये तयोर्लक्ष्मेति। शास्त्रारम्भे चाऽपरिमितगुणोदधेर्भगवतो गुणलवव्यावर्णनमेव वाक्स्तुतिरित्यलमतिप्रसङ्गेन[9][10] ॥ छ ॥

प्रमाणविशेषलक्षणोपलक्षणाकाङ्क्षायास्तत्सामान्यलक्षणोपलक्षणपूर्वकत्वात् प्रमाणस्वरूपविप्रतिपत्तिनिराकरणद्वारेणाऽबाधतत्सामान्यलक्षणोपलक्षणायेदमभिधीयते[11]—

स्वापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणम् ॥ १ ॥

प्रमाणत्वान्यथानुपपत्तेरित्ययमत्र[12] हेतुर्द्रष्टव्यः। विशेषणं हि व्यवच्छेदफलं[13] भवति। तत्र प्रमाणस्य ज्ञानमिति विशेषणेन 'अव्यभिचारादि[14][15]विशेषणविशिष्टार्थोपलब्धि[16]जनकं कारकसाकल्यं[17] साधक-

१ शिष्य। २ सूत्रेण। ३ इप् द्वितीया। ४ परः। ५ उपायेन शब्देनेत्यर्थः। ६ बौद्धाचार्याणाम्। ७ अथवा। ८ 'कश्चित्पुरुष' इत्यादि। ९ वचसा नमस्कारकरणं तु तस्य संस्तवनम्। १० पूर्वपक्षेण। ११ परिज्ञान। १२ साध्ये। १३ लक्षणं व्यावृत्तिफलं तदाभासात्परिहारफलमित्यर्थः। १४ अविपर्ययः व्यभिचारो नाम अतिव्याप्तिः। १५ अव्याप्त्यतिव्याप्त्यसंभवादिरहितविशेषणसंभवसंशयादिर्व्यभिचारः। १६ प्रतीति। १७ जरन्नैयायिका आत्माकाशादीनां साकल्यं प्रमाणमित्याहुः।

तमत्वात् प्रमाणम्' इति प्रत्याख्यातम्[1]; तस्याऽज्ञानरूपस्य प्रमेयार्थवत्[2] स्वपरपरिच्छित्तौ साधकतमत्वाभावतः प्रमाणत्वायोगात्-तत्परिच्छित्तौ साधकतमत्वस्या[3]ऽज्ञानविरोधिना ज्ञानेन व्याप्तत्वात्। छिदौ[4] परश्वादिना[5] साधकतमेन व्यभिचार इत्ययुक्तम्; तत्परिच्छित्ताविति विशेषणात्, न खलु सर्वत्र[6] साधकतमत्वं ज्ञानेन व्याप्तं-परश्वादेरपि[7] ज्ञानरूपताप्रसङ्गात्। अज्ञानरूपस्यापि[8] प्रदीपादेः स्वपरपरिच्छित्तौ साधकतमत्वोपलम्भात्तेन तस्याऽव्याप्तिरित्य[9]प्ययुक्तम्; तस्योपचारात्[10]तत्र साधकतमत्व[11]व्यवहारात्। साकल्यस्याप्युपचारेण साधकतमत्वोपगमे[12] न किंचिदनिष्टम्[13]-मुख्यरूपतया हि स्वपरपरिच्छित्तौ साधकतमस्य ज्ञानस्योत्पादकत्वात् तस्यापि साधकतमत्वम्; तस्माच्च प्रमाणं-कारणे[14] कार्योपचारात्[15]-अन्नं वै प्राणा इत्यादिवत्। प्रदीपेन[16] मया दृष्टं[17] चक्षुषाऽवगतं[18] धूमेन प्रतिपन्नमिति[19] लोकव्यवहारोऽप्युपचारतः[20]; यथा ममाऽयं पुरुषश्चक्षुरिति-तेषां प्रमितिं प्रति बोधेन व्यवधानात्[21], तस्य त्वपरेणा[22]व्यवधानात्[23]तन्मुख्यम्[24]। न च व्यपदेशमात्रा[25]त्पारमार्थिकवस्तु[26]व्यवस्था 'नड्वलोदकं[27] पादरोगः' इत्यादिवत्[28]। ततो[29] यद्बोधाऽबोधरूपस्य प्रमाणत्वाभिधानकम्[30]—

'लिखितं[31] साक्षिणो[32] भुक्तिः[33] प्रमाणं त्रिविधं स्मृतम्' [ ] इति तत्प्रत्याख्यातम्; ज्ञानस्यैवाऽनुपचरितप्रमाणव्यपदेशार्हत्वात्। तथाहि-यद्यत्राऽपरेण व्यवहितं न तत्तत्र मुख्यरूपतया साधक-

---

१ जानन्तं प्रति निरस्तम्। २ घटवत्। ३ व्याप्यस्य। ४ परः। ५ अज्ञानरूपेण। ६ कारणत्वेनाभिप्रेते वस्तुनि। ७ अन्यथा। ८ परः। ९ यद्यदज्ञानविरोधिज्ञानेन व्याप्तं तत्तत्स्वपरपरिच्छित्तौ साधकतममतोऽज्ञानरूपस्य स्वपरपरिच्छित्तौ साधकतमस्य तेन ज्ञानेनाव्याप्तिः। १० न परमार्थतः। ११ प्रदीपस्य स्वपरप्रकाशकरूपेण साधकतमत्वं न तु स्वपरपरिच्छित्त्यात्मकत्वेनेति भावः। १२ परैः। १३ जैनानाम्। १४ ज्ञानजनकत्वेन। १५ अज्ञानरूपत्वादित्यस्य हेतोरनैकान्तिकत्वे। १६ प्रदीपादेः प्रामाण्यम्। १७ वस्तुरूपं वह्नि। १८ ज्ञानधर्मसाधकतमस्य। १९ अग्निस्वरूपम्। २० साधकतमज्ञानहेतुत्वेन। २१ साधकतमत्वेन। २२ साधकतमज्ञानस्य हेतुत्वेन। २३ प्रमितिक्रियां प्रति। २४ परिच्छित्तिं प्रति प्रदीपादेः साधकतमत्वं न मुख्यम्। २५ प्रदीपादेसाधकतमत्वमिति व्यपदेशमात्रात्। २६ प्रदीपादेः प्रामाण्यम्। २७ 'शाड्वलं हरितं प्रोक्तं। नड्वलं नडसंयुतम्' (क) तृणसंयुतमुदकं नड्वलं कथ्यते। २८ पादरोगकारणतया व्यपदिश्यमानं नड्वलोदकं यथा पादरोगत्वेन न पारमार्थिकं तथा प्रकृतमपि। २९ ज्ञानस्यैव साधकतमत्वं यतः। ३० नैयायिकस्य वैशेषिकस्य च। ३१ शासनादिलोके पत्रादि, तत्प्रमाणम्। ३२ पुरुषाः प्रमाणम्। ३३ अनुभवः प्रमाणम्।

तमव्यपदेशार्हम्, यथा हि च्छिदिक्रियायां कुठारेण व्यवहितोऽयस्कारः, स्वपरपरिच्छित्तौ विज्ञानेन व्यवहितं च परपरिकल्पितं साकल्यादिकमिति[1]। तस्मात् कारकसाकल्यादिकं साधकतमव्यपदेशार्हं न भवति।

किंच; स्वरूपेण प्रसिद्धस्य[2] प्रमाणत्वादि[3]व्यवस्था स्यान्नान्यथा-अतिप्रसङ्गात्[4]-न च साकल्यं स्वरूपेण प्रसिद्धम्। तत्स्वरूपं हि सकलान्येव[5] कारकाणि, तद्धर्मो वा स्यात्, तत्कार्यं वा, पदार्थान्तरं वा गत्यन्तराभावात्? न तावत्सकलान्येव तानि साकल्यस्वरूपम्; कर्तृकर्मभावे तेषां करणत्वा[6]नुपपत्तेः। तद्भावे वा—अन्येषां[7] कर्तृकर्मरूपता, तेषामेव वा? न तावदन्येषाम्, सकलकारकव्यतिरेकेणान्येषामभावात्, भावे वा न कारकसाकल्यम्। नापि तेषामेव कर्तृकर्मरूपता; कारणत्वाभ्युपगमात्। न चैतेषां कर्तृकर्मरूपाणामपि करणत्वं-परस्परविरोधात्। कर्तृता[8] हि ज्ञानचिकीर्षाप्रयत्नाधारता स्वातन्त्र्यं वा, निर्वर्त्यत्वादि[9]धर्मयोगित्वं कर्मत्वम्, करणत्वं तु प्रधान[10]क्रियाऽनाधारत्व[11]मित्येतेषां[12] कथमेकत्र[13] सम्भवः? तन्न सकलकारकाणि साकल्यम्।

नापि तद्धर्मः-स हि संयोगः, अन्यो[14] वा? संयोगश्चेन्न[15]; अस्याऽनन्तरं[16]-विस्तरतो निषेधात्। अन्यश्चेत्; नास्य साकल्यरूपपता अतिप्रसङ्गात्-व्यस्ता[17]र्थानामपि[18] तत्सम्भवात्। किं चाऽसौ कारकेभ्योऽव्यतिरिक्तः, व्यतिरिक्तो वा? यद्यव्यतिरिक्तः, तदा धर्ममात्रं[19] कारकमात्रं वा स्यात्। व्यतिरिक्तश्चेत्सम्बन्धाऽसिद्धिः। सम्बन्धेऽपि वा सकलकारकेषु युगपत्तस्य सम्बन्धेऽनेकदोषदुष्टसामा[20]न्यो[21]-

---

१ प्रदीपादि लिखितादि ॥ तथाहीत्यत्र कारकसाकल्यादिकं धर्मि, मुख्यरूपतया साधकतमव्यपदेशार्हं न भवतीति धर्मः, स्वपरपरिच्छित्तौ विज्ञानेन व्यवहितत्वात् प्रदीपादिवत्। २ ज्ञातस्य। ३ साधकतमत्व। ४ खरविषाणादेः। ५ अत्र यथासंख्यं स्वार्थे भावे कर्मणि ष्यण्। ६ प्रमाणरूपसाकल्यस्य करणस्वरूपत्वं यतः। ७ कारकाणाम्। ८ मीमांसकानां कर्त्रादीनां लक्षणमिदम्। ९ "व्याप्यं विषयभूतं च निर्वर्त्य विक्रियात्मकम्। कर्तुश्च क्रियया व्याप्तमीप्सितानीप्सितेतरत्"। १० छेदनम्। उत्क्षेपणापक्षेपणस्यैव आधारत्वं न तु च्छिदेरित्यर्थः। ११ कर्मकर्त्रोरेव छिदि प्रमितिलक्षणप्रधानक्रियाधारत्वं न तु करणस्य। १२ विरुद्धधर्माणाम्। १३ साकल्ये। १४ प्रमेयत्वप्रमातृत्वसत्त्वादि। १५ सन्निकर्षः। १६ साधारमिदमग्रे। १७ अन्यधर्म। १८ कारकाणां द्वित्र्यादीनाम्। १९ धर्मो वा कारकरूपधर्मी वा स्यात् कारकेभ्योऽन्यधर्मस्याव्यतिरिक्तत्वात्। २० एकस्वभावेनानेकस्वभावेन च वृत्तौ सामान्यानवस्थादयः स्युः। २१ सामान्यादौ ये दोषास्तेऽत्रापि स्युरित्यर्थः। एकस्वभावेन स्वभावभेदेन च वृत्तौ सामान्यत्वानवस्थादयः।

न्यादि[1]रूपता[2]पत्तिः। क्रमेण सम्बन्धे सकलकारकधर्मता साकल्यस्य न स्यात्-यदैव हि तस्यैकेन[3] हि सम्बन्धो न तदैवाऽन्येनेति।

नापि तत्[4]कार्यं साकल्यम्—नित्यानां[5] तज्जननस्वभावत्वे सर्वदा तदुत्पत्तिप्रसक्तिः, एकप्रमाणोत्पत्ति[6]समये सकल[7]तदुत्पाद्यप्रमाणोत्पत्तिश्च स्यात्। तथाहि—यदा यज्जनकमस्ति-त[8]त्तदोत्पत्तिमत्प्रसिद्धम्, यथा तत्कालाभिमतं प्रमाणम्[9], अस्ति च पूर्वोत्तरकालभाविनां सर्वप्रमाणानां तदा[10] नित्याभिमतं जनकमात्मादिकं कारणमिति। आत्मादिकारणे सत्यपि तेषामनुत्पत्तौ ततः कदाचनाप्युत्पत्तिर्न स्यादिति सकलं जगत् प्रमाण[11]विकलमापद्येत। आत्मादौ तत्कारणसमर्थे सत्यपि स्वयमेव तेषां यथाकालं भावे तत्कार्यताविरोधः-तस्मिन् सत्यप्य[12]भावात्-स्वयमेवान्यदा भावात्। न च स्वकालेपि तत्सद्भावे भावात्तत्कार्यता; गगनादि[13]कार्यताप्रसक्तेः। न च तस्यापि तत्प्रति कारणत्वस्येष्ट[14]रदोषोयमिति वक्तव्यम्; आत्माऽनात्मविभागाभावप्रसङ्गात्। यत्र[15] प्रमितिः समवेता सोऽत्रात्मा नान्य[16] इत्यप्यनालोचितवचनम्; समवाया[17]ऽसिद्धौ समवेतत्वाऽसिद्धेः। यदा[18] यत्र यथा यद्भवति तदा तत्र तथाऽऽत्मादेस्तत्करणसमर्थत्वान्नैकदा सकलप्रमाणोत्पत्तिप्रसक्तिरित्यप्यसम्भाव्यम्; त[19]त्स्वभावभूतसामर्थ्यभेदमन्तरेण कार्यस्य[20] कालादि[21]भेदायोगात्, अन्यथा[22] दृष्ट[23]स्य पृथिव्यादिकार्यनानात्वस्याऽदृष्ट[24]पार्थिवादिपरमाण्वादि[25]कारणचातुर्विध्यं किमर्थं समर्थ्यते? नित्यस्वभावमेकमेव[26] हि किञ्चि[27]त्समर्थनीयम्। यथा च कारणजाति[28]भेदमन्तरेण कार्यभेदो नोपपद्यते तथा तच्छक्तिभेदमन्तरेणापि। न[29] च

१ अवयवी। २ रूपमिव रूपं यस्य तद्धर्मस्य सामान्ये ये दोषास्तेऽत्रापि स्युः। ३ कारकेण। ४ नेत्रोद्घाटनयोग्यदेशगमनादि। ५ आत्माकाशकालदिग्मनसाम्। ६ कार्यलक्षणसाकल्यप्रमाणस्य। ७ सकलपदार्थपरिच्छेदककार्यलक्षणसाकल्यप्रमाणानामुत्पत्तिः स्यात्। ८ कारणाऽधीनानि कार्याणि यतः। ९ उपनयः। १० विवक्षितकालाऽभिमतकार्योत्पत्तिसमये। ११ कार्यविकलम्। १२ युगपत् प्रमाणकार्यस्य। १३ अन्यथा। १४ परः। १५ गगनादिः। १६ चतुर्थपरिच्छेदेऽयं निराकरिष्यते। १७ परः। १८ आत्मादि। १९ नानाकार्याणि विभिन्नशक्तिहेतुकानि विभिन्नकार्यत्वात् पृथ्व्यादिभेदकार्यवत्। २० सर्वेषां कार्याणां युगपदुत्पत्तिर्यतः। २१ देशस्वभावः। २२ तत्सामर्थ्यभेदं विनापि कार्यस्य कालादिभेदो भविष्यतीति चेत्। २३ प्रत्यक्षस्य। २४ आप्यतैजसवायवीय। २५ द्व्यणुकादि। २६ ब्रह्मादि। २७ कारणम्। २८ पार्थिवादिजाति। २९ अत्राभिप्रायस्तु योग्यतावच्छिन्नस्वरूपसहकारिसमवधानमेव शक्तिरिति गौतमीयन्यायैकदेशे द्रव्याच्छक्तिरुत्पद्यते चेति जैना वदन्तीति मत्वा दूषणं वदत्यपरःतद्दूषणपरिजिहीर्षया न चेत्याह।

यथैकयाशक्त्यैक[1]मनेकाः शक्तीर्बिभर्ति [2]तत्राप्यनेक[3]शक्तिपरिकल्पनेऽनवस्थाप्रसङ्गात्[4], तयैव [5]तदनेकं कार्यं करिष्यतीति [6]वाच्यम्; यतो न भिन्नाः शक्तीः कयाचिच्छक्त्या कश्चि[7]द्धा[8]रयतीति जैनो मन्यते–स्वका[9]रणकलापात्तदात्म[10]कस्यैवाऽ[11]स्योत्पादात्।

[12]सह[13]कारिसव्यपेक्षा[14]णां [15]जनकत्वाद्देशकालस्वभावभेदः कार्यं न विरुध्यतइत्यपि वार्तम्; नित्यस्यानुपकार्यतया सहकार्यऽपेक्षाया अयोगात्। सहकारिणो हि भावाः किं विशे[16]षाधा[17]यित्वे[18]न, एकार्थका[19]रित्वेन वाभिधीयन्ते? प्रथमपक्षे किमसौ विशेषस्ते[20]भ्यो भिन्नः, अभिन्नो वा तैर्विधीयते? भेदे सम्बन्धासिद्धेस्तदवस्थमेवाकारकत्वमेतेषां [21]पूर्वावस्थायामिव पश्चादप्यनुषज्यते। [22]तदसिद्धिश्च समवायादिसम्बन्धस्याग्रे निराकरिष्यमाणत्वात् सुप्रसिद्धा। विभिन्नातिशयात् कार्योत्पत्तौ चात्र [23]कारकव्यपदेशोऽपि कल्पनाशिल्पिकल्पित एव-अतिशयस्यैव कारकत्वात्। द्वितीयपक्षे तु क[24]थमेतेषां नित्यता उत्पादविनाशात्मकातिशयादभिन्नत्वात्त[25]त्स्वरूपवत्? एकार्थकारित्वेन [26]त्वेषां सहकारित्वं [27]नास्माभिः प्रतिक्षिप्यते, किन्त्वपरिणामित्वे तेषां [28]प्राक् पश्चात् [29]पृथग्भावावस्थायामपि कार्यकारित्वप्रसङ्गतः '[30]सहैव कुर्वन्ति' इति नियमो न घटते। न खलु [31]साहित्येऽपि [32]भावाः [33]पररूपेण कार्यकारिणः। स्वयमका[34]रकाणाम[35]न्यसन्निधानेऽपि तत्कारित्वासम्भवात्, सम्भवे वा पर एव परमार्थतः कार्यकारको भवेत् [36]स्वात्मनि तु कारकव्यपदेशो विकल्पकल्पितो भवेत्। [37]तथा [38]चान्यस्यानुप[39]कारिणो [40]भावमनपेक्ष्यैव कार्यं तद्विक[41]लेभ्य एव सहकारिभ्यः समुत्पद्येत। ते[42]भ्योऽपि वा न भवेत्, [43]स्वयं तेषामप्यकारकत्वात् [44]पररूपेणैव कारकत्वात्। अतः सर्वेषां

१ आत्मादिकारणं। २ अनेकशक्तिधारणे। ३ कारणस्य। ४ हे जैन तव हेतोः। ५ आत्मादि। ६ परेण। ७ आत्मा। ८ आत्मादि। ९ पुण्यपाप। १० नानाशक्त्यात्मकस्य। ११ आत्मादेः। १२ परः। १३ आत्मादीनां। १४ कारणानां। १५ कार्यस्य। १६ अतिशय उपकार। १७ कारकविशेषः क्रियते तैः। १८ कारकाणां विशेषाध्यारोपकत्वेन। १९ एककार्यकरणत्वेनोभयोरपि। २० कारकेभ्यः। २१ सहकारिरहितावस्थायामिव। २२ जनकत्वेन? [सम्बन्धासिद्धिश्च]। २३ आत्मादेः। २४ आत्मादीनां। २५ अतिशयस्वरूपवत्। २६ सहकारिणां। २७ जैनैः। २८ सहकारिभ्यः। २९ भिन्नभावावस्थायां। ३० सहकारिभिः। ३१ सहकारिणां। ३२ आत्मादयः। ३३ सहकारिरूपेण। ३४ आत्मादीनां। ३५ सहकारि। ३६ आत्मादौ। ३७ एवं सति। ३८ आत्मनः। ३९ जनकत्वेन। ४० सद्भावं। मुख्यकारकस्य स्वरूपं। ४१ आत्मादिक। ४२ सहकारिकारकेभ्यः। ४३ स्वरूपेण। ४४ आत्मादिरूपेण।

स्वयमकारकत्वे पर[1]रूपेणाप्यकारकत्वात् त[2]द्द्वारोच्छेदतो न कुतश्चित् किञ्चि[3]दुत्पद्येत । ततः स्वरूपेणैव भावाः कार्यस्य कर्तार[4] इति न कदाचि[5]त्तत्क्रियो[6]परतिः[7] स्यात् ।

ननु[8] कार्याणां सामग्रीप्रभवस्वभावत्वात् तस्याश्चापरापरप्रत्यय[9]योगरूप[10]त्वात्प्रत्येकं[11] नित्यानां तत्क्रिया[12]स्वभावत्वेऽप्यनुत्पत्तिस्तेषामिति, तदप्यसाम्प्रतम्; यतो[13]ऽयमेकोऽपि भावः क्रमभाविकार्योत्पादने समर्थोऽतः कथमेषां भिन्नकालापरापरप्रत्यय[14]योग[15]लक्षणाऽनेकसामग्रीप्रभवस्वभावता स्यात्? एकेना[16]पि हि तेन तज्जननसामर्थ्यं विभ्राणेन तान्युत्पादयितव्यानि, कथमन्यथा केवलस्य तज्जननस्वभा[17]वता सिद्ध्येत्? तस्याःकार्यप्रादुर्भावानुमीयमानस्व[18]रूपत्वात् प्रयोगः[19]–यो यन्न जनयति नासौ तज्जननस्वभावः यथा गोधूमो यवाङ्कुरमजनयन्न त[20]ज्जननस्वभावः, न जनयति चायं[21] केवलः कदाचिद[22]प्युत्तरोत्तरकालभावीनि प्रत्ययान्तरापेक्षाणि कार्याणीति । ननु[23] प्रत्यया[24]न्तरमपेक्ष्य कार्यजननस्वभावत्वान्नासौ केवलस्तज्जनयति, न च सहकारिसहितासहितावस्थयोरस्य स्वभावभेदः; प्रत्ययान्तरापेक्षस्वकार्यजननस्वभावतायाः सर्वदा भावात्, तदप्यपेशलम्; यतः प्रत्ययान्तर[25]सन्निधानेऽपि स्वरूपेणै[26]वास्य कार्यकारिता, तच्च प्रा[27]गप्यस्तीति प्रागे[28]वातः कार्योत्पत्तिः स्यात् । प्रत्ययान्तरेभ्यश्चास्या[29]तिशयसम्भवे तदपेक्षा स्यादुपकार[30]केष्वेवास्याः सम्भवात्, अन्यथा[31]ऽतिप्र[32]सङ्गात् । त[33]त्सन्निधानस्यासन्निधानतुल्यत्वाच्च केवल एवासौ कार्यं कुर्यात्, अकुर्वंश्च केवलः सहितावस्थायां च कुर्वन् कथमेकस्वभावो भवेद्विरुद्धधर्मा[34]ध्यासतः स्वभावभेदानुषङ्गात्?

किञ्च सकलानि कारकाणि सा[35]कल्योत्पादने प्रवर्तन्ते, असकलानि वा? न तावत्सकलानि साकल्यासिद्धौ त[36]त्सकलत्वासिद्धेः ।

१ आत्मादिरूपेणापि । २ कारक । ३ कार्यं । ४ स्वाधीनतया । ५ कार्य । ६ करण । ७ विश्रामः । ८ परः । ९ कारण । १० कदाचित् रूपभिन्नकालक्रमभाविकारणयोगरूपत्वात् । ११ केवलं । १२ कारण । १३ नित्यः । १४ कारण । भा । १५ नित्यस्य । १६ केवलेन । १७ परिणामित्वं । १८ न तथा । *प्रत्येकमात्मादिर्धर्मी (*केवलः) तदजनकत्वादिति हेतुः तज्जननस्वभावो न भवतीति साध्यम् । १९ हेतुः । २० धर्मः । २१ अयमेवोपनयः । २२ तस्मादात्मादिः प्रत्येकमुत्तरोत्तरं निगमनम् । २३ परः । २४ कारणान्तरं । २५ सहकारिलक्षणकारणान्तर । २६ नित्यस्य । २७ सहकारिसन्निधानात् । २८ आत्मादिकारकात् । २९ कारकस्य । ३० उपकारकाणामेवापेक्षा भवति नाऽन्येषामित्यर्थः । ३१ अनुपकारकेष्वेव सम्भवे । ३२ पटोत्पत्तौ कुविन्दस्य मृत्पिण्डे अपेक्षा भवेत् । ३३ अनुपकारकप्रत्ययान्तर । ३४ प्रमाण । ३५ यतोऽद्यापि विचार्यमाणं (ततः) । ३६ द्वित्राणामपि प्राप्नोति ।

अन्योऽन्याश्रयश्च-सिद्धे हि साकल्ये तेषां सकलरूपतासिद्धिः, तत्सिद्धौ च साकल्यसिद्धिरिति । नाप्यसकलान्यतिप्रसक्तेः । किञ्च यया प्रत्यासत्त्या[1] तथाविधान्येतानि[2] साकल्यमुत्पादयन्ति तयैव प्रमामप्युत्पादयिष्यन्तीति व्यर्था साकल्यकल्पना । करण[3]मन्तरेण प्रमोत्पत्त्यभावे साकल्येऽप्यन्यत् करणं कल्पनीयमित्यनवस्था । न चाध्यक्षसिद्धत्वात्साकल्यस्यादोषोऽयम्; आत्मान्तःकरणसंयोगादेरतीन्द्रियस्याध्यक्षाऽविषयत्वात् । केवलं विशिष्टार्थोपलब्धिलक्षणकार्यस्याऽध्यक्षसिद्धस्य करणमन्तरेणानुपपत्तेस्तत्परिकल्पना, तच्च मनोलक्षणकरणसद्भावे साकल्यमेवेत्यवधारयितुं न शक्यम् । तन्न सकलकारककार्यं साकल्यम् ।

नापि पदार्थान्तरं सर्वस्य पदार्थान्तरस्य साकल्यरूपताप्रसङ्गात् । तथा च तत्सद्भावे सर्वत्र सर्वदा सर्वस्यार्थोपलब्धिरिति[12][13] सर्वः सर्वदर्शी स्यात् । ततः कारकसाकल्यस्य स्वरूपेणाऽसिद्धेः सिद्धौ वा ज्ञानेन व्यवधानान्न प्रामाण्यम् ॥ छ ॥

१ स्वभावेन । प्रत्यासत्तिः स्वभावः । २ कारकाणि । ३ परः । ४ साकल्यस्य । ५ पुनः । ६ ज्ञान । ७ अर्थापत्तिप्रमाणम् । ८ श्रेयसी (मन्यते) । ९ अर्थापत्तिप्रमाणप्रसिद्धं करणं । १० भावमनो । ११ प्रमितिरूपः पदार्थः । १२ नुः । १३ सर्वपदार्थान्तरसाकल्यरूपप्रमाणत्वात् ।

1 कारकसाकल्यस्य स्वरूपं तावत् सामग्रीप्रमाणवादी जयन्तभट्टः इत्थं निरूपयति 'अव्यभिचारिणीमसन्दिग्धामर्थोपलब्धिं विदधती बोधाबोधस्वभावा सामग्री प्रमाणम् । बोधाऽबोधस्वभावा हि तस्य स्वरूपम् अव्यभिचारादिविशेषणार्थोपलब्धिसाधनत्वं लक्षणम्' (न्यायमं० पृ० १२)

सामग्री च कारकसाकल्यस्यैव व्यपदेशान्तरम्, अतएवायं कारकसाकल्यवादः 'सामग्रीप्रमाणवादः' इति शब्देनापि व्यपदिश्यते । तस्य च साधिका मुख्या युक्तिः इत्थम्—'यत एव साधकतमं करणम् करणसाधनश्च प्रमाणशब्दः, तत एव सामग्र्याः प्रमाणत्वं युक्तम्, तद्व्यतिरेकेण कारकान्तरे क्वचिदपि तमवर्थसंस्पर्शानुपपत्तेः । अनेककारकसन्निधाने कार्यं घटमानम् अन्यतरव्यपगमे च विघटमानं कस्मै अतिशयं प्रयच्छेत् ? न चातिशयः कार्यजन्मनि कस्यचिदवधार्यते सर्वेषां तत्र व्याप्रियमाणत्वात्' (न्याय मं० पृ० १३)

सामग्रीप्रमाणवादस्य द्विधा उल्लेखो न्यायमंजर्यां दृश्यते । एकस्तावत् पूर्वोक्त एव द्वितीयस्तु प्रकारः 'कर्तृकर्मविलक्षणासंशयविपर्ययरहिताऽर्थबोधविधायिनी बोधाऽबोधस्वभावा सामग्री प्रमाणम्' इत्यादिरूपः 'अपरे पुनराचक्षते' इति कृत्वा तत्रैव (पृ० १४) निर्दिष्टो दृश्यते ।

मा[१] भूत् कारकसाकल्यस्यासिद्धस्वरूपत्वात् प्रामाण्यं सन्नि-[२]कर्षादेस्तु सिद्धस्वरूपत्वात्प्रमित्युत्पत्तौ साधकतमत्वाच्च तत्स्यात्। सुप्रसिद्धो हि चक्षुषो घटेन संयोगो रू[३]पादिना (संयुक्तसमवायः रूपत्वा[४]दिना) संयुक्तसमवेतसमवायो ज्ञानजनकः। साधकतमत्वं
५ च प्रमाणत्वेन व्याप्तं न पुनर्ज्ञानत्वमज्ञानत्वं वा संशयादिवत्प्रमेयार्थवच्च, इत्यसमीक्षिताभिधानम्; तस्य प्रमित्युत्पत्तौ साधकतमत्वाभावात्। यद्भावे हि प्रमितेर्भाववत्ता यदभावे चाभाववत्ता त[५]त्तत्र साधकतमम्।

"भावा[६]भावयो[७]स्तद्वत्ता साधकतमत्वम्"[2] [ ]
१० इत्यभिधानात्।

न चैतत्सन्निकर्षादौ सम्भवति। तद्भावेऽपि क्वचित्[८]प्रमित्यनुत्पत्तेः; न हि चक्षुषो घटवदाकाशे संयोगो विद्यमानोऽपि प्रमि[१०]त्युत्पादकः, संयुक्तसमवायो वा रू[११]पादिवच्छब्दरसादौ, संयुक्तसमवेतसमवायो वा रूपत्ववच्छब्द[१२]त्वादौ। त[१३]दभावेऽपि च
१५ विशे[१४]षणज्ञानाद्विशेष्य[१५]प्रमितेः सद्भावोपगमात्। योग्य[१६]ताभ्युपगमे[१७] सैवास्तु किमनेन[१८]ान्तर्गडुना[१९]?

१ परः। २ लिङ्गशब्द। ३ द्रव्यत्वकर्मसामान्य। ४ गुणत्वकर्मत्व। ५ प्रमितौ। ६ सतोः। ७ यस्य तस्य तत्र। ८ आदिपदेन शब्दलिङ्ग। ९ नभसि। १० गगनमिति प्रमितेः। ११ कर्म। १२ रसत्वस्पर्शत्वादि। १३ सन्निकर्ष। १४ दण्ड। १५ दण्डोऽस्यास्तीति तस्मिन् दण्डिनि। १६ सन्निकर्षस्य शक्ति। १७ यद्यपि घटाकाशयोरविशिष्टश्चक्षुषः सन्निकर्षोऽस्ति तथापि योग्यतावशात् घट एव प्रमितिं जनयेन्नाकाश इति सन्निकर्षशक्त्यभ्युपगमे। १८ सन्निकर्षेण। १९ ग्रन्थिना (व्रणेन)।

अस्य च सामग्र्यपरनामकस्य कारकसाकल्यस्य विविधरीत्या खंडनं निम्नग्रन्थेषु द्रष्टव्यम्—न्यायकु० चं० लि० परि० १। सन्मति० टी० पृ० ४७३। स्या० रत्नाकर पृ० ६५।

प्रस्तुतग्रंथगतखंडने (पृ० ११ पं० ८) आयातस्य 'सहकारिणो हि भावाः किं विशेषाधायित्वेन एकार्थकारित्वेन वाऽभिधीयन्ते' इत्याद्यंशस्य तुलना अर्चटकृत-हेतुबिन्दुटीकायाः—'नैयायिकास्तु मन्यन्ते भावानां सहकारिसन्निधानाऽसन्निधानापेक्षया कारकस्वभावव्यवस्था....' (पृ० १५०) इत्याद्यंशेन विधेया।

1 यद्यपि सन्निकर्षस्य सामान्यतो निर्देशः कणाद-न्यायसूत्र तद्भाष्ययोरपि समस्ति तथापि तस्य प्रक्रियाबद्धं विवरणं षोढा तद्भेदनिरूपणं च न्यायवा० पृ० ३१ तथा पृ० ३७३। न्यायवा० ता० टी० पृ० ११६ तथा पृ० ५२०। न्यायमं० पृ० ४७७। प्रश० कन्द० पृ० २३ तथा १९५। इत्यादिषु द्रष्टव्यम्।

2 'कः खलु साधकतमार्थः? साधकतमं प्रमाणमिति केवलं वाक्यमभिधीयते नार्थः इति? भावाऽभावयोस्तद्वत्ता' न्यायवा० पृ० ६।

योग्यता[1] च शक्तिः, प्रतिपत्तुः प्रतिबन्धापायो वा ? शक्तिश्चेत्; किमतीन्द्रिया[2], सहकारिसान्निध्यलक्षणा वा ? न तावदतीन्द्रिया; अनभ्युपगमात्[3]। नापि सहकारिसान्निध्यलक्षणा; कारकसाकल्यपक्षोक्ताशेषदोषानुषङ्गात्[4]। सहकारिकारणं चात्र द्रव्यम्, गुणः, कर्म[6] वा स्यात्? द्रव्यं चेत्; किं व्यापि द्रव्यम्, अव्यापि द्रव्यं वा? न तावद् व्यापिद्रव्यम्; तत्सान्निध्यस्याकाशादीन्द्रियसन्निकर्षेऽप्यविशेषात्। कथमन्यथा दिक्कालाकाशात्मनां व्यापिद्रव्यता? अथाऽव्यापि द्रव्यम्; तत्किं मनः, नयनम्, आलोको वा? त्रितयस्याप्यस्य सान्निध्यं घटादी[8]न्द्रियसन्निकर्षवदाकाशादीन्द्रियसन्निकर्षे[5]ऽप्यस्त्येव। गुणोऽपि तत्सहकारी प्रमेयगतः, प्रमातृगतो वा स्यात्, उभयगतो वा। प्रमेयगतश्चेत्; कथं नाकाशस्य प्रत्यक्षता द्रव्यत्वतोऽस्यापि गुणसद्भावाविशेषात्? अमूर्तत्वा[9]न्नास्य प्रत्यक्षतेऽत्यप्ययुक्तम्; सामान्यादे[7]रप्यप्रत्यक्षत्वप्रसङ्गात्। प्रमातृगतोऽप्यदृष्टो[11]ऽन्यो[12] वा गुणो गगनेन्द्रियसन्निकर्षसमयेऽस्त्येव। न खलु तेना[13]स्य[14] विरोधो येनानुत्पत्तिः प्रध्वंसो वा तत्सद्भावे[15]ऽस्य[16] स्यात्। उभयगतपक्षेऽप्युभयपक्षोपक्षिप्तदोषानुषङ्गः। कर्माऽप्यर्थान्तर[17]गतम्, इन्द्रियगतं वा तत्[18]सहकारि स्यात्? न तावदर्थान्तरगतम्; विज्ञानोत्पत्तौ तस्या[19]नङ्गत्वात्। इन्द्रियगतं तु तत्तत्रास्त्येव; आकाशेन्द्रियसन्निकर्षे नयनोन्मीलनादि[20]कर्मणः सद्भावात्। प्रतिबन्धापाय[21]रूपयोग्यतोपगमे तु सर्वं[22] सुस्थम्, यस्य यत्र[23] यथाविधो हि प्रतिबन्धापायस्तस्य तत्र तथाविधार्थ[24]परिच्छित्ति[25]रुत्पद्यते। प्रतिबन्धापायश्च प्रतिपत्तुः[26] सर्वज्ञसिद्धिप्रस्तावे प्रसाधयिष्यते।

न च योग्यताया एवार्थपरिच्छित्तौ साधकतमत्वतः प्रमाणत्वानुषङ्गात् 'ज्ञानं प्रमाणम्' इत्यस्य[27] विरोधः[28]; अस्याः स्वार्थग्रहणशक्तिलक्षणभावेन्द्रिय[29]स्वभावायाः 'यदसन्निधाने[30] कारका[31]न्तरसन्नि-

१ सन्निकर्षस्य। २ ऐन्द्रिया चेद् घटवद्दृश्येत न च दृश्यते इयमतोऽतीन्द्रिया। ३ परैः। ४ धर्मकार्यपक्षयोः धर्मरूपे पक्षे। ५ सन्निकर्षे। ६ क्रिया। ७ रूपरूपत्व। ८ ज्ञेयपदार्थ। ९ परः। १० गन्धादेः। ११ पुण्यपापरूपः। १२ इच्छादिः। १३ नभोनयनसन्निकर्षेण। १४ सहकारिगुणस्य। १५ सन्निकर्ष। १६ गुणस्य। १७ प्रमेय। १८ सन्निकर्ष। १९ अन्यथा स्थिरार्थानामप्रतीतिप्रसङ्गात्। २० निमीलन। २१ आवरणापाय। २२ घटादौ प्रमोत्पद्यते नाकाशादाविति। २३ नुः। २४ अर्थे। २५ ज्ञानं। २६ नरस्य। २७ लक्षणस्य। २८ न च विरोधो कुतः। सामग्रीत्वत इति पर्यन्तमस्य हेतुर्द्रष्टव्यः। २९ भावेन्द्रिय। ३० अनुमानम्। यदभावसन्निकर्षादिसद्भावौ धर्मिणौ। स्वार्थसंवेदनजनकौ न भवत इति साध्यो धर्मः। तदनुपपद्यमानत्वात्। ३१ सन्निकर्ष।

1 तु०—यदसन्निधाने कारकान्तरसन्निधाने इत्यादि प्रमाण० पृ० ५१।

धानेऽपि यन्नोत्पद्यते तत्तत्करणकम्, यथा कुठारासन्निधाने कुठार(काष्ठ)च्छेदनमनुत्पद्यमानं कुठारकरणकम्, नोत्पद्यते च भावेन्द्रियासन्निधाने स्वार्थसंवेदनं सन्निकर्षादिसद्भावेऽपीति तद्भावेन्द्रियकरणकम्' इत्यनुमानतः प्रसिद्धस्वभावायाः स्वार्थावभासिज्ञानलक्षणप्रमाणसामग्रीत्वतः तदुत्पत्तावेव साधकतमत्वोपपत्तेः। ततोऽन्यनिरपेक्षतया स्वार्थपरिच्छित्तौ साधकतमत्वाज्ज्ञानमेव प्रमाणम्। तद्धेतुत्वात्सन्निकर्षादेरपि प्रामाण्यम्, इत्यप्यसमीचीनम्; छिदिक्रियायां करणभूतकुठारस्य हेतुत्वादयस्कारादेरपि प्रामाण्यप्रसङ्गात्। उपचारमात्रेणाऽस्य प्रामाण्ये च आत्मादेरपि तत्प्रसङ्गस्तद्धेतुत्वाविशेषात्।

ननु चात्मनः प्रमातृत्वाद् घटादेश्च प्रमेयत्वान्न प्रमाणत्वं प्रमातृप्रमेयाभ्यामर्थान्तरस्य प्रमाणत्वाभ्युपगमात् इत्यप्यसङ्गतम्; न्यायप्राप्तस्याभ्युपगममात्रेण प्रतिषेधायोगात्, अन्यथा 'अचेतनादर्थान्तरं प्रमाणम्' इत्यभ्युपगमात्सन्निकर्षादेरपि तन्न स्यात्। किञ्च प्रमेयत्वेन सह प्रमाणत्वस्य विरोधेप्रमाणमप्रमेयमेव स्यात्, तथा चासत्त्वप्रसङ्गः संविन्निष्ठत्वाद्भावव्यवस्थितेः, इत्ययुक्तमेतत्–

"प्रमाता प्रमाणं प्रमेयं प्रमितिरिति चतसृष्वेवंविधासु तत्त्वं

---

१ तस्मात्। २ ता। ३ योग्यता। ४ ज्ञाने साधकतमत्वसामर्थ्यं। ५ भावेन्द्रियात्। ६ सन्निकर्ष। कारकान्तर। ७ परः। ८ तत्प्रसङ्गादिति पाठान्तरम्। ९ प्रमातुः। १० मुख्यज्ञान। ११ परः। १२ कर्तृत्वात्। १३ भिन्नस्य। १४ परेषाम्। १५ युक्त्या प्राप्तस्य प्रमाणत्वस्य। १६ युक्त्या रहिताभ्युपगमेन। १७ चेतनं। १८ परैः जैनैः। १९ अचेतनत्वात। २० प्रामाण्यं। २१ वस्तुनि। २२ प्रमितिविषयाः प्रमेया इति वचनाज्ज्ञानविषयत्वाद्भावस्य व्यवस्थितेः प्रमितिविषयप्रमेयत्वे सत्येव सत्त्वव्यवस्थितिस्तत्तु प्रमाणो नास्त्येवाप्रमेयरूपत्वादिति भावः। २३ अप्रमेयत्वं स्यादसत्त्वं च न स्यादिति (हेतोः) सन्दिग्धानैकान्तिकत्वे सत्याह। २४ परिच्छित्ति ज्ञान। २५ प्रमाणं सन्न भवति अप्रमेयत्वात्खरविषाणवत्। २६ सत्ता। २७ पदार्थ। २८ ततश्च। २९ परमार्थः।

---

1 'ननु प्रमातृप्रमेययोरपि उपलब्धिहेतुत्वात् प्रमाणत्वं प्रसज्येत विशेषो वा वक्तव्यः इति? अयं विशेषः—प्रमातृप्रमेययोश्चरितार्थत्वात्—प्रमाणे प्रमाता प्रमेयं च चरितार्थम्' अचरितार्थं च प्रमाणम् अतस्तदेव उपलब्धिसाधनमिति' न्याय वा० पृ० ५।

2 'यस्येप्साजिहासाप्रयुक्तस्य प्रवृत्तिः स प्रमाता, येनार्थं प्रमिणोति तत्प्रमाणम्, योऽर्थः प्रमीयते तत्प्रमेयम्, यत् अर्थविज्ञानं सा प्रमितिः, चतसृषु चैवंविधासु तत्त्वं परिसमाप्यते' न्यायभा० पृ० २।

परिसमाप्यत इति" [　　　　] । कथं वा सर्वज्ञज्ञानेनाप्यस्या-प्रमेयत्वे तस्य सर्वज्ञत्वम्? किञ्च प्रमाणवत् प्रमातुरपि प्रमेयत्वधर्माधारत्वं न स्यात्तस्य तद्धिरोधाविशेषात् । तथा चाश्वविषाणस्येवास्यासत्त्वानुषङ्गः । तद्धर्माधारत्वे वा प्रमात्रा ततोऽर्थान्तरभूतेन भवितव्यं प्रमाणवत् । तस्यापि प्रमेयत्वे ततोऽप्यर्थान्तरभूतेनेत्येकत्रात्मनि प्रमेयेऽनन्तप्रमातृमालाप्रसक्तिः । यदि धर्मभेदादेकत्रात्मनि प्रमातृत्वं प्रमेयत्वं चाविरुद्धं तर्हि प्रमाणत्वमप्यविरुद्धमनुमन्यताम् । ततो निराकृतमेतत्–"प्रमातृप्रमेयाभ्यामर्थान्तरं प्रमाणम्" इति ।

चक्षुषश्चाप्राप्यकारित्वेनाग्रे समर्थनात्कथं घटेन संयोगस्तदभावात्कथं रूपादिना संयुक्तसमवायादिः? इत्यव्याप्तिः सन्निकर्षप्रमाणवादिनाम् । सर्वज्ञाभावश्चेन्द्रियाणां परमाण्वादिभिः साक्षात्सम्बन्धाभावात्; तथाहि-नेन्द्रियं साक्षात्परमाण्वादिभिः सम्बध्यते इन्द्रियत्वादस्मदादीन्द्रियवत् ।

योगजधर्मानुग्रहीतस्य तैः साक्षात्सम्बन्धश्चेत्; कोऽयमिन्द्रियस्य योगजधर्मानुग्रहो नाम-स्वविषये प्रवर्त्तमानस्यातिशयाधानम्, सहकारित्वमात्रं वा? प्रथमपक्षोऽयुक्तः; परमाण्वादौ स्वयमिन्द्रियस्य प्रवर्तनाभावात्, भावे तदनुग्रहवैयर्थ्यम् । तत एवास्य तत्र प्रवृत्तौ परस्पराश्रयः सिद्धे हि योगजधर्मानुग्रहे तत्र तस्य प्रवृत्तिः, तस्यां च योगजधर्मानुग्रह इति । द्वितीयपक्षोऽप्यस-

१ परिपूर्णतां याति अंत्रवान्तं प्राप्नोतीत्यर्थः । २ इति यदुक्तं तच्चतुर्थसंख्यापूरकस्य प्रमाणस्याभावादयुक्तमेव प्रामाण्यस्य । ३ सति । ४ प्रमेयत्वेन प्रमातृत्वस्य । ५ प्रमातुः । ६ प्रमात्रन्तरस्यापि । ७ स्वभाव । ८ प्रमित्याश्रयः प्रमाता । ९ प्रमाविषयः प्रमेयः । १० प्रमितिक्रियां प्रति करणत्वम् । ११ आत्मनः । १२ प्रमाणहेतुत्वात् । १३ प्रमात्रन्तर्गतत्वात्प्रमाणस्य । १४ आदिपदेन रूपत्वादिर्ग्राह्यः । १५ (संयुक्तसमवेतसमवायादिः) । १६ लक्ष्यैकदेशवृत्तिरव्याप्तिरिति वचनात्तस्य स्पर्शादिचतुर्ष्विन्द्रियेषु प्राप्यकारित्वं चक्षुष्यप्राप्यकारित्वमित्यव्याप्तिः । १७ समाधिः । १८ ईश्वरस्य । १९ परः । २० अदृष्ट । २१ उपकारात् । २२ करणं । २३ धर्मात् । २४ परमाणवादौ ।

1 'अस्मद्विशिष्टानां तु योगिनां युक्तानां योगजधर्मानुगृहीतेन मनसा स्वात्मान्तराकाशदिक् कालपरमाणुवायुमनस्सु तत्समवेतगुणकर्मसामान्यविशेषेषु समवाये चाऽवितथं स्वरूपदर्शनमुत्पद्यते । वियुक्तानां पुनः चतुष्टयसन्निकर्षाद् योगजधर्मानुग्रहसामर्थ्यात् सूक्ष्मव्यवहितविप्रकृष्टेषु प्रत्यक्षमुत्पद्यते' प्रश० भा० पृ० १८७ । एतत्स्थलस्य व्योमवती कन्दली च टीकाऽनुसन्धेया ।

म्भाव्यः स्वविषयातिक्रमेणास्य योगजधर्मसहकारित्वे[1]नाप्यनुग्रहा-
योगात्, अन्यथै[2]कस्यै[3]वेन्द्रियस्याशेषरसादिविषयेषु प्रवृत्तौ तदनु-
ग्रहप्रसङ्गः स्यात्। अथै[4]कमेवान्तःकरणं (योगजधर्मानु)गृहीतं युग-
पत्सूक्ष्माद्यशेषार्थविषयज्ञानजनकमिष्य[5]ते तन्न; अणुमनसोऽशे-
षार्थैः सकृ[6]त्सम्बन्धाभावे[7]तस्तज्ज्ञानजनकत्वासम्भवात्, अन्य[8]था
दीर्घशष्कुलीभक्षणादौ सकृच्चक्षुरादिभि[9]स्तत्सम्बन्धप्रसक्तेः रूपादि-
ज्ञानपञ्चकस्य सकृदुत्पत्तिप्रसङ्गात्-

"युग[10]पज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" [न्यायसू० १।१।१६] इति
विरुध्येत। क्रम[11]शोऽन्य[12]त्र तद्द[13]र्शनादत्रापि क्रमकल्पनायां योगिनः[14]
सर्वार्थेषु सम्ब[15]न्धस्य क्रमकल्पनास्तु त[16]थादर्शनाविशेषात्। तद[17]नु-
ग्रहसामर्थ्याद् दृष्टा[18]तिक्रमे[19]ष्टौ च आत्मैव समाधिविशेषोत्थधर्म-
माहात्म्यादन्तःकरणनिरपेक्षोऽशेषार्थग्राहकोऽस्तु किमदृष्टपरि-
कल्पनया? तन्नाणुमनसोऽशेषार्थैः साक्षात्सकृत्सम्बन्धो घटते।

अथ[20] पर[21]म्परया, तथा हि-मनो महेश्वरेण सम्बद्धं[22] तेन च
घटादयोऽर्थास्तेषु रूपादय इति, अत्रा[23]प्यशेषार्थज्ञानासम्भवः।
सम्बन्धसम्बन्धोऽपि हि त[24]स्याशेषार्थैर्वर्तमानैरेव नानुत्प[25]न्नविनष्टैः।
तत्[26]काले तै[27]रपि सह सोऽस्तीति चेन्न; तदा वर्तमानार्थसम्बन्ध-
सम्बन्धस्यासम्भवात्। त[28]तोऽयमन्य एवेति चेत्, तर्हि तज्जनितज्ञा-
नमपि अनुत्पन्नविनष्टार्थकालीनसम्बन्धसम्बन्धजनितज्ञानादन्य-
दिति एकज्ञानेनाशेषार्थज्ञत्वासम्भवः। बहुभिरेव ज्ञानैस्तदिति
चेत्, तेषां किं क्रमेण भावः, अक्रमेण वा? क्रमभावे; नानन्तेनापि
कालेनानन्तता संसा[29]रस्य प्रती[30]येत-य एव हि सम्बन्धसम्बन्ध-
वशाज् ज्ञानजनकोऽर्थः स एव तज्जनितज्ञानेन गृह्यते नान्य
इति। अ[31]क्रमभावस्तु नोपपद्यते विनष्टानुत्पन्नार्थज्ञानानां वर्तमा-
नार्थज्ञानकालेऽसम्भवात्। न हि कारणाभावे कार्यं नामातिप्र-
सङ्गात्। न च बौद्धानामिव यौगानां विनष्टानुत्पन्नस्य कारणत्वं
सिद्धान्तविरोधात्। नित्य[32]त्वादीश्वरज्ञानस्योक्त[33]दोषानवकाश

१ इन्द्रियस्य। २ विषयान्तरेऽपि सहकारित्वरूपानुग्रहश्चेत्। ३ योगजधर्मस्य। ४ परः। ५ परैः। ६ युगपत्। ७ परमते। ८ तदर्थैः सकृतसम्बन्धश्चेन्मनसः। ९ मनसः। १० परग्रन्थः॥ ११ परः। १२ घटादौ। १३ मनःसम्बन्धः। १४ सर्वज्ञस्य। १५ मनसः। १६ क्रमेण मनःसम्बन्ध। १७ परः। १८ क्रमेण मनःसम्बन्धस्य। १९ युगपदशेषार्थग्रहणमितीष्टौ। २० परः। २१ अशेषार्थैरणुमनसो हि सम्बन्धः। २२ सर्वगतत्वात् (महेश्वरस्य)। २३ सम्बन्धसम्बन्धे। २४ मनसः। २५ तेषामसत्त्वात्। २६ परः। २७ अनुत्पन्नविनष्टार्थकाले। २८ अनुत्पन्नविनष्टार्थसम्बन्धसम्बन्धात् परः। २९ नृणाम्। ३० ईश्वरेण। ३१ युगपत्। ३२ परः। ३३ असर्वज्ञत्वज्ञानासम्भव।

इत्यप्यवाच्यम्; तन्नित्यत्वस्येश्वरनिराकरणप्रघट्टके निराकरिष्यमाणत्वात्। तन्न सन्निकर्षोऽप्यनुपचरितप्रमाणव्यपदेशभाक्॥ छ॥

एतेनेन्द्रियवृत्तिः प्रमाणमित्यभिदधानः साङ्ख्यः प्रत्याख्यातः। ज्ञानस्वभावमुख्यप्रमाणकरणत्वात् तत्राप्युपचारतः प्रमाणव्यवहाराभ्युपगमात्। न चेन्द्रियेभ्यो वृत्तिर्व्यतिरिक्ता, अव्यतिरिक्ता वा घटते। तेभ्यो हि यद्यव्यतिरिक्तासौ; तदा श्रोत्रादिमात्रमेवासौ, तच्च सुप्ताद्यवस्थायामप्यस्तीति तदाप्यर्थपरिच्छित्तिप्रसक्तेः सुप्तादिव्यवहारोच्छेदः। अथ व्यतिरिक्ता; तदाप्यसौ किं तेषां धर्मः, अर्थान्तरं वा? प्रथमपक्षे वृत्तेः श्रोत्रादिभिः सह सम्बन्धो वक्तव्यः–स हि तादात्म्यम्, समवायादिर्वा स्यात्? यदि तादात्म्यम्; तदा श्रोत्रादिमात्रमेवासाविति पूर्वोक्त एव दोषोऽनुपज्यते। अथ समवायः; तदास्य व्यापिनः सम्भवे व्यापिश्रोत्रादिसद्भावे च।

"प्रतिनियतदेशावृत्तिरभिव्यज्येत" [　　　] इति ब्रुवते। अथ संयोगः, तदा द्रव्यान्तरत्वप्रसक्तेर्न तद्धर्मो वृत्तिर्भवेत्। अर्थान्तरमसौ; तदा नासौ वृत्तिरर्थान्तरत्वात् पदार्थान्तरवत्। अर्थान्तरत्वेपि प्रतिनियतविशेषसद्भावात्तेषामसौ वृत्तिः; नन्वसौ विशेषो यदि तेषां विषयप्राप्तिरूपः; तदेन्द्रियादिसन्निकर्ष एव नामान्तरेणोक्तः स्यात्। स चानन्तरमेव प्रतिव्यूढः। अथाऽर्थाकारपरिणतिः; न; अस्या बुद्धावेवाभ्युपगमात्। न च श्रोत्रा-

१ प्रस्तावे। २ सन्निकर्षप्रमाणनिराकरणेन। ३ नेत्रादीनामुद्घाटनादिः। ४ अभिन्ना। ५ मूर्च्छागतप्रमत्तादि। ६ हेतोः। ७ जाग्रद्दशायां यथा। ८ प्रबुद्ध। ९ भिन्ना। १० स्वरूपं। ११ परैः। १२ आदिपदेन संयोगः। १३ वृत्तेः श्रोत्रादिभिः। १४ नित्य एको व्यापी समवायः। १५ इन्द्रियाणां व्यक्तीक्रियते। १६ भवन्मतं नश्यति। १७ द्वयोर्द्रव्ययोः संयोगः रागिहेतोः संयोगित्वात्। १८ इन्द्रियवृत्तेः। १९ परः। २० अर्थ। २१ परः। २२ वृत्तिः। २३ परिणतेः। २४ अर्थाकारपरिणतिः किम्। २५ साङ्ख्यैः। २६ किंच।

1 प्रस्तुतदिशा सन्निकर्षस्य खंडनंतत्त्वार्थश्लो० पृ० १६५। प्रमाणप० पृ० ५२। न्यायकु० चं० लि० परि० १। स्या० रत्नाकर पृ० ५४। इत्यादिषु द्रष्टव्यं तुलनीयंच।

2 'इन्द्रियप्रणालिकया बाह्यवस्तूपरागात् सामान्यविशेषात्मनोऽर्थस्य विशेषावधारणप्रधानावृत्तिः प्रत्यक्षम्'। योगद० व्यासभा० पृ० २७।

'अत्रेयं प्रक्रिया इन्द्रियप्रणालिकया अर्थसन्निकर्षेण लिंगज्ञानादिना वा आदौ बुद्धेः अर्थाकारावृत्तिः जायते'। सांख्यप्र० भा० पृ० ४७।

विषयैश्चित्तसंयोगाद् बुद्धीन्द्रियप्रणालिकात्।
प्रत्यक्षं सांप्रतं ज्ञानं विशेषस्यावधारकम्॥ २३॥ योगकारिका।

दिस्वभावा तद्धर्मरूपा अर्थान्तरस्वभावा वा तत्परिणतिर्घटते; प्रतिपादितदोषानुषङ्गात् । न च परपक्षे[1] परिणामः परिणामिनो[2] भिन्नोऽभिन्नो वा घटते इत्यग्रे विचारयिष्यते ॥ छ ॥

एतेन[3] प्रभाकरोपि 'अर्थतथात्वप्रकाशको ज्ञातृव्यापारोऽज्ञानरू-[4]
५ पोऽपि प्रमाणम्' इति प्रतिपादयन् प्रतिव्यूढः[5] प्रतिपत्तव्यः; सर्वत्राज्ञानस्योपचारादेव[6] प्रसिद्धेः । न च ज्ञातृव्यापारस्वरूपस्य किञ्चित्प्रमाणं ग्राहकम्[7]-तद्धि प्रत्यक्षम्, अनुमानम्, अन्यद्वा[8] ? यदि प्रत्यक्षम्; तत्किं स्वसंवेदनम्[9], बाह्येन्द्रियजम्, मनःप्रभवं वा ? न तावत्स्वसंवेदनम्; तस्याज्ञाने[10] विरोधादनभ्युपगमाच्च[11] ।
१० नापि बाह्येन्द्रियजम्; इन्द्रियाणां स्वसम्बद्धेऽर्थे ज्ञानजनकत्वोपगमात् । न च ज्ञातृव्यापारेण सह तेषां सम्बन्धः; प्रतिनियतरूपादिविषयत्वात्[12] । नापि मनोजन्यम्; तथा[13]प्रतीत्यभावादनभ्युपगमादतिप्रसङ्गाच्च[14][15] । नाप्यनुमानम्;

"ज्ञातसम्बन्धस्यैकदेशदर्शनादसन्निकृष्टेऽर्थे बुद्धिः"[16][17] [शाबर-
१५ भा० १।१।५] इत्येवंलक्षणत्वात्तस्य । सम्बन्धश्च कार्यकारणभावादिनिराकरणेन[18] नियमलक्षणोऽभ्युपगम्यते[19][20] । तदुक्तम्-

१ साङ्ख्य । २ इन्द्रियस्य । ३ इन्द्रियवृत्तिः प्रमाणमित्येतन्निराकरणेन । ४ चेतनासमवायाच्चेतन आत्मा न स्वरूपतोऽतस्तद्व्यापारोऽपि (अज्ञानरूपः) । ५ (निराकृतः) । ६ मते । ७ स्यात् । ८ अर्थापत्तिरूपम् । ९ अनुभूतिः प्रत्यक्षमिदमाश्रित्य । १० ज्ञातृव्यापारे अप्रवृत्तिः । ११ प्राभाकरैः । १२ ज्ञातृव्यापारस्याऽत्यन्तं परोक्षत्वाच्च । १३ अत्यन्तपरोक्षतया ज्ञातृव्यापारग्राहकत्वप्रकारेण मनोजन्यप्रत्यक्षस्य । १४ परैः । १५ धर्मादेरप्यतीन्द्रियस्य मनःप्रत्यक्षत्वं स्यात् परमाण्वादेरपि ग्राहकत्वं मनसः स्यात् । १६ नुः । १७ इन्द्रियैः । १८ तादात्म्यादि । १९ अविनाभाव । २० परेण ।

1 इन्द्रियवृत्ति-प्रमाणवादस्य खंडनं विविधरीत्या निम्नग्रंथेषु अवलोकनीयम् न्यायवा० ता० टी० पृ० २३३ । न्यायमं० पृ० २६ । तत्त्वार्थश्लो० पृ० १८७ । न्यायकु० चं० लि० परि० १ । स्या० रत्नाकर पृ० ७२ ।

2 'तेन जन्मैव विषये बुद्धेर्व्यापार इष्यते ।
तदेव च प्रमारूपं तद्वती करणं च धीः ॥ ६१ ॥
व्यापारो न यदा तेषां तदा नोत्पद्यते फलम् ॥६१॥ मीमां० श्लो० पृ० १५२ ।

'अथवा ज्ञानक्रियाद्वारको यः कर्तृभूतस्य आत्मनः कर्मभूतस्य च अर्थस्य परस्परं सम्बन्धो व्याप्तृव्याप्यत्वलक्षणः स मानसप्रत्यक्षावगतो विज्ञानं कल्पयति' शास्त्रदी० पृ० २०२ ।

3 'ज्ञातसम्बन्धस्यैकदेशदर्शनात् एकदेशान्तरेऽसन्निकृष्टे बुद्धिः' शाबर भा० पृ० ८ ।

कार्यकारणभावादिसम्बन्धानां द्वयी गतिः ।
नियमानियमाभ्यां स्यादनियमादनङ्गता[3] ॥ १ ॥
सर्वेऽप्यनियमा ह्येते नानुमोत्पत्तिकारणम् ।
नियमात्केवलादेव न किञ्चिन्नानुमीयते ॥ २ ॥
एवं परोक्त[4]सम्बन्धप्रत्याख्याने कृते सति ।
नियमो नाम सम्बन्धः स्वमते[5]नोच्यतेऽधुना ॥ ३ ॥ [ ]
इत्यादि ।

स[6] च सम्बन्धः किमन्वय[7]निश्चयद्वारेण प्रतीयते, व्यतिरेकनिश्चयद्वारेण वा ? प्रथमपक्षे किं प्रत्यक्षेण, अनुमानेन वा तन्निश्चयः ? न तावत्प्रत्यक्षेण; उभय[8]रूपग्रहणे ह्यन्वयनिश्चयः, न च ज्ञातृव्यापारस्वरूपं प्रत्यक्षेण निश्चीयते इ[9]त्युक्तम् । त[10]दभावे च–न त[11]त्प्रतिबद्धत्वेनार्थप्रकाशनलक्षणहेतुरूपमिति । नाप्यनुमाने[12]न; अस्य निश्चितान्वयहेतुप्रभवत्वाभ्युपगमात् । न च त[13]स्यान्वयनिश्चयः प्रत्यक्षसमधिगम्यः पूर्वोक्तदोषानुषङ्गात् । नाप्यनुमानगम्यः; तद[14]नन्तरप्रथमानुमानाभ्यां तन्निश्चये[15]ऽनवस्थेतरेतराश्रयानुषङ्गात् । नापि व्यतिरेकनिश्चयद्वारेण; व्यतिरेको हि साध्याभावे हेतोरभावः । न च प्र[16]कृतसाध्याभावः प्रत्यक्षाधिगम्यः, तस्य ज्ञातृव्यापाराविषयत्वेन त[17]द्भाववत्तदभावेऽपि प्रवृत्तिविरोधात् । समर्थितं चास्य तदविषयत्वं प्रागिति । नाप्यनुमानाधिगम्यः, अत[18] एव ।

अथानुपलम्भनिश्चयः[19] अत्रापि किं दृश्यानुपलम्भोऽभिप्रेतः, अदृश्यानुपलम्भो वा ? यद्यदृश्यानुप[20]लम्भः; नासौ गमकोऽतिप्रस[21]ङ्गात् । दृश्यानुपलम्भोऽपि चतुर्द्धा भिद्यते स्वभाव–कारण–व्यापकानुपलम्भविरुद्धोपलम्भभेदात् । तत्र न तावदाद्यो युक्तः; स्व[22]भा-

१ एवं सति च किम् । २ गोपालघटिकादौ व्यभिचारात् । ३ अनुमानं प्रति । ४ सौगताभ्युक्त । ५ प्रभाकरमतेन । ६ साध्यसाधनयोरविनाभावलक्षणः । ७ ज्ञातृव्यापारे सति अर्थप्रकाशलक्षणो हेतुर्न घटते । ८ साध्यसाधनरूप । ९ पूर्वम् । १० ज्ञातृव्यापारस्य । ११ सम्बद्ध । १२ अर्थप्रकाशो ज्ञातृव्यापारहेतुकस्तस्मिन् सत्येवोपजायमानत्वादित्यनुमानेन । १३ हेतोः । १४ द्वितीयानुमान । १५ अर्थप्रकाशान्यथानुपपत्तिज्ञातृव्यापारयो(?)रन्वयः तस्मिन्ननुमानं । तत्स्वयमेव जानाति अनुमानान्तरेण वा । प्रथमस्येतरेतराश्रयः । द्वितीयेऽनवस्था । १६ ज्ञातृव्यापारलक्षण । १७ यद्धि यद्भावग्राहकं तदेव तद्भावग्राहकमिति । १८ तद्भाववत्तदभावेऽपि प्रवृत्तिविरोधात् । १९ व्यतिरेकः ज्ञातृव्यापार आत्मनि नास्ति अनुपलभ्यमानत्वात् खरशृङ्गवदित्यनुपलम्भस्वरूपम् । २० पदार्थानां । २१ पिशाचपरमाण्वादेरपि गमकत्वं स्यात् । २२ शुद्धभूतलोपलम्भ एव स्वभावानुपलम्भः ।

वानुपलम्भस्यैवंविधे विषये[1] व्यापाराभावात्, एकज्ञानसंसर्गिपदार्थान्तरोपलम्भरूपत्वात्तस्य। न च ज्ञातृव्यापारेण सह कस्यचिदेकज्ञानसंसर्गित्वं सम्भवतीति। नापि द्वितीयः; सिद्धे हि कार्यकारणभावे कारणानुपलम्भः कार्याभावनिश्चायकः। न च ज्ञातृव्यापारस्य केनचित् सह कार्यत्वं निश्चितम्; तस्यादृश्यत्वात्। प्रत्यक्षानुपलम्भनिबन्धनश्च कार्यकारणभावः। तत एव केनचित्सह व्याप्यव्यापकभावस्यासिद्धेर्न व्यापकानुपलम्भोऽपि तन्निश्चायकः। विरुद्धोपलम्भोपि द्विधा भिद्यते विरोधस्य द्विविधत्वात्; तथा हि-को(एको) विरोधोऽविकलकारणस्य भवतोऽन्यभावेऽभावात्सहानवस्थालक्षणः शीतोष्णयोरिव, विशिष्टात्प्रत्यक्षान्निश्चीयते। न च प्रकृतं साध्यमविकलकारणं कस्यचिद्भावे निवर्त्तमानमुपलभ्यते; तस्यादृश्यत्वात्। द्वितीयस्तु परस्परपरिहारस्थितिलक्षणः। सोप्युपलभ्यस्वभावभावनिष्ठत्वात्प्रकृतविषये न सम्भवति।

किञ्चानुपलम्भोऽभावप्रमाणं प्रमाणपञ्चकविनिवृत्तिरूपम्। तच्च ज्ञातमेवाभावसाधकम्; कृतयत्नस्यैव प्रमाणपञ्चकविनिवृत्तेरभावसाधकत्वोपगमात्। तदुक्तम्-

गत्वा गत्वा तु तान्देशान् यद्यर्थो नोपलभ्यते।
तदान्यकारणाभावादसन्नित्यवगम्यते॥
[मीमांसाश्लो० वा० अर्था० श्लो० ३८]

तज्ज्ञानं चान्यस्मादभावप्रमाणात्, प्रमेयाभावाद्वा? तत्राद्यपक्षेऽनवस्थाप्रसङ्गः-तस्याप्यन्यस्मादभावप्रमाणात्परिज्ञानात्। प्रमेयाभावात्तज्ज्ञाने च-इतरेतराश्रयत्वम्।

१ अत्यन्तपरोक्षे। २ घटेन सह प्रतिषेध्याधारभूतभूतलम्। ३ यदि भूतलाधारतयापि विधेत तदा प्रत्यक्षेणैव लभ्येत। ४ आत्मनः। ५ ज्ञातृव्यापारलक्षण। ६ कारणेन। ७ अन्वयः व्यतिरेकः (प्रत्यक्षेणान्वयव्यतिरेकनिबन्धनः)। ८ ज्ञातृव्यापारस्यादृश्यत्वादेव। ९ आत्मादिव्यापारस्य। १० ज्ञातृव्यापाराभाव। ११ ता। १२ शीतकालादेः। १३ जायमानस्य। १४ वह्नि। १५ ज्ञातृव्यापाररूपं। १६ विरोधिनः। १७ ज्ञातुर्व्यापारस्य। १८ विरोधः। १९ ज्ञेय। २० अर्थानुपलम्भकाले। २१ इन्द्रियाभावस्यालोकाभावस्य च कारणस्य। २२ आद्यप्रमाणपञ्चकाभावस्य प्रथमप्रमाणपञ्चकविषयप्रमाणपञ्चकाभावात् परिज्ञानं तस्यापि प्रमाणात्..............द्वितीयस्याद्वितीयप्रमाणपञ्चकविषयप्रमाणपञ्चकाभावात् परिज्ञानं तस्याप्येवमित्यादि प्रकारेण। २३ सिद्धे हि प्रमेयाभावे अभावप्रमाणपरिज्ञानं सिध्यति तत्सिद्धौ च प्रमेयाभावसिद्धिरिति।

1 तु०-अविकलकारणस्य भवतः...इत्यादि-न्यायवि० पृ० ९६।

किञ्चासौ ज्ञातृव्यापारः कारकैर्जन्यः, अजन्यो वा? यद्यजन्यः; तदासावभावरूपः[1], भावरूपो[2] वा? प्रथमपक्षोऽयुक्तः; तस्याभावरूपत्वेऽर्थप्रकाशनलक्षणफलजनकत्वविरोधात्। विरोधे वा[3] फलार्थिनः कारकान्वेषणं व्यर्थम्, तत एवा[4]भिमतफलसिद्धेर्विश्व[5]मदरिद्रं च स्यात्। अथ भावरूपोऽसौ; तत्रापि किं नित्यः, अनित्यो वा? ५ न तावन्नित्यः; अन्धादीनामप्यर्थदर्शनप्रसङ्गात् सुप्तादिव्यवहाराभावः सर्वसर्वज्ञताप्रसङ्गः कारकान्वेषणवैयर्थ्यं[6] च स्यात्। अथानित्यः; तदयुक्तम्; अजन्यस्वभाव[7]भावस्य[8]नित्यत्वेन केनचिद[9]प्यनभ्युपगमात्। भवतु वाऽनित्यः; तथाप्यसौ कालान्तरस्थायी, क्षणिको वा? न तावत्कालान्तरस्थायी; १०

"क्षणिका[1] हि सा[10] न कालान्तरमवतिष्ठते" [शाबरभा०] इति वचसो विरोधप्रसङ्गात्। कारकान्वेषणं चापार्थकम्-तत्कालं[11] यावत्तत्फलस्यापि निष्पत्तेः। क्षणिकत्वे विश्वं निखिलार्थप्रतिभासरहितं स्यात् क्षणानन्तरं तस्यासत्त्वेनार्थप्रतिभासाभावात्। द्वितीयादि[12]क्षणेषु स्वत एवात्मनो[13] व्यापारान्तरोत्पत्तेर्नायं दोषः; १५ इत्यप्यसङ्गतम्; कारकानायत्तस्य[14] देशकालस्वरूपप्रतिनियमायोगात्। किञ्च; अनवरतव्यापाराभ्युपगमे[15] तज्जन्यार्थप्रतिभासस्यापि तथा भावात्[16] तदवस्थः सुप्ताद्यभावदोषानुषङ्गः। तन्नाऽजन्योऽसौ।

नापि जन्यः; यतोऽसौ क्रियात्मकः, अक्रियात्मको वा? प्रथमपक्षे किं क्रिया परिस्पन्दात्मिका, तद्विपरीता वा? तत्राद्यः पक्षो- २० ऽयुक्तः; निश्चलस्यात्मनः परिस्पन्दात्मकक्रियाया अयोगात्। नापि द्वितीयः; तथाविधक्रियायाः परिस्पन्दाभावरूपतया फलजनकत्वायोगात्, अभावस्य फलजनकत्वविरोधात्। न चासौ[17] परिस्पन्दस्वभावा तद्विपरीता वा-कारक[18]फला[19]न्तरालवर्त्तिनी[20] प्रमाणतः प्रतीयते। तन्न क्रियात्मको व्यापारः। नापि तद्विपरीतः; अक्रियात्मको २५ हि व्यापारो बोधरूपः, अबोधरूपो वा? बोधरूपत्वे; प्रमातृवत्प्रमा-

---

१ खरविषाणादौ। २ आकाशादौ। ३ किञ्च। ४ अभावरूपव्यापारादेव। ५ जगत्। ६ सहकारिकारणैर्नित्यस्यानुपकार्यत्वात्। ७ प्रागभावाद् व्यभिचारमाशङ्क्य भावशब्दः प्रयुक्तः। ८ पदार्थस्य। ९ वादिना नरेण। १० ज्ञातृव्यापाररूपा क्रिया। ११ ज्ञातृव्यापार। १२ परः। १३ पुरुषस्य। १४ ज्ञातृव्यापारस्य। १५ परैः। १६ सर्वदाभावात्। १७ किञ्च। १८ प्रमाता। १९ अर्थप्रकाश। २० ज्ञातृव्यापारलक्षणा।

---

1 'क्षणिका हि सा न बुद्धयन्तरकालमवस्थास्यते' शाबरभा० पृ० ७।

णान्तरगम्यता न स्यात् । अबोधरूपता तु व्यापारस्यायुक्ता; चिद्रूपस्य ज्ञातुरचिद्रूपव्यापारायोगात् । 'जानाति' इति च क्रिया ज्ञातृव्यापारो भवताभिधीयते, स च बोधात्मक एव युक्तः ।

किञ्चासौ धर्मिस्वभावः, धर्मस्वभावो वा? प्रथमपक्षे-ज्ञातृवन्न प्रमाणा[3]न्तरगम्यता । द्वितीयेपि पक्षे-धर्मिणो ज्ञातुर्व्यतिरिक्तो व्यापारः, अव्यतिरिक्तो वा, उभयम्, अनुभयं वा? व्यतिरिक्तत्वे-सम्बन्धाभावः । अव्यतिरेके-ज्ञातैव[4] तत्स्वरूपवत् । उभयपक्षे तु-विरोधः । अनुभयपक्षोऽप्ययुक्तः; अन्योन्यव्यवच्छेदरूपाणां सकृत् प्रतिषेधायोगात् एकनिषेधेनापरविधानात् ।

किञ्च, व्यापारस्य कारकजन्यत्वोपगमे तज्जनने प्रवर्तमानानि कारकाणि किमपरव्यापारसापेक्षाणि, न वा? तत्राद्यपक्षे अनवस्था; व्यापारान्तरस्याप्यपरव्यापारान्तरसापेक्षैस्तैर्जननात् । व्यापारनिरपेक्षाणां तज्जनकत्वे-फलजनकत्वमेवास्तु किमदृष्टव्यापारकल्पनाप्रयासेन? अस्तु वा व्यापारः तथाप्यसौ प्रकृतकार्ये व्यापारान्तरसापेक्षः, निरपेक्षो वा? न तावत्सापेक्षः; अपरापरव्यापारान्तरापेक्षायामेवोपक्षीणशक्तिकत्वेन प्रकृतकार्यजनकत्वाभावप्रसङ्गात् । व्यापारान्तरनिरपेक्षस्य तज्जनकत्वे कारकाणामपि तथा[11] तदस्तु विशेषाभावात् । अथैवं पर्यनुयोगः[12] सर्वभाव[13]स्वभावव्यावर्तकः; तथाहि-वह्नेर्दाहकस्वभावत्वे गगनस्यापि तत्स्यात् इतरथा वह्नेरपि न स्यात्, तदसमीक्षिताभिधानम्; प्रत्यक्षसिद्धत्वेनात्र पर्यनुयोगस्यानवकाशात्, व्यापारस्य तु प्रत्यक्षसिद्धत्वाभावान्न तथा[14]स्वभावावलम्बनं युक्तम् ।

अर्थप्राकट्यं[15] व्यापारमन्तरेणानुपपद्यमानं तं कल्पयतीत्यर्थापत्तितस्तत्सिद्धिरित्यपि फल्गुप्रायम्; अर्थप्राकट्यं हि ततो भिन्नम्, अभिन्नं वा? यद्यभिन्नम्; तदाऽर्थ एवेति यावदर्थं तत्सद्भावात्सुप्ताद्य[16]भावः । भेदे-सम्बन्धासिद्धिरनुपकारात् । उपकारे[17]ऽनवस्था । किञ्च, एतदन्यथानुपपद्यमानत्वेनानिश्चितं[19] तं[20] कल्पयति,

---

१ ज्ञातृव्यापारोस्ति अर्थप्राकट्यान्यथानुपपत्तेरित्यर्थापत्तिरूप । २ अक्रियात्मकत्वात् । ३ अभिन्नत्वात् । ४ धर्मरूपत्वात् । ५ वस्तुधर्माणां । ६ परैः । ७ कारकाणां । ८ अर्थप्रकाश । ९ अर्थप्रकाशलक्षणे । १० नष्ट । ११ निरपेक्षत्वप्रकारेण । १२ प्रश्नः । १३ पदार्थ । १४ व्यापारान्तरनिरपेक्षत्वप्रकारेण कार्यजनकत्वलक्षण । १६ अन्यद्वा इत्यमुं तृतीयं विकल्पं शोधयति । १६ अर्थप्राकट्यस्य सर्वदा भावात् । १७ उपकारस्याप्युपकारकरणे सम्बन्धो न स्यादित्युपकारकल्पने । १८ ज्ञातृव्यापारमन्तरेण । १९ अर्थप्राकट्यं । २० व्यापारं ।

निश्चितं वा? न तावदनिश्चितम्; अतिप्रसङ्गात्-तथाभूतं हि तद्यथा तं कल्पयति तथा येन विनाप्युपपद्यते तदपि किं न कल्पयत्यविशेषात्? निश्चितं चेत्; क तस्यान्यथानुपपन्नत्वनिश्चयः-दृष्टान्ते, साध्यधर्मिणि वा? दृष्टान्ते चेत्; लिङ्गस्यापि तत्र साध्यनियतत्वनिश्चयोऽस्तीत्यनुमानमेवार्थापत्तिरिति प्रमाणसंख्याव्याघातः। साध्यधर्मिण्यपि कुतः प्रमाणात्तस्य तन्निश्चयः? विपक्षेऽनुपलम्भाच्चेत्; न; तस्य सर्वात्मसम्बन्धिनोऽसिद्धानैकान्तिकत्वादित्युक्तम्। ततः प्रमाणतोऽचेतनस्वभावज्ञातृव्यापारस्याप्रतीतेः कथमर्थतथात्वप्रकाशकोऽसौ यतः प्रमाणं स्यात्॥ छ॥

ज्ञानस्वभावस्य ज्ञातृव्यापारस्यार्थतथात्वप्रकाशकतया प्रमाणताभ्युपगमान्न भट्टस्यानन्तरोक्ताशेषदोषानुषङ्गः, इत्यप्यसमीक्षिताभिधानम्; सर्वथा परोक्षज्ञानस्वभावस्यास्यासत्त्वेन प्रतिपादयिष्यमाणत्वात्। सकलज्ञानानां स्वपरव्यवसायात्मकत्वेन व्यवस्थितेः इत्यलं प्रपञ्चेन। 'तन्नाज्ञानं प्रमाणमन्यत्रोपचारात्' इत्यभिप्रायवान् प्रमाणस्य ज्ञानविशेषणत्वं समर्थयमानः प्राह—

हिताऽहितप्राप्तिपरिहारसमर्थं हि प्रमाणं ततो ज्ञानमेव तत् ॥२॥

हितं सुखं तत्साधनं च, तद्विपरीतमहितम्, तयोः प्राप्तिपरिहारौ। प्राप्तिः स्वलूपादेयभूतार्थक्रियाप्रसाधकार्थप्रदर्शकत्वम्। अर्थक्रियार्थी हि पुरुषस्तन्निष्पादनसमर्थं प्राप्तुकामस्तत्प्रदर्शकमेव प्रमाणमन्वेषत इत्यस्य प्रदर्शकत्वमेव प्रापकत्वम्। न हि तेन प्रदर्शितेऽर्थे प्राप्त्यभावः। न च क्षणिकस्य ज्ञानस्यार्थप्राप्तिकालं यावदवस्थानाभावात्कथं प्रापकतेति वाच्यम्? प्रदर्शकत्वव्यतिरेकेण तस्यास्तत्रासम्भवात्। न चान्यस्य ज्ञानान्तरस्यार्थप्राप्तौ संनिकृष्टत्वात्तदेव प्रापकमित्याशङ्कनीयम्; यतो यद्यप्यनेकस्माज्ज्ञानक्षणात्प्रवृत्तावर्थप्राप्तिस्तथापि पर्यालोच्यमानमर्थप्रदर्शकत्वमेव

१ कथं तथाहि। २ स्तम्भाद्यभावेन। ३ ज्ञातृव्यापारेण सह। ४ अर्थप्राकट्यस्य। ५ अविनाभाव। ६ ज्ञातृव्यापाराभावे स्तम्भादौ प्राकट्यस्य। ७ परः। ८ ज्ञातृव्यापारस्य निराकरणेन। ९ स्नानपानादि। १० जलादि। ११ जलादिकं। १२ प्राप्तिनिबन्धनत्वं। १३ बौद्धो वदति। १४ स्थिति। १५ परेण। १६ अर्थज्ञाने। १७ समीपत्वात्। १८ पुरुषस्य।

1 शाबराभिमतज्ञातृव्यापाररूपप्रमाणस्य समीक्षा निम्नग्रंथेषु समवलोक्य तुलनीया न्यायमं० पृ० १६। न्यायकु० चं० लि० परि० १। सन्मति० टी० पृ० २०।

2 तु०—'प्रवर्त्तकत्वमपि प्रवृत्तिविषयप्रदर्शकत्वमेव' न्यायवि० टी० पृ० ५।

ज्ञानस्य प्रापकत्वम्–नान्यत्। तच्च प्रथमत एव ज्ञानक्षणे सम्पन्न[1]मिति नोत्तरोत्तरज्ञानानां तदुप[2]योगि[3](त्वम्), तद्विशेषांश[4][5]प्रदर्शकत्वेन तु तत्[6] तेषामुपपन्नमेव। प्रवृत्तिमूला तूपादेया[7]र्थप्राप्तिर्न प्रमाणाधीना[8]–तस्याः पुरुषेच्छाधीनप्रवृत्तिप्रभवत्वात्। न च प्रवृ[9]त्त्यभावे[10] प्रमाणस्यार्थप्रदर्शकत्वलक्षणव्यापाराभावो वाच्यः, प्रती[11]तिविरोधात्। न खलु चन्द्रार्कादिविषयं प्रत्यक्षमप्रवर्तकत्वान्न तत्प्रदर्शकमिति लोके प्रतीतिः। कथं चैवंवादिनः[12] सुगतज्ञानं प्रमाणं स्यात्? न हि हेयोपादेयतत्त्वज्ञानं कंचित्[13] तस्य प्रवर्तकं कृतार्थत्वात्, अन्यथा[14] कृतार्थता[15] न स्यादि[16]तरजनवत्। सुखादिस्वसंवेदनं वा[17]: न हि कंचित्[18]तत्पुरुषं प्रवर्तयति फलात्मकत्वात्, अन्यथा प्रवृ[19]त्त्यनवस्था[20]। व्याप्तिज्ञानं वा[21] न खलु स्वविषये[22]ऽर्थिनं[23] तत्प्रवर्त्तयति अनुमानवैफल्यप्रसङ्गात्। ततः[24] प्रवृत्त्यभावेऽपि[25] प्रवृत्तिविषयोपद[26]र्शकत्वेन[27] ज्ञानस्य प्रामाण्यमभ्युपगन्तव्यम्[28]।

ननु[29] प्रवृत्तेर्विषयो भावी, वर्तमानो वार्थः[30]? भावी चेत्; नासौ प्रत्यक्षेण प्रवर्तयितुं शक्यस्तत्र तस्याप्रवृत्तेः। वर्तमानश्चेत्;न; अर्थिनोऽत्राऽप्रवृत्तेः[31], न हि कश्चिदनुभूयमान एव प्रवर्ततेऽनवस्था[32]पत्तेः[33]; इत्यसाम्प्रतम्[34];अर्थक्रियासमर्थार्थस्य अर्थक्रियायाश्च प्रवृत्तिविषयत्वात्। तत्रार्थ[35]क्रियासमर्थोर्थो[36]ऽध्यक्षेण प्रदर्शयितुं शक्यः। न ह्यर्थक्रियावत्सोप्यनागतः[37]। न चास्याध्यक्षत्वे प्रवृत्त्यभावप्रसङ्गः[38]; अर्थक्रियार्थत्वात्तस्याः। कार्यादृष्टौ[39] कथम् 'एतत्तत्र[40][41] समर्थम्' इत्यवगमो[42] यतः प्रवृत्तिः स्यादिति चेत्; आस्तां तावदेतत्–कार्यकारणभाव-

---

१ जातं। २ प्रदर्शकत्वम्। ३ फलवत्। ४ अर्थ। ५ भेद। ६ प्रदर्शकत्वं। ७ जलादि। ८ कारणका। ९ प्रवर्तकत्वाभावे। १० नुः। ११ भा। १२ यन्न प्रवर्तकं तन्न प्रमाणमित्येवंवादिनः। १३ विषये। १४ कृतार्थकमपि प्रवर्तयति चेत्। १५ सुगतो न सर्वज्ञो ज्ञानेन प्रवर्त्यमानत्वाद्गोपवत्। विपक्षे गोपस्य सर्वज्ञत्वं तत एव सुगतवत्। १६ कृतार्थकमपि प्रवर्तयतीति चेत्। १७ कथं प्रमाणम् (अपि तु न स्यात् अस्ति च प्रमाणं प्रदर्शकत्वात्)। १८ अर्थे। १९ प्रवृत्तेः फलहेतुत्वात्तत्रापि फलेन भाव्यम्। २० अनुपरमा। २१ कथं प्रमाणम्। २२ अखिलसाध्यसाधनलक्षणे। २३ पुरुषं। २४ यतः प्रदर्शकत्वमेव प्रापकत्वं ज्ञानस्य। २५ सद्भावे। २६ अर्थ। २७ प्रकाशकत्वेन। २८ परेण। २९ परः। ३० द्वयोर्मध्ये। ३१ विषये। ३२ अन्यथा। ३३ अर्थप्राप्त्यर्थं हि प्रवृत्तिः सा प्रत्यक्षा जातेति। ३४ प्रवृत्तेः फलहेतुत्वात्तत्रापि फलेन भाव्यम्। ३५ तयोर्द्वयोर्मध्ये। ३६ जलादिः। ३७ अप्रत्यक्षत्वप्रसङ्गादर्थस्य। ३८ अर्थप्राप्त्यर्थं हि प्रवृत्तिः सा प्रत्यक्षं जायते इति। ३९ परः। स्नानादि। ४० जलं। ४१ अर्थक्रियायां। ४२ निश्चयः।

विचारप्रस्तावे विस्तरेणाभिधानात्। प्रतीयते[1] च 'इदं[2]मभिमतार्थ-
क्रियाकारि न त्विदम्[3]' इत्यर्थमात्रप्रतिपत्तौ प्रवृत्तिः पशूनामपि।
तस्मादर्थक्रियासमर्थार्थप्रदर्शकत्वमेव प्रमाणस्य हितप्रापणम्।
अहितपरिहारोपि 'अनभिप्रेतप्रयोजनप्रसाधनमेतत्[4]' इत्युपदर्शन-
मेव। तयोः[5] समर्थमव्यवधानेनार्थतथाभावप्रकाशकं हि यस्मा-
त्प्रमाणं ततो ज्ञानमेव तत्। न चाज्ञानस्यैवंविधं[6] तत्[7]प्राप्तिपरि-
हारयोः सामर्थ्यं[8] ज्ञानकल्पनावैयर्थ्यप्रसङ्गात्।

ननु साधूक्तं प्रमाणस्याज्ञानरूपतापनोदार्थं ज्ञानविशेषणमस्मा[9]-
कमपीष्टत्वात्, तद्धि समर्थयमानैः[10] साहाय्यमनुष्ठितम्[11]। तत्तु[12]
किञ्चिन्निर्विकल्पकं किञ्चित्सविकल्पकमिति मन्यमानं[13]प्रति अशेष-
स्यापि प्रमाणस्याविशेषेण विकल्पात्मकत्वविधानार्थं व्यवसाया-
त्मकत्वविशेषणसमर्थनपरं[14] तन्निश्चयात्मकमित्याद्याह। यत्प्राक्प्र[15]-
बन्धेन समर्थितं ज्ञानरूपं प्रमाणम्—

तन्निश्चयात्मकं समारोपविरुद्धत्वादनुमानवत्॥ ३॥

संशयविपर्यासानध्यवसायात्मको हि समारोपः, तद्विरुद्धत्वं
वस्तुतथाभावग्राहकत्वं निश्चयात्मकत्वेनानुमाने[16] व्याप्तं सुप्रसिद्धम्।
अन्यत्रापि[17] ज्ञाने तद् दृश्यमानं निश्चयात्मकत्वं निश्चाययति,
समारोपविरोधिग्रहणस्य[18] निश्चयस्वरूपत्वात्। प्रमाणत्वाद्वा[19] तत्त[20]-
दात्मकमनुमानवदेव। परं[21] निरपेक्षतया वस्तुतथाभावप्रकाशकं हि
प्रमाणम्, न चाविकल्पकम्[22] तथा-नीलादौ[23] विकल्पस्य क्षणक्ष-
येऽनुमानस्यापेक्षणात्[24]। ततोऽप्रमाणं तत् वस्तुव्यवस्थायामपे-
क्षितपरव्यापारत्वात् सन्निकर्षादिवत्[25]। न[26]चेदम[27]नुभूयते[28]-अक्ष-
व्यापारानन्तरं[29] स्वार्थव्यवसायात्मनो नीलादिविकल्पस्यैव वैशद्ये-
नानुभवात्।

---

१ किंच। २ वस्तु। ३ पाषाणादिकम्। ४ अहिकण्टकादि। ५ हिताहितप्राप्तिपरिहारयोः। ६ अव्यवधानेनार्थतथात्वप्रदर्शकत्वलक्षणम्। ७ हिताहित। ८ अन्यथा। ९ बौद्धानां। १० जैनैः। ११ कृतम्। १२ ज्ञानं। १३ बौद्धं। १४ प्रधानं। १५ स्वापूर्वेत्यादि। १६ व्यापकेन। १७ प्रत्यक्षे। १८ ज्ञानस्य। १९ सम्यग्ज्ञानत्वादविसंवादित्वान्निश्चयहेतुत्वात्। २० ज्ञानविशेषणविशिष्टं प्रमाणं। २१ प्रमाणत्वं च स्यान्निश्चयात्मकत्वं च न स्यादिति सन्दिग्धानैकान्तिकत्वे सत्याह। परं सविकल्पकं ज्ञानम्। २२ दर्शनं सौगताभिमतम्। २३ नीलमीदं पीतमीदम्। २४ सर्वं क्षणिकं सत्त्वात् इत्यस्य। २५ ज्ञानापेक्ष। २६ किञ्च। २७ निर्विकल्पकम्। २८ प्रत्यक्षसिद्धं न भवतीत्यर्थः। २९ नयनोन्मीलनानन्तरम्।

नच विकल्पाविकल्पयोर्युगपद्वृत्तेर्लघुवृत्तेर्वा एकत्वाध्यवसा-
याद्विकल्पे वैशद्यप्रतीतिः; तद्व्यतिरेकेणापरस्याप्रतीतेः । भेदेन
प्रतीतौ ह्यन्यत्रान्यस्यारोपो युक्तो मित्रे चैत्रवत् । न चाऽस्पष्टाभो
विकल्पो निर्विकल्पकं च स्पष्टाभं प्रत्यक्षतः प्रतीतम् । तथाप्यनु-
५ भूयमानस्वरूपं वैशद्यं परित्यज्याननुभूयमानस्वरूपं वै(पमवैशद्यं)
परिकल्पयन् कथं परीक्षको नाम? अनवस्थाप्रसङ्गात्-ततोऽप्यपर-
स्वरूपं तदिति परिकल्पनप्रसङ्गात् । युगपद्वृत्तेश्चाभेदाध्यवसाये
दीर्घशष्कुलीभक्षणादौ रूपादिज्ञानपञ्चकस्यापि सहोत्पत्तेरभे-
दाध्यवसायः किन्न स्यात्? भिन्नविषयत्वात्तेषां तदभावे-अत
१० एव स प्रकृतयोरपि न स्यात् क्षणसन्तानविषयत्वेनानयोरप्यस्या-
विशेषात् । लघुवृत्तेश्चाऽभेदाध्यवसाये-खरटितमित्यादावप्य-
भेदाध्यवसायप्रसङ्गः । कथं चैवं कापिलानां बुद्धिचैतन्ययोर्भे-
दोऽनुपलभ्यमानोपि न स्यात्?

अथानयोः सादृश्याद्भेदेनानुपलम्भः, अभिभवाद्वाभिधीयते?
१५ ननु किंकृतमनयोः सादृश्यम्-विषयाभेदकृतम्, ज्ञानरूपताकृतं

१ क्रमसत्त्वेऽपि । २ अविकल्पविकल्पयोः स्पष्टाऽस्पष्टत्वेन भेदेन प्रत्यक्षतः प्रतीत्य-
भावे । ३ विकल्पे । ४ अवैशद्यम् । ५ सौगतः । ६ अवैशद्यधर्मात् । ७ पीतम् ।
८ सविकल्पकम् । ९ परः । १० अविकल्पकविकल्पयोः । ११ सामान्य ।
१२ अविकल्पविकल्पयोः । १३ भिन्नविषयत्वस्य । १४ किंच । १५ विकल्पाविकल्प-
योरनुपलभ्यमानभेदसम्भवप्रकारेण । १६ सांख्यानाम् । १७ अप्रतीयमानः ।
१८ अनुपलभ्यमानत्वान्न सिध्येत् । १९ अभ्युपगममात्रस्य तत्रापि सद्भावात् ।
२० परः । २१ विकल्पेतरयोः । २२ पृथक्त्वाध्यवसायस्य । २३ पराभवात् ।
२४ परेण । २५ भा (तृतीया) ।

1 'मनसोर्युगपद्वृत्तेः सविकल्पाऽकल्पयोः ।
विमूढः सम्प्रवृत्तेर्वा (लघुवृत्तेर्वा) तयोरैक्यं व्यवस्यति' ॥
प्रमाणवा० ३ । १३३

2 'विकल्पज्ञानं हि संकेतकालदृष्टत्वेन वस्तु गृह्णत् शब्दसंसर्गयोग्यं गृह्णीयात् ।
संकेतकालदृष्टत्वं च संकेतकालोत्पन्नज्ञानविषयत्वम् । यथाच पूर्वोत्पन्नं विनष्टं ज्ञानं
संप्रत्यसत् तद्वत् पूर्वविनष्टज्ञानविषयत्वमपि संप्रति नास्ति वस्तुनः । तदसद्रूपं वस्तुनो
गृह्णदसन्निहितार्थग्राहित्वादस्फुटाभम् अस्फुटाभत्वादेव च सविकल्पकम् । ततः
स्फुटाभत्वात् निर्विकल्पकम्...' न्यायबि० टी० पृ० २१

3 तुलना—'अथ विकल्पाविकल्पयोः सादृश्यादभिभवाद्वा...'
स्या० रत्नाकर पृ० ७२.

वा? न तावद्विषयाभेदकृतम्; सन्तानेतरविषयत्वेनानयोर्विषयाभेदाऽसिद्धेः ज्ञानरूपतासादृश्येन त्वभेदाध्यवसाये—नीलपीतादिज्ञानानामपि भेदेनोपलम्भो न स्यात्। अथाभिभवात्; केन कस्याभिभवः? विकल्पेनाविकल्पस्य भानुना तारानिकरस्येवेति चेत्; विकल्पस्याप्यविकल्पेनाभिभवः कुतो न भवति? बलीयस्त्वादस्येति चेत्; कुतोऽस्य बलीयस्त्वम्-बहुविषयात्, निश्चयात्मकत्वाद्वा? प्रथमपक्षोऽयुक्तः, निर्विकल्पविषय एव तत्प्रवृत्त्यभ्युपगमात्, अन्यथा अगृहीतार्थग्राहित्वेन प्रमाणान्तरत्वप्रसङ्गः। द्वितीयपक्षेऽपि स्वरूपे निश्चयात्मकत्वं तस्य, अर्थरूपे वा? न तावत्स्वरूपे—

"सर्वचित्तचैत्तानामात्मसंवेदनं प्रत्यक्षम्" [न्यायबि० पृ० १९] इत्यस्य विरोधात्। नाप्यर्थे-विकल्पस्यैकस्य निश्चयानिश्चयस्वभावद्वयप्रसङ्गात्। तच्च परस्परं भिन्नश्चैकान्ततोऽभिन्नं चेत्; समवायाद्यनभ्युपगमात् सम्बन्धासिद्धेः 'बलवान्विकल्पो निश्चयात्मकत्वात्' इत्यस्यासिद्धिः। अभेदैकान्तेऽपि-तद्द्वयं तद्वानेव वा भवेत्। कथंचित्तादात्म्ये-निश्चयानिश्चयस्वरूपसाधारणमात्मानं प्रतिपद्यते चेद्विकल्पः-स्वरूपेऽपि सविकल्पकः स्यात्, अन्यथा निश्चयस्वरूपतादात्म्यविरोधः। न च स्वरूपमनिश्चिन्वन्विकल्पोऽर्थनिश्चायकः, अन्यथाऽगृहीतस्वरूपमपि ज्ञानमर्थग्राहकं भवेत् तथा च—

"अप्रत्यक्षोपलम्भस्य" [ ] इत्यादिविरोधः; तत्स्वरूप-

१ क्षण। २ पुनः। ३ क्षण। ४ तिरस्कारः। ५ परैः। ६ निर्विकल्पकबोध। ७ सविकल्पक्षण। ८ निर्विकल्पकक्षण। ९ नीलमिति स्वसंवेदनेन। १० स्वसंवेदनम्। ११ नीलाद्याकारतया सविकल्पाः क्षणाः। १२ सर्वज्ञानानां स्वरूपे निर्विकल्पकत्वाभ्युपगमस्य ग्रन्थस्य। १३ स्वरूपेऽनिश्चयात्मकत्वमर्थे निश्चयात्मकत्वम्। १४ ततः स्वरूपनिश्चयाभावात्। १५ विकल्पात्। १६ स्वरूपम्। १७ परेण। १८ त्रयाणां भेदात्। १९ सौगताभ्युपगतस्य हेतोः। २० स्वरूपम्। २१ विकल्पः। २२ सति। २३ स्वरूपम्। २४ तथा चापसिद्धान्तप्रसङ्गः। २५ भा। २६ विकल्पस्य। २७ किंच। २८ अज्ञात। २९ नाज्ञातं नाम ज्ञापकम्। ३० अत्यन्तपरोक्षज्ञानस्य। ३१ नार्थसिद्धिः प्रसिद्धयति।

1 तुलना—'अथ विकल्पस्य बलीयस्त्वाद'…सन्मति० टी० पृ० ५००
स्या० रत्नाकर पृ० ५०

2 'अप्रसिद्धोपलम्भस्य नार्थवित्तिः प्रसिद्धयति।
तत्र ग्राह्यस्य संवित्तिर्ग्राहकानुभवादृते' ॥ २०७४ ॥ तत्त्वसं०

स्वा[1]नुभूत[2]स्या[3]प्य[4]निश्चितस्य क्षणिक[5]त्वादिव[6]न्नान्यनिश्चायकत्वम् । विकल्पान्तरेण तन्निश्चयेऽनवस्था ।

क[7]श्चानयोरेकत्वा[8]ध्यवसायः-किमेक[1]विषयत्वम्, अन्यतरेणान्यतरस्य विषयीकरणं वा, परत्रेतरस्याध्यारोपो वा ? न तावदेक-
५ विषयत्वम्; सामान्यविशेष[9]विषयत्वेना[10]नयोर्भिन्नविषयत्वात्। दृश्य[11]-वि[12]कल्प(ल्प्य)योरेकत्वाध्यवसायादभिन्नविषयत्वम्; इत्यप्ययुक्तम्; एकत्वाध्यवसायो हि दृश्ये विकल्प्यस्याध्यारोपः। स च गृहीतयोः, अगृहीतयोर्वा तयोर्भवेत्? न तावद्गृहीतयोः; भिन्नस्वरूपतया प्रतिभासमानयोर्घटपटयोरिवैकत्वाध्यवसायायोगात्।
१० न चान[13]योर्ग्रहणं दर्शनेन; अस्य विकल्प्यागोचरत्वात् । नापि विकल्पेन; अस्यापि दृश्यागोचरत्वात्। नापि ज्ञानान्तरेण; अस्यापि निर्विकल्पकत्वे विकल्[14]पात्मकत्वे चोक्तदोषानतिक्रमात् । नाप्यगृहीतयोः स सम्भवति अति[15]प्रसङ्गात्। सादृश्यनिबन्धनश्चारोपो दृष्टः[16], व[17]स्त्ववस्तुनोश्च नीलखरविषाणयोरिव सादृश्याभावान्ना-
१५ ध्यारोपो युक्तः। तन्नैकविषयत्वम्।

अन्यतरस्यान्यतरेण विषयीकरणमपि-समानकालभा[18]विनोरपारतन्त्र्यादनुपपन्नम् । अविषयीकृतस्या[19]न्यस्यान्यत्रा[20]ध्यारोपोप्यसम्भवी । किञ्च, वि[21]कल्पे निर्विकल्पकस्याध्यारोपः, निर्विकल्पके विकल्पस्य वा ? प्रथमपक्षे-विकल्पव्यवहारोच्छेदः निखिलज्ञानानां
२० निर्विकल्पकत्वप्रसङ्गात्। द्वितीयपक्षेपि-निर्विकल्पकवार्तोच्छेदः-सकलज्ञानानां सविकल्पकत्वानुषङ्गात्।

किंच, विकल्पे निर्विक[22]ल्पकधर्मारोपाद्वैशद्यव्यवहारवत् निर्विकल्पके विकल्पधर्मारोपादवैशद्यव्यवहारः किन्न स्यात्? निर्विकल्पकधर्मेणाभिभूतत्वाद्विकल्प[23]धर्मस्य इत्यन्य[24]त्रापि समानम्। भवतु

१ उपलम्भः स्वरूपं जानाति नवा? न जानाति चेत्कथं सर्वं जानातीत्यभिप्रायः। २ नीलंनीलमिति। ३ नीलोयमिति। ४ नैयायिकं प्रति बौद्धेनोक्तम्। ५ विकल्पस्वरूपं यथा क्षणिकत्वादिनिश्चायकं न भवति अनिश्चितत्वात्तथाऽर्थस्यापि न निश्चायकं तत एव। ६ अर्थे। ७ निर्विकल्पकसविकल्पकयोः। ८ भा। ९ परमाणु। १० निर्विकल्पकसविकल्पकयोः। ११ परः, स्वलक्षण। १२ नीलादि। १३ दृश्यविकल्प्ययोः। १४ सति। १५ खरविषाणयोरप्येकत्वाध्यवसायप्रसङ्गः परमाण्वादावपि स्याद्वा। १६ लोके। १७ दृश्यविकल्प्ययोः। १८ विकल्पाविकल्पयोः। १९ अविकल्पस्य। २० विकल्पे। २१ इदं निर्विकल्पकमिति। २२ वैशद्य। २३ विकल्पधर्मस्यावैशद्यस्य निर्विकल्पके आरोपेन न (इति चेत्)। २४ विकल्पधर्मेण निर्विकल्पधर्मस्याभिभूतत्वात् विकल्पे निर्विकल्पकधर्मारोपाद्वैशद्यव्यवहारो माभूत्।

1 तुलना—किमेकविषयत्वमन्यतरस्य···स्या० रत्नाकर पृ० ५०

वा तेनैवाभिभवः; तथाप्यसौ सहभावमात्रात्, अभिन्नविषयत्वात्, अभिन्नसामग्रीजन्यत्वाद्वा स्यात्? प्रथमपक्षे गोदर्शनसमयेऽश्वविकल्पस्य स्पष्टप्रतिभासो भवेत्सहभावाविशेषात्। अथानयोर्भिन्नविषयत्वात् न अस्पष्टप्रतिभासमभिभूयाश्वविकल्पे स्पष्टतया प्रतिभासः; तर्हि शब्दस्वलक्षणमध्यक्षेणानुभवता तत्र क्षणक्षयानुमानं स्पष्टमनुभूयतामभिन्नविषयत्वान्नीलादिविकल्पवत्। भिन्नसामग्रीजन्यत्वादनुमानविकल्पस्याध्यक्षेण तद्धर्माभिभवाभावे-सकलविकल्पानां विशदावभासिस्वसंवेदनप्रत्यक्षेणाभिन्नसामग्रीजन्येनाभिभवप्रसङ्गः। अथ तत्राभिन्नसामग्रीजन्यत्वं नेष्यते-तेषां विकल्पवासनाजन्यत्वात्, संवेदनमात्रप्रभवत्वाच्च स्वसंवेदनस्य इत्यसत्; नीलादिविकल्पस्याप्यध्यक्षेणाभिभवाभावप्रसङ्गात्तत्रापि तदविशेषात्।

किंच, अनयोरेकत्वं निर्विकल्पकमध्यवस्यति, विकल्पो वा, ज्ञानान्तरं वा? न तावन्निर्विकल्पकम्; अध्यवसायविकलत्वात्तस्य, अन्यथा भ्रान्तताप्रसङ्गः। नापि विकल्पः; तेनाविकल्पस्याविषयीकरणात्, अन्यथा स्वलक्षणगोचरताप्राप्तेः "विकल्पोऽवस्तुनिर्भासः" [ ] इत्यस्य विरोधः। न चाविषयीकृतस्यान्यत्रारोपः। न ह्यप्रतिपन्नरजतः शुक्तिकायां रजतमारोपयति। ज्ञानान्तरं तु निर्विकल्पकम्, सविकल्पकं वा? उभयत्राप्युभयदोषानुषङ्गतस्तदुभयविषयत्वायोगः। तदन्यतरविषयेणानयोरेकत्वा-

१ निर्विकल्पकधर्मेणाभिभूतत्वात्। २ दर्शनं। ३ अवैशद्यं। ४ तिरस्कृत्य लोप्य वा। ५ वैशद्येन। ६ श्रोत्रेन्द्रियदर्शनेन। ७ परेण। ८ सर्वं क्षणिकमिति। ९ परेण। १० नीलादिप्रतिभासो यथानुभूयते। ११ प्रत्यक्षं श्रोत्रचक्षुरादिजनितमनुमानं च लिङ्गजनितम्। १२ दर्शनेन। १३ अनुमानं स्पष्टं नानुभूयते। १४ प्रधानादिविकल्पानां। १५ सर्वचित्तचैत्तानामभिन्नसामग्रीप्रभवत्वात्। १६ विशदतयाप्रतिभासो भवेत्सकलविकल्पानाम्। १७ परः। १८ सर्वविकल्पेषु स्वसंवेदनेषु च। १९ सौगतैरस्माभिः। २० संस्कार। २१ प्रत्यक्षस्य। २२ नीलादिविकल्पे। २३ विकल्पेतरयोः। २४ नीलादिविकल्पवत्। २५ अवस्तुनि निर्भासः प्रतिभासो यस्य विकल्पस्य सः। २६ ग्रन्थस्य। २७ निर्विकल्पकस्य। २८ विकल्पे। २९ घटते। ३० ना। ३१ सविकल्पकनिर्विकल्पकयोः। ३२ ज्ञानेन।

1 तुलना—'तदेकत्वं हि दर्शनमध्यवस्यति'...प्रमाणप० पृ० २३। न्यायकुमु० प्र० परि०। सन्मति० टी० पृ० ५००। स्या० रत्नाकर पृ० ५२।

2 तु०—'विकल्पोऽवस्तुनिर्भासाद् विसंवादादुपप्लवः।' प्रश० कन्दली पृ० १९०

ध्यवसाये-अतिप्रसङ्गः-अक्षज्ञानेन त्रिविप्रकृष्टेतरयोरप्येकत्वाध्यवसायप्रसङ्गात्। तन्न तयोरेकत्वाध्यवसायाद्विकल्पे वैशद्यप्रतीतिः, अविकल्पकस्यानेनैवैकत्वाध्यवसायस्य चोक्तन्यायेनाप्रसिद्धत्वात्।

५ यच्चोच्यते-संहृतसकलविकल्पावस्थायां रूपादिदर्शनं निर्विकल्पकं प्रत्यक्षतोऽनुभूयते। तदुक्तम्—

"संहृत्य सर्वतश्चिन्तां स्तिमितेनान्तरात्मना।
स्थितोपि चक्षुषा रूपमीक्षते साऽक्षजा मतिः" ॥ १ ॥
[प्रमाणवा० ३।१२४]

१० "प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिद्ध्यति।
प्रत्यात्मवेद्यः सर्वेषां विकल्पो नामसंश्रयः" ॥ २ ॥
[प्रमाणवा० ३।१२३] इति।

न चात्रावस्थायां नामसंश्रयतयाऽननुभूयमानानामपि विकल्पानां सम्भवः-अतिप्रसङ्गादित्यप्युक्तिमात्रम्; अश्वं विकल्पयतो १५ गोदर्शनलक्षणायां संहृतसकलविकल्पावस्थायां स्थिरस्थूलादिस्वभावार्थसाक्षात्कारिणो विपरीतारोपविरुद्धस्याध्यक्षस्यानिश्चयात्मकत्वायोगात्। तत्त्वे वा अश्वविकल्पाद्व्युत्थितचित्तस्य गवि स्मृतिर्न स्यात् क्षणिकत्वादिवत्। नामसंश्रयात्मनो विकल्पस्यात्र निषेधे तु न किञ्चिदनिष्टम्। न चाशेषविकल्पानां नामसंश्रयतैव २० स्वरूपम्; समारोपविरोधिग्रहणलक्षणत्वात्तेषामित्यग्रे व्यासतो वक्ष्यामः। न चानिश्चयात्मनः प्रामाण्यम्; गच्छत्तृणस्पर्शसंवेदनस्यापि तत्प्रसङ्गात्। निश्चयहेतुत्वात्तस्य प्रामाण्यमित्ययुक्तम्; संशयादिविकल्पजनकस्यापि प्रामाण्यप्रसङ्गात्। स्वलक्षणानध्य-

१ देशकालस्वभावव्यवहिताव्यवहितयोः घटादिपरमाण्वाद्योः। २ विकल्पस्य। ३ परेण। ४ नष्ट। ५ नीलादि। ६ जातिद्रव्यगुणक्रियानिबन्धनाः। ७ सामस्त्येन। ८ विकल्परूपाम्। ९ स्थिरीभूतेन। १० गच्छन् वा। ११ रहितं। १२ मनसा। १३ प्रतिस्वरूपवेद्यः। १४ स्वसंवेदनेन वेद्यः। १५ शब्दः संश्रयः कारणं यस्य विकल्पस्य सः। १६ नष्टविकल्पायां। १७ सुप्तप्रमत्तादावपि स्यात्। १८ पुरुषस्य। १९ साधारणं सामान्यरूपं। २० क्षणिकादि। २१ ता (षष्ठी)। २२ निर्विकल्पकस्य। २३ व्यावृत्त। २४ नरस्य। २५ जैनानां। २६ ग्रहण। २७ शब्दाद्वैतवादे। २८ विस्तरतः। २९ दर्शनस्य। ३० दर्शनस्य। ३१ अनुक्षणिक।

1 'अविकल्पमपि ज्ञानं विकल्पोत्पत्तिशक्तिमत्।
निःशेषव्यवहाराङ्गं तद्द्वारेण भवत्यतः' ॥ १३०६ ॥ तत्त्वसं०

वसायित्वात्तद्विकल्पस्यादोषोऽयम्, इत्यन्यत्रापि समानम्। न हि नीलादिविकल्पोपि स्वलक्षणाध्यवसायी; तदनालम्बनस्य तदध्यवसायित्वविरोधात्। 'मनोराज्यादिविकल्पः कथं तदध्यवसायी'? इत्यप्यस्यैव दूषणं यस्यासौ राज्याद्यग्राहकस्वभावो नास्माकम्, सत्यराज्यादिविषयस्य तद्ग्राहकस्वभावत्वाभ्युपगमात्। ५

न चास्य विकल्पोत्पादकत्वं घटते स्वयमविकल्पकत्वात् स्वलक्षणवत्, विकल्पोत्पादनसामर्थ्याविकल्पकत्वयोः परस्परं विरोधात्। विकल्पवासनापेक्षस्याविकल्पकस्यापि प्रत्यक्षस्य विकल्पोत्पादनसामर्थ्याऽनि(वि)रोधे-अर्थस्यैव तथाविधस्य सोस्तु किमन्तर्गडुना निर्विकल्पकेन? अथाज्ञातोर्थः कथं तज्जनकोऽतिप्रसङ्गात्? दर्शनं कथमनिश्चयात्मकमित्यपि समानम्? तस्यानुभूतिमात्रेण जनकत्वे-क्षणक्षयादौ विकल्पोत्पत्तिप्रसङ्गः। यत्रार्थे दर्शनं विकल्पवासनायाः प्रबोधकं तत्रैव तज्जनकमित्यप्यसाम्प्रतम्; तस्यानुभवमात्रेण तत्प्रबोधकत्वे नीलादाविव क्षणक्षयादावपि तत्प्रबोधकत्वप्रसङ्गात्। १५

तत्राभ्यासप्रकरणबुद्धिपाटवार्थित्वाभावान्न तत्तस्याः प्रबोधकमिति चेत्; अथ कोयमभ्यासो नाम-भूयोदर्शनम्, बहुशो विकल्पोत्पत्तिर्वा? न तावद्भूयो दर्शनम्; तस्य नीलादाविव

१ संशयादि। २ नीलादिविकल्पे। ३ स्वलक्षण। ४ विकल्पः स्वलक्षणाध्यवसायी न भवति तदनालम्बनत्वात् मनोराज्यादिना (मनोराज्याध्यवसायिनेत्यर्थः) अनेकान्तोऽस्य। ५ मनोराज्यादिस्वरूपालम्बनोपि राज्याध्यवसायी। ६ बौद्धस्य। ७ मनोराज्यादिविकल्पस्य। ८ किंच। ९ निर्विकल्पकदर्शनस्य। १० स्वलक्षणं यथा। ११ अविकल्पत्वं च स्याद्विकल्पोत्पादनसामर्थ्यं च स्यादिति सन्दिग्धानैकान्तिकत्वे सत्याह। १२ अभिलापसंसर्गयोग्यतारहित्यमविकल्पकत्वं तस्मिन्सति कथं विकल्पोत्पादनसामर्थ्यं स्यादविकल्पकस्य। १३ परः। १४ विकल्पवासनापेक्षस्य। १५ (परः) अगृहीतः। १६ विकल्प। १७ सर्वस्य सर्वत्र विकल्पं जनयेत्। १८ विकल्पजनकं। १९ उभयत्रापि। २० विकल्प। २१ यथा नीलमिदमिति विकल्पस्तथा क्षणिकमिदमिति विकल्पः स्यात्। २२ न क्षणक्षयादौ। २३ विकल्प। २४ स्वसंवेदनेन। २५ स्वर्गप्रापणशक्ति। २६ दर्शनस्य। २७ अनुभूतिमात्राविशेषात्। २८ पश्यन्नयं क्षणिकमेव पश्यतीति वचनात्। २९ इदं क्षणिकमिदं क्षणिकमिति। ३० प्रस्ताव। ३१ दर्शन।

1 तुलना—'अथ मतम्–अभ्यासप्रकरणबुद्धिपाटवार्थित्वेभ्यो···'
प्रमाण प० पृ० ५४।
स्या० रत्नाकर पृ० ५४।

क्षण[1]क्षयादा[2]वप्यविशेषात्[3]। अथ बहुशो विकल्पोत्पत्तिरभ्यासः; तस्य क्षणक्षयादिदर्शने कुतोऽभावः? तस्य विकल्पवासनाप्रबोधकत्वाभावाच्चेत्; अन्योन्याश्रयः-सिद्धे हि क्षणक्षयादौ दर्शनस्य विकल्पवासनाप्रबोधकत्वाभावे तल्लक्षणाभ्यासाभावसिद्धिः, तत्सिद्धौ चास्य सिद्धिरिति। क्षणिकाक्षणिकविचारणायां क्षणिकप्रकरणमप्यस्त्येव। पाटवं तु नीलादौ दर्शनस्य विकल्पोत्पादकत्वम्, स्फुटतरानुभवो वा स्यात्, अविद्यावासनाविनाशादात्मलाभो वा? प्रथमपक्षे-अन्योन्याश्रयात्। द्वितीयपक्षे तु-क्षणक्षयादावपि तत्प्रसङ्गः स्फुटतरानुभवस्यात्राप्यविशेषात्। तृतीयपक्षोऽप्ययुक्तः; तुच्छस्वभावाभावानभ्युपगमात्। अन्योत्पादककारणस्वभावस्योपगमे क्षणक्षयादौ तत्प्रसङ्गः, अन्यथा दर्शनभेदः स्याद्विरुद्धधर्माध्यासात्। योगिन एव च तथाभूतं तत्सम्भाव्येत, ततोऽस्यापि विकल्पोत्पत्तिप्रसङ्गात् "विधूतकल्पनाजाल" [ ] इत्यादिविरोधः। अर्थित्वं चाभिलषितत्वम्, जिज्ञासितत्वं वा? प्रथमपक्षोऽयुक्तः; क्वचिदनभिलषितेपि वस्तुनि तस्याः प्रबोधदर्शनात्। चक्रकप्रसङ्गश्च-अभिलषितत्वस्य वस्तुनिश्चयपूर्वकत्वात्। द्वितीयपक्षेतु-क्षणक्षयादौ तद्वासनाप्रबोधप्रसङ्गो नीलादाविवात्रापि जिज्ञासितत्वाविशेषात्।

न चैवं सविकल्प(ल्प)कप्रत्यक्षवादिनामपि प्रतिवाद्युपन्यस्तसकलवर्णपदादीनां स्वोच्छ्वासादिसंख्यायाश्चाविशेषेण स्मृतिः प्रस-

१ पश्यन्नयं क्षणिकमेव पश्यतीति वचनात्। २ इदं क्षणिकमिदं क्षणिकमिति। ३ पश्यन्नयं क्षणिकमेव पश्यतीति वचनात्। ४ क्षणिकादौ दर्शनस्य विकल्पवासनाप्रबोधकत्वाभावे सिद्धे विकल्पोत्पादकत्वलक्षणपाटवाभावसिद्धिस्तत्सिद्धौ चास्य सिद्धिरिति। ५ विकल्पवासनाप्रबोधकत्व। ६ सिद्धे हि विकल्पोत्पादकत्वे (पाटवे) नीलादौ विकल्पवासनाप्रबोधकत्वसिद्धिस्ततस्तदुत्पादकत्वसिद्धिरिति। ७ सौगतैः। ८ बुद्धैः। ९ विकल्पवासनाप्रबोधविकल्पोत्पत्ति। १० अविद्यावासनातोऽन्यदिन्द्रियं वा ज्ञानान्तरं वा आत्मा वा। ११ बसः। अविद्यावासनाविनाशस्य। १२ विकल्पोत्पादकत्वम्। १३ निर्विकल्पक। १४ नीलादौ पाटवं क्षणक्षयादावपाटवमिति। १५ एकक्षणस्यैव पाटवभावाभाव। १६ किंच। १७ पाटवं। १८ निश्चीयेत। १९ योगिनः प्रत्यक्षादपि। २० विधूतकल्पनाजालं प्रत्यक्षं योगिनां मतम्। २१ ग्रन्थविरोधः। २२ ज्ञातुमिष्टत्वं। २३ अहिकण्टकादौ। २४ अभिलाषाद्विकल्पवासनाप्रबोधस्तस्माच्च विकल्पस्तस्माच्चाभिलषितत्वम्। २५ विकल्प। २६ विकल्प। २७ निर्विकल्पकप्रत्यक्षवादिमतप्रकारेणानिश्चयात्मकस्य विकल्पाजनकत्वे। २८ जैनानाम्। २९ सौगत। ३० वाक्य। ३१ जैन। ३२ निश्वास। ३३ बोधस्य निश्चयात्मकत्वात्।

ज्यते; सर्वथैकस्वभावस्यान्तर्बहिर्वा वस्तुनोऽनभ्युपगमात्। तन्मते हि अवग्रहेहावायज्ञानादनभ्यासात्मकाद् अन्यदेवाभ्यासात्मकं धारणाज्ञानं प्रत्यक्षम्। तदभावे परोपन्यस्तसकलवर्णादिषु अवग्रहादित्रयसद्भावेपि स्मृत्यनुत्पत्तिः, तत्सद्भावे तु स्यादेव सर्वत्र यथासंस्कारं स्मृत्युत्पत्त्यभ्युपगमात्। न च परेषामप्येयं युक्तः– दर्शनभेदाभावात्, एकस्यैव क्वचिदभ्यासादीनामितरेषां वानभ्युपगमात्। न च तदन्यव्यावृत्त्या तत्र तद्योगः; स्वयमतत्स्वभावस्य तदन्यव्यावृत्तिसम्भवे पावकस्याऽशीतत्वादिव्यावृत्तिप्रसङ्गात्। तत्स्वभावस्य तु तदन्यव्यावृत्तिकल्पने-फलाभावात्-प्रतिनियततत्स्वभावस्यैवान्यव्यावृत्तिरूपत्वात्।

स्यान्मतम् अभ्यासादिसापेक्षं निरपेक्षं वा दर्शनं विकल्पस्य नोत्पादकम् शब्दार्थविकल्पवासनाप्रभवत्वात्तस्य। तद्वासनाविकल्पस्यापि पूर्वतद्वासनाप्रभवत्वादित्यनादित्वाद्विकल्पसन्तानस्य प्रत्यक्षसन्तानादन्यत्वात्, विजातीयाद्विजातीयस्योदयानिष्टेर्नोक्तदोषानुषङ्गः इत्यप्यसङ्गतम्; तस्य विकल्पाजनकत्वे "यत्रैव जनयेदेनां तत्रैवास्य प्रमाणता" [ ] इत्यस्य विरोधानुषङ्गात्। कथं वा वासनाविशेषप्रभवत्त(वात् त)तोऽध्यक्षस्य रूपादिविषयत्वनियमः मनोराज्यादिविकल्पादपि तत्प्रसङ्गात्? प्रत्यक्ष-

१ निरंशस्य। २ जैनानां। ३ अर्थे। ४ संस्कारानतिक्रमेण। ५ जैनैः। ६ सौगतानाम्। ७ दर्शनं नीलादौ विकल्पोत्पादकं क्षणक्षयादौ न भवेदिति न्यायः। ८ प्रत्यक्ष। ९ अवग्रहादिभेदात्प्रत्यक्षभेदो न दर्शनस्यैकरूपत्वात्। १० नीलादौ। ११ क्षणक्षयादौ अनभ्यासादीनाम्। १२ परेण। १३ अनभ्यासादेः। १४ अभ्यासादिरनभ्यासादिः। १५ दर्शने। १६ यथाक्रममनभ्यासस्याभ्यासस्य च। १७ अभ्यासानभ्यासादि। १८ स्वरूपेण। १९ अभ्यासाद्यस्वभावस्य। २० अभ्यासादि। २१ अनभ्यासादि। २२ अभ्यासादि। २३ स्वरूपस्य। २४ दर्शनस्य। २५ अभ्यासादि। २६ अनभ्यासादि। २७ दर्शनस्वभाव। २८ प्रकरणादि। २९ अभ्यासादिस्वभावस्य दर्शनस्य। ३० अनभ्यासादि। ३१ विकल्पस्य। ३२ शब्दार्थो नाम सामान्यं। ३३ वासनारूप। ३४ भिन्नत्वात्। ३५ दर्शनात्। ३६ विकल्पस्य। ३७ अनङ्गीकारात्। ३८ न चास्य विकल्पोत्पादकत्वं घटते स्वयमविकल्पकत्वात्स्वलक्षणवदित्यादि। ३९ दर्शनस्य। ४० अर्थे। ४१ सविकल्पात्मिकां बुद्धिं। ४२ दर्शनस्य। ४३ किंच। ४४ नयनाध्यक्षस्य। ४५ अन्यथा।

1 तु०—'शब्दार्थविकल्पवासनाप्रभवत्वान्मनोविकल्पस्य··· ततस्तर्हि कथमक्षबुद्धेः रूपादिविषयत्वनियमः···'
अष्टश० अष्टसह० पृ० ११९
स्या० रत्नाकर पृ० ५६

सहकारिणो[1] वासनाविशेषादुत्पन्नाद्रूपादिविकल्पात्तस्य तन्नियमे स्वलक्षणविषयत्वे[2]नियमोप्यत[3] एवोच्यताम्[4], अन्यथा रूपादिविषयत्वनियमोप्यतो[5] मा भूदविशेषात्। [6]तथाच–[7]स्वलक्षणगोचरोऽसौ प्रत्यक्षस्य तन्नियमहेतुत्वाद्रूपादिवत्[8]। [9]रूपाद्युल्लेखित्वा[10]-
५ द्विकल्पस्य[11] तद्बलात्[12]तन्नियमस्यैवाभ्युपगमे[13]–प्रत्यक्षस्याभिलापसंस[14]र्गोपि तद्वदनुमीयेत–[15]विकल्पस्याभि[16]लपनाभि[17]लप्यमानजात्या[18]द्युल्लेखिततयोत्पत्त्यन्यथानुपपत्तेः[19]। [20]तथाविधदर्शनस्याप्रमाणसिद्धत्वा[21]च्च आत्मैवाहम्प्रत्ययप्रसिद्धेः[22] प्रतिबन्धकापाये[23]ऽभ्यासाद्यपेक्षो विकल्पोत्पादकोऽस्तु किम[24]दृष्ट[25]परिकल्पनया? ततो विकल्पः प्रमा-
१० णम् संवादकत्वात्, अर्थपरिच्छित्तौ साधकतमत्वात्, अनिश्चितार्थनिश्चायकत्वात्, प्रति[26]पत्त्रपेक्षणीयत्वाच्च अनुमानवत्, न तु निर्विकल्पकं तद्विपरीतत्वात्सन्निकर्षादिवत्।

तस्याप्रामाण्यं[1] पुनः स्पष्टाकारविकलत्वात्[27], [28]अगृहीतग्राहित्वात्[29], असति[30] प्रवर्तनात्, हिताहितप्राप्तिपरिहारासमर्थत्वात्[31],
१५ कदाचिद्विसंवादात्[32], समारोपानिषेधकत्वात्[33], व्यवहारानुपयोगात्[34], स्वलक्षणागोचरत्वात्[35], शब्द[36]संसर्गयोग्यप्रतिभासत्वात्[37], शब्दप्रभवत्वात्[38], (ग्राह्यार्थं[2] विना तन्मात्रप्रभवत्वाद्वा) गत्यन्तरा-

---

१ क्षणिकादि। २ दर्शनस्य। ३ परेण भवता। ४ विकल्पात्। ५ दर्शनस्य। ६ विकल्पात्प्रत्यक्षस्वलक्षणविषयत्वनियमे च। ७ स्वलक्षणविषय। ८ यद्धि यद्विषयकं तदेवापरस्य तद्विषयत्वनियमहेतुर्यथा रूपादिविषयको विकल्पो रूपविषयत्वनियमहेतुः प्रत्यक्षस्य। ९ अध्यक्षस्य रूपादिविषये नियमहेतुत्वाद्यथा रूपादिविषयो विकल्पः तथाध्यक्षस्य स्वलक्षणनियमहेतुत्वात्स्वलक्षणविषयोपि विकल्पः स्यात्। १० सप्तमी। ११ परामर्शित्वात्। १२ प्रत्यक्षस्य(निश्चयस्य)। १३ रूपादिविषयत्व। १४ शब्दसम्बन्धोपि। १५ प्रत्यक्षं रूपादिनियतविषयं विकल्पस्य रूपाद्युल्लेखित्वेनोत्पत्त्यन्यथानुपपत्तेरित्यनुमानेन रूपादिविषयत्वनियमोऽनुमीयते यद्वत्। १६ शब्द। १७ वाच्य। १८ सामान्यविषय। १९ शब्दत्वेन तु दर्शनस्य तद्विपरीतत्वात्। २० किञ्च। २१ निर्विकल्पक। २२ स्वसंवेदनवेद्यः। २३ आवरण। २४ निर्विकल्पकदर्शन। २५ मनोराज्यादिविकल्पवत्। २६ प्रमातृ। २७ रहितत्वात्। २८ मनोराज्यादिविकल्पवत्। २९ धारावाहिकज्ञानवत्। ३० केशोण्डुकज्ञानवत्। ३१ द्विचन्द्रादिज्ञानवत्। ३२ स्थाणौ विसंवादे पुरुषविकल्पवत्। ३३ संशयज्ञानवत्। ३४ गच्छत्तृणस्पर्शज्ञानवत्। ३५ भ्रान्तज्ञानवत्। ३६ अर्थ। ३७ अङ्गुल्यादिवाक्यजनितविकल्पवत्। ३८ अङ्गुल्यादिजनितवाक्यवत्।

---

1 तु०—'अपि च सविकल्पकस्याऽप्रामाण्यम्···' स्या० रत्नाकर पृ० ५७

2—आद्यमखंडनानुरोधेन अयमपि 'मूलविकल्प एव' इत्यनुसन्धीयते

भावात्? न तावत्स्पष्टाकारविकलत्वात्तस्याऽप्रामाण्यम्; काचा-
भ्र[1]कादिव्यवहितार्थदूरपादपा[2]दिप्रत्यक्षस्याप्यप्रामाण्यप्रसङ्गात्। न
चैतद्युक्तम्, अज्ञातवस्तुप्रकाशनसंवादलक्षणस्य[3] प्रमाण[4]लक्षणस्य
सद्भावात्। प्रमाणान्तरत्वप्रसङ्गो वा; अस्पष्टत्वालिङ्गजत्वाभ्यां
प्रमाणद्वयानन्तर्भूतत्वात्। नापि गृहीतग्राहित्वात्; अनुमान- ५
स्याप्यप्रामाण्यानुषङ्गात्, व्याप्तिज्ञान[5]योगि[6]संवेदनगृहीतार्थग्राहि-
त्वात्। कथं वा क्षणक्षयानुमानस्य प्रामाण्य[7]म्-शब्दरूपाव-
भास्य[8]ध्यक्षावगतक्षणक्षयविषयत्वात्? नच अध्यक्षे[9]ण धर्मि[10]स्व-
रूपग्राहिणा शब्दग्रहणेपि न क्षणक्षयग्रहणम्; विरु[11]द्धधर्माध्या-
स[12]तस्त[13]द्भेद[14]प्रसक्तेः। नाप्यसतिप्रवर्तनात्; अतीता[15]नागत[16]योर्विकल्प- १०
का[17]ले अ[18]सत्त्वेपि स्वकाले सत्त्वात्। तथाप्यस्याप्रामाण्ये-प्रत्यक्ष-
स्याप्यप्रामाण्यानुषङ्गः तद्वि[19]षयस्यापि तत्कालेऽसत्त्वाविशेषात्।
हिताऽहितप्राप्तिपरिहारासमर्थत्वादित्यसम्भाव्यम्; विकल्पादेवे-
ष्टार्थप्रतिपत्तिप्रवृत्तिप्राप्तिदर्शनात् अनिष्टा[20]र्थाच्च निवृत्तिप्रतीतेः।
कदाचिदर्थप्रापकत्वाभावस्तु-प्रत्यक्षेपि समानोऽनर्थित्वादप्र[21]वृत्त- १५
स्याद्य[22]प्रत्यक्षे[23]वत्। कदाचिद्विसंवादादित्यप्यसाम्प्रतम्; प्रत्यक्षेप्य-
प्रामाण्यप्रसङ्गात्, तिमिरा[24]द्युपहतच[25]क्षुषोऽर्थाभावेपि प्रत्यक्षप्रवृ-
त्तिदर्शनात्। भ्रान्तादभ्रान्तस्य भेदोऽ[26]न्यत्रापि समानः। समारो-
पानिषेधकत्वादित्यप्यसङ्गतम्; विकल्पविषये समारोपासम्भ-
वात्। नापि व्यवहारायोग्यत्वात्; सकलव्यवहाराणां विकल्प- २०
मूलत्वात्। स्वलक्षणाऽगोचरत्वादित्यप्यसमीक्षिताभिधानम्;
अनुमानेपि त[27]त्प्रसक्तेः तद्[28]दृष्टस्यापि सामान्यगोचरत्वात्। न च
तद्ग्राह्यस्य सामान्यरूपत्वेप्यध्यवसेयस्य[29] स्वलक्षणरूपत्वाद् दृ[30]श्य-
विकल्प्यावर्थावेकी[31]कृत्य ततः प्र[32]वृत्तेरनुमानस्य प्रामाण्यम्; प्र[33]कृत-
विकल्पेऽप्यस्य[34] समानत्वात्। शब्दसंसर्गयोग्यप्रतिभासत्वादित्य- २५

---

१ स्फटिकजलादि। २ पर्वतादि। ३ पारमार्थिकं लक्षणमिदम्। ४ व्यावहारिकम्। ५ व्याप्तिज्ञानं च तद्योगिसंवेदनं च। ६ सर्वज्ञ। ७ श्रावणाध्यक्षगृहीतार्थग्राहित्वात्। ८ श्रावणाध्यक्ष। ९ निर्विकल्पकेन। १० सर्वं वस्तु क्षणिकं सत्त्वात्। ११ तस्यैवग्रहणमग्रहणमिति। १२ शब्दधर्मिणः। १३ क्षणिकत्वधर्मस्य। १४ धर्मिरूपस्य वस्तुनः क्षणिकं(कत्वं) न भवतीत्यर्थः। १५ रावणशङ्खचक्रवर्ति। १६ अर्थयोः। १७ आगमज्ञाने। १८ समकाले ग्राह्यग्राहकत्वाभावात्सव्येतरगोविषाणवत्। १९ प्रत्यक्ष। २० सर्पादेः। २१ पुरुषस्य। २२ इदं जलमिति। २३ ईप् (सप्तमी, सप्तम्यर्थे मतुरित्यर्थः)। २४ रोग। २५ पुरुषस्य। २६ भ्रान्तविकल्पे। २७ अप्रामाण्य। २८ तस्य पूर्वानुभूततत्सदृशस्य। २९ सामान्यारोपाधिकरणं स्वलक्षणमध्यवसेयम्। ३० स्वलक्षण। ३१ स्थूल। ३२ पुरुषस्य। ३३ नील। ३४ न्यायस्य।

प्यसमीचीनम्; अनुमानेपि समानत्वात्। शब्दप्रभवत्वादित्यप्यसाम्प्रतम्; शब्दाध्यक्षस्याप्रामाण्यप्रसङ्गात्। ग्राह्यार्थं विना तन्मात्रप्रभवत्वं चासिद्धम्; नीलादिविकल्पानां सर्वदार्थे सत्येव भावात्। कस्यचित्तु तमन्तरेणापि भावोऽध्यक्षेपि समानः ५ द्विचन्द्रादिप्रत्यक्षस्यार्थाभावेपि भावात्। भ्रान्तादभ्रान्तस्यान्यत्वमत्रापि समानम्।

किञ्च, विकल्पाभिधानयोः कार्यकारणत्वनियमकल्पनायाम्-किञ्चित्पश्यतः पूर्वानुभूततत्सदृशस्मृतिर्न स्यात् तन्नामविशेषास्मरणात्, तदस्मरणे तदभिधानाप्रतिपत्तिः, तदप्रतिपत्तौ तेन १० तद्योजनम्, तद्योजनात्तदनध्यवसाय इत्यविकल्पाभिधानं जगदापद्येत।

किञ्च, पदस्य वर्णानां च नामान्तरस्मृतावसत्यामध्यवसायः, सत्यां वा? तत्राद्यपक्षे-नाम्नो नामान्तरेण विनापि स्मृतौ केवलार्थाध्यवसायः किन्न स्यात्? 'स्वाभिधानविशेषापेक्षा एवार्था १५ निश्चयैर्निश्चीयन्ते' इत्येकान्तत्यागात्। द्वितीयपक्षे तु-अनवस्था-वर्णपदाध्यवसायेप्यपरनामान्तरस्यावश्यं स्मरणात्॥ छ॥

---

१ शब्दजनितप्रत्यक्षस्य। २ घटः क्वास्ते तत्रास्ते इत्यादि। ३ शब्द। ४ विकल्पस्य। ५ विकल्पस्य। ६ वन्ध्यासुतार्थं। ७ नीलं। ८ तुः। ९ तेन दृश्येन नीलेन सदृशं पूर्वानुभूतं च तच्च तत्सदृशं च तस्य स्मृतिः। १० स्मृतिर्विकल्पः। ११ पूर्वानुभूततत्सदृशार्थस्मरणात्पूर्वं नामविशेषस्य पूर्वानुभूततत्सदृशार्थस्मरणोत्पादकस्याभावात्तस्य तत्कार्यतया पूर्वानुभूततत्सदृशार्थनामविशेषस्मृत्यनन्तरभावित्वात्। १२ नामविशेष। १३ नाम। १४ शब्देन। १५ नीलशब्देनेदं वाच्यमिति योजनाभावः। १६ दृश्यस्य नीलस्य। १७ दृश्यमाने नीले विकल्पानुत्पत्तिः। १८ विकल्पाभिधानशून्यं। १९ गौरित्यस्य। २० गकारऔकारविसर्जनीयानां। २१ अभिधान। २२ नामनिरपेक्ष। २३ विकल्पैः।

---

1 तु०—"तस्मादयं किञ्चित्पश्यन् तत्सदृशं पूर्वं दृष्टं न स्मर्तुमर्हति तन्नामविशेषास्मरणात्, तदस्मरन्नैव तदभिधानं प्रतिपद्यते, तदप्रतिपत्तौ तेन तन्न योजयति, तदयोजयन्नाध्यवस्यतीति न क्वचिद्विकल्पः शब्दो वेत्यविकल्पाभिधानं जगत्स्यात्"। अष्टश० अष्टसह० पृ० ११९। स्या० रत्ना० पृ० ७७।

2 तु०—"नाम्नो नामान्तरेण विनापि स्मृतौ केवलार्थव्यवसायः किन्न स्यात्··· तन्नामान्तरपरिकल्पनायामनवस्था"। (अष्टश०) "तदुक्तं न्यायविनिश्चये (११६) अभिलापतदंशानामभिलापविवेकतः। अप्रमाणप्रमेयत्वमवश्यमनुषज्यते"॥ अष्टसह० पृ० १२०।

3 बौद्धाभिमतनिर्विकल्पकप्रत्यक्षस्य खण्डनमनयैवानुपूर्व्या—अष्टश० अष्टसह० पृ० ११८, प्रमाणप० पृ० ५३, न्यायकु० च० प्र०परि०, सम्मति०टी० पृ० ४९९। स्या० रत्ना० पृ० ७६। इत्यादिषु द्रष्टव्यम्।

येऽपि[1] शब्दाद्वैतवादिनो निखिलप्रत्ययानां[2] शब्दानुविद्धत्वेनैव[3][4][5] सविकल्पकत्वं मन्यन्ते-तत्स्पर्शवैकल्ये[6] हि तेषां प्रकाशरूपताया एवाभावप्रसङ्गः। वाग्रूपता हि शाश्वती[7] प्रत्यवमर्शिनी[8] च। तदभावे[9] प्रत्ययानां नापरं[10] रूपमवशिष्यते। सकलं चेदं वाच्यवाचकतत्त्वं शब्दब्रह्मण एव विवर्तो नान्यविवर्तो[11] नापि स्वतन्त्र-५ मिति। तदुक्तम्-

न सोऽस्ति प्रत्ययो[12] लोके यः शब्दानुगमादृते[13][14]।
अनुविद्धमिवाभाति[15][16] सर्वं शब्दे प्रतिष्ठितम् ॥ १ ॥
[वाक्यप० १।१२४]

वाग्रूपता चेदुत्क्रामेदवबोधस्य[17] शाश्वती। १०
न प्रकाशः[18][19] प्रकाशेत सा हि प्रत्यवमर्शिनी[20][21] ॥ २ ॥
[वाक्यप० १।१२५]

अनादिनिधनं शब्दब्रह्मतत्त्वं[22][23] यदक्षरम्।
विवर्ततेऽर्थभावेन[24] प्रक्रिया[25] जगतो यतः ॥ ३ ॥
[वाक्यप० १।१] १५

अनादिनिधनं हि शब्दब्रह्म उत्पादविनाशाभावात्, अक्षरं च अकाराद्यक्षरस्य निमित्तत्वात्, अनेन वाचकरूपता[26] 'अर्थभावेन' इत्यनेन तु वाच्यरूपतास्य[27] सूचिता। प्रक्रियेति भेदाः। शब्दब्रह्मेति नामसङ्कीर्तनमिति;

तेऽप्यतत्त्वज्ञाः; शब्दानुविद्धत्वस्य ज्ञानेष्वप्रतिभासनात्। तद्धि[2] २० प्रत्यक्षेण प्रतीयते, अनुमानेन वा? प्रत्यक्षेण चेत्किमैन्द्रियेण,

१ परः। २ ज्ञानानां। ३ ईप्। ४ तादात्म्य। ५ शब्दरूपापन्नत्वेनैव। ६ शब्दानुविद्धत्व। ७ अव्यभिचारिणी। ८ प्रकाशहेतुभूता च। ९ एवंविधवाग्रूपताऽभावे। १० प्रकाशोपायभूतं। ११ प्रधान। १२ ज्ञानं। १३ शब्दान्वयरहितः। १४ कुतो नास्ति? शब्दरूपापन्नमेव विश्वं शब्दे विश्रान्तं यतः। १५ अनुस्यूत। १६ एव। १७ अपगच्छेत्। १८ तदा। १९ ज्ञानं। २० शब्दरूपापन्नत्वेन। २१ यतः। २२ ता (षष्ठी, षष्ठीसमास इत्यर्थः)। २३ कर्तृ। २४ परिणमति। २५ भेदाः भवेयुः। २६ शब्द। २७ अर्थ।

1 भर्तृहरिप्रभृतयः।

2 "न तत्प्रत्यक्षतःसिद्धमविभागमभासनात्।
नित्यादुत्पत्त्ययोगेन कार्यलिङ्गं च तत्र न" ॥ १४७ ॥ तत्त्वसं०। न्यायकु० [illegible]० प्र० परि०, सन्मति० टी० पृ० ३८४, स्या० रत्ना० पृ० ९८।

स्वसंवेदनेन वा ? न तावदैन्द्रियेण; इन्द्रियाणां रूपादिनियतत्वेन ज्ञानाविषयत्वात्। नापि स्वसंवेदनेन; अस्य शब्दागोचरत्वात्। अथार्थस्य तदनुविद्धत्वात् तदनुभवे ज्ञाने तेदप्यनुभूयते इत्युच्यते; ननु किमिदं शब्दानुविद्धत्वं नाम-अर्थस्याभिन्नदेशे प्रति-
५ भासः, तादात्म्यं वा ? तत्राद्यविकल्पोऽसमीचीनः; तद्रहितस्यैवार्थस्याध्यक्षे प्रतिभासनात्। न हि तत्र यथा पुरोवस्थितो नीलादिः प्रतिभासते तथा तद्देशे शब्दोपि-श्रोतृश्रोत्रप्रदेशे तत्प्रतिभासात्। न चान्यदेशतयोपलभ्यमानोप्यन्यदेशोसौ युक्तः, अतिप्रसङ्गात्। नापि तादात्म्यम्; विभिन्नेन्द्रियजनितज्ञान-
१० ग्राह्यत्वात्। ययोर्विभिन्नेन्द्रियजनितज्ञानग्राह्यत्वं न तयोरैक्यम् यथा रूपरसयोः, तथात्वं च नीलादिरूपशब्दयोरिति। शब्दाकाररहितं हि नीलादिरूपं लोचनज्ञाने प्रतिभाति, तद्रहितस्तु शब्दः श्रोत्रज्ञाने इति कथं तयोरैक्यम् ? रूपमिदमित्यभिधानविशेषणरूपप्रतीतेस्तयोरैक्यम्; इत्यसत्; रूपमिदमिति ज्ञानेन
१५ हि वाग्रूपताप्रतिपन्नाः पदार्थाः प्रतिपद्यन्ते, भिन्नवाग्रूपताविशेषणविशिष्टा वा ? प्रथमपक्षोऽयुक्तः; न हि लोचनविज्ञानं वाग्रूपतायां प्रवर्तते तस्यास्तदविषयत्वाद्रसादिवत्, अन्यथेन्द्रियान्तरपरिकल्पनावैयर्थ्यम् तस्यैवाशेषार्थग्राहकत्वप्रसङ्गात्। द्वितीयपक्षेपि अभिधानेऽप्रवर्तमानं शुद्धरूपमात्रविषयं लोचनविज्ञानं
२० कथं तद्विशिष्टतया स्वविषयमुद्योतयेत् ? न ह्यगृहीतविशेषणा विशेष्ये बुद्धिः दण्डाग्रहणे दण्डिवत्। न च ज्ञानान्तरे तस्य प्रतिभासाद्विशेषणत्वम्; तथा सति अनयोर्भेदसिद्धिः स्यादित्युक्तम्। अभिधानानुपक्तार्थस्मरणात्तथाविधार्थदर्शनसिद्धिः; इत्यप्य-

१ शब्दानुविद्धार्थ। २ (शब्दब्रह्म)। ३ भवता परेण। ४ अर्थस्य शब्देन तादात्म्यम्। ५ शब्द। ६-७ अर्थः। ८ अर्थे। ९ शब्दार्थौ नैकरूपाविति धर्मी। १० साधनसमर्थनं। ११ अर्थ। १२ अर्थाकार। १३ दण्डिपुरुषेण व्यभिचारो नानुमानस्य। १४ शब्द। १५ अर्थाकार। १६ शब्दार्थयोः। पदार्थाः स्ववाचकादभिन्नास्तद्विशेषणविशिष्टत्वात्। १७ रूपविशेषणविशिष्टघटवत्। १८ तादात्म्येन। १९ अर्थात्। २० तत्तस्यां प्रवर्तते चेत्। २१ लोचनाच्छ्रोत्रादि। २२ रसादि। २३ शब्दे। २४ केवल। २५ भिन्नवाग्रूपताविशेषण। २६ शब्द। २७ अर्थे। २८ श्रोत्रज्ञाने। २९ वाग्रूपताविशेषणस्य। ३० रूपरूपशब्दयोः। ३१ विभिन्नेन्द्रियजनितज्ञानग्राह्येत्यादिना पूर्वमेव। ३२ परः। ३३ सम्बद्ध। ३४ पुरोवर्ति। ३५ यद्रूपार्थस्य दर्शनं तद्रूपार्थस्य स्मरणमिति वचनात्।

1 "नास्ति शब्दार्थयोस्तादात्म्यं भिन्नदेशत्वात् भिन्नकालत्वात् भिन्नाकारत्वाद्वा स्तम्भकुम्भवत्"। स्या० रत्ना० पृ० ९४।

सारम्; अन्योन्याश्रयानुषङ्गात्–तथाविधार्थदर्शनसिद्धौ वचनपरिकरितार्थस्मरणसिद्धिः, ततश्च तथाविधार्थदर्शनसिद्धिरिति।

का चेयमर्थस्याभिधानानुषक्तता नाम–अर्थज्ञाने तत्प्रतिभासः, अर्थदेशे तद्वेदनं वा, तत्काले तत्प्रतिभासो वा? न तावदाद्यो विकल्पः; लोचनाध्यक्षे शब्दस्याप्रतिभासनात्। नापि द्वितीयः; शब्दस्य श्रोत्रप्रदेशे निरस्तशब्दसन्निधीनां च रूपादीनां स्वप्रदेशे स्वविज्ञानेनानुभवात्। नापि तृतीयः; तुल्यकालस्याप्यभिधानस्य लोचनज्ञाने प्रतिभासाभावात्, भिन्नज्ञानवेद्यत्वे च भेदप्रसङ्ग इत्युक्तम्। कथं चैवंवादिनो बालकादेरर्थदर्शनसिद्धिः, तत्राभिधानाप्रतीतेः, अश्वं विकल्पयतो गोदर्शनं वा? न हि तदा गोशब्दोल्लेखस्तज्ज्ञानस्यानुभूयते युगपद्वृत्तिद्वयानुत्पत्तेरिति। कथं वा वाग्रूपताऽवबोधस्य शाश्वती यतो 'वाग्रूपता चेदुत्क्रामेत्' इत्याद्यवतिष्ठेत लोचनाध्यक्षे तत्संस्पर्शाभावात्? न खलु श्रोत्रग्राह्यां वैखरीं वाचं तत् संस्पृशति तस्यास्तदविषयत्वात्। अन्तर्जल्परूपां मध्यमां वा; तामन्तरेणापि शुद्धसंविदो भावात्। संहृताशेषवर्णादिविभागानु(तु)पश्यन्ती, सूक्ष्मा चान्तर्ज्योतीरूपा वागेव न भवति; अनयोरर्थात्मदर्शनलक्षणत्वात् वाचस्तु वर्णपदाद्यनुक्रमलक्षणत्वात्। ततोऽयुक्तमेतत्तल्लक्षणप्रणयनम्[1]–

१ वाग्रूपताविशेषणविशिष्टार्थे। २ सहित। ३ अर्थज्ञान। ४ अर्थेन सह। ५ पूर्वमेव। ६ अभिधानानुषक्तार्थ एव प्रत्यक्षे प्रतिभातीत्येवंवादिनः। ७ मूक। ८ अर्थदर्शने। ९ प्रतिभासः। १० नित्या। ११ श्रोत्रं बहिष्कृत्य। १२ वाग्रूपता। १३ वचनात्मिका। १४ लोचनाध्यक्षं। १५ लोचनाध्यक्षं न संस्पृशति। १६ लोचनज्ञानस्य। १७ नष्ट। १८ पदवाक्य। १९ अर्थदर्शनं। २० अर्थदर्शनलक्षणा। २१ आत्मदर्शनलक्षणा। २२ वाक्य।

1 "वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम्॥ १४४॥

यस्याः श्रोत्रविषयत्वेन प्रतिनियतं श्रुतिरूपं सा वैखरी, श्लिष्टवर्णसमुच्चारणप्रसिद्धसाधुभावा भ्रष्टसंस्कारा च दुन्दुभिवेणुवीणादिशब्दरूपा चेत्यपरमितभेदा। मध्यमा तु अन्तःसन्निवेशिनी परिगृहीतक्रमेव। बुद्धिमात्रोपादाना सूक्ष्मा प्राणवृत्त्यनुगता प्रतिसंहृतक्रमा सत्यप्यभेदे समाविष्टक्रमशक्तिः। पश्यन्ती तु सा चलाचला प्रतिबद्धसमाधाना सन्निविष्टज्ञेयाकारा प्रतिलीनाकारा निराकारा च परिच्छिन्नार्थप्रत्यवभासा संसृष्टार्थप्रत्यवभासा च प्रशान्तसर्वार्थप्रत्यवभासा चेत्यपरमितभेदा। तत्र व्यावहारिकीषु सर्वासु वागवस्थासु व्यवस्थितसाध्वसाधुप्रविभागा पुरुषसंस्कारहेतुः परन्तु पश्यन्त्या रूपमनप-

"स्थानेषु[1] विवृते[2] वायौ कृतवर्णपरिग्रहा।
वैखरी वाक् प्रयोक्तॄणां[3] प्राणवृत्तिनिबन्धना ॥ १ ॥
प्राणवृत्तिमतिक्रम्य[4][5] मध्यमा[2] वाक् प्रवर्तते।
अविभागा[6]ऽनु(गा तु)पश्यन्ती[3] सर्वतः संहृतक्रमा[7] ॥ २ ॥
५ स्वरूपज्योतिरेवान्तः सूक्ष्मा[4] वागनपायिनी[8]।
तया व्याप्तं जगत्सर्वं ततः शब्दात्मकं जगत् ॥ ३ ॥"
[ ] इत्यादि[5]।

---

१ कण्ठादिषु। २ प्रसृते सति। ३ पुरुषेण। ४ हृदिस्थो वायुः प्राणः। ५ परित्यज्य। ६ वर्णादिरहिता। ७ नष्टवर्णादिक्रमो यतः। ८ शाश्वती।

शंशमसङ्कीर्णं लोकव्यवहारातीतम्। तस्या एव वाचो व्याकरणेन साधुत्वज्ञानलभ्येन शब्दपूर्वेण योगेनाऽधिगमः इत्येकेषामागमः···" वाक्यप० टी० १।१४४

"उक्तंच–वैखरी शब्दनिष्पत्तिः मध्यमा श्रुतिगोचरा।
द्योतितार्था च पश्यन्ती सूक्ष्मा वागनपायिनी ॥"
कुमारसं० टी० २।१७।

1 "अस्यार्थः—स्थानेषु ताल्वादिस्थानेषु, वायौ प्राणसंज्ञे, विवृते अभिघातार्थं निरुद्धे सति, कृतवर्णपरिग्रहेति हेतुद्वारेण विशेषणम् ततः ककारादिवर्णरूपस्वीकारात् वैखरी संज्ञा वक्तृभिर्विशिष्टायां खरावस्थायां स्पष्टरूपायां भवा वैखरीति निरुक्तेः। वाक्प्रयोक्तॄणां सम्बन्धिनी। यद्वा तेषां स्थानेषु तस्याश्च प्राणवृत्तिरेव निबन्धनं तत्रैव निबद्धा सा तन्मयत्वादिति" स्या० रत्नाकर पृ० ८९।

2 "या पुनरन्तःसङ्कल्प्यमाना क्रमवती श्रोत्रग्राह्यवर्णरूपाऽभिव्यक्तिरहिता वाक् सा मध्यमेत्युच्यते।

तदुक्तम्—केवलं बुद्ध्युपादानात् क्रमरूपानुपातिनी।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥

स्थूलां प्राणवृत्तिं हेतुत्वेन वैखरीवदनपेक्ष्य केवलं बुद्धिरेव उपादानं हेतुर्यस्याः सा प्राणस्थत्वात् क्रमरूपमनुपतति। अस्याश्च मनोभूमाववस्थानम् वैखरीपश्यन्त्योर्मध्ये भवात् मध्यमा वागिति।" स्या० रत्नाकर पृ० ८९।

3 "या तु ग्राह्यभेदक्रमादिरहिता स्वप्रकाशा संविद्रूपा वाक् सा पश्यन्तीत्युच्यते"।···यस्यां वाच्यवाचकयोर्विभागेनावभासो नास्ति सर्वतश्च सजातीयविजातीयापेक्षया संहृतो वाच्यानां वाचकानां च क्रमो देशकालकृतो यत्र, क्रमविवर्त्तशक्तिस्तु विद्यते" स्या० रत्नाकर पृ० ९०।

4 "स्वरूपज्योतिः स्वप्रकाशा वेद्यते वेदकभेदातिक्रमात्। सूक्ष्मा दुर्लक्ष्या, अनपायिनी कालभेदाऽस्पर्शादिति।" स्या० रत्नाकर पृ० ९०।

5 चतुर्विधवाचां स्वरूपं तत्त्वार्थश्लोकवार्त्तिकेऽपि (पृ० २४१) वर्णितमस्ति। एते त्रयः श्लोकाः वाक्यपदीयटीकायां (पृ० ५६) 'पुनश्चाह' इति कृत्वा उद्धृताः वर्त्तन्ते।

अनुमानोत्तेषां तदनुविद्धत्वप्रतीतिरित्यपि मनोरथमात्रम्; तदविनाभाविलिङ्गाभावात्। तत्सम्भवे वाऽध्यक्षादिबाधितपक्षनिर्देशानन्तरं प्रयुक्तत्वेन कालात्ययापदिष्टत्वाच्च। अथ जगतः शब्दमयत्वात्तदुदरवर्तिनां प्रत्ययानां तन्मयत्वात्तदनुविद्धत्वं सिद्धमेवेत्यभिधीयते; तदप्यनुपपन्नमेव; तत्तन्मयत्वस्याध्यक्षादि- ५ बाधितत्वात्, पदवाक्यादितोऽन्यस्य गिरितरुपुरलतादेस्तदाकारपराङ्मुखेणैव सविकल्पकाध्यक्षेणात्यन्तं विशदतयोपलम्भात्। 'ये यदाकारपराङ्मुखास्ते परमार्थतोऽतन्मयाः यथा जलाकारविकलाः स्थासकोशकुशूलादयस्तत्त्वतो न तन्मयाः, परमार्थतस्तदाकारपराङ्मुखाश्च पदवाक्यादितो व्यतिरिक्ता गिरितरुपुरल- १० तादयः पदार्थाः' इत्यनुमानतोऽस्य तद्वैधुर्यसिद्धेश्च।

किंच, शब्दपरिणामरूपत्वाज्जगतः शब्दमयत्वं साध्यते, शब्दादुत्पत्तेर्वा? न तावदाद्यः पक्षः; परिणामस्यैवात्रासम्भवात्। शब्दात्मकं हि ब्रह्म नीलादिरूपतां प्रतिपद्यमानं स्वाभाविकं शब्दरूपं परित्यज्य प्रतिपद्येत, अपरित्यज्य वा? प्रथमपक्षे- १५ अस्याऽनादिनिधनत्वविरोधः पौरस्त्यस्वभावविनाशात्। द्वितीयपक्षे तु नीलादिसंवेदनकाले बधिरस्यापि शब्दसंवेदनप्रसङ्गो नीलादिवत्तदव्यतिरेकात्। यत्खलु यदव्यतिरिक्तं तत्तस्मिन्संवेद्यमाने संवेद्यते यथा नीलादिसंवेदनावस्थायां तस्यैव नीलादेरात्मा, नीलाद्यव्यतिरिक्तश्च शब्द इति। शब्दस्यासंवेदने वा २० नीलादेरप्यसंवेदनप्रसङ्गः तादात्म्याविशेषात्, अन्यथा विरुद्धधर्माध्यासात्तस्य ततो भेदप्रसङ्गः। न ह्येकस्यैकदा एकप्रतिपत्रपेक्षया ग्रहणमग्रहणं च युक्तम्। विरुद्धधर्माध्यासेप्यत्र भेदा-

१ तेषां प्रत्ययानां। २ शब्द। ३ सर्वे प्रत्ययाः शब्दानुविद्धा इत्यत्र साध्ये साधनाभावः। ४ श्लोक। ५ भिन्नस्य। ६ शब्दानुविद्धत्वराहित्य। ७ शब्दब्रह्मणि। ८ स्वीकुर्वीत। ९ वस्तु। १० तादात्म्यसद्भावात्। ११ का (पञ्चमी पञ्चमीसमास इत्यर्थः)। १२ शब्दस्य। १३ नीलादेरेव संवेदनं न शब्दस्येति चेत्। १४ वेद्यावेद्यत्वधर्मसाहित्यात्। १५ ब्रह्मणः। १६ नीलात्। १७ अभिन्नस्य शब्दलिङ्गस्य। १८ अन्यथा। १९ नीलनीलशब्दयोः।

1 "अत्र कदाचिच्छब्दपरिणामरूपत्वाद्वा जगतः शब्दमयत्वं साध्यत्वेनेष्टम्, कदाचिच्छब्दादुत्पत्तेर्वा ... शब्दात्मकं ब्रह्म नीलादिरूपतां प्रतिपद्यमानं कदाचिन्निजं स्वाभाविकं शब्दरूपं परित्यज्य प्रतिपद्येत, अपरित्यज्य वा?" तत्त्वसं० पं० पृ० ६८। न्यायकु० च० प्र० परि०। सन्मति० टी० पृ० ३८०। स्या० रत्नाकर पृ० १००।

संभवे हिमवद्विन्ध्यादिभेदानामप्यभेदानुषङ्गः । किंच, असौ[1][1]
शब्दात्मा परिणामं[2] गच्छन्प्रतिपदार्थभेदं प्रतिपद्येत, न वा?
तत्राद्यविकल्पे-शब्दब्रह्मणोऽनेकत्वप्रसङ्गः, विभिन्नानेकार्थस्वभा-
वात्मकत्वात्तत्[3]स्वरूपवत्[4]। द्वितीयविकल्पे तु-सर्वेषां[5] नीलादीनां
५ देशकालस्वभावव्यापारावस्थादिभेदाभावः प्रतिभास[6]भेदा[7]भावश्चा-
नुषज्येत-एकस्वभावाच्छब्दब्रह्मणोऽभिन्न[8]त्वात्तत्स्वरूप[9]वत् । तन्न
शब्दपरिणामरूपत्वाज्जगतः शब्दमयत्वम् ।

नापि शब्दादुत्पत्तेः, तस्य[10] नित्यत्वेनाविकारित्वात्, क्रमेण
कार्योत्पादविरोधात् सकलकार्याणां युगपदेवोत्पत्तिः स्यात् ।
१० कारणवैकल्याद्धि कार्याणि विलम्बन्ते नान्यथा । तच्चेदविकलं किम-
परं तै[11]रपेक्ष्यं येन युगपन्न भवेयुः? किंच, अपरापर[12]कार्यग्रामोऽतो[13]-
ऽर्थान्तरम्[14], अनर्थान्तरं वोत्पद्येत? तत्रार्थान्तरस्योत्पत्तौ-कथं
'शब्दब्रह्मविवर्तमर्थरूपेण[15]' इति घटते । न ह्य[16]र्थान्तरस्योत्पादे
अन्यस्य[17] तत्[18]स्वभावमनाश्रयतः ताद्रूप्येण[19] विवर्त्तो युक्तः । त[20]दनर्था-
१५ न्तरस्य तू[21]त्पत्तौ-त[22]स्या[23]नादिनिधनत्वविरोधः ।

ननु परमार्थतोऽनादिनिधनेऽभिन्नस्वभावेपि शब्दब्रह्मणि
अविद्या[24]तिमिरोपहतो जनः प्रादुर्भावविनाश[25]वत् [26]कार्यभेदेन
विचित्र[27]मिव मन्यते । तदुक्तम्-

"यथा विशुद्धमाकाशं तिमिरोपप्लु[28]तो जनः ।
२० संकीर्ण[29]मिव मात्रा[30]भिश्चित्रा[31]भिरभिमन्यते ॥
[बृहदा० भा० वा० ३।५।४३]

१ ब्रह्मा । २ उत्पादविनाशं । ३ नीलत्वपीतत्वादि । ४ विभिन्नानेकार्थस्वरूपवत् । ५ पदार्थैः सहैकत्वे । ६ ज्ञान । ७ प्रमेयभेदाद् ज्ञानभेद इति वचनात् । ८ पदार्थेभ्यः । ९ शब्दब्रह्मस्वरूपवत् । १० शब्दब्रह्मणः । ११ कार्यैः । १२ घटपटादि । १३ शब्दब्रह्मणः । १४ भिन्नमभिन्नं वा । १५ पूर्वमुक्तं विवर्ततेऽर्थभावेनेति । १६ अपरापरकार्यग्रामस्य । १७ शब्दब्रह्मणः । १८ अर्थान्तर । १९ अर्थान्तररूपेण । २० ब्रह्म । २१ सत्यां । २२ शब्दब्रह्मणः । २३ उत्पादविनाशात्मकादर्थादभिन्नत्वात् । २४ अभेदरूपे भेदरूपप्रतिभासः । २५ वतुः इवार्थे । २६ घटपटादि । २७ नानारूपं । २८ उपहतः । २९ संछिन्नम् । ३० रेखाभिः । ३१ नानारूपाभिः ।

1 "स हि शब्दात्मा परिमाणं गच्छन् प्रतिपदार्थं भेदं वा प्रतिपद्यते न वा?" तत्त्वसं० पृ० ७० । न्यायकु० प्र० परि० । सम्मति० टी० पृ० ३८२ । स्या० रत्नाकर पृ० १०१ ।

तथेदं[१]ममलं ब्रह्मनिर्विकारमविद्यया ।
कलुष[२]त्वमिवा[३]पन्नं भेदे[४]रूपं प्रपश्यति" ॥
[बृहदा० भा० वा० ३।५।४४] इति ।

तदप्यसाम्प्रतम् ; अत्रार्थे प्रमाणाभावात् । न खलु यथोपवर्णित-स्वरूपं शब्दब्रह्म प्रत्यक्षतः प्रतीयते, सर्वदा प्रतिनि[५]यतार्थस्वरूप-ग्राहकत्वेनैवास्य प्रतीतेः । यच्च[1]-अ[६]भ्युदयनिश्रे[७]यसफल[८]धर्मा[९]नुगृही-तान्तःकरणा योगिन एव तत्पश्यन्तीत्यु[९]क्तम् ; तदप्युक्तिमात्रम् ; न हि त[१०]द्व्यतिरेकेणान्ये योगिनो व[११]स्तुभूताः सन्ति येन 'ते पश्यन्ति' इत्युच्येत । यदि च त[१२]ज्ज्ञाने त[१३]स्य व्या[१४]पारः स्यात्तदा 'योगिनस्तस्य रूपं पश्यन्ति' इति स्यात् । या[१५]वतोक्तप्रकारेण कार्ये व्यापार ए[१६]वास्य न संग[१७]च्छते । अविद्या[१८]याश्च[2] त[१९]द्व्यतिरेकेणासंभवा-त्कथं भेदप्रतिभासहेतुत्वम् ? आका[3]शे च वित[२०]थप्रतिभासहेतुभूतं वास्तवमेवास्ति तिमिरम् इति न दृ[२१]ष्टान्तदार्ष्टान्तिकयोः (साम्यम्) ।

नाप्यनुमानतस्तत्[२२]प्रतिपत्तिः ; अनुमानं हि कार्यलिङ्गं वा भवेत्, स्वभावा[२३]दिलिङ्गं वा ? अ[२४]नुपलब्धेर्विधिसाधकत्वेनानभ्युपगमात् । तत्र न तावत्कार्यलिङ्गम् ; नित्यैकस्वभावात्त[२५]तः का[२६]र्योत्पत्तिप्रतिषे-धात्, क्रमयौगपद्याभ्यां त[२७]स्यार्थक्रि[२८]याविरोधात् । नापि स्व[२९]भा-

१ उत्पादविनाशरहितं । २ भेदप्रक्रमे इवशब्दः । ३ इव । ४ इव । ५ पुरो-वर्ति । ६ स्वर्ग । ७ मोक्ष । ८ रसः । ९ परेण भवता । १० ब्रह्मणः । ११ परमार्थभूताः । १२ योगिज्ञाने । १३ ब्रह्मणः । १४ अहमिति जनकत्व-लक्षणव्यापारः । १५ साकल्येन । १६ ब्रह्मणः । १७ घटते । १८ किंच । १९ ब्रह्म । २० मिथ्या । २१ तिमिराविद्ययोः । २२ ब्रह्म । २३ कारणलिङ्गं । २४ (अनुपलब्धिरूपो हि हेतुर्न विधिसाधकः) । २५ शब्दब्रह्मणः । २६ घटादि । २७ ब्रह्मणः । २८ कार्य । २९ स्वरूप ।

1 "विशुद्धज्ञानसन्ताना योगिनोऽपि ततो न तत् ।
विदन्ति ब्रह्मणो रूपं ज्ञाने व्यापृत्य सङ्गतेः ॥ १५१ ॥
यदि हि ज्ञाने योगजे तस्य व्यापारः स्यात्तदा योगिनः तस्य रूपं पश्यन्तीति स्यात् ..." तत्त्वसं० पं० पृ० ७४ ।

2 "नचापि भवतां तद्व्यतिरेकिण्यविद्याऽस्ति" तत्त्वसं० पं० पृ० ७४ । स्या० रत्ना० पृ० ९९ । शास्त्रवा० समु० टी० पृ० २३७ उ० ।

3 "आकाशे च वितथप्रतिभासहेतुभूतं वास्तवमेव तिमिरं प्रसिद्धम्, अविद्यायाश्च अवास्तवत्वेन विचित्रप्रतिभासहेतुत्वानुपपत्तितो दृष्टान्तदार्ष्टान्तिकयोःसाम्याऽसंभवात् ।" न्यायकु० प्र० परि० । स्या० रत्ना० पृ० ९९ ।

वलिङ्गम्; शब्दब्रह्माख्यधर्मिण एवासिद्धेः। न ह्यसिद्धे धर्मिणि तत्स्वभावभूतो धर्मः स्वातन्त्र्येण सिद्ध्येत्।

यच्चोच्यते-'ये यदाकारानुस्यूतास्ते तन्मया यथा घटशरावोदञ्चनादयो मृद्विकारा मृदाकारानुगता मृन्मयत्वेन प्रसिद्धाः, ५ शब्दाकारानुस्यूताश्च सर्वे भावा इति'; तदप्युक्तिमात्रम्; शब्दाकारान्वितत्वस्यासिद्धेः। प्रत्यक्षेण हि नीलादिकं प्रतिपद्यमानोऽनाविष्टाभिलापमेव प्रतिपत्ता प्रतिपद्यते। कल्पितत्वाच्चास्याऽसिद्धिः। शब्दान्वितरूपाधारार्थासत्त्वेपि हि ते तदन्वितत्वेन त्वया कल्प्यन्ते। तथाभूताच्च हेतोः कथं पारमार्थिकं शब्दब्रह्म १० सिद्ध्येत्? साध्यसाधनविकलश्च दृष्टान्तो घटादीनामपि सर्वथैकमयत्वस्यैकान्वितत्वस्य चासिद्धेः। न खलु भावानां परमार्थेनैकरूपानुगमोस्ति, सर्वार्थानां समानाऽसमानपरिणामात्मकत्वात्। किंच, शब्दात्मकत्वेऽर्थानाम् शब्दप्रतीतौ सङ्केताग्राहिणोप्यर्थे सन्देहो न स्यात्तद्वत्तस्यापि प्रतीतत्वात्, अन्यथा तादात्म्य- १५ विरोधः। अग्निपाषाणादिशब्दश्रवणाच्च श्रोत्रस्य दाहाभिघातादिप्रसङ्गः। तन्नानुमानतोपि तत्प्रतीतिः।

नाप्यागमात्. "सर्वं खल्विदं ब्रह्म" [मैत्र्यु०] इत्याद्यागमस्य ब्रह्मणोऽर्थान्तरभावे द्वैतप्रसङ्गात्, अनर्थान्तरभावे तु तद्वदागमस्याप्यसिद्धिप्रसङ्गः। तदेवं शब्दब्रह्मणोऽसिद्धेर्न शब्दानुविद्धत्वं २० सविकल्पकलक्षणं किन्तु समारोपविरोधिग्रहणमिति प्रतिपत्तव्यम्।

१ भवता परेण। २ शब्दनयाः। ३ हेतोः। ४ पदार्थं। ५ शब्देन रहितम्। ६ ज्ञाता। ७ शब्दान्वितत्वस्य। ८ अर्थाः। ९ शब्द। १० परेण। ११ कल्पितशब्दान्वितत्वरूपात्। १२ विसदृश। १३ पुरुषस्य। १४ अयं घटः पटो वेत्यादि। १५ शब्दवन्नीलादेरपि। १६ सन्देहश्चेत्। १७ अग्न्याद्यभिन्नशब्दस्य श्रोत्रसम्बन्धित्वात्। १८ न च तथास्ति। १९ ब्रह्म। २० आगमो भिन्नो ब्रह्मणः। २१ तस्मात्कारणात् उक्तप्रकारेण। २२ ज्ञानम्।

1 "शब्दार्थयोश्च तादात्म्ये क्षुराग्निमोदकादिशब्दोच्चारणे आस्यपाटनदहनपूरणादिप्रसक्तिः। सन्मति० टी० पृ० ३८६। शास्त्रवा० टी० पृ० २३७पू०।

2 "ब्रह्म खल्विदं वाव सर्वम्" मैत्र्यु० ४।६।

3 शब्दब्रह्मवादस्य विविधरीत्या खण्डनं निम्नग्रन्थेषु द्रष्टव्यम्-मीमांसाश्लो० प्रत्यक्षसू० श्लो० १७६। न्यायमं० पृ० ५३१। तत्त्वसं० पृ० ६७। तत्त्वार्थश्लो० पृ० २४०। न्यायकु० प्र० परि०। सन्मति० टी० पृ० ३८०,४९४। स्या० रत्ना० पृ० ८८।

ननु[1] व्यवसायात्मकविज्ञानस्य प्रामाण्ये निखिलं तदात्मकं ज्ञानं प्रमाणं स्यात्, तथा च विपर्ययज्ञानस्य धारावाहि[2]विज्ञानस्य च प्रमाणताप्रसङ्गात्[3] प्रतीतिसिद्धप्रमाणेतरव्यवस्थाविलोपः स्यात्, इत्याशङ्काऽतिप्रसङ्गापनोदार्थम् अपूर्वार्थ[4]विशेषणमाह । अतोऽनयोरनर्थविषयत्वाविशेषग्राहित्वाभ्यां व्यवच्छेदः[5] सिद्धः । यद्वाने- ५ नाऽपूर्वार्थविशेषणेन धारावाहिविज्ञानमेव निरस्यते । विपर्ययज्ञानस्य तु व्यवसायात्मकत्वविशेषणेनैव निरस्तत्वात् संशयादिस्वभावसमारोपविरोधिग्रहणत्वात्तस्य ।

ननु[6] संशयादिज्ञानस्यासिद्धस्वरूपत्वात्कस्य व्यवसायात्मकत्वविशेषणत्वेन निरासः? संशयज्ञाने हि धर्मी[7], धर्मो[8] वा प्रति- १० भाति? धर्मी चेत्; स तात्त्विकः, अतात्त्विको वा? तात्त्विकश्चेत्; कथं तद्बुद्धेः संशय[9]रूपता तात्त्विकार्थगृहीति[10]रूपत्वा[11]त्करतलादिनिर्ने(र्ण)यवत्? अथातात्त्विकः; तथाप्यतात्त्विकार्थविषयत्वात् केशोण्डुकादिज्ञानवद् भ्रान्तिरेव संशयः । अथ धर्मः-स स्थाणुत्वलक्षणः, पुरुषत्वलक्षणः, उभयं वा? यदि स्थाणुत्वल- १५ क्षणः; तत्र तात्त्विकाऽनात्त्विकयोः पूर्ववद्दोषः । अथ पुरुषत्वलक्षणः; तत्राप्ययमेव दोषः । अथोभयम्; तथाप्यु[12]भयस्य तात्त्विकत्वाऽतात्त्विकत्वयोः स एव दोषः । अथैकस्य[13] तात्त्विकत्वमन्यस्या[14]तात्त्विकत्वम्; तथापि तद्विषयं[15] ज्ञानं तदेव[16][17] भ्रान्तमभ्रान्तं चेति प्राप्तम् । अथ[18] सन्दिग्धोर्थ[19]स्तत्र[20] प्रतिभासते; सोपि विद्यते २० न वेत्या[21]दिविकल्पे[22] तदेव दूषणम् । तन्न संशयो घटते । नापि विपर्ययस्तस्यापि स्मृतिप्रमोषाद्यभ्युपगमेनाव्यवस्थितेः ।

इत्यप्यसमीचीनम्; यतः संशयः सर्वप्राणिनां चलितप्रतिपत्त्यात्मकत्वेन स्वात्मसंवेद्यः । स धर्मिविषयो वास्तु धर्मविषयो

१ परः । २ घटोऽयं घटोऽयमिति । (निश्चयानन्तरं तेनैवाकारेण पुनः पुनर्यत्प्रवर्तते तज्ज्ञानम्) । ३ निश्चयात्मकत्वाविशेषात् । ४ परिहारः । ५ जैनैः । ६ प्रभाकरो मते [? तत्त्वोपप्लववादी] । ७ पुरुषः । ८ पुरुषत्वं । ९ संशयो धर्मी संशयरूपतापन्नो न भवतीति साध्यो धर्मः तात्त्विकार्थगृहीतिरूपत्वात् । १० गृहीतिर्ग्रहणम् । ११ वसः । (वेति शब्दैकदेशेन बहुव्रीहिग्रहणं सकारात्समासार्थबोधः) । १२ उभयप्रतिभासे । १३ स्थाणुत्वस्य । १४ स्थाणौ पुरुषत्वस्य । १५ उभय । १६ पूर्वोक्तं । १७ एकमेव ज्ञानं । १८ परः । १९ संशयज्ञाने । २० तात्त्विक । २१ अतात्त्विको वा । २२ उभयं ।

1—"तस्मिन् सन्देहज्ञाने किंचित्प्रतिभाति आहोस्विन्न? यदि किञ्चित् प्रतिभाति स किं धर्मी, धर्मो वा? तत्त्वोप० लि० पृ० २६ । स्या० रत्ना० पृ० १४३ ।

वा तात्त्विकातात्त्विकार्थविषयो वा किमेभिर्विकल्पैरस्य[1] वालाग्रमपि खण्डयितुं शक्यते[2]? प्रत्यक्षसिद्धस्याप्यर्थस्वरूपस्यापह्नवे सुखदुःखादेरप्यपह्नवः स्यात्। कथं च 'धर्मिविषयो[3] धर्मविषयो वा' इत्यादि प्रश्नहेतुकसंशयादि(धि)रूढ[4] एवायं संशयं निराकुर्यात् न चेदस्वस्थः[5]? किंच, उत्पादककारणाभावात्संशयस्य निरासः, असाधारणस्वरूपाभावात्, विषयाभावाद्वा? तत्राद्यः पक्षोऽयुक्तः; तदुत्पादककारणस्य[6] सद्भावात्, स ह्याहितसंस्कारस्य प्रतिपत्तुः समानाऽसमानधर्मोपलम्भानुपलम्भतो मिथ्यात्वकर्मोदये सत्युत्पद्यते। असाधारणस्वरूपाभावोप्यसिद्धः; चलितप्रतिपत्तिलक्षणस्यासाधारणस्वरूपस्य तत्र सत्त्वात्। विषयाभावस्तु दूरोत्सारित एव; स्थाणुत्वविशिष्टतया पुरुषत्वविशिष्टतया वाऽनवधारितस्य[9] ऊर्द्धतासामान्यस्य तद्विषयस्य सद्भावात्।

एतेन[10] विपर्ययनिरासोपि निराकृतः। तत्राप्युत्पादककारणादेः सद्भावाविशेषात्। किंच[11], अयं विपर्ययोऽख्यातिम्[12], असत्ख्यातिम्[13], प्रसिद्धार्थख्यातिम्[14], आत्मख्यातिम्[15], सदसत्त्वाद्यनिर्वचनीयार्थख्यातिम्[16][17], विपरीतार्थख्यातिम्[18], स्मृतिप्रमोषं[19] वाभिप्रेत्य निराक्रियेत प्रकारान्तराऽसम्भवात्?

अख्यातिं[20][21] चेत्[22]; तथा[23] हि[24]-जलावभासिनि[25] ज्ञाने तावन्न जलसत्तालम्बनीभूतास्ति अभ्रान्तत्वप्रसङ्गात्[26]। जलाभावस्त्वत्र[27] न प्रतिभात्येव; तद्विधिपरत्वेनास्य[28] प्रवृत्तेः। अत एव मरीचयोऽपि

१ संशयज्ञानस्य। २ त्वया परेण (अपि तु न)। ३ सुखमवयविरूपं परमाणुरूपं वा। न तावदाद्यः पक्षोऽनभ्युपगमात्। द्वितीयपक्षे तु प्रतिभासाभावः स्यादिति। ४ संशयः। ५ प्राभाकरः [तत्त्वोपप्लववादी]। ६ संशय। ७ ऊर्द्धता। ८ शिरःपाण्यादिमत्त्ववक्रकोटरादिमत्त्व। ९ अनिश्चितस्य। १० संशयनिरासनिराकरणपरेण ग्रन्थेन। ११ तत्तद्वादिनः प्रत्युच्यते। १२ चार्वाकः। १३ सौत्रान्तिकमाध्यमिकौ। २४ साङ्ख्यः। वैदान्तिको भास्करीयः। १५ विज्ञानाद्वैतवादी योगाचारः। १६ शाङ्करीयः ब्रह्माद्वैतमायावादी च। १७ उभय। १८ नैयायिकवैशेषिकभाट्टवैभाषिकजैनाः। १९ ईप्। (सप्तमी)। २० प्राभाकरः। २१ अप्रवेदनं। २२ अर्थस्य। २३ परः। २४ अस्य ज्ञानस्य विषयः कः जलं वा तदभावो वा मरीचयो वा अन्यद्वा। २५ मरीचिकाजलज्ञाने। २६ अन्यथा। २७ मरीचिकायां। २८ जलास्तित्वप्रधानत्वेन।

1—अनयैव भङ्गया संशयस्वरूपविचारः (पूर्वपक्षः) तत्त्वोप० लि० पृ० २६। (समग्रः) स्या० रत्ना० पृ० १४३। इत्यादिषु द्रष्टव्यः।

2 "इदं रजतमिति प्रस्तुतज्ञाने रजतसत्ता विषयभूता तावन्नास्ति अभ्रान्तत्वानुषङ्गात्" न्यायकु० चं० प्र० परि०। स्या० रत्नाकर पृ० १२४।

नालम्बनम्; तत्त्वे[1] वा तद्ग्रहणस्या[2]भ्रान्तत्व[3]प्रसङ्गः। तोयाकारेण मरीचिग्रहणमित्यप्ययुक्तम्; तदन्यत्वात्[4]। न खलु घटाकारेण तदन्यस्य पटादेर्ग्रहणं दृष्टम्। ततो निरालम्बनं[6] जलादिविपर्ययज्ञानम्; इत्यप्यविचारितरमणीयम्; विशेषतो व्यपदेशाभावप्रसङ्गात्। यत्र[7] हि न किञ्चिदपि प्रतिभाति तत्[8]केन विशेषेण जल- ५ ज्ञानं रजतज्ञानमिति वा व्यपदिश्येत? भ्रान्तिसुषुप्तावस्थयोरविशेषप्रसङ्गश्च। न ह्यत्र[9] प्रतिभासमानार्थव्यतिरेकेणान्योऽस्ति विशेषः। प्रतिभासमानश्च तज्ज्ञानस्यालम्बनमित्युच्यते। तन्नाख्यातिरेव विपर्ययः[11]।

सत्यमेतत्[12]; तथापि प्रतिभासमानो[13]ऽर्थः सद्रूपो[14] विचार्यमाणो १० नास्तीत्यसत्ख्यातिरेवासौ[15]। शुक्तिकाशकले हि न शुक्तिकादि[16]प्रतिभासः, किं तर्हि? रजतप्रतिभासः। स च रजताकारस्तत्र[17] नास्तीति;

तदयुक्तम्; इत्यपरः[18]। कस्मात्? असतः[2] खपुष्पादिवत्प्रतिभासासम्भवात्। भ्रान्तिवैचित्र्या[19]भावप्रसङ्गश्च; न ह्यसत्ख्यातिवा- १५ दिनोऽर्थगतं[20] ज्ञानगतं[21] वा वैचित्र्यमस्ति येनानेकप्रकारा भ्रान्तिः स्यात्[3]। तस्मात्प्रमाणप्रसिद्ध[22] एवार्थो विचित्रस्[23]तत्र[24] प्रतिभाति। न चास्य[25] विचार्यमाणस्यासत्त्वम्; विचारस्य प्रतीतिव्यतिरेकेणाऽन्यस्यासम्भवात्। प्रतीत्यबाधितत्वाच्च; करतलादेरपि हि प्रतिभासबलेनैव सत्त्वम्, स च प्रतिभासोऽन्यत्राप्यस्ति। यद्यप्युत्तर- २० काले तथा[26] सोऽर्थो नास्ति, तथापि यदा प्रतिभाति तदा तावद-

१ मरीचिविषयत्वे च। २ ज्ञानस्य। ३ ज्ञानस्य सत्यार्थग्राहकत्वात्। ४ तोयात्। ५ ज्ञाने। ६ निर्विषयं। ७ ज्ञाने। ८ ज्ञानं। ९ भ्रान्तज्ञाने। १० जल। ११ स्याद्वादिभिरुक्तम्। १२ माध्यमिकोऽब्रवीत्। १३ जलादिः। १४ तज्ज्ञानस्याभ्रान्ततामसंगात्। १५ विपर्ययः। १६ जल। १७ विपर्ययस्थले। १८ साङ्ख्यः। १९ शुक्तिकायां रजतज्ञानमेकचन्द्रे द्विचन्द्रज्ञानमित्यादि। २० अर्थस्याऽसत्त्वात्। २१ ज्ञानस्यैनैकादृशत्वात्। २२ सत्यभूतः। २३ नानाप्रकारः। २४ भ्रान्तत्वेन उपगते ज्ञाने। २५ रजताद्यर्थस्य। २६ पूर्वकालवत्।

1 विपर्ययज्ञाने अख्यातिवादस्य अनयैवानुपूर्व्या विचारः न्यायकु० चं० प्र० परि० तथा स्या० रत्ना० पृ० १२४ इत्यादिषु द्रष्टव्यः।

2 "असतः प्रख्योपाख्याविरहितस्य खपुष्पादिवत् प्रतिभासाऽसंभवात्...भ्रान्तिवैचित्र्याभावप्रसंगश्च। न्यायकु० चं० प्र० परि०। स्या० रत्नाकर पृ० १२५।

3 असत्ख्यातेः प्रतिविधानं न्यायवा० ता० टी० पृ० ८६, न्यायमं० पृ० १७७, न्यायकु० प्र० परि०, स्या० रत्ना० पृ० १२५। इत्यादिषु द्रष्टव्यम्।

स्येव, अन्यथा विद्युदादेरपि सत्त्वसिद्धिर्न स्यात्। तस्मात्प्रसिद्धार्थख्यातिरेव युक्ता;

इत्यप्यसाम्प्रतम्; यथावस्थितार्थगृहीति[२]त्वाविशेषे हि भ्रान्ताऽभ्रान्तव्यवहाराभावः स्यात्। अपि चोत्तरकालमुदकादे[३]रभावेऽपि तच्चिह्नस्य भूस्निग्धतादेरुपल[४]म्भः स्यात्। न खलु विद्युदादिवदुदकादेरप्याशुभावी निरन्वयो विनाशः क्वचिदुपलभ्यते। सर्वतद्देश[५]द्रष्टॄणामविसंवादेनोपलम्भश्च विद्युदादिवदेव स्यात्। बाध्यबाधकभावश्च[६] न प्राप्नोति; सर्वज्ञानानामवि[७]तथार्थविषयत्वाविशेषात्।

यदप्युच्यते[२]–ज्ञा[८]नस्यैवा[९]यमाकारोऽनाद्य[१०]विद्योपप्लव[११]सामर्थ्याद्बहिरिव प्रतिभासते। अनादिविचित्रवासनाश्च क्रमविपा[१२]कवत्यः पुंसां[१३] सन्ति तेना[१४]नेका[१५]काराणि[१६] ज्ञानानि[१७] स्वाकार[१८]मात्रसंवेद्यानि[१९] क्रमेण भवन्ती[२०]त्यात्मख्या[२१]तिरेवेति; तदप्युक्तिमात्रम्; यतः स्वात्म[२२]मात्रसंवित्तिनिष्ठत्वे अर्थाकार[२३]त्वे च ज्ञानस्यात्मख्यातिः सिद्ध्येत्। न च तत्[२४]सिद्धम्, उत्तरत्रोभयस्यापि प्रतिषेधात्। सर्व[२५]ज्ञानानां स्वाकारग्राहित्वे च भ्रान्ताऽभ्रान्तविवेको बाध्यबाधकभावश्च न प्राप्नोति, तत्र[२६] व्यभिचाराभावाविशेषात्। स्वात्म[२७]स्थितत्वेन रजताद्याकारस्य संवेदनेन च सुखाद्याकारवद्बहिष्ठ[२८]तया

१ मरीचिकायां जललक्षणोऽर्थः सत्यभूतः प्रतिभासमानत्वात् घटवत्। २ सर्वज्ञानानामङ्गीक्रियमाणे। ३ सति। ४ तत्र प्रवृत्तस्य पुरुषस्य। ५ उत्तरकाले। ६ विचारिते सति। ७ सत्यभूतार्थे। ८ ज्ञानाद्वैतवादिना योगाचारेण। ९ शुक्तिकादौ रजताद्याकारः। १० अयथार्थवित्तिशक्ति। वित्तिर्भ्रान्तिः। ११ ज्ञानात्। १२ उद्बोधवत्यः। १३ कारणेन। १४ अनाद्यविद्यासामर्थ्येन। १५ घटादि। १६ ग्राह्यग्राहक। १७ संवित्तिरूपाणि। १८ ज्ञान। १९ बसः। (बहुव्रीहिसमास इत्यर्थः)। २० मरीचिकायां जलाकारः ज्ञानात्मा प्रतिभासमानत्वात् ज्ञानस्वरूपवत्। २१ ज्ञानप्रतीतिः। २२ ज्ञानस्य। २३ सिद्धे। २४ द्वयं। २५ नीलकेशोण्डुकादिसर्वविकल्पानां। २६ आत्मस्वरूपमात्रे। २७ स्वस्य ज्ञानस्यात्मा स्वरूपं तत्र स्थितत्वेन। २८ बहिःस्थिततया।

1 अनयैव रीत्या प्रसिद्धार्थख्यातेर्विचारः न्यायकु० चं० प्र० परि०। स्या० रत्ना० पृ० १२६। इत्यादिषु द्रष्टव्यम्।

2 आत्मख्यातेर्निरूपणं न्यायमञ्जर्यामित्थं दृश्यते (पृ० १७८)

"विज्ञानमेव खल्वेतद्बहुधात्यात्मानमात्मना।
बहिर्निरूप्यमाणस्य ग्राह्यस्यानुपपत्तितः॥
बुद्धिः प्रकाशमाना च तेन तेनात्मना बहिः।
तद्वदित्यर्थशून्यापि लोकयात्रामिहेदृशीम्॥"

प्रतीतिर्न स्यात्। प्रतिपत्ता च तदुपादानार्थं न प्रवर्त्तेत, अबहिष्ठाऽस्थिरत्वेन प्रवृत्त्यविषयत्वात्। अथाविद्योपप्लववशाद्बहिष्ठ–स्थिरत्वेनाध्यवसायः; कथमेवं विपरीतख्यातिरेव नेष्टा, ज्ञानादभिन्नस्यास्थिरस्य चार्थाकारस्यान्यथाध्यवसायाभ्युपगमादिति?

यच्चोच्यते–न ज्ञानस्य विषयं उपदेशगम्योऽनुमानसाध्यो वा ५ येन विपरीतोऽर्थः कल्प्येत। किं तर्हि? यो यस्मिन् ज्ञाने प्रतिभाति स तस्य विषय इत्युच्यते। जलादिज्ञाने च जलाद्यर्थ एव प्रतिभाति न तद्विपरीतः, जलादिज्ञानव्यपदेशाभावप्रसङ्गात्। स च जलाद्यर्थः सन्न भवति; तद्बुद्धेरभ्रान्तत्वप्रसङ्गात्। नाप्यसन्; खपुष्पादिवत्प्रतिभासप्रवृत्त्योरविषयत्वानुषङ्गात्। नापि सद- १० सद्रूपः; उभयदोषानुषङ्गात्, सदसतोरैकात्म्यविरोधाच्च। तस्मादयं बुद्धिसन्दर्शितोऽर्थः सत्त्वेनासत्त्वेनान्येन वा धर्मान्तरेण निर्वक्तुं न शक्यत इत्यनिर्वचनीयार्थख्यातिः सिद्धा; इत्यपि मनो-

१ प्रमाता। २ किंच। ३ रजतादि। ४ ज्ञानस्य क्षणिकत्वात्। ५ परः। ६ रजतादेः। ७ अनिर्वचनीयार्थख्यातिवादिना शाङ्करीयेण। ८ विपरीतार्थख्यातिं दूषयन् अनिर्वचनीयार्थख्यातिं समर्थयते। ९ रजतादिः। १० विपरीत इति। ११ रजतमिदमिति ज्ञाने किंरूपोऽर्थः प्रतिभासते इति प्रश्ने पर उपदेशं करोति। कथं शुक्तिकाशकलमिति रजतमिदमिति ज्ञानं पुरोवर्तिवस्तुविषयं तत्रैव प्रवर्तकत्वात्सम्प्रतिपन्नज्ञानवदित्यनुमानं रजतमिदमित्येतस्मिन् ज्ञाने प्रतिभासमानार्थस्योपदेशगम्यत्वेऽनुमानसाध्यत्वे वा विपरीतार्थख्यातिः स्यात्प्रतिभासमानार्थव्यतिरेकेणार्थान्तरस्य सद्भावात् शुक्तिशकलस्य। १२ मरीचिकाचक्रे जललक्षणः। १३ प्रतिभासमानाद्विपरीतोऽर्थः शुक्तिशकललक्षणः। १४ अन्यथा। १५ अन्यथा। १६ उत्तरकाले बाधकानुत्पत्तिप्रसङ्गात्। १७ उभयेन। १८ निरूपयितुं। १९ विवादापन्नो जललक्षणोऽर्थः सत्त्वाऽसत्त्वाद्यनिर्वचनीयः प्रतिभासमानत्वे सति बाध्यमानत्वान्यथानुपपत्तेः।

1 आत्मख्यातेर्विविधरीत्या पर्यालोचनं निम्नग्रन्थेषु द्रष्टव्यम्–न्यायवा० ता० टी० पृ० ८५, भामती पृ० १४, न्यायमं० पृ० १७८, न्यायकुमु० प्र० परि०, स्या० रत्ना० पृ० १२८।

2 "तत्किं मरीचिषु तोयनिर्भासप्रत्ययः तत्त्वगोचरः, तथा च समीचीन इति न भ्रान्तो नापि बाध्येत। अद्धा न बाध्येत यदि मरीचीनतोयात्मतत्त्वा न तोयात्मना(?)-गृह्णीयात्। तोयात्मना तु गृह्णन् कथमभ्रान्तः कथं वाऽबाध्यः? हन्त तोयाभावात्मनां मरीचीनां तोयभावात्मत्वं तावन्न सत्; तेषां तोयाभावादभेदेन तोयभावात्मताऽनुपपत्तेः। नाप्यसत्; वस्त्वन्तरमेव हि वस्त्वन्तरस्यासत्त्वमास्थीयते 'भावान्तरमभावोऽन्यो न कश्चिदनिरूपणात्' इति वदद्भिः। ......तस्मान्न सत्, नापि सदसत्; परस्परविरोधात्, इत्यनिर्वाच्यमेवारोपणीयं मरीचिषु तोयमास्थेयम्। तदनेन क्रमेण

रथमात्रम्; अद्वैत[१]सिद्धौ ह्येतत्[२]सिद्ध्येत्, तच्चाद्वैतं निराकरिष्यामः। य[३]च्चोक्तम्[1]–न ज्ञानस्य विषय उपदेशगम्य इत्यादि[४]; त[५]द्भवतामेव प्राप्तम्, तथा हि–[६]जलादिभ्रान्तौ नियतदेशकालस्वभावः सदात्मकत्वेनैव जलाद्यर्थः प्रतिभाति तद्ग्रहणेप्सोस्तत्रैव प्रवृत्तिदर्शनात् तत्कथमसौ[७]वनिर्वचनीयः स्यात्? न ह्येवंभूते प्रतिभासप्रवृत्ती[८] अनिर्वचनीयेऽर्थे[९] सम्भवतः। अथ[१०] विचार्यमाण[११] एवासौ सदसत्त्वादिभिरनिर्वचनीयः सम्पद्यते न तु भ्रान्तिकाले तथा प्रतिभातीति; न[१२]न्वेवमन्यथा[१३]प्रतिभासाद्विपरीतख्यातिरेव स्यात्[2]।

ननु[१४] विपरीतख्यातिरपि प्रतिभासविरोधा[१५]न्न युक्तेति[१६]। क एवमाह–'विपरीतोऽयमर्थः' इति ख्यातिः? किं तर्हि? पुरुषविपरीते स्थाणौ 'पुरुषोऽयम्' इति ख्यातिर्विपरीतख्यातिः। ननु[१७] पुरुषावभासिनि ज्ञाने स्थाणोरप्रतिभासमानस्य विषयत्वमयुक्तं[१८] सर्वत्रा[१९]प्यव्यवस्था[२०]प्रसङ्गात्[२१]; तदयुक्तम्; यतः स्थाणुरेवात्र ज्ञाने तद्रूपस्यानवधारणाद्धर्मा[२२]दिवशाच्च पुरुषाद्याकारेणाध्यवसीयते। बाधोत्तरकालं हि प्रतिसन्धत्ते[२३] स्थाणुरयं मे 'पुरुषः' इत्येवं प्रतिभात

---

१ भेदेन निरूपयितुमशक्यत्वमद्वैताश्रितं पुरुषाद्वैताभावे तदसम्भवादित्यर्थः। २ भवदुक्तम्। ३ परेण। ४ अनुमानसाध्य। ५ अर्थोऽनिर्वचनीय इति उपदेशगम्येनेत्यादि। ६ रजतसर्पादि। ७ इति नियतदेशादिस्वभावस्यार्थस्य सदात्मकप्रतिभासमानस्योपदेशादनिर्वचनीयत्वं कथं स्यात्। रजतादिभ्रान्तौ प्रतिभासमानोऽर्थः अनिर्वचनीयः सत्त्वादिना बाध्यमानत्वे सति प्रतिभासमानत्वान्यथानुपपत्तेरित्यर्थस्योपदेशागम्यत्वमनुमानबाध्यत्वं च भवतामेवायातम्। ८ सदात्मकविषयतद्ग्रहणेषु निबन्धने। ९ रजतलक्षणस्य। १० यदि। ११ उत्तरकाले। १२ अनिर्वचनीय एव तत्काले सत्त्वेन भातीति। १३ अनिर्वचनीयार्थस्य अनिर्वचनीयरूपतया प्रतिभासनात्। १४ परः। १५ विपरीतोयमर्थ इति प्रतिभासाभावात्। १६ चेत्। १७ परः। १८ अन्यथा। १९ घटपटादिप्रतिभासिनि ज्ञाने। २० अप्रतिभासमानस्य पुरुषस्य विपरीतत्वं स्यात्। २१ चेत्। २२ काचादिदोष। २३ प्रत्यभिज्ञानं।

अध्यस्तं तोयं परमार्थतोयमिव अत एव पूर्वदृष्टमिव, तत्त्वतस्तु न तोयं न च पूर्वदृष्टम्, किन्त्वनृतमनिर्वाच्यम्"। भामती पृ० १३।

"प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत्।
गाहते तदनिर्वाच्यमाहुर्वेदान्तवादिनः॥" चित्सुखी पृ० ७९।

1 पृ० ५१ पं० ५।

2 अनिर्वचनीयार्थख्यातेर्विचारः भङ्ग्यन्तरेण न्यायवा० ता० टी० पृ० ८७, न्यायकुमु० प्र० परि०, स्या० रत्ना० पृ० १३३ इत्यादिषु द्रष्टव्यः।

इति, कथमेवं विपर्ययनिरासः तस्या एव तद्रूपत्वादिति ? स्मृतिप्रमोषाभ्युपगमेन तु विपर्ययप्रत्याख्यानमयुक्तम्; तस्यासिद्धरूपत्वात्।

ननु शुक्तिकायाम् 'इदं रजतम्' इति प्रतिभासो विपर्ययः, न चासौ विचार्यमाणो घटते। नहि 'इदं रजतम्' इत्येकमेवेदं ज्ञानं कारणाभावात्; तथाहि-न दोषैश्चक्षुरादीनां शक्तेः प्रतिबन्धः क्रियते, कार्यानुत्पत्तिप्रसङ्गात्। न हि दुष्टा यवा विपरीतं कार्यमाविर्भावयन्ति। अत एव प्रध्वंसोऽपि। किञ्च, "सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिना"। [मी० श्लो० प्रत्यक्ष० श्लो० ८४] रजतस्य चासम्बद्धत्वादवर्तमानत्वाच्च चक्षुषा कथं वर्तमानरजताकारावभासः स्यात् ? ज्ञाने च कस्यायमाकारः प्रथते ? न तावद्रजतस्य; अवर्त्तमानत्वात्। नापि ज्ञानस्यैव; स्वसिद्धान्तविरोधात्। किञ्च, अगृहीतरजतस्येदं विज्ञानं नोपजायते, अतिप्रसङ्गात्। गृहीतरजतस्य च 'तद्रजतमिदम्' इति स्यात्, इन्द्रियसंस्कारसादृश्य-

१ विपरीतख्यात्यभ्युपगमप्रकारेण। २ विपरीतख्यातेः। ३ विवेकाख्यातिमभिप्रेत्य विपर्ययनिरासः क्रियते इति प्रभाकरेणोक्तं तं प्रत्याह। ४ परः। ५ एकत्वेन ज्ञानोत्पत्तौ। ६ काचकामलादिदोषैः। ७ इदं रजतमिदं जलं। ८ यवाङ्करादन्यत् शाल्यङ्करादि। ९ न हि बीजप्रध्वंसोऽङ्कुरं जनयति। १० कारणाभावः। ११ वस्तु। १२ शुक्तिकायां। १३ विषयाभावः। १४ चक्षुषा जनिते रजतज्ञाने। १५ वस्तुनः। १६ प्रकाशते। १७ जैनस्य। १८ स्वरूपाभावः। १९ अज्ञात। २० नुः। २१ इदं रजतमिति। २२ अन्यथा। २३ भूभवनर्द्धितोत्थितस्यापीदं रजतमिति विज्ञानं भवतु। २४ नुः। २५ इन्द्रियेणेदमंशोल्लेखि ज्ञानं संस्कारेण तद्रजमित्यंशोल्लेखिस्मरणं सादृश्यदोषलक्षणाभ्यां कारणाभ्यां तद्रजतमिदमिति सामानाधिकरण्यं भवति। नापि सादृश्यादेव केवलात् सामानाधिकरण्यं पूर्वं गृहीतरजतस्य नुः दृश्यमाने सत्यरजते तद्रजतमिदमिति सामानाधिकरण्यप्रसङ्गात् सादृश्याविशेषात्। नापि दोषात्केवलात्सामानाधिकरण्यं स्तम्भेपि तत्प्रसङ्गात् दोषलक्षणस्य कारणस्य स्तम्भेपि विद्यमानत्वात्। तस्मादुभयं कारणं सादृश्यदोषौ।

1 "युक्तं च दुष्टतायाः कार्याऽक्षमत्वं न पुनः कार्यान्तरसामर्थ्यम्"।

बृहती पृ० ५३।

"दोषा हि कारणानां सामर्थ्यं निघ्नन्ति न पुनः कार्यान्तरजननसामर्थ्यमादधति, न खलु भ्रष्टकुटजबीजं न्यग्रोधधानायै कल्पते, किन्तु न करोति कुटजधानम्।" न्यायवा० ता० टी० पृ० ८८। भामती पृ० १४। न्यायमं० पृ० १७६।

2 "रजतप्रतिपत्तिश्च नेयमन्धस्य जायते।
तेनेयमिन्द्रियाधीना संयुक्ते चेन्द्रियं धियम्॥ १२॥"

प्रकरणपं० पृ० ३३।

दोषैर्जन्यमानत्वात्। किञ्च, शुक्तिकायां रजतसंसर्गो न तावद्-सन् प्रतिभासते, खे खपुष्पसंसर्गवत् असत्ख्यातित्वप्रसङ्गात्। नापि सन्; रजतस्य तत्रासत्त्वात्। ततो ज्ञानद्वयमेतत् 'इदम्' इति हि पुरोव्यवस्थितार्थप्रतिभासनम्, 'रजतम्' इति च पूर्वावगतरजतस्मरणं सादृश्यादेः कुतश्चिन्निमित्तात्। तच्च स्मरणमपि स्वरूपेण नावभासत इति स्मृतिप्रमोषोऽभिधीयते। यत्र हि 'स्मरामि' इति प्रत्ययस्तत्र स्मृतेरप्रमोषः, न पुनर्यत्रस्मृतित्वेऽपि 'स्मरामि' इति रूपाप्रवेदनम्। प्रवृत्तिश्च भेदाऽग्रहणादेवोपपन्ना। ननु कोऽयं तदग्रहो नाम? न तावदेकत्वग्रहः; तस्यैव विपर्ययरूपत्वात्। नापि तद्ग्रहणप्रागभावः; तस्याऽप्रवृत्तिहेतुत्वात्, प्रवृत्तिनिवृत्त्योः प्रमाणफलत्वादिति चेत्; न; भेदाऽग्रहणसचिवस्य रजतज्ञानस्य प्रवृत्तिहेतुत्वोपपत्तेरिति।

१ अन्यथा (असतः प्रतिभासे)। २ शुक्तिकायां। ३ दोषात्। ४ मनोदोषः। ५ रजतज्ञानं। ६ प्राभाकरेण। ७ ज्ञाने। ८ प्रतीतिः। ९ प्रत्यक्षस्मरणयोर्भिन्नयोरेकत्वेन ग्रहणं विपर्ययः। १० सत्यासत्यज्ञानयोरित्यादि। ११ विपरीतख्यातित्वप्रसङ्गादित्यर्थः। १२ भेद। १३ ज्ञानस्य। १४ बाधकोत्पत्तेः पूर्वं। १५ सहायस्य।

1 "विज्ञानद्वयं चैतत् इदमिति प्रत्यक्षं रजतमिति स्मरणम्।" बृहती पृ० ५१। "रजतमिदमिति नैकं ज्ञानम्, किन्तु द्वे एते विज्ञाने। तत्र रजतमिति स्मरणं तस्याननुभवरूपत्वान्न प्रामाण्यप्रसङ्गः। इदमित्यपि विज्ञानमनुभवरूपं प्रमाणमिष्यत एव।" प्रकरणपं० पृ० ४३।

2 "शुक्तिकायां रजतज्ञानं स्मरामीति प्रमोषात् स्मृतिज्ञानमुक्तं युक्तं रजतादिषु-" बृहती पृ० ५३।

"स्मरामीति ज्ञानशून्यानि स्मृतिज्ञानान्येतानि" बृहती पृ० ५५।

तु०—"सा च रजतस्मृतिर्न तदा स्वेन रूपेण प्रकाशते स्मरामीतिप्रत्ययाभावात्" न्यायमं० पृ० १७८।

3 "ग्रहणस्मरणे चेमे विवेकानवभासिनी॥ ३३॥
सम्यग्रजतबोधात्तु भिन्ने यद्यपि तत्त्वतः।
तथापि भिन्ने नाभातः भेदाग्रहसमत्वतः॥ ३४॥
सम्यग्रजतबोधश्च समक्षैकार्थगोचरः।
ततो भिन्ने अबुद्ध्वा तु स्मरणग्रहणे इमे॥ ३५॥
समानेनैव रूपेण केवलं मन्यते जनः।
व्यवहारोऽपि तत्तुल्यः तत एव प्रवर्त्तते॥ ३६॥
समत्वेन च संवित्तेः भेदस्याग्रहणेन च।" प्रकरणपं० पृ० ३४।

अत्र[1] प्रतिविधीयते–न दोषैः[2][1] शक्तेः[3] प्रतिबन्धः प्रध्वंसो वा विधीयते, किन्तु दोषसमवधाने चक्षुरादिभिरिदं[4] विज्ञानं विधीयते । दोषाणां चेदमेव सामर्थ्यं यत्तत्सन्निधानेऽविद्यमाने[5]प्यर्थे ज्ञानमुत्पादयन्ति चक्षुरादीनि । न चैवमसत्ख्यातिः स्यात्; सादृश्यस्यापि[6] तद्धेतुत्वात्[7] । असत्ख्यातिस्तु न तद्धेतुका,[9] ५ खपुष्पज्ञानवत्[10] । रजताकारश्च[11] प्रतिभासमानो न ज्ञानस्य[12]; संस्कारस्यापि तद्धेतुत्वात्[13] । दोषाद्धि संस्कारसहायादनुभूतस्यैव रजतस्यायमाकारः पुरोवर्तिन्यर्थे[14] प्रतिभासते । न चैवं 'तद्रजतम्' इति स्यात्; दोषवशात्पुरोव्यवस्थितार्थे[15] रजताकारस्य प्रतिभासनात् । कथमन्यथा भवतोऽपि तद्रजतमिति प्रतिभासो न स्यात्[16]? ततो १० यथा तव[17] स्मृतिप्रमोषैस्तथा[18][19] दोषेभ्यः सामानाधिकरण्येन[20] पुरोवर्त्तिन्यवर्तमानरजताकारावभासः[21] किन्न स्यात्? अनेन 'तत्संसर्गः सन्नसन्वा[22] प्रतिभासते' इत्यपि निरस्तम् । न च विवेकाऽख्यातिसहायाद्रजतज्ञानात्[23] प्रवृत्तिर्घटते; 'घटोयम्' इत्याद्यभेदज्ञानात्प्रवृत्तिप्रतीतेः । विवेकाख्यातिश्च भेदे सिद्धे सिद्धयेत् । न १५ चात्र[24] ज्ञानभेदः[25] कुतश्चित्[26] सिद्धः, तथापि तत्कल्पने 'घटोयम्' इत्यादावपि ज्ञानभेदः कल्प्यतामविशेषात्[27] । अथात्र[28][29] सतो घटस्य ग्रहणान्नासौ कल्प्यते; तर्हि अन्यत्राप्यसतो[30] ग्रहणात्तत्कल्पना माभूत् । यथैव हि गुणान्वितैश्चक्षुरादिभिः[31] सति वस्तुन्येकं ज्ञानं जन्यते, तथा दोषान्वितैः सादृश्यवशादसत्येकं ज्ञानं जन्यते । २०

---

१ परोक्ते प्रत्युत्तरं दीयते जैनैः । २ काचकामलादिभिः । ३ नेत्रादीनां । ४ रजतं । ५ रजते । ६ पूर्वदृष्टरजतेन शुक्तिकायाः सादृश्यं । ७ अन्यथाख्याति । ८ विपर्ययज्ञानस्य सादृश्यं हेतुः । ९ सादृश्यहेतुका । १० सादृश्यहेतु । ११ एवं तर्हि आत्मख्यातिः स्यात् । १२ न ज्ञानस्य आकारः आत्मख्यातिप्रसङ्गात् । १३ रजतज्ञान । १४ शुक्तिकादौ । १५ रजतमिदमिति ज्ञानस्य सादृश्यनिबन्धनत्वेन । १६ पूर्वं रजतानुभवाऽविशेषात् । १७ परस्य । १८ अभावः । १९ तद्रजतमित्येतस्मिन्निदं रजतमिति ज्ञानं यथा ते प्रमोषवशाज्जायते । २० इदं रजतमिति इदंरजतयोरेकाधिकरणत्वेन । २१ शुक्तिकादौ । २२ सर्वथासन्निति वक्तुं न शक्यते सदृशरूपस्यानुभूयमानत्वात्सर्वथाऽसन्निति वक्तुं न शक्यते अनुभूतरजतस्य पुरोदेशे असम्भवात् कथञ्चिदनुभव इति इति भावः । २३ भेदाऽग्रहणं । २४ इदं रजतमित्यत्र । २५ इदं प्रत्यक्षं रजतमिति स्मरणम् । २६ प्रमाणात् । २७ ज्ञानभेदसिद्ध्यभावश्च । २८ परः । २९ घटोयमित्यत्र । ३० इदं रजतमित्यत्र । ३१ नैर्मल्यादि ।

---

1 तु०–"यतो न तैस्तस्याः प्रतिबन्धः प्रध्वंसो वा विधीयते, किन्तु स्वसन्निधाने रजतमिदमिति ज्ञानमेवोत्पाद्यते" न्यायकुमु० प्र० परि० १

गुणदोषाणां च सद्भावं ज्ञानजनकत्वं च स्वतःप्रामाण्यप्रतिषेधप्रस्तावे प्रतिपादयिष्यामः। न[1] च प्रभाकरमते विवेकाख्यातिः[2] सम्भवति, तत्र हि 'इदम्' इति प्रत्यक्षं 'रजतम्' इति च स्मरणमिति संवित्तिद्वयं[4] प्रसिद्धम्, तच्चाऽऽत्मप्राकट्येनैवोत्पद्यते[5][6]। ५आत्मप्राकट्यं चान्योन्यभेदग्रहणेनैव संवेद्यते घटपटादिसंवित्तिवत्। किञ्च, विवेकख्यातेः प्रागभावो विवेकाख्यातिः[7]। न चाभावः प्रभाकरमतेऽस्ति[8]।

कश्चायं[1] स्मृतेः प्रमोषः-किं स्मृतेरभावः, अन्यावभासो[9] वा स्यात्, विपरीताकारवेदित्वं[10] वा, अतीतकालस्य[11] वर्तमानतया १०ग्रहणं वा, अनुभवेन[12] सह क्षीरोदकवदविवेकेनोत्पादो[13] वा प्रकारान्तरासम्भवात्? तत्र न तावदाद्यः पक्षः; स्मृतेरभावे हि कथं पूर्वदृष्टरजतप्रतीतिः स्यात्? मूर्च्छाद्यवस्थायां[14] च स्मृतिप्रमोषव्यपदेशः स्यात् तदभावाविशेषात्। अथात्र[15] 'इदम्' इति भासाभावान्नासौ; ननु[16] 'इदम्' इत्यत्रापि किं प्रतिभातीति वक्तव्यम्[17]? १५पुरोव्यवस्थितं शुक्तिकाशकलमिति चेत्[18]; ननु[19] स्वधर्मविशिष्टत्वेन[20] तत्तत्र प्रतिभाति, रजतसन्निहितत्वेन[21] वा? प्रथमपक्षे-कुतः[22] स्मृतिप्रमोषः? शुक्तिकाशकले हि स्वगतधर्मविशिष्टे[23] प्रतिभासमाने कुतो[24] रजतस्मरणसम्भवो यतोऽस्य प्रमोषः स्यात्? न खलु

१ किं च। २ ता (षष्ठी)। ३ भेदाप्रतिभास इत्यर्थः। ४ ज्ञानद्वयं। ५ स्वरूप। ६ आविर्भाव। ७ भेदस्याप्रतिभासः। ८ अभावः। ९ स्मर्यमाणाद्रजतादन्यस्य शुक्तिकाशकलस्यावभासः। १० स्मर्यमाणाद्रजतादस्पष्टाकारात्स्पष्टाकारः। ११ अतीतः कालो यस्य रजतस्य तदिदमतीतकालं तस्यातीतकालस्य रजतस्य। १२ प्रत्यक्षेण सह स्मृतेः। १३ स्मृतेरभेदेन। १४ अन्यथा। १५ स्मृतेः? (मूर्च्छाद्यवस्थायाम्)। १६ जैनमाशङ्कते प्राभाकरः। १७ प्रष्टव्यम्। १८ प्राभाकराभिप्रायः। १९ भो प्राभाकर। २० त्र्यस्रचतुरस्रादि। २१ सम्बद्धत्वेन। २२ न कुतोपि स्मृतिप्रमोषो भवेत्। २३ त्र्यस्रादि। २४ न कुतोपि।

1 तु०-"कोऽयं विप्रमोषो नाम-किमनुभवाकारस्वीकरणम्, स्मरणाकारप्रध्वंसो वा, पूर्वार्थगृहीतित्वं वा, इन्द्रियार्थसन्निकर्षजत्वं वा, इन्द्रियार्थसन्निकर्षाजत्वं वा?" तत्त्वोपप्लव लि० पृ० २५।

"कोऽयं स्मृतेः, प्रमोषोनाम—विनाशः, प्रत्यक्षेण सहैकत्वाध्यवसायाः, प्रत्यक्षरूपतापत्तिः, तदित्यंशस्याऽनुभवः, तिरोभावमात्रं वा?" न्यायकुमु० प्र० परि०। स्या० रत्ना० पृ० १२०।

"किं स्मृतेरभावः, उत अन्यावभासः, आहोस्विदन्याकारवेदित्वम् इति विकल्पाः" सन्मति० टी० पृ० २८।

घटे गृहीते पटस्मरणसम्भवः। अथ शुक्तिकारजतयोः सादृश्या-च्छुक्तिकाप्रतिभासे रजतस्मरणम्; न; अस्या[1]ऽकिञ्चित्करत्वात्। यदा[2] ह्यसाधारण[3]धर्मा[4]ध्यासितं शुक्तिकास्वरूपं प्रतिभाति तदा कथं सदृ[5]शवस्तुस्मरणम्? अन्यथा सर्वत्र स्यात्। सामान्यमात्र-ग्रहणे हि तत्[7] कदाचित्स्यादपि नाऽसा[8]धारणस्वरूपप्रतिभासे। ५ द्विचन्द्रादि[9]षु च जा[10]तितैमिरिकप्रतिभासविषये सदृशवस्तुप्रति-भासाभावात् कथं स्मृतेरुत्पत्तिर्यतः प्रमोषः स्यात्? नापि तत्[11]स-न्निहितत्वेन प्रतिभासः; रजतस्य तत्रा[12]सत्त्वेन तत्सन्निधानायो-गात्। इन्द्रियसम्बद्धानां च[13] तद्देश[14]वर्तिनां परमाण्वादीनामपि प्रतिभासः स्यात् तद[15]विशेषात्। नाप्यन्यावभासो[16]ऽसौ[17]; स हि किं १० तत्[18]कालभावी, उत्तरकालभावी वा स्यात्? तत्[19]कालभावी चेत्; तर्हि घटादिज्ञानं तत्[20]कालभावि तस्या[21]ः प्रमोषः स्यात्। नाप्युत्तरकाल-भाव्यन्यावभासोऽस्या[22]ः प्रमोषः; अतिप्रसङ्गात्। यदि हि उत्तरकाल-भाव्यन्यावभासः समुत्पन्नस्तर्हि पूर्व[23]ज्ञानस्य स्मृतिप्रमोषत्वेनासौ नाभ्युप[24]गमनीयः, अन्यथा सकलपूर्वज्ञानानां स्मृतिप्रमोषत्वेना- १५ भ्युपगमनीयः स्यात्। किञ्च, अन्यावभा[25]सस्य सद्भावे परि[26]स्फु[27]ट-वपुः[28] स एव प्रतिभातीति कथं रजते स्मृतिप्रमोषः? निखिला-न्या[29]वभासानां स्मृतिप्रमोष[30]तापत्तेः। अथ विपरीताकार[31]वेदि[32]त्वं तस्या[33]ः प्रमोषः; तर्हि विपरीतख्यातिरेव। कश्चासौ विपरीत आकारः? परिस्फुटार्थावभासित्वं चेत्; कथं तस्य[34] स्मृतिसम्ब- २० न्धित्वं प्रत्यक्षाकारत्वात्? तत्सम्बन्धित्वे वा प्रत्यक्षरूपतैवास्या[35]ः स्यान्न स्मृतिरूपता। नाप्यतीतकालस्य[36] वर्तमानतया ग्रहणं[37] तस्या[38]ः प्रमोषः; अन्य[39]स्मृतिवत्तस्या[40]ः स्पष्टवेदनाभावानुषङ्गात्, न चैवम्।

१ सादृश्यस्य। २ अकिञ्चित्करत्वमेव भावयन्ति। ३ व्यस्रादि। ४ शुक्तिकाशकलस्य। ५ रजतादिसदृशवस्तु। ६ सन्निहितशुक्तिकाशकलप्रतीतौ बाधकोत्तरकाले शुक्तिकाशकलप्रतीतौ च घटादौ वा। ७ सदृशवस्तुस्मरणम्। ८ विशेष। ९ स्मृतेः सादृश्यनिबन्धनत्वे इत्यत्र किं च। १० जन्मना। ११ रजत। १२ शुक्तिकायाम्। १३ किञ्च। १४ शुक्तिकादेशवर्तिनाम्। १५ रजतेन सन्निहितत्वस्य। १६ परमाणूनां। १७ स्मृतिप्रमोषः। १८ रजतस्मरण। १९ रजतस्मरण। २० रजतस्मरण। २१ स्मृतेरभावः। २२ स्मृतेः। २३ रजत। २४ परेण भवता। २५ शुक्तिकाशकल। २६ विशदस्वरूपः। २७ शुक्तिरूप। २८ स्वभाव। २९ अन्यथा। ३० अभावरूपतापत्तेः। ३१ स्मृतिविपरीत। ३२ पदार्थानां। ३३ स्मृतेः। ३४ परिस्फुटार्थावभासित्वाकारस्य। ३५ स्मृतेः। ३६ रजतस्य। ३७ स्मरणं। ३८ स्मृतेः। ३९ देवदत्तादिस्मृतिवत्। ४० शुक्तिकायां रजतस्मृतेः।

अतीतकालस्य स्पष्टत्वेनाधिकस्य संवेदनं स इति चेत्; न; तत्र परमार्थतः स्पष्टत्वसद्भावे[2] अतीन्द्रियार्थवेदिनो निषेधो न स्यात्, तत्स्मृतिवत्[3] अन्यस्या[4]पीन्द्रिय[5]मन्तरेण वैशद्यसम्भवात्। अथात्र पारम्पर्येणेन्द्रियादेव वैशद्यम्; न; तदविशेषात्सर्वस्यास्तत्प्रस-
५ ङ्गात्। अथानुभवेन सह क्षीरोदकवदविवेकेनोत्पादोऽस्याः[6] प्रमोषः; ननु कोयमविवेको नाम-भिन्नयोः सतोरभेदेन[8] ग्रहणम्, संश्लेषो[9] वा, आनन्तर्येण उत्पादो वा? प्रथमपक्षे विपरीतख्यातिरेव। संश्लेषस्तु ज्ञानयोर्न सम्भवत्येव, अस्य मूर्त्तद्रव्येष्वेव प्रतीतेः। आनन्तर्येणोत्पादस्य स्मृतिप्रमोषरूपत्वे अनुमेय[10]शब्दार्थेषु देवद-
१० त्तादिज्ञानानां स्मरणानन्तरभाविनां स्मृतिप्रमोषताप्रसङ्गः स्यात्।

यदि[11] च[12] द्विचन्द्रादिवेदनं स्मरणम्, तर्हीन्द्रियान्वयव्यतिरेकानुविधायि न स्यात्, अन्यत्र[13] स्मरणे तददृष्टेः[14]। तदनुविधायि चेदम्, अन्यथा न किञ्चित्तदनुविधायि[15] स्यात्। तद्[16]विकार[17][18]विकारि[19][20]त्वं[21] चात[22] एव दुर्लभं स्यात्। किञ्च, स्मृतिप्रमोषपक्षे बाधकप्रत्ययो न
१५ स्यात्, स हि पुरोवर्त्तिन्यर्थे[23] तत्प्रतिभासस्यासद्विषयतामादर्शयन्[24] 'नेदं रजतम्' इत्युल्लेखेन प्रवर्त्तते[25], न तु 'रजतप्रतिभासः स्मृतिः' इत्युल्लेखेन। स्मृतिप्रमोषा[26]भ्युपगमे च स्वतःप्रामाण्यव्याघातः[27], सम्यग्रजतप्रतिभासेऽपि ह्याशङ्कोत्पद्यते 'किमेष स्मृतावपि स्मृतिप्रमोषः, किं वा सत्यप्रतिभासे[28]' इति, बाधकाभावापेक्षणात्-
२० यत्र[29] हि स्मृतिप्रमोषस्तत्रोत्तरकालमवश्यं बाधकप्रत्ययो यत्र[30] तु तदभावस्तत्र स्मृतेः प्रमोषासम्भवः। बाधकाभावापेक्षायां चान[31]-वस्था। तस्मात् 'इदं रजतम्' इत्यत्र ज्ञानद्वयकल्पनाऽसम्भवा-

---

१ रजतस्मृतौ। २ सर्वज्ञस्य। ३ रजत। ४ संवेदनस्य। ५ स्मृतिविषयं रजतमतीन्द्रियम्। ६ रजतस्मरणे। ७ इति चेत्। ८ प्रत्यक्षस्मरणयोः। ९ सम्बन्धः। १० अनुमेयार्थोऽग्न्यादिः। ११ असन्निहितार्थग्राहकज्ञानस्य स्मृतित्वमितिस्थितौ दूषणम्। १२ किञ्च। १३ घटादौ। १४ तदप्रतीतेः। १५ घटादिज्ञानं प्रत्यक्षं। १६ इन्द्रिय। १७ काचादि। १८ ता (षष्ठी)। १९ द्विचन्द्रादि। २० ज्ञानस्य। २१ तस्य काचकामलादिना द्विचन्द्रादिग्राहित्वेन परिणामित्वम्। २२ इन्द्रियान्वयव्यतिरेकानुविधायित्वाभावादेव द्विचन्द्रज्ञानस्य स्मरणत्वादेव वा। २३ शुक्तिकाशकले। २४ रजत। २५ उत्तरकाले। २६ परेण। २७ ज्ञाने। २८ रजतस्य। २९ एतदेव भावयति। ३० ज्ञाने। ३१ किञ्च। अन्यथानवस्था।

त्स्मृतिप्रमोषाभावः। ततः सूक्तम्-विपर्ययज्ञानस्य व्यवसायात्मकत्वविशेषणेनैव निरास इति।

तेनापूर्वार्थविशेषणेन धारावाहिविज्ञानं निरस्यते। नन्वेवमपि प्रमाणसम्प्लववादिताव्याघातः प्रमाणप्रतिपन्नेऽर्थे प्रमाणान्तराप्रतिपत्तिः; इत्यचोद्यम्; अर्थपरिच्छित्तिविशेषसद्भावे तत्प्रवृत्तेरभ्युपगमात्। प्रथमप्रमाणप्रतिपन्ने हि वस्तुन्याकारविशेषं प्रतिपद्यमानं प्रमाणान्तरम् अपूर्वार्थमेव वृक्षो न्यग्रोध इत्यादिवत्। एतदेवाह-

अनिश्चितोऽपूर्वार्थः ॥ ४ ॥

स्वरूपेणाकारविशेषरूपतया वाऽनवगतोऽखिलोऽप्यपूर्वार्थः।   १०

दृष्टोपि समारोपात्तादृक् ॥ ५ ॥

न केवलमप्रतिपन्न एवापूर्वार्थः, अपि तु दृष्टोऽपि प्रतिपन्नोपि समारोपात् संशयादिसद्भावात् तादृगपूर्वार्थोऽधीतानभ्यस्तशास्त्रवत्। एवंविधार्थस्य यन्निश्चयात्मकं विज्ञानं तत्सकलं प्रमाणम्।

तत्र अनधिगतार्थाधिगन्तृत्वमेव प्रमाणस्य लक्षणम्। तद्धि १५

१ यतो विपर्ययज्ञानादिकं समर्थितम्। २ कारणेन। ३ भाट्टः शङ्कते। ४ बहूनां प्रमाणानामेकस्मिन्नर्थे प्रवृत्तिः प्रमाणसम्प्लवः। ५ जैनानां विरोधः। ६ प्रत्यक्षादि। ७ स्वच्छादिलक्षण। ८ अपूर्वः अर्थो यस्य। ९ स्वच्छादिमत्त्वेन। १० अज्ञातः। ११ दृष्टोपि समारोपात्तादृगिति सूत्रम्। १२ अपूर्वस्य। १३ पूर्वाग्रहीतार्थग्राहि। १४ सर्वथा।

1 विवेकाख्याति-अख्यात्यपरपर्यायस्यास्य स्मृतिप्रमोषस्य विविधरीत्या मीमांसा-न्यायवा० ता० टी० पृ० ८८, भामती पृ० १४, प्रश० कन्दली पृ० १८०, न्यायमं० पृ० १७६, विवरणप्रमेय सं० पृ० २८, न्यायलीलाव० पृ० ४१, तत्त्वोपप्लव लि० पृ० २५, न्यायकुमु० प्र० परि०, सन्मति० टी० पृ० २८,३७२। स्या० रत्ना० पृ० १०४ इत्यादिषु समवलोकनीया।

2 "प्रमातुः प्रमातव्येऽर्थे प्रमाणानां सङ्करोऽभिसम्प्लवः।"

न्यायभा० १।१।३ पृ० १९।

3 "उपयोगविशेषस्याभावे प्रमाणसम्प्लवस्याऽनभ्युपगमात्। सति हि प्रतिपत्तुरुपयोगविशेषे देशादिविशेषसमवधानाद् आगमात्प्रतिपन्नमपि हिरण्यरेतसं स पुनरनुमानात्प्रतिपित्सते तत्प्रतिबद्धधूमादिविशेषसाक्षात्करणात्तत्प्रतिपत्तिविशेषघटनात्। पुनस्तमेव प्रत्यक्षतो बुभुत्सते तत्करणसम्बन्धात्तद्विशेषप्रतिभाससिद्धेः"। अष्टसह० पृ० ४।

4 "औत्पत्तिकगिरा दोषः कारणस्य निवार्यते।
अबाधोऽव्यतिरेकेण स्वतस्तेन प्रमाणता ॥ १० ॥
सर्वस्यानुपलब्धेऽर्थे प्रामाण्यं स्मृतिरन्यथा।"   मीमांसाश्लो० पृ० २१०।

वस्तुन्यधिगतेऽनधिगते वाऽव्यभिचारादिविशिष्टां प्रमां[1] जनयन्नो-
पालम्भ[2]विषयः। न चाधिगते[3]ऽर्थे किं[4] कुर्वंस्तत्प्रमाणतां प्राप्नोतीति
वक्तव्यम्[5]? विशिष्टप्रमां जनयतस्तस्य[6] प्रमाणताप्रतिपादनात्। यत्र[7]
तु सा[8] नास्ति तत्[9] न प्रमाणम्। न च विशिष्टप्रमोत्पादकत्वेप्यधिगत-
५ विषयेऽस्याऽकिञ्चित्करत्वम्; अतिप्रसङ्गात्[10]। न[11] चैकान्ततो[12][1]ऽनधि-
गतार्थाधिगन्तृत्वे प्रामाण्यं प्रमाणस्यावसातुं[13] शक्यम्; तद्ध्यर्थ-
तथाभावित्वलक्षणं संवादादवसीयते, स[14] च तदर्थो[15]त्तरज्ञा[16]-
नवृत्तिः[17]। न चानधिगतार्थाधिगन्तुरेव[18] प्रामाण्ये[19] संवादप्रत्ययस्य
तद् घटते। न च तेना[20]प्रमाणभूतेन[21] प्रथम[22]स्य[23] प्रामाण्यं व्यवस्थापयितुं
१० शक्यम्; अतिप्रसङ्गात्[24]। न च[25] सामान्यविशेष[26]योस्तादात्म्याभ्युपगमे
तस्यै[27]कान्ततोऽनधिगतार्थाधिगन्तृत्वं सम्भवति। इ[2]दानींतनानास्ति-
त्व(इदानीन्तन[28]नास्तित्व[29])स्य पूर्वास्तित्वा[30]दभेदात् तस्य च पूर्वमप्य-
धिगतत्वात्। कथञ्चि[31]दनधिगतार्थाधिगन्तृत्वे त्वस्मन्[32]मतप्रवेशः।
निश्चिते विषये कि[33]न्निश्चयान्तरेण[34] अप्रेक्षावत्त्वप्रसङ्गात्; इत्यप्यवा-

१ अर्थपरिच्छित्ति। २ दोष। ३ निश्चिते। ४ कार्यं। ५ परेण। ६ प्रमाणान्तरस्य। ७ ज्ञाने। ८ विशिष्टप्रमाजनकता। ९ ज्ञानं। १० विशिष्टप्रमोत्पादकत्वे यद्यकिञ्चित्करत्वं तदा सर्वथाऽदृष्टेऽर्थे प्रमाजनकस्य ज्ञानस्याकिञ्चित्करत्वं स्याद्विशिष्टप्रमोत्पादकत्वस्याविशेषात्। ११ किञ्च। १२ सर्वथा। १३ निश्चेतुं। १४ संवादः। १५ पूर्वज्ञानार्थे। १६ ईप् (सप्तमी)। १७ तदर्थश्चासौ उत्तरज्ञानवृत्तिश्च। १८ ज्ञानस्य। १९ संवादात्। २० द्वितीयज्ञानेन। २१ गृहीतार्थग्राहित्वात्। २२ ज्ञानस्य। २३ न ह्यज्ञातमस्तीति वक्तुं शक्यं तस्याज्ञातत्वविरोधान्नैयायिकः। २४ संशयादिना प्रथमज्ञानस्य प्रामाण्यप्रसङ्गात्। २५ किञ्च। २६ वृक्षवटादि। २७ प्रमाणस्य। २८ वट। २९ अधिगतार्थाधिगन्तृत्वात्। ३० वृक्ष। ३१ विशेषापेक्षया। ३२ जैन। ३३ प्रयोजनं। ३४ अन्यथा।

"एतच्च विशेषणत्रयमुपादानेन सूत्रकारेण कारणदोषबाधकरहितमगृहीतग्राहि ज्ञानं प्रमाणमिति प्रमाणलक्षणं सूचितम्।" शास्त्रदीपिका पृ० १५२।

5 तु०–"यतः प्रमाणं वस्तुन्यधिगतेऽनधिगते वाऽव्यभिचारादिविशिष्टां प्रमां जनयन्नोपालम्भविषयः। नचाधिगते वस्तुनि......" सन्मति० टी० पृ० ४६६।

1 "नचैकान्ततोऽनधिगतार्थाधिगन्तृत्वे प्रामाण्यं तस्यावसातुं शक्यम्..."
सन्मति० टी० पृ० ४६६।

2 "इदानीन्तनास्तित्वस्य पूर्वास्तित्वाभेदात् तस्य च पूर्वमप्यधिगतत्वसंभवात्"
सन्मति० टी० पृ० ४६६।

ध्येयम्; भूयो निश्चये सुखादिसाधकत्वविशेषप्रतीतेः। प्रथममतो हि वस्तुमात्रं निश्चीयते, पुनः 'सुखसाधनं दुःखसाधनं वा' इति निश्चित्योपादीयते त्यज्यते वा, अन्यथा विपर्ययेणाप्युपादानत्यागप्रसङ्गः स्यात्। केषाञ्चित्सकृद्दर्शनेपि तन्निश्चयो भवति अभ्यासादिति एकविषयाणामप्यागमानुमानाध्यक्षाणां प्रामाण्यमुपपन्नम् प्रतिपत्ति- ५ विशेषसद्भावात्; सामान्याकारेण हि वचनात्प्रतीयते वह्निः, अनुमानाद्देशादिविशेषविशिष्टः, अध्यक्षात्त्वाकारनियत इति। ततोऽयुक्तमुक्तम्-

"तत्रापूर्वार्थविज्ञानं निश्चितं बाधवर्जितम्।

अदुष्टकारणारब्धं प्रमाणं लोकसम्मतम्॥" [ ] इति। १०
प्रत्यभिज्ञानस्यानुभूतार्थग्राहिणोऽप्रामाण्यप्रसङ्गात्, तथा च कथमतेः शब्दात्मादेर्नित्यत्वसिद्धिः? न चानुभूतार्थग्राहित्वमस्यासिद्धम्; स्मृतिप्रत्यक्षप्रतिपन्नेऽर्थे तत्प्रवृत्तेः। न ह्यप्रत्यक्षेऽस्मर्यमाणे चार्थे प्रत्यभिज्ञानं नाम; अतिप्रसङ्गात्। पूर्वोत्तरावस्थाव्याप्येकत्वे तस्य प्रवृत्तेरयमदोषः; इति चेत्; किं ताभ्यामेकत्वस्य भेदः, १५ अभेदो वा? भेदे तत्र तस्याप्रवृत्तिः। न हि पूर्वोत्तरावस्थाभ्यां भिन्ने सर्वथैकत्वे तत्परिच्छेदिज्ञानाभ्यां जन्यमानं प्रत्यभिज्ञानं प्रवर्त्तते अर्थान्तरैकत्ववत्, मतान्तरप्रवेशश्च। ताभ्यामेकत्वस्य सर्वथाऽ-

१ परेण। २ ज्ञानात्। ३ निश्चयान्तरानङ्गीकारे। ४ सुखसाधनत्वदुःखसाधनत्वनिश्चय उत्तरज्ञानान्न भवति चेत्। ५ व्यत्यासेन। ६ पुरुषाणां। ७ एकदा। ८ धूमादेः। ९ भाट्टेन। १० परप्रमाणलक्षणनिराकरणे च सति। ११ सर्वथा। १२ गृहीतग्राहित्वेन प्रत्यभिज्ञानस्याप्रामाण्ये च। १३ प्रत्यभिज्ञानात्। १४ वसः। १५ प्रत्यभिज्ञानस्य। १६ उत्तरप्रत्यक्ष। १७ तस्य। १८ मेवादौ प्रत्यभिज्ञानस्वप्रसङ्गः। १९ पूर्वोत्तराकारग्राहिस्मरणप्रत्यक्षाभ्यां। २० ईप्। २१ सर्वथाभेदे। २२ नैयायिक।

1 "यतो भूयो भूय उपलभ्यमाने दृढतरा प्रतिपत्तिर्भवतीति सुखसाधनं तथैव निश्चित्योपादत्ते…" सन्मति० टी० पृ० ४६७।

2 "यदि चानुपलब्धार्थग्राहि मानमुपेयते।
तदयं प्रत्यभिज्ञायाः स्पष्ट एव जलाञ्जलिः॥" न्यायमं० पृ० २२।

3 "नहि पूर्वोत्तरावस्थाभ्यां भिन्ने च सर्वथैकत्वे तत्परिच्छेदिज्ञानाभ्यां जन्यमानं प्रत्यभिज्ञानं प्रवर्त्तते स्मरणवत् सन्तानान्तरैकत्ववद्वा"। तत्त्वार्थश्लो० पृ० १७४।

4 "विवर्त्ताभ्यामभेदश्चेदेकत्वस्य कथञ्चन।
तद्ग्राहिण्याः कथन्न स्यात्पूर्वार्थत्वं स्मृतेरिव॥ ७६॥"
तत्त्वार्थश्लो० पृ० १७४।

भेदे अनुभूतग्राहित्वं प्रत्यभिज्ञानस्य स्यात्। ताभ्यां तस्य[1] कथञ्चिद्भेदे सिद्धं तस्य[2] (कथञ्चिद्) अनुभूतार्थग्राहित्वम्। न चैवंवादिनैः[3] प्रत्यभिज्ञानप्रतिपन्ने शब्दादिनित्यत्वे प्रवर्त्तमानस्य "दर्शनस्य[4] परार्थत्वात्[5]" [जैमिनिसू० १।१८] इत्यादेः[6] प्रमाणता घटते। सर्वेषां चाँनुमानानां[7] व्याप्तिज्ञानप्रतिपन्ने विषये प्रवृत्तेरप्रमाणता स्यात्। प्रत्यभिज्ञानान्नित्यशब्दादिसिद्धावपि कुतश्चित्[8] समारोपस्य प्रसूतेस्त-[11] द्व्यवच्छेदार्थत्वादस्य प्रामाण्ये[12] च एकान्तत्यागः[13]। स्मृत्यूहादेश्चाभि-[14] मतप्रमाणसंख्याव्याघातकृत्प्रमाणान्तरत्वप्रसङ्गः स्यात्; प्रत्यभिज्ञानवत्कथंचिदपूर्वार्थत्वसिद्धेः। किञ्च, अपूर्वार्थप्रत्ययस्य प्रामाण्ये

१० द्विचन्द्रादिप्रत्ययोऽपि[15] प्रमाणं स्यात्। निश्चितत्वं[16] तु परोक्षज्ञानवादिनो[17] न सम्भवतीत्यग्रे वक्ष्यामः।

ननु द्विचन्द्रादिप्रत्ययस्य सबाधकत्वान्न[18] प्रमाणता, यत्र[19] हि बाधाविरहस्तत्प्रमाणम्; इत्यप्यसङ्गतम्; बाधाविरहो हि तत्काल-[20] भावी, उत्तरकालभावी वा विज्ञानप्रमाणताहेतुः? न तावत्तत्का-[21]

१५ लभावी; क्वचिन्मिथ्याज्ञानेऽपि[22][23] तस्य भावात्। अथोत्तरकालभावी; स किं ज्ञातः, अज्ञातो वा? न तावदज्ञातः; अस्य सत्त्वेनाप्य-

---

१ एकत्वस्य। २ प्रत्यभिज्ञानस्य। ३ सर्वथाऽपूर्वार्थविज्ञानं प्रमाणमित्येवंवादिनः। ४ उच्चारणस्य। ५ शिष्य। ६ अर्थापत्त्यादेः। शब्दो नित्य उच्चारणान्यथाऽनुपपत्तेरिति। ७ किञ्च। ८ स एवायं। ९ आत्मा। १० सर्वं क्षणिकं सत्त्वादिति क्षणिकत्वप्रतिपादकानुमानात्। ११ उत्पत्तेः। १२ व्याप्तिज्ञानेन निखिलसाध्यसाधनानां सामान्येन ग्रहणेप्यनुमानेन नियतदेशकालाकारतया साध्यप्रतिपत्तेरनुमानप्रामाण्ये च। १३ सर्वथाऽपूर्वार्थविज्ञानमेव प्रमाणमित्येकान्तत्यागः। १४ इदमल्पमित्यादेः। १५ षडिति विज्ञाने। १६ स्मृत्यादीनाम्। १७ भाट्टस्य। १८ उत्तरकाले। १९ ज्ञाने। २० तज्ज्ञानकाल। २१ विचार्यमाणप्रामाण्यविज्ञानकाल। २२ रजतादिज्ञाने। २३ न हि शुक्तिकायामिदं रजतमिति ज्ञानं यदा जायते तदैव बाध्यते प्रवृत्त्यादेरभावप्रसङ्गात्।

---

1 "यदि पुनः प्रत्यभिज्ञानान्नित्यशब्दादिसिद्धावपि कुतश्चित्समारोपस्य......" तत्त्वार्थश्लो० पृ० १७४।

2 प्रमाणलक्षणस्य अनधिगतार्थत्वविशेषणस्य पर्यालोचनम् अक्षरशः तत्त्वार्थश्लो० पृ० १७३, सन्मति० टी० पृ० ४६६, भङ्ग्यन्तरेण च तत्त्वोप० लि० पृ० ३०, न्यायमं० पृ० २१, स्या० रत्ना० पृ० ३८ इत्यादिषु द्रष्टव्यम्।

3 "किञ्च, अर्थसंवेदनानन्तरमेव बाधानुत्पत्तिः तत्प्रामाण्यं व्यवस्थापयेत्, सर्वदा वा?" अष्टसह० पृ० ३९।

"यतो बाधाविरहः तत्कालभावी, उत्तरकालभावी वा" सन्मति० टी० पृ० १२।

सिद्धेः[1]। ज्ञातश्चेत्-किं पूर्वज्ञानेन, उत्तरज्ञानेन वा? न तावत्पूर्वज्ञानेनोत्तरकालभावी बाधाविरहो ज्ञातुं शक्यः; तद्धि स्वसमानकालं नीलादिकं प्रतिपद्यमानं कथम् 'उत्तरकालमप्यत्र[3] बाधकं नोदेष्यति' इति प्रतीयात्? पूर्वमनुत्पन्नबाधकानामप्युत्तरकालं बाध्यमानत्वदर्शनात्। नाप्युत्तरज्ञानेनासौ ज्ञायते; तदा प्रमाणत्वाभिमतज्ञानस्य[6] नाशात्। नष्टस्य च बाधाविरहचिन्ता गतसर्पस्य घृष्टिकुट्टनन्यायमनुकरोति। कथं च बाधाविरहस्य ज्ञायमानत्वेपि सत्यत्वम्; ज्ञायमानस्यापि केशोण्डुकादेरसत्यत्वदर्शनात्? तज्ज्ञानस्य सत्यत्वाच्चेत्; तस्यापि कुतः सत्यता? प्रमेयसत्यत्वाच्चेत्; अन्योन्याश्रयः। अपरबाधाभावज्ञानाच्चेत्; अनवस्था। अथ संवादादुत्तरकालभावी[10] बाधाविरहः सत्यत्वेन ज्ञायते; तर्हि संवादस्याप्यपरसंवादात्सत्यत्वसिद्धिस्तस्याप्यपरसंवादादित्यनवस्था। किञ्च, क्वचित्कदाचित्कस्यचिद्[11] बाधाविरहो विज्ञानप्रमाणता[12] हेतुः, सर्वत्र सर्वदा सर्वस्य वा? प्रथमपक्षे कस्यचिन्मिथ्याज्ञानस्यापि प्रमाणताप्रसङ्गः, क्वचित्कदाचित्कस्यचिद्बाधाविरहसद्भावात्। सर्वत्र सर्वदा सर्वस्य बाधाविरहस्तु नासर्वविदां विषयः।

अदुष्टकारणारब्धत्वमप्यज्ञातम्[2], ज्ञातं वा तद्धेतुः[13]? प्रथमपक्षोऽयुक्तः; अज्ञातस्य सत्त्वसन्देहात्। नापि ज्ञातम्; करणकुशलादे[14]रतीन्द्रियस्य ज्ञप्तेरसम्भवात्[15]। अस्तु वा तज्ज्ञप्तिः[16]; तथाप्यसौ अदुष्टकारणारब्धः ज्ञानान्तरात्, संवादप्रत्ययाद्वा? आद्यविकल्पे अनवस्था। द्वितीयविकल्पेपि[17] संवादप्रत्ययस्यापि ह्यदुष्टकारणारब्धत्वं तथाविधादन्यतो[18] ज्ञातव्यं तस्याप्यन्यत इति। न चानेकान्त-

१ न ह्यज्ञातमस्तीतिवक्तुं शक्यं तस्याऽज्ञातत्वविरोधात्। २ शुक्तिकादौ। ३ प्रमाणं। ४ काल। ५ ज्ञानानां। ६ पूर्वस्येदं जलमिति ज्ञानस्य। ७ किञ्च। ८ पूर्वकाले। ९ उत्तरकाले। १० पूर्वज्ञानापेक्षया। ११ विषये। १२ पूर्वं। १३ पूर्वविज्ञानप्रमाणताहेतुः। १४ इन्द्रियदृष्ट्यादि। १५ परिज्ञानस्य। १६ अदृष्टकारणारब्धत्व। १७ अनवस्था। १८ ज्ञानात्।

1 "बाधाविरहः किं सर्वपुरुषापेक्षया, आहोस्वित्प्रतिपत्त्रपेक्षया?" तत्त्वोपप्लवसिंह लि० पृ० ३। अष्टसह० पृ० ३९। प्रमाणप० पृ० ६२। सन्मति० टी० पृ० १८।

2 "यद्यदुष्टकारकसन्दोहोत्पाद्यत्वेन; तदा सैव कारकाणामदुष्टता कुतोऽवसीयते? न तावत्प्रत्यक्षात्; नयनकुशलादेः संवेदनकारणस्य अतीन्द्रियस्याऽदुष्टतायाः प्रत्यक्षीकर्तुमशक्तेः। नानुमानात्; तदविनाभाविलिङ्गाभावात्..." अष्टसह० पृ० ३८। (तत्त्वोपप्लव०-) सन्मति० टी० पृ० १३।

वादिनामप्युपालम्भः[1] समानोऽयम्; यथावदर्थनिश्चायकप्रत्ययस्या[2]भ्यासदशायां बाधवैधुर्यस्या[3]दुष्टकारणारब्धत्वस्य च स्वयं[4] संवेदनात्; अनभ्यासदशायां तु परतोऽभ्यस्तविषयात्[5]। न चैवमनवस्था; कंचित्[6] कस्यचिदभ्यासोपपत्तेरित्यलं विस्तरेण परतः प्रामाण्य-
५ विचारे विचारणात्। लोकसम्मतत्वं च यथावद्वस्तुस्वरूपनिश्चयान्नापरम्।

नेनु चोक्तलक्षणाऽपूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणमित्ययुक्तमुक्तम्; अर्थव्यवसायात्मकज्ञानस्य मिथ्यारूपतया प्रमाणत्वायोगात्, परमात्मस्वरूपग्राहकस्यैव ज्ञानस्य सत्यत्वप्रसिद्धेः।
१० अक्षसन्निपातानन्तरोत्थाऽविकल्पकप्रत्यक्षेण हि सर्वत्रैकत्वमेवा[11]ऽन्यानपेक्षतया[12] झगिति[13] प्रतीयते इति तदेव वस्तुत्वस्वरूपम्। भेदः पुनरविद्यासंकेतस्मरणजनितविकल्पप्रतीत्या[14]ऽन्याऽपेक्षतया[15] प्रतीयते इत्यसौ नार्थस्वरूपम्[16]। तथा[17], 'यत्प्रतिभासते तत्प्रतिभासान्तःप्रविष्टमेव यथा प्रतिभासस्वरूपम्, प्रतिभासते चाशेषं
१५ चेतनाचेतनरूपं वस्तु' इत्यनुमानादप्यात्माऽद्वैतप्रसिद्धिः। न चात्राऽसिद्धो हेतुः[19]; साक्षादसाक्षाच्चा[20]शेषवस्तुनोऽप्रतिभासमानत्वे सकलशब्दविकल्पगोचरातिक्रान्तया वक्तुमशक्तेः। तथागमो[21]ऽप्यस्य[22] प्रतिपादकोऽस्ति।

"सर्वं वै[1] खल्विदं ब्रह्म नेह नानास्ति किञ्चन।
२० आरामं[23] तस्य[24] पश्यन्ति न तं पश्यति कश्चन॥" [ ] इति।
तथा[25] "पुरुष एवैतत्सर्वं यद्भूतं यच्च भाव्यं स एव हि सकललोकसर्ग[26]स्थितिप्रलयहेतुः।" [ऋक्सं० मण्ड० १० सू० ९० ऋ० २]
उक्तञ्च—

१ दोषः। २ ज्ञानस्य। ३ राहित्यस्य। ४ स्वरूपेण। ५ स्वयं संवेदनाच्चायमुपालम्भः। ६ अर्थे। ७ ज्ञानस्य। ८ अनवस्थापरिहारस्य विस्तरेण। ९ ज्ञानस्य। १० भास्करीयः प्राह। ११ अर्थे। १२ भेद। १३ झटिति। १४ अभेदे भेदप्रतिभासो ह्यविद्या। १५ घटः पटाद्भिन्न इति। १६ पटस्य। १७ ब्रह्म। १८ ब्रह्मग्राहकप्रत्यक्षप्रकारेणानुमानमपि दर्शयति। १९ प्रतिभासमानत्वादिति। २० अस्पष्टतया। २१ प्रत्यक्षानुमानप्रकारेण। २२ परमात्मनः। २३ विवर्तं। विकारं। २४ ब्रह्मणः। २५ प्रत्यक्षानुमानागमप्रकारेण। २६ उत्पत्तिः।

1 "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीताथ..." छान्दोग्योप० ३।१४।१। "ब्रह्म खल्विदं वाव सर्वम्" मैत्र्युप० ४।६ "मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन।" बृहदा० ४।४।१९ "मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन।" कठोप० ४।११ "आराममस्य पश्यन्ति न तं पश्यति कश्चन।" बृहदा० ४।३।१४।

"ऊर्णनाभ[1] इवांशूनां[2] चन्द्रकान्त इवाम्भसाम् ।
प्ररोहाणामिव प्लक्षः[3] स[4] हेतुः सर्वजन्मिनाम् ॥" [ ] भेद-
दर्शिनो निन्दा च श्रूयते—"मृत्योः[5] स[6] मृत्युमाप्नोति य इह[7] नानेव[8]
पश्यति[9] ।" [बृहदा० उ० ४।४।१९] इति । न[10] चाभेदप्रतिपादका-
म्नायस्या[11]ऽध्यक्षबाधा; तस्याप्यभेदग्राहकत्वेनैव प्रवृत्तेः । तदुक्तम्— ५

"आहुर्विधातृ[12] प्रत्यक्षं न निषेद्धृ[13] विपश्चितः ।
नैकत्वे आगमस्तेन[14] प्रत्यक्षेण प्रबाध्यते ॥" [ ]

किञ्च[2], अर्थानां भेदो देशभेदात्, कालभेदात्, आकारभेदाद्वा
स्यात्? न तावद्देशभेदात्; स्वतो[15]ऽभिन्नस्याऽन्यभेदेऽपि भेदानु-
पपत्तेः[16] । नह्यन्यभेदो[17]ऽन्यत्र संक्रामति । कथं च देशस्य भेदः? १०
अन्यदेशभेदाच्चेदनवस्था । स्वतश्चेत्[18]; तर्हि भावभेदो[19]ऽपि स्वत
एवास्तु किं देशभेदाद्भेद[20]कल्पनया? तन्न देशभेदाद्वस्तुभेदः ।
नापि कालभेदात्; तद्भेदस्यैवाध्यक्षतोऽप्रसिद्धेः । तद्धि सन्निहितं
वस्तुमात्रमेवाधिगच्छति नातीतादिकालभेदं तद्गतार्थभेदं वा
आकारभेदोऽप्यर्थानां भेदको व्यतिरिक्तप्रमाणात्प्रतिभाति, स्वतो १५
वा? न तावद् व्यतिरिक्तप्रमाणात्; तस्य नील[21]सुखा[22]दिव्यतिरिक्त[23]-
स्वरूपस्याप्रतिभासमानत्वाद् । अथाहंप्रत्यये बोधात्मा तद्[24]ग्राहको-

---

१ कौलिकः (कीटविशेषः) । २ लालारूपतन्तूनाम् । ३ वटः । ४ तथा । ५ यमात् । ६ पुरुषः । ७ ब्रह्मणि । ८ भेदमिव । ९ ब्रह्माणं । १० किञ्च । ११ आगमस्य । १२ विधायकं सन्मात्रग्राहकमित्यर्थः । १३ निषेधकं भेदग्राहक-मित्यर्थः । १४ कारणेन । १५ स्वरूपेण । १६ स्वतोऽभिन्नस्य भास्करस्य यथा देशभेदाद्भेदो न घटते तथा पदार्थानामिति भावः । १७ अन्यस्य देशस्य भेदोऽभिन्ने सूर्ये न संक्रामति । १८ अनवस्थापरिहारार्थं । १९ अर्थे । २० देशभेदादिति पदं नास्ति च क्वचिद्ग्रन्थे । २१ बहिर्वस्तु । २२ अन्तर्वस्तु । २३ भिन्न । २४ आकारलक्षणभेद ।

---

1 "यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवन्ति । यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात् संभवतीह विश्वम् ॥" मुण्डकोप० १।१।७ "स यथोर्णनाभिः तन्तूनुच्चरेत्, यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेव अस्मादात्मनः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति···" बृहदा० २।१।२० "यस्तूर्ण-नाभ इव तन्तुभिः प्रधानजैः स्वभावतः । देव एकः स्वयमावृणोति स नो दधातु ब्रह्माऽव्ययम् ॥" श्वेताश्व० ६।१० "ऊर्णनाभिर्यथा तन्तून्···" ब्राह्म० ३ । "ऊर्णनाभीव तन्तुना···" क्षुर० ९ । "ऊर्णनाभो मर्कटकः" तत्त्वसं० पं० ।

2 "यतो भेदः प्रत्यक्षप्रतीतिविषयत्वेनाभ्युपगम्यमानः किं देशभेदादभ्युपगम्यते, आहोस्वित् कालभेदात्, उत आकारभेदात्?" सन्मति० टी० पृ० २७३ । स्या० रत्ना० पृ० १९२ ।

ऽवसीयते; न; तत्रापि शुद्धबोधस्याप्रतिभासनात्। स खलु 'अहं सुखी दुःखी स्थूलः कृशो वा' इत्यादिरूपतया सुखादि शरीरं चावलम्बमानोऽनुभूयते न पुनस्तद्व्यतिरिक्तं बोध[1]स्वरूपम्। स्वतश्चाकाराणां भेदसंवेदने स्वप्रकाशनियत[2]त्वप्रसङ्गः, तथा चान्यो[3]ऽन्यासंवेदनात्कुतः स्वतोऽप्याकारभेदसंवित्तिः।

अथैकरूपब्रह्मणो विद्यास्वभावत्वे तदर्थानां शास्त्राणां प्रवृत्तीनां[4] च वैयर्थ्यं निवर्त्य[5]प्राप्त[6]व्यस्वभावाभावात्। विद्यास्वभावत्वे चासत्यत्वप्रसङ्गः; तथाच "सत्यं ज्ञानमनन्तं ब्रह्म" [तैत्त० २।१] इत्यस्य[7] विरोधः; तदप्यसङ्गतम्; विद्यास्वभावत्वेऽप्यस्य शास्त्रादीनां वैयर्थ्यासंभवात् अविद्याव्यापारनिवर्त्तनफलत्वात्तेषाम्। यत एव चाविद्या ब्रह्मणोऽर्थान्तर[8]भूता तत्त्वतो[9] नास्त्यत एवासौ निवर्त्यते, तत्त्वतस्तस्याः सद्भावे हि न कश्चिन्निवर्त्तयितुं शक्नुयाद् ब्रह्मवत्। सर्वै[10]रेव चातात्त्विकानाद्यविद्योच्छेदार्थो मुमुक्षूणां[11] प्रयत्नोऽभ्युपगतः। न चानादि[12]त्वेनाविद्योच्छेदासम्भवः; प्रागभावे[13]नाऽनेकान्तात्। तत्त्वज्ञानप्रागभावरूपैव चाविद्या तत्त्वज्ञानलक्षणविद्योत्पत्तौ व्यावर्तत एव घटोत्पत्तौ तत्प्रागभाववत्। भिन्नाऽभिन्ना[14]दिविकल्पस्य च[15] वस्तुविषयत्वात् अवस्तुभूताऽविद्यायामप्रवृत्तिरेव सैवेयमविद्या माया मिथ्याप्रतिभास इति।

न चात्म[16][1]श्रवणमनन[17]ध्यानादीनां भेदरूपतयाऽविद्यास्वभावत्वात्कथं विद्याप्राप्तिहेतुत्वमित्यभिधातव्यम्? यथैव हि रजःसंपर्ककलुषोदके द्रव्यविशेषचूर्णं रजःप्रक्षिप्तं रजोऽन्तराणि प्रशमयत्स्वयमपि प्रशाम्यमानं स्वच्छां स्वरूपावस्थामुपनयति, यथा वा विषं विषान्तरं शमयति स्वयं च शाम्यति, एवमात्मश्रवणादिभिर्भेदाभि[18]निवेशोच्छेदात्, स्वगतेऽपि भेदे समुच्छिन्ने[19] स्वरूपे[20] संसारी समव-

१ प्रमाणं। २ पदार्थाः स्वप्रकाशनियताः। ३ भा (तृतीया)। ४ अनुष्ठानानां। ५ अविद्या। ६ विद्या। ७ ग्रन्थस्य। ८ भिन्ना। ९ परमार्थतः। १० वादिभिः। ११ मोक्षार्थिनां। १२ यथा गगनस्य। १३ अनादिना। १४ उभय। १५ किञ्च। १६ स्वरूप। १७ श्रद्धान। १८ दुराग्रह। १९ सति। २० एकत्वे।

1 "न च कर्माऽविद्यात्मकं कथमविद्यामुच्छिनत्ति, कर्मणो वा तदुच्छेदकस्य कुत उच्छेद इति वाच्यम्; सजातीयस्वपरविरोधिनां भावानां बहुलमुपलब्धेः। यथा पयः पयोऽन्तरं जरयति स्वयं च जीर्यति, यथा विषं विषान्तरं शमयति स्वयं च शाम्यति, यथा वा कतकरजो रजोन्तराविले पाथसि प्रक्षिप्तं रजोन्तराणि भिन्दत् स्वयमपि भिद्यमानमनाविलं पाथः करोति एवं कर्म अविद्यात्मकमपि अविद्यान्तराण्यपगमयत् स्वयमप्यपगच्छतीति।" ब्रह्मसू० शां० भा० भामती पृ० ३२।

तिष्ठते । अव[१]च्छेदकयविद्याव्यावृत्तौ हि परमात्मैकस्वरूपताव-स्थितेः घ[२]टाद्यवच्छेकभेदव्यावृत्तौ व्योम्नः शुद्धाकाशतावत् ।

न चा[1]द्वैते सुखदुःखबन्धमोक्षादिभेदव्यवस्थानुपपन्ना; स[३]मा-रोपितादपि भेदात्तद्भेदव्यवस्थोपपत्तेः, यथा द्वैति[४]नां 'शिरसि मे वेदना पादे मे वेदना' इत्यात्मनः समारोपितभेदनिमित्ता दुःखादिभेदव्यवस्था । पादादीनामेव तद्वेदनाधिकरणत्वात्तेषां च भेदात्तद् व्यवस्था युक्तेत्यप्ययुक्तम्; यतस्तेषामज्ञत्वेन भोक्तृत्वा-योगात् । भोक्तृत्वे वा चार्वाकमतानुषङ्गः । तदेवमेकत्वस्य प्रत्य-क्षानुमानागमप्रमितरूपत्वात्सिद्धं ब्रह्माऽद्वैतं तत्त्वमिति ॥ छ ॥

अत्र प्रतिविधीयते । किं[2] भेदस्य प्रमाणबाधितत्वादभेदः [६]साध्यते, अभेदे साधकप्रमाणसद्भावाद्वा ? तत्राद्यविकल्पोऽयुक्तः; प्रत्यक्षा[७]देर्भे[८]दानुकूलतया[९] तद्बाधकत्वायोगात् । न खलु भेदमन्त-रेण प्रमाणेत[१०]रव्यवस्थापि सम्भाव्यते । द्वितीयपक्षोऽप्ययुक्तः; भेदमन्तरेण साध्यसाधकभावस्यैवासम्भवात् । न चाभेदसाधकं किञ्चित्प्रमाणमस्ति ।

यच्चोक्तम्-"अ[3]विकल्पकाध्यक्षेणैकत्वमेवावमीयते" तत्र किमे-कव्यक्तिगतम्, अनेकव्यक्तिगतम्, व्यक्तिमात्रगतं वा तत्त्वेन प्रतीयते ? एकव्यक्तिगतं चेत्; तत्किं सा[११]धारणम्, असाधारणं वा ? न तावत्साधारणम्; 'एकव्यक्तिगतं साधारणं च' इति विप्रतिषे[१२]धात् । असाधारणं चेत्; कथं नातो भेदसिद्धिः असा-[१३]धारणस्वरूपलक्षणत्वाद्भेदस्य । अथानेकव्यक्तिगतं स[१४]त्तासामान्य-

१ घटे पटस्य निषेधकः भेदोत्पादक इत्यर्थः । २ घटाकाशपटाकाश । ३ देव-दत्तादेर्भावात् । कल्पितात् । ४ नैयायिकादीनां । ५ अन्यथा । ६ परेण भट्टेन । ७ अनुमानागमौ । ८ ग्राहक । ९ प्रवर्तमानत्वात् इति शेषः । १० तदाभास । ११ सामान्य । १२ विरोधात् । १३ विशेष । १४ इदं सदिदं सत् ।

1 "-एकस्यापि जीवात्मन उपाधिभेदात् सुखदुःखानुभवो दृश्यते पादे मे वेदना, शिरसि मे सुखं वेदनेति-" न्यायमं० पृ० ५२८ । स्या० रत्ना० पृ० १९३ ।

2 "तथाहि भेदस्य प्रमाणबाधितत्वात् किमयमभेदाभ्युपगमो भवतामुतस्विदभेदस्यैव प्रमाणसिद्धत्वादिति" न्यायमं० पृ० ५२८ ।

"किं भेदस्य प्रमाणबाधितत्वादेकत्वमुच्यते, आहोस्विद् भेदे प्रमाणसद्भावात् ?" सन्मति० टी० पृ० २८५ ।

3 "एकव्यक्तिगतं किं वाऽनेकव्यक्तिसमाश्रितम् ।
व्यक्तिमात्रगतं यद्वा तदेकत्वं प्रतीयते ॥" स्या० रत्ना० पृ० १९१ ।

रूपमेकत्वं प्रत्यक्षग्राह्यमित्युच्यते[1]; तत्किं व्यक्तयधिकरणतया[2] प्रतिभाति, अनधिकरणतया[3] वा? प्रथमपक्षे भेदप्रसङ्गः 'व्यक्तिरधिकरणं तदाधेयं[4] च सत्तासामान्यम्' इति, अयमेव हि भेदः। द्वितीयपक्षे-व्यक्तिग्रहणमन्तरेणाप्यन्तराले[5] तत्प्रतिभासप्रसङ्गः।
५ तथा[6] किमेकव्यक्तिग्रहणद्वारेण तत्प्रतीयते, सकलव्यक्तिग्रहणद्वारेण वा? प्रथमपक्षे विरोधः, एकाकारता ह्यनेकव्यक्तिगतमेकं रूपम्, तच्चैकस्मिन् व्यक्तिस्वरूपे प्रतिभातेऽप्यनेकव्यक्तयनुयायितया कथं प्रतिभासेत? अथ सकलव्यक्तिप्रतिपत्तिद्वारेण तत्प्रतीयते; तदा तस्याऽप्रतिपत्तिरेवाखिलव्यक्तीनां ग्रहणासम्भवात्। भेदसिद्धि-
१० प्रसङ्गश्च-अखिलव्यक्तीनां विशेषणतया एकत्वस्य च विशेष्यत्वेन, एकत्वस्य वा विशेषणतया तासां च विशेष्यत्वेन प्रतिभासनात्। तथा[7] तद्व्यक्तिभ्यस्तद्भिन्नम्, अभिन्नं वा? यद्यभिन्नम्; तर्हि व्यक्तिरूपतानुषङ्गोऽस्य[8]। न च व्यक्तिर्व्यक्तयन्तरमन्वेतीति कथं सकलव्यक्तयनुयायित्वमेकत्वस्य। अथार्थान्तरम्[9]; कथं नानात्वा-
१५ ऽप्रसिद्धिः? यथा चानुगतप्रत्ययजनकत्वेनैकत्वं[10] व्यक्तिषु कल्प्यते[11] तथा व्यावृत्तप्रत्ययजनकत्वेनानेकत्वमप्यविशेषात्[12][13]। तच्चैकत्वं नानात्वमन्तरेणावकाशं लभते। प्रयोगः विवादाध्यासितमेकत्वं परमार्थसन्नानात्वाविनाभावि एकान्तैकत्वरूपतयाऽनुपलभ्यमा-[14] नत्वात्, घटादिभेदाविनाभूतमृद्द्रव्यैकत्ववत्। एतेन[15] व्यक्तिमात्र-
२० गतमप्येकत्वं प्रत्युक्तम्[16], एकानेकव्यक्तिव्यतिरेकेण व्यक्तिमात्रस्यानुपपत्तेः।

यच्चोक्तम्[17]-"भेदस्यान्यापेक्षतया[18][19] कल्पनाविषयत्वम्" तदप्युक्तिमात्रम्; एकत्वस्यैवान्यापेक्षतया[20] कल्पनाविषयत्वसम्भवात्[21][22]। तद्ध्यनेकव्यक्तयाश्रितम्, भेदस्तु प्रतिनियतव्यक्तिस्वरूपोऽध्यक्षाव-
२५ सेयः। अथैकत्वं प्रत्यक्षेणैव प्रतिपन्नम्, अन्यापेक्षया तु कल्पना-[23]

१ परेण भवता। २ वसः। ३ वसः। ४ तस्यां व्यक्तावाधीयते आरोप्यते इति तदाधेयं। ५ प्रतिपत्तृव्यक्तयोर्मध्ये। ६ किञ्च। ७ किञ्च। ८ व्यक्तिस्वरूपवत्। ९ भिन्नं। १० इदं सदिदं सदिति। ११ समर्थ्यते। १२ पटाद् घटो व्यावृत्त इति। १३ कल्प्यताम्। १४ सर्वथा। १५ विकल्पद्वयनिराकरणपरेण ग्रन्थेन। १६ निराकृतम्। १७ परेण। १८ पटस्य। १९ भेद। २० प्रमीयमानत्वात्। २१ विकल्प। २२ एकत्वं। २३ घटः सन् पटः सन्नित्यादिज्ञानेन।

1 "यदपि गदितं भेदः पुनः परापेक्षतया प्रतीयते इत्यादि, तदपि नोपपन्नम्; एकत्वमपि हि परापेक्षतया प्रतीयते, ततश्चैतत्प्रत्ययोऽपि कल्पनाप्रत्ययरूपत्वेनाप्रमाणत्वात् कथमिवैकत्वं साधयेत्?" स्या० रत्ना० पृ० २००।

ज्ञानेनानुयायिरूप[1]तया व्यवह्रियते, तर्हि भेदो[2]ऽप्यध्यक्षेण प्रतिपन्नो[3]ऽन्यापेक्षया विकल्पज्ञानेन व्यावृत्तिरूपतया व्यवह्रियते इत्यप्यस्तु।

का चेयं कल्पना नाम-ज्ञानस्य स्मरणानन्तरभावित्वम्, शब्दाकारानुविद्धत्वं वा स्यात्, जात्याद्युल्लेखो वा, असदर्थविषयत्वं ५ वा, अन्यापेक्षतयाऽर्थस्वरूपावधारणं वा, उपचारमात्रं वा प्रकारान्तराऽसम्भवात्? न तावदाद्यविकल्पः; अभेदज्ञानस्यापि[4] स्मरणानन्तरमुपलम्भेन[6] कल्पनात्वप्रसङ्गात्। शब्दाकारानुविद्धत्वं च ज्ञाने प्रागेव[7] प्रतिविहितम्। [8]ननु सकलो भेदप्रतिभासोऽभिलापपूर्वकस्तदभावे भेदप्रतिभासस्याप्यभावः स्यात्[9]; तन्न; विकल्पाभि- १० लापयोः कार्यकारणभावस्य कृतोत्तरत्वात्[10]। अस्तु वासौ, तथापि किं शब्दजनितो भेदप्रतिभासः, तज्जनितो वा शब्दः? प्रथमपक्षे किं शब्दादेव[11] भेदप्रतिभासः, ततोऽसौ भवत्येवेति[12] वा? शब्दादेव भेदप्रतिभासाभ्युपगमे-प्रथमाक्षसन्निपातानन्तरं[13] चित्रपट्यादिज्ञा[14]नस्य भेदविषयस्यानुत्पत्तिप्रसङ्गः[15]; निर्विकल्पकानुभवानन्तरं १५ [16]संकेतस्मरणविवक्षाप्रयत्नताल्वादिपरिस्पन्दक्रमेणोपजायमानशब्दस्याविकल्पकप्रथमप्रत्ययावस्थायामभावात्[17][18]। शब्दादनेकत्व[19]प्रतिभासो भवत्येवेत्यप्ययुक्तमुक्तम्; 'एकं ब्रह्मणो रूपम्' इत्यादिशब्दस्य भेदप्रत्यय[20]जनकत्वे सति आगमात्तस्यैकत्वप्रतिपत्तेरभावानुषङ्गात्। भेदप्रतिभासाच्छब्दे(ब्दोऽ)स्तीत्यभ्युपगते च-अन्यो- २० न्याश्रयत्वम्—शब्दाद्भेदप्रतिभासः, भेदप्रतिभासाच्छब्द इति। 'घटोयं पटोयम्' इत्यादिभेदप्रतिभासस्य जात्याद्युल्लेखित्वात्कल्पनात्वे-अभेदज्ञानस्यापि कल्पनात्वानुषङ्गः; तस्यापि सत्ता[21]दि[22]सामान्योल्लेखित्वात्[23]। असदर्थविषयत्वं च भेदप्रतिभासस्यासिद्धम्; अर्थक्रिया[24]कारिणो वस्तुभूतार्थस्य तत्र प्रतिभासनात्। विसंवादित्वं २५

१ अनुस्यूतरूपतया। २ घटस्य। ३ पट। ४ विसदृश। ५ सर्वं खल्विदं ब्रह्मेत्यादिरूपस्य सोऽहमित्यादेर्वा। ६ प्रतीत्या। ७ सविकल्पकसिद्धौ शब्दाद्वैते च। ८ परः। ९ इति चेत्। १० सविकल्पकसिद्धौ। ११ पूर्वावधारणम्। १२ उत्तरावधारणम्। १३ परेण। १४ चित्राणां पटानां समाहारः चित्रपटी। १५ भेदो विषयो यस्य। १६ नीलादि। १७ वक्तुमिच्छा। १८ उत्साह। १९ भेद। २० प्रतिभास। २१ इदं सदिदं सत्। २२ आत्मत्व। २३ परामर्शित्वात्। २४ स्नानपानादि।

1 "किंचान्यापेक्षया भवनमेव भेदप्रत्ययस्य कल्पनात्वं स्यात्, किंवा स्मरणसमनन्तरभावित्वम्, यद्वा शब्दानुविद्धत्वम्, उत जात्याद्युल्लेखित्वम्, अथासदर्थविषयत्वम्, उपचाररूपत्वं वा?" स्या० रत्ना० पृ० २०१।

बाध्यमानत्वं च कल्पनालक्षणमेतेन[1] प्रत्युक्तम्; तस्यासदर्थवि-
षयत्वाद्[2]र्थान्तरत्वा[3]ऽसम्भवात् । अन्यापेक्षतयार्थस्वरूपावधारणं
चानन्तरमेव प्रत्याख्यातम्; यतो[4] व्यवहार एवान्यापेक्षतया प्रवर्तते
न स्वरूपावधारणम् । नापि भेदप्रतिभासस्योपचाररूपं कल्पना-
५ त्वम्; मुख्यासम्भवे तस्याप्यदर्शनान्माणवके सिंहाद्युपचारवत् ।
न चाभेदवादिनो मुख्यं भेदाभ्युपगमोस्त्यपसिद्धान्तप्रसङ्गात् ।

यच्चानुमानादप्यात्माद्वैतसिद्धिरित्युक्तम्; तत्र स्वतःप्रतिभास-
मानत्वं हेतुः, परतो वा । स्वतश्चेत्; असिद्धिः । परतश्चेत्; विरुद्धो-
ऽद्वैते साध्ये द्वैतप्रसाधनात् । 'घटः प्रतिभासते' इत्यादिप्रति-
१० भाससामानाधिकरण्यं तु विषये विषयिधर्मस्योपचारात्, न पुनः
प्रतिभासात्मकत्वात् । प्रतिभासनं हि विषयिणो ज्ञानस्य धर्मः स
विषये घटादावध्यारोप्यते । तदध्यारोपनिमित्तं च प्रतिभासन-
क्रियाधिकरणत्वम् । तथा च 'अर्थमहं वेद्मि' इत्यन्तःप्रकाशमा-
नानन्तपर्यायाऽचेतनद्रव्यवद्बहिःप्रकाशमानानन्तपर्यायाऽचेतनद्र-
१५ व्यमपि प्रतिपत्तव्यम् । 'सर्वं वै खल्विदं ब्रह्म' इत्याद्यागमोपि नाद्वैत-
प्रसाधकः; अभेदे प्रतिपाद्यप्रतिपादकभावस्यैवासम्भवात् । न
चागमप्रामाण्यवादिना अर्थवादस्य प्रामाण्यमभिप्रेतमतिप्रसङ्गात् ।
आत्मैव हि सकललोकसर्गस्थितिप्रलयहेतुरित्यप्यसम्भाव्यम्;
अद्वैतैकान्ते कार्यकारणभावविरोधात्, तस्य द्वैताविनाभावित्वात् ।
२० निराकृतं च नित्यस्य कार्यकारित्वं शब्दाद्वैतविचारप्रक्रमे ।

किमर्थं चासौ जगद्वैचित्र्यं विदधाति? न तावद्व्यसनितया;

१ असदर्थविषयत्वनिराकरणेन । २ अपादाने का (पञ्चमी) । ३ एकत्वप्रतिभास । ४ घट । ५ पट । ६ कथं । ७ किन्तु स्वापेक्षतया एव प्रतिभासते । ८ वा । ९ भेदस्य । १० अग्नि । ११ अन्यथा । १२ परेण । १३ पदार्थानां । १४ पर-वाद्यसिद्धो हेतुः । नहि पदार्थाः स्वत एव प्रतिभासन्ते । १५ अन्यस्मात् । १६ ईप् । १७ स्वरूपस्य । १८ विषयस्य । परेण । १९ परेण । २० प्रशंसारूपस्य । २१ अलाबूनि निमज्जन्ती(?) त्यादेरपि प्रमाणताप्रसङ्गः । सारमिलितस्य प्रशंसावचनस्य अलाबुषु सद्भावात् (? ग्रावाणः प्लवन्ते अन्धो मणिमविन्दत्) । २२ किञ्च । २३ ब्रह्मा । २४ फलं विना प्रवृत्तिर्व्यसनम् ।

1 "तत्र स्वतः प्रतिभासमानत्वं हेतुः, परतो वा?" स्या० रत्ना० पृ० १९४ । प्रमेयरत्नमा० २।१२ ।

2 "जगच्चाऽसृजतस्तस्य किन्नामेष्टं न सिध्यति ॥ ५४ ॥
प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते ।
एवमेव प्रवृत्तिश्चेच्चैतन्येनास्य किं भवेत् ॥ ५५ ॥" मी० श्लो० पृ० ६५३ । सन्मति० टी० पृ० ७१५ । स्या० रत्ना० पृ० १९८ । प्रमेयरत्न० २।१२ ।

अप्रेक्षाकारित्वप्रसङ्गात्, प्रेक्षाकारिप्रवृत्तेः प्रयोजनवत्तया व्याप्तत्वात्। कृपया[1] परोपकारार्थं तत्[2] करोतीति चेत्; न; तद्व्यतिरेकेण परस्या[3]ऽसत्त्वात्। सत्त्वे वा-नारकादिदुःखितप्राणिविधानं न स्यात्, एकान्तसुखितमेवाखिलं जगज्जनयेत्[4]। किञ्च, सृष्टेः प्रागनुकम्प्यप्राण्यभावात् किमालम्ब्य तस्या[5]नुकम्पा प्रवर्त्तते येनानुकम्पावशादयं स्रष्टा कल्प्येत? अनुकम्पावशाच्चा[6]स्य[7] प्रवृत्तौ देवमनुष्याणां सदाभ्युदययोगिनां प्रलयविधानविरोधः, दुःखितप्राणिनामेव प्रलयविधानानुषङ्गात्। प्राण्यदृष्टा[8]पेक्षोऽसौ[9] सुखदुःखसमन्वितं जगत् जनयतीत्यप्यसङ्गतम्; स्वातन्त्र्यव्याघातानुषङ्गात्। समर्थस्वभावस्यासमर्थस्वभावस्य वा नित्यैकरूपस्य वस्तुनोऽन्यापेक्षाऽयोगाच्च। अदृष्टवशाच्च[10] जगद्वैचित्र्यसम्भवे-किमनेनान्तर्गडुना पीडाकारिणा? अदृष्टापेक्षा चास्या[11]नुपपन्ना, किं त्ववधीरणमेवोपपन्नम्, अन्यथा कृपालुत्वव्याघातप्रसङ्गः। न हि कृपालवः[12] परदुःखं तद्धेतुं वाऽन्विच्छन्ति, परदुःखतत्कारणवियोगवाञ्छयैव प्रवृत्तेः।

१ मूर्खत्व। २ ब्रह्म। ३ जगतः। ४ कुत्सितसृष्टेः किं फलम्। ५ ब्रह्मणः। ६ किञ्च। ७ ब्रह्मणः। ८ पुण्यपाप। ९ ब्रह्मा। १० ब्रह्मणः। ११ अवशा। १२ नराः।

1 "अभावाच्चानुकम्प्यानां नानुकम्पा प्रवर्त्तते।
सृजेच्च शुभमेवैकमनुकम्पाप्रयोजितः॥ ५२॥ मी० श्लो० पृ० ६५२।
"अथानुकम्पया कुर्यादेकान्तसुखितं जगत्॥ १५६॥
आधिदारिद्र्यशोकादिविविधायासपीडितम्।
जने तु सृजतस्तस्य कानुकम्पा प्रतीयते॥ १५७॥
सृष्टेः प्रागनुकम्प्यानामसत्त्वे नोपपद्यते।
अनुकम्पापि यद्योगाद्धाताऽयं परिकल्प्यते॥ १५८॥
न चायं प्रलयं कुर्यात्सदाभ्युदययोगिनाम्।" तत्त्वसं० पृ० ७६। सन्मति० टी० पृ० ७१६। स्या० रत्ना० पृ० १९८। प्रमेयरत्न० २।१२।

2 "अथाऽशुभाद्विना सृष्टिः स्थितिर्वा नोपपद्यते।
आत्माधीनाभ्युपाये हि भवेत्किन्नाम दुष्करम्॥ ५३॥
तथाचापेक्षमाणस्य स्वातन्त्र्यं प्रतिहन्यते।" मी० श्लो० पृ० ६५३।
"तददृष्टव्यपेक्षायां स्वातन्त्र्यमवहीयते॥ १५९॥
पीडाहेतुमदृष्टं च किमर्थं स व्यपेक्षते।
उपेक्षैव पुनस्तत्र दयायोगेऽस्य युज्यते॥ १६०॥ तत्त्वसं० पृ० ७७। सन्मति० टी० पृ० ७१६। स्या० रत्ना० पृ० १९९। प्रमेयरत्न० २।१२।

ननु यथोर्णनाभो जालादिविधाने स्वभावतः प्रवर्त्तते, तथात्मा जगद्विधाने इत्यप्यसत्; ऊर्णनाभो हि न स्वभावतः प्रवर्त्तते। किं तर्हि? प्राणिभक्षणलाम्पट्यात्प्रतिनियतहेतुसम्भूततया कादाचित्कात्। 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति ५ निन्दावादोप्यनुपपन्नः; सकलप्राणिनां भेदग्राहकत्वेनैवाखिलप्रमाणानां प्रवृत्तिप्रतीतेः।

यच्चोक्तम्-'आहुर्विधातृप्रत्यक्षम्' इत्यादि; तत्र किमिदं प्रत्यक्षस्य विधातृत्वं नाम-सत्तामात्रावबोधः, असाधारणवस्तुस्वरूपपरिच्छेदो वा? प्रथमपक्षोऽयुक्तः, नित्यनिरंशव्यापिनो विशेष- १० निरपेक्षस्य सत्तामात्रस्य स्वप्नेप्यप्रतीतेः खरविषाणवत्। द्वितीयपक्षे तु-कथं नाद्वैतप्रतिपादकागमस्याध्यक्षबाधा? भावभेदग्राहकत्वेनैवास्य प्रवृत्तेः, अन्यथाऽसाधारणवस्तुस्वरूपपरिच्छेदकत्वविरोधः।

यच्च भेदो देशभेदात्स्यादित्याद्युक्तम्; तदप्यसङ्गतम्; सर्वत्रा- १५ कारभेदस्यैवार्थभेदकत्वोपपत्तेः। यत्रापि देशकालभेदस्तत्रापि तद्रूपतयाऽऽकारभेद एवोपलक्ष्यते। स चाकारभेदः स्वसामग्रीतो जातोऽहमहमिकया प्रतीयमानेनात्मना प्रतीयते। प्रसाधयिष्यते

---

१ ब्रह्माद्वैतवादी। २ क्षुधा। ३ परेण। ४ विसदृश। ५ पदार्थे। ६ प्रवृत्त्यभावे। ७ परेण। ८ बहिरन्तर्वा। ९ सास्नादिमत्त्वादि। १० गवादि। ११ वस्तुनि। १२ वस्तुनि।

---

1 "प्राणिनां भक्षणाच्चापि तस्य लाला प्रवर्त्तते।" मी० श्लो० पृ० ६५२।
"प्रकृत्यैवांशुहेतुत्वमूर्णनाभेऽपि नेष्यते।
प्राणिभक्षणलाम्पट्याल्लालाजालं करोति यत्॥ १६८॥" तत्त्वसं० पृ० ७९, न्यायकुमुदचं० प्रत्य० परि०, सन्मति० टी० पृ० ७१७। स्या० रत्ना० पृ० १९९। प्रमेयरत्नमा० २।१२।

2 "यदप्युक्तम्-आहुर्विधातृप्रत्यक्षमिति, तदप्यसाधु; विधातृ इति कोऽर्थः? इदमपि वस्तुस्वरूपं गृह्णाति नान्यरूपं निषेधति प्रत्यक्षमिति चेन्नैवम्, अन्यरूपनिषेधमन्तरेण तत्स्वरूपपरिच्छेदस्याप्यसम्पत्तेः। पीतादिव्यवच्छिन्नं हि नीलं नीलमिति गृहीतं भवति नेतरथा।" न्यायमं० पृ० ५२९।

"यतो विधातृत्वं किं प्रत्यक्षस्य भावस्वरूपग्राहित्वम्, आहोस्विदन्यत्? सन्मति० टी० पृ० २८५।

"तत्र किमिदं प्रत्यक्षस्य विधातृत्वं नाम सत्तामात्रावबोधः, असाधारणस्वरूपपरिच्छेदो वा?" स्या० रत्ना० पृ० २०१।

3 "यदपि-देशकालाकारभेदैर्भेदो न प्रत्यक्षादिभिः प्रतीयते इत्याद्युक्तम्; अभेदप्रतिपत्तावप्यस्य समानत्वात्।" सन्मति० टी० पृ० २८६। स्या० रत्ना० पृ० २०३।

चात्मा सुखशरीरादिव्यतिरिक्तो जीवसिद्धिप्रघट्टके। कथं चाभेदसिद्धिस्तत्प्रतिपत्तावप्यस्य समानत्वात्; तथाहि—अभेदोऽर्थानां देशाभेदात्, कालाभेदात्, आकाराभेदाद्वा स्यात्? यदि देशाभेदात्; तदा देशस्यापि कुतोऽभेदः? अन्यदेशाभेदाच्चेदनवस्था। स्वतश्चेदर्थानामपि स्वत एवाभेदोऽस्तु किं देशाभेदादभेदकल्पनया? इत्यादि[2]सर्वमत्रापि योजनीयम्। तस्मात्सामान्यस्य विशेषस्य वा स्व[3]भावतोऽभेदो भेदो वाभ्युपगन्तव्यः। 5

यच्चेदमुक्तम्[4]-'यत एवाविद्या ब्रह्मणोऽर्थान्तरभूता तत्त्वतो नास्त्यत एवासौ निवर्त्यते' इत्यादि; तदप्यसारम्; यतो यद्यवस्तुसत्यविद्या कथमेषा प्रयत्ननिवर्तनीया स्यात्? न ह्यवस्तुसन्तः शशशृङ्गादयो यत्ननिवर्त्तनीयत्वमनुभवन्तो दृष्टाः। न चास्यास्तत्त्वतः सद्भावे निवृत्त्यसम्भवः; घटादीनां सतामेव निवृत्तिप्रतीतेः। न चाविद्यानिर्मितत्वेन घटग्रामारामादीनामपि तत्त्वतोऽसत्त्वम्; अन्योऽन्याश्रयानुषङ्गात्-अविद्यानिर्मितत्वे हि घटादीनां तत्त्वतोऽसत्त्वम्, तस्माच्चाविद्यानिर्मितत्वमिति। अभेदस्य विद्यानिर्मितत्वेन परमार्थसत्त्वेपि अन्योन्याश्रयो द्रष्टव्यः। न चानाद्यऽविद्योच्छेदे प्रागभावो दृष्टान्तः; वस्तुव्यतिरिक्तस्यानादेस्तुच्छस्वभावस्यास्याऽसिद्धेः। 10 15

यदपि-'तत्त्वज्ञानप्रागभावरूपैवाविद्या' इत्याद्यभिहितम्; तदप्यभिधानमात्रम्; प्रागभावरूपत्वे तस्या भेदज्ञानलक्षणकार्योत्पादकत्वाभावानुषङ्गात्, प्रागभावस्य कार्योत्पत्तौ सामर्थ्यासम्भवात्। 20

---

१ विचारस्य। २ अभेदपक्षे। ३ स्वरूपेण। ४ परेण। ५ आत्मश्रवणमननादि। ६ भेदस्याविद्याहेतुत्वे अभेदस्य विद्याहेतुत्वमायातं तत्रापि दूषणम्। ७ वचन। ८ अभावरूपत्वात्खरविषाणवत्। ९ प्रागभावः स्यात्कार्योत्पादकत्वं च स्यादिति सन्दिग्धानैकान्तिकत्वे सत्याह।

---

1 "अनादिना प्रबन्धेन प्रवृत्तावरणक्षमा। यत्नोच्छेद्याप्यविद्येयमसती कथ्यते कथम्? अस्तित्वे कः एनामुच्छिन्द्यादिति चेत् कातरसन्त्रासोऽयम् सतामेव हि वृक्षादीनामुच्छेदो दृश्यते नासतां शशविषाणादीनाम्। तदिदमुच्छेद्यत्वादविद्या नित्या माभूद सती तु भवत्येव।" न्यायमं० पृ० ५२९। सन्मति० टी० पृ० २९५। स्या० रत्ना० पृ० २०३।

2 "न च तत्त्वाग्रहणमात्रमविद्या, संशयविपर्ययावप्यविद्यैव, तौ च भावस्वभावत्वात्कथमसन्तौ भवेताम्? ग्रहणप्रागभावोऽपि नाऽसन्निति शक्यते वक्तुम्; अभावस्याप्यस्तित्वसमर्थनादिति सर्वथा नासत्यविद्या।

असत्त्वे च निषिद्धेऽस्यास्सत्त्वमेव बलाद्भवेत्।
सदसद्व्यतिरिक्तो हि राशिरत्यन्तदुर्लभः॥" न्यायमं० पृ० ५३०।

न हि घटप्रागभावः कार्यमुत्पादयन्दृष्टः । केवलं घटवत् प्राग-
भावविनाशमन्तरेण तत्त्वज्ञानलक्षणं कार्यमेवं नोत्पद्येत । अथ न
भेदज्ञानं तस्याः कार्यम्, किं तर्हि? भेदज्ञानस्वभावैवासौ, तन्न;
एवं सति प्रागभावस्य भावान्तरस्वभावतानुषङ्गात् । न च ज्ञानस्य
५ भेदाभेदग्रहणकृता विद्येतरव्यवस्था, संवादविसंवादकृतत्वात्तस्य
सत्येतरत्वव्यवस्थायाः । संवादश्च भेदाभेदज्ञानयोर्वस्तुभूतार्थ-
ग्राहकत्वात्तुल्य इत्युक्तम् ।

यदप्युक्तम्-'भिन्नाभिन्नादिविचारस्य च वस्तुविषयत्वात्'
इत्यादि; तत्राविद्यायाः किमवस्तुत्वाद्विचारागोचरत्वम्, विचा-
१० रागोचरत्वाद्वाऽवस्तुत्वं स्यात्? न तावद्यद्यदवस्तु तत्तद्विचार-
यितुमशक्यम्; इतरेतराभावादेरवस्तुत्वेऽपि 'इदमित्थम्' इत्या-
दिशब्दप्रतिभासलक्षणविचारविषयत्वात् । नापि विचारागोचर-
त्वेनावस्तुत्वम्; इक्षुक्षीरादिमाधुर्यतारतम्यस्य तज्जनितसुखादि-
तारतम्यस्य वा 'इदमित्थम्' इति परस्मै निर्देष्टुमशक्यत्वेपि
१५ वस्तुरूपत्वप्रसिद्धेः । किञ्च, अयं भिन्नाभिन्नादिविचारः प्रमाणम्,
अप्रमाणं वा? यदि प्रमाणम्; तेनाविषयीकृतायाः कथमविद्यायाः
सत्त्वम्? तदसत्त्वे च कथं मुमुक्षोस्तदुच्छित्तये प्रयासः फल-
वान्? अथाप्रमाणम्; कथं तर्हि तस्य वस्तुविषयत्वम्? यतो
'भिन्नाभिन्नादिविचारस्य वस्तुविषयत्वात्' इत्यभिधानं शोभेत ।

२० यच्चोक्तम्-'यथा रजोरजोन्तराणि' इत्यादि; तदप्यसमीचीनम्;
यतो बाध्यबाधकभावाभावे कथं श्रवणमननादिलक्षणाऽविद्याऽ-

---

१ अविद्याविनाशमन्तरेण । केवलं यथा घटप्रागभावो घटप्रागभावविनाशरूपकार्य-
मन्तरा घटपटादिरूपं कार्यं नोत्पादयितुमलं तथा विद्याप्रागभावरूपैवाविद्या विद्या-
प्रागभावविनाशमेव कार्यं कर्तुं समर्था न च विद्यारूपं भेदरूपं वा कार्यमुत्पादयितुं
समर्थेत्यर्थः । २ अविद्याया भेदज्ञानस्वभावत्वे । ३ भेदज्ञान । ४ विकल्पस्य ।
५ खरशृङ्गवत् । ६ इतरस्मिन्नितरस्याभावः इतरेतराभावः । यदभावे नियमेन कार्य-
स्योत्पत्तिः स प्रागभाव इतीदृशम् । ७ प्रतिपाद्याय । ८ यदि ।

---

1 "यत्पुनरविद्यैव विद्योपाय इत्यत्र दृष्टान्तपरम्परोद्घाटनं कृतं तदपि क्लेशाय
नार्थसिद्धये । सर्वत्र उपायस्य स्वरूपेण सत्त्वादसतः खपुष्पादेरुपायत्वाभावात् । रेखा-
गकारादीनां तु वर्णरूपतया सत्त्वं यद्यपि नास्ति तथापि स्वरूपतो विद्यन्त एव ।"
न्यायमं० पृ० ५३० । सन्मति० टी० पृ० २९५ ।

"यच्चोक्तं यथैव हि रजःसम्पर्ककलुषेऽम्भसि इत्यादि; तदपि फल्गु; यतो बाध्य-
बाधकभावाभावे कथं श्रवणमननादिलक्षणाविद्याऽविद्यान्तरं प्रशमयेत्?" स्या० रत्ना०
पृ० २०४ ।

विद्यां प्रशमयेत् ? बाध्यबाधकभावश्च[2] सतोरेव अहिनकुलवत्, न त्वसतोः[1] शशाश्वविषाणवत्। दैवरक्ता[3] हि किंशुकाः केन[4] रज्यन्ते नाम। विद्यमानमेव हि रजो रजोन्तरस्य स्वकार्यं[5] कुर्वतः सामर्थ्या[6]पनयन[7]द्वारेण बाधकं प्रसिद्धम्, विषद्रव्यं वा उपयुक्तविषद्रव्यसामर्थ्यापनयने चरितार्थत्वादन्नमलादिसदृशतया न कार्या[8]न्तरकरणे तत्प्रभवतीति। न च[9] भेदस्योच्छेदो घटते[10]; वस्तुस्वभावतयाऽभेदवत्तस्योच्छेत्तुमशक्तेः।

ननु स्वप्नावस्थायां भेदाभावे[11]ऽपि भेदप्रतिभासो दृष्टस्ततो न पारमार्थिको भेदस्तत्प्रतिभासो[12] वा; इत्यभेदेपि समानम्। न खलु तदा विशेष[13]स्यैवाभावो न पुनस्तद्व्यापकसामान्यस्य; अन्यथा[14] कूर्मरोमादीनामसत्त्वेपि तद्व्यापकस्य सामान्यस्य[15] सत्त्वप्रसङ्गः। कथं च स्वप्नावस्थायां भेदस्यासत्त्वम्? बाध्यमानत्वाच्चेत्; तर्हि जाग्रदवस्थायां तस्याबाध्यमानत्वात् सत्त्वमस्तु। एकत्रा[16]स्य बाध्यमानत्वोपलम्भात्सर्वत्रा[17]सत्त्वे च स्थाण्वादौ पुरुषप्रत्ययस्य बाध्यमानत्वेनासत्यतोपलम्भात् आत्मन्यप्यसत्यत्वप्रसङ्गः। ततो जाग्रदवस्थायां स्वप्नावस्थायां वा यत्र बाधकोदयस्तदसत्यम्, यत्र तु तदभावस्तत्सत्यमभ्युपगन्तव्यम्।

ननु बाधकेन[18] ज्ञानमपह्रियते, विषयो वा, फलं वा? न तावद् ज्ञानस्या[19]पहारो युक्तः; तस्य प्रतिभातत्वात्। नापि विषयस्य; अत एव। विषया[20]पहारश्च राज्ञां धर्मो न ज्ञानानाम्। फलस्यापि स्नानपानावगाहनादेः प्रतिभातत्वान्नापहारः। बाधक[21]मपि ज्ञानम्[22], अर्थो वा? ज्ञानं चेत् तत्किं समानविषयम्, भिन्नविषयं वा? तत्र

१ स्वपररूपश्रवणमननादिलक्षणाऽविद्ययोः। २ असत्योरविद्ययोर्बाध्यबाधकभावः स्यादित्युक्ते आह। ३ यथा दैवरक्ताः किंशुकाः केनापि न रज्यन्ते तथा असत्योरविद्ययोर्बाध्यबाधकभावः केनापि कर्तुं न शक्यत इत्यभिप्रायः। ४ न केनापि। ५ कालुष्यलक्षणं स्वकार्यं। ६ कालुष्यजननसामर्थ्यः(र्थ्यं)। ७ निराकरण। ८ मरणमूर्च्छादि। ९ किञ्च। १० अथैकत्वं प्रत्यक्षेणैव प्रतिपन्नम्। ११ घटपटादीनाम्। १२ भेदज्ञानं। १३ भेदस्य। १४ विशेषाभावे सामान्यसत्त्वं यदि। १५ रोमत्वस्य। १६ मरीचिकाचक्रे जलमिति ज्ञाने। १७ महाह्रदादौ। १८ प्रमाणेन। १९ इदं जलमिति ज्ञानस्य। २० जलादिलक्षण। २१ उत्तरम्। २२ उत्तरम्।

1 "किं पुनरत्र व्यभिचारि किमर्थः, आहो ज्ञानमिति?" न्यायवा० पृ० ३७। "अथ बाध्यमानत्वेन मिथ्यात्वमिति चेत्; किं बाध्यते अर्थः, ज्ञानम्, उभयं वा?··· अथ ज्ञानं बाध्यते; तस्यापि बाधा का? स्वरूपव्यावृत्तिरूपा, स्वरूपापह्नवरूपा, विषयापहारलक्षणा वा?" तत्त्वोप० पृ० १९–२१। स्या० रत्ना० पृ० १३९।

समा[१]नविषयस्य संवादकत्वमेव न बाधकत्वम् । न खलु प्राक्तनं घटज्ञानमुत्तरेण तद्विषयज्ञानेन बाध्यते । भिन्नविषयस्य बाधकत्वे चातिप्रसङ्गः । अर्थोऽपि प्रतिभातः, अप्रतिभातो वा बाधकः स्यात् । तत्राद्यविकल्पोऽयुक्तः; प्रतिभातो ह्यर्थः स्वज्ञानस्य सत्यतामेवावस्थापयति, यथा पटः पटज्ञानस्य । द्वितीयविकल्पेऽपि 'अप्रतिभातो बाधकश्च' इत्यन्यो[२]न्यविरोधः । न हि खरविषाणमप्रतिभातं कस्यचिद्बाधकम् । किञ्च[1], क्व[३]चित्कदाचित्कस्यचिद्बाध्यबाधकभावाभावाभ्यां सत्ये[४]तरत्वव्यव[५]स्था, सर्वत्र सर्वदा सर्वस्य वा? प्रथमपक्षे-सत्येतरत्वव्यव[६]स्थासङ्क[७]रः; मरीचिकाचक्रा[८]दौ जला[९]दिसंवेदनस्यापि क्वचित्कदाचित्कस्यचिद्बाधकस्यानुत्पत्तेः सत्यसंवेदने तूत्पत्तेः प्रतीयमानत्वात् । द्वितीयपक्षे तु-सकलदेशकालपुरुषाणां बाधकानुत्पत्त्युत्पत्त्योः कथमसर्वविदा वेदनं तत्प्रतिपत्तुः सर्ववेदित्वप्रसङ्गात्?

इत्यप्यनल्पत[१०]मोविलसित[११]म्; रजतप्रत्यय[१२]स्य शुक्तिकाप्रत्ययेनोत्तरकालभाविनैकवि[१३]षयतया बा[१४]ध्यत्वोपलम्भात् । ज्ञा[१५]नमेव हि वि[१६]परीतार्थख्या[१७]पकं बाधक[१८]मभिधीयते, प्रतिपा[१९]दितासदर्थख्या[२०]पनं तु बाध्यम् । ननु चै[२१]तद्गत[२२]सर्पस्य घृष्टिं प्रति यष्ट्यभिहननमिवाभासते, यतो रजत[२३]ज्ञानं चेदुत्पत्तिमात्रेण चरितार्थं किं[२४] तस्याऽतीतस्य मिथ्यात्वापादनलक्षणयापि बाधया? तदसत्: एतदेव हि मिथ्याज्ञानस्यातीतस्यापि बाध्यत्वम्-यदस्मि[२५]न् मिथ्यात्वापा[२६]दनम्; क्व[२७]चित्पुनः प्रवृत्तिप्रतिषेधोऽपि फलम्, अन्य[२८]था रजतज्ञानस्य बाध्यत्वासम्भवे शुक्तिकादौ प्रवृत्तिरविरता प्राप्नोति । कथं

---

१ एक । २ अप्रतिभातत्वबाधकत्वयोः । ३ विषये । ४ असत्यत्व । ५ ज्ञानस्य । ६ ज्ञानस्य । ७ एकत्रानेकेषां युगपत्प्राप्तिः सङ्करः । ८ आदिपदेन शुक्तिका । ९ रजतादि । १० अज्ञान । ११ प्रभाचन्द्रदेवः परं प्रति ब्रूते । १२ इदं रजतमिति ज्ञानस्य । १३ शुक्तिकैकविषयः । १४ रजतादि । १५ उत्तरम् । १६ शुक्तिशकले प्रतिभातरजताद्विपरीतोऽर्थः शुक्तिशकलम् । १७ शुक्तिकैकविषयख्यापकम् । १८ उत्तरज्ञानेन । १९ बोधित । २० बोधितमसदर्थख्यापन (प्रतिपादन)मसदर्थग्रहणं यस्य पूर्वज्ञानस्य । २१ बाध्यबाधकभावलक्षणम् । २२ रजतप्रत्ययस्य शुक्तिविषयप्रत्ययः उत्तरकालभावी बाधकः इति प्रतिपादनम् । २३ मिथ्याज्ञानं । २४ प्रयोजनम् । २५ प्रथमज्ञाने । २६ उत्तरज्ञानेन । २७ विषये । २८ मिथ्यात्वापादनाभावे ।

---

1 "बाधाविरहः किं सर्वपुरुषापेक्षया आहोस्वित्प्रतिपत्त्रपेक्षया?"

तत्त्वोप० पृ० ३ ।

चैवं वादिनोऽविद्याविद्ययोर्बाध्यबाधकभावः स्यात् तत्राप्युक्तविकल्पजालस्य समानत्वात्?

यच्च समारोपितादपि भेदादित्याद्युक्तम्; तदप्ययुक्तम्; आत्मनः सांशत्वे सत्येव भेदव्यवस्थोपपत्तेर्निरंशस्यान्तर्बहिर्वा वस्तुनः सर्वथाप्यप्रसिद्धेरित्यात्माद्वैताभिनिवेशं परित्यज्यान्तर्बहिश्चानेकप्रकारं वस्तु वास्तवं प्रमाणप्रसिद्धमुररीकर्त्तव्यम्। ५

ननु चाविभागबुद्धिस्वरूपव्यतिरेकेणार्थस्याप्रतीतितोऽसत्त्वाद्विज्ञप्तिमात्रमेव तत्त्वमभ्युपगन्तव्यं तद्ग्राहकं च ज्ञानं प्रमाणमिति; तन्न; यतोऽविभागस्वरूपावेदकप्रमाणसद्भावतो विज्ञप्तिमात्रं तत्त्वमभ्युपगम्यते, बहिरर्थसद्भावबाधकप्रमाणावष्टम्भेन वा? यद्याद्यः पक्षस्तत्रापि तथाभूतविज्ञप्तिमात्रं ग्राहकं (मात्रग्राहकं) प्रत्यक्षम्, अनुमानं वा? प्रमाणान्तरस्य सौगतैरनभ्युपगमात्। तत्र न तावत्प्रत्यक्षं बहिरर्थसंस्पर्शरहितं विज्ञप्तिमात्रमेवेत्यधिगन्तुं समर्थम्; अर्थाभावनिश्चयमन्तरेण विज्ञप्तिमात्रमेवेत्यवधारणानुपपत्तेः। १०

"अयमेवेति यो ह्येष भावे भवति निर्णयः। १५
नैष वस्त्वन्तराभावसंवित्त्यनुगमादृते॥"
[मी० श्लो० अभावपरि० श्लो० २०]

इत्यभिधानात्। न चार्थाभावः प्रत्यक्षाधिगम्यः; बाह्यार्थप्रकाशकत्वेनैवास्योत्पत्तेः। न च प्रत्यक्षे प्रतिभासमानस्याप्यर्थस्याभावो

१ बाधकेन ज्ञानमपह्रियते विषयो वेत्येवं वादिनः। २ उक्तविकल्पैरतीतस्योत्तरकालीनं न बाधकमिति। ३ अविद्यया किं ज्ञानमपह्रियते विषयः फलं वा। ४ सहांशैः वर्त्तते इति सांशः। ५ सुखादिस्तम्भादि च। ६ पारमार्थिकम्। ७ भवता परेण। ८ विज्ञानाद्वैतवादी योगाचार आह। ९ ग्राह्यग्राहकसंवित्तिरूपो विभागः। १० जैनादिभिः। ११ इदं ज्ञानमयं विषय इति विभागः। १२ ज्ञापक। १३ परेण। १४ बलेन। १५ प्रकृते विज्ञप्तिमात्रे। १६ घटते। १७ बहिरर्थे। १८ सद्भावाद्विना। १९ अस्तीति साध्यः।

1 ब्रह्माद्वैतवादस्य विविधरीत्या पर्यालोचनं निम्नग्रन्थेषु द्रष्टव्यम्—मी० श्लोकवा० पृ० ६६२-, तत्त्वसं० पुरुषप० पृ० ७५-, न्यायमं० पृ० ५२६-, आप्तमीमांसा अष्टश० अष्टसह० पृ० १५६-द्वि० परि०, न्यायकु० चं० प्रथमपरि०, सन्मति० टी० पृ० २७७-२८५-, स्या० रत्ना० पृ० १९०-।

2 "ननु किमविभागबुद्धिस्वरूपावेदकप्रमाणसद्भावतो विज्ञप्तिमात्रमभ्युपगम्यते, आहोस्विदर्थसद्भावबाधकप्रमाणसद्भावसङ्गतेरिति वक्तव्यम्? तत्र यद्याद्यः पक्षः स न युक्तः; यतस्तथाभूतविज्ञप्तिमात्रोपग्राहकं प्रत्यक्षं वा तद्भवेदनुमानं वा...।" सन्मति० टी० पृ० ३४९।

विज्ञप्तिमात्रस्याप्यभावानुषङ्गात्। न च[2] तैमिरिकप्रतिभासे प्रतिभासमानेन्दुद्वयवन्निर्मलमनोऽक्षप्रभवप्रतिभासविषय[3]स्याप्यसत्त्वमित्यभिधातव्यम्; यतस्तैमिरिकप्रतिभासविषयस्यार्थस्य बाध्यमानप्रत्ययविषयत्वादसत्त्वं युक्तम्, न पुनः सत्यप्रतिभासविषय-
५ स्याऽबाध्यमानप्रत्ययविषयत्वेन सत्त्वसम्भवात्। बाध्यबाधकभावश्चानन्तरमेव ब्रह्माद्वैतप्रघट्टके प्रपञ्चितः। तन्नार्थाभावोऽध्यक्षेणाधिगम्यः।

नाप्यनुमानेन[1]; अध्यक्षविरोधेऽनुमानस्याप्रामाण्यात्। "प्रत्यक्षनिराकृतो न पक्षः"[2] [ ] इत्यभिधानात्। न च बाह्यार्था-
१० वेदकाध्यक्षस्य भ्रान्तत्वान्न तेनानुमानबाधेत्यभिधातव्यम्; अन्योऽन्याश्रयात्–सिद्धे[11] ह्यर्थाभावे तद्ग्राह्यध्यक्षं[12] भ्रान्तं सिद्ध्येत्, तत्सिद्धौ चार्थाभावानुमानस्य तेनाऽबाधेति[13]। किञ्च, तदनुमानं कार्यलिङ्गप्रभवम्, स्वभावहेतुसमुत्थं वा, अनुपलब्धिप्रसूतं वा? न तावत्प्रथमद्वितीयविकल्पौ; कार्यस्वभावहेत्वोर्विधि[14]साधकत्वाभ्युप-
१५ गमात्। "अत्र[15] द्वौ वस्तुसाधनौ" [न्यायबि० पृ० ३९] इत्यभिधानात्। तृतीयविकल्पोप्ययुक्तः; अनुपलब्धेरसिद्धत्वाद्बाह्यार्थस्याध्यक्षादिनोपलम्भात्। किञ्च, अदृश्यानुपलब्धिस्तदभावसाधिका स्यात्, दृश्यानुपलब्धिर्वा? प्रथमपक्षेऽतिप्रसङ्गः[16]। द्वितीयपक्षे तु सर्वत्र सर्वदा सर्वथार्थाभावाऽप्रसिद्धिः, प्रतिनियतदेशादौ[17] विवा-
२० स्यास्तदभावसाधकत्वसम्भवात्।

एतेन[18] बहिरर्थसद्भावबाधकप्रमाणावष्टम्भेन विज्ञप्तिमात्रं तत्त्वमभ्युपगम्यत इत्येतन्निरस्तम्; तत्सद्भावबाधकप्रमाणस्योक्तप्रकारेणासम्भवात्।

---

१ यत्प्रतिभासते तदस्तीति अनैकान्तिको न। (?) २ प्रतिभासमानत्वाविशेषात्। ३ ज्ञान। ४ बाह्यार्थस्य। ५ परेण। ६ नेमौ द्वौ चन्द्रौ। ७ ज्ञानाद्वैतवादिनां बाध्यबाधकभावो नास्तीत्युक्ते आह। ८ पूर्वं। ९ भा (तृतीया, तृतीयासमास इत्यर्थः)। १० परेण। ११ अनुमानात्। १२ अर्थ। १३ सिद्धा। १४ अस्तित्व। १५ त्रिषु हेतुषु मध्ये। १६ पिशाचादेरप्यभावसाधिका। १७ कालप्रकार। १८ बहिरर्थाभावसाधकप्रमाणनिराकरणपरेण ग्रन्थेन।

---

1 "नाप्यनुमानं बाह्याभावमावेदयति, प्रत्यक्षाभावे तस्यायोगात्। न च प्रत्यक्षविरोधे अनुमानप्रामाण्यं संभवति 'प्रत्यक्षनिराकृतो न पक्षः' इति वचनात्।" सन्मति० टी० पृ० ३५१।

2 "स्वरूपेणैव स्वयमिष्टोऽनिराकृतः पक्ष इति। (पृ० ७९) अनिराकृत इति। एतल्लक्षणयोगेऽपि यः साधयितुमिष्टोऽप्यर्थः प्रत्यक्षानुमानप्रतीतिस्ववचनैर्निराक्रियते न स पक्ष इति प्रदर्शनार्थम्।" न्यायबि० पृ० ७९,८३।

ननु नार्थाभावद्वारेण विज्ञप्तिमात्रं साध्यते, अपितु अर्थसंविदोः सहोपलम्भनियमादभेदो द्विचन्द्रदर्शनवदिति विधिद्वारेणैव साध्यते; तदप्यसारम्; अभेदपक्षस्य प्रत्यक्षेण बाधनाच्छब्देऽश्राव(ब्देऽश्राव)णत्ववत्। दृष्टान्तोपि साध्यविकलः; विज्ञानव्यतिरिक्तबाह्यार्थमन्तरेण द्विचन्द्रदर्शनस्याप्यसम्भवात्। कारणदोषवशात् खलु बहिःस्थितमेकमपीन्दुं द्विरूपतया प्रतिपद्यमानं ज्ञानमुत्पद्यते, कारणदोषज्ञानाद्बाधकप्रत्ययाच्चास्य भ्रान्तता। अर्थक्रियाकारिस्तम्भाद्युपलब्धौ तु तदभावात्सत्यता। सहोपलम्भनियम-

१ द्वन्द्वः। २ आत्मख्यातिवादी। ३ ईप्। ४ इन्द्रिय। ५ काचकामलादि। ६ उत्तरकाले नेमौ द्वौ चन्द्रौ। ७ घटपटादि।

1 "यत्संवेदनमित्यादिना नीलाद्याकारतद्धियोरभेदसाधनाय निराकारज्ञानवादिनं प्रति प्रमाणयति—

यत्संवेदनमेव स्याद्यस्य संवेदनं ध्रुवम्।
तस्मादव्यतिरिक्तं तत्ततो वा न विभिद्यते॥ २०३०॥
यथा नीलधियः स्वात्मा द्वितीयो वा यथोडुपः।
नीलधीवेदनं चेदं नीलाकारस्य वेदनात्॥ २०३१॥

एतदुक्तं भवति-(यत्) यस्मादपृथक् संवेदनमेव तत्तस्मादभिन्नं यथा नीलधीः स्वस्वभावात्, यथा वा तैमिरिकज्ञानप्रतिभासी द्वितीय उडुपः चन्द्रमाः, नीलधीवेदनञ्चेदमिति पक्षधर्मोपसंहारः। धर्म्यत्र नीलाकारतद्धियौ, तयोरभिन्नत्वं साध्यधर्मः, यथोक्तः सहोपलम्भनियमो हेतुः। ईदृश एव आचार्यीये सहोपलम्भनियमादित्यादौ प्रयोगे हेत्वर्थोऽभिप्रेतः।" तत्त्वसं० पं० पृ० ५६७।

2 "-असदेतत्; अभेदस्य प्रत्यक्षेण बाधनात्,....शब्देऽश्रावणत्ववत् पक्षस्य प्रत्यक्षेण निराकृतेः।" सन्मति० टी० पृ० ३५२।

3 "पुनः स एवाह-यदि सहशब्द एकार्थस्तदा हेतुरसिद्धः; तथाहि—नटचन्द्रमल्लप्रेक्षासु नह्येकेनैवोपलम्भो नीलादेः, ...यदा च सत्त्वं प्राणभृतां सर्वे चित्तक्षणाः सर्वज्ञेनावसीयन्ते तदा कथमेकेनैवोपलम्भः सिद्धः स्यात्? नचान्योपलम्भप्रतिषेधसंभवः स्वभावविप्रकृष्टस्य विधिप्रतिषेधाऽयोगात्। अथ सहशब्द एककालविवक्षया तदा बुद्धविज्ञेयचित्तेन चित्तचैत्तैश्च सर्वथाऽनैकान्तिकता हेतोः। यथा किल बुद्धस्य भगवतो यद्विज्ञेयं सन्तानान्तरचित्तं तस्य बुद्धज्ञानस्य च सहोपलम्भनियमेऽप्यस्त्येव च नानात्वम्, तथा चित्तचैत्तानां सत्यपि सहोपलम्भे नैकत्वमित्यतोऽनैकान्तिको हेतुः।" तत्त्वसं० पं० पृ० ५६७। विधिवि० न्यायकणि० पृ० २६४। सन्मति० टी० पृ० ३५३। स्या० रत्ना० पृ० १५५।

"यदप्यवर्णि सहोपलम्भनियमादभेदो नीलतद्धियोः तदपि बालभाषितमिव नः प्रतिभाति; अभेदे सहार्थानुपपत्तेः। अथैकोपलम्भनियमादिति हेत्वर्थो विवक्षितः; तदयमसिद्धो हेतुः नीलादिग्राह्यग्रहणसमये तद्ग्राहकानुपलम्भात्।" न्यायमं० पृ० ५४४।

असिद्धः; नीलाद्यर्थोपलम्भमन्तरेणाप्युपरतेन्द्रियव्यापारेण सुखादिसंवेदनोपलम्भात्। अनैकान्तिकश्चायम्; रूपालोकयोर्भिन्नयोरपि सहोपलम्भनियमसम्भवात्। तथा सर्वज्ञज्ञानस्य तज्ज्ञेयस्य चेतरजनचित्तस्य सहोपलम्भनियमेऽपि भेदाभ्युपगमादनेकान्तः।

५ ननु सर्वज्ञः सन्तानान्तरं वा नेष्यते तत्कथमयं दोषः? इत्यसत्; सकललोकसाक्षिकस्य सन्तानान्तरस्यानभ्युपगममात्रेणाऽभावाऽसिद्धेः। सुगतश्च सर्वज्ञो यदि परमार्थतो नेष्यते तर्हि किमर्थं "प्रमाणभूताय" [प्रमाणसमु० श्लो० १] इत्यादिनासौ समर्थितः, स्तुतश्चाद्वैतादिप्रकरणानामादौ दिग्नागादिभिः सद्भिः। न खलु

१० तेषामसति सत्त्वकल्पने बुद्धिः प्रवर्त्तते। विचार्य पुनस्त्यागाददोष इत्यप्यसारम्; त्यागाङ्गत्वे हि तस्य वरं पूर्वमेव नाङ्गीकरणमीश्वरादिवत्। अद्वैतमेव तथा स्तूयते इत्यपि वार्त्तम्; तत्र स्तोतव्यस्तोतृस्तुतितत्फलानामत्यन्तासम्भवात्।

किञ्च, सहोपलम्भः किं युगपदुपलम्भः, क्रमेणोपलम्भाभावो

१५ वा स्यात्, एकोपलम्भो वा? प्रथमपक्षे विरुद्धो हेतुः; 'सह शिष्येणागतः' इत्यादौ यौगपद्यार्थस्य सहशब्दस्य भेदे सत्येवोपलम्भात्। न ह्येकस्मिन् यौगपद्यमुपपद्यते। द्वितीयपक्षेऽप्यसिद्धो हेतुः; क्रमेणोपलम्भाभावमात्रस्य वादिप्रतिवादिनोरसिद्धत्वात्।

---

१ प्रतीति। २ निवृत्तेन्द्रिय। ३ पुरुषेण। ४ न चैकत्वम्। ५ परेण। ६ ज्ञानान्तरं वा। ७ सौगतैः। ८ जगद्धितैषिणे प्रणम्य शास्त्रे सुगताय तापिने(तायिने)। ९ असति सत्त्वकल्पने बुद्धिप्रवृत्त्यभावलक्षणो दोषः। १० फल्गु। ११ दिग्नागादि। १२ साधनं विचार्यते। १३ प्रसज्यः। १४ विपरीतनिश्चिताविनाभावो विरुद्धः। १५ उपाध्याये। १६ असत्सत्तानिश्चयोऽसिद्धः। १७ योगाचारजैनाभ्यां तुच्छस्वभावप्रागभावप्रध्वंसाभावलक्षणाऽभावयोरनभ्युपगमात्। १८ तुच्छरूपाभावस्य।

"अथ साहाय्यं यौगपद्यं वा विवक्षितं सहोपलभ्यमानत्वं तथापि तयोर्भेदेनैव व्याप्तत्वात् विरुद्धत्वम्। तथा सर्वज्ञः स्वचित्तेन सहोपलभते परचित्तं न च तस्य तस्मादभेद इति व्यभिचारः सर्वेषां सर्वज्ञताप्रसङ्गात्।" व्योमव० पृ० ५२७।

1 "यच्च सहोपलम्भनियम उक्तः सोऽपि विकल्पं न सहते। यदि ज्ञानार्थयोः साहित्येन उपलम्भः ततो विरुद्धो हेतुर्नाभेदं साधयितुमर्हति साहित्यस्य तद्विरुद्धभेदव्याप्तत्वात् अभेदे तदनुपपत्तेः। अथैकोपलम्भनियमः; न, एकत्वस्यावाचकः सहशब्दः। अपि किमेकत्वेनोपलम्भः, आहो एक उपलम्भो ज्ञानार्थयोः? न तावदेकत्वेनोपलम्भ इत्याह–बहिरुपलब्धेश्च विषयस्य।" ब्रह्मसू० शां० भा० भामती २।२।२८ सन्मति० टी० पृ० ३५३। "सहोपलम्भोऽपि किं युगपदुपलम्भः, क्रमेणोपलम्भाभावः, एकोपलम्भो वाऽभिप्रेतो यस्य नियमो हेतुः स्यात्?" स्या० रत्ना० पृ० १५५।

किञ्च[1], अस्मा[1]द[2]भेदैः[3]—एकत्वं साध्येत, भेदाभावो[4] वा? तत्राद्यविकल्पोऽसङ्गतः; भावा[5]ऽभाव[6]योस्तादात्म्य[7]तदुत्पत्तिलक्षणसम्बन्धाभावतो गम्य[8]गमकभावायोगात्। प्रसिद्धे हि धूमपावकयोः कार्यकारणभावे-शिंशपात्ववृक्षत्वयोश्च तादात्म्ये प्रतिबन्धे[9] गम्यगमकभावो दृष्टः। द्वितीयविकल्पेपि-अभावस्वभावत्वात्साध्यसाधनयोः सम्बन्धा[10]ऽभावः, तादात्म्यतदुत्पत्त्योरर्थस्वभावप्रतिनियमात्। [11]अनिष्टसिद्धिश्च; [12]सिद्धेपि भेदप्रतिषेधे[13] विज्ञप्तिमात्रस्येष्टस्यातो[14]ऽप्रसिद्धेः, भेदप्रतिषेधमात्रेऽस्य चरितार्थत्वात्। ततस्तत्सिद्धौ वा[15] ग्राह्यग्राहकभावादि[16]प्रसङ्गो बहिरर्थसिद्धेरपि प्रसाधको[17]ऽनुपज्यते।

अथैको[2]पलम्भः सहोपलम्भः। ननु किमेक[18]त्वेनो[19]पलम्भ एकोपलम्भः स्यात्, एके[20]नैव वोपलम्भः, एकलोली[21]भावेन चोपलम्भः, एकस्यैवोपलम्भो वा? प्रथमपक्षे[3]-साध्यसमो हेतुर्यथाऽनित्यः शब्दोऽनित्यत्वादिति। बहिरन्तर्मुखाकारतया च[22] नीलतद्धियोर्भेदस्य सुप्रतीतत्वात्[23] कथं तयोरेकत्वेनोपलम्भः सिद्ध्येत्? एके[24]नै[4]-

---

१ हेतोः। २ साध्यविचारः। ३ अर्थसंविदोः। ४ प्रसज्यः। ५ साध्य। ६ अभावो हेतुः। ७ एकत्व। ८ साध्यसाधन। ९ सम्बन्धे। १० शशविषाणाश्वविषाणयोरिव। ११ तुच्छाभावसिद्धिः। १२ असाद्धेतोः। १३ अभावे। १४ क्रमेणोपलम्भाभावमात्रात् इत्यस्मात्साधनात्। १५ किञ्च। १६ व्याप्यव्यापक। १७ यथा ग्राह्यं ग्राहकमिति द्वैतं तथा बाह्योऽर्थः विज्ञानमिति द्वैतसिद्धिरपि स्यादित्यर्थः। १८ अर्थसंविदोस्तादात्म्यात्। १९ नीलतद्धतोः सर्वथा तादात्म्यात्। २० ज्ञानेन। २१ कथञ्चित्तादात्म्य। २२ किञ्च। २३ स्वरूपासिद्धो हेतुः। २४ ज्ञानेन।

---

1 "किञ्च, क्रमेणोपलम्भाभावमात्रादभेद एकत्वं साध्यते, भेदाभावो वा?" स्या० रत्ना० पृ० १५८।

2 "अथैकोपलम्भः सहोपलम्भः, ननु किमेकत्वेनैवोपलम्भः एकोपलम्भः, एकेनैव वा, एकस्यैव वा, एकलोलीभावेनैव वा?" स्या० रत्ना० पृ० १५८।

3 "तदेकोपलम्भनियमोऽप्यसिद्धः साध्यसाधनयोरविशेषात्।" अष्टश०, अष्टसह० पृ० २४३। "नचैकस्यैवोपलम्भनियमो हेतुः; अशब्दार्थत्वात्, साध्याविशिष्टत्वाच्च। तथाऽनेकरूपाद्यवयवस्य हि तस्यार्थस्योपलम्भे स्वरूपाऽसिद्धोऽपीति।" व्योमवती पृ० ५२७। स्या० रत्ना० पृ० १५८।

4 "नापि नीलतदुपलम्भयोरेकेनैवोपलम्भः; तथाहि—नीलोपलम्भेऽपि तदुपलम्भानामन्यसन्तानगतानामुपलम्भात्।" तत्त्वसं० पं० पृ० ५६७। "अथैकेनैवोपलभ्यमानत्वं साधनम्; न; अन्यवेदनाऽभावस्याप्रसिद्धेः। अर्थस्तु तत्समानक्षणैरन्यैरप्युपलभ्यते इत्येकेनैवोपलभ्यमानत्वमसिद्धम्।" व्योमव० पृ० ५२७।

वोपलम्भोप्यन्यवेदनाऽभावे सिद्धे सिद्ध्येत् । न चासौ सिद्धः; नीलाद्यर्थस्य तत्समानक्षणैरन्यवेदनैरुपलम्भप्रतीतेरित्येकेनैवोपलम्भोऽसिद्धः । एतेनैकलोलीभावेनोपलम्भः सहोपलम्भश्चित्रज्ञानाकारवदशक्यविवेचनत्वं साधनमसिद्धं प्रतिपत्तव्यम्; नीलतद्धियोरशक्यविवेचनत्वासिद्धेः अन्तर्बहिर्देशतया विवेकेनानयोः प्रतीतेः ।

५

अथैकस्यैवोपलम्भः; किं ज्ञानस्य, अर्थस्य वा? ज्ञानस्यैव चेत्; असिद्धो हेतुः । न खलु परं प्रति ज्ञानस्यैवोपलब्धिः सिद्धा; अर्थस्याप्युपलब्धेः । न चार्थस्याभावादनुपलब्धिः; इतरेतराश्रयानुषङ्गात्-सिद्धे ह्यर्थाभावे ज्ञानस्यैवोपलम्भः सिद्ध्येत्, तदुपलम्भसिद्धौ चार्थाभावसिद्धिरिति । अथार्थस्यैवैकस्योपलम्भः; नन्वेवं कथमर्थाभावसिद्धिः? ज्ञानस्यैवाभावसिद्धिप्रसङ्गात् । उपलम्भनिबन्धनत्वाद्वस्तुव्यवस्थायाः । स्वरूपकारणभेदाच्चानयोर्भेदः; ग्राहकस्वरूपं हि विज्ञानं नीलादिकं तु ग्राह्यस्वरूपम् । अभेदे च तयोर्ग्राहकता ग्राह्यता वाऽविशेषेण स्यात् । कारणभेदस्तु

१०

१५

१ अर्थस्य । २ उपलम्भः । ३ सन्तानान्तरवेदनैः । ४ पुरुष । ५ एकत्वेनोपलम्भनिराकरणपरेण ग्रन्थेन । ६ चित्रज्ञानाद्यथा तदाकाराणां श्वेतादीनामशक्यविवेचनत्वं यथा न तथात्र । ७ अयमर्थ इदं ज्ञानमिति विवेकाभावः । ८ परेण । ९ नीलनीलज्ञानयोः । १० पृथक्त्वेन । ११ अर्थसंविदोरभेदः एकस्यैवोपलम्भात् । १२ जैनं प्रति । १३ अर्थज्ञानयोर्घटपटयोरिव ।

1 "एतेनैकलोलीभावेनैवोपलम्भः सहोपलम्भनियमः चित्रज्ञानाकारवदशक्यविवेचनत्वं साधनमसिद्धं प्रतिपत्तव्यम्, अन्तर्बहिर्देशस्थतया विवेकेन ज्ञानार्थयोः प्रतीतेः ।" स्या० रत्ना० पृ० १५९ ।

2 "अपि च सहोपलम्भ; किं ज्ञानयोः, उत अर्थयोः, ज्ञानार्थयोर्वा ?" तत्त्वोप० पृ० १२५ । "किञ्च, एकस्यैवोपलम्भो ज्ञानस्य, अर्थस्य वा ?" सन्मति० टी० पृ० ३५३ ।

3 "अथ बाह्यार्थाभावादेकोपलम्भनियमः; तन्न; इतरेतराश्रयत्वप्रसङ्गात् । तथा चैकोपलम्भनियमाद् बाह्यार्थाभावसिद्धिः तत्सिद्धेश्च एकोपलम्भनियमसिद्धिरित्येकाभावादितराभावः ।" व्योमवती पृ० ५२७ ।

4 "तथा ज्ञानं ग्राहकस्वरूपं नीलादि ग्राह्यस्वरूपमित्यनयोः शुक्लपीतयोरिव स्वभावभेदात् भेदः । अभेदे हि बोधोऽपि नीलस्य ग्राह्यं स्यात् नीलञ्च बोधस्य ग्राहकमिति स्यात्, न चैतदस्ति । कारणभेदाच्च नीलाद्बोधोऽर्थान्तरम्; तथा हि-बोधाद् बोधरूपता, इन्द्रियाद्विषयप्रतिनियमः, विषयादाकारग्रहणमिति भेदादेषां भेद एव ।" व्योमवती० पृ० ५२७ ।

सुप्रसिद्धः, ज्ञानस्य चक्षुरादिकारणप्रभवत्वात्तद्विपरीतत्वाच्च नीलाद्यर्थस्येति।

यच्चोच्यते[3]–'यदभा(यदवभा)सते[1] तज्ज्ञानं यथा सुखादि, अवभासते च नीलादिकम्' इति; तत्र[2] किं स्वतोऽवभासमानत्वं हेतुः, परतो वा, अभा(अवभा)समानत्वमात्रं वा? तत्राद्यपक्षे हेतु-रसिद्धः। न खलु 'परनिरपेक्षा[6] नीलादयोऽवभासन्ते' इति परस्य[7] प्रसिद्धम्। 'नीलादिकमहं वेद्मि' इत्यहमहमिकया प्रतीयमानेन प्रत्ययेन नीलादिभ्यो भिन्नेन तत्प्रतिभासाभ्युपगमात्। यदि च परनिरपेक्षावभासा[8] नीलादयः परस्य[9] प्रसिद्धाः स्युस्तर्हि किमतो हेतोस्तं प्रति साध्यम्[10]? ज्ञानतेति[11] चेत्; सा यदि प्रकाशता-तर्हि[12] हेतुसिद्धौ सिद्धैव न साध्या। असिद्धौ वा तस्याः-कथं नासिद्धो हेतुः? को हि नाम स्वप्रतिभासं तत्रेच्छन्[13] ज्ञानतां नेच्छेत्।

ननु चाहम्प्रत्ययो[3] गृहीतः, अगृहीतो वा, निर्व्यापारः, सव्यापारो वा, निराकारः, साकारो वा, (भिन्नकालः, समकालो वा) नीलादेर्ग्राहकः स्यात्? गृहीतश्चेत्-किं स्वतः, परतो वा? स्वत-

१ प्रकाश। २ प्राकृतनीलकारणप्रभवत्वात्। ३ परेण भवता। ४ तस्माद् ज्ञानमिति निगमनम्। ५ प्रतिवाद्यसिद्धः। ६ ज्ञान। ७ जैनस्य। ८ परनिरपेक्षोऽवभासो येषां ते। ९ जैनस्य। १० इष्टमबाधितमसिद्धं साध्यम्। ११ ज्ञानत्वम्। १२ नीलादीनाम्। १३ नीलादौ।

1 "प्रकाशमानस्तादात्म्यात्स्वरूपस्य प्रकाशकः।
यथा प्रकाशोऽभिमतस्तथा धीरात्मवेदिनी॥" प्रमाण वा० ३।३२७।
"सकृत्संवेद्यमानस्य नियमेन धिया सह।
विषयस्य ततोऽन्यत्वं केनाकारेण सिध्यति॥" प्रमाणवा० अलं० पृ० ९१।

2 "यत्तु संवेदनाद्वैतं पुरुषाद्वैतवन्न तत्।
सिध्येत् स्वतोऽन्यतो वाऽपि प्रमाणात् स्वेष्टहानितः॥"
आप्तपरी० कारि० ५६। न्यायकु० चं० प्रथमपरि०। स्या० रत्ना० पृ० १६१।

3 "तथा हि-परः प्रकाशयन् सम्बद्धोऽसम्बद्धो वा, गृहीतोऽगृहीतो वा, निर्व्यापारः सव्यापारो वा, निराकारः साकारो वा, भिन्नकालः समकालो वा पदार्थस्य प्रकाशकः स्यात्?" स्या० रत्ना० पृ० १६१। "प्रत्यक्षमर्थं तुल्यकालं वा प्रकाशयति, भिन्नकालं वा?" सन्मति० टी० पृ० ३५४।

"अनिर्भासं सनिर्भासमन्यनिर्भासमेव च।
विजानाति न च ज्ञानं बाह्यमर्थं कथञ्चन॥ १९९९॥"
तत्त्वसं० पृ० ५५९।

श्चेत्; स्वरूपमात्रप्रकाशनिमग्नत्वाद्बहिरर्थप्रकाशकत्वाभाव एव स्यात्। परतश्चेदनवस्था; तस्यापि ज्ञानान्तरेण ग्रहणात्। न च[1] पूर्वज्ञानाग्रहणेप्यर्थस्यैव ज्ञानान्तरेण[2] ग्रहणमित्यभिधातव्यम्; तस्यासन्नत्वेन[4] जनकत्वेन[5] च ग्राह्यलक्षणप्राप्तत्वात्। तदाह—

५ "तां[6] ग्राह्यलक्षणप्राप्तामासन्नां जनिकां धियम्।
अगृहीत्वोत्तरं ज्ञानं गृह्णीयादपरं कथम्॥" [प्रमाणवा० ३।५१३]

अगृहीतश्चेद्ग्राहकोऽतिप्रसङ्गः। न च निर्व्यापारो बोधोऽर्थग्राहकः; अर्थस्यापि[11] बोधं प्रति ग्राहकत्वानुषङ्गात्[12]। व्यापारवत्त्वे चा[13]तोऽव्यतिरिक्तो व्यापारः, व्यतिरिक्तो वा? आद्यविकल्पे-बोध-
१० स्वरूपमात्रमेव नापरो व्यापारः कश्चित्। न चानयोर[14]भेदो युक्तः; धर्म[15]धर्मि[16]तया भेदप्रतीतेः। द्वितीयविकल्पे तु सम्बन्धा[17]सिद्धिः; त[18]तस्त[19]स्योपकाराभावात्। उपकारे वानवस्था तन्निर्वर्तने व्यापारस्यापरव्यापारपरिकल्पनात्। निराकारत्वे वा बोधस्य; अतः प्रतिकर्म[20]व्यवस्था न स्यात्। साकारत्वे वा बाह्यार्थपरिकल्पना-
१५ नर्थक्यं नीलाद्याकारेण बोधेनैव पर्याप्तत्वात्। तदुक्तम्—

"धियो[21](योऽ)[2]लादिरूपत्वे[22] वाह्योऽर्थः किन्निबन्धनः[23]।
धियोऽ(यो)नीलादिरूपत्वे वाह्योऽर्थः किन्निबन्धनः[24]॥ १॥"
[प्रमाणवा० ३।४३१]

तथा न भिन्नकालोऽसौ तद्ग्राहकः[25]; बोधेन[26] स्वकालेऽविद्यमानार्थस्य
२० ग्रहणे निखिलस्य प्राणिमात्रस्याशेषज्ञत्वप्रसङ्गात्। नापि सम-

---

१ अहम्प्रत्ययस्य। २ द्वितीयेन। ३ जैनैः। ४ पूर्वज्ञानस्य। ५ उत्तरज्ञानस्य। ६ प्राक्तनीं। ७ कर्तृ। ८ नीलादिकम्। ९ नाज्ञातं ज्ञापकं नाम। १० देवदत्तज्ञानं जिनदत्तेनाज्ञातं सत् जिनदत्तस्यार्थग्राहकं भवेत्। ११ अन्यथा। १२ निर्व्यापारत्वाविशेषात्। १३ बोधात्। १४ बोधव्यापारयोः। १५ स्वरूप। १६ बोध। १७ बोधस्यायं व्यापार इति। १८ व्यापारात्। १९ बोधस्य। २० घटज्ञानस्य घटः पटज्ञानस्य पटो विषयः, इति प्रतिनियतविषय। २१ ज्ञानस्य। २२ निराकारत्वे। २३ ग्राहकव्यवस्थापकाभावात्। २४ किम्प्रयोजनः। किं निबन्धनं निमित्तं व्यवस्थापकं यस्य बाह्यार्थस्य सः। २५ नीलादि। २६ अन्यथा।

---

1 "न च पूर्वज्ञानाग्रहणेऽपि अर्थस्यैव ग्रहणमिति वाच्यम्, तेषामासन्नत्वे सति ग्राह्यलक्षणप्राप्तत्वात्। तदाह–तां ग्राह्यलक्षण....व्योमवती पृ० ५२४।

2 "धियोऽसितादिरूपत्वे सा तस्यानुभवः कथम्।
धियः सितादिरूपत्वे बाह्योऽर्थः किं प्रमाणकः॥ २०५१॥"
तत्त्वसं० पृ० ५७४।

काले[१]ः; समसमयभाविनोर्ज्ञानज्ञेययोः प्रतिबन्धा[२]भावतो ग्राह्यग्राहकभावासम्भवात्[३]। अन्यथाऽर्थोऽपि ज्ञानस्य ग्राहकः। अथार्थे[1] ग्राह्यताप्रतीतेः स च ग्राह्यः न ज्ञानम्; न[४]; तद्व्यतिरेकेणास्याः प्रतीत्यभावात्। स्वरूप[५]स्य च ग्राह्यत्वे-ज्ञानेपि तदस्तीति तत्रापि ग्राह्यता भवेत्। अथ जडत्वान्नार्थो ज्ञानग्राहकः; ननु कुतोऽस्य जडत्वसिद्धिः? तद्ग्राहकत्वाच्चेदन्योन्याश्रयः-सिद्धे हि जडत्वे तद्ग्राहकत्वसिद्धिः, ततश्च जडत्वसिद्धिरिति। अथ[६] गृहीति[७]करणादर्थस्य[८] ज्ञानं ग्राहकम्, ननु साऽर्थादर्थान्तरम्, अनर्थान्तरं वा तेन क्रियते? अर्थान्तरत्वे अर्थस्य न किञ्चित्कृत[९]मिति कथं तेनास्य ग्रहणम्? तस्येयमिति सम्बन्धासिद्धिश्च। तयाऽ[१०]प्यस्य गृहीत्यन्तरकरणे[११]ऽनवस्था। अनर्थान्तरत्वे[१२] तु तत्करणेऽर्थ एव तेन क्रियते इत्यस्य ज्ञानता ज्ञानकार्यत्वादुत्तरज्ञानवत्। जडार्थो[१३]पादानोत्पन्नं[१४] दोषश्चेत्, ननु पूर्वोऽर्थोऽप्रतिपन्नः[१५] कथमुपादानम[१६]तिप्रसङ्गात्[१७]? प्रतिपन्नश्चेत्; किं समानकालाद्[१८]भिन्नकालाद्वेत्यादिदोषानुषङ्गः। किञ्च, गृहीतिरगृहीता[१९] कथमस्तीति निश्चीयते? अन्यज्ञानेन चास्या ग्रहणे स एव दोषो[२०]ऽनवस्था[२१] च, ततोऽर्थो ज्ञानं गृहीतिरिति त्रितयं स्वतन्त्रमाभातीति न परतः कस्यचिदवभासनमिति नासिद्धो हेतुः।

ननु च[2] 'अर्थमहं वेद्मि चक्षुषा' इति कर्मकर्तृक्रियाकरणप्रतीति-

---

१ अयं प्रत्ययोर्नीलादेर्ग्राहकः। २ तदुत्पत्तिलक्षणसम्बन्ध। ३ सव्येतरगोविषाणवत्। ४ इति न (इत्यर्थः)। ५ अर्थस्य। ६ भो जैन। ७ परिच्छित्ति। ८ घटादेः। ९ घटस्य करणे पटस्य किमायातं यथा तथा। १० प्रथमया। ११ सम्बन्धसिद्ध्यर्थम्। १२ अभिन्नत्वे। १३ मृत्पिण्डादि। १४ अर्थस्य। १५ अज्ञातः। १६ अप्रतिपन्नत्वाविशेषात्। १७ खरविषाणादेरप्युपादानत्वप्रसङ्गात्। १८ बोधात्। १९ अज्ञाना। २० भिन्नकालेन समकालेन वेत्यादि। २१ अन्यज्ञानेन गृहीतो गृहीत्यन्तरमाद्यगृहीतेरर्थेन सम्बन्धसिद्ध्यर्थं क्रियते। एवं चेदन्यज्ञानेन क्रियमाणा गृहीतिः सा अर्थाद्भिन्ना अभिन्ना वेति उभयपक्षे उक्तदोषानुषङ्गः। पुनरपि भेदपक्षे

---

1 "अथार्थे ग्राह्यताप्रतीतेः स एव ग्राह्यो न ज्ञानमित्युच्यते; तन्न; तद्व्यतिरेकेणास्याः प्रतीत्यभावात्।" स्या० रत्ना० पृ० १६२।

2 "ननु तर्हि नीलमहं वेद्मि चक्षुषेति प्रतिभासः कथम्? तथा हि—नीलमिति कर्म, अहमिति कर्त्ता, वेद्मीति क्रिया, चक्षुषेति करणमेतेषां परस्परव्यावृत्तवपुषां प्रतिभासनादभेदप्रतिपादनमुन्मत्तभाषितम्; नैतदेवम्; तैमिरिकस्य द्विचन्द्रदर्शनवदस्याप्युपपत्तेः। यथा हि-तैमिरिकस्य अर्थाभावेऽपि तदाकारं विज्ञानमुदेति, एवं कर्मादिष्वविद्यमानेष्वपि अनादिवासनावशात्तदाकारं विज्ञानमिति।" व्योमवती पृ० ५२५।

ज्ञानमात्राभ्युपगमे कथम्? इत्यप्यपेशलम्; तैमिरिकस्य द्विचन्द्रदर्शनवदस्या अप्युपपत्तेः । यथा हि तस्यार्थाभावेपि तदाकारं ज्ञानमुदेत्येवं कर्मादिष्वविद्यमानेष्वपि अनाद्यविद्यावासनावशात्तदाकारं ज्ञानमिति ।

५ अत्र प्रतिविधीयते। यत्तावदुक्तम्-'अहंप्रत्ययो गृहीतोऽगृहीतो[2] वा' इत्यादि; तत्र गृहीत एवार्थग्राहकोऽसौ, तद्ग्रह[3]श्च स्वत एव । न च स्वतोऽस्य ग्रहणे स्वरूपमात्रप्रकाशनिमग्नत्वाद्बहिरर्थप्रकाशकत्वाभावः; विज्ञानस्य प्रदीपवत्स्वपरप्रकाशस्वभावत्वात् ।

यच्चोक्त[4]म्-'निर्व्यापारः सव्यापारो वेत्यादि; तदप्युक्तिमात्रम्; १० स्वपरप्रकाशस्वभावताव्यतिरेकेण ज्ञानस्य स्वपर[5]प्रकाशनेऽपरव्यापाराभावात्प्रदीपवत् । न खलु प्रदीपस्य स्वपरप्रकाशस्वभावताव्यतिरेकेणान्यस्तत्प्रकाशनव्यापारोऽस्ति । न च ज्ञानरूपत्वे नीला[6]देः सप्रतिघा[8]दिरूपता घटते । न च तद्रूपतयाऽध्यवसीयमानस्य नीलादेः 'ज्ञानम्' इति नामकरणे काचिन्नः[10] क्षतिः । नामकरण-१५ मात्रेण सप्रतिघत्वबाह्यरूपत्वादेरर्थधर्मस्याव्यावृत्तेः । न च तद्रूपता ज्ञानस्यैव स्वभावः; तद्विप[11]र्ययत्वेनानन्यवेद्यतया चास्यान्तःप्रतिभासनात्, सप्रतिघान्य[12]वेद्यस्वभावतया चार्थस्य बहिःप्रतिभासनात् । न च प्रतिभासमन्तरेणार्थव्यवस्थायामन्यन्निबन्धनं पश्या[13]मः ।

यदप्यभिहितम्[14]-निराका[15]रः साकारो वेत्यादि; तदप्यभिधान-२० मात्रम्; साकारवादप्रतिक्षेपेण[1] निराकारादेव प्रत्यया[16]त् प्रतिकर्म[17]व्यवस्थोपपत्तेः प्रतिपादयि[18]ष्यमाणत्वात् ।

यच्चान्यदुक्तम्-न भिन्नकालोऽसौ[19] तद्ग्रा[20]हक इत्यादि, तदप्यसारम्; क्ष[21]णिकत्वानभ्युप[22]गमात्[2] । यो हि क्षणिकत्वं मन्यते

गृहीतेरर्थेन सम्बन्धसिद्ध्यर्थमन्यज्ञानेनापरं गृहीत्यन्तरं क्रियते । अपरगृहीतिरपि अर्थाद्भिन्ना अभिन्ना वेत्यादिप्रकारेणानवस्था ।

१ परेण । २ इदमपि ज्ञानं समकालं भिन्नकालं वेत्यादि । अन्यज्ञानमपि गृहीतमगृहीतमित्यादिप्रकारेण । ३ ग्रहणम् । ४ परेण । ५ ज्ञान । ६ अर्थ । ७ अर्थस्य । ८ काठिन्य । ९ छेदनाग्रहणादि । १० आस्माकं जैनानां । ११ बहिरर्थ । १२ ज्ञान । १३ वयं जैनाः । १४ परेण । १५ अहम्प्रत्ययः । १६ ज्ञानात् । १७ विषय । १८ जैनैः । १९ अहम्प्रत्ययः । २० अर्थ । २१ ज्ञानार्थयोः । २२ जैनानाम् ।

1 "निराकारपक्षेऽपि भवदभिमतसाकारवादप्रतिक्षेपेण निराकारादेव प्रत्ययाद्यथा प्रतिकर्मव्यवस्था तथा प्रतिपादयिष्यते ।" स्या० रत्ना० पृ० १६३ ।

2 "यच्चेदं ग्राह्यग्राहकयोरेककालानुभवाभावेन दूषणम्; तदप्यपास्तम्; क्षणिकत्वानभ्युपगमात् । यो हि क्षणिकत्वं मन्यते तस्यायं दोषो ज्ञानकालेऽर्थस्यासद्भावः अर्थकाले ज्ञानस्येति तयोर्ग्राह्यग्राहकभावानुपपत्तिरिति ।" व्योमवती पृ० ५२९ ।

तस्यायं दोषः 'बोधकालेऽर्थस्याभावादर्थकाले च बोधस्यासत्त्वे तयोर्ग्राह्यग्राहकभावानुपपत्तिः' इति।

यच्चाविद्यमाना[1]र्थस्य ग्रहणे प्राणिमात्रस्याशेषज्ञत्व[2]प्रसक्तिरित्यु[3]क्तम्; तदप्ययुक्तम्; भिन्नकालस्य समकालस्य वा योग्य[4]स्यैवार्थस्य ग्रहणात्। दृश्यते[5] हि[6] पूर्वोत्तरचरादिलिङ्गप्रभवप्रत्यया[7]द्भिन्नकालस्यापि प्रतिनियत[8]स्यैव शकटोदयाद्यर्थस्य ग्रहणम्।

कथ[9]ञ्चैवंवादिनो[10]ऽनुमानोच्छेदो न स्यात्, तथा हि—त्रिरूपा-ल्लिङ्गा[11]ल्लिङ्गिनि ज्ञानमनुमानं प्रसिद्धम्। लिङ्गं चावभासमानत्वमन्य[12]द्वा यदि भिन्नकालं तस्य जनकम्; तर्ह्येकस्यानुमानस्याशेषमतीतमनागतं त[13]ज्जनकमित्य[14]त एवाशेषानुमेय[15]प्रतीतेरनुमानभेदकल्पनानर्थक्यम्। अथ भि[16]न्नकालत्वाविशेषेपि किञ्चिदेव लिङ्गं कस्य[17]चिज्जनकमित्यदोषोयम्; न[18]न्वेवं तदविशेषेपि किञ्चिदेव ज्ञानं कस्यचिदेवार्थस्य ग्राहकं किं नेष्य[19]ते? अथातीतानु[20]त्पन्नेऽर्थे प्रवृत्तं ज्ञानं निर्विषयं स्या[21]त्, तर्हि न[22]ष्टानु[23]त्पन्नाल्लिङ्गादुपजायमानमनुमानं निर्हेतुकं किं न स्यात्? यथा च स्व[24]काले विद्य[25]मानं स्वरूपेण ज[26]नकम् तथा ग्रा[27]ह्य[28]मपि। तन्न भिन्नकालं लिङ्गमनुमानस्य जनकम्। नापि समकालं तस्य जनकत्वविरोधा[29]त्, अविरोधे वानुमानमप्यस्य

१ ज्ञानकाले। २ सर्वज्ञत्व। ३ परेण भवता। ४ ग्रहीतुं शक्यस्य। ५ एतदेव दर्शयति। ६ लोके। ७ अनुमानात्। ८ कियत एव। ९ भिन्नकालः समकालो वा अहम्प्रत्ययः इत्यादि। १० योगाचारस्य। ११ साध्ये अग्न्यादौ। १२ सहोपलम्भादि। १३ लिङ्गं। १४ एतस्मादनुमानादेव। १५ सकलसाध्यपदार्थानां परिज्ञानात्। १६ लिङ्गानामतीतानागतादीनाम्। १७ अनुमानस्य। १८ लिङ्गप्रकारेण। १९ परेण। २० अतीतकारणवादिपक्षे क्षणिकत्वेन नष्टादित्युच्यते भाविकारणवादिपक्षे लिङ्गवत्तासमानत्वमनुत्पन्नं लिङ्गं चानुमानस्य कारणं तदभावे अनुमानलक्षणकार्यानुदयात्। २१ सौगतेनोच्यते चेत्। २२ अतीतकारणवादिपक्षे क्षणिकत्वेन। २३ भाविकारणवादिपक्षे लिङ्गमवभासमानत्वमनुमानस्य कारणं तदभावे कार्यानुदयात्। २४ अतीते भविष्यति काले। २५ लिङ्गम्। २६ अनुमानस्य। २७ वस्तु। २८ ज्ञानस्य भवति। २९ सव्येतरगोविषाणवत्।

1 "भिन्नकालस्यापि योग्यस्यैवार्थस्य ज्ञानेन ग्रहणात्। दृश्यते हि—पूर्वचरादिलिङ्गप्रभवप्रत्ययाद्भिन्नकालस्यापि प्रतिनियतस्यैव शकटोदयाद्यर्थस्य ग्रहणम्।"

स्या० रत्ना० पृ० १६३।

2 "किञ्चैवंवादिनस्ते कथं भिन्नकालं किञ्चिदपि लिङ्गं साध्यस्यानुमापकं स्यात्? अनुमापकत्वे वा किञ्चिदेकमेव भस्मादिलिङ्गमतीतस्य पावकादेरिव समस्तस्याप्यतीतानागतानुमेयस्य प्रतिपत्तिहेतुः स्याद् भिन्नकालत्वाविशेषात्।" स्या० रत्ना० पृ० १६३।

जनकं भवेत्, तथा चान्योन्याश्रयान्नैकस्यापि सिद्धिः । अथानुमानमेव जन्यम्[1], तत्रैव जन्यताप्रतीतेः; न; अनुमानव्यतिरेकेणार्थे ग्राह्यतावज्जन्यतायाः[2] प्रतीत्यभावात् । न च स्वरूपमेव[3] जन्यता; लिङ्गेऽपि तत्सद्भावेन जन्यताप्रसक्तेः । तथा चान्योन्यजन्यतालक्षणो दोषः स एवानुषज्यते । अथानयोः[4] स्वरूपाविशेषेऽप्यनुमान एव जन्यता लिङ्गापेक्षया, नतु लिङ्गे तदपेक्षया सेत्युच्यते[5]; तर्हि ज्ञानार्थयोस्तदविशेषेपि अर्थस्यैव ज्ञानापेक्षया ग्राह्यता न तु ज्ञानस्यार्थापेक्षया सेत्युच्यताम्[6] । न चोत्पत्तिकरणाल्लिङ्गमनुमानस्योत्पादकम्, तस्यास्ततोऽर्थान्तरानर्थान्तरपक्षयोरसम्भवात् । सा हि यद्यनुमानादर्थान्तरम्; तदानुमानस्य न किञ्चित्कृतमित्यस्याभावः । अनुमानस्योत्पत्तिरिति सम्बन्धासिद्धिश्चानुपकारात् । उपकारे वाऽनवस्था[8] । अथानर्थान्तरंभूता[9] क्रियते; तदानुमानमेव तेन[10] कृतं स्यात् । तथा चानुमानं लिङ्गं लिङ्गजन्यत्वादुत्तरलिङ्गक्षणवत् । न च प्राक्तनानुमानोपादानजन्यत्वान्नानुमानं लिङ्गम्; यतस्तदप्यनुमानमन्यतो[11] लिङ्गाच्चेत्तर्हि तदप्यनुमानं[12] लिङ्गं तज्जन्यत्वादुत्तरलिङ्गक्षणवदिति तदवस्थं चोद्यम् । उत्तरमपि तदेवेति चेत्, अनवस्था स्यात् । अथ तथाप्रतीतेर्लिङ्गजन्यत्वाविशेषे[13][14] किञ्चिल्लिङ्गमपरमनुमानम्; तर्हि ज्ञानजन्यत्वाविशेषेपि किञ्चिज्ज्ञानमपरोऽर्थ[15] इति किन्न स्यात्? तथा च 'अर्थो ज्ञानं ज्ञानकार्यत्वादुत्तरज्ञानवत्' इत्ययुक्तम्[16] । न च गृहीतिविधानादर्थस्य[17][18] ग्राह्यतेष्यते[19]; स्वरूपप्रतिनियमात्तदभ्युपगमात्[20] । यथैव ह्येकसामग्र्यधीनानां[21] रूपादीनां[22] चक्षुरादीनां समसमयेऽपि स्वरूपप्रतिनियमादुपादानेतरत्वव्यवस्था[23][24], तथार्थज्ञानयोर्ग्राह्यग्राहकेतरत्वव्यवस्था[25] च भविष्यति ।

ननु[26] यया प्रत्यासत्त्या[27] ज्ञानमात्मानं विषयीकरोति तयैव चेदर्थं

१ लिङ्गेन । २ ता (षष्ठी षष्ठ्यन्तान्मतुरित्यर्थः) (?) । ३ अनुमानस्य । ४ लिङ्गानुमानयोः । ५ परेण भवता । ६ परेण । ७ लिङ्गेन । ८ उत्पत्त्यन्तरान्वेषणात् । ९ अभिन्ना । १० लिङ्गेन । ११ ननु प्राक्तनमनुमानं लिङ्गादुत्पद्यते । १२ प्राक्तनम् । १३ लिङ्गतया अनुमानतया । १४ अनुमानस्य । १५ उत्तरक्षणं । १६ किञ्च । १७ परिच्छित्ति । १८ कारणात् । १९ जैनैः । २० अर्थग्राह्यतास्वरूपस्य प्रतिनियतत्वात् । २१ पूर्वक्षण । २२ उत्तर । २३ उत्तररूपरसयोः उत्तरचक्षुर्ज्ञानयोः । २४ सहकारिकारण । २५ ग्राहक । २६ यदवभासते तज्ज्ञानमित्यनुमानस्य विपक्षे बाधकं प्रमाणम् । २७ शक्त्या ।

1 "ननु यया प्रत्यासत्त्या ज्ञानमात्मानं विषयीकरोति तयैव चेदर्थं तर्हि तयोरैक्यम्...अथान्यया तर्हि स्वभावद्वयापत्तिर्ज्ञानस्य भवेत्, तदपि स्वभावद्वयं यद्यपरेण

तयोरैक्यम्। न ह्येकस्वभाववेद्यमनेकं युक्तमन्यथैकमेव न किञ्चित्स्यात्। अथान्यया; स्वभावद्वयापत्तिर्ज्ञानस्य भवेत्। तदपि स्वभावद्वयं यद्यपरेण स्वभावद्वयेनाधिगच्छति तदाऽनवस्था तद्भेदनेप्यपरस्वभावद्वयापेक्षणात्। ततः स्वरूपमात्रग्राह्येव ज्ञानं नार्थग्राहि; इत्यप्यसमीचीनम्; स्वार्थग्रहणैकस्वभावत्वाद्विज्ञानस्य। स्वभावतद्वत्पक्षोपक्षिप्तदोषपरिहारश्च स्वसंवेदनसिद्धौ भविष्यतीत्यलमतिप्रसङ्गेन। ५

कथञ्चैवंवादिनो रूपादेः सजातीयेतरकर्तृत्वम् तत्राप्यस्य समानत्वात्? तथा हि-रूपादिकं लिङ्गं वा यया प्रत्यासत्त्या सजातीयक्षणं जनयति तयैव चेद्रसादिकमनुमानं वा; तर्हि तयोरैक्यमित्यन्यतरदेव स्यात्। अथान्यया; तर्हि रूपादेरेकस्य स्वभावद्वयमायातं तत्र चानवस्था परापरस्वभावद्वयकल्पनात्। न खलु येन स्वभावेन रूपादिकमेकां शक्तिं बिभर्ति तेनैवापरां तयोरैक्यप्रसङ्गात्। अथ रूपादिकमेकस्वभावमपि भिन्नस्वभावं कार्यद्वयं कुर्यात्तत्करणैकस्वभावत्वात्; तर्हि ज्ञानमप्येकस्वभावं स्वार्थयोः सङ्करव्यतिकरव्यतिरेकेण ग्राहकमस्तु तद्ग्रहणैकस्वभावत्वात्। ननु व्यवहारेण कार्यकारणभावो न परमार्थतस्तेनायमदोषः; तर्हि तेनैवाहमहमिकया प्रतीयमानेन ज्ञानेन नीलादेर्ग्रहणसिद्धेः कथमसिद्धः स्वतोऽवभासमानत्वलक्षणो हेतुर्न स्यात्? १० १५

१ द्वन्द्वः। २ स्वार्थग्रहण। ३ ज्ञान। ४ एकत्वमनवस्था च। ५ ज्ञानान्तरप्रत्यक्षपक्षविक्षेपणान्ते। ६ ज्ञान। ७ ज्ञानाद्वैतपक्षे दोषपरिहारविस्तरेण। ८ स्वभावानवस्थां ब्रुवाणस्य। ९ रसादिलिङ्गं च (?)। १० स्वजातीयं जनयन्विजातीयं जनयेत् (?)। ११ उत्तररूपमुत्तरलिङ्गं च। १२ अनवस्थादिदोषस्य। १३ न्यायस्य। १४ पूर्वं। १५ धूमादि। १६ पूर्वं। १७ स्वभावेन। १८ शक्त्या। १९ उत्तरं। २० रूपलिङ्गं च। २१ विजातीयम्। २२ विजातीयं। २३ रूपरसयोर्लिङ्गानुमानयोर्वा। २४ रूपं वा रसो वा लिङ्गं वा अनुमानं वा स्यात्। २५ लिङ्गस्य। २६ कर्तृ। २७ अन्यथा। २८ लिङ्गं च। २९ रूपादेः। ३० ज्ञानस्य। ३१ रूपादेः। ३२ उपलक्षणात्। ३३ साध्यसाधनभावादि। ३४ कारणेन। ३५ पदार्थस्य। ३६ ज्ञप्ति। ३७ ज्ञानात् (ज्ञानेन) प्रकाशमानत्वात्।

स्वभावद्वयेनाधिगच्छति तदानवस्था...; तदरमणीयम्; स्वार्थग्रहणोभयस्वभावत्वाद्विज्ञानस्य।" स्या० रत्ना० पृ० १६५।

1 "कथञ्चैवंवादिनो रूपादेर्लिङ्गस्य वा सजातीयेतरकर्तृत्वं तत्राप्यस्य पर्यनुयोगस्य समानत्वात्। तथाहि—रूपादिकं लिङ्गं वा यया प्रत्यासत्त्या सजातीयक्षणं जनयति तयैव चेद्रसादिकमनुमानं वा तर्हि तयोरैक्यमित्यन्यतरदेव स्यात्। अथान्यया तर्हि रूपादेरेकस्य स्वभावद्वयमायातं तत्र चानवस्था।" स्या० रत्ना० पृ० १६५।

न चैवंवादिनः[1] स्वरूपस्य[2] स्वतो[3]ऽवगतिर्[4]घटते; समकालस्यास्य प्रतिपत्तावर्थवत्[5] प्रसङ्गात्[6]। न च स्वरूपस्य ज्ञानतादात्म्यान्नायं[7] दोषः; तादात्म्येपि समानेतरकालविकल्पानतिवृत्तेः[8]। ननु ज्ञानमेव स्वरूपम्, तत्कथं[11] तत्र[12] भेदभावी विकल्पोऽवतरतीति चेत्? कुत[13]
५ एतत्[14]? तथा[15] प्रतीतेश्चेत्; इयं यद्यप्रमाणं कथमतस्तत्सिद्धिरतिप्रसङ्गात्[17]? प्रमाणं चेत्; तर्हि स्वपरग्रहणस्वरूपताप्यस्य[18] तथैवास्त्वलं तत्रापि[19] तद्विकल्पकल्पनया[20] प्रत्यक्षविरोधात्[21]। तन्न स्वतोऽवभासमानत्वं हेतुरसिद्धत्वात्[22]।

नापि परतो[23] बोध्यसिद्धत्वात्[24]। न खलु सौगतः कस्यचित्परतोऽ-
१० वभासमानत्वमिच्छति। "नान्यो[1]ऽनुभाव्यो[25] बुद्ध्यास्ति तस्या नानुभवोपरः[26]" [प्रमाणवा० ३।३२७] इत्यभिधानात्[27]। कथं च[28] साध्यसा-[30]

१ समकालो भिन्नकालो वार्थो न ग्राह्य इत्येवं वादिनो योगाचारस्य। २ ज्ञानस्य। ३ ज्ञानात्। ४ परिच्छित्तिः। ५ देशान्तरस्थमपि स्वरूपं गृह्णीयात्समकालत्वे तदुत्पत्तिलक्षणसम्बन्धाभावात्। ६ देशान्तरस्थमपि स्वरूपं गृह्णीयात्समकालत्वात्। ७ दूषणम्। ८ अर्थवत्प्रसङ्गलक्षणः। ९ भिन्न। १० अनतिक्रमणात्। ११ अपि न कुतोऽपि। १२ ज्ञानस्वरूपे। १३ प्रमाणात्। १४ ज्ञानमेव स्वरूपं। १५ ज्ञानस्य स्वरूपतया। १६ ज्ञानमेव स्वरूपसिद्धिः। १७ संशयादेरपि तत्सिद्धिः। १८ ज्ञानस्य। १९ अर्थग्रहणे। २० समानेतरकाल इत्यादि। २१ अन्यथा। २२ जैनस्य। २३ ज्ञानात्। २४ योगाचार। २५ अर्थः। २६ ग्राह्यः। २७ ग्राहकः। २८ ग्राह्यग्राहकवैधुर्यात्स्वयं सैव प्रकाशते। (इति उत्तरार्द्धं श्लोकस्य)। २९ सौगतैः परतः प्रतिभासानभ्युपगमे। ३० किञ्च।

1 "नान्योनुभाव्यस्तेनास्ति तस्या नानुभवोऽपरः।
तस्यापि तुल्यचोद्यत्वात् स्वयं सैव प्रकाशते॥ प्रमाणवा० ३।३२७।
"बुद्ध्या योऽनुभूयते स नास्ति परः, यथा अन्योऽनुभाव्यो नास्ति तथा निवेदितम्। तस्मात्तर्हि परोऽनुभवो बुद्धेरस्तु; न; तत्रापि ग्राह्यग्राहकलक्षणभावः। परं हि संवेदनस्वरूपेऽवस्थितं कथं परस्यानुभवः साक्षात्करणादिकं प्रत्याख्यातम्। तत्संवेदनानुप्रवेशे च तयोरेकत्वमेव स्यात्, तथा च स्वयं सैव प्रकाशते न ततः पर इति स्थितम्।"
प्रमाणवार्त्तिकालंकार।

2 "नच प्रकाशनलक्षणस्य हेतोः ज्ञानत्वेन व्याप्तिसिद्धिर्यतः स्वरूपमात्रपर्यवसितं ज्ञानं सर्वमवभासनं ज्ञान (नत्व) व्याप्तमिति नाधिगन्तुं समर्थम्। नच सकलसम्बन्ध्यप्रतिपत्तौ सम्बन्धप्रतिपत्तिः। उक्तं च—
द्विष्ठसम्बन्धसंवित्तिर्नैकरूपप्रवेदनात्।
द्वयस्वरूपग्रहणे सति सम्बन्धवेदनम्॥"
सन्मति० टी० पृ० ४८३।

धनयोर्व्याप्तिः सिद्धा ? यतो 'यदवभासते तज्ज्ञानम्' इत्यादि सूक्तं स्यात्। न खलु स्वरूपमात्रपर्यवसितं ज्ञानं 'निखिलमवभासमानत्वं ज्ञानत्वव्याप्तम्' इत्यधिगन्तुं समर्थम्। न चाखिलसम्बन्ध्यप्रतिपत्तौ सम्बन्धप्रतिपत्तिः। "द्विष्ठसम्बन्धसंवित्तिः" [ ] इत्याद्यभिधानात्। न च विवक्षितं ज्ञानं ज्ञानत्वमवभासमानत्वं ५ चात्मन्येव प्रतिपद्य तयोर्व्याप्तिमधिगच्छतीत्यभिधातव्यम्; तत्रैवानुमानप्रवृत्तिप्रसङ्गात्। तत्र च तत्प्रवृत्तेर्वैयर्थ्यं साध्यस्याध्यक्षेण सिद्धत्वात्। अथ सकलं ज्ञानमात्मन्यनयोर्व्याप्तिं प्रत्येतीत्युच्यते; ननु सकलज्ञानाज्ञाने कथमेवं वादिना प्रत्येतुं शक्यम्? न चासिद्धव्याप्तिकलिङ्गप्रभवादनुमानात्तथागतस्य स्वमतसिद्धिः; १० परस्यापि तथाभूतात्कार्याद्यनुमानादीश्वराद्यभिमतसाध्यसिद्धिप्रसङ्गात्। न चानयोः कुतश्चित् प्रमाणाद्व्याप्तिः प्रसिद्धा; ज्ञानवज्जडस्यापि परतो ग्रहणसिद्ध्या हेतोरनैकान्तिकत्वानुषङ्गात्।

यदप्युक्तम्-जडस्य प्रतिभासायोगादिति, तत्राप्यप्रतिपन्नस्यास्य प्रतिभासायोगः, प्रतिपन्नस्य वा ? न तावदप्रतिपन्नस्यासौ १५

१ निश्चितम्। २ ज्ञातुं। ३ सम्बन्धिनोरवभासमानत्वज्ञानत्वयोः। ४ नैकरूपप्रवेदनात्। द्वयोः स्वरूपग्रहणे सति सम्बन्धवेदनम्। ५ प्रत्यक्षमनुमानं वा। ६ स्वस्मिन्नेव। ७ अवभासमानत्वज्ञानत्वयोः। ८ परेण। ९ अन्यथा। १० ज्ञानस्य। ११ जानाति। १२ परेण। १३ अपरिज्ञाने (सति)। १४ सकलं ज्ञानमित्यादिवादिना। १५ नीलादीनां ज्ञानरूपतासिद्धिः। १६ यौगादेरपि। १७ असिद्धव्याप्तिकलिङ्ग। १८ कार्यादेर्हेतोरुत्पन्नादनुमानात्। १९ ता हेतोः सम्बन्धि। २० किञ्च। २१ अन्यथा। २२ साध्यसाधनज्ञानयोर्व्याप्तिज्ञानेन ग्रहणम्। २३ नीलादेरर्थस्य। २४ ज्ञानात्। २५ प्रतिभासमानत्वादित्यस्य। २६ परेण। २७ परेण त्वया अज्ञातस्य।

1 "तदुक्तमन्यैः-द्वयसम्बन्धसंवित्तिर्नैकरूपप्रवेदनात्।..."

तत्त्वार्थश्लो० पृ० ४२१।

2 "नच ज्ञानत्वस्वप्रकाशनयोः साध्यसाधनयोः कुतश्चित्प्रमाणाद् व्याप्तिसिद्धिः पारमार्थिकी; ज्ञानवज्जडस्यापि परतो ग्रहणसिद्धेरनैकान्तिकत्वप्रसक्तेः।"

संमति० टी० पृ० ४८४।

3 "जडस्य प्रतिभासायोगोऽप्यप्रतिपन्नस्य प्रतिपत्तुमशक्यः, शक्यत्वे वा सन्तानान्तरस्यापि स्वप्रकाशायोगः प्रतिपत्तव्यः इति तस्याप्यभावः प्रसक्तः। तथा च परप्रतिपादनार्थं प्रकृतहेतूपन्यासो व्यर्थः। अथ प्रतिपन्नस्य जडस्य प्रकाशायोगः; तथापि विरोधः-जडः प्रतीयते प्रकाशायोगश्च इति।" संमति० टी० पृ० ४८४

"यदप्युच्यते-जडस्य प्रतिभासायोगादिति; तत्राप्यप्रतिपन्नस्य प्रतिभासायोगः प्रतिपन्नस्य वा।" स्या० रत्ना० पृ० १६५।

प्रत्येतुं शक्यः, अन्यथा सन्तानान्तरस्य[1]ाप्रतिपन्नस्य[2] स्व[3]प्रतिभासा-योगस्यापि प्रसिद्धेस्तस्याप्यभावः। तथा च तत्प्रतिपादनार्थं[4] प्रकृतहेतू[5]पन्यासो व्यर्थः। अथ सन्तानान्तरं स्वस्य स्वप्रतिभा[6]सयोगं[7] स्वयमेव प्रतिपद्यते[8], जडस्यापि प्रतिभासयोगं तदेव प्रत्येतीति[9] ५ किन्नेष्यते[10]? प्रतीतेरु[12]भयत्रापि[11] समानत्वात्। अथाऽप्रतिपन्नेपि जडे विचारात्तदयोगः, ननु तेनाप्यस्याविषयीकरणे स एवं दोषो विचारस्तत्र न प्रवर्त्तते। 'तत[13] एव वात्र तदयोगप्रतिपत्तिः' इति विषयीकरणे[14] वा विचारवत्प्रत्यक्षादिना[15]प्यस्य[16] विषयीकरणात्प्रति-भासायोगोऽसिद्धः[18]। न च प्रतिपन्नस्य[17] जडस्य प्रतिभासायोग-१० प्रतिपत्तिरित्यभिधातव्यम्[19]: 'जडप्रतीतिः, प्रतिभासायोगश्चास्य' इत्यन्योन्यविरोधात्।

साध्य[20]विकलश्चायं[21] दृष्टान्तः, नैयायिकादीनां[1] सुखादौ ज्ञानरूप-त्वासिद्धेः। अस्मादेव[22] हेतोस्तत्रापि ज्ञानरूपतासिद्धौ दृष्टान्तान्तरं[23] मृग्यम्। तत्राप्येतच्चोद्ये तदन्तरान्वेषणमित्यनवस्था। नीलादेर्दृ-१५ ष्टान्तत्वे चान्योऽन्याश्रयः–सुखादौ ज्ञानरूपतासिद्धौ नीलादेस्तन्नि-दर्शनात्तद्रूपतासिद्धिः, तस्यां च तन्निदर्शनात्सुखादेस्तद्रूपतासिद्धि-रिति। न च सुखादौ दृष्टान्तमन्तरेणापि तत्सिद्धिः; नीलादावपि तथैव तदापत्तेस्तत्र दृष्टान्तवचनमनर्थकमिति निग्रहाय जायेत।

अथ[24][2] सुखादे[25]रज्ञानत्वे–ततः[26] पीडानुग्रहा[27]भावो भवेत्। ननु २० सुखाद्येव पीडानुग्रहौ, ततो भिन्नौ वा? प्रथमपक्षे–के[28] ज्ञानत्वेन व्याप्तौ तौ प्रतिपन्नौ[29]; यतस्तदभावे न स्याताम्। व्यापकाभावे हि

---

१ शिष्यादिकम्। २ सौगतैः। ३ स्वरूपेण। ४ बोधनार्थं। ५ प्रतिभास-मानत्वात्। ६ ता। ७ संबन्धं। ८ जानाति। ९ परेण। १० सौगतस्य तव। ११ सन्तानान्तरप्रतिभासयोगे जडप्रतिभासयोगे च। १२ प्रतिभासायोगः। १३ विचारात्। १४ जडस्य विचारेण। १५ अनुमान। १६ जडस्य। १७ द्वितीयविकल्पस्य। १८ असम्भव। १९ परेण। २० ज्ञान। २१ सुखादिः। २२ प्रतिभासमानत्वादित्यस्मात्। २३ सुखादिधर्मी ज्ञानं भवतीति साध्यं प्रतिभास-मानत्वात्। दृष्टान्तेन भाव्यं ह्यत्र। २४ यदवभासते तज्ज्ञानमित्यत्रानुमाने। २५ दुःख। २६ सुखाद्दुःखात्। २७ उपकार। २८ अन्वयदृष्टान्ते। २९ परेण।

---

1 "नच नैयायिकादीन् प्रति सुखादेर्ज्ञानता सिद्धेति साध्यविकलता दृष्टान्तस्य...।"
संमति० टी० पृ० ४८४।
स्या० रत्ना० पृ० १६७।

2 "अथ सुखादेरज्ञानत्वे ततोऽनुग्रहाद्यभावो भवेत्, ननु किं सुखमेवाऽनुग्रहः, उत ततो भिन्नम्?..." संमति० टी० पृ० ४८५।

नियमेन व्याप्याभावो भवति । अन्यथा[1] प्राणादेः[2] सात्मकत्वेन केचिद्[3]व्याप्त्यसिद्धावप्यात्माऽभावे[4] स न भवेत् ततः केवलव्यतिरेकिहेत्वगमकत्वप्रदर्शनमयुक्तम्[5] । तन्नाद्यपक्षः[6] । नापि द्वितीयो यतो यदि नाम सुखदुःखयोर्ज्ञानत्वाभावः[7], अर्थान्तरभूतानुग्रहाद्यभावे[8] किमायातम्[9] ?' न खलु यज्ञदत्तस्य गौरत्वाभावे देवदत्ताभावो दृष्टः । ननु सुखादौ जैनस्य प्रकाशमानत्वं ज्ञानरूपतया व्याप्तं प्रसिद्धमेवेत्यप्यसारम्; यतः स्वतः प्रकाशमानत्वं ज्ञानरूपतया व्याप्तं यत्तस्यात्र[10] प्रसिद्धं तन्नीलाद्यर्थे[11](र्थे) नास्तीत्यसिद्धो हेतुः । यत्तु परतः प्रकाशमानत्वं तत्र प्रसिद्धं तन्न ज्ञानरूपतया व्याप्तम् । प्रकाशमानत्वमात्रं[12] च नीलादावुपलभ्यमानं[13] जडत्वेनाविरुद्धत्वं नैकान्ततो[14] ज्ञानरूपतां प्रसाधयेत् ।

यदप्युक्तम्[15]–तैमिरिकस्य[16] द्विचन्द्रादिवत्कर्त्रादिकमविद्यमानमपि प्रतिभातीति, तदपि स्वमनोरथमात्रम्[17]; अत्र[18] बाधकप्रमाणाभा[19]वात् । द्विचन्द्रादौ हि विपरीतार्थ[20]ख्यापकस्य बाधकप्रमाणस्य

---

१ ज्ञानत्वेन पीडानुग्रहयोर्व्याप्त्यसिद्धावपि ज्ञानाभावे पीडानुग्रहयोरभावो यदि । २ उच्छ्वासादेः । ३ अन्वयदृष्टान्ते । ४ घटादौ । ५ सौगतस्य । ६ श्रेयान् । ७ तर्हि । ८ पीडा । ९ दूषणम् । १० दृष्टान्ते । ११ दार्ष्टान्तिके । १२ तृतीयो विकल्पः । १३ ज्ञायमानं । १४ सर्वथा । १५ परेण । १६ पुरुषस्य । १७ सौगत । १८ घटमहमात्मना वेद्मीति कर्त्रादौ । १९ नेदं कर्त्रादिकमिति । २० एकचन्द्र ।

---

1 "सम्प्रति द्वयोरेव सन्देहे अनैकान्तिकत्वं वक्तुमाह अनयोरेव अन्वय–व्यतिरेकरूपयोः सन्देहाद् संशयहेतुः । उदाहरणम्—

'सात्मकं जीवच्छरीरं प्राणादिमत्त्वादिति ।' .... (पृ० १०५)

कस्मादनैकान्तिकः ?

'साध्येतरयोरतो निश्चयाभावात्'

साध्यस्य इतरस्य च विरुद्धस्य सन्दिग्धान्वयव्यतिरेकान्निश्चयाभावात् । सपक्षविपक्षयोर्हि सपदत्त्व (सदसत्त्व) सन्देहेन साध्यस्य न विरुद्धस्य सिद्धिः । नच सात्मकानात्मकाभ्यां च परः प्रकारः संभवति । ततः प्राणादिमत्त्वात् धर्मिणि जीवच्छरीरे संशयः आत्मभावाभावयोरित्यनैकान्तिकः प्राणादिरिति ।"

न्यायबिन्दु पृ० ११० ।

2 "यच्चेदम् 'नीलमहं वेद्मि' इति ज्ञानं तैमिरिकस्य द्विचन्द्रदर्शनवद्भ्रान्तमिति; असदेतत्; अबाध्यमानत्वात् । तथाहि–तैमिरिकस्य तिमिरविनाशादूर्ध्वमेकत्वज्ञाने सति द्विचन्द्रदर्शनं भ्रान्तमिति प्रतिभाति अनुत्पन्नतिमिरस्यान्यस्य, नैवं नीलमित्यादिज्ञाने विपरीतार्थग्राहकप्रमाणानुपपत्तेर्मिथ्यात्वमिति ।"

प्रश० व्योमवती पृ० ५३० ।

सद्भावाद्युक्तमसत्प्रतिभासनम्, न पुनः कर्त्रादौ[2]; तत्र तद्विपरीताद्वैत[1]प्रसाधकप्रमाणस्य कस्यचिदसम्भवेनाऽबाधकत्वात्[1]। प्रतिपादितश्च[3] बाध्यबाधकभावो ब्रह्माद्वैतविचारे तदलमतिप्रसङ्गेन[4]। अद्वैतप्रसाधकप्रमाणसद्भावे च द्वैता[6]पत्तितो नाद्वैतं भवेत्। प्रमाणा-
५ भावे चाद्वैताप्रसिद्धिः प्रमेयप्रसिद्धेः प्रमाणसिद्धिनिबन्धनत्वात्।

किञ्चा[5]द्वैत[2]मित्यत्र प्रसज्य[7]प्रतिषेधः, पर्युदासो[8] वा? प्रसज्यपक्षे नाद्वैतसिद्धिः। प्रतिषेधमात्रपर्यवसितत्वात्तस्य। प्र[9]धानोपसर्ज[10]न-भावेना[11]ङ्गा[12]ङ्गि[13]भावकल्पनायामपि द्वैतप्र[14]सङ्गः। पर्युदासपक्षेपि द्वैत-प्रसक्तिरेव प्रमाणप्रतिपन्नस्य द्वैतलक्षणवस्तुनः प्रतिषेधेनाऽद्वैत-
१० प्रसिद्धेरभ्युपगमात्। द्वैतादद्वैतस्य व्य[15]तिरेके च[16] द्वैतानुषङ्ग एव। अव्यतिरेकेपि द्वैतप्रसक्तिरेव भिन्ना[17]दभि[18]न्नस्याभेदे(दे[19])विरोधात्[3] ॥ छ ॥

---

१ एकत्व। २ कर्त्रादेः। ३ जैनेन मया। ४ बाध्यबाधकभावसमर्थनेन। ५ किंच। ६ प्रमाणमेकमद्वैतमेकं चेति द्वैतापत्तिः। ७ प्रसक्तस्य प्रतिषेधः प्रसज्यः। ८ सदृशग्राही पर्युदासः। ९ द्वैतनिषेधस्य प्रधानभावेन अद्वैतविधेरप्रधानत्वेन। १० गौण। ११ कृत्वा। १२ विशेषण। १३ विशेष्य। १४ इदं विशेष्यमिदं च विशेषणमित्यनेन प्रकारेण द्वैतप्रसङ्गः। १५ भिन्नत्वे। १६ किञ्च। १७ द्वैतात्। १८ अद्वैतस्य। अव्यतिरिक्तस्य। १९ एकत्वे।

---

1 "हेतोरद्वैतसिद्धिश्चेद् द्वैतं स्याद्धेतुसाध्ययोः।
हेतुना चेद्विना सिद्धिर्द्वैतं वाङ्मात्रतो न किम्॥"

आप्तमीमांसा का० २६। अष्टसह० पृ० १६०।

"अद्वैतप्रतिपादकस्य प्रमाणस्य सद्भावे द्वैतापत्तितो नाद्वैतम्। प्रमाणाभावे अद्वैता-सिद्धिः।" संमति० टी० पृ० ४२८।

2 "अद्वैतं न विना द्वैतादहेतुरिव हेतुना।
संज्ञिनः प्रतिषेधो न प्रतिषेध्यादृते क्वचित्॥"

आप्तमीमांसा का० २७। अष्टसह० पृ० १६१।

"किञ्च, अद्वैतमित्यत्र प्रसज्यप्रतिषेधः, पर्युदासो वा?...द्वैतादद्वैतस्य व्यतिरेके च द्वैतप्रसक्तिरेव, परस्परव्यावृत्तस्वरूपाव्यावृत्तात्मकत्वे तस्य द्विरूपताप्रसक्तेः। अव्यतिरेके पुनर्द्वैतप्रसक्तिः।" संमति० टी० पृ० ४२८।

3 अस्य च विज्ञानाद्वैतवादस्य विविधरीत्या खण्डनं निम्नग्रन्थेषु द्रष्टव्यम्—शाबरभा० बृहती, पञ्जिका, शास्त्रदीपिका १।१।५। मीमांसाश्लो० निरालम्बनवाद। योगसू०, व्यासभा०, तत्त्ववै० ४।१४। ब्रह्मसू० शां० भा० भामती २।२।२५। विधिवि० पृ० २५४। न्यायमं० पृ० ५२६। आप्तमी०, अष्टश०, अष्टसह० पृ० २४२। न्यायकुमु० पृ० ११९। यत्त्यनु० पृ० ४५। तत्त्वार्थश्लो० पृ० ३६। संमतिटी० पृ० ३४९। स्या० रत्ना० पृ० १४९। स्या० मं० का० २६।

एतेन "चित्रप्रतिभासाप्येकैव बुद्धिर्बाह्यचित्रविलक्षणत्वात्, शक्यविवेचनं हि बाह्यं चित्रमशक्यविवेचनास्तु बुद्धेर्नीलादय आकाराः" इत्यादिना चित्राद्वैतमप्युपवर्णयन्नपाकृतः; अशक्यविवेचनत्वस्यासिद्धेः । तद्धि बुद्धेरभिन्नत्वं वा, सहोत्पन्नानां नीलादीनां बुद्ध्यन्तरपरिहारेण विवक्षितबुद्ध्यैवानुभवो वा, भेदेन विवेचनाभावमात्रं वा प्रकारान्तरासम्भवात्? तत्राद्यपक्षे साध्यसमो हेतुः; तथाहि-यदुक्तं भवति-'बुद्धेरभिन्ना नीलादयस्ततोऽभिन्नत्वात्' तदेवोक्तं भवति 'अशक्यविवेचनत्वात्' इति । द्वितीयपक्षेप्यनैकान्तिको हेतुः; सचराचरस्य जगतः सुगतज्ञानेन सहोत्पन्नस्य बुद्ध्यन्तरपरिहारेण तज्ज्ञानस्यैव ग्राह्यस्य तेन सहैकत्वाभावात् । एकत्वे वा संसारी सुगतः संसारिणो वा सर्वे सुगता भवेयुः, संसारेतररूपता चैकस्य ब्रह्मवादं समर्थयते । अथ सुगतसत्ताकालेऽन्यस्योत्पत्तिरेव नेष्यते तत्कथमयं दोषः? नन्वेवं "प्रमाणभूताय" [प्रमाणसमु० १।१] इत्यादिना केनासौ स्तूयते? कथं चापराधीनोऽसौ येनोच्यते—

"तिष्ठन्त्येव पराधीना येषां च महती कृपा" [प्रमाणवा० २।१९९] इत्यादि । न खलु वन्ध्यासुताधीनः कश्चिद्भवितुमर्हति ।

---

१ ज्ञानाद्वैतनिराकरणपरेण ग्रन्थेन । २ नानाप्रकार । ३ पूर्ववादे ज्ञानगतानां नीलाद्याकाराणां भ्रान्तत्वम् । अत्र (चित्राद्वैतवादे) ज्ञानगताकाराणां सत्यत्वम् । ४ विसदृश । ५ असिद्धो हेतुरित्युक्ते सत्याह । ६ घटपटस्तम्भादि । ७ इयं बुद्धिरमी नीलादय आकारा इति विभागः कर्तुं न शक्यते । ८ योगाचारः । ९ नीलादीनाम् । १० बुध्या सह प्रादुर्भूतानाम् । ११ स्वरूपम् । १२ साध्येन समं हेतुं दर्शयति । १३ साध्यमेवोक्तं भवति । १४ साध्यमेवोक्तं भवति । १५ नान्यज्ञानस्य । १६ जगदभिन्नत्वात् । १७ सुगताभिन्नत्वात्सुगतस्वरूपवत् । १८ असंसार । १९ सुगतस्य । २० परेण मया । २१ पुरुषेण । २२ भवता । २३ सुगताः । २४ (निर्वाणोपि-निर्वाणेऽपि) परप्राप्तेः (परे प्राप्ते) कृपार्द्रीकृतचेतस इत्यस्योत्तरमर्द्धं ज्ञेयम्) । २५ ना ।

---

1 "किमिदमशक्यविवेचनत्वं नाम-ज्ञानाभिन्नत्वम्, सहोत्पन्नानां नीलादीनां ज्ञानान्तरपरिहारेण तज्ज्ञानेनैवानुभवः, भेदेन विवेचनाभावमात्रं वा?"

न्यायकुमु० पृ० १२७ ।

2 "अकल्पकल्पासङ्ख्येयभावनापरिवर्द्धिताः ।
तिष्ठन्त्येव पराधीना येषां तु महती कृपा ॥"

अभिसमयालंकारालोक पृ० १३४ ।

"तदुक्तम्-निर्वाणेऽपि परे प्राप्ते कृपार्द्रीकृतचेतसाम् ।
तिष्ठन्त्येव पराधीना येषां तु महती कृपा ॥" न्यायकुमु० पृ० ५ ।

मार्गोपदेशोपि व्यर्थो विनेयाऽसत्त्वात्। नापि ततः कश्चित्सौगतीं गतिं गन्तुमर्हति। सुगतसत्ताकालेऽन्यस्यानुत्पत्तेस्तत्कालश्चात्यन्तिक इति। बुद्ध्यन्तरपरिहारेण विवक्षितबुद्ध्यैवानुभवश्चासिद्धः; नीलादीनां बुद्ध्यन्तरेणाप्यनुभवात्। ज्ञानरूपत्वात्तत्सिद्धौ चान्यो-
५ न्याश्रयः—सिद्धे हि ज्ञानरूपत्वे नीलादीनां बुद्ध्यन्तरपरिहारेण विवक्षितबुद्ध्यैवानुभवः सिद्ध्येत्, तत्सिद्धौ च ज्ञानरूपत्वमिति। भेदेन विवेचनाभावमात्रमप्यसिद्धम्; बहिरन्तर्देशसम्बन्धित्वेन नीलतज्ज्ञानयोर्विवेचनप्रसिद्धेः। एकस्याक्रमेण नीलाद्यनेकाकारव्यापित्ववत् क्रमेणाप्यनेकसुखाद्याकारव्यापित्वसिद्धेः सिद्धः
१० कथञ्चिदक्षणिको नीलाद्यनेकार्थव्यवस्थापकः प्रमातेत्यद्वैताय दत्तो जलाञ्जलिः॥ छ॥

ननु चाक्रमेणाप्येकस्यानेकाकारव्यापित्वं नेष्यते।

"किं स्यात्सा चित्रतैकस्यां न स्यात्तस्यां मतावपि।
यदीदं स्वयमर्थेभ्यो रोचते तत्र के वयम्॥"

१५ [प्रमाणवा० ३।२१०]

---

१ अन्योत्पत्तिरहिता (?)। २ संसारिणामेवोत्पत्तिरहितः (?)। ३ किञ्च। ४ एकस्य बोधस्य। ५ चित्राद्वैतवादिनः। ६ युगपत्। ७ ग्राहकः। ८ पुरुषः। ९ जैनं प्रति माध्यमिको ब्रूते। १० भावस्य। ११ परेण मया माध्यमिकेन। १२ मम दूषणं किं स्यात्। १३ चित्रत्वेनाभिप्रेतायां मतौ एकस्यां सा चित्रता न स्यात्तदा किं स्यान्मम दूषणम्। १४ प्रसिद्धा। १५ चित्रत्वेनाभिप्रेतायां। १६ बुद्धौ। १७ चित्रत्वम्। १८ ज्ञानेभ्यः।

---

1 "अशक्यविवेचनत्वं साधनमसिद्धमुक्तम्–नीलतद्वेदनयोः अशक्यविवेचनत्वासिद्धेः, अन्तर्बहिर्देशतया विवेकेन प्रतीतेः।" अष्टसह० पृ० २५४।

2 "अत्र देवेन्द्रव्याख्या–यदि नामैकस्यां मतौ न सा चित्रता भावतः स्यात्। किं स्यात् को दोषः स्यात्। तथा च भावतश्चित्रया मत्या भावा अपि चित्रा सिध्यन्ति" तद्वदेव च सत्या भविष्यन्तीति प्रष्टुरभिप्रायः। शास्त्रकार आह–न स्यात्तस्यां मतावपि इति। व्याहतमेतत्–एका चित्रा च इति। एकत्वे हि सत्यनानारूपापि वस्तुतो नानाकारतया प्रत्यवभासते न पुनर्भावतस्ते तस्य आकाराः सन्तीति बलादेष्टव्यम्। एकत्वहानिप्रसंगात्। नहि नानात्वैकत्वयोः स्थितेरन्यः कश्चिदाश्रयोऽन्यत्र भाविकाभ्यामाकारभेदाभेदाभ्याम्। तत्र यदि बुद्धिर्भावतो नानाकारैका चेष्यते तदा सकलं विश्वमप्येकं द्रव्यं स्यात्, तथाच सहोत्पत्त्यादिदोषः। तस्मान्नैकाऽनेकाकारा। किन्तु यदीदं स्वयमर्थानां रोचते अतद्रूपाणामपि सतां यदेतत्ताद्रूप्येण प्रख्यानं तदेतद्वस्तुत एव स्थितं तत्त्वमिति। तत्र के वयं निषेद्धारः? एवमस्तु इत्यनुमन्यत इति।"

स्या० रत्ना० पृ० १८०।

इत्यभिधानात्। तत्कथं तद्दृष्टान्तावष्टम्भेन क्रमेणाप्येकस्या[1]-नेकाकारव्यापित्वं साध्येत[2]? तदप्यसमीचीनम्; एवमतिसूक्ष्मे[3]-क्षिकया[4] विचारयतो माध्यमिकस्य सकलशून्यतानुषङ्गात्। तथा हि-नीले प्रवृत्तं ज्ञानं पीतादौ न प्रवर्त्तते इति पीतादेः सन्तानान्तरवदभावः। पीतादौ च प्रवृत्तं तन्नीले न प्रवर्त्तते[5] इत्यस्याप्यभावस्तद्वत्। नीलकुवलयसूक्ष्मांशे च प्रवृत्तिमज्ज्ञानं नेतरांशनिरीक्षणे क्षममिति तदंशानामप्यभावः। संविदितांशस्य चावशिष्टस्य स्वयमनंशस्याप्रतिभासनात्सर्वाभावः[6]। नीलकुवल-यादिसंवेदनस्य स्वयमनुभवात्सत्त्वे च अन्यैरनुभवात्सन्तानान्तरा[7][8][9][10][11]-णामपि तदस्तु। अथान्यैरनुभूयमानसंवेदनस्य सद्भावासिद्धेस्तेषा-[12][13][14][15][16] १०
मभावः, तर्हि तन्निषेधासिद्धेस्तेषां सद्भावः किन्न स्यात्? अथ[17][18] तत्संवेदनस्य सद्भावासिद्धिरेवाभावसिद्धिः; नन्वेवं तन्निषेधा-[19] सिद्धिरेव तत्सद्भावसिद्धिरस्तु। भावाभावाभ्यां परसंवेदनसन्देहे[20] चैकान्ततः सन्तानान्तरप्रतिषेधासिद्धेः। कथं च ग्रामारामादि-प्रतिभासे प्रतीतिभूधरशिखरारूढे सकलशून्यताभ्युपगमः प्रेक्षा- १५ वतां युक्तः प्रतीतिबाधनात्? दृष्टहानेरदृष्टकल्पनायाश्चानुषङ्गात्।[21][22]

किञ्च, अखिलशून्यतायाः प्रमाणतः प्रसिद्धिः, प्रमाणमन्तरेण

१ बोधस्य। २ भवता जैनेन। ३ चित्रकज्ञानस्य नानात्वसमर्थनप्रकारेण। ४ ज्ञानेन। ५ उद्धृतस्य। ६ नीलकुवलयस्य। ७ चित्र। ८ स्वेनैव। ९ नीलकुवल-यस्य। १० सन्तानान्तरैः। ११ स्वयम्। १२ भो माध्यमिक। १३ सन्तानान्तरैः। १४ स्वयम्। १५ नीलकुवलयसंवेदनवादिनं प्रति। १६ साधकप्रमाणाभावात्। १७ बाधकप्रमाणाभावात्। १८ भो माध्यमिक। १९ अन्यैरनुभूयमानसंवेदनस्य। २० माध्यमिको ब्रूते—अन्यसंवेदनसद्भावे साधकं प्रमाणं नोपन्यस्तं भवद्भिः। अस्माभिश्च बाधकं प्रमाणं नोपन्यस्तमिति परसंवेदनसन्देहः (इत्युक्ते जैनः प्राह)। २१ ग्रामादि। २२ सकलशून्यत्वस्य।

1 "नन्वेवं नीलवेदनस्यापि प्रतिपरमाणुभेदात् नीलाणुसंवेदनैः परस्परं भिन्नैर्भवितव्यं तत्र एकनीलपरमाणुसंवेदनस्याप्येवं वेद्यवेदकसंविदाकारभेदात् त्रितयेन भवितव्यम्। वेद्याकारादिसंवेदनत्रयस्यापि प्रत्येकमपरस्ववेद्यादिसंवेदनत्रयेण इति परापरवेदनत्रयकल्पनादनवस्थानान्न क्वचिदेकवेदनसिद्धिः संविदद्वैतविद्विषाम्।"

अष्टसह० पृ० ७७। न्यायकुमु० पृ० १३४।

2 "प्रमाणानुपपत्त्युपपत्तिभ्याम्। न्यायसू० ४।२।३०। "एवं च सति सर्वं नास्तीति नोपपद्यते। कस्मात्? प्रमाणानुपपत्त्युपपत्तिभ्याम्, यदि सर्वं नास्तीति प्रमाणमुपपद्यते; 'सर्वं नास्ति' इत्येतद्व्याहन्यते। अथ प्रमाणं नोपपद्यते; सर्वं नास्तीत्यस्य कथं सिद्धिः? अथ प्रमाणमन्तरेण सिद्धिः; सर्वमस्ति इत्यस्य कथन्न सिद्धिः?"

वा ? प्रथमपक्षे कथं सकलशून्यता वास्तवस्य तत्सद्भावावेदकप्रमाणस्य सद्भावात् ? द्वितीयपक्षे तु कथं तस्याः सिद्धिः प्रमेयसिद्धेः प्रमाणसिद्धिनिबन्धनत्वात् ? तदेवं[1] सुनिश्चितासम्भवद्बाधकप्रमाणत्वात् प्रतीतिसिद्धमर्थव्यवसायात्मकत्वं ज्ञानस्याभ्युप५गन्तव्यम्, अन्यथाऽप्रामाणिकत्वप्रसङ्गः स्यात् ॥ छ ॥

अथेदानीं प्राक् प्रतिज्ञातं स्वव्यवसायात्मकत्वं ज्ञानविशेषणं व्याचिख्यासुः[2] स्वोन्मुखतयेत्याद्याह—

स्वोन्मुखतया प्रतिभासनं स्वस्य व्यवसायः ॥ ६ ॥

स्वस्य विज्ञानस्वरूपस्योन्मुखतोल्लिखिता[3] तया इतीत्थंभावे भा[4] ।
१० प्रतिभासनं संवेदनमनुभवनं स्वस्य प्रमाणत्वेनाभिप्रेतविज्ञानस्वरूपस्य सम्बन्धी व्यवसायः ।

स्वव्यवसायसमर्थनार्थमर्थव्यवसायं स्वपरप्रसिद्धम्[5] 'अर्थस्य' इत्यादिना दृष्टान्तीकरोति ।

अर्थस्येव[6] तदुन्मुखतया ॥ ७ ॥

१५ इवशब्दो यथार्थे । यथाऽर्थस्य घटादेस्तदुन्मुखतया स्वोल्लिखितया प्रतिभासनं व्यवसायः तथा ज्ञानस्यापीति ।

स्यान्मतम्[7] — न ज्ञानं स्वव्यवसायात्मकमचेतनत्वाद् घटादिवत् । तदचेतनं[8] प्रधानविवर्त्तत्वात्तद्वत्[1] । यत्तु चेतनं तन्न प्रधानविवर्तः, यथात्मा; इत्यप्यसङ्गतम्; तस्यात्मविवर्त्तत्वेन[9][10] प्रधानविवर्त्तत्वा२० सिद्धेः; तथाहि-ज्ञानविवर्त्तवानात्मा[11] दृष्टृत्वात्[12][2] । यस्तु न तथा स

१ पूर्वोक्तप्रकारेण ज्ञानस्यार्थव्यवसायात्मकत्वे समर्थिते सति । २ व्याख्यातुमिच्छुः । ३ ग्राहकता । ४ तृतीया । ५ वादिप्रतिवादिप्रसिद्धम् । ६ अर्थं । ७ तव साङ्ख्यस्य । ८ ज्ञानम् । ९ ज्ञानस्य । १० पर्यायत्वेन । ११ जैनानुमानम् । १२ चेतयितृत्वात् ।

न्यायभा० ४।२।३०। प्रश० व्योमवती पृ० ५३२ । अष्टसह० पृ० ११५ । सन्मति० टी० ४५५ । स्या० म० का० १७ । रत्नाकरावता० पृ० ३२ ।

1 "प्रकृतेर्महान् ततोऽहङ्कारः…।" सांख्यका० २२ ।

"तस्याः प्रकृतेर्महान् उत्पद्यते प्रथमः कश्चित् । महान् बुद्धिः मतिः प्रज्ञा संवित्तिः ख्यातिः चितिः स्मृतिरासुरी हरिः हरः हिरण्यगर्भ इति पर्यायाः ।"

माठरवृत्ति, गौडपादभा० २२ । सांख्यसं० पृ० ६ ।

2 "ज्ञानपरिणामवानात्मा द्रष्ट (ष्टृ) त्वात् । यस्तु ज्ञानपरिणामवान्न भवति नासौ द्रष्टा यथा लोष्टादिः, द्रष्टा चात्मा तस्माज्ज्ञानपरिणामवानिति ।" स्या० रत्ना० पृ० २३४ ।

न द्रष्टा यथा घटादिः, द्रष्टा चात्मा तस्मात्तद्विवर्त्तवानिति। प्रधानस्य ज्ञानवत्त्वे तु तस्यैव द्रष्टृत्वानुषङ्गादात्मकल्पनानर्थक्यम् । 'चेतनोऽहम्' इत्यनुभवाच्चैतन्यस्वभावतावच्चात्मनो 'ज्ञाताऽहम्' इत्यनुभवाद् ज्ञानस्वभावताप्यस्तु विशेषाभावात् । ज्ञानसंसर्गात् 'ज्ञाताऽहम्' इत्यात्मनि प्रतिभासो न पुनर्ज्ञानस्वभावत्वादित्यप्य- ५ समीक्षिताभिधानम्; चैतन्यादिस्वभावस्याप्यभावप्रसङ्गात् । चैतन्यसंसर्गाद्धि चेतनो भोक्तृत्वसंसर्गाद्भोक्तौदासीन्यसंसर्गादुदासीनः शुद्धिसंसर्गाच्छुद्धो न तु स्वभावतः । प्रत्यक्षादिप्रमाणबाधोभयत्र । न खलु ज्ञानस्वभावताविकलोऽयं कदाचनाप्यनुभूयते, तद्विकलस्यानुभवविरोधात् । १०

आत्मनो ज्ञानस्वभावत्वेऽनित्यत्वापत्तिः प्रधानेपि समाना । तत्परिणामस्य व्यक्तस्यानित्यत्वोपगमात् अदोषे तु, आत्मपरिणामस्यापि ज्ञानविशेषादेरनित्यत्वे को दोषः? तस्यात्मनः कथञ्चिद्व्यतिरेके भङ्गुरत्वप्रसङ्गः प्रधानेपि समानः । व्यक्ताव्यक्तयोरव्यतिरेकेपि व्यक्तमेवानित्यं परिणामत्वान्न पुनरव्यक्तं परिणामित्वा- १५ दित्यभ्युपगमे, अत एव ज्ञानात्मनोरव्यतिरेकेपि ज्ञानमेवानित्यमस्तु विशेषाभावात् । आत्मनोऽपरिणामित्वे तु प्रधानेपि तदस्तु ।

---

१ ज्ञान । २ आशङ्कायाम् । ३ चैतन्यस्वभावतया अनुभवः, ज्ञानस्वभावताया अनुभव इत्यविशेषः । ४ कथं तथा हि । ५ नैर्मल्य । ६ आत्मनश्चैतन्यादिस्वभावाभावे ज्ञानस्वभावाभावे च । ७ आत्मा । ८ आत्मा आत्मना । ९ ज्ञानमनित्यमिति वचनात् ज्ञानस्वरूपवत् । १० महदादेः । ११ ज्ञानादेः । १२ प्रधानस्यानित्यत्वापत्तिलक्षणोऽदोषः । १३ का । १४ अभेदे । १५ आत्मनः । १६ विनश्वरत्व । १७ महदादेः । १८ प्रधानस्य ।

---

1 "ननु ज्ञानसंसर्गाज्ज्ञाताऽहमित्यात्मनि प्रतिभासो न पुनर्ज्ञानस्वभावत्वादिति चेत्; तदपि न्यायबाह्यम्; चैतन्यादिस्वभावस्याप्येवमभावप्रसक्तेः । चैतन्यसंसर्गाद्धि चेतनो भोक्तृत्वसंसर्गाद् भोक्ता औदासीन्यसंसर्गादुदासीनः शुद्धिसंसर्गात् शुद्धो न तु स्वभावादित्यपि वक्तुं शक्यत एव ।" स्या० रत्ना० पृ० २३५ ।

2 "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥" सांख्यका० १० ।

"प्रधानस्य चाऽनित्याद् व्यक्तादनर्थान्तरभूतस्य नित्यतां प्रतीयन् पुरुषस्यापि ज्ञानादशाश्वतादनर्थान्तरभूतस्य नित्यत्वमुपैतु सर्वथा विशेषाभावात् ।" आप्तप० पृ० ४१ ।

"न चात्मनः अनित्यज्ञानपरिणामात्मके अनित्यत्वापत्तिः; प्रधानेऽपि तत्प्रसङ्गात् । व्यक्ताऽव्यक्तयोरभेदेऽपि व्यक्तमेवाऽनित्यं परिणामत्वात् नत्वव्यक्तं परिणामित्वादित्यन्यत्रापि समानम् ।" न्यायकुमु० पृ० १९१ । स्या० रत्ना० पृ० २३५ ।

व्यक्तापेक्षया[1] परिणामि प्रधानं न शक्त्यपेक्षया[2] सर्वदा स्थास्नुत्वादित्यभिधाने[3] तु आत्मापि तथास्तु[4] सर्वथा विशेषाभावात्, अपरिणामिनोऽर्थक्रियाकारित्वासम्भवेनाग्रेऽसत्त्वप्रतिपादनाच्च[5]। स्वसंवेदनप्रत्यक्षाविषयत्वे चास्याः[6] प्रतिनियतार्थव्यवस्थापकत्वं
५ न स्यात्। तद्व्यवस्थापकत्वं हि तदनुभवनम्, तत्कथं बुद्धेरप्रत्यक्षत्वे घटेत? आत्मान्तरबुद्धितोपि[7][8][9] तत्प्रसङ्गात्[10], न चैवम्। ततो बुद्धिः स्वव्यवसायात्मिका कारणान्तरनिरपेक्षतयाऽर्थव्यवस्थापकत्वात्[11], यत्पुनः स्वव्यवसायात्मकं न भवति न तत्तथाऽर्थव्यवस्थापकं[12] यथाऽऽदर्शादीति। अर्थव्यवस्थितौ तस्याः
१० पुरुषभोगापेक्षत्वात्[13] "बुद्ध्यध्यवसितमर्थं[14] पुरुषश्चेतयते[15]" [ ][2]
इत्यभिधानात्। ततोऽसिद्धो[16] हेतुरित्यपि[17] श्रद्धामात्रम्[18]; भेदेनानयोरनुपलम्भात्[19][20]। एकमेव ह्यनुभवसिद्धं[1] संविद्रूपं हर्षविषादाद्यनेकाकारं विषयव्यवस्थापकमनुभूयते, तस्यैवैते 'चैतन्यं बुद्धिरध्यवसायो ज्ञानम्' इति पर्यायाः। न च शब्दभेदमात्राद्वास्तवोऽर्थभे-
१५ दोऽतिप्रसङ्गात्[21][22]।

संसर्गविशेषवशाद्विप्रलब्धो[23][24] बुद्धिचैतन्ययोः[25] सन्तमपि[26] भेदं

---

१ महदादि, द्वितीयपक्षे सुखादि। २ सूक्ष्मस्वभावा द्वितीयपक्षे साम्यावस्था शक्तिः। ३ परेण। ४ व्यक्त्यपेक्षया परिणाम्यस्तु। ५ व्यक्त्यपेक्षया परिणाम्यस्तु। ६ किञ्च। ७ बुद्धेः। ८ अन्यथा। ९ पुरुषान्तर। १० स्वस्य। ११ व्यक्तिलक्षणाया बुद्धेः बुद्धिलक्षणात्कारणादपरं कारणान्तरमिन्द्रियम्। १२ कारणनिरपेक्षतया। १३ अनुभवः स एव कारणम्। १४ बुद्धिप्रतिबिम्बितम्। १५ अनुभवति। १६ कारणान्तरसापेक्षतया। १७ बुद्धेः। १८ भो साङ्ख्य। १९ बुद्धिपुरुषयोः। २० बुद्ध्यनुभवयोः। २१ अन्यथा। २२ इन्द्रः शक्र इत्यादौ स स्यात्। २३ सम्बन्ध। २४ वञ्चितो नरः। २५ चैतन्यं पुरुषस्य रूपम्। २६ विद्यमानम्।

---

1 "एकमेवेदं संविद्रूपं हर्षविषादाद्यनेकाकारविवर्त्तं पश्यामः।"

न्यायमं० पृ० ७४। न्यायकुमु० पृ० १९३।

"बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्। न्यायसू० १।१।१५। प्रश० भा० पृ० १७१।

"बुद्धिरध्यवसायो हि संवित्संवेदनं तथा।
संवित्तिश्चेतना चेति सर्वं चैतन्यवाचकम्॥" तत्त्वसं० का० ३०३।

सन्मति० टी० पृ० ३००। स्या० रत्ना० पृ० २३८।

2 "तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।
गुणकर्तृत्वेऽपि तथा कर्त्तेव भवत्युदासीनः॥ २०॥

यस्माच्चेतनस्वभावः पुरुषः तस्मात् तत्संयोगादचेतनं महदादि लिङ्गम् अध्यवसायाभिमानसङ्कल्पालोचनादिषु वृत्तिषु चेतनावत् प्रवर्त्तते। को दृष्टान्तः? तद्यथा-

नावधारयत्ययोगोलकादिवाग्नेः[1]। न चात्रापि भेदो[2] नास्तीत्यभिधा[3]-तव्यम्; उभयत्र[4] रूपस्पर्शयोर्भेदप्रतीतेः। अयोगोलकस्य हि वृत्त[5]सन्निवेशः कठिनस्पर्शश्चान्योऽग्नि(ग्ने)र्भासुररूपोष्णस्पर्शाभ्यां प्रमाणतः[6] प्रतीयते। ततो यथात्रा[7]ऽन्योऽन्यानुप्रवेशलक्षणसंसर्गा-द्विभाग[8]प्रतिपत्त्यभावस्तथा प्रकृते[9]पीत्यप्यसाम्प्रतम्; वह्न्ययोगोल-कयोरप्यभेदात्। अयोगोलकद्रव्यं हि पूर्वा[10]कारपरित्यागेनाग्निस-न्निधानाद्विशिष्टरूपस्पर्शपर्यायाधारमेकमेवोत्पन्नमनुभूयते आमा-कारपरित्यागेन पाकाकाराधारघटद्रव्यवत्। कथं तर्हि तस्यो[11]त्तर-कालं तत्पर्यायाधारतायाः विनाशप्रतीतिः? इत्यप्यचोद्यम्; उत्पत्त्यनन्तरमेव तद्विनाशप्रतीतेः। किञ्चिद्ध्यौपाधिकं वस्तुरूप-मुपाध्य[12]पायानन्तर[13]मेवापैति[14], यथा जपापुष्पसन्निधानोपनीतस्फ-टिकरक्तिमा। किञ्चित्तु कालान्तरे[15][16], मनोज्ञाङ्गनादिविषयोपनीता[17]-त्मसुखादिवत्। सकलभावानां[18] स्वतोऽन्यतश्च निवर्त्तन[19]प्रतीतेः[20]। तन्नाग्न्ययोगोलकयोर्भेदः।

तद्वदिहा[21][22]प्येकस्मिन् स्वपरप्रकाशात्मपर्याये[23]ऽनुभूयमाने नान्य[24]-सद्भावोऽभ्युपगन्तव्यः[25], अन्यथा न क्वचिदे[26]कत्वव्यवस्था स्यात्। सकलव्यवहारोच्छेदप्रसङ्गश्च; अनिष्टा[27]र्थपरिहारेणेष्टे[28] वस्तुन्येक-स्मिन्ननुभूयमानेऽप्य[30]न्यसद्भावाशङ्कया क्वचित्प्रवृत्त्या[31]द्यभावात्[32]। ततोऽबाधितैकत्वप्रतिभासादपरपरिहारेणावभासमाने वस्तुन्ये-

---

१ निश्चिनोति। २ अयोगोलकाग्न्योः। ३ जैनेन भवता। ४ अयोगोलकाग्न्योः। ५ वर्तुलाकारः। ६ प्रत्यक्षात्। ७ अयोगोलकाग्न्योः। ८ भेद। ९ बुद्धिचैतन्ये (तन्ययोः)। १० कृष्णत्वादिलक्षण। ११ अयोगोलस्य। १२ करण। १३ विनाश। १४ अपगच्छति। १५ उपाध्यपाये सति। १६ अपैति। १७ स्रक्चन्दनादि। १८ पदार्थ। १९ परिणमन। २० चूतफलादिवत्। २१ अयोगोलकवत्। २२ बुद्धिचैतन्ये (तन्ययोः)। २३ स्वयम्। २४ चैतन्य। २५ परेण। २६ विषये। २७ कथम्। २८ अहिकण्टकादि। २९ वनितादौ। ३० अहिकण्टकादि। ३१ विषये। ३२ निवृत्ति।

अनुष्णाशीतो घटः शीताभिरद्भिः संसृष्टः शीतो भवति, अग्निना संयुक्त उष्णो भवति, एवं महदादिलिङ्गमचेतनमपि भूत्वा चेतनावद् भवति।"

माठरवृत्ति, गौडपादभा०।

1 "वह्न्ययोगोलकयोरपि अन्योन्यं भेदाभावात्। अयोगोलकद्रव्यं हि पूर्वाकार-परित्यागेन अग्निसन्निधानाद् विशिष्टरूपस्पर्शपर्यायाधारमेकमेवोत्पन्नमनुभूयते आमा-कारपरित्यागेन पाकाकाराधारघटद्रव्यवत्।"

न्यायकुमु० पृ० १९१। स्या० रत्ना० पृ० २३७।

कत्वव्यवस्थामिच्छतां अनुभवसिद्धकर्तृत्वभोक्तृत्वाद्यनेकधर्माधा-
र[2]चिद्विवर्त्त[3]स्याप्येकत्वमभ्युपगन्तव्यं तदविशेषात्। न चात्रैकत्व-
प्रतिभासे किञ्चि[4]द्बाधकम्, यतो द्विचन्द्रादिप्रतिभासवन्मिथ्यात्वं
स्यात्। स्वसंवेदनप्रसिद्धस्वपरप्रकाशरूपचिद्विवर्त्तव्यतिरेकेणान्य-
५ चैतन्यस्य कदाचनाप्यप्रतीतेः। न चोपदेश[5]मात्रात्प्रेक्षावतां निर्बाध-
बोधा[6]धिरूढो[7]ऽर्थो[8]ऽन्य[9]थ[10]प्रतिभासमानो[11]ऽन्यथापि कल्पयितुं युक्तो-
ऽति[12]प्रसङ्गात्। चैतन्यस्य च स्वपरप्रकाशात्मकत्वे किं बुद्धिसाध्यं
येना[13]सौ कल्प्यते?

बुद्धेश्चा[14]चेतनत्वे विषयव्यवस्थापकत्वं न स्यात्। आ[15]कारवत्त्वा-
१० त्तत्त्वमित्यप्ययुक्तम्; अचेतनस्याकारत्वे(रवत्त्वे)प्यर्थव्यवस्थापक-
त्वासम्भवात्, अन्यथाऽऽदर्शा[16]देरपि तत्प्रसङ्गाद्बुद्धिरूपतानुषङ्गः।
अन्तः[17]करणत्व-पुरुषोपभोग[18]प्रत्यासन्नहेतु[19]त्व[20]लक्षणविशेषोपि मनोऽ-
क्षादि[21]नानैकान्तिक[22]त्वान्न बुद्धे[23]र्लक्षणम्। यदि च अ[24]यमेकान्तः-
'अन्तः[25]करणमन्तरेणार्थमात्मा न प्रत्येति' इति, कथं तर्हि अ[26]न्तः-
१५ करण[27]प्रत्यक्षता? अन्या[28]न्तःकरणबिम्बादेवेति चेत्; अनवस्था।
अन्या[29]न्तःकरणबिम्बमन्तरेणान्तःकरणप्रत्यक्षतायां च अर्थप्रत्यक्ष-
तापि तथैवास्त्वलं तत्परिकल्पनया। अन्तःकरणप्रत्यक्षताभावे
च कथं तद्गता[30]र्थबिम्बग्रहणम्? न ह्यादर्शाग्रहणे तद्गतार्थप्रतिबि-
म्बग्रहणं दृष्टम्।

२० विषयाकारधारित्वं च बुद्धेरनुपपन्नम्, मूर्त्तस्यामूर्त्ते प्रति-

१ परेण। २ आत्मनः। ३ बोधस्य। ४ प्रमाण। ५ आगमात्। ६ बुद्धिलक्षण। ७ एकत्वेन। ८ स्वसंवेदनप्रत्यक्ष। ९ बुद्धिलक्षणः। १० एकत्वेन प्रतिभासमानः। ११ बुद्धिचैतन्यमिति द्वयरूपतया। १२ अन्यथा। १३ केन कारणेन। १४ किञ्च। १५ अर्थाकारवत्त्वात्। १६ जलादेः। १७ मध्ये (?)। १८ अनुभव। १९ कारणं बुद्धिरूपम। २० व्यस्तलक्षण। २१ अदृष्ट। २२ अतिव्याप्तेः। २३ अन्तःकरणत्वं बुद्धेर्लक्षणमित्युक्ते मनसा व्यभिचारः। कथं मनो ह्यन्तःकरणं भवति न च तस्य बुद्धिरूपता। पुरुषोपभोगप्रत्यासन्नहेतुत्वं बुद्धेर्लक्षणमित्युक्ते चाक्षादिना व्यभिचारस्तथाहि—पुरुषोपभोगप्रत्यासन्नहेतुरिन्द्रियं भवति न च तस्य बुद्धिरूपता। २४ किञ्च। २५ बुद्धिम्। २६ बुद्धि। २७ आकार। २८ बुद्धि। २९ बुद्धि। ३० अन्तःकरणगतार्थ।

1 "न चास्या वास्तवचैतन्याभावे विषयव्यवस्थापनशक्तिर्युक्ता।"

न्यायकुमु० पृ० १९३। स्या० रत्ना० पृ० २३८।

2 "न विषयाकारधारि ज्ञानममूर्त्तत्वात्, यदमूर्त्तं तद् विषयाकारधारि न भवति यथा आकाशम्, अमूर्त्तञ्च ज्ञानमिति। तद्धारित्वे वा अमूर्त्तत्वमस्य विरुध्यते।"

न्यायकुमु० पृ० १९३। स्या० रत्ना० पृ० २३८।

विम्बासम्भवात्। तथा हि—न विषयाकारधारिणी बुद्धिरमूर्त्तत्वादाकाशवत्, यत्तु विषयाकारधारि तन्मूर्त्तं यथा दर्पणादि। न चासिद्धो हेतुः; तस्याः सकलवादिभिरमूर्त्तत्वाभ्युपगमात्। अन्यथा बाह्येन्द्रियप्रत्यक्षत्वप्रसङ्गो दर्पणादिवदेव। [1]अतिसूक्ष्मत्वात्तदप्रत्यक्षत्वे तद्गतार्थप्रतिविम्बप्रत्यक्षतापि न स्यात्। मू[2]र्तस्य ५ [3]चेन्द्रियादिद्वा[4]रेणैव संवेदनसम्भवात्। तदभावेऽसंविदितत्वप्रसङ्गश्च। सर्वथा परोक्षत्वाभ्युपगमे चा[5]स्या मीमांसकमतानुषङ्गः॥ छ॥

[6]एतेन बौ[7]द्धोऽ[8]प्याकारवत्[9]त्वेन ज्ञाने प्रामाण्यं प्रतिपादयन्प्रत्याख्यातः। प्रत्यक्षविरोधाच्च[10]: प्र[11]त्यक्षे[12]ण विषया[13]काररहितमेव ज्ञानं १० प्रतिपुरुषमहमहमिकया घ[14]टादिग्राहकमनुभूय[15]ते न पुनर्दर्पणादिवत्प्रतिविम्बाक्रान्तम्। विषयाकारधारित्वे च[16] ज्ञानस्यार्थे दूरनिकटादिव्यवहाराभावप्रसङ्गः। न खलु स्वरूपे स्वतोऽभिन्नेऽनुभूयमाने सो[17]ऽस्ति, न[18] चैवम्; 'दूरे पर्वतो निकटे मदीयो बाहुः' इति व्यवहारस्याऽस्ख[19]लद्रूपस्य प्रती[20]तेः। त[21]तस्तदन्यथानुपपत्तेर्निराकारं तत्। न चाकाराधाय[22]कस्य दूरादितया तथा व्यवहारो १५

१ हेतोः। २ पदार्थस्य। ३ किञ्च। ४ आलोकादि। ५ किञ्च। ६ बुद्धेर्विषयाकारधारित्वनिराकरणपरेण ग्रन्थेन। ७ योगाचारः। ८ सौत्रान्तिकः (?)। ९ पदार्थस्य। १० किञ्च। ११ सौत्रान्तिकः (?)। १२ स्वसंवेदनेन। १३ अर्थ। १४ पदार्थ। १५ स्वयं ज्ञानेन। १६ किञ्च। १७ दूरनिकटादिव्यवहारः। १८ अस्त्वेवमिति चेत्। १९ अव्यभिचरत्। २० प्रतिभासनात्। २१ साकारत्वे दूरनिकटादिव्यवहारो न घटते यतः। २२ समर्पकस्य पदार्थस्य।

1 "स्वसंवित्तिः फलञ्चास्य ताद्रूप्यादर्थनिश्चयः।
विषयाकार एवास्य प्रमाणं तेन मीयते॥" प्रमाणसमु० १।१०।

"अर्थसारूप्यमस्य प्रमाणम्।" न्यायबि० १।१९।

2 "दूरासन्नादिभेदेन व्यक्ताव्यक्तं न युज्यते।
तत्स्यादालोकभेदाच्चेत् तत्पिधानापिधानयोः॥
तुल्या दृष्टिरदृष्टिर्वा सूक्ष्मोंशस्तस्य कश्चन।
आलोकेन न मन्देन दृश्यतेऽतो भिदा यदि॥"
प्रमाणवा० ३।४०८-९।

"स्वतोऽभिन्नस्य चाकारस्य ज्ञानग्राह्यत्वे अर्थे दूरातीतादिव्यवहारो न स्यात्।"
न्यायकुमु० पृ० १६९।

युक्तः, दर्पणादौ तथानुपलम्भात्।[1] दीर्घस्वापवतश्च[2] प्रबोधचेतसो[3] जनकस्य जाग्रद्दशाचेतसो दूरत्वेनातीतत्वेन चात्रापि दूरातीतादिव्यवहारानुषङ्गः स्यात्।

किञ्च, अर्थादुपजायमानं[4] ज्ञानं यथा तस्य नीलतामनुकरोति ५ तथा यदि जडतामपि; तर्हि जडमेव तत् स्यादुत्तरार्थक्षणवत्।[3] अथ जडतां नानुकरोति; कथं तस्या ग्रहणम्[5]? तदग्रहणे नीलाकारस्याप्यग्रहणम् अन्यथा[6] तयोर्भेदो[7]ऽनेकान्तो[8] वा। नीलाकारग्रहणेपि च, अगृहीता[9] जडता कथं तस्येत्युच्येत? अन्यथा[10] गृहीतस्य स्तम्भस्यागृहीतं त्रैलोक्य(क्यं)रूपं भवेत्। तथा चैकोपलम्भो[11][12] १० नैकत्वसाधनम्।[13] अथ नीलाकारवज्जडतापि प्रतीयते किन्त्वतदाकारेण[14][15][16] ज्ञानेन, न; तर्हि नीलताप्यतदाकारेणैवानेन[17] प्रतीयताम्। तथाहि—यद्येन[18] स्वात्मनो[19]ऽर्थान्तरभूतं प्रतीयते तत्तेनातदाकारेण यथा स्तम्भादेर्जाड्यम्, प्रतीयते च स्वात्मनोऽर्थान्तरभूतं नीलादिकमिति। किञ्च, नीलाकारमेव ज्ञानं जडतां प्रतिपद्यते, ज्ञानान्तरं[20] १५ वा? आद्यविकल्पे नीलाकारतां[21] स्वात्मभूततया, जडतां[22] त्वन्यथा[23] तज्ज्ञानातीत्यर्द्धजरतीयन्यायानुसरणं[2] ज्ञानस्य। अथ ज्ञानान्तरेण सा

---

१ पुरुषस्य। २ किञ्च। ३ ज्ञानस्य। ४ पुरुषस्य। ५ परिच्छित्तिः। ६ जडस्याग्रहणेपि नीलस्य ग्रहणं चेत्। ७ नीलजडयोः। ८ गृह्यमाणाऽगृह्यमाणधर्मानेकस्यार्थस्येति च। ९ किञ्च। १० अगृहीतापि नीलस्य धर्मश्चेत्। ११ यतः। १२ ज्ञानम्। १३ किन्त्वनेकत्वसाधनम्। १४ विशेषे। १५ अजडाकारेण। १६ निराकारेण। १७ अनीलाकारेण। १८ नीलादिकं धर्मी अतदाकारेण ज्ञानेन प्रतीयते इति साध्यो धर्मः। तेन स्वात्मनोऽर्थान्तरभूततया प्रतीयमानत्वात्। १९ ज्ञानरूपात्। २० कर्तृ। २१ नीलाकारतया। २२ अजडाकारतया। २३ अस्वात्म(अस्वात्म)भूततया चेत्।

---

1 "न चाकाराधायकस्य दूरातीतत्वात्तथा व्यवहारः इत्यभिधातव्यम्; जाग्रच्चेतसो दूरातीतत्वेन प्रबोधचेतसि तथा व्यवहारप्रसङ्गात्।" न्यायकुमु० पृ० १६९।

2 "अथ नीलतां तत्तदाकारतया प्रतिपद्यते जडतां त्वतदाकारतया तदिदमर्धजरतीयन्यायानुसरणम्।" न्यायकुमु० पृ० १६८।

"अर्धं जरत्याः कामयन्ते अर्धं नेति।" पात० महाभाष्य ४।१।७८।

"अर्धं मुखमात्रं वृद्धायाः कामयते नाङ्गानि सोऽयमर्धजरतीयन्यायः।" ब्रह्मसू० शा० भा० रत्नप्रभा १।२।८।

3 "अर्थेन सर्वात्मना तत्र स्वाकाराधाने ज्ञानस्य जडताप्रसक्तेः उत्तरार्थक्षणवत्।" शास्त्रवा० टी० पृ० १५९ पू०।

प्रतीयते; तदप्यतदाकारं यथा जडतां प्रतिपद्यते तथाद्य[1](द्यं)नीलतामिति व्यर्थं तदाकारकल्पनम्।

किञ्च, ज्ञानान्तरेण जडतैव केवला[2] प्रतीयते, तद्वन्नीलतापि[3] वा? न तावदुत्तरपक्षः; अर्द्धजरतीयन्यायानुसरणप्रसङ्गात्। प्रथमपक्षे तु नीलताया जडतेयमिति कुतः प्रतीतिः? नाद्यज्ञानात्[4]; तेन नीलाकारमात्रस्यैव[5] प्रतीतेः। नापि द्वितीयात्[6]तस्य जडतामात्रविषयत्वात्[7]। अथोभयविषयं[8] ज्ञानान्तरं[9] परिकल्प्यते[10], तच्चेदुभयत्र[11] साकारम्; स्यात्[12] स्वयं[13] जडता[14]। निराकारं चेत्; परमत[15]प्रसङ्गः। क्वचित्[16]साकारतायामुक्तदोषो[17]ऽनवस्था।

ननु निराकारत्वे ज्ञानस्याखिलं निखिलार्थवेदकं तत्स्यात् क्वचित्[18]प्रत्यासत्ति[19]विप्रकर्षा[20]भावादित्यप्यपेशलम्; प्रतिनियतसामर्थ्येन तत्[21]तथाभूत[22]मपि प्रतिनियतार्थव्यवस्थापकमित्यग्रे वक्ष्यते। 'नीलाकारवज्जडाकारस्यादृष्टे[23]न्द्रियाद्याकारस्य[24] चानुकरण[25]प्रसङ्गः कारणत्वाविशेषात्[26]प्रत्यासत्ति[27]विप्रकर्षा[28]भावाच्च' इति चोद्ये[29] भवतोपि[30] योग्यतैव शरणम्।

यच्चोच्यते[31]–'यथैवाहारकालादेः[1] समाने[32]ऽपत्यं[33] जननीपित्रोस्तदे[34]कमाकारं धत्ते नान्यस्य कस्यचित्, तथा चक्षुरादेः कारणत्वाविशेषेपि नीलस्यैवाकारमनुकरोति ज्ञानं नान्यस्य' इति; तन्निरा[35]कारज्ञानेपि समानम्। तत्कार्यत्वा[36]विशेषेपि हि यया प्रत्यासत्त्या[37] ज्ञानं[38] नीलमेवा[39]नुकरोति तयैव सर्वत्रा[40]नाकारत्वाविशेषेपि

---

१ आद्यज्ञानम्। २ नीलतारहिता। ३ जडतया युक्ता नीलता। ४ प्रथमज्ञानात्। ५ न जडतायाः। ६ ज्ञानान्तरात्। ७ न नीलतायाः। ८ जडता नीलता (च) विषयो यस्य। ९ तृतीयम्। १० परेण। ११ नीलतायां जडतायां च। १२ स्यात्। १३ स्वस्य। १४ ज्ञानस्य। १५ जैन। १६ नीलतायाम्। १७ उक्तदोषपरिहारार्थं ज्ञानान्तरेण जडता प्रतीयते इति चेद्व(द)न्यानवस्था। १८ अर्थे। १९ ताद्रूप्यतदुत्पत्तिलक्षणसम्बन्ध। २० तदभाव। २१ ज्ञानम्। २२ निराकारम्। २३ पापादि। २४ मनः। २५ किञ्च। २६ ज्ञानस्य। २७ नीलाकारेण प्रत्यासत्ति। २८ इन्द्रियादिना विप्रकर्षस्य। २९ जैनैः। ३० बौद्धस्य। ३१ सौत्रान्तिकेन। ३२ पित्रादेः। ३३ कारणे। ३४ अपत्यम्। ३५ यदुक्तं त्वया समाधानम्। ३६ ज्ञानस्य। ३७ स्वभावेन। ३८ कर्तृ। ३९ अर्थ। ४० पदार्थे।

---

1 "यथैवाहारकालादेः समानेऽपत्यजन्मनि।
पित्रोस्तदेकमाकारं धत्ते नान्यस्य कस्यचित्॥"

प्रमाणवा० ३।३६९।

किञ्चिदेव प्रतिपद्यते न सर्वमिति विभागः किं नेष्यते? अन्योन्याश्रयदोषश्चोभयत्र समानः। किञ्च, प्रतिनियतघटादिवत्सकलं वस्तु निखिलज्ञानस्य कारणं स्वाकारार्पकं वा किन्न स्यात्? वस्तुसामर्थ्यात् किञ्चिदेव कस्यचित् कारणं न सर्वं सर्वस्येति चेत्; ५ तर्हि तत एव किञ्चित्कस्यचिद्ग्राह्यं ग्राहकं वा न सर्वं सर्वस्येत्यलं प्रतीत्यपलापेन।

प्रमाणत्वाच्चास्य तदभावः। अर्थाकारानुकारित्वे हि तस्य प्रमेयरूपतापत्तेः प्रमाणरूपताव्याघातः, न चैवम्, प्रमाणप्रमेययोर्बहिरन्तर्मुखाकारतया भेदेन प्रतिभासनात्। न चाध्यक्षेण ज्ञान- १० मेवाऽर्थाकारमनुभूयते न पुनर्बाह्योऽर्थ इत्यभिधातव्यम्; ज्ञानरूपतया बोधस्यैवाध्यक्षे प्रतिभासनान्नार्थस्य। न ह्यनहङ्कारास्पदत्वेनार्थस्य प्रतिभासेऽहङ्कारास्पदबोधरूपवत् ज्ञानरूपता युक्ता, अहङ्कारास्पदत्वेनार्थस्यापि प्रतिभासोपगमे तु 'अहं घटः' इति प्रतीतिप्रसङ्गः। न चान्यथाभूता प्रतीतिरन्यथाभूतमर्थं व्यवस्था- १५ पयति; नीलप्रतीतेः पीतादिव्यवस्थाप्रसङ्गात्।

बोधस्यार्थाकारतां मुक्त्वार्थेन घटयितुमशक्तेः 'नीलस्यायं बोधः' इति, निराकारबोधस्य केनचित्प्रत्यासत्तिविप्रकर्षासिद्धेः सर्वार्थघटनप्रसङ्गात्सर्वैकवेदनापत्तेः प्रतिकर्मव्यवस्था ततो न स्यादित्यर्थाकारो बोधोऽभ्युपगन्तव्यः। तदुक्तम्—

१ वस्तु। २ परेण ३ नियतार्थप्रतिपत्तौ नियतस्वभावसिद्धिस्तत्सिद्धौ च नियतार्थप्रतिपत्तिसिद्धिरिति, नियतनीलाकारानुकरणे च सिद्धे नियतानुकरणयोग्यतासिद्धिर्ज्ञानस्य तत्सिद्धौ च नियतनीलाकारानुकरणसिद्धिरिति। ४ नियतार्थग्रहणानुकरणयोः। ५ कस्यचित्पदार्थस्य। ६ किञ्च। ७ अर्थाकारानुकारित्वाभावः। ८ अस्तूभयं का नो हानिरिति चेत्। ९ इन्द्रिय। १० परेण। ११ अर्थस्य बोधरूपतया। १२ परेण। १३ अन्यथा। १४ पदार्थेन। १५ तादूप्यतदुत्पत्तिलक्षणसम्बन्ध। १६ तदभाव। १७ ईप् (सप्तमी)। १८ निराकारबोधस्य सम्बन्धात्। १९ सम्बन्ध। २० सर्वार्थानाम्। २१ पटज्ञानस्य पटो विषयो घटज्ञानस्य घट इत्यादि। २२ जैनेन भवता।

1 "प्रमाणरूपताविरोधानुषङ्गश्च।" न्यायकुमु० पृ० १६८।

2 "तदाकारं हि संवेदनमर्थं व्यवस्थापयति नीलमिति पीतञ्चेति।"
प्रमाणवा० अलं पृ० २।

"किमर्थं तर्हि सारूप्यमिष्यते प्रमाणम्? क्रियाकर्मव्यवस्थायास्तल्लोके स्यान्निबन्धनम्।...सारूप्यतोऽन्यथा न भवति नीलस्य कर्मणः संवित्तिः पीतस्य वेति क्रियाकर्मप्रतिनियमार्थमिष्यते।" प्रमाणवा० अलं पृ० ११९।

"अर्थेन घटयत्येनां न हि मुक्ता(क्त्वा)र्थरूपताम् ।
तस्मात्प्रमेयाधिगतेः प्रमाणं मेयरूपता ॥" [प्रमाणवा० ३।३०५]

इत्यनल्पतमोविलसितम्; यतो घटयति सम्बन्धयतीति विवक्षितं ज्ञानम्, अर्थसम्बद्धमर्थरूपता निश्चाययतीति वा? प्रथमपक्षोऽयुक्तः; न ह्यर्थसम्बन्धो ज्ञानस्यार्थरूपतया क्रियते, किन्तु ५ स्वकारणैस्तज्ज्ञानमर्थसम्बद्धमेवोत्पाद्यते । न खलु ज्ञानमुत्पद्य पश्चादर्थेन सम्बध्यात् । न चार्थरूपता ज्ञानस्यार्थे सम्बन्धकारणं तादात्म्याभावानुषङ्गात् । द्वितीयपक्षोप्यसम्भाव्यः; सम्बन्धासिद्धेः । न खलु ज्ञानगतार्थरूपतां अर्थसम्बद्धेन ज्ञानेन सहचरिता क्वचिदुपलब्धा येनार्थसम्बद्धं ज्ञानं सा निश्चाययेत् । विशिष्टविष- १० योत्पाद एव च ज्ञानस्यार्थेन सम्बन्धः, न तु संश्लेषात्मकोऽस्य ज्ञानेऽसम्भवात् । स चेन्द्रियैरेव विधीयते इत्यर्थरूपतासाधनप्रयासो वृथैव । न चैवं सर्वत्रासौ प्रसज्यते; यतो निराकारत्वेप्यवबोधस्य इन्द्रियवृत्त्या पुरोवर्तिन्येवार्थे नियमितत्वान्न सर्वार्थघटनप्रसङ्गः । 'कस्मात्तस्तत्र तन्नियम्यते'? इत्यत्र वस्तुस्वभावैरुत्तरं १५ वाच्यम् । न हि कारणानि कार्योत्पत्तिप्रतिनियमे पर्यनुयोगमर्हन्ति तत्र तस्य वैफल्यात् । साकारत्वेपि चायं पर्यनुयोगः समानः—

१ अन्यत्सन्निकर्षादिकं कर्तृ । २ निर्विकल्पका बुद्धिम् । ३ यस्मात् । ४ प्रमाणं न घटयतीति सम्बन्धः । ५ बुद्धेः । ६ फलज्ञानस्य । ७ सम्बन्धित्वेन । ८ नैयायिकादिकल्पितम् । ९ ज्ञानस्यार्थरूपता । १० अर्थरूपता । ११ भा (?) । १२ कर्त्री । १३ भा । १४ इन्द्रियादिभिः । १५ अर्थसम्बन्धज्ञानार्थरूपतयोः । १६ किञ्च । १७ अन्यथा । १८ अर्थरूपताज्ञानयोः । १९ भा । २० पूर्वस्मिन्विकल्पे इत्यादि द्रष्टव्यम् । २१ वसः । २२ ईपृ । २३ किञ्च । २४ ज्ञाने । २५ ज्ञाने । २६ अर्थरूपताभावे । २७ असन्निहितेऽप्यर्थे । २८ ज्ञानोत्पादलक्षणः सम्बन्धः । २९ व्यापारेण । ३० कारणात् । ३१ ज्ञानम् । ३२ पूर्वपक्षे । ३३ अस्माभिर्जैनैः । ३४ आक्षेपम् । ३५ किञ्च ।

1 "अर्थेन घटयत्येना न हि मुक्त्वार्थरूपताम् ।
अन्यत्स्वभेदो ज्ञानस्य भेदकोऽपि कथञ्चन ॥ ३०५ ॥
तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपता ।" प्रमाणवा० ।

2 "किञ्च, घटयतीति सम्बन्धयति इत्यभिप्रेतम्, अर्थसम्बद्धं निश्चाययति इति वा ?" न्यायकुमु० पृ० १७१ ।

3 "साकारत्वेऽपि चायं पर्यनुयोगः समानः । तथाहि–साकारमपि ज्ञानं किमिति नीलादिकमेव पुरोवर्त्ति तत्सन्निहितमेव च व्यवस्थापयति ? तेनैव तथा तस्य जननादिति चेत् समानमेतन्निराकारेऽपि ।" सन्मति० टी० पृ० ४६० ।
न्यायकुमु० पृ० १७१ ।

साकारमपि हि ज्ञानं किमिति सन्निहितं नीलादिकमेव पुरोवर्त्ति व्यवस्थापयति न पुनः सर्वम्? 'तेनैव च तथा जननात्' इत्युत्तरं निराकारत्वेपि समानम्। किञ्च, इन्द्रियादिजन्यं विज्ञानं 'किमितीन्द्रियाद्याकारं नानुकुर्यात्' इति प्रश्ने भवताप्यत्र वस्तुस्वभाव ५ एवोत्तरं वाच्यम्। साकारता च ज्ञाने साकारज्ञानेन प्रतीयते, निराकारेण वा? साकारेण चेत्; तत्रापि तत्प्रतिपत्तावाकारान्तरपरिकल्पनमित्यनवस्था। निराकारेण चेद्बाह्यार्थस्य तथाभूतज्ञानेन प्रतिपत्तौ को विद्वेषः?

किञ्च, अस्य वादिनोऽर्थेन संवित्तेर्घटनाऽन्यथानुपपत्तेः सन्नि- १० कर्षः प्रमाणम्, अधिगतिः फलं स्यात्, तस्यास्तमन्तरेण प्रतिनियतार्थसम्बन्धित्वासम्भवात्। साकारसंवेदनस्य अखिलसमानार्थसाधारणत्वेन अनियतार्थघटनप्रसङ्गात् निखिलसमानार्थानामेकवेदनापत्तिः, केनचित्प्रत्यासत्तिविप्रकर्षासिद्धेः।

तदुत्पत्तेरिन्द्रियादिना व्यभिचारान्नियामकत्वायोगः। तदुत्पत्ते- १५ स्ताद्रूप्याच्चार्थस्य बोधो नियामको नेन्द्रियादेर्विपर्ययादित्यप्यसाम्प्रतम्; तद्द्वयलक्षणस्यापि समानार्थसमनन्तरप्रत्ययेनानैकान्तिक-

१ व्यवस्थापकत्वप्रकारेण। २ ज्ञानस्य। ३ भवदीयम्। ४ जैनैः कृते। ५ परेण। ६ पूर्वपक्षे। ७ अर्थरूपता। ८ किञ्च। ९ निराकारेण। १० सौत्रान्तिकस्य। ११ ज्ञानस्य। १२ अर्थप्रमितिः। १३ किंच। ताद्रूप्यनिषेधं कुर्वन्ति। १४ अर्थाकारमर्थादुत्पन्नमर्थाध्यवसायि ज्ञानं प्रमाणमिमानि विशेषणानि प्रत्येकं दूषयन्ति। १५ ईप्। १६ अर्थ। १७ ताद्रूप्याभावात्। १८ प्रा(क्त)क्तनज्ञानस्य य एव नीलाद्यर्थो विषयः स एवोत्तरज्ञानस्येति एकसन्तानवर्त्तित्वेन समानोऽर्थ एको नीलः। १९ ईप्। २० प्रथमक्षणे नीलमिदमिति ज्ञानमुत्पन्नं तच्च द्वितीयस्य जनकं तत्र ताद्रूप्यमस्ति तदुत्पत्तिज्ञानत्वेन समानमव्यवहितत्वेनानन्तरमिति। २१ सदृश। २२ प्राक्तनज्ञानेन। २३ तदुत्पत्तेस्ताद्रूप्याच्च यद्यर्थस्य बोधो नियामकः तदा प्राक्तनज्ञानेनानेकान्तात् कथम्? द्वितीयबोधस्य प्राक्तनबोधात्तदुत्पत्तिताद्रूप्यसद्भावेपि द्वितीयबोधेन पूर्वान्तरबोधस्य नियामकत्वायोगात्। ज्ञानं ज्ञानस्य न नियामकं ज्ञानस्य स्वप्रकाशकत्वात्।

1 "साकारता विज्ञानस्य किं साकारेण प्रतीयते, आहोस्विन्निराकारेण?"

सन्मति० टी० पृ० ४६०।

2 "तत्सारूप्यतदुत्पत्ती यदि संवेद्यलक्षणम्।
तथा च स्यात्समानार्थविज्ञानं समनन्तरम्॥"

प्रमाणवा० ३।३२३।

त्वात्। कथं चार्थवदिन्द्रियाकारं नानुकुर्यादसौ तदुत्पत्तेरविशेषात्? तदविशेषेप्यस्य कारणान्तरपरिहारेणार्थाकारानुकारित्वं पुत्रस्येव पित्राकारानुकरणमित्यप्यसङ्गतम्; स्वोपादानमात्रानुकरणप्रसङ्गात्। विषयस्यालम्बनप्रत्ययतया स्वोपादानस्य च समनन्तरप्रत्ययतया प्रत्यासत्तिविशेषसद्भावात् उभयाकारानुकरणे-५ ऽर्थवदुपादानस्यापि विषयतापत्तिरविशेषात्। तज्जन्मरूपाविशेषेप्यध्यवसायनियमात् प्रतिनियतार्थनियामकत्वेऽर्थवदुपादानेप्यध्यवसायप्रसङ्गः, अन्यथोभयत्राप्यसौ मा भूद्विशेषाभावात्। न च तज्जन्मादित्रयसद्भावेप्यर्थप्रतिनियमः; कामलाद्युपहतचक्षुषः शुक्ले शङ्खे पीताकारज्ञानादुत्पन्नस्य तद्रूपस्य तदाकाराध्यवसायिनो १० विज्ञानस्य समनन्तरप्रत्यये प्रामाण्यप्रसङ्गात्। न चैवंवादिनो विज्ञानस्य स्वरूपे प्रमाणता घटते तत्र सारूप्याभावात्।

किञ्च, ज्ञानगतान्नीलाद्याकारात् क्षणिकत्वाद्याकारः किं भिन्नः, अभिन्नो वा? भिन्नश्चेत्; नीलाद्याकारस्याक्षणिकत्वप्रसङ्गस्तद्व्यावृत्तिलक्षणत्वात्तस्य। अथाभिन्नः; तर्हि ततोऽर्थस्य नीलत्वादि-१५

१ किञ्च। ताद्रूप्यनिषेधं कुर्वन्ति। २ ज्ञानस्य। ३ अर्थलक्षणात्कारणादपरमिन्द्रियलक्षणम्। ४ बोधस्य। ५ कारण। ६ अव्यवहितकारण। ७ तदुत्पत्तिलक्षणसम्बन्ध। ८ अर्थपूर्वज्ञाने। ९ तज्जन्मतद्रूपविशेषाभावात्। १० अर्थोपादानाभ्यामुत्पत्तेरविशेषात्। ११ अर्थोपादानाभ्यां। १२ निश्चय। १३ बोधस्य। १४ अर्थोपादानयोः। १५ तज्जन्मरूप। १६ किञ्च इदानीं सह दूषयति। १७ अर्थात्तदुत्पत्त्यादि। १८ बोधस्य। १९ दोष। २० पुरुषस्य। २१ किञ्च। साकारत्वेन ज्ञानस्य प्रामाण्यवादिनः। २२ निरंशत्वादि। २३ अत्रानुमाने घटादिवद् दृष्टान्तः। २४ नीलाकाराज् ज्ञानात्।

1 "न केवलं विषयबलाद् दृष्टेरुत्पत्तिरपि तु चक्षुरादिशक्तेश्च। विषयाकारानुकरणाद्दर्शनस्य तत्र विषयः प्रतिभासते, न पुनः करणम् तदाकाराननुकरणादिति चेत्तर्हि; तदर्थवत्करणमनुकर्तुमर्हति, न चार्थं विशेषाभावात्। दर्शनस्य कारणान्तरसद्भावेऽपि विषयाकारानुकारित्वमेव सुतस्येव पित्राकारानुकरणमित्यपि वार्त्तम्; स्वोपादानमात्रानुकरणप्रसङ्गात्। विषयस्यालम्बनप्रत्ययतया स्वोपादानस्य च समनन्तरप्रत्ययतया प्रत्यासत्तिविशेषाद् दर्शनस्य उभयाकारानुकरणेप्यनुज्ञायमाने रूपादिवदुपादानस्यापि विषयतापत्तिः, अतिशयाभावात्। वर्णादेर्वा तद्वदविषयत्वप्रसङ्गात्।"

अष्टश०, अष्टसह० पृ० ११८।

2 "दर्शनस्य तज्जन्मरूपाविशेषेऽपि तदध्यवसायनियमाद् बहिरर्थविषयत्वमित्यसारम्; वर्णादाविव उपादानेऽपि अध्यवसायप्रसङ्गात्।"

अष्टश०, अष्टसह० पृ० ११८।

वत् क्षणिकत्वादेरपि[1] प्रसिद्धेस्त[2]दर्थमनुमा[3]नमनर्थकम् । तदसिद्धौ वा नीलत्वादेरप्यत[4]ः सिद्धिर्न स्या[5]दविशेषात् । ननु चानेकस्वभावार्थाकार[6]त्वेपि ज्ञानस्य यस्मिन्नेवां[7]शे संस्कारपाटवान्निश्च[8]योत्पादकत्वं तत्रैव प्रामाण्यं नां[9]न्यत्रेति । नन्व[10]सौ[11] निश्चयः साकारः, ५ निराकारो वा ? साकारत्वे-तत्रा[12]पि नीलाद्या[13]कारस्य क्षणिकत्वाद्याकाराद्भेदाभेदपक्षयोः पूर्वो[14]क्तदोषप्रसङ्गः । तत्रा[15]पि निश्चया[16]न्तरकल्पनेऽनवस्था[17] । अथ निरा[18]कारः; तर्हि निश्चया[19]त्मना सर्वार्थेष्वविशि[20]ष्टस्य ज्ञानस्य 'अयमस्या[21]र्थस्य निश्चयः' इति प्रतिकर्मनियमः कुतः सिद्ध्येत् ? निराकारस्यापि कुत[22]श्चिन्निमित्तात् प्रतिकर्म१० सिद्धावन्य[23]त्राप्यत एव तत्सिद्धेः किमा[24]कारकल्पनयेति ?

नन्व[25]स्तु निराकारत्वं विज्ञानस्य; न तु स्वसंविदितत्वं भूतपरिणामत्वाद्दर्पणादिवदित्यप्ययुक्तम्; हेतोरसिद्धेः । भू[26]तपरिणामत्वे हि विज्ञानस्य बाह्येन्द्रियप्रत्यक्षत्वप्रसङ्गो दर्पणादिवत् । सूक्ष्मभूतविशेषपरिणाम[27]त्वान्न तत्प्रसङ्गः; इत्यप्यसङ्गतम्; स[28] हि चैत१५ न्येन[29] सजातीयः, विजातीयो वा तदुत्पादन(तदुपादान)हेतुः स्यात् ? प्रथमपक्षे सिद्धसाध्यता[30]; सूक्ष्मो हि भूतविशे[31]षोऽचेतनद्रव्यव्यावृत्तस्वभावो रूपा[32]दिरहितः सर्वदा बाह्येन्द्रियाविषयः

१ अर्थस्य । २ क्षणिकत्वादि । ३ सर्वं क्षणिकं सत्त्वात् । ४ नीलाकारज्ञानात् । ५ अभिन्नत्वस्य । ६ यस्य ज्ञानस्य । ७ नीले । ८ विकल्प । ९ क्षणिकांशे । १० भो बौद्ध । ११ ज्ञानेनोत्पाद्यः । १२ साकारनिश्चयविषयेऽर्थे । १३ निश्चयगतस्य । १४ अक्षणिकत्वादि । १५ अभिन्नपक्षे । निश्चयगतनीलाद्याकारे । १६ नीलगतक्षणिकत्वनिश्चयपरिहारार्थम् । १७ ग्रन्थानवस्था । १८ निश्चयः । १९ स्वस्वरूपेण । २० साधारणस्य । २१ नीलस्य । २२ योग्यतातः । २३ निराकारज्ञानपक्षेपि । २४ किं प्रयोजनं न किमपि । २५ जैनं प्रति चार्वाको ब्रूते । २६ हेतोरसिद्धत्वमेव दर्शयन्ति । २७ ज्ञानस्य । २८ सूक्ष्मभूतविशेषः । २९ ज्ञानेन । ३० अस्माकं जैनानाम् । ३१ प्राणी । ३२ रसगन्धवर्णशब्दैश्च ।

1 "सूक्ष्मो भूतविशेषश्चेदुपादानं चितो मतम् ।
स एवात्मास्तु चिज्जातिसमन्वितवपुर्यदि ॥ ११० ॥
तद्विजातिः कथन्नाम चिदुपादानकारणम् ।
भवतस्तेजसोऽम्भोवत् तथैवादृष्टकल्पना ॥ १११ ॥
सत्त्वादिना समानत्वाच्चिदुपादानकल्पने ।
क्ष्मादीनामपि तत्केन निवार्येत परस्परम् ॥ ११२ ॥
सूक्ष्मभूतविशेषः चैतन्येन विजातीयः सजातीयो वा ?"

तत्त्वार्थश्लो० पृ० २९ । न्यायकुमु० पृ० ३३८ ।

स्वसंवेदनप्रत्यक्षाधिगम्यः परलोकादिसम्बन्धित्वेनानुमेयश्च आत्मापरनामा विज्ञानोपादानहेतुरिति परैरभ्युपगमात्।

तस्यातो विजातीयत्वे नोपादानभावः। सर्वथा विजातीयस्योपादानत्वे वह्नेर्जलाद्युपादानभावप्रसङ्गात् तत्त्वचतुष्टयव्याघातः। सत्त्वादिना सजातीयत्वात्तस्योपादानभावेपि अयमेव दोषः। प्रमाणप्रसिद्धत्वाच्चात्मनस्तदुपादानत्वमेव विज्ञानस्योपपन्नम्। तथा हि-यद्यतोऽसाधारणलक्षणविशेषविशिष्टं तत्ततस्तत्त्वान्तरम्; यथा तेजसो वाय्वादिकम्, पृथिव्याद्यसाधारणलक्षणविशेषविशिष्टं च चैतन्यमिति। न चायमसिद्धो हेतुः; चैतन्यस्य जना(ज्ञान)दर्शनोपयोगलक्षणत्वात्, भूपयःपावकपवनानां धारणेरणद्रवोष्णतास्वभावानां तल्लक्षणाभावात्। न हि भूतानि ज्ञानदर्शनोपयोगलक्षणानि अस्मदाद्यनेकप्रतिपत्तृप्रत्यक्षत्वात्। यत्पुनस्तल्लक्षणं तन्नास्मदाद्यनेकप्रतिपत्तृप्रत्यक्षम् यथा चैतन्यम्, तथा च भूतानि, तस्मात्तथैवेति।

ननु ज्ञानाद्युपयोगविशेषव्यतिरेकेणापरस्य तद्वतः प्रमाणतोऽप्रतीतेः असिद्धमेवासाधारलक्षणविशेषविशिष्टत्वम्; तथाहि-न तावत्प्रत्यक्षेणासौ प्रतीयते; रूपादिवत्तत्स्वभावानवधारणात्। नाप्यनुमानेन; अस्य प्रामाण्याप्रसिद्धेः। न च तद्भावावेदकं किञ्चिदनुमानमस्ति; इत्यसङ्गतम्; प्रत्यक्षेणैवात्मनः प्रतीतेः 'सुख्यहं

१ आदिपदेन पुण्यपाप। २ चिद्विवर्तवादित्वतः। ३ जैनैः। ४ चैतन्यस्य। ५ अन्यथा। ६ प्रमेयत्ववस्तुत्वादि। ७ किञ्च। ८ स उपादानं यस्य तत्। ९ चैतन्यं धर्मी पृथिव्यादिभ्योऽर्थान्तरं भवतीति साध्यो धर्मः। ततोऽसाधारणलक्षणविशेषविशिष्टत्वात्। १० पृथिव्यादिभ्यः। ११ विसदृश। १२ पृथिव्यादिभ्यः। १३ भिन्नं। १४ का। १५ ज्ञानदर्शरूप एव उपयोगः। १६ अनेकसर्वज्ञप्रत्यक्षेणासच्चैतन्येन व्यभिचारः। १७ अनेकप्रतिपत्तृप्रत्यक्षत्वादित्युक्ते। १८ प्रत्यक्षत्वादित्युक्ते प्रत्यक्षेण। १९ असच्चैतन्येन व्यभिचारः। २० दर्शन। २१ आत्मनः। २२ साधनम्। २३ इन्द्रियप्रत्यक्षेण। २४ किञ्च। २५ हेतुः।

1 "न हि भूतानि स्वसंवेदनलक्षणानि अस्मदाद्यनेकप्रतिपत्तृप्रत्यक्षत्वात्।"
अष्टसह० पृ० ६४।

2 "आत्मसद्भावे प्रमाणाभावात्; तथाहि न प्रत्यक्षेणोपलभ्यते रूपादिवत्तत्स्वभावानवधारणात्। नाप्यनुमानमस्त्यात्मप्रतिबद्धम्।" प्रश० व्यो० पृ० ३९१।

3 "अहमिति प्रत्यये तस्य प्रतिभासनात्, तथाच सुख्यहं दुःख्यहमिच्छावानहमिति प्रत्ययो दृष्टः।" प्रश० व्यो० पृ० ३९१।

दुःख्यहमिच्छावानहम्' इत्याद्यनुपचरिताहम्प्रत्ययस्यात्मग्राहिणः प्रतिप्राणि संवेदनात्। न चायं मिथ्याऽबाध्यमानत्वात्। नापि शरीरालम्बनः; बहिःकरणनिरपेक्षान्तःकरणव्यापारेणोत्पत्तेः। न हि शरीरं तथाभूतप्रत्ययवेद्यं बहिःकरणविषयत्वात्, तस्यानुप-
५ चरिताहम्प्रत्ययविषयत्वाभावाच्च। न हि 'स्थूलोऽहं कृशोहम्' इत्याद्यभिन्नाधिकरणतया प्रत्ययोऽनुपचरितः; अत्यन्तोपकारके भृत्ये 'अहमेवायम्' इति प्रत्ययस्याप्यनुपचरितत्वप्रसङ्गात्। प्रतिभासभेदो बाधकः अन्यत्रापि समानः। न हि बहलतमःपटलपटावगुण्ठितविग्रहस्य 'अहम्' इति प्रत्ययप्रतिभासे स्थूलत्वादिधर्मोपेतो
१० विग्रहोपि प्रतिभासते। उपचारश्च निमित्तं विना न प्रवर्तते इत्यात्मोपकारकत्वं निमित्तं कल्प्यते भृत्यवदेव। 'मदीयो भृत्यः' इतिप्रत्ययभेदवत् 'मदीयं शरीरम्' इति प्रत्ययभेदस्तु मुख्यः।

यच्चोक्तम्-रूपादिवत्तत्स्वभावानवधारणात्; तदयुक्तम्; 'अहम्'

१ बहिःकरणनिरपेक्षान्तःकरणव्यापारादुत्पद्यमानप्रत्ययवेद्यम्। २ अभावोऽसिद्ध इत्युक्ते सत्याह। ३ इच्छावानहम्। ४ ईप्। ५ अनुकरणे। ६ देहः। ७ अन्यथा। ८ उपचारेण। ९ स्थूलोहमित्यादिप्रत्यये। १० आवृत। ११ पुरुषस्य। १२ स्थूलत्वादौ। १३ स्थूलत्वादेः। १४ प्रयोजनम्। १५ शरीरस्य। १६ ज्ञाने। १७ शरीरस्य। १८ ज्ञान। १९ परेण। २० आत्म। २१ आत्मा।

"स्वसंवेद्यः स भवति नासावन्येन शक्यते द्रष्टुम्, नासावन्येन शक्यते द्रष्टुं कथमसौ निर्दिश्येत...असौ पुरुषः स्वयमात्मानमुपलभते। न चान्यस्मै शक्नोत्युपदर्शयितुम्।" शाबरभा० १।१।५।

"अहम्प्रत्ययविज्ञेयः स्वयमात्मोपपद्यते।" मीमांसाश्लो० आत्मवादश्लो० १०७।

"स्वसंवेदनतः सिद्धः सदात्मा बाधवर्जितात्।
तस्य क्ष्मादिविवर्त्तात्मन्यात्मन्यनुपपत्तितः॥ ९६॥"

तत्त्वार्थश्लो० पृ० २६। शास्त्रवा० समु० श्लो० ७९। न्यायकुमु० पृ० ३४३।

1 "न शरीरालम्बनमन्तःकरणव्यापारेण उत्पत्तेः। तथाहि न शरीरमन्तःकरणपरिच्छेद्यं बहिर्विषयत्वात्।" प्रश० व्यो० पृ० ३९१।

2 "नन्वेवं कृशोऽहं स्थूलोऽहमिति प्रत्ययस्तर्हि कथम्? मुख्ये बाधकोपपत्तेरुपचारेण। तथाहि-मदीयो भृत्य इति ज्ञानवन्मदीयं शरीरमिति भेदप्रत्ययदर्शनात् भृत्यवदेव शरीरेऽप्यहमिति ज्ञानस्य औपचारिकत्वमेव युक्तम्। उपचारस्तु निमित्तं विना न प्रवर्त्तते इत्यात्मोपकारकत्वं निमित्तं कल्प्यते।" प्रश० व्यो० पृ० ३९१। न्यायकुमु० पृ० ३४९। सन्मति० टी० पृ० ८६।

3 "अहमिति स्वभावस्य प्रतिभासनात्। नचार्थान्तरस्य अर्थान्तरस्वभावेनाप्रत्यक्षत्वं दोषः, सर्वपदार्थानामप्रत्यक्षताप्रसङ्गात्।" प्रश० व्यो० पृ० ३९१।

इति तत्[१]स्वभाव[२]स्य प्रतिभासनात् । न च[३]ार्थान्तरस्यार्थान्तर[४]स्वभावेनाप्रत्यक्षत्वं दोषः,[५] सर्व[६]पदार्थानामप्रत्यक्षताप्रसङ्गात्[७]। अथात्मनः[1] कर्तृत्वादेकस्मिन् काले[८] कर्मत्वासम्भवेनाप्रत्यक्षत्वम्; तन्न; लक्षणभेदेन तदुपपत्तेः, स्वातन्त्र्यं हि कर्तृ[९]त्वलक्षणं तदेव च ज्ञानक्रियया[१०] व्याप्यत्वोपलब्धेः कर्मत्वं चाविरुद्धम्, लक्षणा[११]धीनत्वाद्वस्तु- ५ व्यवस्थायाः ।

[१२]तथानुमानेनात्मा प्रतीयते । श्रोत्रा[2]दिकरणा[१३]नि कर्तृप्रयोज्यानि करण[१४]त्वाद्वास्यादिवत् । न चा[१५]त्र श्रोत्रादिकरणानामसिद्धत्वम्; 'रूप[3]रसगन्धस्पर्शशब्दोपलब्धिः करणकार्या क्रियात्वाच्छिदिक्रियावत्' इत्यनुमानात्तत्सिद्धेः । त[१६]था 'शब्दादि[4]ज्ञानं क्व[१७]चिदा- १० श्रितं गुणत्वाद्रूपा[१८]दिवत्' इत्यनुमानतोऽय[१९]मसौ प्रतीयते । प्रामाण्यं चानुमानस्याग्रे स[२०]मर्थयिष्यते । शरीरेन्द्रियमनोविषय[२१]गुणत्वाद्विज्ञानस्य न तद्व्यतिरिक्ताश्रयाश्रितत्वम्, येना[२२]त्मसिद्धिः स्यादित्यपि मनोरथमात्रम्; विज्ञानस्य तद्गुणत्वासिद्धेः । तथाहि-न

---

१ आत्म । २ चैतन्यस्य । ३ रूपादिलक्षणादर्थादर्थान्तरमात्मा तस्य । ४ आत्मलक्षणादर्थादर्थान्तरं घटादिस्तस्य स्वभावो रूपादिस्तेन । ५ अन्यथा । ६ घटादीनां । ७ रूपरसादिरूपेण धर्मेण प्रत्यक्षत्वासम्भवात् । (?) ८ कर्तृकाले । ९ स्वतन्त्रः कर्तेति वचनात् । १० क्रियाव्याप्यं कर्मेति वचनात् । ११ असाधारणस्वरूपम् । १२ प्रत्यक्षप्रकारेण । १३ अर्थपरिच्छित्तौ । १४ छिदौ । १५ अनुमाने । १६ प्रत्यक्षानुमानप्रकारेण । १७ आत्मनि । १८ घटाद्यर्थे यथा । १९ आत्मा । २० अस्माभिर्जैनैः । २१ घटादि स्रगादि च । २२ केन ।

---

1 "अथात्मनः कर्तृत्वादेकस्मिन् काले कर्मत्वासंभवेनाप्रत्यक्षत्वम्; तन्न; लक्षणभेदेन तदुपपत्तेः । तथाहि-ज्ञानचिकीर्षाधारत्वस्य कर्तृलक्षणस्योपपत्तेः कर्तृत्वम्, तदेव च क्रियया व्याप्यत्वोपलब्धेः कर्मत्वञ्चेति न दोषः । लक्षणतन्त्रत्वाद्वस्तुव्यवस्थायाः ।" प्रश० व्यो० पृ० ३९२ ।

2 "करणैः शब्दाद्युपलब्ध्यनुमितैः श्रोत्रादिभिः समधिगमः क्रियते वास्यादीनां करणानां कर्तृप्रयोज्यत्वदर्शनात् । शब्दादिषु प्रसिद्ध्या च प्रसाधकोऽनुमीयते ।"

प्रश० भा० पृ० ६९ ।

"श्रोत्रादीनि करणानि कर्तृप्रयोज्यानि करणत्वात् वास्यादिवत् ।"

प्रश० व्यो० पृ० ३९३ । न्यायकुमु० पृ० ३४९ ।

3 "शब्दोपलब्धिः करणकार्या क्रियात्वात् छिदिक्रियावत् ।"

प्रश० व्यो० पृ० ३९३ । स्या० मं० का० १७ ।

4 "शब्दादिज्ञानं क्वचिदाश्रितं गुणत्वात् ।"

प्रश० व्यो० पृ० ३९३ । न्यायकुमु० पृ० ३४९ ।

शरीरं चैतन्यगुणाश्रयो भूतविकारत्वाद् घटादिवत्। चैतन्यं वा शरीरविशेषगुणो न भवति सति शरीरे निवर्त्तमानत्वात्। ये तु शरीरविशेषगुणा न ते तस्मिन्सति निवर्त्तन्ते यथा रूपादयः, सत्यपि तस्मिन्निवर्त्तते च चैतन्यम्, तस्मान्न तद्विशेषगुणः।

५ तथा, नेन्द्रियाणि चैतन्यगुणवन्ति करणत्वाद्भूतविकारत्वाद्वा वास्यादिवत्। तद्गुणत्वे च चैतन्यस्येन्द्रियविनाशे प्रतीतिर्न स्याद्गुणिविनाशे गुणस्याप्रतीतेः। न चैवम्, तस्मान्न तद्गुणः। तथा च प्रयोगः-स्मरणादि चैतन्यमिन्द्रियगुणो न भवति तद्विनाशेऽप्युत्पद्यमानत्वात्, यो यद्विनाशेऽप्युत्पद्यते स न तद्गुणो यथा पटविना-
१० शेपि घटरूपादि, भवति चेन्द्रियविनाशेपि स्मरणादिकम्, तस्मान्न तद्गुणः। यदि चेन्द्रियगुणश्चैतन्यं स्यात्तर्हि करणं विना क्रियायाः प्रतीत्यभावात् करणान्तरैर्भवितव्यम्। तेषां च प्रत्येकं

१ शरीरस्य। २ चैतन्यस्य। ३ शरीरे। ४ किञ्च। ५ सुखम्। ६ किञ्च। ७ गुणी। ८ गुणः। ९ जानातीति। १० चैतन्यलक्षणायाः।

1 "न शरीरेन्द्रियमनसामज्ञत्वात्। न शरीरस्य चैतन्यं घटादिवद् भूतकार्यत्वात् मृते चासंभवात्।" प्रश० भा० पृ० ६९।

"शरीरं चैतन्यशून्यं भूतत्वात् कार्यत्वाच्च।...चैतन्यं शरीरविशेषगुणो न भवति सति शरीरे निवर्त्तमानत्वात्।" प्रश० व्यो० पृ० ३९४। न्यायकुमु० पृ० ३४६।

"न शरीरगुणश्चेतना, कस्मात्? 'यावच्छरीरभावित्वात् रूपादीनाम्।' 'शरीरव्यापित्वात्' 'शरीरगुणवैधर्म्यात्'। न्यायसू० ३।२।४९,५२,५५।

"न शरीरस्य ज्ञानादियोगः परिणामित्वात्, रूपादिमत्त्वात्, अनेकसमूहस्वभावत्वात्, सन्निवेशविशिष्टत्वात्।" न्यायमं० पृ० ४३९।

"देहधर्मवैलक्षण्यात्...।" ब्रह्मसू० शा० भा० ३।३।५४।

2 "नेन्द्रियाणां करणत्वात् उपहतेषु विषयासान्निध्ये चाऽनुस्मृतिदर्शनात्।" प्रश० भा० पृ० ६९।

"नेन्द्रियार्थयोः तद्विनाशेऽपि ज्ञानावस्थानात्।" न्यायसू० ३।२।१८।

"नेन्द्रियाणां चैतन्यं करणत्वात् वास्यादिवत्, भूतत्वात्, कार्यत्वादित्यपि द्रष्टव्यम्।...तदुपघातेऽपि स्मृतिदर्शनात्।" प्रश० व्यो० पृ० ३९४। न्यायकुमु० पृ० ३४६।

3 "स्मरणमिन्द्रियगुणो न भवति यथा घटविनाशेऽपि पटरूपादिरिति। तथा च स्मरणमिन्द्रियविनाशेऽपि भवति तस्मान्न तद्गुण इति।" प्रश० व्यो० पृ० ३९५।

4 "यदि चेन्द्रियाणां चैतन्यं स्यात् करणं विना क्रियायाश्चानुपलब्धेरिति करणान्तरैर्भवितव्यम्। तानि करणानि इन्द्रियाणि विवादास्पदानि चात्मान इत्येकस्मिन् शरीरे पुरुषबहुत्वमभ्युपगतं स्यात्।" प्रश० व्यो० पृ० ३९५।

चैतन्यगुणत्वे[1] एकस्मिन्नेव शरीरे पुरुषबहुत्वप्रसङ्गः स्यात्। तथाच देवदत्तोपलब्धेऽर्थे यज्ञदत्तस्येवेन्द्रियान्तरोपलब्धे तस्मिन् न स्यादिन्द्रियान्तरेण प्रतिसन्धानम्[2]। दृश्यते[3] चैतत्ततो नेन्द्रियगुणश्चैतन्यम्। अथैकमेवेन्द्रियमशेषकरणाधिष्ठायकमिष्यतेऽतोयमदोषः; तर्हि संज्ञाभेदमात्रमेव स्यादात्मनस्तथा नामान्तरकरणात्। ५

नापि चैतन्यगुणवन्मनः करणत्वाद्वास्यादिवत्। कर्तृत्वोपगमे तस्य चेतनस्य सतो रूपाद्युपलब्धौ करणान्तरापेक्षित्वे च प्रकारान्तरेणात्मैवोक्तः स्यात्।

नापि विषयगुणः; तदसान्निध्ये तद्विनाशे चानुस्मृत्यादिदर्शनात्। न च गुणिनोऽसान्निध्ये विनाशे वा गुणानां प्रतीतिर्युक्ता, १० गुणत्वविरोधानुषङ्गात्। ततः परिशेषाच्छरीरादिव्यतिरिक्ताश्रयाश्रितं चैतन्यमित्यतो भवत्येवात्मसिद्धिः।

ततो निराकृतमेतत्–'शरीरेन्द्रियविषयसंज्ञेभ्यः पृथिव्यादिभूतेभ्यश्चैतन्याभिव्यक्तिः, पिष्टोदकगुडधातक्यादिभ्यो मदशक्तिवत्'। ततोऽसाधारणलक्षणविशेषविशिष्टत्वेप्यतत्त्वा(तस्तत्त्वा)न्तरत्व- १५

---

१ चैतन्यं गुणो येषां तानि तत्त्वे। २ चक्षुषा दृष्टेऽर्थे श्रोत्रेण प्रतिसन्धानं न स्यात्। ३ प्रत्यभिज्ञानम्। ४ मनः। ५ प्रेरकम्। ६ परेण। ७ विद्यमानस्य। ८ मनः। ९ चक्षुरादि। १० चैतन्यं। ११ सुखादि। १२ अन्यथा। १३ गुणिनोऽमी गुणा इति। १४ इन्द्रियमनोविषय। १५ आत्म। १६ गुणत्वादिसाधनात्। १७ जायते। १८ तेभ्यश्चैतन्यस्याभिव्यक्तिर्यतः। १९ ज्ञानदर्शनोपयोगरूप। २० चैतन्यस्य।

---

1 "यदि चैकमिन्द्रियमशेषकरणाधिष्ठायकं चेतनमिष्येत; संज्ञाभेदमात्रमेव स्यात्।" प्रश० व्यो० पृ० ३९५।

2 "नापि मनसः कारणान्तरानपेक्षित्वे युगपदालोचनस्मृतिप्रसङ्गात्, स्वयं करणभावाच्च।" प्रश० भा० पृ० ६९।

"नापि मनोगुणः करणत्वात् वास्यादिवत्।" प्रश० व्यो० पृ० ३९५। न्यायकुमु० पृ० ३४७।

"युगपज्ज्ञेयानुपलब्धेश्च न मनसः।" न्यायसू० ३।२।१९।

3 "अत एव विषयस्यापि न चैतन्यम्।" प्रश० कन्दली पृ० ७२।

"विषयासान्निध्ये तद्विनाशे चानुस्मृतिर्दृष्टा। न तत् गुणतद्विनाशे भवतीति।" प्रश० व्यो० पृ० ३९५। न्यायकुमु० पृ० ३४७।

4 "इत्याह–मदशक्तिवद्विज्ञानम्। यथैव हि मद्याङ्गानां किण्वादीनां देशकालावस्थाविशेषे मदशक्तिलक्षणावस्थाविशेषः प्रादुर्भवति एवं पृथिव्यादीनां तद्विशेषे प्रतिनियतघटादिग्राहकं ज्ञानमिति।" न्यायकुमु० पृ० ३४२।

मेव । "पृथिव्य(व्या)पस्तेजोवायुरिति तत्त्वानि, तत्समुदये शरीरेन्द्रियविषयसंज्ञाः तेभ्यश्चैतन्यम्" [ ] इत्यत्र 'अभिव्यक्तिमुपयाति' इति क्रियाध्याहारादतः सन्दिग्धविपक्षव्यावृत्तिको हेतुरिति; शब्दसामान्याभिव्यक्तिनिषेधेनास्य चैतन्या-
५ भिव्यक्तिवादस्य विरोधाच्च ।

किंच, सतोऽभिव्यक्तिश्चैतन्यस्य, असतो वा स्यात्, सदसद्रूपस्य वा? प्रथमकल्पनायाम् तस्यानाद्यनन्तत्वसिद्धिः, सर्वदा सतोऽभिव्यक्तेस्तामन्तरेणानुपपत्तेः । पृथिव्यादिसामान्यवत् । तथा च "परलोकिनोऽभावात्परलोकाभावः" [ ]
१० इत्यपरीक्षिताभिधानम् । प्रागसतश्चैतन्यस्याभिव्यक्तौ प्रतीतिविरोधः, सर्वथाप्यसतः कस्यचिदभिव्यक्त्यप्रतीतेः। न चैवंवादिनो व्यञ्जककारकयोर्भेदः; 'प्राक्सतः स्वरूपसंस्कारकं हि व्यञ्जकम्, असतः स्वरूपनिर्वर्तकं कारकम्' इत्येवं तयोर्भेदप्रसिद्धिः। कथञ्चित्सतोऽसतश्चाभिव्यक्तौ परमतप्रवेशः-कथञ्चिद्द्रव्यतः सतश्चै-
१५ तन्यस्य पर्यायतोऽसतश्च कायाकारपरिणतैः पृथिव्यादिपुद्गलैः

---

१ सूत्रे । २ चैतन्यस्याभिव्यक्तिः । ३ बसः । ४ असाधारणलक्षणविशेषविशिष्टत्वादिति । ५ आकाशात्तद्विलक्षणशब्दोत्पत्तिं यौगाभिमतां निराकुर्वतश्चार्वाकस्य भूतेभ्यस्तद्विलक्षणचैतन्योत्पत्तिकथनमयुक्तं स्ववचनविरोधादित्यभिप्रायः । ६ अग्रे । ७ यथा घटानां प्रदीपाद्यभिव्यञ्जकव्यापारात्पूर्वं सद्भावग्राहकं प्रमाणमस्ति तथा ताल्वादिव्यापारात्पूर्वं शब्दादिसद्भावग्राहकप्रमाणाभावात्कथमभिव्यञ्जकव्यापाराच्छब्दादीनामभिव्यक्तिरिति चार्वाकेण शब्दाद्यभिव्यक्तिपक्षे मीमांसकं प्रत्युद्भाव्यमानेन दूषणेन चैतन्याभिव्यक्तिपक्षस्यापि निराकृतत्वात् । कथम्? अभिव्यक्ताच्चैतन्यात्पूर्वमनभिव्यक्तनित्यचैतन्यसद्भावग्राहकप्रमाणभावादिति । ८ किञ्च । ९ पृथिवीत्वादि । १० अनाद्यनन्तात्मसिद्धौ । ११ सत्याम् । १२ खरविषाणादिवत् । १३ किञ्च । १४ मा भूत् । १५ व्यञ्जकस्य । १६ जैन । १७ नरनारकादि ।

---

1 इदं वाक्यं तत्त्वोपप्लव पृ० १, भामती ३।३।५४, तत्त्वसं पं० पृ० ५२०, तत्त्वार्थ श्लो० पृ० २८, न्यायकुमु० पृ० ३४१ इत्यादिषु उद्धृतं वर्तते ।

2 "तथाहि-पृथिव्यापस्तेजोवायुरिति चत्वारि तत्त्वानि । तेभ्यश्चैतन्यमिति । अत्र केचिद्वृत्तिकारा व्याचक्षते-'उत्पद्यते तेभ्यश्चैतन्यम्' इति । अन्ये 'अभिव्यज्यते' इत्याहुः ।" तत्त्वसं० पं० पृ० ५२० ।

3 "चैतन्यशक्तिं सतीमेव, प्रागसतीमेव, सदसतीं वा अभिव्यञ्जयेयुः ।" युक्त्यनुशा० टी० पृ० ७५ । न्यायकुमु० पृ० ३४५ ।

4 इदं वाक्यं तत्त्वोपप्लव० पृ० ५८, तत्त्वसं० पं० पृ० ५२३, न्यायकुमु० पृ० ३४३, सन्मति० टी० पृ० ७१ इत्यादिषु उद्धृतं वर्त्तते ।

परै[1]रप्यभिव्यक्तेरभीष्टत्वात् पृथिव्यादिभूतचतुष्टयवत्[2]। नन्वेवं[3] पिष्टोदकादिभ्यो मदशक्त्यभिव्यक्तिरपि न स्यात् तत्रा[4]प्युक्तविकल्पानां समानत्वादित्यप्यसाम्प्रतम्; तत्रापि द्रव्यरूपतया प्राक्सत्त्वाभ्युपगमात्, सकलभावानां तद्रूपेणानाद्यनन्तत्वात्।

शरीरेन्द्रियविषयसंज्ञेभ्यश्चैतन्यस्योत्पत्त्यभ्युपगमात् 'तेभ्यश्चैतन्यम्' इत्यत्र 'उत्पद्यते' इति क्रियाध्याहारान्नाभिव्यक्तिपक्षभावी दोषोऽवकाशं लभते इत्यन्य[6]ः। सोपि चैतन्यं प्रत्युपादानकारणत्वम्, सहकारिकारणत्वं वा भूतानाम् इति पृष्टः स्पष्टमाचष्टाम्? न तावदुपादानकारणत्वं तेषाम्; चैतन्ये[9] भूतान्वयप्रसङ्गात्, सुवर्णोपादाने किरीटादौ सुवर्णा[10]न्वयवत्, पृथिव्याद्युपादाने काये पृथिव्या[11]द्यन्वयवद्वा। न चात्रैवम्[12]; न हि भूतसमुदयः पूर्वमचेतनाकारं परित्यज्य चेतनाकारमाददा(धा)नो धारणेरणद्रवोष्णतालक्षणेन रूपादिमत्त्वस्वभावेन वा भूतस्वभावेनान्वितः प्रमा[13]णप्रतिपन्नः, चैतन्यस्य धारणादिस्वभावरहितस्यान्तःसंवेदनेनानुभवात्। न च प्रदीपा[14]द्युपादानेन कज्जलादिना प्रदीपाद्यनन्वितेन व्यभिचारः; रूपादिमत्त्वमात्रेणात्राप्यन्वयदर्शनात्। पुद्गलविकाराणां रूपादिमत्त्वमात्राव्यभिचारात्। भूतचैतन्ययोरप्येवं सत्त्वादिक्रियाकारित्वादिधर्मैरन्वयसद्भावात् उपादानोपादेयभावः स्यादित्यप्यसमीचीनम्; जलानलादीनामप्यन्योन्य[16]मुपादानोपादेयभावप्रसङ्गात्, तद्धर्मैस्तत्राप्यन्वयसद्भावाविशेषात्।

किञ्च, 'प्राणिना[18]माद्यं[19] चैतन्यं चैतन्योपादानकारणकं[20] चिद्[21]विवर्त्त[22]-

१ जैनैः। २ यथा पृथिव्यादिभूतचतुष्टयस्य पुद्गलरूपेण सतः घटादिपर्यायरूपेणासतश्चक्रादिकारणादाविर्भावस्तथा प्रकृतस्यापि। ३ चैतन्याभिव्यक्तिनिषेधप्रकारेण। ४ मदशक्तौ। ५ सूत्रे। ६ अविद्धकर्णश्चार्वाकविशेषः। ७ जैनैः। ८ अन्यथा। ९ चैतन्यं भूतान्वयि तदुपादानत्वात्। यद्यदुपादानं तत्तदन्वयि यथा मृद्रूपोपादानको घटः। १० पीतत्वभासुरत्व। ११ धारणादि। १२ उपसंहारः। १३ प्रत्यक्ष। १४ प्रदीपादि उपादानं यस्य। १५ कज्जले प्रदीपरूपादिमत्त्वमात्रान्वयप्रकारेण। १६ जलानलादयः परस्परमुपादानोपादेयभाववन्तः सत्त्वादिधर्मैरन्वितत्वात्तद्भूतचैतन्यवत्। १७ चैतन्यं धर्मि भूतोऽन्वयि भवतीति साध्यो धर्मः। तदुपादानत्वाद् यथा मृदुपादानको घटो मृदन्वयी। १८ तज्जन्मापेक्षया। १९ पूर्वजन्मचैतन्य। २० बसः। २१ पूर्वन्चित्। २२ प्रमेय। (पर्याय)

1 "भूतानि किमुपादानकारणं चैतन्यस्य सहकारिकारणं वा?"

तत्त्वसं० पं० पृ० ५२६। युक्त्यानु० टी० पृ० ७८। न्यायकुमु० पृ० ३४४।

2 "प्राणिनामाद्यं चैतन्यं चैतन्योपादानकारणकं चिद्विवर्त्तत्वात् मध्यचैतन्यविवर्त्तवत्। तथा अन्त्यचैतन्यपरिणामः चैतन्यकार्यः तत एव तद्वत्।" अष्टसह० पृ० ६३।

त्वान्मध्यचिद्विवर्त्तवत्। तथान्त्यचैतन्यपरिणामश्चैतन्यैकार्यस्तत एव तद्वत्' इत्यनुमानात्तस्य चैतन्यान्तरोपादानपूर्वकत्वसिद्धेर्न भूतानां चैतन्यं प्रत्युपादानकारणत्वकल्पना घटते। सहकारिकारणत्वकल्पनायां तु उपादानमन्यद्वाच्यम्, अनुपादानस्य कस्यचित्कार्यस्यानुपलब्धेः। शब्दविद्युदादेरनुपादानस्याप्युपलब्धेरदोषोयमित्यप्यपरीक्षिताभिधानम्; 'शब्दादिः सोपादानकारणकः कार्यत्वात् पटादिवत्' इत्यनुमानात्तत्सादृश्योपादानस्यापि सोपादानत्वसिद्धेः।

गोमयादेरचेतनाच्चेतनस्य वृश्चिकादेरुत्पत्तिप्रतीतिः तेनानेकान्तः इत्ययुक्तम्; तस्य पक्षान्तर्भूतत्वात्। वृश्चिकादिशरीरं ह्यचेतनं गोमयादेः प्रादुर्भवति न पुनर्वृश्चिकादिचैतन्यविवर्त्तस्तस्य पूर्वचैतन्यविवर्त्तादेवोत्पत्तिप्रतिज्ञानात्। अथ यथाद्यः पथिकाग्निः अरणिनिर्मन्थोत्थोऽनग्निपूर्वकः अन्यस्त्वग्निपूर्वकः तथाद्यं चैतन्यं कायाकारपरिणतभूतेभ्यो भविष्यत्यन्यत्तु चैतन्यपूर्वकं विरोधाभावादित्यपि मनोरथमात्रम्; प्रथमपथिकाग्नेरनग्न्युपादानत्वे जलादीनामप्यजलाद्युपादानत्वापत्तेः पृथिव्यादिभूतचतुष्टयस्य तत्त्वान्तरभावविरोधः। येषां हि परस्परमुपादानोपादेयभावस्तेषां न तत्त्वान्तरत्वम् यथा क्षितिविवर्त्तानाम्, परस्परमुपादानोपादेयभावश्च पृथिव्यादीनामित्येकमेव पुद्गलतत्त्वं क्षित्या-

१ जन्मप्रभृतिमरणपर्यन्त। २ यसः (कर्मधारयसमासः)। ३ पर्यायः। ४ बसः। ५ भूतानाम्। ६ कारणम्। ७ परेण। ८ वृश्चिकचैतन्येन। ९ वृश्चिकचैतन्यस्य। १० यसः। ११ सन्दिग्धानैकान्तिकत्वम्। १२ चुल्लीस्थः। १३ मध्यचैतन्यम्। १४ कार्यत्वादिहेतोः। १५ काष्ठ। १६ पृथिव्यादयो धर्मिणस्तत्त्वान्तरत्वं न प्राप्नुवन्तीति साध्यं परस्परमुपादानोपादेयभाववत्त्वात्। १७ सलिलदहनपवन।

1 "नापि ते कारका वित्तेः भवन्ति सहकारिणः।
स्वोपादानविहीनायास्तस्यास्तेभ्योऽप्रसूतितः॥ २०७॥
नोपादानाद्विना शब्दविद्युदादिः प्रवर्तते।
कार्यत्वात् कुम्भवत्... ॥ २०८॥ तत्त्वार्थश्लो० पृ० २८।
न्यायकुमु० पृ० ३४४।

2 "गोमयादेरचेतनाच्चेतनस्य वृश्चिकादेरुत्पत्तिदर्शनात्तेन व्यभिचारी हेतुरिति चेन्न; तस्यापि पक्षीकरणात्। वृश्चिकादिशरीरस्याचेतनस्यैव तेन सम्मूर्च्छनं न पुनः वृश्चिकादिचैतन्यविवर्त्तस्य, तस्य पूर्वचैतन्यविवर्त्तादेव उत्पत्तिप्रतिज्ञानात्।"
अष्टसह० पृ० ६३। तत्त्वार्थश्लो० पृ० २९।

3 "प्रथमपथिकाग्नेरनग्न्युपादानत्वे जलादीनामप्यजलाद्युपादानत्वोपपत्तेः पृथिव्यादिभूतचतुष्टयस्य तत्त्वान्तरभावविरोधः।" अष्टसह० पृ० ६३।

दिवि[1]वर्त्तमवतिष्ठेत सहकारिभावोप[2]गमे तु तेषां[3] चैतन्येपि सोऽस्तु। यथैव हि प्रथमाविर्भूतपावका[4]देस्ति[5]रोहितपावका[6]न्तरा-दिपूर्वकत्वं तथा गर्भचैतन्यस्याविर्भूतस्वभावस्य तिरोहित[7]चैत[8]न्य-पूर्वकत्वमिति।

न च[9]ानाद्ये[10]कानुभवितृव्यतिरेकेणेष्टानिष्टविषये प्रत्य[1]भिज्ञानाभि-लाषादयो जन्मादौ युज्यन्ते; तेषामभ्या[11]सपूर्वकत्वात्। न च मातु[12]रुदरस्थितस्य बहिर्विषयादर्शनेऽभ्यासो युक्तः; अतिप्रस[13]ङ्गात्। न चा[14]वलग्नावस्थायामभ्यासपूर्वकत्वेन प्रतिपन्नानामप्यनुसन्धा[15]-नादीनां जन्मा[16]दावतत्पूर्वकत्वं युक्तम्; अन्यथा धूमोऽग्निपूर्वको-दृष्टोऽनग्निपूर्वकः स्यात्। मातापित्रभ्यासपूर्वकत्वा[17]त्तेषामदोषो-यमित्यप्यसम्भाव्यम्; सन्तानान्तर[18]ाभ्यासादन्य[19]त्र प्रत्यभिज्ञानेऽ-तिप्रसङ्गात्। तदुपल[20]ब्धे 'सर्वं मयै[21]वोपलब्धमेतत्' इत्यनुसन्धानं चा[22]खिलापत्यानां स्यात्। परस्परं वा तेषां प्रत्यभि[23]ज्ञानप्रसङ्गः स्यात्, एकस[24]न्तानोद्भूतदर्शनस्पर्शनप्रत्ययवत्।

'ज्ञानेनाहं घटादिकं जानामि' इत्यहम्प्रत्ययप्रसिद्धत्वा[25]च्चात्मनो ना[26]पलापो युक्तः। अ[27]त्र हि यथा कर्मतया विषयस्यावभासस्तथा कर्तृतयात्मनोपि। न चा[28]त्र देहेन्द्रियादीनां कर्तृता; घटादिवत्तेषा-मपि कर्मत[29]याऽवभासनात्, तदप्रतिभासनेप्यहम्प्रत्ययस्यानु-भवात्। न हि बहलतमःपटलपटावगुण्ठतविग्र[30]हस्योपरतेन्द्रिय-

१ बसः। २ परेण। ३ अग्नि प्रत्यरणिरूपपृथ्व्यादीनाम्। ४ दधि। ५ शक्ति-रूपस्थित। ६ उपादान। ७ शक्तिरूपस्थित। ८ उपादान। ९ किञ्च। १० आत्म। ११ संस्कार। १२ बालकस्य। १३ त्रिविप्रकृष्टेप्यर्थेऽभ्यासो भवत्वदर्शनाविशेषात्। १४ मध्यमावस्थायां। १५ प्रत्यभिज्ञानादीनाम्। १६ अनभ्यास। १७ अपत्यस्य। १८ मातापितृलक्षण। १९ अपत्ये। २० वस्तुनि। २१ अपत्येन। २२ किञ्च। २३ एकापत्येन दृष्टेऽर्थे द्वितीयापत्यस्य प्रत्यभिज्ञानप्रसङ्गः स्यात्। २४ आत्मलक्षण। २५ किञ्च। २६ निह्नवः। २७ ज्ञानेनाहं घटादिकं जानामीति प्रत्यये। २८ ज्ञानेनाहं घटादिकं जानामीति प्रत्यये। २९ देहेन्द्रियादिकं जानामि। ३० नरस्य।

1 "पूर्वानुभूतस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेः।"

न्यायसू० ३।१।१९। न्यायमं० पृ० ४७०।

"जातिस्मराणां संवादादपि संस्कारसंस्थितेः।
अन्यथा कल्पयंल्लोकमतिक्रामति केवलम्॥
नाऽस्मृतेऽभिलाषोऽस्ति न विना सापि दर्शनात्।
तद्धि जन्मान्तरान्नायं जातमात्रेऽपि लक्ष्यते॥"

न्यायविनि० २।७९,८०। न्यायकुमु० पृ० ३४७।

व्यापारस्य गौरस्थौल्यादिधर्मोपेतं शरीरं प्रतिभासते। अहम्प्रत्ययः स्वसंविदितः पुनस्[1]तस्यानुभूयमानो देहेन्द्रियविषयादि[2]व्यतिरिक्तार्थालम्बनः[3] सिद्ध्यतीति प्रमाणप्रसिद्धोऽनादिनिधनो द्रव्यान्तरमात्मा। प्रयोगः-अनाद्यनन्त[1] आत्मा द्रव्यत्वात्पृथिव्यादिवत्। न तावदाश्रयासिद्धोयं हेतुः; आत्मनोऽहम्प्रत्ययप्रसिद्धत्वात्। नापि स्वरूपासिद्धः[4]; द्रव्यलक्षणोपलक्षितत्वात्। तथाहि-द्रव्यमात्मा गुणपर्ययवत्त्वात्पृथिव्यादिवत्। न चायमप्यसिद्धो हेतुः; ज्ञानदर्शनादिगुणानां सुखदुःखहर्षविषादादिपर्यायाणां च तत्र[5] सद्भावात्। न च घटादिनानेकान्तस्[6]तस्य मृदादिपर्ययत्वात्।

ननु शरीररहितस्यात्मनः प्रतिभासे[7] ततोऽन्योऽनादिनिधनोऽसाविति स्यात् जलरहितस्यानलस्येव, न[8] चैवम्, आसंसारं तत्सहितस्यैवास्यावभासनात्। तत्र[9] 'शरीररहितस्य' इति कोऽर्थः? किं तत्स्वभावविकलस्य[10], आहोस्वित्तद्देशपरिहारेण देशान्तरावस्थितस्येति[11]? तत्राद्यपक्षेऽस्त्येव तद्रहितस्यास्य प्रतिभासः-रूपादिमदचेतनस्वभावशरीरविलक्षणतया अमूर्त्तचैतन्यस्वभावतया चात्मनोऽध्यक्षगोचरत्वेनोक्तत्वात्। द्वितीयपक्षे तु-शरीरदेशादन्यत्रा[12]नुपलम्भा[13]त्तत्र तदभावः, शरीरप्रदेश एव वा? प्रथमविकल्पे-सिद्ध[14]साधनम्; तत्र तदभावाभ्युपगमात्। न खलु नैयायिकवज्जने[15]नापि स्वदेहादन्यत्रात्मेष्यते। द्वितीयविकल्पे तु-न केवलमात्मनोऽभावोऽपि तु घटादेरपि। न हि सोपि स्वदेशादन्यत्रोपलभ्यते।

किञ्च, स्वशरीरादात्मनोऽन्यत्वाभावः तत्स्वभावत्वात्[16], तद्गुणत्वात् वा स्यात्, तत्कार्यत्वाद्वा प्रकारान्तरासम्भवात्। पक्षत्रयेपि प्रागेव दत्त[17]मुत्तरम्। ततश्चैतन्यस्वभावस्यात्मनः प्रमाणतः प्रसिद्धे-

---

१ पश्चात्। २ मनः। ३ आत्मा। ४ अनादिनिधनस्य। ५ आत्मनि। ६ द्रव्यत्वादिति हेतोः। ७ सति। ८ परिहारमाह। ९ उक्ते ग्रन्थे। १० प्रतिभासाभावः। ११ प्रतिभासाभावः। १२ देशे। १३ जीवस्य। १४ ता। १५ जैनैः। १६ तत्स्वभावस्य यद्यतोऽसाधारणलक्षणविशेषविशिष्टं तत्ततस्तत्त्वान्तरमित्यादिना निरस्तत्वात्। १७ जैनैः।

---

1 "द्रव्यतोऽनादिपर्यन्तः सत्त्वात् क्षित्यादितत्त्ववत्।
स स्यान्न व्यभिचारोऽत्र हेतोर्नाशिन्यसंभवात् ॥ १४० ॥"

तत्त्वार्थ श्लो० पृ० ३२।

2 "शरीररहितस्येति कोऽर्थः-किं तत्स्वभावविकलस्य आहो तद्देशपरिहारेण देशान्तरावस्थितस्येति।"

स्या० रत्ना० पृ० १०८०।

स्तत्स्व[1]भावमेव ज्ञानं युक्तम्। तथा च स्वव्यवसायात्मकं तत् चेतनात्मपरिणामत्वात्, यत्तु न स्वव्यवसायात्मकं न तत्तथा यथा घटादि, तथा च ज्ञानं तस्मात्स्वव्यवसायात्मकमित्यभ्युपगन्तव्य[2]म्।

न[3]नु विज्ञानस्य प्रत्यक्षत्वेऽर्थवत्कर्म[4]तापत्तेः करणात्म[5]नो ज्ञानान्तरस्य परिकल्पना स्यात्। तस्यापि प्रत्यक्षत्वे पूर्ववत्क[6]र्मतापत्तेः करणात्मकं ज्ञानान्तरं परिकल्पनीयमित्यनवस्था स्यात्। तस्याप्रत्यक्षत्वेपि करणत्वे प्रथमे कोऽपरितोषो येना[7]स्य त[8]था करणत्वं नेष्य[9]ते। न चैक[10]स्यैव ज्ञानस्य परस्परविरुद्धकर्मकरणाकाराभ्युपगमो युक्तोऽ[11]न्यत्र तथाऽदर्शनादित्याशङ्क्य प्रमेय[12]वत्प्रमातृप्रमाणप्रमितीनां प्रतीतिसिद्धं प्रत्यक्षत्वं प्रदर्शयन्नाह—

घटमहमात्[13]मना वेद्मीति ॥ ८ ॥

कर्मवत्कर्तृकरणक्रियाप्रतीतेः ॥ ९ ॥

न हि कर्मत्वं प्रत्यक्षतां[14] प्रत्य[15]गात्मनोऽप्रत्य[16]क्षत्वप्रसङ्गात् त[17]द्वत्तस्यापि कर्मत्वेनाप्रतीतेः। तदप्रतीतावपि कर्तृत्वेनास्य प्रतीतेः प्रत्यक्षत्वे ज्ञानस्यापि करणत्वेन प्रतीतेः प्रत्यक्षतास्तु विशेषा[18]भावात्। अथ करणत्वेन प्रतीयमानं ज्ञानं करणमेव न प्रत्यक्षम्; त[19]दन्यत्रापि स[20]मानम्। किञ्च, आत्मनः प्रत्यक्षत्वे परोक्षज्ञानकल्पनया किं सा[21]ध्यम्? तस्यैव स्वरूपवद्बाह्यार्थग्राहकत्वप्रसिद्धेः? कर्त्तुः करणमन्तरेण क्रि[22]यायां व्यापारासम्भवात्करणभूतपरोक्ष-

१ वसः। २ चार्वाकेण भवता। ३ मीमांसकः। ४ विज्ञानं कर्म-प्रत्यक्षत्वात्, घटवत्। ५ करणस्वरूपस्य। ६ पूर्वज्ञानस्य यथा। ७ प्रथमज्ञानस्य। ८ अप्रत्यक्षत्वे। ९ जैनैः। १० यत्कर्म तदेव करणम्। ११ घटे। १२ अर्थस्य यथा। १३ करणभूतेन। १४ अन्यथा। १५ आत्मा न प्रत्यक्षः कर्मत्वेनाप्रतीयमानत्वात्करणज्ञानवत्। १६ यत् कर्म न भवति तत्प्रत्यक्षमपि न भवतीत्युक्ते। १७ करणज्ञानवत्। १८ उभयत्र कर्मत्वेनाप्रतीयमानत्वस्य। १९ समाधानपरिहारम्। २० कर्तृत्वेनात्मा प्रतीयमानः कर्तैव स्यान्न प्रत्यक्ष इति समानम्। २१ प्रयोजनम्। २२ प्रमितिलक्षणायां।

1 "कर्मत्वेनाप्रतिभासमानत्वात् करणज्ञानमप्रत्यक्षमिति चेन्न; करणत्वेन प्रतिभासमानस्य प्रत्यक्षत्वोपपत्तेः। कथञ्चित् प्रतिभासते, कर्म च न भवति इति व्याघातस्य प्रतिपादितत्वात्।" तत्त्वार्थश्लो० पृ० ४६। न्यायकुमु० पृ० १७६। प्रमाणप० पृ० ६१।

2 "अथ करणत्वेनानुभूयमानं ज्ञानं करणमेव स्यान्न प्रत्यक्षं तर्हि कर्तृप्रमाणफलरूपतया अनुभूयमानयोः आत्मप्रमाणफलयोः कर्तृप्रमाणफलरूपतैव स्यात् न प्रत्यक्षत्वमित्यप्यस्तु।" स्या० रत्ना० पृ० २१३।

ज्ञानकल्पना नानर्थिकेत्यप्यसाधीयः; मनसश्चक्षुरादेश्चान्तर्बहिः-करणस्य सद्भावात् ततोऽस्य विशेषाभावाच्च। अनयोरचेतनत्वा-त्प्रधानं चेतनं करणमित्यप्यसमीचीनम्; भावेन्द्रियमनसोश्चेत-नत्वात्। तत्परोक्षत्वसाधने च सिद्धसाधनम्; स्वार्थग्रहण-
५ शक्तिलक्षणायां लब्धेर्मनसश्च भावकरणस्य छद्मस्थाप्रत्यक्षत्वात्। उपयोगलक्षणं तु भावकरणं नाप्रत्यक्षम्; स्वार्थग्रहणव्यापारल-क्षणस्यास्य स्वसंवेदनप्रत्यक्षप्रसिद्धत्वात् 'घटादिद्वारेण घटादि-ग्रहणे उपयुक्तोऽप्यहं घटं न पश्यामि पदार्थान्तरं तु पश्यामि' इत्युपयोगस्वरूपसंवेदनस्याखिलजनानां सुप्रसिद्धत्वात्। क्रियायाः
१० करणाविनाभावित्वे चात्मनः स्वसंवित्तौ किङ्करणं स्यात्? स्वात्मै-वेति चेत्, अर्थेपि स एवास्तु किमदृष्टान्यकल्पनया? ततश्चक्षु-रादिभ्यो विशेषमिच्छता ज्ञानस्य कर्मत्वेनाप्रतीतावप्यध्यक्षत्व-मभ्युपगन्तव्यम्। फलज्ञानात्मनोः फलत्वेन कर्तृत्वेन चानुभूय-मानयोः प्रत्यक्षत्वाभ्युपगमे करणज्ञाने करणत्वेनानुभूयमानेपि
१५ सोस्तु विशेषाभावात्। न चाभ्यां सर्वथा करणज्ञानस्य भेदो

---

१ परोक्षज्ञानस्य। २ परोक्षत्वेन। ३ उभयत्र। ४ मुख्यम्। ५ कर्मत्वेना-प्रतीयमानत्वाद्धेतोः। ६ बाह्येन्द्रियाश्रितायाः। ७ अर्थग्रहणशक्तेः। ८ असदादि। ९ अर्थग्रहणव्यापारः। १० तदेव दर्शयति। ११ व्याप्रियमाणः। १२ किञ्च। १३ स्वस्वरूपम्। १४ करण। १५ भेदम्। १६ परेण। १७ करणरूपस्य। १८ अर्थ-परिच्छित्ति। १९ ताद्धिः (तासंज्ञा षष्ठ्याः। द्विःपदेन द्विवचनं ग्राह्यम्)। २० परेण। २१ करणज्ञानं प्रत्यक्षमेव स्वस्वरूपेण प्रतिभासमानत्वात्फलज्ञानात्मवत्। २२ स्वरूपेण प्रतिभासाविशेषात्। २३ किञ्च। २४ का (पञ्चमी विभक्तिः)। २५ अन्यथा।

---

1 "इन्द्रियमनसोरेव करणत्वात्, तयोरचेतनत्वादुपकरणमात्रत्वात् प्रधानं चेतनं करणमिति चेन्न; भावेन्द्रियमनसोः परेषां चेतनतयाऽवस्थिततत्वात्।" तत्त्वार्थ-श्लो० पृ० ४६। "मनसश्चक्षुरादेश्चान्तर्बहिःकरणस्य सद्भावात्, ताभ्यां ज्ञानस्य परोक्षत्वेन विशेषाभावाच्च। अथ मनश्चक्षुरादिकायादेरचेतनत्वात् ज्ञानाख्यं करणं चेतनत्वेन ताभ्यां विशिष्यत इत्युच्यते; तदप्यनुपपन्नम्; भावरूपयोरिन्द्रियमन-सोरपि चेतनत्वात्...।" स्या० रत्ना० पृ० २१४।

2 "अर्थग्रहणशक्तिः लब्धिः, उपयोगः पुनरर्थग्रहणव्यापारः।" लघी० स्ववि०, न्यायकुमु० पृ० ११५।

3 "चक्षुरादिद्वारेणोपयुक्तोऽहं घटं पश्यामीत्युपयोगस्वरूपसंवेदनस्य सर्वेषामपि प्रसिद्धत्वात्।" स्या० रत्ना० पृ० २१४।

4 "तदेव तस्य फलमिति चेत्; प्रमाणादभिन्नं भिन्नं वा?...कथञ्चिदभिन्नमिति चेन्न सर्वथा करणज्ञानस्याप्रत्यक्षत्वं विरोधात्।" तत्त्वार्थश्लो० पृ० ४६।

"किंच, आत्मप्रमाणफलाभ्यां सकाशात् करणज्ञानस्य सर्वथा भेदः, कथञ्चिद्वा? स्या० रत्ना० पृ० २१४।

मतान्तरानुषङ्गात्। कथञ्चिद्भेदे तु नास्याऽप्रत्यक्षतैकान्तः श्रेयान् प्रत्यक्षस्वभावाभ्यां कर्तृफलज्ञानाभ्याममिन्नस्यैकान्ततोऽप्रत्यक्षत्वविरोधात्।

किञ्च, आत्मज्ञानयोः सर्वथा कर्मत्वाप्रसिद्धिः, कथञ्चिद्वा? न तावत्सर्वथा; पुरुषान्तरापेक्षया प्रमाणान्तरपेक्षया च कर्मत्वाप्रसिद्धिप्रसङ्गात्। कथञ्चिच्चेत्, येनात्मना कर्मत्वं सिद्धं तेन प्रत्यक्षत्वमपि, अस्मदादिप्रमात्रपेक्षया घटादीनामप्यंशत एव कर्मत्वाध्यक्षयोः प्रसिद्धेः। विरुद्धा च प्रतीयमानयोः कर्मत्वाप्रसिद्धिः, प्रतीयमानत्वं हि ग्राह्यत्वं तदेव कर्मत्वम्। स्वतः प्रतीयमानत्वापेक्षया कर्मत्वाप्रसिद्धौ परतः कथं तत्सिध्येत्? विरोधाभावाच्चेत्स्वतस्तत्सिद्धौ को विरोधः? कर्तृकरणत्वयोः कर्मत्वेन सहानवस्थानम्; परतस्तत्सिद्धौ समानम्। 'घटग्राहिज्ञानविशिष्टमात्मानं स्वतोऽहमनुभवामि' इत्यनुभवसिद्धं स्वतः प्रतीयमानत्वापेक्षयापि कर्मत्वम्। तन्नार्थवज्ज्ञानस्य प्रतीतिसिद्धप्रत्यक्षताऽपलापो-

१ नैयायिक। २ करणरूपेण नतु ज्ञानरूपेण। ३ का। ४ करणज्ञानं सर्वथा न परोक्षं प्रत्यक्षस्वभावाभ्यां कर्तृफलज्ञानाभ्याममिन्नत्वात्तत्स्वरूपवत्। ५ करणस्य। ६ करण। ७ अन्यथा। ८ अस्य करणज्ञानमस्ति उपदेशकृतार्थनिश्चयान्यथानुपपत्तेः। ९ करण। १० मम करणज्ञानमस्ति अर्थप्राकट्यान्यथानुपपत्तेः। ११ स्वभावेन। १२ साकल्येन किमिति न स्यात्प्रत्यक्षत्वमित्युक्ते सत्याह। १३ स्थूलत्वादौ। १४ किञ्च। १५ कर्मत्वेन करणत्वेन च। १६ आत्मज्ञानयोः। १७ स्वयं स्वं जानातीति अपेक्षया। १८ परापेक्षया स्वयं कर्मत्वं च कथम्। १९ (स्वयं)। २० कर्तृकरणयोः परतः कर्मत्वेन प्रतीतिरस्ति कथं समानं सहानवस्थानं स्यादित्युक्ते सत्याह। २१ विशेषण। २२ स्वयं। २३ अन्यथा।

1 "सर्वथा प्रतीयमानत्वमसिद्धं कथञ्चिद्वा? न तावत्सर्वथा; परेणापि प्रतीयमानत्वाभावप्रसङ्गात्। कथञ्चित्पक्षे तु नासिद्धं साधनम्, तथैवोपन्यासात्। स्वतःप्रतीयमानत्वमसिद्धमिति चेत्; परतः कथं तत्सिद्धम्? विरोधाभावादिति चेत्; स्वतस्तत्सिद्धौ को विरोधः? कर्तृत्वकर्मत्वयोः सहानवस्थानमिति चेत्; परतस्तत्सिद्धौ समानम्।" तत्त्वार्थश्लो० पृ० ४५।

"सुप्रसिद्धो हि घटग्राहिज्ञानविशिष्टमात्मानं स्वतोऽहमनुभवामीत्यनुभवः" न्यायकुमु० पृ० १७७।

2 "सकलजगत्प्रतीतौ हि स्तम्भग्राहिज्ञानं ततोऽ(स्वतोऽ)हमनुभवामि इत्यनुभवः, तस्माच्च प्रसिद्धं ज्ञाने स्वरूपापेक्षया कर्मत्वं कथं नामापह्नोतुं शक्यते?" स्या० रत्ना० पृ० २१५

[1]ऽर्थप्रत्यक्षत्वस्याप्यपलापप्रसङ्गात् । प्रतीतिसिद्ध[2]स्वभावस्यैक[3]त्रापलापेऽन्यत्रा[4]प्यनाश्वासा[5]न्न क्वचि[6]त्प्रतिनियतस्वभावव्यवस्था स्यात् ।

[1]किञ्च, इयं प्रत्यक्षता अर्थ[7]धर्मः, ज्ञानधर्मो वा ? न तावदर्थधर्मः, [8]नीलतादिवत्तद्देशे ज्ञानकालादन्यदाप्यनेकप्रमातृसाधारणविषय-
५ तया च प्रसिद्धिप्रसङ्गात् । न चैवम्, आत्मन्येवास्या ज्ञानकाले एव स्वासाधारणविषयतया च प्रसिद्धेः । तथा च न प्रत्यक्षता अर्थधर्मः तद्देशे ज्ञानकालादन्यदाप्यनेकप्रमातृसाधारणविषयतया चाऽप्रसिद्धत्वात् । यस्तु तद्धर्मः स तद्देशे ज्ञानकालादन्यदाप्य-नेकप्रमातृसाधारणविषयतया च प्रसिद्धो दृष्टः, यथा रूपादिः,
१० तद्देशे ज्ञानकालादन्यदाप्यनेकप्रमातृसाधारणविषयतया चाप्रसिद्धा चेयम् तस्मान्न तद्धर्मः । यस्यात्मनो ज्ञाने[10]नार्थः प्रकटीक्रियते [11]तद्ज्ञानकाले तस्यैव सोऽर्थः प्रत्यक्षो भवतीत्यपि श्रद्धामात्रम्; अर्थप्रकाशकविज्ञानस्य प्राकट्याभावे तेनार्थप्र[12]कटीकरणासम्भवा-[13]त्प्रदीपवत्, अन्य[14]था सन्ताना[15]न्तरवर्तिनोपि ज्ञानादर्थप्राकट्य-
१५ प्र[16]सङ्गः[17] । चक्षुरादिवत्तस्य प्राकट्याभावेप्यर्थे प्राकट्यं घटेतेत्यप्यसमीचीनम्; चक्षुरादेरर्थप्रकाशकत्वासम्भवात् । तत्प्रकाशकज्ञान-हेतुत्वात् खलूपचारेणार्थप्रकाशकत्वम् । का[18]रणस्य चा[19]ज्ञातस्यापि कार्ये व्यापाराविरोधो ज्ञापकस्यैवाज्ञातस्य ज्ञापकत्वविरोधात् "नाज्ञातं ज्ञापकं नाम" [ ] इत्यखिलैः परीक्षादक्षैरभ्युप-
२० गमात् । प्रमातुरात्मनो ज्ञापकस्य स्वयं प्रकाशमानस्योपगमादर्थे प्राकट्यसम्भवे करणज्ञानकल्पनावैफल्यमित्युक्तम् । नापि ज्ञानधर्मः; अस्य सर्वथा परोक्षतयोपगमात् । य[20]त्खलु सर्वथा परोक्षं तन्न प्रत्यक्षताधर्माधारो यथाऽदृष्टादि, सर्वथा परोक्षं च परैरभ्युपगतं [21]ज्ञानमिति ।

---

१ करणज्ञानं प्रत्यक्षमर्थप्रत्यक्षत्वान्यथानुपपत्तेः । २ प्रत्यक्षत्वरूपस्य । ३ करण-ज्ञाने । ४ स्थूलत्वाद्यर्थे । ५ अविश्वासात् । ६ वस्तुनि । ७ घटपटादि । ८ अन्यथा । ९ सन्दिग्धानैकान्तिकत्वमनेन वाक्येनार्थधर्मत्वादित्येतस्य हेतोः । १० करणज्ञानेन । ११ करण । १२ ज्ञानं नार्थं प्रकटयति स्वयमप्रत्यक्षत्वात्परमाण्वादिवत् । १३ करण-ज्ञानं प्रत्यक्षमर्थप्रकाशकत्वात्प्रदीपवत् । १४ अ(प्र)त्यक्षादपि ज्ञानादर्थप्राकट्ये । १५ पुरुषान्तर । १६ स्वस्य । १७ उभयत्रापि परोक्षत्वाविशेषात् । १८ कारकस्य । १९ किञ्च । २० करणज्ञानं न प्राकट्यधर्माधिकरणं सर्वथा परोक्षतयोपगमात् । २१ करणम् ।

---

1 "अथ प्रकाश्यतामात्रं तदपि ज्ञानधर्मः, अर्थधर्मः उभयधर्मः, स्वतन्त्रं वा स्यात् ?"
न्यायकुमु० पृ० १७९ ।

कुतश्चैवंवादिनो[1] ज्ञान[2]सद्भावसिद्धिः-प्रत्यक्षात्, अनुमानादेर्वा? न तावत्प्रत्यक्षात्तस्यातद्विषयतयोपगमात्[3]। यद्यद्विषयं न भवति न तत्तद्व्यवस्थापकम्, यथास्मादृक्प्रत्यक्षं परमाण्वाद्यविषयं न तद्व्यवस्थापकम्। ज्ञानाविषयं च प्रत्यक्षं परै[4]रभ्युपगतमिति।

नाप्यनुमानात्; तदविनाभाविलिङ्गाभावात्। तद्धि[5] अर्थज्ञप्तिः; इन्द्रियार्थौ वा, तत्सहकारि[6]प्रगुणं मनो वा? अर्थज्ञप्तिश्चेत्सा किं ज्ञान[7]स्वभावा, अर्थस्वभावा वा? यदि ज्ञानस्वभावा; तदाऽसिद्ध[8]त्वात्तस्याः कथमनुमापकत्वम्? न खलु ज्ञानस्वभावाविशेषेपि 'ज्ञप्तिः प्रत्यक्षा न करणज्ञानम्' इत्यत्र[9] व्यवस्थानिबन्धनं पश्यामोऽन्यत्र महामोहात्[10]। शब्द[11]मात्रभेदाच्च सिद्धासिद्धत्वभेदः[12] स्वेच्छापरिकल्पितो[13]ऽर्थस्याभिन्नत्वात्। ज्ञानत्वेन[14] हि प्रत्यक्षताविरोधे ज्ञप्तावपीयं न स्याद[15]विशेषात्। अथार्थस्वभावा ज्ञप्तिः तदार्थप्राकट्यं सा, न चैतदर्थग्राहकविज्ञान[16]स्यात्मा[17]धिकरणत्वेनापि प्राक[18]ट्याभावे घटते, पुरुषान्तरज्ञानादप्यर्थप्राकट्यप्रसङ्गात्। आत्मा[19]धिकरणत्वपरिज्ञानाभावे च[20] ज्ञानस्य ज्ञानेन ज्ञातोप्यर्थः नात्मानुभवितृ[21]कत्वेन ज्ञातो भवेत् 'मया[22] ज्ञातोऽयमर्थः' इति। अर्थगतप्राकट्यस्य सर्वसाधारणत्वा[23]च्चात्मान्तरबुद्धे[24]रप्यनुमानं स्यात्[27]। यद्बुद्ध्या[25] यस्यार्थः प्रकटीभवति तद्बुद्धिमेवासौ ततो[26]ऽनुमि-

---

१ सर्वथा परोक्षकरणज्ञानमित्येवंवादिनः। २ करण। ३ वीतं प्रत्यक्षं करणज्ञानाव्यवस्थापकं तदविषयत्वादिति। ४ मीमांसकैः। ५ वसः। ६ एकाग्रम्। ७ करणज्ञान। ८ अज्ञातासिद्धत्वम्। ९ पक्षे। १० महदज्ञानं वर्जयित्वा। ११ अर्थज्ञप्तिः करणज्ञानमिति। १२ प्रत्यक्षाप्रत्यक्षभेदः। १३ ज्ञानलक्षणस्य। १४ करणस्य। १५ ज्ञानत्वेन प्रत्यक्षतायाः। १६ करणज्ञानस्य। १७ जीव अहमधिकरणमस्य ज्ञानस्येति परिज्ञानाभावे। १८ अत्यन्तपरोक्षत्वात्। १९ स्व। २० किञ्च। २१ ज्ञानस्य। २२ जीवेन। २३ किञ्च। २४ सर्वेषां करणज्ञानमस्ति अर्थप्राकट्यान्यथानुपपत्तेः। २५ ता। २६ अर्थप्राकट्यात्। २७ जानाति।

---

1 "किंच, बुद्धेः स्वसंवेदनप्रत्यक्षागोचरत्वे कुतस्तत्सत्त्वं सिध्येत्? प्रमाणान्तराच्चेत् किं प्रत्यक्षरूपात्, अनुमानरूपाद्वा?" न्यायकुमु० पृ० १७७। स्या० रत्ना० पृ० २१६।

2 "तद्धि इन्द्रियम्, अर्थः, तदतिशयः, तत्सम्बन्धः, तत्र प्रवृत्तिर्वा भवेत्?" न्यायकुमु० पृ० १७८। स्या० रत्ना० पृ० २१६।

3 "यदि पुनरर्थधर्मत्वादर्थपरिच्छित्तेः प्रत्यक्षतेष्यते, तदा साऽर्थप्राकट्यमुच्यते, न चैतदर्थग्रहणविज्ञानस्य प्राकट्याभावे घटामटति अतिप्रसंगात्। न ह्यप्रकटे अर्थज्ञाने सन्तानान्तरवर्तिनिकरस्य चिदर्थस्य प्राकट्यं घटते।" प्रमाणप० पृ० ६१।

मीते नात्मान्तरबुद्धिमित्यप्यसारम्; [1]बुद्ध्यात्मनोरप्रत्यक्षतैकान्ते '[2]यद्बुद्ध्या यस्यार्थः प्रकटीभवति' इत्यस्यैवान्धपरम्परया व्यवस्थापयितुमशक्तेः। प्रत्यक्षत्वे चात्मनः सिद्धं विज्ञानस्य स्वार्थव्यवसायात्मकत्वम्। आत्मैव हि स्वार्थग्र[3]हणपरिणतो जानातीति ज्ञान-
५ मिति कर्तृसाधनज्ञानशब्देनाभिधीयते।

इन्द्रि[4]यार्थौ लिङ्गमित्यप्यनालोचिताभिधानम्; तयो[5]र्विज्ञानसद्भावा[6]विनाभावासिद्धेः। योग्यदेशे स्थितस्य प्रतिपत्तुरिन्द्रियार्थसद्भावेप्यन्य[7]त्र गतमनसो विज्ञानाभावात्। तत्सि[8]द्धौ चेन्द्रियस्यातीन्द्रियत्वेनार्थस्यापि ज्ञानाऽ[8]प्रत्यक्षत्वेनासिद्धेः कथं त[9]थापि
१० हेतु[11]त्वं तयोः? सिद्धौ वा न साध्यज्ञा[12]नकाले ज्ञानान्तरात्तत्सिद्धिर्युगपद् ज्ञानानुत्पत्त्यभ्युपगमात्। उत्तरकालीनज्ञानात्तत्सिद्धौ तदा साध्यज्ञानस्याभावात्कस्यानुमानम्? [13]उभयविषयस्यैकज्ञानस्यानभ्युपगमाद[14]नवस्थाप्रसङ्गाच्चानयोरसिद्धिः।

इन्द्रियार्थसहकारिप्र[15]गुणं मनो लिङ्गमित्यप्यपरीक्षिताभिधा-
१५ नम्; तत्सद्भावासिद्धेः। युगपद् ज्ञानानुत्पत्तेस्तत्सिद्धिः, तथा हि-आत्मनो मनसा तस्येन्द्रियैः सम्बन्धे ज्ञानमुत्पद्यते। यदा चास्य चक्षुषा सम्बन्धो न तदा शेषेन्द्रियैर्गतिसूक्ष्म[16]त्वात्; इत्यप्यसङ्गतम्; [1]दीर्घशष्कुलीभक्षणादौ युगपद्रूपादिज्ञानपञ्चकोत्पत्तिप्रतीतेः अश्वविकल्पकाले गोनिश्चयाच्च तदसिद्धेः। न चात्र क्रमैका-
२० न्तकल्पना-प्रत्यक्षविरोधात्। कि[17]ञ्चैवंवादि[18]ना (किं) युगपत्प्रतीतं येनावयवावयव्यादिव्यवहारः स्यात्? घटपटादिकमिति चेत् न; अत्रापि त[20]था कल्पनाप्रसङ्गात्। किञ्चातिसू[2]क्ष्मस्यापि मनसो नयना-

१ करणज्ञान। २ ता। ३ ज्ञान। ४ द्वितीयविकल्पस्य। ५ करणज्ञानस्य। ६ भा (तृतीया)। ७ कस्मिंश्चिद्विषये। ८ करणज्ञानस्य सर्वथा परोक्षत्वात्। ९ इन्द्रियार्थयोः। १० असिद्धत्वेपि। ११ करणज्ञानं प्रति। १२ करणज्ञाने। १३ इन्द्रियार्थ। १४ इन्द्रियार्थाल्लिङ्गात्करणज्ञानसिद्धिरिन्द्रियार्थयोरपि सिद्धिः कस्माद-परकरणज्ञानात्तस्यापि अपरेन्द्रियार्थादित्यनवस्था। १५ एकाग्रम्। १६ मनसः। १७ च शब्दः आधिक्ये। १८ दीर्घशष्कुलीभक्षणादौ युगपद् ज्ञानं नोत्पद्यते इत्येवं-वादिना। १९ अत्राक्षेपार्थे किमिति पूर्वेण सम्बन्धः। २० क्रमैकान्त।

1 "अश्वविकल्पकाले गोदर्शनानुभवात् युगपज्ज्ञानानुत्पत्तिश्चासिद्धा कथं मनोऽनुमापिका? नचाश्वविकल्पगोदर्शनयोर्युगपदनुभवेऽपि क्रमोत्पत्तिकल्पना प्रत्यक्षविरोधात्।" सन्मति० टी० पृ० ४७७।

2 "किंच, चक्षुराद्यन्यतमेन्द्रियसम्बन्धात् रूपादिज्ञानोत्पत्तिकाले मनसः सम्बन्धात् मानसज्ञानं किन्न भवेत्? तथाविधादृष्टाभावादित्युत्तरम् अदृष्टनिमित्तयुगपज्ज्ञानानुत्पत्तिप्रसक्तितो मनसोऽनिमित्तता...।" सन्मति० टी० पृ० ४७७।

दीनामन्यतमेन सन्निकर्षसमये रूपादिज्ञानवन्मानसं सुखादिज्ञानं किन्न स्यात् सम्बन्ध[1]सम्बन्धसद्भावात्? तथाविधादृष्ट[2]स्याभावाच्चेत्; अदृष्टकृता तर्हि युगपद् ज्ञानानुत्पत्तिस्तदेवा[3]नुमापयेन्न मनः।

किञ्च, 'युगपद् ज्ञानानुत्पत्तेर्मनःसिद्धिस्ततश्चास्याः प्रसिद्धिः' इत्यन्योन्याश्रयः। चक्रकप्रसङ्गश्च-'विज्ञा[4]नसिद्धिपूर्विका हि युगपद् ५ ज्ञानानुत्पत्तिसिद्धिः, तत्सिद्धि[6]र्मनःपूर्विका' इति। तस्मात्तत्सहकारि प्रगुणं मनो लिङ्गमित्यप्यसिद्धम्।

अस्तु वा[7] किञ्चिल्लिङ्गम्, तथापि-ज्ञानस्याप्रत्यक्षतैकान्ते तत्सम्बन्धा[8]सिद्धिः। न चासिद्ध[11]सम्बन्ध(न्धं) लिङ्गं[12] कस्यचिद्[13] गमकमतिप्रसङ्गात्। ततः परोक्षतैकान्ताग्रहग्रहाभिनिवेश[14]परित्यागेन 'ज्ञानं[15] १० स्वव्यवसायात्मकमर्थज्ञप्ति[16]निमित्तत्वात्[17] आत्मवत्' इत्यभ्युपगन्तव्यम्। नेत्रालोकादिनानेकान्त इत्यप्ययुक्तम्; तस्योपचारतोऽर्थज्ञप्तिनिमित्तत्वसमर्थनात्, परमार्थतः प्रमातृप्रमाणयोरेव तन्निमित्तत्वोपपत्तेरित्यलमतिप्रसङ्गे[18]न।

एतेन[19] 'आत्माऽप्रत्यक्षः कर्मत्वेनाप्रतीयमानत्वात्करणज्ञानवत्' १५

---

१ मनसा सम्बद्धे आत्मनि सुखादेः समवायसम्बन्धः सम्बन्धसम्बन्धः। २ युगपज्ज्ञानोत्पादकस्य। ३ करणज्ञानं कर्म। ४ करणज्ञान। ५ ज्ञप्ति। ६ विज्ञानसिद्धिः। ७ इन्द्रियार्थ। ८ अविनाभाव। ९ भा। १० लिङ्गस्य। ११ अज्ञात। १२ साध्यस्य। १३ अन्यथा। १४ दुराग्रह। १५ करणज्ञानं। १६ साध्यसमस्यात् स्वज्ञप्तिनिमित्तत्वाशङ्कातः। १७ कुठारेण व्यभिचारः। १८ मीमांसकभाट्टकरणज्ञानदूषणकथनेन। १९ करणज्ञानस्य परोक्षत्वनिराकरणपरेण ग्रन्थेन।

---

1 "तथाहि-सिद्धे तद्विभ्रमे मनःसिद्धिः, तत्सिद्धौ च युगपज्ज्ञानोत्पत्तिविभ्रमसिद्धिरितीतरेतराश्रयत्वान्न मनःसिद्धिः।" सन्मति० टी० पृ० ४७८।

2 "अस्तु वा किञ्चिल्लिङ्गम्, तथापि अगृहीतप्रतिबन्धं तत् न परोक्षां बुद्धिमनुमापयितुं समर्थम्...प्रतिबन्धश्च लिंगलिंगिनोः अविनाभूतत्वेन प्रमाणप्रतिपन्नयोरेव भवति। न च ज्ञानं तेन चाविनाभूतं किञ्चिल्लिंगं प्रमाणेन प्रतिपन्नं यतः सम्बन्धग्रहणपुरस्सरमनुमानं प्रवर्तेत।" न्यायकुमु० पृ० १८१।

3 "ज्ञानं स्वपरिच्छेदकमर्थज्ञानत्वात्।" युक्त्यनुशा० टी० पृ० ९

"स्वव्यवसायायात्मकं ज्ञानमर्थपरिच्छित्तिनिमित्तत्वादात्मवत्"

प्रमाणप० पृ० ६१।

4 "किञ्च अप्रकाशस्वभावानि मेयानि माता च प्रकाशमपेक्षन्ताम्, प्रकाशस्तु प्रकाशात्मकत्वान्नान्यमपेक्षते। जाग्रतो हि मेयानि माता च प्रकाशन्ते, सुषुप्तस्य च न

इत्याचक्षाणः प्रभाकरोपि[2] प्रत्याख्यातः। प्रमितेः[3] कर्मत्वेनाप्रतीयमानत्वेपि प्रत्यक्षत्वाभ्युपगमात्[4]। तस्याः क्रियात्वेन प्रतिभासनात्प्रत्यक्षत्वे[5] करणज्ञान-आत्मनोः[6] करणत्वेन कर्तृत्वेन च प्रतिभासनात्प्रत्यक्षत्वमस्तु। न चाभ्यां[7] तस्याः सर्वथा भेदोऽभेदो[8] वा-
५ मतान्तरानुषङ्गात्[10]। कथञ्चिदभेदे-सिद्धं तयोः कथञ्चित्प्रत्यक्षत्वम्; प्रत्यक्षादभिन्नयोः[12] सर्वथा[13] परोक्षत्वविरोधात्[14]। ननु शाब्दी प्रतिपत्तिरेषा[15] 'घटमहमात्मना वेद्मि' इति नानुभवप्रभावा[16] तस्यास्तदविनाभावाभावात्[17], अन्यथा 'अङ्गुल्यग्रे हस्तियूथशतमास्ते' इत्यादिप्रतिपत्तेरप्यनुभवत्वप्रसङ्गस्तत्कथमतः[18] प्रमात्रादीनां
१० प्रत्यक्षताप्रसिद्धिरित्याह—

शब्दानुच्चारणेपि स्वस्यानुभवनमर्थवत् ॥ १० ॥

यथैव हि घटस्वरूपप्रतिभासो[21] घटशब्दोच्चारणमन्तरेणापि[22] प्रतिभासते। तथा प्रतिभासमानत्वाच्च[23] न शाब्दस्तथा प्रमात्रादीनां स्वरूपस्य प्रतिभासोपि[24] तच्छब्दोच्चारणं विनापि प्रतिभा-
१५ सते। तस्माच्च न शाब्दः। तच्छब्दोच्चारणं पुनः प्रतिभातप्रमा-

१ ब्रुवन्। २ वृद्ध। ३ अर्थपरिच्छित्तेः। ४ प्राभाकरेण। ५ सति। ६ कर्मत्वेनाप्रतीयमानयोरपि। ७ किन्न। ८ नैयायिकः। ९ बौद्धः। १० अन्यथा। यौगसौगतयोः परिग्रहः। ११ कर्मत्वेन परोक्षत्वं कर्तृत्वेन करणत्वेन प्रत्यक्षत्वं कर्तृज्ञानयोः। १२ प्रमितिरूपात्। १३ करणज्ञानात्मनोः। १४ भा। १५ अहमात्मना। १६ स्वसंवेदनप्रत्यक्ष। १७ अनुभवेन सह। १८ प्रतीतित्वात्सम्प्रतिपन्नप्रतीतिवत्। १९ कारणात्। २० शाब्द्याः प्रतिपत्तेः श(स)काशात्। २१ ता। २२ अयं घटः। २३ अनुमानसद्भावाच्च। २४ सुखादिवत्।

द्वयमपि प्रकाशते। न च तदानीं तत्रास्त्येव; प्रबोधे सति प्रत्यभिज्ञानात्, तत्र प्रकाशात्मकत्वे सुषुप्तिदशायामपि द्वयं प्रकाशेत, तस्मादप्रकाशात्मकमेवद् द्वयमंगीक्रियते।... मेयानां मातुश्च स्वतःप्रकाशो नोपपद्यत इति युक्ता तयोः परापेक्षा, मितौ च काचिदनुपपत्तिर्नास्ति इति स्वयम्प्रकाशैव मितिः।" प्रक० पं० पृ० ५७।

1 तेषां फलज्ञानहेतोर्व्यभिचारः, कर्मत्वेनाप्रतीयमानस्य फलज्ञानस्य प्राभाकरैः प्रत्यक्षत्वाभ्युपगमात्। तस्य क्रियात्वेन प्रतिभासनात् प्रत्यक्षत्वे प्रमातुरप्यात्मनः कर्तृत्वेन प्रतिभासनात् प्रत्यक्षत्वमस्तु।" प्रमाणप० पृ० ६१।

2 "तच्च फलज्ञानमात्मनोऽर्थान्तरभूतमनर्थान्तरभूतमुभयं वा? न तावत् सर्वथाऽर्थान्तरभूतमनर्थान्तरभूतं वा; मतान्तरप्रवेशानुषङ्गात्। नाप्युभयम्; पक्षद्वयनिगदितदूषणानुषक्तेः। कथञ्चिदर्थान्तरत्वे तु फलज्ञानादात्मनः कथञ्चित्प्रत्यक्षत्वमनिवार्यम्, प्रत्यक्षादभिन्नस्य कथञ्चिदप्रत्यक्षतैकान्तविरोधात्।" प्रमाणप० पृ० ६१।

त्रादिस्वरूपप्रदर्शनपरं नाऽनालम्बनमर्थवत्, अन्यथा 'सुख्यहम्' इत्यादिप्रतिभासस्याप्यनालम्बनत्वप्रसङ्गः।

ननु यथा सुखादिप्रतिभासः सुखादिसंवेदनस्याप्रत्यक्षत्वेप्युपपन्नस्तथार्थसंवेदनस्याप्रत्यक्षत्वेप्यर्थप्रतिभासो भविष्यति इत्यप्यविचारितरमणीयम्; सुखादेः संवेदनादर्थान्तरस्वभावस्याप्रतिभासनादाह्लादनाकारपरिणतज्ञानविशेषस्यैव सुखत्वात्, तस्य चाध्यक्षत्वात् तस्यानध्यक्षत्वेऽत्यन्ताप्रत्यक्षज्ञानग्राह्यत्वे च-अनुग्रहोपघातकारित्वासम्भवः, अन्यथा परकीयसुखादीनामप्यात्मनोऽत्यन्ताप्रत्यक्षज्ञानग्राह्याणां तत्कारित्वप्रसङ्गः। ननु पुत्रादिसुखाद्यप्रत्यक्षत्वेपि तत्सद्भावोपलम्भमात्रादात्मनोऽनुग्रहाद्युपलभ्यते तत्कथमयमेकान्तः? इत्यप्यशिक्षितलक्षितम्; नहि तत्सुखाद्युपलम्भमात्रात् सौमनस्यादिजनिताभिमानिकसुखपरिणतिमन्तरेणात्मनोऽनुग्रहादिसम्भवः, शत्रुसुखाद्युपलम्भाद्दुश्चेष्टितादिना परित्यक्तपुत्रसुखाद्युपलम्भाच्च तत्प्रसङ्गात्। विग्रहादिकमतिसन्निहितमपि आभिमानिकसुखमन्तरेणानुग्रहादिकं न विदधाति-किमङ्ग पुनरतिव्यवहिताः पुत्रसुखादयः।

अस्तु नाम सुखादेः प्रत्यक्षता, सा तु प्रमाणान्तरेण न स्वतः 'स्वात्मनि क्रियाविरोधात्' इत्यन्ये, तस्यापि प्रत्यक्षविरोधः। न खलु घटादिवत् सुखाद्यविदितस्वरूपं पूर्वमुत्पन्नं पुनरिन्द्रियेण सम्बद्ध्यते ततो ज्ञानं ग्रहणं चेति लोके प्रतीतिः। प्रथममेवेष्टा-

१ निर्विषय। २ ईप् (सप्तमी)। ३ शब्दद्वारस्य। ४ शब्दोच्चारणपूर्वकत्वात्। ५ भाट्ट। ६ करणज्ञानं प्रत्यक्षमर्थप्रकाशनिमित्तत्वात्प्रदीपवदात्मवद्वा। ७ अर्थज्ञप्तिनिमित्तत्वादित्यस्य साधनस्यानैकान्तिकत्वम्। ८ करणज्ञानस्य। ९ परिच्छित्तिः। १० दुःखादि। ११ करणज्ञानस्य। १२ करणज्ञानस्य। १३ भिन्न। १४ करण। १५ दुःखात्स्वस्य। १६ स्वस्य। १७ अनैकान्तिकत्वं। १८ प्रमाणमात्रात्। १९ स्वस्य। २० पितुः। २१ कथं। २२ वैमनस्य। २३ आत्मनः आत्मनि। २४ स्वस्य। २५ तातस्य। २६ अन्यथा। २७ अनैकान्तिकत्वपरिहारः कृतः। २८ सुचेष्टित। २९ शरीर। ३० उदासीनपुरुषस्य। ३१ पु(कु)त्र। ३२ विशेषे। ३३ नैयायिको वैशेषिको वा। ३४ अज्ञात। ३५ पश्चात्। ३६ इन्द्रियसम्बन्धात्। ३७ करणरूपमुत्पद्यते। ३८ ज्ञानेन। ३९ परिच्छित्तिरूपं। ४० स्रक्चन्दनादि।

1 "न हि सुखाद्यविदितस्वरूपं पूर्वं घटादिवदुत्पन्नं पुनरिन्द्रियसम्बन्धोपजातज्ञानान्तराद् वेद्यते इति लोकप्रतीतिः, अपि तु प्रथममेव स्वप्रकाशरूपं तदुदयमासादयदुपलभ्यते।" सन्मति० टी० पृ० ४७६।

निष्टविषयानुभवानन्तरं स्वप्रकाशात्मनोऽस्योदयप्रतीतेः। स्वात्मनि क्रियाविरोधं चानन्तरमेव विचारयिष्यामः। यदि चार्थान्तरभूतप्रमाणप्रत्यक्षाः सुखादयस्तर्हि तदपि प्रमाणं प्रमाणान्तरप्रत्यक्षमित्यनवस्था। विभिन्नप्रमाणग्राह्याणां चानुग्रहादिकारित्वविरोधः। न हि स्त्रीसङ्गमादिभ्यः प्रतीयमानाः सुखादयोऽन्यस्यात्मनस्तत्कारिणो दृष्टाः। ननु परकीयसुखादीनामनुमानगम्यत्वान्नात्मनोऽनुग्रहादिकारित्वम् आत्मीयानां प्रत्यक्षाधिगम्यत्वात्तत्कारित्वमित्यप्यसारम्; योगिनोपि तत्कारित्वप्रसङ्गात् प्रत्यक्षाधिगम्यत्वाविशेषात्। आत्मीयसुखादीनामेव तत्कारित्वं नान्येषामित्यपि फल्गुप्रायम्, अत्यन्तभेदेऽर्थान्तरभूतप्रमाणग्राह्यत्वे चात्मीयेतरभेदस्यैवासम्भवात्।

आत्मीयत्वं हि तेषां तद्गुणत्वात्, तत्कार्यत्वाद्वा स्यात्, तत्र समवायाद्वा, तदाधेयत्वाद्वा, तददृष्टनिष्पाद्यत्वाद्वा। न तावत्तद्गुणत्वात्; तेषामात्मनो व्यतिरेकैकान्ते 'तस्यैव ते गुणा नाकाशादेरन्यात्मनो वा' इति व्यवस्थापयितुमशक्तेः।

तत्कार्यत्वाच्चेत्कुतस्तत्कार्यत्वम्? तस्मिन् सति भावात्; आकाशादौ तत्प्रसङ्गः। तस्य निमित्तकारणत्वेन व्यापारादद्दोषश्चेत्, आत्मनोपि तथा तदस्तु। समवायिकारणमन्तरेण कार्यानुत्पत्तेरात्मनस्तत्कल्प्यते, गगनादेस्तु निमित्तकारणत्वमित्यप्ययुक्तम्; विपर्ययेणापि तत्कल्पनाप्रसङ्गात्। प्रत्यासत्तेरात्मैव समवायिकारणं चेन्न; देशकालप्रत्यासत्तेर्नित्यव्यापित्वेनात्मवदन्यत्रापि समानत्वात्। योग्यतापि कार्ये सामर्थ्यम्, तच्चाका-

१ अह्यादि। २ सुखादेः। ३ परिच्छित्तिलक्षणा। ४ अग्रे। ५ किञ्च। ६ सुखादेर्भिन्नप्रमाणात्। ७ सुखादीनां। ८ किञ्च। ९ उपघात। १० स्वस्य। ११ परकीयसुखादिवदृष्टान्तः। १२ देवदत्तस्य पुरुषस्य। १३ यज्ञदत्तस्य स्वस्य। १४ जीवन्मुक्तस्य। १५ आत्मनः सकाशात्सुखादीनाम्। १६ परकीय। १७ देवदत्तात्म। १८ देवदत्तात्म। १९ देवदत्तात्मनि। २० देवदत्तात्म। २१ देवदत्तात्म। २२ भा। २३ भेदैकान्ते। २४ देवदत्तात्मनः। २५ सुखादयः। २६ यज्ञदत्तात्मनः। २७ देवदत्तात्म। २८ देवदत्ते सति। २९ सुखादयः आकाशकार्यत्वादाकाशादीयाः स्युराकाशादौ सति भावात्। ३० उपादानकारणे। ३१ आत्मा निमित्तकारणं गगनादि समवायिकारणं। ३२ सुखादौ। ३३ शक्तिः कार्योत्पादिका। ३४ किञ्च।

1 "न चात्मनो ज्ञानाच्च अर्थान्तरभूता एव सुखादयोऽनुग्रहादिविधायिनो भवेयुः, इतरथा योगिनोऽपि ते तथा स्युः।" सन्मति० टी० पृ० ४७६।

शादेरप्यस्तीति । अथात्मन्यात्मनस्त[1]ज्जनन[2]सामर्थ्यं नान्यस्येत्यप्ययुक्तम्; अत्यन्त[3]भेदे तथा त[4]ज्जननविरोधात् । तत्सामर्थ्यस्याप्यात्मनोऽत्यन्तभेदे 'तस्यैवेदं नान्यस्य' इति किङ्कृ[6]तोयं विभागः? समवायादेश्च निषे(त्य)मानत्वान्नियामकत्वायोगः । तन्नान्वय[9]मात्रेण सुखादीनामात्मकार्यत्वम् । तद[10]भावे[11]ऽभावा[12]त्त[13]च्चे[14]न्न, नित्यव्यापि[15]त्वाभ्यां त[16]स्याभावासम्भवात् । त[17]त्र समवायादित्यप्यसत्; तस्या[18]त्रैव निराकरिष्यमाणत्वात्, स[19]र्वत्राविशेषा[20]च्च; तेन[21] तेषां[22] तत्रै[23]व स[24]मवायासम्भवात् ।

तदा[25]श्रयत्वाच्चेत्किमिदं त[26]दा[27]श्रयत्वं[28] नाम त[29]त्र स[30]मवायः, ता[31]दात्म्यं वा, त[32]त्रोत्कलित[33]त्वमात्रं वा? न तावत्समवायः, दत्तोत्तरत्वा[34]त् । नापि तादात्म्यम्[35]; मतान्तरा[36]नुषङ्गात् । तेषामात्मनोऽत्यन्तभेदे सकलात्मनां गगना[37]दीनां च व्यापित्वे 'त[38]त्रैवोत्कलितत्वम्' इत्यपि श्रद्धामात्रगम्यम् । अथाऽदृ[39]ष्टान्नि[40]यमः 'यच्चात्मीयाऽदृष्टनिष्पाद्यं सुखं तदात्मीयमन्य[41]त्तु परकीयम्' इत्यप्यसारम्; अदृष्टस्याप्यात्मीयत्वासिद्धेः । समवायादेस्तन्नियामकत्वेप्युक्तदोषानुषङ्गः । य[42]त्र यददृष्टं सुखं दुःखं चोत्पादयति त[43]त्तस्यत्येपि मनोरथमात्रम्, परस्पराश्रयानुषङ्गात्-अदृ[44]ष्टनियमे सुखादेर्नियमः, तन्नियमाच्चादृष्टस्येति । 'य[45]स्य श्र[46]द्धयोप[47]गृहीतानि द्रव्यगुणकर्माणि यददृष्टं जनयन्ति तत्तस्य' इत्यपि श्रद्धामात्रम्, तस्या अप्यात्मनोऽत्यन्तभेदे प्र[48]तिनियमासिद्धेः । 'यस्यादृष्टेनासौ जन्यते सा तस्य' इत्यप्य[49]न्योन्याश्रयादयुक्तम् । 'द्रव्यादौ य[50]स्य द[51]र्शनस्मरणा[52]दीनि श्रद्धामाविर्भा-

१ सुखादि । २ उत्पाद । ३ आत्मनः सकाशात्सुखादिकं सर्वथा भिन्नं । ४ सुखादि । ५ देवदत्तस्य । ६ केन कृतः । ७ देवदत्तात्मनि सामर्थ्यस्य । ८ अग्रे । ९ तस्मिन् सति भावात् । १० देवदत्तात्म । ११ सुखादीनां । १२ व्यतिरेक । १३ सुखादि । १४ देवदत्तसुखादीनाम् । १५ देवदत्तात्मनः । १६ आत्मनः । १७ देवदत्तात्मनि । १८ ग्रन्थे । १९ खादावर्थे । २० समवायस्य । २१ कारणेन । २२ सुखादीनां । २३ देवदत्तात्मन्येव । २४ (सम्बन्ध) । २५ देवदत्तात्म । २६ खादौ । २७ बसः । २८ देवदत्तात्म । २९ देवदत्तात्मनि । ३० सुखादीनां । ३१ देवदत्तात्मना सह । ३२ देवदत्तात्मनि । ३३ आविर्भूतत्वं । ३४ जैनैः । ३५ अन्यथा । ३६ जैनमत । ३७ दिक्कालादि । ३८ देवदत्तात्मनि । ३९ पुण्यादि । ४० सुखादय आत्मीया आत्मीयादृष्टनिष्पाद्यत्वात् । ४१ पुनः । ४२ आत्मनि । ४३ आत्मनः । ४४ असेदमदृष्टमिति । ४५ आत्मनः । ४६ विश्वासेन । ४७ स्वीकृतानि । ४८ श्रद्धा भक्तेति । ४९ श्रद्धाया नियमे अदृष्टनियमस्तस्मिंस्तन्नियमः । ५० आत्मनः । ५१ प्रत्यक्ष । ५२ प्रत्यभिज्ञान ।

वयन्ति तस्य सा' इत्यप्युक्तिमात्रम्, दर्शनादीनामपि[1] प्रतिनियमासिद्धेः। समवायाच्चेषां श्रद्धायाश्च प्रतिनियमः इत्यप्यसमीक्षिताभिधानम्, तस्य षट्पदार्थपरीक्षायां निराकरिष्यमाणत्वात्।

एतेनै[2]तद[3]पि प्रत्याख्यातम् 'ज्ञानं ज्ञानान्तर[1]वेद्यं प्रमेयत्वात्पटा५दिवत्;' सुख[4]संवे[2]दनेन हेतोर्व्यभिचारान्महेश्वरज्ञानेन च, तस्य ज्ञानान्तरावेद्यत्वेपि प्रमेयत्वात्। तस्यापि ज्ञानान्तरप्रत्यक्षत्वेऽन-

१ दर्शनादीनाम्। २ सुखदुःखादेः स्वसंविदितत्वसमर्थनपरेण ग्रन्थेन। ३ यौगमतमपि (तदेव यौगमतं दर्शयति ज्ञानमित्यादिना)। ४ सुखसंवेदनं ज्ञानं भवति न तु ज्ञानान्तरवेद्यं। ५ भा।

1 "नासाधना प्रमाणसिद्धिर्नापि प्रत्यक्षादिव्यतिरिक्तप्रमाणाभ्युपगमो... नापि च तयैव व्यक्त्या तस्या एव ग्रहणमुपेयते येनात्मनि वृत्तिविरोधो भवेत्, अपि तु प्रत्यक्षादिजातीयेन प्रत्यक्षादिजातीयस्य ग्रहणमातिष्ठामहे। न चानवस्था, अस्ति किंचित् प्रमाणं यः स्वज्ञानेन अन्यधीहेतुः यथा धूमादि, किंचित्पुनरज्ञातमेव बुद्धिसाधनं यथा चक्षुरादि, तत्र पूर्वं स्वज्ञाने चक्षुराद्यपेक्षम्, चक्षुरादि तु ज्ञानानपेक्षमेव ज्ञानसाधनमिति क्वानवस्था? बुभुत्सया च तदपि शक्यज्ञानं सा कदाचिदेव क्वचिदिति नानवस्था।" न्यायवा० ता० टी० पृ० ३७०।

"विवादाध्यासिताः प्रत्ययान्तरेणैव वेद्याः प्रत्ययत्वात्, ये ये प्रत्ययास्ते सर्वे प्रत्ययान्तरवेद्याः यथा न प्रत्ययान्तरेणैव वेद्याः (?) अविद्यमानस्यावभासेऽतिप्रसंगात् ज्ञायमानस्यैवावभासोऽभ्युपेयः। तथा च विज्ञानस्य स्वसंवेदने तदेव तस्य कर्म क्रिया चेति विरुद्धमापद्येत। यथोक्तम्—

अङ्गुल्यग्रं यथात्मानं नात्मना स्प्रष्टमर्हति।
स्वांशेन ज्ञानमप्येवं नात्मानं ज्ञातुमर्हति॥ इति।

यत् प्रत्ययत्वं वस्तुभूतमविरोधेन व्याप्तम्, तद्विरुद्धविरोधदर्शनात् स्वसंवेदनान्निवर्तमानं प्रत्ययान्तरवेद्यत्वेन व्याप्यते इति प्रतिबन्धसिद्धिः। एवं प्रमेयत्व-गुणत्वसत्त्वादयोऽपि प्रत्ययान्तरवेद्यत्वहेतवः प्रयोक्तव्याः। तथा च न स्वसंवेदनं विज्ञानमिति सिद्धम्।" विधिवि० न्यायकणि० पृ० २६७।

"तस्मात् ज्ञानान्तरसंवेद्यं संवेदनं वेद्यत्वात् घटादिवत्।"
प्रश० व्यो० पृ० ५२९।

"अनवस्थाप्रसङ्गस्तु अवश्यवेद्यत्वानभ्युपगमेन निरसनीयः... विवादाध्यासितवेदनं वेदनान्तरगोचरः वेदनत्वात् पुरुषान्तरवेदनवत्..." प्रश० किरणावली पृ० २८३।

2 "महेश्वरार्थज्ञानेन हेतोर्व्यभिचारात्, तस्य ज्ञानान्तरावेद्यत्वेऽपि प्रमेयत्वात्।" प्रमाणप० पृ० ६०। मुक्त्यनुशा० टी० पृ० १०। न्यायकुमु० पृ० १८३। स्या० रत्ना० पृ० २२२।

"सुखादिसंवेदनेन व्यभिचारी च" सन्मति० टी० पृ० ४७६।

वस्था-तस्यापि ज्ञानान्तरेण प्रत्यक्षत्वात्। ननु नानवस्था नित्यज्ञानद्वयस्येश्वरे सदा सम्भवात्[१], तत्रैकेन[२]ार्थजात[३]स्य द्वितीयेन पुनस्तज्ज्ञानस्य प्रतीतेर्नापरज्ञानकल्पनया किञ्चित्प्रयोजनं तावतै[४]वार्थसि[५]द्धेरित्यप्यसमीचीनम्; [६][1]समानकालया[७]वद्द्रव्यभाविसजातीयगुणद्वयस्यान्[९]यत्रानुपलब्धे[८]रत्रापि तत्कल्पनाऽसम्भवात्। ५

[१०]सम्भवे वा तद्द्वितीय[2]ज्ञानं [११]प्रत्यक्षम्, अप्रत्यक्षं वा? अप्रत्यक्षं चेत्; कथं तेनाद्यज्ञानप्रत्यक्षतासम्भवः? अप्रत्यक्षादप्यतस्तत्सम्भवे प्रथमज्ञानस्याऽप्रत्यक्षत्वेऽप्यर्थप्रत्यक्षतास्तु। प्रत्यक्षं चेत्; स्वतः, ज्ञानान्तराद्वा? स्वतश्चेदाद्यस्यापि स्वतः प्रत्यक्षत्वमस्तु। ज्ञानान्तराच्चेत्सैवानवस्था। आद्यज्ञानाच्चेदन्योन्याश्रयः-सिद्धे ह्याद्य- १० ज्ञानस्य प्रत्यक्षत्वे ततो द्वितीयस्य प्रत्यक्षतासिद्धिः, तत्सिद्धौ चाद्यस्येति।

किञ्च, [3]अनयोर्ज्ञानयोर्महेश्वराद्भेदे कथं तदीयत्वसिद्धिः समवायादेर[१२]ग्रे दत्तोत्तरत्वात्? [१३]तदाधेयत्वात्तत्त्वे[१४]प्युक्तम्। तदाधेयत्वं च[१५] तत्र[१६] समवेत[१७]त्वम्, तच्च केन प्रतीयते? न तावदीश्वरेण, १५

१ द्वयोर्ज्ञानयोर्मध्ये। २ आद्येन। ३ समूहस्य। ४ प्रयोजनम्। ५ कथमनवस्था। ६ गुणद्वयानुपलब्धेरित्युक्ते मातुलिङ्गे रूपरसाभ्यां व्यभिचारस्तत्र तदुपलब्धेरतः सजातीयेत्युक्तं तथापि क्रमेणात्मनि सुख[दुःखा]ख्यगुणद्वयस्योपलब्धेरतः समानकालेत्युक्तं तथापि नानापुरुषैरुच्चार्यमाणशब्दानां समानकालसजातीयगुणत्वेन आकाशे उपलब्धेरतो यावद्द्रव्यभावीत्युक्तं न चाकाशस्थितिपर्यन्तं शब्दानामनवस्थानं तेषामनित्यत्वेनोपगमात् त्रिक्षणस्थायित्वाच्च। ७ यावद्द्रव्यं तावद्भावीति। ८ आत्मघटादौ। ९ ईश्वरो वीतगुणद्वयाधारो न भवति द्रव्यत्वात्पटवत्। १० तन्मतप्रक्रियापेक्षया। ११ ईश्वरस्य। १२ प्रथममेव। १३ ईप्। १४ तदाधेयत्वं समवायः तादात्म्यं तत्रोत्कलितत्वमित्यादौ दूषणम्। १५ किञ्च। १६ ईश्वरे। १७ ईश्वरे समवेतं (समवायेन सम्बद्धं) ज्ञानद्वयं।

1 "समानकालयावद्द्रव्यभाविसजातीयगुणद्वयस्यान्यत्रानुपलब्धेस्त्र्यम्बकेऽपि तत्कल्पनाया असंभवः। तथाच प्रयोगः-ईश्वरः समानकालयावद्द्रव्यभाविसजातीयगुणद्वयस्याधारो न भवति द्रव्यत्वात्...घटवत्।" स्या० रत्ना० पृ० २२८।

2 "तदप्यर्थज्ञानमीश्वरस्य प्रत्यक्षमप्रत्यक्षं वा? यदि प्रत्यक्षम्; तदा स्वतो ज्ञानान्तराद्वा? स्वतश्चेत्; प्रथममप्यर्थज्ञानं स्वतः प्रत्यक्षमस्तु किं विज्ञानान्तरेण? यदि तु ज्ञानान्तरात्प्रत्यक्षं तदपीष्यते, तदा तदपि ज्ञानान्तरं किमीश्वरस्य प्रत्यक्षमप्रत्यक्षं वेति स एव पर्यनुयोगोऽनवस्थानं च दुःशक्यं परिहर्तुम्।" प्रमाणप० पृ० ६०

3 "किंचानयोर्ज्ञानयोः पिनाकपाणेः सर्वथा भेदे कथं तदीयत्वसिद्धिः?"
स्या० रत्ना० पृ० २२८।

तेनात्मनो ज्ञानद्वयस्य चा[1]ग्रहणे 'अत्रेदं समवेतम्' इति प्रतीत्ययोगात् । तस्य तत्र समवेतत्वमेव तद्ग्रहणमित्यपि नोत्तरम्; अन्योन्याश्रयात्-सिद्धे हि 'इदमत्र' इति ग्रहणे तत्र समवेतत्वसिद्धिः, तस्याश्च त[2]द्ग्रहणसिद्धिः । य[3]श्चात्मीयज्ञानमात्मन्यपि स्थितं ५ न जानाति सोऽर्थजातं जानातीति क[4]श्चेतनः श्रद्दधीत? नापि ज्ञा[5]नेन 'स्था[6]णावि[7]दं समवेतम्' इति प्रतीयते; तेनाप्याधा[9]रस्यात्म[8]नश्चा-ग्र[10]हणात् । न च तदग्रहणे 'म[11]मेदं रूपमत्र स्थितम्' इति सम्भवः ।

अस्तु वा स[12]मवेतत्वप्रतीतिः, तथापि-स्व[13][14]ज्ञानस्याप्रत्यक्षत्वात्सर्वज्ञत्वे[15]विरोधः । त[16]दप्रत्यक्षत्वे चा[17]नेनाशेषार्थस्याप्यध्यक्षता-१० विरोधः । कथमन्यथात्मान्तरज्ञानेनाप्यर्थसाक्षात्करणं न स्या[18]त्? तथा चेश्वरानीश्वरविभागाभावः-स्वयम[19]प्रत्यक्षेणापीश्वरज्ञानेनाशेषविषयेणा[20]शेषस्य प्राणिनोऽशेषार्थसाक्षात्करणप्रसङ्गात् । ततस्तद्विभागमि[20]च्छता महेश्वरज्ञानं स्वतः प्रत्यक्षमभ्युप[21]गन्तव्यमित्यनेनानेकान्तः[22] सिद्धः ।

१५ अथास्मदादिज्ञानापेक्षया ज्ञानस्य ज्ञानान्तरवेद्यत्वं प्रमेयत्वहेतुना साध्य[23]तेऽतो नेश्वरज्ञानेनानेकान्तोऽस्यास्मदादिज्ञानाद्विशि-

---

१ ज्ञानविकलो गृह्णाति ज्ञानसहितो वा । ज्ञानविकलश्चेत् ज्ञानद्वयकल्पनानर्थक्यमात्मैवार्थज्ञानस्य ग्राहकोऽस्तु । ज्ञानसहितश्चेत् । तदपि ज्ञानमात्मनि समवेतमिति कुतो जानाति आत्मैव ज्ञानं वेत्यादिविचारः । २ अत्रेदं । ३ किञ्च । ४ ज्ञानवान् । ५ ज्ञानद्वयेन प्रतीयते । ६ ईशे । ७ ज्ञानाद्भेदे सत्यास्थाणुमदृश इत्यर्थः । ८ ईश्वरस्य । ९ ज्ञानरूपस्य । १० स्वस्मिन् । ११ ज्ञानस्य स्वसंविदितत्वात् । १२ स्वप्रक्रियामात्रेण । १३ आत्मान्तरज्ञानेनाप्यर्थसाक्षात्करणं भवत्विति चेत् । १४ ईश्वरज्ञानस्य । १५ महेश्वरस्य । १६ किञ्च । १७ स्वस्य संसारिज्ञानेनापीति अध्या(हा)रः । १८ ईश्वर । १९ बसः । २० परेण । २१ यौगेन । २२ हेतोरीश्वरज्ञाने व्यभिचारः । २३ परेण मया ।

---

1 "यदि पुनरप्रत्यक्षमेवेश्वरार्थज्ञानज्ञानं तदेश्वरस्य सर्वज्ञत्वविरोधः स्वज्ञानस्याप्रत्यक्षत्वात् । तदप्रत्यक्षत्वे च प्रथमार्थज्ञानमपि न तेन प्रत्यक्षम्, स्वयमप्रत्यक्षेण ज्ञानान्तरेण तस्यार्थज्ञानस्य साक्षात्करणविरोधात् । कथमन्यथा आत्मान्तरज्ञानेनापि कस्यचित् साक्षात्करणं न स्यात् । तथा चानीश्वरस्यापि सकलस्य प्राणिनः स्वयमप्रत्यक्षेणापि ईश्वरज्ञानेन सर्वविषयेण सर्वार्थसाक्षात्करणं संगच्छेत् ततः सर्वस्य सर्वार्थवेदित्वसिद्धेः ईश्वरानीश्वरविभागाभावो भूयते ।" प्रमाणप० पृ० ६० ।

2 "स्यान्मतिरेषा ते युष्माकमस्मदादिज्ञानापेक्षया अर्थज्ञानस्य ज्ञानान्तरवेद्यत्वं प्रमेयत्वहेतुना साध्यते ततो नेश्वरज्ञानेन व्यभिचारः, तस्यास्मदादिज्ञानाद्विशिष्टत्वात् ।

ष्टत्वात्, न खलु विशिष्टे दृष्टं धर्ममविशिष्टेऽपि[2] योजयन् प्रेक्षावत्तां लभते निखिलार्थवेदित्वस्याप्यखिलज्ञानानां[4] तद्वत्प्रसङ्गात्। इत्यप्यसमीचीनम्; स्वभावावलम्बनात्। स्वपरप्रकाशात्मकत्वं हि ज्ञानसामान्यस्वभावो[5] न पुनर्विशिष्टविज्ञानस्यैव धर्मः। तत्र[6] तस्योपलम्भमात्रात्तद्धर्मत्वे[7] भानौ[8] स्वपरप्रकाशात्मकत्वोपलम्भात् प्रदीपे तत्प्रतिषेधप्रसङ्गः। तत्स्वभावत्वे तद्वत्तेषां[10] निखिलार्थवेदित्वानुषङ्गश्चेत्; तर्हि प्रदीपस्य स्वपरप्रकाशात्मकत्वे भानुवन्निखिलार्थोद्योतकत्वानुषङ्गः किन्न स्यात्? योग्यता[11]वशात्तदात्मकत्वाविशेषेऽपि प्रदीपादेर्नियता[12]र्थोद्योतकत्वं ज्ञानेऽपि समानम्। ततो ज्ञानं स्वपरप्रकाशात्मकं ज्ञानत्वान्महेश्वरज्ञानवत्, अव्यवधानेनार्थप्र[13]काशकत्वाद्वा[14], अर्थग्रहणा[15]त्मकत्वाद्वा तद्वदेव, यत्पुनः[16] स्वपरप्रकाशात्मकं न भवति न तद् ज्ञानम् अव्यवधानेनार्थप्रकाशकम् अर्थग्रहणात्मकं वा, यथा चक्षुरादि।

आश्रयासिद्धश्च[17][1][18] 'प्रमेयत्वात्' इत्ययं हेतुः, धर्मिणो[19] ज्ञानस्यासिद्धेः। तत्सिद्धिः खलु प्रत्यक्षतः, अनुमानतो वा प्रमाणान्तरस्यात्रानधिकारात्? तत्र न तावत्प्रत्यक्षतः; तस्येन्द्रियार्थसन्निकर्षजत्वाभ्युपगमात्[20], तज्ज्ञानेन चक्षुरादीन्द्रियस्य सन्निकर्षाभावात्। अन्यदिन्द्रियं[21] तेन चास्य सन्निकर्षो[22] वाच्यः। मनोन्तःकरणम्[23], तेन चास्य संयुक्तसमवायः सम्बन्धः, तत्प्रभवं चाध्यक्षं धर्मिस्वरूपग्राहकम्-मनो हि संयुक्तमात्मना तत्रैव समवायस्तज्ज्ञानस्येति; तदयुक्तम्; मनसोऽसिद्धेः। अथ 'घटादिज्ञानज्ञानम्[24] इन्द्रियार्थ[25]-

---

१ स्वपरप्रकाशात्मकत्वं स्वसंविदितत्वं। २ अस्मदादिज्ञाने। ३ अन्यथा। ४ निखिलं ज्ञानमखिलार्थवेदि ज्ञानत्वादीश्वरज्ञानवत्। ५ ता। ६ महेश्वरज्ञाने शम्भौ न। ७ स्वप्रक्रियामात्रात्। ८ रवौ। ९ ईश्वरज्ञानवत्। १० अस्मदादिज्ञानानां। ११ शक्तिः। १२ कतिपय। १३ चक्षुरादिना व्यभिचारः। १४ भिन्नविशेषणं। १५ परिच्छित्ति। १६ अभिन्नविशेषणं। १७ बसः। १८ किञ्च। १९ घटादिज्ञानस्य। २० परेण। २१ चक्षुरादिपञ्चभ्यः। २२ परेण। २३ इन्द्रियं। २४ मनः। २५ घटादिज्ञान।

न हि विशिष्टे दृष्टं धर्ममविशिष्टेऽपि घटयन् प्रेक्षावत्तां लभते इति; सापि न परीक्षासहा, ज्ञानान्तरस्यापि प्रज्ञानेन वेद्यत्वे अनवस्थानुषंगात्।" प्रमाणप० पृ० ६०। न्यायकुमु० पृ० १८३। स्या० रत्ना० पृ० २२२।

1 "अत्र प्रयोगे हेतुराश्रयासिद्धः स्वरूपासिद्धश्च धर्मिणो ज्ञानस्याप्रतिपत्तौ तदाश्रितज्ञेयत्वधर्माप्रतिपत्तेः।...तत्प्रसिद्धिः अध्यक्षतोऽनुमानतो वा प्रमाणान्तरस्यात्रानधिकारात्।" सन्मति० टी० पृ० ४७५।

सन्निकर्षजं प्रत्यक्षत्वे सति ज्ञानत्वात्[1] चक्षुरादिप्रभवरूपादिज्ञानवत्' इत्यनुमानात्तत्सिद्धिरित्यभिधीयते, तदप्यभिधानमात्रम्; हेतोरप्रसिद्धविशेषणत्वात्[1]। न हि घटादिज्ञानज्ञानस्याध्यक्षत्वं सिद्धम्, इतरेतराश्रयानुषङ्गात्[2]-मनःसिद्धौ हि तस्याध्यक्षत्वसिद्धिः, तत्सिद्धौ च सविशेषणहेतुसिद्धेर्मनःसिद्धिरिति। विशेष्यासिद्धत्वं[3] च; न खलु घटज्ञानाद्भिन्नमन्यज्ज्ञानं तद्ग्राहकमनुभूयते[4]। सुखादिसंवेदनेन[2][5] व्यभिचारश्च; तद्धि प्रत्यक्षत्वे सति ज्ञानं न तज्जन्यमिति। अस्यापि पक्षीकरणान्न दोष इत्ययुक्तम्; व्यभिचारविषयस्य पक्षीकरणे न कश्चिद्धेतुर्व्यभिचारी स्यात्। 'अनित्यः शब्दः प्रमेयत्वाद् घटवत्' इत्यादेरप्यात्मादिना[6] न व्यभिचारस्तस्य पक्षीकृतत्वात्। प्रत्यक्षादिबाधोभयत्र[7] समाना। न हि 'घटादिवत्सुखाद्यविदितस्वरूपं पूर्वमुत्पन्नं पुनरिन्द्रियेण[8][9] सम्बध्यते ततो ज्ञानं ग्रहणं च' इति लोके प्रतीतिः, प्रथममेवेष्टानिष्टविषयानुभवानन्तरं स्वप्रकाशात्मनोऽस्योदय[10]प्रतीतिः।

स्वात्मनि[3] क्रिया[11]विरोधान्मिथ्येयं प्रतीतिः, न हि सुतीक्ष्णोपि खड्ग आत्मानं छिनत्ति, सुशिक्षितोपि वा नटबटुः स्वं स्कन्धमारोहतीत्यप्यसमीचीनम्; स्वात्मन्येव क्रियायाः प्रतीतेः। स्वात्मा[12][4] हि क्रियायाः[13] स्वरूपम्, क्रियावदात्मा[14] वा? यदि स्वरूपम्, कथं तस्यास्तत्र विरोधः स्वरूपस्याविरोधकत्वात्[15]? अन्यथा सर्वभावानां[16]

---

१ अनुमानज्ञानेन व्यभिचारस्तत्परिहारार्थं प्रत्यक्षत्वे सति ग्रहणम्। २ अन्यथा। ३ हेतोः। ४ घटज्ञान। ५ इन्द्रियार्थसन्निकर्षजं न भवति। ६ प्रमेयेन। ७ आत्मनोऽनित्यत्वे सुखादिसंवेदनस्येन्द्रियार्थसन्निकर्षजत्वे च। ८ पश्चात्। ९ मानसं करणरूपम्। १० सुखादिसंवेदनस्य। ११ प्रकाशलक्षणायाः। १२ ता। १३ आत्मार्थवाचकस्वशब्दपक्षे। १४ आत्मीयार्थवाचकस्वशब्दपक्षे। १५ विरोधकत्वे। १६ घटादि।

---

1 "न; अस्य हेतोरप्रसिद्धविशेषणत्वात्, नहि घटादिज्ञानज्ञानस्य अध्यक्षत्वं सिद्धम्, इतरेतराश्रयत्वात्।" सन्मति० टी० पृ० ४७६

2 "सुखसंवेदनेन व्यभिचारी च; तथाहि-तत्संवेदनमध्यक्षत्वे सति ज्ञानं न च तज्जन्यमिति व्यभिचारः। अथास्यापि पक्षीकरणाददोषः, तथाहि-सुखादिसंवेदनमिन्द्रियार्थसन्निकर्षजम् अध्यक्षज्ञानत्वात् चक्षुरादिप्रभवरूपादिवेदनवत्, सुखादिर्वा भिन्नज्ञानवेद्यः ज्ञेयत्वात् घटवत्।" सन्मति० टी० पृ० ४७६

3 "स्वात्मनि वृत्तिविरोधात्, नहि तदेव अंगुल्यग्रं तेनैव अंगुल्यग्रेण स्पृश्यते, सैवासिधारा तयैवासिधारया छिद्यते।" स्फुटार्थ-अभिध० पृ० ७८

4 "स्वात्मा हि क्रियायाःस्वरूपं क्रियावदात्मा वा?" आप्तप० पृ० ४७। न्यायकुमु० पृ० १८८। स्या० रत्ना० पृ० २२९।

स्वरूपे विरोधान्नि[1]स्स्वरूपत्वानुषङ्गः । विरोधस्य द्विष्ठत्वाच्च न क्रियायाः स्वात्मनि विरोधः । क्रियावदा[2]त्मा[3] तस्याः स्वात्मा इत्यप्यसङ्गतम्, क्रियावत्येव तस्याः प्रतीतेस्तत्र तद्विरोधासिद्धेः' अन्यथा सर्वक्रियाणां निराश्रयत्वं सकलद्रव्याणां चाऽक्रियत्वं स्यात् । न चैवम्; कर्मस्थाया[4]स्तस्याः कर्मणि[5] कर्तृस्थाया[6]श्च कर्तरि प्रतीयमानत्वात् । किञ्च, तत्रो[7]त्पत्तिलक्षणा क्रिया विरुध्यते[8], परिस्पन्दात्मिका, धात्वर्थरूपा, ज्ञप्तिरूपा वा? यद्युत्पत्तिलक्षणा, सा विरुध्यताम्[9] । नखलु 'ज्ञानमात्मानमुत्पादयति' इत्यभ्यनुजानीमः[10] स्वसामग्रीविशेषवशात्तदुत्पत्त्यभ्युपगमात् । नापि परिस्पन्दात्मिकासौ तत्र विरुध्यते, तस्याः द्रव्यवृत्तित्वेन ज्ञाने सत्त्वस्यैवासम्भवात् । अथ धात्वर्थरूपा; सा न विरुद्धा[11] 'भवति तिष्ठति' इत्यादिक्रियाणां क्रियावत्येव[12] सर्वदोपलब्धेः । ज्ञप्ति[13]रूपक्रियायास्[14]तु विरोधो दूरोत्सारित एव; स्वरूपेण कस्य[15]चिद्विरोधासिद्धेः, अन्यथा प्रदीपस्यापि स्वप्रकाशनविरोधस्तद्धि स्वकारणकलापात्स्वपरप्रकाशात्मकमेवोपजायते प्रदीपवत् ।

ज्ञान[16]क्रियायाः कर्मतया स्वात्मनि विरोध[17]स्ततोऽन्यत्रै[18]व कर्मत्वदर्शनादित्यप्यसमीक्षिताभिधानम्; प्रदीपस्यापि स्वप्रकाशनविरोधानुषङ्गात् । यदि चै[19]कत्र[20] दृष्टो धर्मः[21] सर्वत्रा[22]भ्युपगम्यते, तर्हि घटे प्रभास्वरौष्ण्यादिधर्मानुपलब्धेः प्रदीपेऽप्यस्याभावप्रसङ्गः, रथ्यापुरुषे वाऽसर्वज्ञत्वदर्शनान्महेश्वरेऽप्यसर्वज्ञत्वानुषङ्गः । अत्र वस्तुवैचित्र्य[23]सम्भवे ज्ञानेन किमपराद्धं येना[24]त्रा[25]सौ नेष्यते[26]?

किञ्च ज्ञानान्तरापेक्षया त[27]त्र कर्मत्वविरोधः, स्वरूपापेक्षया वा?

१ अभाव । २ अर्थ । ३ स्वरूप । ४ ओदनं पचति देवदत्तः । ५ न विरोधः । ६ ग्रामं गच्छति देवदत्तः । ७ ज्ञाने । ८ भवता परेण । ९ परेण । १० वयं जैनाः । ११ स्वात्मनि । १२ देवदत्तादौ । १३ जानाति । १४ स्वात्मनि । १५ अर्थस्य । १६ अस्मदादिज्ञान । १७ कुतः । १८ घटादौ । १९ किञ्च । २० स्वच्छिदिक्रियां प्रति कर्मत्वविरोधलक्षणः । २१ खड्गादौ । २२ ज्ञाने । २३ भास्वरौष्ण्यसर्वज्ञत्वलक्षण । २४ केन । २५ स्वपरप्रकाशरूपो वैचित्र्यसम्भवः । २६ परेण । २७ ज्ञानक्रियायां ।

1 "का पुनः स्वात्मनि क्रिया विरुद्धा परिस्पन्दरूपा धात्वर्थरूपा वा? तत्त्वार्थश्लो० पृ० ४२ । स्या० रत्ना० पृ० २२८ । "का पुनः स्वात्मनि क्रिया विरुध्यते ज्ञप्तिरुत्पत्तिर्वा?" आप्तप० पृ० ४७ । स्याद्वादमं० पृ० ९३ । "उत्पत्तिरूपा, परिस्पन्दात्मिका, धात्वर्थस्वभावा, ज्ञप्तिलक्षणा वा?" न्यायकुमु० पृ० १८७ ।

2 "किंच, ज्ञानान्तरापेक्षया तत्र कर्मत्वविरोधः स्वरूपापेक्षया वा?" न्यायकुमु० पृ० १८८ ।

प्रथमपक्षे-महेश्वरस्यासर्वज्ञत्वप्रसङ्गस्तज्ज्ञानेन तस्या[1]ऽवेद्यत्वात्। आत्मसमवेता[2]नन्तरज्ञान[3]वेद्यत्वाभावे च[4]

"स्वसमवेतानन्तरज्ञानवेद्यमर्थज्ञानम्" [ ] इति ग्रन्थविरोधो मीमांसक[5]मत[6]प्रवेशश्च स्यात्। ज्ञानान्तरापेक्षया[7] तस्य कर्मत्वा[8]विरोधे च-स्वरूपापेक्षयाप्यविरोधो[9]ऽस्तु सहस्रकिरणवत्स्वपरोद्योतनस्वभावत्वात्तस्य। कर्मत्ववच्च[10] ज्ञानक्रियातोऽर्थान्तर[11]स्यैव करणत्वदर्शनात्तस्यापि तत्र विरोधोऽस्तु विशेषा[12]भावात्। तथा[13] च 'ज्ञानेना[14]हमर्थं जानामि' इत्यत्र[15] ज्ञानस्य करणतया प्रतीतिर्न स्यात्[16]।

विशेषण[1]ज्ञानस्य करणत्वाद्विशेष्यज्ञानस्य तत्फलत्वेन क्रियात्वात्[17]तयोर्भेद एवेत्यपि श्रद्धामात्रम्; 'विशेषणज्ञानेन विशेष्यमहं जानामि' इति प्रतीत्यभावात्। 'विशेषण[18]ज्ञानेन हि 'विशेषणं[19] विशेष्य[20]ज्ञानेन[21] च विशेष्यं जानामि' इत्यखिलजनोऽनुमन्यते।

किञ्च, अनयो[22]र्विषयो भिन्नः, अभिन्नो वा। प्रथमपक्षे-विशेषणविशेष्यज्ञानद्वयपरिकल्पना व्यर्थाऽर्थभेदाभावाद्धारावाहिविज्ञानवत्। द्वितीयपक्षे चा[23]नयोः प्रमाणफलव्यवस्थाविरोधोऽर्थान्तर[24]विषयत्वाद् घटपटज्ञानवत्। न खलु घटज्ञानस्य पटज्ञानं फलम्। न चा[25]न्यत्र[26] व्यापृते[27] विशेषणज्ञाने ततोऽर्थान्तरे[28] विशेष्ये परिच्छित्ति[29]र्युक्ता। न[30] हि खदिरादावुत्पतननिय(प)तनव्यापारवति परशौ[31] ततोऽन्यत्र धवादौ छिदिक्रियोत्पद्यते इत्येतत्प्रातीतिकम्। लिङ्ग[32]-

१ अस्मदादिज्ञानस्य। २ प्रथमज्ञान। ३ द्वितीयज्ञानेन। ४ किञ्च। ५ योगस्य। ६ करणज्ञानं न प्रत्यक्षं कर्मत्वेनाप्रतीयमानत्वात्। ७ ज्ञानान्तरेणाप्यप्रत्यक्षत्वात्। ८ स्वरूपापेक्षया कर्मत्वविरोधं ब्रूमः। ज्ञानान्तरापेक्षया किं कर्मत्वविरोधोऽस्ति। ९ परेणाङ्गीकृते। १० किञ्च। ११ कुठारादेः। १२ ज्ञानाद्भिन्नस्य करणत्वस्याविशेषात्कर्मत्ववत्। १३ ज्ञानकरणत्वविरोधे सति। १४ करणज्ञानेन। १५ पक्षे। १६ लोके। १७ करणज्ञानक्रियाज्ञानयोः। १८ नीलादिज्ञानेन दण्डादिज्ञानेन वा। १९ जानामि। २० उत्पलादिकं दण्डीत्यादिकं। २१ ता। २२ विशेषणज्ञानविशेष्यज्ञानयोः। २३ विशेषणज्ञानविशेष्यज्ञानयोः। २४ भिन्नविषयत्वात्। २५ किञ्च। २६ नीलादौ विशेषणे। २७ सति। २८ उत्पलादौ। २९ ज्ञानं। ३० कथं। ३१ सति। ३२ धूमादिज्ञानस्य।

"प्रमाणफलते बुद्ध्योर्विशेषणविशेष्योः।
यदा तदापि पूर्वोक्ताऽभिन्नार्थत्वनिराक्रिया॥" मीमांसाश्लो० पृ० १५६।

1 "विशेषणज्ञानं करणं विशेष्यज्ञानं तत्फलत्वात् ज्ञानक्रियेति चेत्; स्यादेवं यदि विशेषणज्ञानेन विशेष्यं जानामीति प्रतीतिरुत्पद्यते।" स्या० रत्ना० पृ० २२८।

ज्ञानस्यानुमान[1]ज्ञाने व्यापारदर्शनादत्रा[2]प्यविरोधे[3] इत्यप्यसम्भाव्यं त[4]द्युक्तमभावेनात्र ज्ञानद्वयानुपलब्धेः, एकमेव हि त[5]योर्ग्राहकं ज्ञानमनुभूयते। न[1] चात्र विषयभेदाज्ज्ञानभेदकल्पना; स[6]मानेन्द्रि[7]यग्राह्ये योग्यदेशावस्थितेर्थे[8] घटपटादिवदेकस्यापि ज्ञानस्य व्यापाराविरोधात्। न च घटादावपि ज्ञानभेदः स[9]मानगुणानां युगपद्भावानभ्युपगमात्। क्रमभावे च प्रतीतिविरोधः सर्वज्ञाभावश्च। युगपद्भावाभ्यु[10]पगमे चानयोः सव्येतरगोविषाणवत्कार्यकारणभावाभावः। विशेषणविशेष्यज्ञानयोः क्रमभावेप्याशुवृत्त्या[11] यौगपद्याभिमा[12]नो यथोत्पलपत्रशतच्छेद इत्यप्यसङ्गतम्; निखिलभावानां क्षणिकत्वप्रसङ्गात्[13]सर्वत्रै[14]कत्वाध्य[15]वसायस्याशुवृत्तिप्रवृत्तत्वात्। प्रत्यक्षप्रतिपन्न[16]स्यास्य दृष्टान्तमात्रेण निषेधविरोधा[17]च्च, अ[18]न्यथा शुक्ले शङ्खे पीतविभ्रमदर्शनात्सुवर्णेपि तद्विभ्रमः स्यात्। मू[2][19]र्तस्य सूच्यग्रस्योत्तराधर्यस्थितमुत्पलपत्रशतं युगपत्प्राप्तुमशक्तेः क्रमच्छेदेप्याशुवृत्त्या यौगपद्याभिमानो युक्तः, पुंसस्तु स्वावरणक्षयोपशमापेक्षस्य युगपत्स्वपरप्रकाशनस्वभावस्य समग्रेन्द्रियस्याप्राप्तार्थग्राहिणः स्वयममूर्त्तस्य युगपत्स्वविषयग्रहणे विरोधाभावात् किन्न यु[20]गपज्ज्ञानोत्पत्तिः ?

न च म[20]नोपि सू[3]च्यग्रवन्मूर्त्तमिन्द्रि[21]याणि तूत्पलपत्रवत्परस्परपरिहारस्थितानि युगपत्प्राप्तुं न समर्थमिति वा[22]च्यम्; तथाभूतस्यास्याऽसिद्धेः। युगपज्ज्ञानोत्पत्तिविभ्रमात्तत्सिद्धौ परस्पराश्रयः—

१ अग्न्यादिज्ञाने। २ विशेष्यपरिच्छित्तौ। ३ विशेषणज्ञानव्यापारस्य। ४ लिङ्गलिङ्गिज्ञानस्य। ५ नीलोत्पलयोर्विशेषणविशेष्ययोः। ६ एक। ७ अग्न्यादि। ८ ज्ञानानां। ९ नैयायिकानामनभ्युपगमात्। १० परैः। ११ कृत्वा। १२ कल्पना। १३ कथं। १४ घटपटादिपदार्थे। १५ एकोयमित्यध्यवसायः। १६ विशेषणविशेष्यज्ञानयौगपद्यस्य। १७ किञ्च। १८ अविरोधे। १९ विशेषणविशेष्यरूप। २० कर्तृ। २१ कर्मरूपाणि। २२ परेण।

1 "न चात्र विषयभेदाज्ज्ञानभेदकल्पनोपपत्तिमती; समानेन्द्रियग्राह्ये योग्यदेशावस्थितेऽर्थे घटपटादिवदेकस्यापि ज्ञानस्य व्यापाराविरोधात्।" स्या० रत्ना० पृ० २३०।

2 "मूर्त्तस्य सूच्यग्रस्योत्तराधर्यव्यवस्थितमुत्पलपत्रशतं युगपद् व्याप्तुमशक्तेः क्रमभेदेऽप्याशुवृत्तेः यौगपद्याभिमान इति युक्तम्, आत्मनस्तु क्षयोपशमसव्यपेक्षस्य युगपद् स्वपरप्रकाशनस्वभावस्य स्वयममूर्त्तस्याप्राप्तार्थग्राहिणो युगपत् स्वविषयग्रहणे न कश्चिद्विरोध इति किन्न युगपज्ज्ञानोत्पत्तिः।" सन्मति० टी० पृ० ४७८।

3 "नच मनोऽपि सूच्यग्रवन्मूर्त्तमिन्द्रियाणि तूत्पलपत्रवद् परस्परपरिहारस्थितस्वरूपाणि न युगपद्व्याप्तुं समर्थमिति न युगपज्ज्ञानोत्पत्तिः; तथाभूतस्य तस्यैवाऽसिद्धेः।" सन्मति० टी० पृ० ४७८।

तद्विभ्रमसिद्धौ हि मनःसिद्धिः, ततस्तद्विभ्रमसिद्धिरिति । 'चक्षु[1]-
रादिकं[2] क्रमवत्कारणापेक्षं कारणान्तर[3]साकल्ये [4]सत्यप्यनुत्पाद्योत्पा[5]-
दकत्वा[6]द्दासीक[7]र्त्तर्यादिवत्' इत्यनुमाना[8]त्तत्सिद्धिरित्यपि मनोरथ-
मात्रम्; [9]भवदभ्युपगतेन मनसैवानेकान्तात्[10]। न हि तत्साकल्ये तत्
५ तथाभूतमपि [11]क्रमवत्कारणान्तरापेक्षमनव[12]स्थाप्रसङ्गात् । किञ्च,
अनुत्पाद्योत्पादकत्वं युगपत्, क्रमेण वा? युगपच्चेद्वि[13]रुद्धो हेतुः[14],
तथोत्पादकत्वस्याक्रमिकारणाधीनत्वात् प्रसिद्धसहभाव्यनेकका[15]-
र्य[16]कारि[17]सामग्री[18]वत् । क्रमेण चेदसिद्धः, कर्कटीभक्षणादौ युगपद्रूपा-
दि[19]ज्ञानोत्पादकत्वप्रतीतेः । आद्यवृत्त्या विभ्रमकल्पनायां तू[20]क्तम् ।
१० तन्न मनसः [21]सिद्धिः ।

सिद्धौ वा न संयो[22]गः, निरंश[23]योरेकदेशेन संयोगे सांशत्व[24]म् ।
[25]सर्वात्मनैकत्वम् उभयव्याघातकारि [26]स्यात् । 'यत्र[27] संयुक्तं [28]मनस्तत्र

१ मनः । २ यद्यदुत्पादकं तत्तत्क्रमवत्कारणापेक्षम् । ३ आलोकरूपादि । ४ ज्ञान । ५ ता । ६ उत्पादकत्वादित्युच्यमाने नानाङ्कुरोत्पादकैर्नानाबीजैरनेकान्तस्त-द्व्यवच्छेदार्थमनुत्पाद्योत्पादकत्वादित्युक्तं तथापि बीजैरेवानेकान्तस्तद्व्यवच्छेदार्थं कारणान्त-साकल्ये सतीत्युक्तम् । एकस्माच्चक्षुरादिलक्षणात्कारणादपरमालोकरूपलक्षणं कारणान्तरं कारणान्तरसाकल्ये सत्यनुत्पाद्योत्पादकं न भवति किन्तूत्पादकमेव बीजम् । ७ हस्तः क्रमवत्कारणमत्र । ८ मनः । ९ पर । १० साधनस्य । ११ मनः । १२ अन्यथा । १३ क्रमसाध्ये अक्रममेव साधयेत् । १४ नित्यः शब्दः कृतकत्वात् । १५ अङ्कु-रादि । १६ बीजानि । १७ क्षित्युदकादिलक्षणा । १८ यथा बीजलक्षणा सामग्री क्षित्युदकादिलक्षणाऽक्रमकारणाधीना । १९ चक्षुरादीनां । २० तद्विभ्रमसिद्धौ हि मनःसिद्धिस्ततस्तद्विभ्रमसिद्धिरिति दूषणं । २१ स्वप्रक्रियामात्रेण । २२ आत्मना । २३ आत्ममनसोः । २४ घटते । २५ संयोगे । २६ मनोऽभ्युपगम्य तत्र किञ्च । २७ आत्मनि । २८ समवायिनि ।

1 आत्मेन्द्रियार्थाः करणान्तरापेक्षाः सद्भावेऽपि अनुत्पाद्योत्पादकत्वात् । ये हि सद्भावेऽपि कार्यमनुत्पाद्य पश्चादुत्पादयन्ति ते सापेक्षाः यथा तन्त्वादयः अन्त्यसंयो-गापेक्षा इति ।" प्रश० व्यो० पृ० ४२४ । प्रश० कन्द० पृ० ९० ।

2 "किंच, अनुत्पाद्योत्पादकत्वमस्य क्रमेण, युगपद्वा विवक्षितम् ।"

न्यायकुमु० पृ० २७१ ।

3 "सिद्धौ वा न संयोगः, निरंशयोरात्ममनसोरेकदेशेन संयोगे सांशत्वम् ।"

न्यायकुमु० पृ० २७२ ।

"नच निरंशयोरात्ममनसोः संयोगः संभवी, एकदेशेन तत्संयोगे सांशत्वप्रसक्तेः, सर्वात्मना संयोगे उभयोरेकत्वप्राप्तेः ।" सन्मति० टी० पृ० ४७६ ।

4 "यदि च यत्र मनः संयुक्तं तत्र समवेतं ज्ञानं समुत्पादयति तदा सर्वात्मनां

संमवेते ज्ञानमुत्पादयति' इत्यभ्युपगमे[2] चाखिलात्मसमवेतसुखादौ[3] ज्ञानं जनयेत् तेषां[4] नित्यव्यापित्वेन मनसा संयोगोऽविशेषात् । तथा[5] च प्रतिप्राणि भिन्नं मनोन्तरं[6] व्यर्थम् । यस्य[7] यन्मनस्तत्[9] तत्समवायिनि[10] ज्ञानहेतुरित्यप्यसारम्[11], प्रतिनियतात्म[12]सम्बन्धित्वस्यैव[13] अत्रा[14]सिद्धेः । तद्धि[15] तत्कार्यत्वात्[16], तदुपक्रियमाण[17]त्वात्, तत्संयोगात्[19][20], तददृष्टप्रेरितत्वात्[21][22], तदात्मप्रेरितत्वाद्वा[23] स्यात् ? न[1] तावत्तत्कार्यत्वेन[24] तत्सम्बन्धिता[25]; नित्ये[26] तदयोगात् । नाप्युपक्रियमाणत्वेन[27]; अनाधेया[28]प्रहेया[29]तिशये[30] तस्याप्यसम्भवात् । नापि[2] संयोगात्; सर्वत्रास्या[31]विशेषात् । नापि[3] 'यददृष्टप्रेरितं[32] प्रवर्तते निवर्तते[33] वा तत्तस्य' इति वाच्यम्[34]; अचेतनस्यादृष्टस्यानिष्टदेशा[35]दिपरिहारेणेष्टदेशादौ तत्प्रेरणा[36]सम्भवात्, अन्यथेश्वरकल्पनावैफल्यम् । न चेश्वरस्यादृष्टप्रेरणे[37] व्यापारात्साफल्यम्, मनस एवासौ प्रेरकः कल्प्यताम्[38] किं परम्परया[39] ? तस्य[40]

१ सुखादौ । परेण । ३ मनः कर्तृ । ४ निखिलात्मनाम् । ५ एकस्यैव मनसः सम्भवे सति । ६ मानसान्तरं । ७ व्यर्थं भवतीत्युक्ते परः प्राह । ८ आत्मनः । ९ कर्तृ । १० सुखादेः । ११ भवति । १२ जीव । १३ अस्यात्मन इदं मन इति । १४ मनसि । १५ मनो धर्मि प्रतिनियतात्मसम्बन्धि भवतीति साध्यम् । १६ प्रतिनियतात्म । १७ मनसः । १८ मनसः । १९ मनसः । २० ता । २१ भा । २२ मनसः । २३ मनसः । २४ मनसः । २५ मनसः । २६ नित्यपरमाणुपरिमाणं मन इति वचनात् । २७ आत्मना । २८ आरोपयितुमशक्य । २९ स्फोटयितुमशक्य । ३० अतिशये मनसि । ३१ आत्मसु । ३२ ता । ३३ अनिष्टात् । ३४ परेण । ३५ काल । ३६ मनः । ३७ विषये । ३८ परेण । ३९ महेश्वरेणादृष्टं प्रेर्यते अदृष्टेन मन इति परम्परा तया । ४० अदृष्टस्य ।

व्यापितया समानदेशत्वेन मनसस्तैः संयुक्तत्वात् सर्वात्मसमवेतसुखादिषु तदेवैकं ज्ञानमुत्पादयतीति प्रतिप्राणि भिन्नमनःपरिकल्पनमनर्थकमासज्येत ।"

सन्मति० टी० पृ० ४७६ । न्यायकुमु० पृ० २७१ ।

1 "न हि तत्कार्यत्वेन तत्सम्बन्धिता, तस्य नित्यत्वाभ्युपगमात्, तत्र चानाधेयाप्रहेयातिशये तत्कार्यताऽयोगात् ।" सन्मति० टी० पृ० ४७६ ।

2 "नापि संयोगात्, तस्यापि तत्रैकदेशेन सर्वात्मना वाऽयोगात् ।"

सन्मति० टी० पृ० ४७६ । न्यायकुमु० पृ० २७२ ।

3 "नच यददृष्टप्रेरितं तत्प्रवर्तते तत्सम्बन्धीति वक्तव्यम्; अदृष्टस्य अचेतनत्वेन प्रतिनियतविषय (ये) तत्प्रेरकत्वायोगात्, प्रेरकत्वे वा ईश्वरपरिकल्पनावैयर्थ्यप्रसक्तेः"

सन्मति० टी० पृ० ४७६ । न्यायकुमु० पृ०२७२ ।

सर्वसाधारणत्वाच्चातो न तन्नियमः । चादृष्टस्यापि प्रतिनियमः सिद्धः; तस्यात्मनोऽत्यन्तभेदात् समवायस्यापि सर्वत्राविशेषात् । 'येनात्मना यन्मनः प्रेर्यते तत्तस्य' इत्ययुक्तम्, अनुपलब्धस्य प्रेरणासम्भवात् ।

किञ्च, ईश्वरस्यापि स्वसंविदितज्ञानानभ्युपगमे 'सदसद्वर्गः कस्यचिदेकज्ञानालम्बनोऽनेकत्वात्पञ्चाङ्गुलवत्' इत्यत्र पक्षीकृतैकदेशेन व्यभिचारः-तज्ज्ञानान्यसदसद्वर्गयोरनेकत्वाविशेषेऽप्येकज्ञानालम्बनत्वाभावादेकशाखाप्रभवत्वानुमानवत् । स्वसंविदितत्वाभ्युपगमे चास्य अनेनैव प्रमेयत्वहेतोर्व्यभिचार इत्युक्तम् । 'अस्मदादिज्ञानापेक्षया ज्ञानस्य ज्ञानान्तरवेद्यत्वं साध्यते' इत्यत्राप्युक्तम् ।

किञ्चाद्ये ज्ञाने सति, असति वा द्वितीयज्ञानमुत्पद्यते? सति चेत्-युगपज्ज्ञानानुत्पत्तिविरोधः । असति चेत्; कस्य तद्ग्राहकम्? असतो ग्रहणे द्विचन्द्रादिज्ञानवदस्य भ्रान्तत्वप्रसङ्गः ।

किञ्च, अस्मदादीनां तज्ज्ञानान्तरं प्रत्यक्षम्, अप्रत्यक्षं वा । यदि प्रत्यक्षम्-स्वतः, ज्ञानान्तराद्वा? स्वतश्चेत्, प्रथममप्यर्थज्ञानं स्वतः प्रत्यक्षमस्तु । ज्ञानान्तरात्प्रत्यक्षत्वे तदपि ज्ञानान्तरं ज्ञानान्तरात्प्रत्यक्षमित्यनवस्था । अप्रत्यक्षं चेत् कथं तेनाद्यज्ञानग्रहणम्? स्वय-

१ किञ्च । २ अस्येदमदृष्टमिति । ३ आत्मसु गगनादौ । ४ परैः । ५ द्रव्यगुणकर्मसामान्यविशेषसमवायरूपः सद्वर्गः । ६ प्रागप्रध्वंसेतरेतरात्यन्ताभावरूपोऽसद्वर्गः । ७ पारिशेष्यादीश्वरस्य । ८ गुणरूपेण विज्ञानेन । ९ सद्वर्गेण । १० ईश्वर । ११ द्वन्द्वः । १२ ईश्वरज्ञानान्यपदार्थयोरेकज्ञानालम्बनत्वे स्वसंविदितत्वप्रसङ्गः । १३ पक्वानि एतानि फलानि । १४ एवं । १५ हेतुः । १६ व्यभिचारपरिहारार्थं । १७ परैः । १८ ईश्वरस्य । १९ गुणरूपेण महेश्वरज्ञानेन । २० स्वभावालम्बनादिति । २१ स्वभावालम्बनादित्यादि । २२ अस्मदादेः । २३ ज्ञानान्तरम् । २४ भवन्मते । २५ ज्ञानस्य । २६ अर्थज्ञानं भ्रान्तमसद्ग्रहणात् । २७ द्वितीयम् ।

1 "नच येनात्मना यन्मनः प्रेर्यते तत्तत्सम्बन्धि इति प्रतिनियमः अदृष्टवदात्मनोऽपि अचेतनत्वेन तत्प्रत्यप्रेरकत्वात् । चेतनत्वेऽपि नानुपलब्धस्य प्रेरणम् ।"

सन्मति० टी० पृ० ४७७, न्यायकुमु० पृ० २७२ ।

2 "किंच, स्वसंविदितज्ञानानभ्युपगमे 'सदसद्वर्गः कस्यचिदेकज्ञानालम्बनः अनेकत्वात्पञ्चाङ्गुलवत्' इत्यत्र पक्षीकृतैकदेशेन व्यभिचारः, तज्ज्ञानान्यसदसद्वर्गयोरनेकत्वाविशेषेऽपि एकज्ञानालम्बनत्वाभावात् एकशाखाप्रभवत्वानुमानवत् ।"

सन्मति० टी० पृ० ४७७ ।

मप्रत्यक्षेण ज्ञानान्तरेण[1]ात्मान्तरज्ञानेन[2]ेवास्य[3] ग्रहणविरोधात्। ननु ज्ञानस्य[4] स्वविषये[5] गृहीतिजनकत्वं ग्राहकत्वम्[6], तच्च ज्ञानान्तरेणा[7]गृहीतस्या[8]पीन्द्रियादि[9]वद्युक्तमित्यपि मनोरथमात्रम्; अर्थज्ञानस्यापि ज्ञानान्तरेणागृहीतस्यैवार्थग्राहकत्वानुषङ्गात्। तथा च ज्ञान[10]ज्ञानपरिकल्पनावैयर्थ्यं मीमांसक[11]मतानुषङ्गश्च। 　५

लिङ्ग[12]शब्द[13]सादृश्यानां च[14]ागृहीतानां स्व[15]विषये[16] विज्ञानजनकत्वप्रसङ्गात्[17]तद्विषय[18]विज्ञाना[19]न्वेषणानर्थक्यम्। ‘उभयथोपलम्भाददोषः[20]’ इत्य[21]भ्युपगमे[22]पि किञ्चिल्लिङ्गादिक[23]मज्ञातमेव[24] चक्षुरादिकं[25] तु ज्ञातमेव स्वविषये प्रमितिमुत्पादयेत्[26] तत एव। अथ चक्षुरादिकमेवाज्ञातं स्वविषये प्रमितिनिमित्तम्, न लिङ्गादिकं तत्तु ज्ञातमेव[27] 　१०
नान्यथाऽतो नोभयत्र[28]ोभयथा[29]प्रसङ्गः प्रतीतिविरोधात्, नन्वेवं[30] यथा अर्थज्ञानं ज्ञातमर्थं ज्ञप्तिनिमित्तम्, तथा ज्ञानज्ञान[31]मपि ज्ञाने[32]ऽस्तु, तत्रा[33]प्युभयथा[34]परिकल्पने प्रतीतिविरोधाविशेषात्। यथैव हि-‘विवादा[35]पन्नं[36] चक्षुरा[37]द्यज्ञातमेवार्थे ज्ञप्तिनिमित्तं तत्त्वादस्मच्चक्षुरादिवत्। लि[1]ङ्गादिकं[38] तु ज्ञातमेव[39] क्वचि[40]ज्ज्ञप्तिनिमित्तं तत्त्वादुभयवादि- 　१५

१ द्वितीयेन। २ सन्तानान्तर। ३ ज्ञानस्य। ४ द्वितीयं। ५ अर्थज्ञाने। ६ परिच्छित्ति। ७ कथ्यते। ८ तृतीयज्ञानेन। ९ द्वितीयज्ञानस्य। १० अदृष्टादि। ११ ईष्। १२ मीमांसकमते अगृहीतस्यैव (परोक्षस्य) ज्ञानस्यार्थग्राहकत्वात्। १३ गामभ्याजेत्यादि। १४ संज्ञासंज्ञिसम्बन्धप्रतिपत्तेः कारणं सादृश्यं। १५ किञ्च। १६ अनुमेये। १७ गामभ्याजेत्यादिवाक्यार्थे। १८ लिङ्गादिश्चासौ विषयश्च। १९ इन्द्रियस्याज्ञानस्य लिङ्गादेर्ज्ञातस्य। २० न त्वज्ञातं ज्ञापकं नाम। २१ गृहीतस्यागृहीतस्य च गृहीतिजनकत्वेन। २२ अर्थज्ञानतद्ग्राहकज्ञानवच्च। २३ परेण। २४ परकीयं। २५ अस्मदादिकं लिङ्गन्तु ज्ञातमेव। २६ परकीयं। २७ परस्य। २८ चक्षुरादौ लिङ्गादौ च। २९ यथाक्रमं ज्ञातत्वाज्ञातत्वप्रकारेण। ३० इति चेत्। ३१ उभयथोभयत्र विकल्पे प्रतीतिविरोधप्रकारेण। ३२ ज्ञातं। ३३ ज्ञप्तिनिमित्तं। ३४ ज्ञाने। ३५ एवं ज्ञानमपरं चाज्ञातं स्वविषये प्रमितिजनकम्। ३६ परस्य। ३७ परकीयम्। ३८ अप्रत्यक्षत्वाविशेषाभावात्। ३९ परस्य। ४० स्वविषये।

1 “स्यान्मतम्–चक्षुरादिकमेवाज्ञातं स्वविषयज्ञप्तिनिमित्तं दृष्टं न तु लिंगादिकम्, तदपि ज्ञातमेव नान्यथा ततो नोभयत्रोभयथाप्रसङ्गः प्रतीतिविरोधादिति; तर्हि यथा अर्थज्ञानं व्यवसितमर्थज्ञप्तिनिमित्तं तथा ज्ञानज्ञानमपि ज्ञानेऽस्तु, तत्रापि उभयथा परिकल्पनायां प्रतीतिविरोधस्याविशेषात्। कया पुनःप्रतीत्या अत्र विरोध इति चेत्; चक्षुरादिषु कयेति समःपर्यनुयोगः। विवादापन्नं चक्षुरादिकमज्ञातमेव अर्थज्ञप्तिनिमित्तं चक्षुरादित्वात्... तथा विवादाध्यासितं लिंगादिकं ज्ञातमेव क्वचिद्विज्ञप्तिनिमित्तम् लिङ्गादित्वात्, यदित्थं तदित्थं यथोभयवादिप्रसिद्धं धूमादि, तथा च विवादाध्यासितं

प्रसिद्धधूमादिवत्' इत्यनुमानप्रतीत्यात्रोभयथा कल्पने विरोधः। तथा 'ज्ञानज्ञानं ज्ञातमेव स्वविषये ज्ञप्तिनिमित्तं ज्ञानत्वादर्थज्ञानवत्' इत्यत्रापि सर्वथा विशेषाभावात्। यदि चाप्रत्यक्षेणाप्यनेनार्थज्ञानप्रत्यक्षता; तर्हीश्वरज्ञानेनात्मनोऽप्रत्यक्षेणाशेषविषयेण ५ प्राणिमात्रस्याशेषार्थसाक्षात्करणं भवेत्, तथा चेश्वरेतरविभागाभावः। स्वज्ञानगृहीतमात्मनोऽध्यक्षमित्यप्यसङ्गतम्; स्वसंविदितत्वाभावे स्वज्ञानत्वासिद्धेः। 'स्वस्मिन्समवेतं स्वज्ञानम्' इत्यपि वार्त्तम्; समवायनिषेधात्तदविशेषाच्च। 'स्वकार्यम्' इत्यप्यसम्यक्; समवायनिषेधे तदाधेयतयोत्पादस्याप्यसिद्धेः। जन१०कत्वमात्रेण तत्त्वे दिक्कालादौ तत्प्रसङ्गः। नित्यज्ञानं चेश्वरस्यापि न स्यात्, ततः स्वतो ज्ञानं प्रत्यक्षम् अन्यथोक्तदोषानुषङ्गः।

ननु ज्ञानान्तरप्रत्यक्षत्वेपि नानवस्था, अर्थज्ञानस्य द्वितीयेनास्यापि तृतीयेन ग्रहणादर्थसिद्धेरपरज्ञानकल्पनया प्रयोजनाभा-

---

१ ज्ञान। २ प्रतीतिविरोधः। ३ किञ्च। ४ द्वितीयज्ञानेन। ५ स्यात्। ६ अस्मदादेः। ७ असदादि। ८ अर्थज्ञानं। ९ अस्मदादेः। १० कथ्यते। ११ अस्मदादिना। १२ द्वितीयज्ञानस्य। १३ आत्मनि। १४ सर्वेष्वात्मसु। १५ आत्मनः। १६ स्वज्ञानम्। १७ आत्मनि। १८ सति। १९ विवक्षितात्मनि। २० स्वज्ञानस्य। २१ जन्मनः। २२ निमित्तकारण। २३ स्वकीयत्वे। २४ ज्ञानस्य स्वकीयत्व। २५ तज्जनकत्वाविशेषात्। २६ किञ्च। २७ ज्ञातत्वात्। २८ कार्यस्यानित्यत्वात्। २९ ज्ञानत्वात्। ३० अनवस्था। ३१ चतुर्थ।

लिंगादि, तस्मात्तथेत्यनुमानप्रतीत्या तत्रोभयथाकल्पने विरोध इति चेत्; तर्हि विवादापन्नं ज्ञानं ज्ञातमेव स्वविषये ज्ञप्तिनिमित्तं ज्ञानत्वात्, यदेवं तदेवं यथा अर्थज्ञानम्, तथा च विवादाध्यासितं ज्ञानज्ञानम्, तस्मात्तथेत्यनुमानप्रतीत्यैव तत्रोभयथा कल्पनायां विरोधोऽस्तु सर्वथा विशेषाभावात्, तथा चानवस्थानं दुर्निवारमेव नैयायिकम्मन्यानाम्।" युक्त्यनु० टी० पृ० ८।

1 "स्वयमसिद्धेन ज्ञानेन गृहीतस्याप्यगृहीतरूपत्वात्, अन्यथा सर्वज्ञज्ञानगृहीतस्य रथ्यापुरुषज्ञानगृहीतत्वं भवेदिति तस्यापि सर्वज्ञताप्रसक्तिः।" सन्मति० टी० पृ० ४७८।

2 "न च स्वज्ञानगृहीतं तद्गृहीतमिति नायं दोषः; स्वसंविदितज्ञानाभावे स्वज्ञानमित्यस्यैवासिद्धेः।" सन्मति० टी० पृ० ४७८।

3 "स्वस्मिन् समवेतं स्वज्ञानमभिधीयत इति नायं दोषः इति चेत्; न; तस्याभावात्, भावेप्यविशिष्टत्वात्।" सन्मति० टी० पृ० ४७८

4 "··· तेन घटादिज्ञानस्य धर्मिणः द्वितीयेन, तस्यापि तृतीयेन ग्रहणादर्थसिद्धेर्नापरज्ञानकल्पनमिति नानवस्था इति यदुक्तम्; तदप्यसङ्गतम्; तृतीयादेर्ज्ञानस्याग्रहणे प्रथमस्याप्य सिद्धेरुक्तन्यायात्" सन्मति० टी० पृ० ४७९। युक्त्यनु० टी० पृ० ९।

वात्। अर्थजिज्ञासायां ह्यर्थे ज्ञानम्[1], ज्ञानजिज्ञासायां तु ज्ञाने[2], प्रतीतेरेवंविधत्वात्[3]; इत्यप्यसमीक्षिताभिधानम्; तृतीयज्ञानस्या[4]ग्रहणे तेन प्राक्तन[5]ज्ञानग्रहणविरोधात्, इतरथा सर्वत्र[6][7] द्वितीयादिज्ञानकल्पनानर्थक्यं तत्र चोक्तो[8] दोषः[9]।

किञ्च[1], 'अर्थजिज्ञासायां सत्याम[10]हमुत्पन्नम्[11]' इति तज्ज्ञानादेव[12] प्रतीतिः, ज्ञानान्तराद्वा? प्रथमपक्षे जैनमतसिद्धिस्तथाप्रतिपद्यमानं हि ज्ञानं स्वपरपरिच्छेदकं स्यात् । द्वितीयपक्षेऽपि 'अर्थज्ञानमज्ञातमेव मयार्थस्य परिच्छेदकम्' इति ज्ञानान्तरं[13] प्रतिपद्यते[14] चेत्[15]; तदेव स्वार्थपरिच्छेदकं सिद्धं तथा[16]द्यमपि[17] स्यात्। न प्रतिपद्यते चेत्कथं तथाप्रतिपत्तिः? १०

किञ्च, अर्थ[2][18]ज्ञानमर्थ[19]मात्मानं[20] च प्रतिपद्य[21] 'अज्ञानमेव मया ज्ञानमर्थं[22] जानाति' इति ज्ञानान्तरं[23] प्रतीयात्, अप्रतिपद्य वा। प्रथमपक्षे त्रिविषयं[24] ज्ञानान्तरं प्रसज्येत[25]। द्वितीयपक्षे तु अतिप्रसङ्गः 'मयाऽज्ञातमेवादृष्टं सुखादीनि करोति' इत्यपि तज्ज्ञानी[26]याद्विशेषात्[27] । १५

१ जातं। २ ज्ञानं जातं। ३ जिज्ञासापूर्वकत्वात्। ४ चतुर्थेन। ५ द्वितीय। ६ अर्थज्ञाने। ७ आत्मनि। ८ प्रथमज्ञानेनालम्। ९ अशेषस्य प्राणिमात्रस्याशेषज्ञत्वलक्षणः। १० अर्थज्ञानं। ११ मित्यादि। १२ प्रथम। १३ कर्तृ। १४ जानाति। १५ ज्ञानान्तरम्। १६ अर्थज्ञानं। १७ ज्ञानत्वाद्द्वितीयज्ञानवत्। १८ कर्तृ। १९ ज्ञानस्वरूपं। २० त्रितयमपि द्वितीयज्ञानस्य कर्मभूतम्। २१ ज्ञात्वा। २२ कर्तृ। २३ कर्तृ। २४ वसः। २५ अपसिद्धान्तप्रसङ्गः। २६ कर्तृ। २७ त्रितयाविपर्यीकरणस्य।

1 "स्वयमर्थज्ञानं ममेदमित्यप्रतिपत्तौ तथाप्रतीतेरसंभवात्, प्रतिपत्तौ तु स्वत एव तत्प्रतिपत्तिः, ज्ञानान्तराद्वा? स्वतश्चेत्; स्वार्थपरिच्छेदकत्वसिद्धिर्वेदनस्य वस्तुबलप्राप्ता, 'क्वचिदर्थे जिज्ञासायां सत्यामहमुत्पन्नमिति स्वयं प्रतिपद्यमानं हि ज्ञानं स्वार्थपरिच्छेदकमभ्यनुज्ञायते नान्यथेति जैनमतसिद्धिः। यदि पुनर्ज्ञानान्तरात्तथाप्रतिपत्तिस्तदापि तदर्थज्ञानम् अज्ञातमेवमयाऽर्थस्य परिच्छेदकमिति स्वयं ज्ञानान्तरं प्रतिपद्यते चेत्तदेव स्वार्थपरिच्छेदकं सिद्धम्। न प्रतिपद्यते चेत्कथं तथा प्रतिपत्तिः ।" युक्त्यनु० टी० पृ० ९। न्यायकुमु० पृ० १८६।

2 "किंचेदं विचार्यते–ज्ञानान्तरम् अर्थज्ञानमर्थमात्मानञ्च प्रतिपद्य अज्ञातमेव मया ज्ञातमर्थं जानातीति प्रतिपाद्य, अप्रतिपाद्य वा? प्रथमे पक्षे अर्थस्य तज्ज्ञानस्य स्वात्मनः स्वपरिच्छेदकत्वविषयं ज्ञानान्तरं प्रसज्येत। द्वितीयपक्षे पुनरतिप्रसङ्गः, सुखादिकमज्ञातमेवादृष्टं मया करोतीत्यपि जानीयादविशेषात्।" युक्त्यनु० टी० पृ० ९। न्यायकुमु० पृ० १८६।

ना[1]पि श[2]क्तिक्षयात्, ईश्वरात्, विषयान्तरसञ्चारात्, अदृष्टाद्वाऽनवस्थाभावः। न हि [1]शक्तिक्षया‍च्च[3]तुर्था‍दिज्ञानस्यानुत्पत्तेरनवस्थानाभावः। तदनुत्पत्तौ प्रा[4]क्तनज्ञानासिद्धिदोषस्य त[5]दवस्थत्वात्। त[6]त्क्षये च कुतो रूपादिज्ञानं सा[7]धनादिज्ञानं वा य[8]तो व्यवहारः प्रवर्त्तेत? न[9] च [2]चतुर्थादिज्ञानजननशक्तेरेव क्षयो नेत[10]रस्याः; युगपदनेकशक्त्यभावात्। भावे वा तथैव ज्ञानोत्पत्तिप्रसङ्गः। नित्य[11]स्या[12]परा[13]पेक्षाप्यसम्भाव्या। क्रमेण शक्तिसद्भावे कुतोऽसौ[14]? न तावदात्मनोऽश[15]क्तात्, तदस[16]म्भवात्। शक्त्य[17]न्तरकल्पने चा[18]नवस्था।

ई[3]श्वरस्तां[19] निवारयतीत्यपि बालविलसितम्; कृतकृत्यस्य तन्निवारणे प्रयोजनाभावात्। परोपकारः प्रयोजनमित्य[20]सत्; धर्मिग्रहणाभावस्य त[20]द्वस्थत्वप्रसङ्गात्, अप्रतीतेर्निषिद्ध[21]त्वाच्चा[22]स्य।

न च[4] वि[23]षयान्तरसञ्चारात्तन्निवृत्तिः; विषयान्तरसञ्चारो हि ध[24]र्मिज्ञा[25]नवि[26]षयाद[27]न्यत्र साधनादिविषये ज्ञानोत्[28]पत्तिः। न च त[29]ज्ज्ञा-

१ किञ्च। २ प्रतिपत्तुः। ३ पञ्चषष्ठादि। ४ प्रथमद्वितीयतृतीय। ५ पूर्वनिरूपित। ६ शक्ति। ७ दृष्टान्तादि। ८ कुतः। ९ रूपादिज्ञानजनितायाः शक्तेः। १० अपसिद्धान्तः। ११ आत्मनः। १२ ज्ञानोत्पत्तौ। १३ शक्ति। १४ शक्तिर्भवेत्। १५ असमर्थात्। १६ ता। १७ शक्तादात्मनश्चेन्न। १८ आत्मगताः शक्तयः शक्तिमत एवात्मनः उत्पद्यन्ते इत्यनेन प्रकारेण। १९ आद्यज्ञानज्ञानाभावस्य। २० पूर्वनिरूपित। २१ घटादिज्ञानज्ञानमित्यादौ। २२ धर्मिज्ञानज्ञानस्य। २३ तृतीयज्ञानात्। २४ ता। २५ बसः। २६ आद्यज्ञानस्य। १७ तृतीयज्ञानात्। २८ तृतीयज्ञानस्य। २९ द्वितीय।

1 "न च शक्तिप्रक्षयाच्चतुर्थज्ञानादेरनुत्पत्तेरनवस्थानिवृत्तिः; धर्मिग्रहणस्यैवमभावापत्तेः।··· किंच, यदि शक्तिप्रक्षयादनवस्थानिवृत्तिः; बाह्यविषयमपि ज्ञानं न भवेत् शक्तिप्रक्षयादेव।" सन्मति० टी० पृ० ४७९।

2 "नच चतुर्थादिज्ञानजननशक्तेरेव प्रक्षयः न बाह्यविषयज्ञानशक्तेः, युगपदनेकशक्त्यभावात्, भावे वा युगपदनेकज्ञानोत्पत्तिप्रसक्तिः।" सन्मति० टी० पृ० ४७९।

3 "एतेन ईश्वरादनवस्थानिवृत्तिरिति प्रतिविहितम्; तस्यादृष्टकल्पनत्वात्, प्रतिषिद्धत्वाच्च।" सन्मति० टी० पृ० ४७९।

4 "न च विषयान्तरसञ्चारादनवस्थानिवृत्तिः, यतो धर्मिज्ञानविषयात् साधनादिविषयान्तरम्, तत्र ज्ञानस्योत्पत्तेः विषयान्तरसञ्चारः। न चापरापरज्ञानग्राहिज्ञानसन्तत्युत्पत्तौ अवश्यम्भाविबाह्यसाधनादिविषयसन्निधानम्, येन तत्र ज्ञानस्य सञ्चारो भवेत्। सन्निधानेऽपि अन्तरङ्गबहिरङ्गयोरन्तरङ्गस्यैव बलीयस्त्वात् नान्तरङ्गविषयपरिहारेण बाह्यविषये ज्ञानोत्पत्तिर्भवेदिति कुतोऽनवस्थानिवृत्तिः?" सन्मति० टी० पृ० ४७९।

नस[१]न्निधानेऽवश्यं [२]साधनादिना सन्निहितेन भवि[३]तव्यमसि[४]द्धादेर-[५]भावापत्तेः । [६]सन्निहितेपि वा जिघृक्षिते [७]धर्मिण्यगृहीते कथं विषयान्तरे [८]ग्रहणाकांक्षा? कथं [१०]वा [११]तज्ज्ञानमे[१२]कार्थसमवेतत्वेन सन्निहितं विहाय तद्विपरीते दृष्टान्तादौ [१३]ज्ञानं ज्ञायेत्?

अदृष्टात्तन्निवृत्तौ स्वसंविदितज्ञानोत्पत्तिरेवातोऽस्तु किं मिथ्या[१४]-भिनिवेशेन? तन्न प्रत्यक्षाद्धर्मिसिद्धिः।

[१५]नाप्यनुमानात्; तत्सद्भावावेदकस्य[१६] तस्यैवासिद्धेः । सिद्धौ वा [१७]तत्राप्या[१८]श्रयासिद्ध्यादिदोषोपनि[१९]पातः स्यात् । [२०]पुनरत्राप्यनुमाना-न्तरात्तत्सिद्धावनवस्था । [२१]इत्युक्तदोषपरिजिहीर्षया प्रदीपवत्स्व-परप्रकाशनशक्तिद्वयात्मकं ज्ञानमभ्युपग[२२]न्तव्यम् । तदपह्नवे [२३]वस्तुव्यवस्थाभावप्रसङ्गात्।

ननु [२४]स्वपरप्रकाशो नाम यदि बोधरूपत्वं तदा साध्यविकलो दृष्टान्तः प्रदीपे बोधरूपत्वस्यासम्भवात् । अथ भासुररूपसम्ब-न्धित्वं तस्य ज्ञानेऽत्यन्तासम्भवात्कथं साध्यता? अन्य[२५]था[२६] प्रत्यक्ष-बाधस्तदप्यसमीचीनम्; [२७]तत्प्रकाशो हि स्वपररूपोद्योतनरूपो[२८]ऽ-भ्युपग[२९]म्यते। स च क्वचिद्बोधरूपतया क्वचित्तु भासुररूपतया वा न विरोधमध्यास्ते।

१ तृतीयज्ञानस्यैकात्मसमवेतत्वेन । २ दृष्टान्तादि । ३ अन्यथा । ४ आश्रय । ५ दृष्टान्त । ६ साधनादौ । ७ अर्थज्ञाने । ८ तृतीयेन द्वितीयस्याग्रहणे द्वितीयेन प्रथमस्याग्रहणे । ९ प्रतिपत्तुः । १० किञ्च । ११ धर्मिज्ञानतृतीयज्ञानं । १२ एका-त्मनि । १३ तृतीयं चतुर्थं । १४ ज्ञानान्तरेणैव वेद्यं ज्ञानमिति । १५ द्वितीयविकल्पः। १६ ग्राहकस्य । १७ धर्मिज्ञान । १८ ता । १९ हेतोरसिद्धिः । २० द्वितीयेऽ-नुमाने । २१ ईश्वरज्ञानेन सुखसंवेदनेन चानेकान्तः धर्म्यसिद्धिः । २२ परेण । २३ घटादिज्ञान । २४ ज्ञानं स्वपरप्रकाशकमर्थप्रकाशकत्वात्प्रदीपवत् । २५ प्रदीपे बोधरूपत्वे ज्ञाने भासुररूपसम्बन्धित्वे सति । २६ ज्ञाने भासुररूपसम्बन्धित्वं विद्यते चेत् । २७ प्रकटन । २८ जैनैः । २९ ज्ञाने ।

1 "नचादृष्टवशादनवस्थानिवृत्तिः; स्वसंविदितज्ञानाभ्युपगमेनापि अनवस्थानिवृत्तेः संभवात्, अन्यथा कार्येऽनुपपद्यमाने अदृष्टपरिकल्पनाया उपपत्तेः। स्वसंवेदनेऽपि अदृष्टस्य शक्तिप्रक्षयाभावात्।"　सन्मति० टी० पृ० ४७९ ।

2 "यदि प्रकाशकत्वं बोधरूपत्वं विवक्षितं तदा साधनविकलमुदाहरणम्, प्रदीपे बोधरूपत्वस्यासंभवात्। अथ प्रकाशकत्वं भास्वररूपसम्बन्धित्वं तद् विज्ञाने नास्ति।"
प्रश० व्यो० पृ० ५२९ ।

3 "यतः अर्थप्रकाशकत्वमर्थोद्योतकत्वमुच्यते, तच्च क्वचिद्बोधरूपतया क्वचिद्भा-सुररूपतया वा न विरोधमध्यास्ते।" न्यायकुमु० पृ० १८९। स्या० रत्ना० पृ० २३१।

ननु 'येनात्मना ज्ञानमात्मानं प्रकाशयति येन चार्थं तौ चेत्ततोऽभिन्नौ; तर्हि तावेव न ज्ञानं तस्य तत्रानुप्रवेशात्तत्स्वरूपवत्, ज्ञानमेव वा तयोस्तत्रानुप्रवेशात्, तथा च कथं तस्य स्वपरप्रकाशनशक्तिद्वयात्मकत्वम्? भिन्नौ चेत्स्वसंविदितौ, स्वाश्रयज्ञानविदितौ वा। प्रथमपक्षे स्वसंविदितज्ञानत्रयप्रसङ्गस्तत्रापि प्रत्येकं स्वपरप्रकाशस्वभावद्वयात्मकत्वे स एव पर्यनुयोगोऽनवस्था च। द्वितीयपक्षेऽपि स्वपरप्रकाशहेतुभूतयोस्तयोर्यदि ज्ञानं तथाविधेन स्वभावद्वयेन प्रकाशकं तर्ह्यनवस्था। तदप्रकाशकत्वे प्रमाणत्वायोगस्तयोर्वा तत्स्वभावत्वविरोध इति' एकान्तवादिनामुपलम्भो नास्माकम्; जात्यन्तरत्वात्स्वभावतद्वतोर्भेदाभेदं प्रत्यनेकान्तात्। ज्ञानात्मना हि स्वभावतद्वतोरभेदः, स्वपरप्रकाशस्वभावात्मना च भेद इति ज्ञानमेवाभेदोऽतो भिन्नस्य ज्ञानात्मनोऽप्रतीतेः। स्वपरप्रकाशस्वभावे च भेदस्तद्व्यतिरिक्तयोस्तदप्रतीयमानत्वादित्युक्तदोषानवकाशः। कल्पितयोस्तु भेदाभेदैकान्तयोस्तद्दूषणप्रवृत्तौ सर्वत्र प्रवृत्तिप्रसङ्गात् न कस्यचिदिष्टतत्त्वव्यवस्था स्यात्। स्वपरप्रकाशस्वभावौ च प्रमाणस्य तत्प्रकाशनसामर्थ्यमेव, तद्रूपतया चास्य परोक्षता तत्प्रकाशनलक्षण-

१ स्वभावेन। २ भवतः। ३ तौ। ४ ज्ञानात्। ५ द्वौ स्वभावौ ज्ञानं च। ६ प्रत्येकं स्वपरप्रकाशनस्वभावौ भिन्नावभिन्नौ वा। अभिन्नपक्षे प्रागुक्तमेव दूषणं भिन्नपक्षे स्वसंविदितौ स्वाश्रयज्ञानविदितौ वेत्यादि। ७ भावयोः। ८ भिन्न। ९ स्वभावद्वयप्रकाशनात्। १० ज्ञानस्य। ११ ज्ञानस्य। १२ ज्ञान। १३ भा। १४ परेषां भवताम्। १५ जैनानाम्। १६ प्रकारान्तरत्वात्। १७ कथञ्चिद् भेदाभेदरूपत्वात्। १८ असत्प्रत्यक्षस्य। १९ अनियमात्। २० स्वरूपेण। २१ ईयेकः। २२ वा द्विः। २३ ज्ञानस्य। २४ ता। २५ ना। २६ इति। २७ ज्ञानरूपस्वभावरूपाभेदायां। २८ स्वभावतद्वतोः। २९ स्वपरप्रकाशनस्वभावभेदाभेदपक्षयोः। ३० भवत्पक्षे मया यौगेन। ३१ सुखात्मनोरभेदो ब्रह्माद्वैतवादिना कल्पितस्तत्राभेदे त्वया दूषणमुद्भाव्यते भेदप्रतिभासो न स्यादेकात्मनि सौगतेन भेदः कल्पितस्तत्र भेदे त्वया दूषणमुद्भाव्यते अनुसन्धानं न स्यादिति। तथापि भेदाभेदपक्षदूषणं स्यात्। कथं त्वया द्रव्यगुणयोर्भेदोऽभ्युपगतः आत्मन्यभेदस्त्वत्पक्षेपि परेणोद्भाव्यमानं दूषणं प्रसज्येत। ३२ वस्तुनि। ३३ कारकौ न ज्ञापकौ ज्ञाप्यस्य। ३४ ज्ञानस्य।

1 "यच्चान्यदुक्तं येनैवात्मना ज्ञानमात्मानं प्रकाशयति तेनैवार्थम् इत्यादि; तदसमीक्षिताभिधानम्; स्वभावतद्वतोः भेदाभेदं प्रत्यनेकान्तात्।"

न्यायकुमु० पृ० १८९। स्या० रत्ना० पृ० २३२। (तत्त्वार्थश्लो० पृ० १२५)

कार्यानुमेयत्वात्तयोः। सकलभावानां सामर्थ्यस्य कार्यानुमेयतया निखिलवादिभिरभ्युपगमात्। अर्वाग्दृशां चान्तर्बहिर्वार्थो नैकान्ततः प्रत्यक्ष इत्यत्राखिलवादिनामविप्रतिपत्तिरेवेत्युक्तदोषानवकाशतया प्रमाणस्य प्रत्यक्षताप्रसिद्धेरलं विवादेन। अमुमेवार्थं समर्थयमानः कोवेत्यादिना प्रकरणार्थमुपसंहरति। ५

को वा तत्प्रतिभासिनमर्थमध्यक्षमिच्छंस्तदेव तथा नेच्छेत् ॥ ११ ॥

प्रदीपवत् ॥ १२ ॥

को वा लो(लौ)किकः परीक्षको वा तत्प्रतिभासिनमर्थमध्यक्षमिच्छंस्तदेव प्रमाणमेव तथा प्रत्यक्षप्रकारेण नेच्छेत्! १० अपि तु प्रतीतिं प्रमाणयन्निच्छेदेव। अत्रैवार्थे परीक्षकेतरजनप्रसिद्धत्वात् प्रदीपं दृष्टान्तीकरोति? यथैव हि प्रदीपस्य स्वप्रकाशतां प्रत्यक्षतां वा विना तत्प्रतिभासिनोऽर्थस्य प्रकाशकता प्रत्यक्षता वा नोपपद्यते। तथा प्रमाणस्यापि प्रत्यक्षतामन्तरेण तत्प्रतिभासिनोऽर्थस्य प्रत्यक्षता न स्यादित्युक्तं प्राक् प्रबन्धेनेत्युपरम्यते। १५ तदेवं सकलप्रमाणव्यक्तिव्यापि साकल्येनाप्रमाणव्यक्तिभ्यो व्यावृत्तं प्रमाणप्रसिद्धं स्वापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणलक्षणम्।

ननूक्तलक्षणप्रमाणस्य प्रामाण्यं स्वतः परतो वा स्यादित्याशङ्क्य प्रतिविधत्ते।

तत्प्रामाण्यं स्वतः परतश्च ॥ १३ ॥ २०

तस्य स्वापूर्वार्थेत्यादिलक्षणलक्षितप्रमाणस्य प्रामाण्यमुत्पत्तौ परत एव। ज्ञप्तौ स्वकार्ये च स्वतः परतश्च अभ्यासानभ्यासापेक्षया।

१ स्वपरप्रकाशरूपयोः। २ किञ्चिज्ज्ञानाम्। ३ व्यक्त्यपेक्षया प्रत्यक्षः शक्त्यपेक्षया परोक्षः। ४ ज्ञानं स्वप्रकाशकमर्थप्रकाशकत्वात्। ५ स्वपरप्रकाशकसमर्थप्रकाशकत्वात्। ६ मीमांसकेन ज्ञानपरोक्षतारूपो योगेन स्वात्मनिक्रियाऽभावरूपश्च। ७ स्वसंविदित। ८ ज्ञान। ९ अध्यक्षविषयं। १० प्रदीपवत्। ११ प्रदीपप्रकारेण। १२ दूषणम्। १३ अस्माभिर्जैनैः। १४ प्रत्यक्षपरोक्ष। १५ अव्याप्त्यादिपरिहारः। १६ सन्निकर्षादि। १७ अतिव्याप्तिपरिहारः। १८ असम्भवपरिहारः। १९ स्वापूर्वेत्यादि। २० अविसंवादित्वं। २१ जैनः। २२ अर्थाव्यभिचारित्वम्। २३ प्रवृत्त्यर्थपरिच्छित्तिलक्षणे।

1 "तत्राभ्यासात्प्रमाणत्वं निश्चितं स्वत एव नः।
अनभ्यासे तु परतः इत्याहुः केचिदञ्जसा॥

ये[1] तु सकलप्रमाणानां स्वतः प्रामाण्यं मन्यन्ते तेऽत्र प्रष्टव्याः- किमुत्पत्तौ, ज्ञप्तौ, स्वकार्ये वा स्वतः सर्वप्रमाणानां प्रामाण्यं प्रार्थ्यते[2] प्रकारान्तरासम्भवात्? यद्युत्पत्तौ, तत्रापि[3] 'स्वतः प्रामाण्यमुत्पद्यते' इति कोर्थः? किं कारणमन्तरेणोत्पद्यते[4], स्वसा- ५ मग्रीतो[5] वा, विज्ञानमात्रसामग्रीतो[6] वा गत्यन्तराभावात्। प्रथम- पक्षे-देशकालनियमेन प्रतिनियतप्रमाणाधारतया प्रामाण्य- प्रवृत्तिविरोधः स्वतो जायमानस्यैवंरूपत्वात्, अन्यथा[7] तदयोगात्[8]। द्वितीयपक्षे तु सिद्धसाध्यता, स्वसामग्रीतः सकलभावानामुत्पत्त्य- भ्युपगमात्। तृतीयपक्षोप्यविचारितरमणीयः; विशिष्टकार्यस्या[10]- १० विशिष्टकारणप्रभवत्वायोगात्। तथा हि-प्रामाण्यं विशिष्टकारण- प्रभवं विशिष्टकार्यत्वा[11]दप्रामाण्यवत्[12]। यथैव ह्यप्रामाण्यलक्षणं विशिष्टं कार्यं काचकामलादिदोषलक्षणविशिष्टेभ्यश्चक्षुरादिभ्यो जायते तथा प्रामाण्यमपि गुणविशेषणविशिष्टेभ्यो विशेषाभावात्[13]।

---

१ भाट्टाः। २ समर्थ्येत। ३ आत्मवाचक आत्मीयवाचकश्च। ४ आत्मवाचक- पक्षे। ५ आत्मीयवाचकपक्षे। ६ आत्मीयपक्षे। ७ घटादि। ८ तदविरोधे। ९ कारणमन्तरेण प्रवृत्तेरयोगात्। १० प्रामाण्यस्य। ११ ज्ञानेन व्यभिचारः। १२ प्रामाण्यं न विज्ञानसामग्रीजन्यं विज्ञानान्यत्वे सति कार्यत्वात्। प्रामाण्यविज्ञाने भिन्नसामग्रीजन्ये भिन्नकार्यत्वाद् घटपटादिवत्। १३ विशिष्टकार्यत्वस्य।

तच्च स्याद्वादिनामेव स्वार्थनिश्चयनात् स्थितम्।
ननु स्वनिश्चयोन्मुक्तनिःशेषज्ञानवादिनाम्॥" तत्त्वार्थश्लो० पृ० १७७।

"इति स्थितमेतत्—प्रमाणादिष्टसंसिद्धिः अन्यथाऽतिप्रसङ्गतः। प्रामाण्यं तु स्वतः सिद्धमभ्यासात्परतोऽन्यथा॥" प्रमाणप० पृ० ६३।

"आभ्यासिकं यथा ज्ञानं प्रमाणं गम्यते स्वतः।
मिथ्याज्ञानं तथा किञ्चिदप्रमाणं स्वतः स्थितम्॥"

तत्त्वसं० कारि० ३१००।

"नहि बौद्धैः एषां चतुर्णामेकतमोऽपि पक्षोऽभीष्टः, अनियमपक्षस्येष्टत्वात्। तथाहि—उभयमप्येतत् किञ्चित् स्वतः किञ्चित् परत इति……।"

तत्त्वसं० पं० पृ० ८११।

1 "तत्किं स्वतो ज्ञायते, स्वतो वा जायते, स्वतो वा व्याप्रियते?"

प्रश० कन्दली पृ० २१८।

2 "तत्रापि स्वतः कारणमन्तरेण आत्मनैव प्रामाण्यमुत्पद्यते इत्यर्थः स्यात्, आत्मनो वा सकाशात्, आत्मीयायाः सामग्रीतो वा?" न्यायकुमु० पृ० १९९।

3 "प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीना कार्यत्वे सति तद्विशेषत्वात् अप्रमावत्।"

प्रश० किरणा० पृ० ३१८।

ज्ञप्तावप्यनभ्यासदशायां न प्रामाण्यं स्वतोऽवतिष्ठते; सन्देहविपर्ययाक्रान्तत्वात्तद्वदेव। अभ्यासदशायां तूभयमपि स्वतः। नापि प्रवृत्तिलक्षणे स्वकार्ये तत्स्वतोऽवतिष्ठते, स्वग्रहणसापेक्षत्वादप्रामाण्यवदेव। तद्धि ज्ञातं सन्निवृत्तिलक्षणस्वकार्यकारि नान्यथा।　५

ननु गुणविशेषणविशिष्टेभ्यः इत्यु(त्ययु)क्तम्; तेषां प्रमाणतोऽनुपलम्भेनासत्त्वात्। न खलु प्रत्यक्षं तान्प्रत्येतुं समर्थम्; अतीन्द्रियेन्द्रियाप्रतिपत्तौ तद्गुणानां प्रतीतिविरोधात्। नाप्यनुमानम्; तस्य प्रतिबन्धबलेनोत्पत्त्यभ्युपगमात्। प्रतिबन्धश्चेन्द्रियगुणैः सह लिङ्गस्य प्रत्यक्षेण गृह्येत, अनुमानेन वा। न तावत्प्रत्यक्षेण,　१०
गुणाग्रहणे तत्सम्बन्धग्रहणविरोधात्। नाप्यनुमानेन, अस्यापि गृहीतसम्बन्धलिङ्गप्रभवत्वात्। तत्राप्यनुमानान्तरेण सम्बन्धग्रहणेऽनवस्था। प्रथमानुमानेनान्योन्याश्रयः। अप्रतिपन्नसम्बन्धप्रभवं चानुमानं न प्रमाणमतिप्रसङ्गात्।

किञ्च, स्वभावहेतोः, कार्यात्, अनुपलब्धेर्वा तत्प्रभवेत्? न　१५
तावत्स्वभावात्, तस्य प्रत्यक्षगृहीतेऽर्थे व्यवहारमात्रप्रवर्तनफलत्वाद्वृक्षादौ शिंशपात्वादिवत्। न चात्यक्षाऽक्षाश्रितगुणलिङ्गसम्बन्धः प्रत्यक्षतः प्रतिपन्नः। कार्यहेतोश्च सिद्धे कार्यकारणभावे कारणप्रतिपत्तिहेतुत्वम्, तत्सिद्धिश्चाध्यक्षानुपलम्भप्रमाणसम्पाद्या। न चेन्द्रियगुणाश्रितसम्बन्धग्राहकत्वेनाध्यक्षप्रवृत्तिः, येन तत्का-　२०

१ सत्यमसत्यमिति। २ प्रामाण्यमप्रामाण्यम्। ३ अभ्यासदशायां विषयं प्रति गमनम्। ४ सत्यत्व। ५ स्वस्य ज्ञानेन। ६ प्रामाण्यस्य। ७ अर्थाव्यभिचारित्व। ८ असत्यमिदमिति। ९ विषयं प्रत्यगमनम्। १० अज्ञातम्। ११ अभ्यासदशायां स्वतः। १२ मीमांसकः। १३ चक्षुरादिभ्यः। १४ अपरिज्ञाने। १५ प्रामाण्यं विज्ञानकारणातिरिक्तकारणप्रभवं विज्ञानान्यत्वे सति कार्यत्वादप्रामाण्यवत्। १६ अविनाभाव। १७ प्रामाण्यस्य। १८ लिङ्गस्य। १९ प्रामाण्यं गुणनियतं तदन्वयव्यतिरेकानुविधायित्वात्। २० द्वितीयानुमाने। २१ तदन्वयव्यतिरेकानुविधायित्वं गुणसद्भावाविनाभावि तस्मि(गुणे)न्सत्येवोत्पद्यमानत्वात्। २२ अगृहीत। २३ अनुमानाभासम्। २४ तत्पुत्रत्वादेरुत्पन्नस्य प्रामाण्यप्रसङ्गात्। २५ वृक्षोयं शिंशपात्वात्। २६ हेतोः। २७ वृक्षोयं शिंशपात्वात्। २८ ता। २९ प्रामाण्यं (कार्यं) साध्येन (गुणेन) सम्बन्धि अनुमानकार्यत्वाद्धूमवत्। ३० हेतुः कार्यम्। ३१ सम्बन्धः कारणम्। ३२ अन्वयव्यतिरेकाभ्याम्। ३३ असत्त्वसद्भाव। ३४ कार्यकारणभाव। ३५ ता।

---

1 "नहि चक्षुरादिषु गुणा नाम केचिदुपलभ्यन्ते।"
मी० श्लो० न्यायरत्ना० पृ० ५९।

यत्वेन कस्यचिल्लिङ्गस्याप्यध्यक्षतः प्रतिपत्तिः स्यात्। अनुपलब्धेस्त्वेवंविधे विषये प्रवृत्तिरेव न सम्भवत्यभावमात्रसाधकत्वेनास्याः व्यापारोपगमात्।

न चात्र लिङ्गमस्ति। यथार्थोपलब्धिरस्तीत्यप्यसङ्गतम्; यतो यथार्थत्वायथार्थत्वे विहाय यदि कार्यस्योपलब्ध्याख्यस्य स्वरूपं निश्चितं भवेत्तदा यथार्थत्वलक्षणः कार्यविशेषः पूर्वस्मात्कारणकलापादनिष्पद्यमानो गुणाख्यं स्वोत्पत्तौ कारणान्तरं परिकल्पयेत्। यदा तु यथार्थैवोपलब्धिः स्वयो(स्वो)त्पादककारणकलापानुमापिका तदा कथं तद्व्यतिरिक्तगुणसद्भावः? अयथार्थत्वं तूपलब्धेर्विशेषः पूर्वस्मात्कारणसमूहादनुत्पद्यमानः स्वोत्पत्तौ सामग्र्यन्तरं परिकल्पयतीति परतोऽप्रामाण्यं तस्योत्पत्तौ दोषापेक्षत्वात्।

न चेन्द्रिये नैर्मल्यादिरेव गुणः; नैर्मल्यं हि तत्स्वरूपम्, न तु स्वरूपाधिको गुणः तथा व्यपदेशस्तु दोषाभावनिबन्धनः। तथाहि–कामलादिदोषासत्त्वान्निर्मलमिन्द्रियं तत्सत्त्वे सदोषम्। मनसोपि निद्राद्यभावः स्वरूपं तत्सद्भावस्तु दोषः। विषयस्यापि निश्चलत्वादिस्वरूपं चलत्वादिस्तु दोषः। प्रमातुरपि क्षुधाद्यभावः स्वरूपं तत्सद्भावस्तु दोषः।

न चैतद्वक्तव्यम्–'विज्ञानजनकानां स्वरूपमयथार्थोपलब्ध्या समधिगतम् यथार्थत्वं तु पूर्वस्मात्कारणकलापादनुत्पद्यमानं गुणाख्यं सामग्र्यन्तरं परिकल्पयति' इति; यतोऽत्र लोकः प्रमाणम्। न चात्र मिथ्याज्ञानात्कारणस्वरूपमात्रमेवानुमिनोति किन्तु सम्यग्ज्ञानात्।

किञ्च, अर्थतथाभावप्रकाशनरूपं प्रामाण्यम्, तस्य चक्षु-

१ प्रामाण्यस्य। २ सम्बन्ध। ३ ता। ४ किञ्च। ५ नयनगुणे साध्ये। ६ नयने गुणाः सन्ति यथार्थोपलब्धेः। ७ विशेषरूपे। ८ कार्यमात्रस्य। ९ उपलम्भसामान्यस्य। १० सत्य। ११ कर्त्ता। १२ शुद्धं चक्षुः। १३ अन्यत्। १४ इन्द्रिय। १५ इन्द्रिय। १६ इन्द्रिय। १७ का। १८ निर्मलं चक्षुरिति। १९ इन्द्रियस्वरूपम्। २० घटादिपदार्थस्य। २१ आसन्नत्वादि। २२ वक्ष्यमाणम्। २३ जैनैः। २४ चक्षुरादीनां। २५ लिङ्गेन। २६ अयथार्थोपलब्धिजनकादिन्द्रियात्। २७ विज्ञानसामग्र्यनुमाने। २८ चक्षुरादि। २९ प्रामाण्यं विज्ञानकारण (चक्षुरादि) प्रभवं विज्ञानस्वभावत्वात् विज्ञानस्वरूपवत्। ३० प्रमाणस्य कार्यार्थतथाभावप्रकाशनरूपं प्रामाण्यम्।

1 "वैमल्यं गुण इति चेत्; नन्वेवं दोषाभावो गुणः।"

मी० श्लो० न्यायरत्ना० पृ० ५९।

रादिसामग्रीतो विज्ञानोत्पत्तावप्यनुत्पत्त्युपगमे विज्ञानस्य स्वरूपं वक्तव्यम् । न च तद्रूपव्यतिरेकेण तस्य स्वरूपं पश्यामो येन तदुत्पत्तावप्यनुत्पन्नमुत्तरकालं तत्रैवोत्पत्तिमदभ्युपगम्यते प्रामाण्यं भित्ताविव चित्रम् । विज्ञानोत्पत्तावप्यनुत्पत्तौ व्यतिरिक्तसामग्रीतश्चोत्पत्त्यभ्युपगमे विरुद्धधर्माध्यासात्कारणभेदाच्च तयोर्भेदः स्यात् । ५

किञ्च, अर्थतथात्वपरिच्छेदरूपा शक्तिः प्रामाण्यम्, शक्तयश्च भावानां सत(स्वत) एवोत्पद्यन्ते नोत्पादककारणाधीनाः । तदुक्तम्—

"स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम् । १०
न हि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यते ॥"
[मी० श्लो० सू० २ श्लो० ४७]

न चैतत्सत्कार्यदर्शनसमाश्रयणादभिधीयते; किन्तु यः कार्यगतो धर्मः कारणे समस्ति स कार्यं तत एवोदयमासादयति यथा मृत्पिण्डे विद्यमाना रूपादयो घटेपि मृत्पिण्डादुपजायमाने १५ मृत्पिण्डरूपादिद्वारेणोपजायन्ते । ये तु कार्यधर्माः कारणेष्वविद्यमाना न ते ततः कार्यवत् जायन्ते किन्तु स्वत एव, यथा तस्यैवोदकाहरणशक्तिः । एवं विज्ञानेप्यर्थतथात्वपरिच्छेदशक्तिश्चक्षुरादिष्वविद्यमाना तेभ्यो नोदयमासादयति किन्तु स्वत एवाविर्भवति । उक्तं च— २०

"आत्मलाभे हि भावानां कारणापेक्षिता भवेत् ।
लब्धात्मनां स्वकार्येषु प्रवृत्तिः स्वयमेव तु ॥"
[मी० श्लो० सू० २ श्लो० ४८]

यथा-मृत्पिण्डदण्डचक्रादि घटो जन्मन्यपेक्षते ।
उदकाहरणे त्वस्य तदपेक्षा न विद्यते" ॥ [ ] २५

---

१ प्रामाण्यस्य। २ जैनैः। ३ वयं मीमांसकाः। ४ विज्ञानस्य। ५ विज्ञाने। ६ भित्तिसद्भावे चित्रं नोत्पद्यते विनष्टे तु भवतीति। ७ प्रामाण्यस्य। ८ प्रामाण्यस्य। ९ विज्ञानस्य कारणमिन्द्रियं प्रामाण्यस्य गुण इति। १० उत्पत्त्यनुत्पत्तिलक्षण। ११ इन्द्रियगुणौ। १२ प्रमाणप्रामाण्ययोः। १३ प्रमाणप्रामाण्ये भिन्ने। १४ इति परस्यानिष्टापत्तिः परेणाभेदाभ्युपगमात्। १५ प्रमाणस्य भावशक्तिः। १६ विज्ञानकारणातिरिक्तकारणाधीनो गुणः। १७ भवति। १८ निश्चीयताम्। १९ कारणे। २० स्वरूपेण। २१ विज्ञानकारणातिरिक्तकारणाधीनेन गुणेन। २२ अपरार्द्धस्थम्। २३ साङ्ख्यमत। २४ कारणधर्मादेव। २५ घटलक्षणकार्यस्य। २६ कार्याणां।

---

1 "सर्वे हि भावाः स्वात्मलाभायैव करणमपेक्षन्ते। घटो हि मृत्पिण्डादिकं स्वजन्मन्येव अपेक्षते, नोदकाहरणेऽपि। तथा ज्ञानमपि स्वोत्पत्तौ गुणवदितरद्वा करणम-

चक्षुरादिविज्ञानकारणादुपजायमानत्वात्तस्य[1] परतोऽभिधाने तु सिद्धसाध्यता। अनुमाना[2]दिबुद्धिस्तु गृहीताविनाभा[3]वादिलिङ्गा[4]देरुपजायमाना प्रमाणभूतैवोपजायतेऽतोऽत्रापि तेषां[5] न व्यापारः। तन्नोत्पत्तौ त[6]दन्या[7]पेक्षम्।

५ नापि ज्ञप्तौ, त[8]द्धि तत्र किं कारणगुणानपेक्षते, संवादप्रत्ययं वा? प्रथमपक्षोऽयुक्तः; गुणानां प्रत्यक्षादिप्रमाणाविषयत्वेन प्रागेवासत्त्वप्रतिपादनात्। संवादज्ञानापेक्षाप्ययुक्ता[9]; तत्खलु स[10]मानजातीयम्, भिन्नजातीयं वा? प्रथमपक्षे किमेकसन्तानप्र[11]भवम्; भिन्नसन्तानप्रभवं वा? न तावद्भिन्नसन्तानप्रभवम्; दे[12]वदत्तघ-
१० टज्ञाने यज्ञदत्तघटज्ञानस्यापि संवादकत्वप्र[13]सङ्गात्। एकसन्तानप्रभवमप्यभिन्नविषयम्, भिन्नविषयं वा? प्रथमविकल्पे संवा[14]द्यसंवादकभावाभावोऽविशेषा[15]त्। अभिन्नविषयत्वे हि यथोत्तरं पूर्वस्य संवादकं तथेदमप्यस्य किन्न स्या[16]त्? कथं चा[17]स्य[18] प्रमाणत्वनिश्चयः? त[19]दुत्तरकालभाविनोऽन्य[20]स्मात् त[21]थाविधादेवेति
१५ चेत्, तर्हि तस्याप्यन्यस्मात्तथाविधादेवेत्यनवस्था। प्र[22]थमप्रमा[23]णात्तस्य प्रामाण्यनिश्चयेऽन्योन्याश्रयः। भिन्नविषयमित्यपि वार्त्तम्; शुक्तिशकले र[24]जतज्ञानं प्रति उत्तरकालभाविशुक्तिकाशकलज्ञानस्य प्रामाण्यव्य[25]वस्थापकत्वप्रसङ्गात्।

ना[26]पि भिन्नजातीयम्; त[27]द्धि किमर्थक्रि[28]याज्ञा[29]नम्, उता[30]न्यत्? न
२० तावदन्यत्; घ[31]टज्ञानात्पटज्ञाने प्रामाण्यनिश्चयप्रसङ्गात्। नाप्यर्थक्रियाज्ञानम्; प्रा[32]माण्यनिश्चयाभावे प्रवृत्त्याभावेनार्थक्रियाज्ञाना-

१ प्रामाण्यस्य। २ आगम। ३ सङ्केतादि। ४ शब्द। ५ गुणानां। ६ प्रामाण्यं। ७ गुण। ८ प्रामाण्यं। ९ प्रामाण्यस्य। १० अर्थज्ञानेन समाना सदृशा जातिवि(र्वि)षयो यस्य तत्समानजातीयम्। ११ पुरुष। १२ अन्यथा। १३ भिन्नसन्तानप्रभवत्वाविशेषात्। १४ एकस्य जलज्ञानं जलज्ञानमिति। १५ अभिन्नविषयस्य। १६ संवादकं। १७ किञ्च। १८ उत्तरज्ञानस्य। १९ द्वितीयज्ञानात्। २० ज्ञानात्। २१ अभिन्नविषयात्। २२ प्रथमप्रमाणादुत्तरस्य निश्चयः उत्तरज्ञानात्प्रथमनिश्चय इति। २३ ज्ञानात्। २४ पूर्वज्ञानं। २५ सदृशविषयत्वेन समानजातीयत्वे सति भिन्नविषयत्वस्याविशेषात्। २६ संवादज्ञानं। २७ द्वितीयविकल्पं प्रत्याह परः। २८ स्नानावगाहनादि। २९ ता। ३० मरीचिकाचक्रे जलज्ञानातपश्चान्मरीचिकाज्ञानम्। ३१ अन्यथा। ३२ आद्यज्ञानस्य।

पेक्षतां नाम स्वकार्ये तु विषयनिश्चये अनपेक्षमेव।"

मी० श्लो० न्यायरत्ना० पृ० ६०।

कारिकेयं तत्त्वसंग्रहे (पृ० ७५७) पूर्वपक्षरूपेण वर्त्तते।

घटनात्। चक्रकप्रसङ्गश्च। कथं चार्थक्रियाज्ञानस्य तन्निश्चयः? अन्यार्थक्रियाज्ञानाच्चेदनवस्था। प्रथमप्रमाणाच्चेदन्योन्याश्रयः। अर्थक्रियाज्ञानस्य स्वतःप्रामाण्यनिश्चयोपगमे चाद्यस्य तथाभावे किङ्कृतः प्रद्वेषः? तदुक्तम्—

"यथैव प्रथमज्ञानं तत्संवादमपेक्षते।
संवादेनापि संवादः परो मृग्यस्तथैव हि ॥ १ ॥ [ ]
कस्यचित्तु यदीष्येत स्वत एव प्रमाणता।
प्रथमस्य तथाभावे प्रद्वेषः केन हेतुना ॥ २ ॥
[मी० श्लो० सू० २ श्लो० ७६]

संवादस्याथ पूर्वेण संवादित्वात्प्रमाणता।
अन्योन्याश्रयभावेन प्रामाण्यं न प्रकल्पते ॥ ३ ॥ [ ] इति।

अर्थक्रियाज्ञानस्यार्थाभावेऽदृष्टत्वाच्च स्वप्रामाण्यनिश्चयेऽन्यापेक्षा साधनज्ञानस्य त्वर्थाभावेपि दृष्टत्वात्तत्र तदपेक्षा युक्ता; इत्यप्यसङ्गतम्; तस्याप्यर्थमन्तरेण स्वप्नदशायां दर्शनात्। फलावाप्तिरूपत्वात्तस्य तत्र नान्यापेक्षा साधननिर्भासिज्ञानस्य तु फलावाप्तिरूपत्वाभावात्तदपेक्षा; इत्यप्यनुत्तरम्; फलावाप्तिरूपत्वस्याप्रयोजकत्वात्। यथैव हि साधननिर्भासिनो ज्ञानस्यान्यत्र व्यभिचारदर्शनात्सत्यासत्यविचारणायां प्रेक्षावतां प्रवृत्तिस्तथा तस्यापि विशेषाभावात्।

किञ्च, समानकालमर्थक्रियाज्ञानं पूर्वज्ञानप्रामाण्यव्यवस्थापकम्, भिन्नकालं वा? यद्येककालम्; पूर्वज्ञानविषयम्, तदविषयं

१ अर्थक्रियाज्ञानोत्पत्तौ पूर्वज्ञानस्य प्रामाण्यं पूर्वज्ञानप्रामाण्ये च प्रवृत्तिः प्रवृत्तौ चार्थक्रियाज्ञानोत्पत्तिरिति। २ किञ्च। ३ प्रामाण्य। ४ जैनैः। ५ ज्ञानस्य। ६ स्वविषये। ७ स्वविषये। ८ द्वितीयज्ञानस्य। ९ ज्ञानस्य। १० आद्यज्ञानेन। ११ न घटते। १२ जैनः। १३ अप्रतीतेः। १४ जलज्ञानस्य। १५ जललक्षण। १६ मरीचिकाचक्रे। १७ साधनज्ञानप्रामाण्ये। १८ स्नानपानादिलक्षण। १९ स्वप्रामाण्यनिश्चये। २० प्रथमतृतीयज्ञान। २१ स्नानादिक्रियायाः साधनं जलादि तस्मिन्। २२ युक्ता। २३ अन्यानपेक्षत्वं प्रति। २४ अर्थक्रियायाः। २५ जल। २६ मरीचिकायां। २७ जाग्रद्दशायां सुप्तावस्थायां च सत्यासत्यत्वस्य। २८ स्वप्नदशायां व्यभिचारदर्शनस्य। २९ संवादकं। ३० बसः। ३१ बसः। ३२ बसः।

1 "कारिकेयं तत्त्वसंग्रहे (पृ० ७५७) पूर्वपक्षरूपतया धृताऽस्ति।

वा? । न तावत्तदविषयम्; चक्षुरादिज्ञाने ज्ञानान्तरस्याप्रतिभासनात्, प्रतिनियतरूपादिविषयत्वात्तस्य । तदविषयत्वे च कथं तज्ज्ञानप्रामाण्यनिश्चायकत्वं तदग्रहे तद्धर्माणां ग्रहणविरोधात् । भिन्नकालमित्यप्ययुक्तम्; पूर्वज्ञानस्य क्षणिकत्वेन नाशे ५ तदग्राहकत्वेनोत्तरज्ञानस्य तत्प्रामाण्यनिश्चायकत्वायोगात् । सर्वप्राणभृतां प्रामाण्ये सन्देहविपर्ययाक्रान्तत्वासिद्धेश्च । समुत्पन्ने खलु विज्ञाने 'अयमित्थमेवार्थः' इति निश्चयो न सन्देहो विपर्ययो वा । तदुक्तम्—

"प्रमाणं ग्रहणात्पूर्वं स्वरूपेणैव संस्थितम् ।
१० निरपेक्षं स्वकार्ये च गृह्यते प्रत्ययान्तरैः, ॥ १ ॥"

[मी० श्लो० सू० २ श्लो० ८३] इति

प्रमाणाप्रमाणयोरुत्पत्तौ तुल्यरूपत्वान्न संवादविसंवादावन्तरेण तयोः प्रामाण्याप्रामाण्यनिश्चय इति च मनोरथमात्रम्; अप्रमाणे बाधककारणदोषज्ञानयोरवश्यंभावित्वादप्रामाण्यनिश्चयः, १५ प्रमाणे तु तयोरभावात्प्रामाण्यावसायः ।

---

१ स्पर्शनरसनघ्राणश्रोत्र । २ द्वितीये ज्ञाने । ३ आद्यस्य जलज्ञानस्य । ४ रसगन्धस्पर्शशब्द । ५ यसः । ६ बाह्येन्द्रियजनितज्ञानस्य । ७ प्रामाण्यसत्त्वादीनाम् । ८ यदा ज्ञानमुत्पद्यते तदा संशयादिरहितमेवोत्पद्यतेऽतः कथमपरापेक्षा । ९ किञ्च । १० भवति । ११ प्रामाण्यं । १२ प्रामाण्यलक्षणस्य धर्मस्यान्तर्भावाद्धर्मिप्रधानोऽयं निर्देशः । १३ परिच्छित्तेः । १४ अर्थपरिच्छित्तिप्रवृत्तिलक्षणे । १५ पुरुषैः । १६ संवादरूपैः । १७ सन्निकर्षरूपैः । १८ परतः । १९ निश्चयः । २० भवति ।

---

1 "अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यते ॥ ५३ ॥

"दोषनिमित्तं हि ज्ञानस्यायथार्थत्वम्, दोषान्वयव्यतिरेकानुविधानात् । अतो दुष्टकारणजन्येन ज्ञानेन आत्मनः प्रामाण्यं विषयस्यार्थस्यातथाभूतस्यापि तथात्वमवगतमपि अर्थान्यथात्वज्ञानेन दोषज्ञानेन वाऽपोद्यते ।" मी० श्लो० न्यायरत्ना० पृ० ६२ ।

"एवमेव स्वतः सर्वज्ञानानां प्रामाण्यम्; अप्रामाण्यं तु परत एवेत्याश्रित्य प्रत्यवस्थेयम्; तथाहि–विज्ञानं जायमानं यथाभूतमर्थमवभासयति तथाभूत एवार्थ इति निश्चाययत्येव न तु निश्चये ज्ञानान्तरमपेक्षणीयम्, तेन स्वत एव प्रामाण्यम् । अप्रामाण्यं तु अर्थस्यातथाभावनिश्चयनिरपेक्षं सन्नावगमयितुमलमिति परतोऽप्रामाण्यम् । अपि च प्रमाणाप्रमाणसाधारणत्वे निश्चयस्य निश्चयानुसारेण पश्चादाशंकोपजायते; सा परत एवेति परत एवाप्रामाण्यम् । न चापि सर्वत्राशंका, किन्तु यादृशे व्यभिचारदर्शनं तादृश एव शंकेति । नच सर्वावस्थे ज्ञाने व्यभिचारदर्शनमिति सर्वत्राशंका; सर्वत्रैवाशंकायां परतोऽपि प्रामाण्यं न स्यात्, तस्यापि शंकास्पदत्वादिति ।"

मीमांसाभाष्यपरि० पृ० ८ ।

यापि-तत्तुल्यरूपेऽन्यत्र तयोर्दर्शनात्तदाशङ्का; सापि त्रिचतुरज्ञानापेक्षामात्रान्निवर्त्तते। न च तदपेक्षायां स्वतः प्रामाण्यव्याघातोऽनवस्था वा; संवादकज्ञानस्याप्रामाण्यव्यवच्छेदे एव व्यापारादन्यज्ञानानपेक्षणाच्च। तदुक्तम्—

"एवं त्रिचतुरज्ञानैर्जन्मनो नाधिका मतिः।
प्रार्थ्यते तावतैवेयं स्वतः प्रामाण्यमश्नुते ॥ १ ॥"
[मी० श्लो० सू० २ श्लो० ६१]

योऽप्यनुत्पद्यमानः संशयो बलादुत्पाद्यते सोऽप्यर्थक्रियार्थिनां सर्वत्र प्रवृत्त्यादिव्यवहारोच्छेदकारित्वान्न युक्तः। उक्तञ्च—

"आशङ्केत हि यो मोहादजातमपि बाधकम्।
स सर्वव्यवहारेषु संशयात्मा क्षयं व्रजेत् ॥ १ ॥" [ ]

---

१ अप्रमाणे। २ अप्रामाण्य। ३ प्रमाणे। ४ परिज्ञाने। ५ पञ्चमस्य ज्ञानस्य। ६ स्वग्रन्थोक्तप्रकारेण कथमाद्यज्ञानस्य द्वितीयादिसंवादज्ञानापेक्षित्वप्रकारेण। ७ उत्पत्तेः। ८ का। ९ ज्ञानम्। १० वाञ्छते पुरुषेण। ११ प्राप्नोति। १२ यथाऽऽशाद्यज्ञानं द्वितीयं द्वितीयं च तृतीयं तृतीयं च चतुर्थमपेक्षते। तथा चतुर्थेनापि पञ्चममपेक्षणीयमित्यादिप्रकारेणानवस्था किमिति न स्यादित्युक्ते सत्याह। १३ विषये। १४ अज्ञानात्। १५ प्रवृत्तिनिवृत्तिरूपेषु। १६ मनः।

---

1 "ननु यथा आद्यस्य द्वितीयेन दोषोऽवगतः तस्यापि तृतीयेन तथा तृतीयस्यापि दोषाशङ्का भवत्येव, तथा सर्वत्रैवेति न क्वचिदाश्वासः स्यादत आह–'दोषज्ञाने त्वनुत्पन्ने न शङ्क्या निष्प्रमाणता' इति। दिक्कालावस्थेन्द्रियविषयदोषा हि मिथ्यात्वहेतवो लोकप्रसिद्धा यत्र नैव संभवन्ति यथा जागर्यायामालोके स्वस्थेन्द्रियमनस्कस्य सन्निहितघटज्ञाने। तत्र नैव दोषाशङ्का, तदभावाच्चाप्रामाण्याशङ्कापि नैव भवति। यथाविधेषु हि अप्रामाण्यसंभवः तथाविधेष्वेव तदाशङ्का भवति, संभावितदोषेषु च तत्संभव इति कथमन्यत्र शङ्क्यते? नहि ज्ञानत्वमात्रेण संशयो युक्तः; संशयस्य साधारणधर्मादिनिश्चयाधीनत्वात्। तदवश्यं कानिचिज्ज्ञानानि असन्दिग्धप्रामाण्यान्येवोत्पद्यन्ते। तस्मान्न सर्वत्राशङ्का। यत्रापि दूरत्वादिदोषसंभवादप्रामाण्याशङ्का, तत्रापि प्रत्यासत्तिगमनादिनाऽन्यतरपदार्थनिर्णयान्नातिदूरगमनमिति। एवं च तृतीयज्ञाने दोषो यदि न संभावितः ततस्तदवधिरेव निर्णयः। अथ तु संभावितः ततस्तन्निराकरणप्रयत्नेन चतुर्थज्ञानावसानो निर्णय इति नाधिकज्ञानापेक्षा। तावतैव तृतीयेन चतुर्थेन वा द्वितीयस्य तृतीयस्य बाधे सति यस्यैवाद्यस्य द्वितीयस्य वा प्रामाण्यं समर्थ्यते तस्य स्वाभाविकं प्रामाण्यमनपोदितं भवति। इतरच्चापवादादप्रमाणमिति नानवस्था।"
मी० श्लो० न्यायरत्ना० पृ० ६४।

2 "उत्प्रेक्षेत हि यो मोहादजातमपि बाधकम्।
स सर्वव्यवहारेषु संशयात्मा क्षयं व्रजेत् ॥ २८७२ ॥ तत्त्वसं० (पूर्वपक्षे)
प्र० क० मा० १४

चोदना[1]जनिता तु बुद्धिर[2]पौरुषेयत्वेन दोषरहिताच्चोदनावाक्या- दुपजायमाना लिङ्गाप्तोक्त्यक्षबुद्धि[3]वत्स्वतः प्रमाणम्। तदुक्तम्—

"चोदनाजनिता बुद्धिः प्रमाणं[4] दोष[5]वर्जितैः।
कारणै[6]र्जन्यमानत्वाल्लिङ्गाप्तोक्त्यक्षबुद्धिवत् ॥ १ ॥"

५ [मी० श्लो० सू० २ श्लो० १८४]

तत्र ज्ञप्तौ[8] परापेक्षा[9]।

नापि स्वकार्ये; तत्रापि हि किं तत्[10]संवादप्रत्ययमपेक्षते, कारण- गुणान् वा? प्रथमपक्षे चक्रकप्रसङ्गः—प्रमाणस्य[11] हि स्वकार्ये[12] प्रवृत्तौ सत्यामर्थक्रिया[13]र्थिनां प्रवृत्तिः, तस्यां चार्थक्रियाज्ञानोत्पत्ति- १० लक्षणः संवादः; तत्सद्भावे च संवादमपेक्ष्य प्रमाणं स्वकार्येऽर्थप- रिच्छेदलक्षणे प्रवर्त्तेत। भाविनं संवादप्रत्ययमपेक्ष्य तत्तत्र प्रवर्त्तते; इत्यप्यनुपपन्नम्; तस्यासत्त्वेन[14] स्वकार्ये[15] प्रवर्त्तमानं विज्ञानं प्रति सहकारित्वायोगात्।

द्वितीयपक्षेऽपि गृहीताः स्व[16]कारणगुणाः तस्य स्वकार्ये प्रवर्त्त- १५ मानस्य सहकारित्वं प्रतिपद्यन्ते, अगृहीता वा? न तावदुत्तरः पक्षः; अतिप्रसङ्गात्[17]। प्रथमपक्षेऽनवस्था-स्वकारण[18]गुणज्ञानापेक्षं हि प्रमाणं स्वकार्ये प्रवर्त्तेत तद्[19]पि स्व[20]कारण[21]गुण[22]ज्ञानापेक्षं प्रमाण- कारणगुणग्रहणलक्षणे स्वकार्ये प्रवर्त्तेत तदपि च स्वकारणगुण- ज्ञानापेक्षमिति। तस्य[23] स्वकारणगुणज्ञानानपेक्षस्यैव प्रमाणकारण- २० गुणपरिच्छेदलक्षणे स्वकार्ये प्रवृत्तौ प्रथमस्यापि कारणगुणज्ञाना- नपेक्षस्यार्थपरिच्छेदलक्षणे स्वकार्ये प्रवृत्तिरस्तु विशेषाभावात्[24]। तदुक्तम्—

"जातेपि यदि विज्ञाने तावन्नार्थोऽवधार्यते।
यावत्[25]कारण[26]शुद्धत्वं[27] न प्रमाणान्तरात्[28]गतम्[29] ॥ १ ॥

---

१ वेद। २ इति गुणव्यापाराभावः। ३ प्रत्येकं सम्बध्यते। ४ स्वतः। ५ अनाप्तोक्तत्वलक्षण। ६ वेदवाक्यैः। ७ संवादानुमान। ८ प्रामाण्यस्य। ९ परापेक्षं प्रामाण्यं न। १० प्रामाण्यं कर्तृ। ११ प्रामाण्यलक्षणस्य धर्मस्यात्रान्तर्भावाद्धर्मि- प्रधानोयं निर्देशः। १२ अर्थपरिच्छित्तिरूपे। १३ नृणाम्। १४ अविद्यमानत्वेन। १५ अर्थपरिच्छित्तिलक्षणे। १६ प्रमाणस्य। १७ सन्तानान्तरलोचनगुणा अपि सह- कारिणो भवन्तु अगृहीतत्वाविशेषात्। १८ इन्द्रियनैर्मल्यादि। १९ भवच्चक्षुर्निर्मलमिति शब्दः परोक्ष इति। २० प्रमाणकारणगुणज्ञान। २१ शब्द। २२ आप्तोक्तत्व- लक्षण। २३ प्रमाणकारणगुणज्ञानस्य। २४ अनपेक्षत्वस्य। २५ प्रथमज्ञानस्य। २६ चक्षुः। २७ नैर्मल्यं। २८ शब्दज्ञानात्। २९ ज्ञातम्।

> तत्र[1] ज्ञानान्तरोत्पादः[2] प्रतीक्ष्यः[3] कारणान्तरात्[4] ।
> यावद्धि न परिच्छिन्ना शुद्धिस्तावदसत्समा ॥ २ ॥
> तस्यापि[5] कारणे शुद्धे[7] तज्ज्ञानस्य[6] प्रमाणता ।
> तस्याप्येवमितीत्थं[8] च न क्वचिद्[9] व्यवतिष्ठते ॥ ३ ॥"
>
> [मी० श्लो० सू० २ श्लो० ४९-५१] इति । ५

अत्र[11] प्रतिविधीयते । यत्तावदुक्तम्—'प्रत्यक्षं न तान्[12] प्रत्येतुं समर्थम्' इति; तत्रेन्द्रिये[13][1] शक्तिरूपे, व्यक्तिरूपे[14] वा तेषामनुपलम्भे-[15]नाभावः साध्यते? प्रथमपक्षे-गुणवद्दोषाणामप्यभावः[16] । नह्याधारा-[17]प्रत्यक्षत्वे आधेयप्रत्यक्षता[18] नामातिप्रसङ्गात्[19] । अथ व्यक्तिरूपे; तत्रापि किमात्मप्रत्यक्षेण गुणानामनुपलम्भः, परप्रत्यक्षेण वा[20]? प्रथमविकल्पे दोषाणामप्यसिद्धिः । न ह्यात्मीयं प्रत्यक्षं स्वचक्षुरादिगुणदोषविवेचने प्रवर्त्तते इत्येतत्प्रातीतिकम् । स्पार्शनादिप्रत्यक्षेण तु चक्षुरादिसद्भावमात्रमेव प्रतीयते इत्यतोपि गुणदोषसद्भावासिद्धिः । अथ परप्रत्यक्षेण ते[21] नोपलभ्यन्ते; तदसिद्धम्; यथैव हि काचकामलादयो दोषाः परचक्षुषि प्रत्यक्षतः परेण प्रतीयन्ते तथा नैर्मल्यादयो गुणा अपि । १० १५

जात[2][22]मात्रस्यापि नैर्मल्याद्युपेतेन्द्रियप्रतीतेः तेषां गुणरूपत्वाभावे[23] जाततैमिरिकस्या[24]प्युपलम्भादिन्द्रियस्वरूपव्यतिरिक्त[25]तिमिरादिदोषाणाम[26]प्यभावः[27] । कथं वा[28] रूपादीनां घटादिगुणस्वभावता

१ तदा । २ शाब्दलक्षणस्य । ३ अन्वेक्ष्यः । ४ शब्दलक्षणात् । ५ प्रथमज्ञानकारण(नेत्र)स्य । ६ द्वितीयस्य तृतीयज्ञानस्यापि । ७ दोषरहिते । ८ द्वितीयस्य तृतीयस्यापि । ९ ज्ञाने । १० जैनः । ११ जैनैः । १२ स्वकारणाश्रितान्गुणान् । १३ ग्रन्थे । १४ गोलके । १५ गुणानाम् । १६ शक्तिरूपे इन्द्रिये । १७ शक्तिरूपेन्द्रियस्य । १८ गुणदोष । १९ अन्यथा आत्मान्तरप्रत्यक्षत्वाभावेपि तज्ज्ञानप्रत्यक्षताप्रसङ्गात् । २० गुणानाम् । २१ गुणाः । २२ प्राणिनः । २३ किन्तु नयनस्वरूपतैव । २४ प्राणिनः । २५ कामलादिकं नयनस्वरूपानतिरेकि जातमात्रस्य नयनविशिष्टत्वेनोपलभ्यमानत्वाद्गुणवत् । २६ न नैर्मल्यादयो गुणा इति । २७ किन्न स्यात् । २८ घटादिरूपादयो धर्मिणो गुणा न भवन्तीति साध्यम् ।

1 "तत्र किमिन्द्रिये परोक्षशक्तिरूपे गुणानां प्रत्यक्षेणानुपलम्भादभावः साध्यते, आहोस्वित् प्रत्यक्षे चक्षुर्गोलकादौ बाह्यरूपे?" स्या० रत्ना० पृ० २४४ ।

2 "जातमात्रस्यापि नैर्मल्यादिनेन्द्रियप्रतीतेर्नैर्मल्यादीनां गुणरूपत्वाभाव इत्युच्यते; तर्हि जाततैमिरिकस्य जातमात्रस्यापि तिमिरादिपरिकरितेन्द्रियप्रतीतेरिन्द्रियस्वरूपातिरिक्ततिमिरादिदोषाणामप्यभावः कथन्न स्यात्? कथञ्चैवं रूपादीनामपि कुम्भादिगुणस्वभावता उत्पत्तेरारभ्य कुम्भे तेषां प्रतीयमानत्वाविशेषात् ।" स्या० रत्ना० पृ० २४५ ।

उत्पत्तिप्रभृतितः प्रतीयमानत्वाविशेषात्? 'यच्चक्षुरादिव्यतिरिक्त[2]-भावाभावानुविधायि तत्तत्कारणकम्, यथाऽप्रामाण्यम्, तथा च प्रामाण्यम्। यच्च तद्व्यतिरिक्तं कारणं ते गुणाः' इत्यनुमानतोपि तेषां सिद्धिः।

५ यच्चेन्द्रियगुणैः सह लिङ्गस्य[7] प्रतिबन्धः[4] प्रत्यक्षेण गृह्येत, अनुमानेन वेत्याद्युक्तम्[6]; तदप्ययुक्तम्; ऊहाख्यप्रमाणान्तरात्तत्प्रतिबन्धप्रतीतेः। कथं चाप्रामाण्यप्रतिपादकदोषप्रतीतिः? तत्राप्यस्य[8] समानत्वात्। नैर्मल्यादेर्मलाभावरूपत्वात्कथं गुणरूपतेत्यप्यसाम्प्रतम्; दोषाभावस्य[9] प्रतियोगि[10]पदार्थ[11]स्वभाव-

१० त्वात्। निःस्वभावत्वे[12] कार्यत्व[13]धर्माधारत्वविरोधात् खरविषाणवत्। तथाविधस्या[14]प्रतीतेरनभ्युपगमाच्च[15], अन्यथा[16]—

> "भावान्तर[17]विनिर्मुक्तो भावो[18]ऽत्रा[19]नुपलम्भवत्[20]।
> अभावः समस्त (सम्मतस्त)स्य[21] हेतोः किन्न समुद्भवः॥" [ ]

---

१ प्रामाण्यं धर्मि चक्षुरादिव्यतिरिक्तपदार्थकारणकं भवति चक्षुरादिव्यतिरिक्तपदार्थभावाभावानुविधायित्वात्। २ कारणस्य। ३ यथार्थोपलब्धिलक्षणविशिष्टकार्यत्वादित्वस्य। ४ अविनाभावः। ५ गुणसद्भावे प्रामाण्यस्य सद्भावस्तदभावे प्रामाण्यस्याभाव इति। ६ परेण। ७ इन्द्रियगुणलिङ्गस्य। ८ दोषपक्षेपि दोषैस्सह लिङ्गस्य सम्बन्धः प्रत्यक्षेण गृह्यतेऽनुमानेन वेत्यादिदोषस्य। ९ भावान्तरस्वभावत्वादभावस्य। १० यद् (गुण) निरूपणाधीनं निरूपणं यस्य (दोषस्य) तत्तत्प्रतियोगि। ११ गुण। १२ अभावस्य। १३ अञ्जनादिना क्रियमाणत्वलक्षणकार्यत्व(नैर्मल्यादि)। १४ निस्स्वभावाभावस्य। १५ त्वया परेण। १६ अभ्युपगमे। १७ गुणादोपलक्षणं कपालक्षणादन्यो घटो वा। १८ गुणः कपालं वा। १९ मीमांसकमते। २० एकस्माद्भूतलोपलम्भलक्षणाद्भावादपरो घटोपलम्भलक्षणो भावो भावान्तरं तेन विनिर्मुक्तो भावो भूतलोपलम्भलक्षणः स एव घटस्यानुपलम्भो यथा। २१ लिङ्गस्य।

---

1 "तथाहि–अतीन्द्रियलोचनाद्याश्रिता दोषाः किं प्रत्यक्षेण प्रतीयन्ते, उत अनुमानेन? न तावत् प्रत्यक्षेण; इन्द्रियादीनामतीन्द्रियत्वेन तद्गतदोषाणामप्यतीन्द्रियत्वेन तेषु प्रत्यक्षस्याप्रवृत्तेः। नाप्यनुमानेन; अनुमानस्य गृहीतप्रतिबन्धलिङ्गप्रभवत्वाभ्युपगमात्। लिङ्गप्रतिबन्धग्राहकस्य च प्रत्यक्षस्यानुमानस्य चात्र विषयेऽसम्भवात्। प्रमाणान्तरस्य चात्रानन्तर्भूतस्यासत्त्वेन प्रतिपादयिष्यमाणत्वात् इत्यादि सर्वमप्रामाण्योत्पत्तिकारणभूतेषु लोचनाद्याश्रितेषु दोषेष्वपि समानमिति।" सन्मति० टी० पृ० ९।

2 "पदार्थान्तरेण विनिर्मुक्तः त्यक्तः भिन्न इति यावत्, इत्थम्भूतो भाव एवाभावः न पुनर्भावादतिरिच्यते इत्यर्थः। तत्र दृष्टान्तोऽनुपलम्भः, यथा घटानुपलम्भो घटातिरिक्तस्य पटादेरुपलम्भे पर्यवस्यति, तथा दोषा[ऽभावो]भावान्तरे पर्यवसायी वाच्य इत्याशय इति" गु० टि०। सन्मति० टी० टि० पृ० १०।

इत्यस्य विरोधः।

तथा[1] च गुणदोषाणां परस्परपरिहारेणावस्थानाद्दोषाभावे[1] गुणसद्भावोऽवश्याभ्युपगन्तव्योऽग्न्यभावे शीतसद्भाववत्, अभा[2]वाभावे[3] भाव[4]सद्भाववद्वा। अन्यथा कथं[5] हेतौ[6] नियमा[7]भावो दोषः स्यात् अभावस्य गुणरूपतावद्दोषरूपत्वस्याप्ययोगात्? तथाच- नैर्मल्यादिव्यतिरिक्तगुणरहिताच्चक्षुरादेरुपजायमानप्रामाण्यवन्नि-यमविरहव्यतिरिक्तदोषरहिताद्धेतोरप्रामाण्यमप्युपजायमानं स्वतो[8] विशेषा[9]भावात्। तथा च—

"अप्रामाण्यं त्रिधा भिन्नं मिथ्यात्वा[10]ज्ञा[11]न[12]संशयैः।
वस्तु[13]त्वा[14]द्द्विविध[15]स्यात्र सम्भवो दुष्ट[16]कारणात्॥"
[मी० श्लो० सू० २ श्लो० ५४]

इत्यस्य[17] विरोधः। ततो हेतोर्नियमविरहस्य दोषरूपत्वे चेन्द्रिये मलापगमस्य गुणरूपतास्तु। तथाच सूक्तमिदम्—

"तस्मा[18]द्गुणेभ्यो दोषाणामभावस्तदभावतः।
अप्रामाण्य[19]द्वयासत्त्वं तेनो[20]त्सर्गो[21]ऽनपो[22]दितः[23]॥"
[मी० श्लो० सू० २ श्लो० ६५] इति।

'गुणेभ्यो हि दोषाणामभावः' इत्यभिदधता[24] 'गुणेभ्यो गुणाः' एवाभिहितास्तथा[25] प्रामाण्यमेवाप्रामाण्यद्वयासत्त्वम्, तस्य गुणेभ्यो भावे कथं न परतः प्रामाण्यम्? कथं वा[26] तस्यौ-

१ निरस्वभावत्वाभावे। २ घटस्य। ३ कपालस्य। ४ घटस्य। ५ नैव। ६ साधने। ७ अविनाभावाभावः। ८ स्वतः। ९ भावान्तररहितकारणमात्रजन्यत्वस्य। १० विपर्यय। ११ ज्ञानाभावः स्वप्नावस्थायाम्। १२ अज्ञानस्य ज्ञानभावरूपतया स्वतःसिद्धत्वान्न तत्र काचिदपेक्षा। १३ भावरूपत्वात्। १४ संशयविपर्ययरूपस्य। १५ त्रिपु मध्ये। १६ काचकामलादिदोषदूषिताच्चक्षुषः। १७ ग्रन्थस्य। १८ अनुमानस्य प्रामाण्ये गुणानां व्यापारो न दृष्टो यतः। १९ संशयविपर्यय। २० कारणेन। २१ प्रामाण्यम्। २२ अबाधित आस्ते। २३ परेण। २४ गुणाभावरूपत्वाद्दोषाणां दोषाभाव एव च गुणः। २५ यथा गुणेभ्यो दोषाणामभावः। २६ किञ्च।

1 "दोषाभावो हि पर्युदासवृत्त्या गुणात्मक एव भवेत्, ततश्च तत्परिज्ञानमपि गुणज्ञानात्मकं प्राप्नोति।" तत्त्वसं० पं० पृ० ७९९। न्यायकुमु० पृ० १९८। सन्मति० टी० पृ० १०। स्या० रत्ना० पृ० २४८।

त्सर्गिकत्वम् दुष्टकारणप्रभवासत्यप्रत्ययेष्वभावात्? अप्रामाण्यस्य चौत्सर्गिकत्वमस्तु दोषाणां गुणापगमे व्यापारात्। भवतु वा भावाद्भिन्नोऽभावः; तथाप्यस्य प्रामाण्योत्पत्तौ व्याप्रियमाणत्वात्कथं तत्स्वतः? न चाभावस्याऽजनकत्वम्, कुड्याद्यभावस्य परभागा-
५ वस्थितघटादिप्रत्ययोत्पत्तौ जनकत्वप्रतीतेः, प्रमाणपञ्चकाभावस्य चाभावप्रमाणोत्पत्तौ।

योपि-यथार्थत्वायथार्थत्वे विहायोपलम्भसामान्यस्यानुपलम्भः-सोपि विशेषनिष्ठत्वात्तत्सामान्यस्य युक्तः। न हि निर्विशेषं गोत्वादिसामान्यमुपलभ्यते गुणदोषरहितमिन्द्रियसामान्यं वा,

---

१ नैसर्गिकत्वम्। २ औत्सर्गिकत्वस्य। ३ किञ्च। ४ कुतः। ५ निराकरणे नाशे। ६ गुणरूपात्। ७ गुणेभ्यो भिन्नो दोषाणामभाव इत्यर्थः। ८ प्रामाण्यं प्रति। ९ प्रमिति। १० न हि सर्वथा यथार्थत्वायथार्थत्वविशेषाद्भिन्नमुपलम्भसामान्यम्।

---

1 "तस्माद्गुणेभ्यो दोषाणामभावात्तदभावतः।
अप्रामाण्यद्वयासत्त्वं तेनोत्सर्गोऽनपोदितः॥ ३०५७॥
सर्वत्रैवं प्रमाणत्वं निश्चितं चेदिहाप्यसौ।
पूर्वोदितो दोषगणः प्रसक्ता चानवस्थितिः। ३०५८॥
तस्मादेव च ते न्यायादप्रामाण्यमपि स्वतः।
प्रसक्तं शक्यते वक्तुं यस्मात्तत्राप्यदः स्फुटम्॥ ३०६६॥
तस्माद्दोषेभ्यो गुणानामभावस्तदभावतः।
प्रमाणरूपनास्तित्वं तेनोत्सर्गोऽनपोदितः॥ ३०६७॥"

तत्त्वसं० पृ० ८००। न्यायकुमु० पृ० १९८। सन्मति० टी० पृ० ९।

2 "(पूर्वपक्षः) यदि हि यथार्थत्वायथार्थत्वरूपद्वयरहितमेव किञ्चिदुपलब्ध्याख्यं कार्यं भवेत् तदा कार्यत्रैविध्यमध्यवसीयेत यदुत यथार्थोपलब्धेर्गुणवन्ति कारकाणि अयथार्थोपलब्धेर्दोषकलुषितानि उभयरूपरहितायाः पुनरुपलब्धेः स्वरूपावस्थितान्येवेति, नत्वेवमस्ति, द्वेधा हीयमुपलब्धिरनुभूयते यथार्था चायथार्था च। तत्र अयथार्थोपलब्धिस्तावत् दुष्टकारणजन्यैव संवेद्यते। यथाहि-दुष्टकारणकलापाद्दुःशिक्षितकुलालादेः कुटिलकलशादिकार्यमवलोक्यते तथा तिमिरादिदोषदुष्टान्नयनादिकारणकदम्बकात् कुमुदबान्धवद्वितयप्रत्ययादिका अयथार्थोपलब्धिरपि, अत एव उत्पत्तौ दोषापेक्षत्वादप्रामाण्यं परत एवेति कथ्यते। तदित्थमयथार्थोपलब्धौ दुष्टकारणजन्यत्वेन प्रसिद्धायामिदानीं तृतीयकार्याभावात् यथार्थोपलब्धिः स्वरूपावस्थितेभ्य एव कारणेभ्योऽवकल्प्यते इति न गुणकल्पनायै सा प्रभवति···(पृ० २४३) (उत्तरपक्षः-) यत्पुनरुक्तम्-द्वेधा हीयमुपलब्धिरनुभूयते यथार्था च अयथार्था चेति; तत्र न विप्रतिपद्यामहे। न हि यथार्थत्वायथार्थत्वे विहाय निर्विशेषमुपलब्धिसामान्यमुपपद्यते विशेषनिष्ठत्वात् सामान्यस्य, न खलु शाबलेयबाहुलेयादिविशेषविकलं गोत्वादिसामान्यं प्रतीयते येनेदमुपलब्धिसामान्यं यथार्थत्वायथार्थत्वविशेषरहितं प्रतीयेत···" स्या० रत्ना० पृ० २४६।

येनोपलम्भसामान्येऽप्ययं पर्यनुयोगः स्यात् । लोकं च प्रमाणयतोऽर्थं परतः प्रतिपत्तव्यम् । सुप्रसिद्धो हि लोकेऽप्रामाण्ये दोषावष्टब्धचक्षुषो व्यापारः, प्रामाण्ये नैर्मल्यादियुक्तस्य, 'यत्पूर्वं दोषावष्टब्धमिन्द्रियं मिथ्याप्रतिपत्तिहेतुस्तदेवेदानीं नैर्मल्यादियुक्तं सम्यक्प्रतिपत्तिहेतुः, इति प्रतीतेः । ५

यच्चोच्यते-कंचिन्निर्मलमपीन्द्रियं मिथ्याप्रतीतिहेतुरन्यत्रारक्तादिस्वभावं सत्यप्रतीतिहेतुः, तत्रापि प्रतिपत्तुर्दोषः स्वच्छनील्यादिमले निर्मलाभिप्रायात् । अनेकप्रकारो हि दोषः प्रकृत्यादिभेदात्, तदभावोपि भावान्तरस्वभावस्तथाविधस्तत एव । न चोत्पन्नं सद्विज्ञानं प्रामाण्ये नैर्मल्यादिकमपेक्षते येनानयोर्भेदः स्यात् । १० गुणवच्चक्षुरादिभ्यो जायमानं हि तदुपात्तप्रामाण्यमेवोपजायते ।

अर्थतथाभावपरिच्छेदसामर्थ्यलक्षणप्रामाण्यस्य स्वतो भावाभ्युपगमे च अर्थान्यथात्वपरिच्छेदसामर्थ्यलक्षणाप्रामाण्यस्याप्यविद्यमानस्य केनचित्कर्तुमशक्तेः स्वतो भावोऽस्तु ।

कथं चैवं वादिनो ज्ञानरूपतात्मन्यविद्यमानेन्द्रियैर्जन्यते? तस्या- १५

---

१ विशेषरहितगोत्वादिसामान्योपलम्भप्रकारेण । गुणदोषरहितेन्द्रियसामान्योपलम्भप्रकारेण च । २ अपि शब्दोत्र एवकारार्थे । ३ यतो यथार्थत्वायथार्थत्वे विहायेत्यादिः । ४ उपलम्भसामान्यस्यानुपलम्भलक्षणः । ५ अपि तु विशेषेप्ययं पर्यनुयोगो ज्ञातव्यः । ६ प्रामाण्यमप्रामाण्यं । ७ चक्षुषः । ८ नरे । ९ पुरुषान्तरे । १० पुरुषस्य । ११ निर्मल इति । १२ वातपित्तादि । १३ नैर्मल्यादिगुण । १४ अनेकप्रकारः । १५ गुणम् । १६ कालभेदः । १७ ज्ञानं कर्तृ । १८ न हि स्वतोऽसती शक्तिरित्यस्य दोषमाह । १९ परेण । २० स्वाश्रयकारणे । २१ कारणेन । २२ यत्कारणेऽविद्यमानं तत्स्वत एव जायते इत्येवंवादिनः । २३ घटाद्याकारविशेषितज्ञानरूपता ।

---

1 "यतो यदि लोकव्यवहारसमाश्रयणेन प्रामाण्याप्रामाण्ये व्यवस्थाप्येते तदा अप्रामाण्यवत् प्रामाण्यमपि परतो व्यवस्थापनीयम्..." सन्मति० टी० पृ० ९ ।

2 "किञ्चाप्रामाण्यमप्येवं स्वत एव प्रसज्यते ।
नहि स्वतोऽसतस्तस्य कुतश्चिदपि संभवः ॥ २८४३ ॥

...तथाह्यप्रामाण्यमपि विपरीतार्थपरिच्छेदोत्पादिका शक्तिः, शक्तेश्च विज्ञानाश्रितायाः कालत्रयेऽप्यकरणात् प्रामाण्यवदप्रामाण्यात्मिका शक्तिः स्वत एव प्रसज्येत ।" तत्त्वसं० पं० पृ० ७५५ ।

"एवमभिधानेऽयथावस्थितार्थपरिच्छेदशक्तेरप्यप्रामाण्यरूपाया असत्याः केनचित्कर्तुमशक्तेस्तदपि स्वतः स्यात् ।" सन्मति० टी० पृ० ९ ।

3 "किंच, यद्यात्मन्यविद्यमानं रूपं कारणैर्नाधीयते कार्ये तदा कथमिन्द्रियादयो ज्ञाने (ज्ञान) रूपतामात्मन्यसतीमादधति विज्ञाने ? यथाऽविद्यमानापि सा तैराधीयते अर्थपरिच्छेदशक्तिं किन्नादधीरन् ?" तत्त्वसं० पं० पृ० ७५३ । सन्मति० टी० पृ० ९ ।

स्तत्राविद्यमानत्वेप्युत्पत्त्युपगमेऽर्थग्रहणशक्त्या कोपराधः कृतो येनास्यास्ततः समुत्पादो नेष्यते? न चेमाः शक्तयः स्वाधारेभ्यः समासादितव्यतिरेकाः येन स्वाधाराभिमतविज्ञानवत् कारणेभ्यो नोदयमासादयेयुः। पाश्चात्यसंवादप्रत्ययेन प्रामाण्य-
५ स्याजन्यत्वात्स्वतो भावेऽप्रामाण्यस्यापि सोस्तु। न खलूत्पन्ने विज्ञाने तदप्युत्तरकालभाविविसंवादप्रत्ययाद्भवति।

यच्चोक्तम्-'लब्धात्मनां स्वकार्येषु प्रवृत्तिः स्वयमेव तु' तदप्युक्तिमात्रम्; यथावस्थितार्थव्यवसायरूपं हि संवेदनं प्रमाणम्, तस्यात्मलाभे कारणापेक्षायां काऽन्या स्वकार्ये प्रवृत्तिर्या स्वयमेव
१० स्यात्? घटस्य तु जलोद्वहनव्यापारात्पूर्वं रूपान्तरेणापि स्वहेतोरुत्पत्तेर्युक्ता मृदादिकारणनिरपेक्षस्य तत्र प्रवृत्तिः प्रतीतिनिबन्धनत्वाद्वस्तुव्यवस्थायाः। विज्ञानस्य तूत्पत्त्यनन्तरमेव विनाशोपगमात्कुतो लब्धात्मनो वृत्तिः स्वयमेव स्यात्? तदुक्तम्—

"न हि तत्क्षणमप्यास्ते जायते वाऽप्रमात्मकम्।
१५ येनार्थग्रहणे पश्चाद्व्याप्रियेतेन्द्रियादिवत् ॥ १ ॥
तेन जन्मैव बुद्धेर्विषये व्यापार उच्यते।

१ परेण। २ कर्तृभूतया। ३ सापि ज्ञानेऽविद्यमाना इन्द्रियैर्जन्यताम्। ४ परेण। ५ ज्ञानेभ्यः। ६ प्राप्तभेदाः। ७ आक्षेपे। ८ यथा शक्त्या आधारीभूतविज्ञानं कारणेभ्यो न तथेमा इत्यर्थः। ९ परेणाङ्गीकृते। १० परेण। ११ प्रामाण्यं कथ्यते। १२ आक्षेपोक्तिः। १३ प्रामाण्य। १४ अर्थपरिच्छित्तिरूपे प्रवृत्तिरूपे च। १५ न कापि। १६ रिक्ततारूपेण। १७ जलाहरणलक्षणे स्वकार्ये। १८ परमते। १९ न हि। २० अप्रमिति। २१ आक्षेपे। २२ ज्ञानस्य लक्षणान्तरे अवस्थानप्रकारेण अप्रमात्मकभवनप्रकारेण। २३ उत्पत्त्यनन्तरम्। २४ आत्मनः। २५ क्षणमपि नास्ति अप्रमात्मकं वा न जायते येन प्रकारेण। २६ व्यापृतिः।

1 "अप्रामाण्यमपि चैवं स्वतः स्यात्, नहि तदपि उत्पन्ने ज्ञाने विसंवादप्रत्ययादुत्तरकालभाविनः तत्रोत्पद्यते इति कस्यचिदभ्युपगमः।"

सन्मति० टी० पृ० १०।

2 "ततश्च स्वार्थावबोधशक्तिरूपप्रामाण्यात्मलाभे चेत् कारणापेक्षा कान्या स्वकार्ये प्रवृत्तिर्या स्वयमेव स्यात्...घटस्य जलोद्वहनव्यापारात्पूर्वं रूपान्तरेण स्वहेतोरुत्पत्तेर्युक्तं मृदादिकारणनिरपेक्षस्य स्वकार्ये प्रवृत्तिरिति विसदृशमुदाहरणम्।"

सन्मति० टी० पृ० १०।

3 "यत्तु ज्ञानं त्वयापीष्टं जन्मानन्तरमस्थिरम्।
लब्धात्मनोऽसतः पश्चाद्व्यापारस्तस्य कीदृशः ॥ २९२२ ॥

तत्त्वसं० पृ० ७७०।

तदेवं च प्रमारूपं तद्वती करणं च धीः ॥ २ ॥"
[मी० श्लो० सू० २ श्लो० ५५-५६] इति ।

किञ्च, प्रमाणस्य किं कार्यं यत्रास्य प्रवृत्तिः स्वयमेवोच्यते-यथार्थपरिच्छेदः, प्रमाणमिदमित्यवसायो वा? तत्राद्यविकल्पे 'आत्मानमेव करोति' इत्यायातम्, तच्चायुक्तम्; स्वात्मनि क्रियाविरोधात् । नापि प्रमाणमिदमित्यवसायः; भ्रान्तिकारणसद्भावेन क्वचित्तदभावात्, क्वचिद्विपर्ययदर्शनाच्च ।

अनुमानोत्पादकहेतोस्तु साध्याविनाभावित्वमेव गुणो यथा तद्वैकल्यं दोषः । साध्याविनाभावस्य हेतुस्वरूपत्वाद्गुणरूपत्वाभावे तद्वैकल्यस्यापि हेतोः स्वरूपविकलत्वाद्दोषता मा भूत् ।

आगमस्य तु गुणवत्पुरुषप्रणीतत्वेन प्रामाण्यं सुप्रसिद्धम्, अपौरुषेयत्वस्यासिद्धेः, नीलोत्पलादिषु दहनादीनां वितथप्रतीतिजनकत्वोपलम्भेनानैकान्तात्, परस्परविरुद्धभावनानियोगाद्यर्थेषु

१ एवं चेद्विज्ञानस्य करणरूपता क्रियारूपता न स्यादित्युक्ते आह । २ जन्मैव । ३ परिच्छित्ति । ४ स्वज्ञप्ति । ५ तयोर्मध्ये । ६ स्वस्वरूपम् । ७ तत्र प्रवर्तनात्तस्य । ८ उत्पत्तिलक्षणायाः । ९ सदोषनयन । १० सत्यजलज्ञाने प्रमाणस्वभावे । ११ भ्रान्तज्ञाने प्रमाणमित्यध्यवसायदर्शनात् । १२ शब्दस्य । १३ पुनः । १४ "पूर्वाचार्यो हि धात्वर्थं वेदे भट्टस्तु भावनाम् । प्राभाकरो नियोगं तु शङ्करो विधिमब्रवीत्" । १५ आगमो धर्मी प्रामाण्यं भवतीति साध्यम् । १६ स्वर्ण । १७ यदपौरुषेयं तत्प्रमाणमित्युक्तेऽनेकान्तात् । १८ विधि । १९ बोधे ।

1 "नच ज्ञानस्य किञ्चित्कार्यमस्ति यत्र व्याप्रियेत । स्वार्थपरिच्छेदात्मकमस्तीति चेन्न; ज्ञानपर्यायत्वादस्य आत्मानमेव करोतीति सुव्याहृतमेतत्! प्रमाणमेतत् इति निश्चयजननं स्वकार्यमिति चेन्न; क्वचिदनिश्चयाद्विपर्ययदर्शनाच्च ।" तत्त्वसं० पं० पृ० ७७० । सन्मति० टी० पृ० ११ ।

2 "अविनाभावनिश्चयस्यैव गुणत्वात् तदनिश्चयस्य विपरीतनिश्चयस्य च दोषत्वात् ।" सन्मति० टी० पृ० ११ ।

3 "पुनरप्यपौरुषेयस्यानैकान्तिकतां प्रतिपादयन्नाह—

न नराकृतमित्येव यथार्थज्ञानकारि तु ।
दृष्टा हि दाववह्न्यादेर्मिथ्याज्ञानेऽपि हेतुता ॥ २४०३ ॥

नहि पुरुषदोषोपधानादेवार्थेषु ज्ञानविभ्रमः, तद्रहितानामपि दाववह्न्यादीनां नीलोत्पलादिषु वितथज्ञानजननात् । दावो वनगतो वह्निः, स पुनर्यः स्वयमेव वेण्वादीनां सङ्घर्षसमुद्भूतः स इह व्यभिचारविषयत्वेन द्रष्टव्यः । यस्त्वरणिनिर्मथनादिपुरुषैर्निर्वृत्तं तत्रापौरुषेयत्वासंभवात् ततो न हेतोर्व्यभिचार इति भावः । आदिशब्देन मरीच्यादिपरिग्रहः । तामेव मिथ्याज्ञानहेतुतां दर्शयन्नाह—

प्रामाण्यप्रसङ्गाच्च । निखिलवचनानां लोके गुणवत्पुरुषप्रणीतत्वेन प्रामाण्यप्रसिद्धेः, अत्र[1]अन्य[2]थापि तत्परिकल्पने प्रतीतिविरोधाच्च ।

अपि च अपौरुषेयत्वेऽप्यागमस्य न स्वतोऽर्थे प्रतीतिजनकत्वम् [3]सर्वदा तत्प्रसङ्गात् । नापि पुरुषप्रयत्नाभि[4]व्यक्तस्य; तेषां रागादिदोषदुष्टत्वेनोपगमात् तत्कृता[5]भिव्यक्तेर्यथार्थतानुपपत्ते[6]ः । तथा[7]च अप्रामाण्यप्रसङ्गभयादपौरुषेयत्वाभ्यु[8]पगमो गजस्नानमनुकरोति । तदुक्तम्—

"[9]असंस्कार्यतया पुंभिः सर्वथा स्यान्निरर्थता[10] ।
संस्[11]कारोपगमे व्यक्तं गजस्नानमिदं भवेत् ॥ १ ॥"
[प्रमाणवा० १।२३२]

तन्न प्रामाण्यस्योत्पत्तौ[12] परानपेक्षा ।

[13]नापि ज्ञप्तौ । सा हि निर्निमित्ता, सन्नि(सनि)मित्ता वा ? न तावन्निर्निमित्ता[14]; प्रतिनियतदेशकालस्वभावाभावप्रसङ्गात् । सनिमित्तत्वे किं स्व[15]निमित्ता, अन्यनिमित्ता वा ? न तावत्स्वनिमित्ता, [16]स्वसंविदितत्वानभ्युपगमात्[17] । अन्यनिमित्तत्वे तत्किं प्रत्यक्षम्, उतानुमानम् ? न तावत्प्रत्यक्षम्; तस्य तत्र[18] व्यापाराभावात् । तद्धीन्द्रियसंयुक्ते विषये तद्व्यापारादुदय[19]मासादयत्प्रत्यक्षव्यपदेशं लभते । न च प्रामाण्येनेन्द्रियाणां सम्प्रयोगो[20] येन तद्व्यापारजनितप्रत्यक्षेण तत्[21]प्रतीयेत । नापि मनोव्यापारज[22]प्रत्यक्षेण; एवंविधा[23]नुभवा[24]भावात् ।

---

१ वेदे । २ अपौरुषेयत्वेन । ३ अन्यथा । ४ ज्ञातस्य । ५ अपौरुषेयत्वस्य । ६ अपौरुषेयस्य वेदस्य । ७ वेदस्य पुरुषकृताभिव्यक्तितोऽर्थे प्रतीतिजनकत्वे च । ८ तव परस्य । ९ वेदस्य । १० निश्चिता । ११ पुंभिः । १२ गुण । १३ मीमांसकमतप्रक्षेपं करोति । १४ अन्यथा । १५ प्रामाण्यमात्मानं स्वेनैव जानाति । १६ अत्यन्तपरोक्षत्वाद्विज्ञानस्य । १७ मीमांसकैः । १८ प्रामाण्यज्ञप्तौ । १९ जायमानम् । २० सन्निकर्षः । २१ अपि तु न । २२ तत्प्रतीयेत । २३ प्रामाण्यज्ञप्तिरूप । २४ प्रामाण्यज्ञप्तेः ।

रक्तं नीलसरोजं हि वह्न्यालोके स हीष्यते ।
वह्न्यादिः कृतकत्वाच्चेन्न हेतुरुपपद्यते ॥ २४०४ ॥

तत्त्वसं० पं० पृ० ६५६ ।

1 "यतो निश्चयस्तत्र भवन् किं निर्निमित्तः उत सनिमित्तः इति कल्पनाद्वयम् । तत्र न तावन्निर्निमित्तः; प्रतिनियतदेशकालस्वभावाभावप्रसङ्गात् । सनिमित्तत्वेऽपि किं स्वनिमित्त उत तद्व्यतिरिक्तनिमित्तः ?" सन्मति० टी० पृ० १३ ।

नाप्यनुमानतः; लिङ्गाभावात्। अ[१]थार्थप्रा[२]कट्यं लिङ्गम्; तत्किं[1] यथार्थत्वविशेषणविशिष्टम्, निर्वि[३]शेषणं वा? प्रथमपक्षे [४]तस्य यथार्थत्वविशेषणग्रहणं [५]प्रथमप्रमाणात्, [६]अन्यस्माद्वा? आद्यप[७]क्षे [८]परस्पराश्रयः दोषः। द्वितीयेऽनवस्था। निर्विशे[९]षणात्तत्प्रतिपत्तौ चातिप्रस[१०]ङ्गः। [११]प्रत्यक्षानुमानाभ्यां [१२]तत्प्रामाण्यनिश्चये स्वतः प्रामाण्यव्याघातश्च।

[१३]यच्च[2] सं[१४]वादात्पूर्वस्य प्रामाण्ये चक्रक[१५]दूषणम्; तदप्यसङ्गतम्; न खलु संवाद[१६]त्पूर्वस्य प्रामाण्यं निश्चित्य [१७]प्रवर्त्तते, किन्तु वह्निरूपदर्शने सत्येकदा [१८]शीतपीडितोऽन्या[१९]र्थं तद्देशमु[२०]पसर्पन् कृपालुना वा केनचित्तद्देशं वह्नेरानयने तत्स्पर्शवि[२१]शेषमनुभूय तद्रूपस्पर्शयोः [२२]सम्बन्धमवगम्यानभ्यासदशायां 'ममायं [२३]रूपप्रतिभासोऽभि[२४]मतार्थक्रियासाधनः एवंवि[२५]धप्रतिभासत्वात्पूर्वोत्पन्नैवंविधप्रतिभासवत्' इत्यनुमाना[२६]त्साध[२७]ननिर्भासिज्ञानस्य प्रामाण्यं निश्चित्य प्रवर्तते। [3]कृषीवलादयोपि ह्यनभ्यस्तबीजादिविषये प्रथमतरं तावच्छरावा-

१ प्राकट्यं प्रामाण्याविनाभावि भवति तच्च यत्र ज्ञानेस्ति तत्र प्रामाण्यमिति। २ प्रमाणप्रामाण्यमस्ति यथार्थप्राकट्यात्। ३ प्राकट्यमात्रम्। ४ लिङ्गस्य। ५ प्रथमजलज्ञानात्। ६ प्रमाणात्। ७ प्रमाणभूतप्रथमज्ञानात्साधनस्य यथार्थत्वविशेषणग्रहणं गृहीतविशेषणविशिष्टात्साधनात्प्रथमज्ञानस्य प्रामाण्यनिश्चय इति। ८ लिङ्गात्। ९ प्रामाण्यज्ञप्तौ। १० मिथ्याज्ञानेऽपि प्रामाण्यं स्यादित्यर्थः। ११ पूर्वज्ञानग्राहि द्वितीयं प्रत्यक्षम्। १२ पूर्वज्ञानस्य। १३ किञ्च। १४ अर्थक्रियारूपात्। १५ परोक्तम्। १६ जलादिज्ञानस्य। १७ नरः। १८ नरः। १९ पुष्पार्थं। २० गच्छन्। २१ उष्णस्पर्शम्। २२ अविनाभावम्। २३ भास्वर। २४ शीतापहरणलक्षण। २५ पिङ्गाङ्गभासुररूप। २६ शीतापनोदस्य साधनमग्निः। २७ जल।

1 "तद्धि फलं निर्विशेषणं वा स्वकारणस्य ज्ञातृव्यापारस्य प्रामाण्यमनुमापयेद्, यथार्थत्वविशिष्टं वा?" न्यायमं० पृ० १६८। न्यायकुमु० पृ० २०१। सन्मति० टी० पृ० १४। स्या० रत्ना० पृ० २५६।

2 "यच्च संवादज्ञानात् साधनज्ञानप्रामाण्यनिश्चये चक्रकदूषणमभ्यधायि; तदसङ्गतम्; यदि हि प्रथममेव संवादज्ञानात् साधनज्ञानस्य प्रामाण्यं निश्चित्य प्रवर्तेत तदा स्यात्तद्दूषणम्, यदा तु वह्निरूपदर्शने सत्येकदा शीतपीडितोऽन्यार्थं तद्देशमुपसर्पंस्तत्स्पर्शमनुभवति कृपालुना वा केनचित्तद्देशं वह्नेरानयने; तदाऽसौ वह्निरूपदर्शनज्ञानयोः सम्बन्धमवगच्छति एवं स्वरूपो भावः एवंभूतप्रयोजननिवर्तकः इति... ।"
सन्मति० टी० पृ० १६। स्या० रत्ना० पृ० २५५।

3 "कृषीवलादयोऽपि हि अनभ्यस्ते बीजादिगोचरे प्रथमम् विहितमधुरनीरावसिक्तसुकुमारमृदि शरावादौ कतिपयशाल्यादिबीजकणगणावपनादिना बीजाबीजे

दावल्पतरबीजवपनादिना बीजाबीजनिर्धारणाय प्रवर्त्तन्ते, पश्चाद्दृष्टसाधर्म्यात्परिशिष्टस्य बीजाबीजतया निश्चितस्योपयोगाय परिहाराय च अभ्यस्तबीजादिविषये तु निःसंशयं प्रवर्त्तन्ते।

यच्चाभ्यधायि[1]-संवादप्रत्ययात्पूर्व[2]स्य प्रामाण्या[3]वगमेऽनवस्था तस्याप्यपरसंवादापेक्षा[4]ऽविशेषात्[5]; तदप्यभिधानमात्रम्; तस्य संवादरूपत्वेनापरसंवादापेक्षाभावात्[6]। प्रथमस्यापि संवादापेक्षा मा भूदित्यप्यसमीचीनम्; तस्यासंवादरूपत्वात्[8], अतः संवादकद्वारेणैवास्य प्रामाण्यं निश्चीयते।

अर्थक्रिया[11]ज्ञानं तु[12] साक्षादविसंवाद्य[13]र्थक्रियालम्ब[14]नत्वान्न तथा[15] प्रामाण्यनिश्चयभाक्[16]। तेन[17] 'कस्यचित्तु यदीष्येत' इत्यादि प्रलापमात्रम्। न चार्थक्रियाज्ञानस्याप्यवस्तुवृत्तिशङ्कायामन्यप्रमाणापेक्षयानवस्थावतारः, । अस्यार्थाभावेऽदृष्टत्वेन निरारेकत्वात्[21]। यथैव हि[2]-किं 'गुण[22]व्यतिरिक्तेन गुणिनाऽर्थक्रिया सम्पादिता[23]

१ परेण। २ ज्ञानस्य। ३ जैनैः। ४ संवादप्रत्ययो धर्मी अपरसंवादापेक्षो भवतीति साध्यं प्रत्ययत्वात्। ५ प्रत्ययत्वेन। ६ जलादिज्ञानस्य। ७ पूर्वज्ञानविषये उत्तरज्ञानस्य वृत्तिः संवादः। ८ असंवादरूपत्वं यतः। ९ प्रेक्षावद्भिः। १० संवाद। ११ स्नानपानावगाहनादि। १२ पुनः। १३ यसः (कर्मधारयसमासः)। १४ बसः। १५ अविसंवादापेक्षाप्रकारेण। १६ भवति। १७ कारणेन। १८ स्वत एव प्रमाणता। प्रथमस्य तथाभावे प्रद्वेषः केन हेतुना। १९ अपिशब्दात्साधनज्ञानस्य ग्रहणम्। २० विद्यमानेपि स्नानादिके अविद्यमानस्नानादिलक्षणाऽवस्तुवृत्तिशङ्कायाम्। २१ निःसंशयत्वात्। २२ रूपस्पर्शादि। २३ योगः।

निर्धार्य पश्चाद्दृष्टसाधर्म्येणानुमानात् परिशिष्टस्य बीजाबीजतया निश्चितस्योपादानाय हानाय च यतन्ते। तदनन्तरं पुनरभ्यस्ते बीजादिगोचरे परिदृष्टसाधर्म्यादिलिङ्गनिरपेक्षा एव निःशङ्कं कीनाशाः केदारेषु बीजवपनाय प्रवर्तन्ते।" स्या० रत्ना० पृ० २५५।

1 "उच्यते वस्तुसंवादः प्रामाण्यमभिधीयते।
तस्य चार्थक्रियाभ्यासज्ञानादन्यन्न लक्षणम्॥ २९५९॥
अर्थक्रियावभासं च ज्ञानं संवेद्यते स्फुटम्।
निश्चीयते च तन्मात्रभाव्यामर्शनचेतसा॥ २९६०॥
अतस्तस्य स्वतः सम्यक् प्रामाण्यस्य विनिश्चयात्।
नोत्तरार्थक्रियाप्राप्तिप्रत्ययः समपेक्ष्यते॥ २९६१॥
ज्ञानप्रमाणभावे च तस्मिन् कार्यावभासिनि।
प्रत्यये प्रथमेप्यस्माद्धेतोः प्रामाण्यनिश्चयः॥ २९६२॥

तत्त्वसं० पृ० ७७८। सन्मति० टी० पृ० १४।

2 "यथा अर्थक्रिया किमवयवव्यतिरिक्तेन अवयविनाऽर्थेन निष्पादिता, उताव्यतिरिक्तेन, आहोस्विदुभयरूपेण, अथानुभयरूपेण, किंवा त्रिगुणात्मकेन, परमाणुसमू-

उता[1]व्यतिरिक्तेनो[2]भयरूपेणा[3]नुभय[4]रूपेण, त्रि[5]गुणा[6]त्मना[7] वार्थे[8]न, प[9]रमाणुसमूहलक्षणेन वा' इ[10]त्याद्यर्थक्रि[11]यार्थिनां चिन्ताऽनुपयोगिनी निष्पन्नत्वाद्वाञ्छितफ[12]लस्य, तथे[13]यमपि 'किं वस्तुभूतायामवस्तुभूतायां वार्थक्रियायां तत्संवेदनम्' इति । वृद्धिच्छेदा[14]दिकं हि फलमभिलषितम्, तच्चेन्निष्पन्नं नृद्धि(तृद्धि)योगिज्ञानानु[15]भवे किं तच्चिन्ता[16]साध्यम् ?

न[17] च स्वप्नार्थक्रियाज्ञानस्यार्थाभावेपि दृष्टत्वाज्जाग्रदर्थक्रियाज्ञानेपि तथा शङ्का; तस्यैतद्वि[18]परीतत्वात् । स्वप्नार्थक्रियाज्ञानं हि सबाधम्ः तद्द्रष्टुरेवोत्तरकालमन्यथाप्रतीतेः न जाग्रद्दशाभा[19]वीति ।

---

१ साङ्ख्यचार्वाकौ । २ व्यतिरिक्ताव्यतिरिक्त । ३ जैनमीमांसकौ । ४ बौद्धविशेषः । ५ सत्त्वरजस्तमोलक्षणा गुणाः । ६ साङ्ख्यः । ७ प्रधानेन । ८ बौद्धः । ९ अवयवी । १० यौगः । ११ नृणाम् । १२ स्नानपानावगाहनादेः । १३ अर्थक्रियाज्ञानचिन्ता । १४ अङ्गमलापहार । १५ पुरुषस्य । १६ पुरुषेण । १७ का । १८ अर्थक्रियाज्ञानम् । १९ न सबाधम् ।

त्मकेन वा, अथ ज्ञानरूपेण, आहोस्वित् संवृतिरूपेण इत्यादिचिन्ता अर्थक्रियामात्रार्थिनां निष्प्रयोजना निष्पन्नत्वाद्वाञ्छितफलस्य, तथेयमपि किं वस्तुसत्यामर्थक्रियायां तत्संवेदनज्ञानमुपजायते आहोस्विदवस्तुसत्याम् इति । तृड्दाहविच्छेदादिकं हि फलमभिवाञ्छितम्, तच्चाभिनिष्पन्नम्, तद्वियोगिज्ञानस्य स्वसंविदितस्योदये इति तच्चिन्ताया निष्फलत्वम् ।" सन्मति० टी० पृ० १४ ।

1 "तथाहि लोके सद्धि (वृद्धि) च्छेदादिकं फलमभिवाञ्छितम् तच्चाह्लादपरितापादिरूपज्ञानाविर्भावादेव निर्वृत्तमित्येतावतैवाहितसन्तोषा निवर्तन्ते जना इति स्वत एव सिद्धिरुच्यते ।" तत्त्वसं० पं० पृ० ७७८ ।

2 "ननु चार्थक्रियाभासि ज्ञानं स्वप्नेऽपि विद्यते ।
न च तस्य प्रमाणत्वं तद्धेतोः प्रथमस्य च ॥ २९८० ॥
नैवं भ्रान्ता हि सावस्था सर्वा बाह्यानिबन्धना ।
न बाह्यवस्तुसंवादस्तास्ववस्थासु विद्यते ॥ २९८१ ॥
एवमर्थक्रियाज्ञानात् प्रमाणत्वविनिश्चये ।
नानवस्था पराकाङ्क्षाविनिवृत्तेरिति स्थितम् ॥ २९८६ ॥

किञ्च, प्रमाणमविसंवादिज्ञानमित्यनेन अर्थक्रियाधिगमलक्षणफलप्रापकहेतोर्ज्ञानस्येदं लक्षणमुच्यते, ततश्च फलज्ञाने लक्षणानवतारात् कथं तस्यापि प्रामाण्यमवसीयते इत्यस्य चोद्यस्यावकाशः कथं भवेत्? तथाहि–अङ्कुरस्य हेतुर्बीजम् इति लक्षणे सति अङ्कुरस्यापि कथं बीजत्वमिति किं विदुषां प्रश्नो जायते? यथा च बीजस्य तद्भावोऽङ्कुरदर्शनादवगम्यते तथा प्रमाणस्यापि तद्भावोऽर्थक्रियालक्षणफलदर्शनात् ।"
तत्त्वसं० पं० पृ० ७८४ । न्यायकुमु० पृ० २०२ । सन्मति० टी० पृ० १५ ।

यदि चात्रार्थक्रियाज्ञानमर्थमन्तरेण स्यात् किमन्यज्ज्ञानमर्थाव्यभिचारि यद्बलेनार्थव्यवस्था ?

अपि च, 'अर्थक्रियाहेतुर्ज्ञानं प्रमाणम्' इति प्रमाणलक्षणं तत्कथं फलेप्याशङ्क्यते ? यथा 'अङ्कुरहेतुर्बीजम्' इति बीजलक्षणस्याऽङ्कुरेऽभावात् नैवं प्रश्नः 'कथमङ्कुरे बीजरूपता निश्चीयते' इति, एवमत्रापि ।

यच्चेदमुक्तम् "श्रोत्रधीश्चाप्रमाणं स्यादितराभिरसङ्गतिः(तेः)।"
[मी० श्लो० सू० २ श्लो० ७७]

इति; तदप्ययुक्तम्; वीणादिरूपविशेषोपलम्भतस्तच्छब्दविशेषे शङ्काव्यावृत्तिप्रतीतेः कथमितराभिरसङ्गतिः ? श्रोत्रबुद्धेरर्थक्रियानुभवरूपत्वेन स्वतः प्रामाण्यसिद्धेश्च गन्धादिबुद्धिवत् । संशयाद्यभावान्नान्येन सङ्गत्यपेक्षा । यत्रैव हि संशयादिस्तत्रैव साऽपेक्षते नान्यत्र अतिप्रसङ्गात् ।

अथोच्यते अर्थक्रियाऽविसंवादात्पूर्वस्य प्रामाण्यनिश्चये मणिप्रभायां मणिबुद्धेरपि प्रामाण्यनिश्चयः स्यात्; तदप्यपर्यालोचिताभिधानम्; एवंभूतार्थक्रियाज्ञानान्मणिबुद्धेरप्रामाण्यस्यैव निश्च-

१ किञ्च । २ जाग्रद्दशाभाव्यर्थक्रियायाम् । ३ स्थितिः । ४ किन्तु नैव शङ्कनीयम् । ५ परेण । ६ अर्थक्रियाज्ञाने प्रमाणलक्षणाशङ्का कथं स्यात् । अर्थक्रियाज्ञानरूपे फले अर्थक्रियाहेतुतया प्रमाणता निश्चीयते कथमिति प्रश्नः स्यात् । ७ स्वग्रन्थे । ८ चक्षुरादिजनितधीभिः । ९ रूपादिज्ञानैः । १० अर्थस्य शब्दस्य क्रिया, उत्पद्यमानत्वं तस्यानुभवरूपत्वेन । ११ किञ्च । १२ स्पर्शरस । १३ अपरेण सजातीयेनार्थक्रियाज्ञानेन । १४ संवाद । १५ ज्ञाने । १६ स्यात् । १७ अन्यथा । १८ प्रतीयमानेपि स्वकीये सुखे अन्यापेक्षा स्यात् । १९ ज्ञानस्य । २० अर्थक्रियमाणे । २१ ता । २२ भिन्नदेशार्थसम्बद्धा ।

1 "...तस्माच्छ्रोत्रधीः प्रमाणं भवत्येव तदन्याभिश्चक्षुरादिमतिभिर्यथोक्तसम्बन्धसद्भावात्, तथाहि—दूराद् वीणादिशब्दश्रवणात् तदर्थिनो वेण्वादिशब्दसाधर्म्यादुपजातसंशयस्य पुंसः प्रवृत्तौ वीणारूपदर्शनाद्यः प्रागुपजातः संशयः किमयं वीणाध्वनिः उत वेणुगीतादिशब्द इति स व्यावर्तते । यत्र च देशे मृदङ्गादिप्रतिशब्दश्रवणात् प्रवृत्तस्य तदर्थाधिगतिर्न भवति तत्र विसंवादादप्रामाण्यं प्रत्येति ।" तत्त्वसं० पं० पृ० ८०३ ।

2 "यच्च शङ्खे पीतज्ञानं मणिप्रभायां मणिज्ञानं तदप्यप्रमाणमेव, तत्र यथार्थप्रतिभासावसाययोरभावात् । प्रतिभासवशाद्धि प्रत्यक्षस्य ग्रहणाग्रहणे तत्त्वर्थाविसंवादमात्रात् । नचात्र यथा स्वभावदेशकालावस्थितवस्तुप्रतिभासोऽस्ति नरा (वा?) देशकालः स एव भवति । देशकालयोरपि वस्तुस्वभावभेदकत्वात् ।" तत्त्वसं० पं० पृ० ७८२ । न्यायकुमु० पृ० २०२ ।

यात्तेर्न[1] संवादाभावात् । कुञ्चिकाविवरस्थायां हि मणिप्रभायां मणिज्ञानम्[2] अपर(अपवर)कान्तर्देशसम्बद्धे तु मणावर्थक्रियाज्ञानमिति भिन्नदेशार्थग्राहकत्वेन भिन्नविषययोः पूर्वोत्तरज्ञानयोः कथमविसंवादस्तिमिराद्याहित[3]विभ्रम[4]ज्ञानवत्[5]?

यच्चान्य[6]दुक्तम्—क्वचित्[7]कूटेऽपि जयतुङ्गे ज्ञानं प्रमाणं स्यात्कतिपयार्थक्रियादर्शनात्, तत्र[8] कूटे कूटज्ञानं प्रमाणमेवाऽकूटज्ञानं तु न प्रमाणं तत्संवादाभावात् । सम्पूर्णचेतनालाभो हि तस्या[9]र्थक्रिया न कतिपयचेतनाला[10]भ इति ।　　　　५

यच्चैकविषयं भिन्नविषयं वा संवाद[11]कमि[12]त्युक्तम्; तत्रैका[13]धारवर्त्तिरूपादीनां तादात्म्यप्रतिब[14]न्धेनान्योन्यं व्यभिचाराभावात् । जाग्रद्[15]दशारसादिज्ञानं रूपाद्यविनाभावि रसादिविषयत्वात् । भिन्नविषयत्वे[16]ऽप्या[17]शङ्कितविषयाभाव[18]स्य रूप[19]ज्ञानस्य प्रामाण्यनिश्चयात्मकम् । दृश्य[20]ते हि विभिन्नदेशाकारस्यापि वीणादे रूपविशेषदर्शने शब्दविशेषे शङ्काव्यावृत्तिः किं पुनर्नात्र[21]? अविनाभावो हि संवाद्यसंवादकभावनिमित्तं नान्यत्[22] ।　　　　१०　　१५

१ पूर्वज्ञानस्य । २ अभूत् । ३ जनित । ४ विभ्रमज्ञानस्य यथा भिन्नदेशसम्बन्धार्थक्रियाज्ञानरूपसंवादान्न प्रामाण्यम् । ५ शुक्तिकादौ रजतादिज्ञानं विभ्रमः । ६ परेण । ७ द्रङ्गे । ८ दूषणमुच्यते । ९ अकूटजयतुङ्गस्य । १० अयं । ११ पूर्वज्ञानस्य । १२ परेण । १३ मातु(लि)ङ्गादि । १४ सम्बन्धेन । १५ द्वितीयम् । १६ रूपरसज्ञानयोः । १७ जाग्रद्दशाभावि । १८ आद्यस्य जाग्रद्दशाभाविनः । १९ आद्यस्य । २० रूपादौ । २१ विभिन्नविषययोः रूपरसज्ञानयोः शङ्काव्यावृत्तिः कुत इत्युक्ते आह । २२ एकविषयत्वं भिन्नविषयत्वं वा ।

1 "एकसन्तानवर्तिनो विषयद्वयस्याविनाभावादन्यालम्बनमपि ज्ञानमन्यविषयस्य ज्ञानस्य प्रामाण्यं साधयिष्यति, नहि तौ रूपस्पर्शौ विनिर्भागेन वर्तेते एकसामग्र्यधीनत्वात् ।"　　　　तत्त्वसं. पं० पृ० ८०२ ।

2 "कश्चित्खलु समानजातीयं संवादकज्ञानं भवति, यथा देवदत्तस्य प्रथमं घटज्ञाने प्रवृत्ते यज्ञदत्तस्यापि तस्मिन्नेव घटे घटज्ञानम् ।...कश्चित्तु भिन्नजातीयमपि, संवादकज्ञानं भवति । यथा प्रथमस्य प्रवर्तकजलज्ञानस्य उत्तरकालभाविस्नानपानावगाहनाद्यर्थक्रियाज्ञानम् ।...भवति हि एकसन्तानप्रभवम् अन्धकारकलुषितालोकप्रभवस्य कुम्भज्ञानस्य उत्तरकालभाविनिस्तिमिरालोकप्रभवं तस्मिन्नेव कुम्भे कुम्भज्ञानम् । भिन्नविषयं तु एकसन्तानप्रभवं संवादकं यथा रथाङ्गमिथुनादेकतरदर्शनस्य अन्यतरदर्शनम् ।...न खलु निखिलं भिन्नविषयं संवेदनं संवादकमिति ब्रूमः । किंतर्हि? यत्र पूर्वोत्तरज्ञानगोचरयोः अविनाभावस्तत्रैव भिन्नविषयत्वेऽपि ज्ञानयोः संवाद्यसंवादकभाव इति ।...अविनाभावो हि संवाद्यसंवादकभावनिमित्तं नान्यत् ।" स्या० रत्ना० पृ० २५३ ।

संवादज्ञानं किं पूर्वज्ञानविषयं[1] तद्विषयं वा; इत्याद्यप्यसमीक्षिताभिधानम्; न खलु संवाद[2]ज्ञानं[3] तद्ग्राहित्वेनास्य प्रामाण्यं व्यवस्थापयति। किं तर्हि? तत्कार्यविशेषत्वेनाग्न्या[4]दिकमिव धूमादिकम्।

सर्वप्राणभृतां प्रामाण्ये सन्देहविपर्य[6]यासिद्धेश्च; इत्यप्ययुक्तम्; ५ प्रेक्षापूर्वकारिणो हि प्रमाणाप्रमाणचिन्तायामधिक्रियन्ते नेतरे[7]। ते च कासाञ्चिदज्ञा(ञ्चिज्ज्ञा)नव्यक्तीनां विसंवाददर्शना[8]ज्जाताशङ्काः कथं ज्ञानमात्रात् 'अयमित्थमेवार्थः' इति निश्चिन्वन्ति प्रामाण्यं वास्य? अन्यथैषां प्रेक्षावत्तैव हीयेत।

प्रमाणे बाधककारणदोषज्ञानाभावात्प्रामाण्यावसायः; इत्यप्य- १० भिधानमात्रम्; तद[10]भावो[9] हि बाधकाग्रहणे, तदभावनिश्चये वा स्यात्? प्रथमपक्षे भ्रान्तज्ञाने तद्भावेपि तदग्रहणं[11] कश्चित्कालं दृष्टम्, एवमत्रापि[12] स्यात्। 'भ्रान्तज्ञाने कश्चित्कालमग्रहे[13]पि कालान्तरे बाधकग्रहणं, सम्यग्ज्ञाने तु कालान्तरेपि तदग्रहणम्' इत्ययं विभागः[14] सर्वविदां नास्मादृशाम्। बाधकाभावनिश्चयोपि १५ सम्यग्ज्ञाने प्रवृत्तेः प्राक्, उत्तरकालं वा? आद्यविकल्पे भ्रान्तज्ञानेपि प्रमाणत्वप्रसङ्गः। द्वितीयविकल्पे तन्निश्चयस्याकिञ्चित्करत्वं तमन्तरेणैव प्रवृत्ते[15]रुत्पन्नत्वात्। न च[16] बाधकाभावनिश्चये किञ्चिन्निमित्त[17]मस्ति। अनुपलब्धि[18]रस्तीति चेत्किं प्राक्काला, उत्तरकाला वा? न तावत्प्राक्काला; तस्याः प्रवृत्त्युत्तरकाल- २० भाविबाधका[19]भावनिश्चयनिमित्तत्वासम्भवात्। न ह्यन्यकालानु-

१ पूर्वज्ञानं विषयो यस्य। २ अर्थक्रियाज्ञानं। ३ कर्तृ। ४ अग्न्यादिकं कर्मतामापन्नं यथा व्यवस्थापयति धूमादिकं कर्तृ, कुतस्तत्कार्यत्वान्न तु तद्ग्राहकत्वादित्यर्थः। ५ कर्तृ। ६ बाधक। ७ अप्रेक्षाकारिणो नराः। ८ मरीचिकादौ। ९ किन्तु नैव। १० बाधकाभावः। ११ उभयोः। १२ सत्यजलज्ञाने। १३ उभयोः (कोट्योः)। १४ देशकालापेक्षया। १५ स्नानपानादिलक्षणायाः। १६ किञ्च। १७ कारणम्। १८ विवादापन्ने प्रमाणे बाधकं नास्ति अनुपलब्धेरिति। १९ नेदं जलमिति।

1 "नहि संवादज्ञानं तद्ग्राहकत्वेन तस्य प्रामाण्यं व्यवस्थापयति, किन्तु तत्कार्यविशेषत्वेन यथा धूमोऽग्निम् इति पराभ्युपगमः।" सन्मति० टी० पृ० १६।

2 "तदभावो हि बाधकाग्रहणे, तदभावनिश्चये वा?" तत्त्वोप० लि० पृ० ३। सन्मति० टी० पृ० १७।

3 "बाधकानुपलब्धिः किं प्रवृत्तेः प्राग्भाविनी बाधकाभावनिश्चयस्य प्रवृत्त्युत्तरकालभाविनो निमित्तम्, अथ प्रवृत्त्युत्तरकालभाविनी इति विकल्पद्वयम्?" सन्मति० टी० पृ० १७।

पलब्धिरन्यकालमभावनिश्चयं च विदधात्यतिप्रसङ्गात् । नाप्युत्तरकाला, प्राक् प्रवृत्तेः 'उत्तरकालं बाधकोपलब्धिर्न भविष्यति' इत्यसर्वविदा निश्चेतुमशक्यत्वेनासिद्धत्वात् । प्रवृत्त्युत्तरकालभाविनिश्चयमात्रनिमित्तत्वे न किञ्चित्फलम् तस्याकिञ्चित्करत्वात् ।

किञ्च, असौ सर्वसम्बन्धिनी, आत्मसम्बन्धिनी वा ? प्रथमपक्षे असिद्धा; न खलु 'सर्वे प्रमातारो बाधकं नोपलभन्ते' इत्यर्वाग्दर्शिना निश्चेतुं शक्यम् । नाप्यात्मसम्बन्धिनी; तस्याः परचेतोवृत्तिविशेषैरनैकान्तिकत्वात् । तन्नानुपलब्धिर्निमित्तम् ।

नापि संवादोऽनवस्थाप्रसङ्गात् । कारणदोषाभावेऽप्ययमेव न्यायः ।

एवं 'त्रिचतुरज्ञान' इत्याद्यपि स्वगृहमान्यम्; 'कस्यचिद्विज्ञानस्य प्रामाण्यं पुनरप्रामाण्यं पुनः प्रमाणता' इत्यवस्थात्रयदर्शनाद्बाधके तद्बाधकादौ वावस्थात्रयमाशङ्कमानस्य परीक्षकस्य कथं नापरापेक्षा येनानवस्था न स्यात् ?

'आशङ्केत हि यो मोहात्' इत्याद्यपि विभीषिकामात्रम्, यतो नाभिशापमात्रात्प्रेक्षावतां प्रमाणमन्तरेण बाधकाशङ्का व्यावर्त्तते । न चास्या व्यावर्त्तकं प्रमाणं भवन्मतेऽस्तीत्युक्तम् । कारणदोषज्ञानेपि पूर्वेण जाताशङ्कस्य तत्कारणदोषान्तरापेक्षायां कथमनवस्था न स्यात् ? तस्य तत्कारणदोषग्राहकज्ञानाभावमात्रतः प्रमाणत्वान्नानवस्था, यदाह—

"यदा स्वतः प्रमाणत्वं तदान्यन्नैव मृग्यते ।

---

१ पूर्वेण जाताशङ्कस्य । २ बाधकस्य । ३ सन्प्रत्यत्र घटानुपलब्धिः कालान्तरेप्यत्र घटाभावं कुर्यादित्यतिप्रसङ्गात् । ४ जलादिज्ञाने । ५ बाधकाभाव । ६ अनुपलम्भस्य । ७ प्रवृत्त्यर्थो हि निश्चयोऽवलोक्यते प्रवृत्तेश्च जातत्वान्निश्चयस्याकिञ्चित्करत्वम् । ८ अनुपलब्धिः । ९ किञ्चिज्ज्ञेन । १० अनुपलब्धेः । ११ लब्धुमशक्यैः । १२ बाधकाभावनिश्चयं निमित्तम् । १३ अन्यथा । १४ पूर्वेण जाताशङ्कस्य संवादे संवादान्तरापेक्षणात् । १५ इदं जलं पुनरिदं जलं पुनरिदं जलम् । १६ विवक्षितस्य । १७ बाधकात् । १८ पञ्चमज्ञानलक्षणसंवादप्रमाणम् । १९ चतुर्थज्ञानस्य । २० प्रत्यक्षादिना प्रामाण्यग्रहणाभावे प्रामाण्ये बाधकाशङ्काव्यावर्त्तनस्य कर्तुमशक्यत्वात् । २१ द्वितीयविकल्पः । २२ विज्ञानकारणनेत्रादिकम् । २३ काचकामलादि । २४ ज्ञानेन । २५ इन्द्रियाणामतीन्द्रियत्वादभावः । २६ संवादकज्ञानम् । २७ कुतः ।

---

1 "किञ्च, बाधकानुपलब्धिः सर्वसम्बन्धिनी किं तन्निश्चयहेतुः उत आत्मसम्बन्धिनी इति पुनरपि पक्षद्वयम् ।"　　सन्मति० टी० पृ० १७ ।

निवर्त्तते हि मिथ्यात्वं[1] दोषा[2]ज्ञानादयत्नतः[3]" ॥
[मी० श्लो० सू० २ श्लो० ५२]

प्रागेव विहितोत्तरम्[4]। न च[5] दोषाज्ञानात्तदभावः[6], सत्स्वपि तेषु तदज्ञानसम्भवात्। सम्यग्ज्ञानोत्पादनशक्तिवैपरीत्येन मिथ्याप्रत्य-
५ योत्पादनयोग्यं हि रूपं तिमिरादिनिमित्तमिन्द्रियदोषः, स चातीन्द्रियत्वात्सन्नपि नोपलक्ष्यते। न च[7] दोषाः ज्ञानेन व्याप्ता येन तन्निवृत्त्या निवर्त्तेरन्। ततो[8]ऽयुक्तमिदम्[9]—

"तस्मात्[10]स्वतः प्रमाणत्वं सर्वत्रौत्सर्गिकं स्थितम्।
बाधक[11]कारणदुष्टत्वज्ञानाभ्यां तदपोद्यते ॥
१० पराधीने[12]पि वै तस्मि[13]न्नानवस्था प्रसज्यते।
प्रमाणा[14]धीनमेतद्धि स्वतस्तच्च प्रतिष्ठितम् ॥
प्रमाणं[15] हि प्रमाणेन यथा नान्येन साध्यते।
न सिध्यत्यप्रमाणत्वमप्रमाणा[16]त्तथैव हि ॥
बाधक[17]प्रत्यय[18]स्तावदर्थान्यत्वाऽवधारणम्।
१५ सोऽनपेक्षः[19] प्रमाणत्वात्[20]पूर्व[21]ज्ञानमपो[22]हते ॥
यत्रा[23]पि[24] त्वपवाद[25]स्य स्यादपेक्षा[26] क्वचित्[27]पुनः।
जाता[28]शङ्कस्य पूर्वेण[29] साप्यन्येन[30] निवर्त्तते ॥

१ शङ्कया यदापादितमप्रामाण्यम्। २ स्वच्छत्वमित्यादि। ३ संवादमन्तरेण। ४ कारणदोषाभावेऽप्ययमेव न्याय इति। ५ किञ्च। ६ दोषाभावः। ७ किञ्च। ८ अनवस्था समर्थिता यतः। ९ अग्रे वक्ष्यमाणलक्षणम्। १० मीमांसकग्रन्थे। प्रथमज्ञानप्रामाण्ये संवादज्ञानापेक्षाया अनवस्थाचक्रकेतरेतराश्रया यतः। ११ एवं चेत्सर्वस्य ज्ञानस्य भ्रान्तादेः प्रमाणता स्यादित्युक्ते सत्याह। १२ यथाऽप्रामाण्यं बाधककारणदोषज्ञानापेक्षं तथा बाधकादिनाऽपरमपेक्षणीयमपरेणाप्यपरमपेक्षणीयमित्यनवस्था कुतो न स्यादित्युक्त आह। १३ भ्रान्तादेरप्रामाण्ये। १४ अप्रामाण्यं। १५ प्रमाणाधीनं स्याद्यदि अप्रामाण्यं तदाऽनवस्था न स्यादेव किं तर्हि अप्रामाण्यस्य प्रमाणमन्तरेणैव सिद्धिः स्यात्ततश्चाप्रामाण्यं स्वतः स्यादित्युक्ते आह। १६ प्रमाणमन्तरेण। १७ बाधप्रत्ययः पुनः क इत्युक्ते आह। १८ ज्ञानं। १९ परानपेक्षः। २० स्वतः। २१ मरीचिकायां जलज्ञानम्। २२ बाधते। २३ विषये। २४ यदा बाधकप्रत्ययोऽपरमपेक्षेत तदा किम्। २५ बाधकज्ञानस्य। २६ अपवादान्तरस्य। २७ अर्थे। २८ नरस्य। २९ पूर्वेण ज्ञानेन। ३० अपरेण बाधकप्रत्ययेन पूर्वसजातीयेन संवादकेन।

1 "न च दोषा ज्ञानेन ये व्याप्ता येन तन्निवृत्त्या निवर्तेरन्" सन्मति० टी० पृ० १८।

2 तस्मात्स्वतः इत्यादयो नवश्लोकाः तत्त्वसंग्रहे किञ्चित् पाठभेदेन पूर्वपक्षरूपेण उपलभ्यन्ते (पृ० ७५८-६०)। सन्मति० टी० पृ० १८-१९।

बाधकान्तरमुत्पन्नं[1] यद्यस्यान्विच्छतो[2]ऽपरम्[4] ।
ततो मध्यम[3]बाधेन पूर्वस्यैव प्रमाणता ॥
अथान्यद्[5]प्रयत्नेन सम्यगन्वेषणे कृते ।
मूल[6]ाभावा[7]न्न विज्ञानं[8] भवेद्बाधक[9]बाधनम् ॥
ततो[10] निरपवादत्वा[11]त्तेनैवाद्यं[12] बलीयसा ।
बाध्यते तेन[13] तस्यैव प्रमाणत्वमपो[14]द्यते[15] ॥
एवं[16] परीक्षकज्ञानं तृतीयं नातिवर्त्तते ।
ततश्चा[17]जातबाधेन ना[18]शङ्क्यं बाधकं पुनः[19] ॥"

कथं वा[20] चोदनाप्रभवचेतसो[21] निःशङ्कं प्रामाण्यं गुणवतो वक्तुरभावेनाऽपवादकदोषाभावासिद्धेः? ननु वक्तृगुणैरेवापवादकदोषाभावो नेष्यते[22] तदभावेऽप्यनाश्रयाणां तेषामनुपपत्तेः[23] । तदुक्तम्—

"शब्दे दोषोद्भवस्तावद्वक्त्रधीन इति स्थितम् ।
तदभावः क्वचित्तावद्[24]गुणवद्वक्तृकत्वतः ॥
तद्गुणैरपकृष्टानां[25] शब्दे सङ्क्रान्त्यसम्भवात् ।
यद्वा वक्तुरभावेन न स्युर्[26]दोषा[27] निराश्रयाः ॥"
[मी० श्लो० सू० २ श्लो० ६२-६३]

इत्यपि प्रलापमात्रमपौरुषेयत्वस्यासिद्धेः । नतश्चेदमयुक्तम्—

"तत्रा[28]पवाद[29]निर्मुक्तिर्वक्त्रभावाल्लघीयसी[30] ।
वेदे[31] तेना[32]प्रमाणत्वं नाशङ्कामपि गच्छति ॥ १ ॥"
[मी० श्लो० सू० २ श्लो० ६८]

स्थितं चैतच्चोदनाजनिता बुद्धिर्न प्रमाणमनिराकृतदोषकारणप्रभवत्वात् द्विचन्द्रादिबुद्धिवत्[33] । न चैतदसिद्धम्, गुणवतो वक्तुरभावे तत्र[34] दोषाभावासिद्धेः । नाप्यनैकान्तिकं विरुद्धं वा; दुष्ट-

---

१ बाधकप्रत्ययस्य सजातीयसंवादरूपापरबाधकोत्पत्त्यभावेन विजातीयं बाधकान्तरमुत्पद्यते यदा तदा किम् । २ ता । ३ तृतीयज्ञानस्य बाधकं चतुर्थज्ञानं । ४ इच्छामन्तरेण । ५ उत्पद्यते । ६ प्रामाण्य । ७ तृतीयस्य । ८ तृतीयस्थानवर्त्ति ज्ञानम् । ९ बाधकस्य द्वितीयज्ञानस्य । १० बाधकज्ञानं न भवेद्यतः । ११ द्वितीयज्ञानेन । १२ ज्ञानं । १३ कारणेन । १४ निराक्रियते । १५ द्वितीयज्ञानेन । १६ एवं चेदनवस्था कुतो न स्यादित्युक्ते सत्याह । १७ तृतीयं ज्ञानं नातिवर्त्तते यतः । १८ नरेण । १९ स्वतः प्रामाण्ये दूषणान्तरम् । २० किञ्च । २१ ज्ञानस्य । २२ परेण मया । २३ दोषाणां । २४ वाक्ये । २५ निराकृतानां दोषाणाम् । २६ शब्दे । २७ पुरुष । २८ वेदे । २९ अप्रामाण्य । ३० अनाथा ससाध्या । ३१ स्याद् । ३२ कारणेन । ३३ ज्ञान । ३४ वेदे ।

कारणप्रभवत्वाप्रामाण्ययोरविनाभावस्य मिथ्याज्ञाने[1] सुप्रसिद्धि-(द्ध)त्वादिति ॥

सिद्धं[2] सर्वजनप्रबोधजननं सद्यो[3]ऽकलङ्का[4][5][6]श्रयम्[7],
विद्यानन्दसमन्तभद्रगुणतो नित्यं[8] मनोनन्दनम् ।
५ निर्दोषं[9] परमागमार्थविषयं[10] प्रोक्तं प्रमालक्षणम्[11] ।
युक्त्या[12] चेतसि चिन्तयन्तु सुधियः श्रीवर्द्धमानं जिनम् ॥१॥

परिच्छेदावसाने आशिषमाह । चिन्तयन्तु । कम् ? श्रीवर्द्धमानं तीर्थकरपरमदेवम् । भूयः कथम्भूतम् ? जिनम् । के ? सुधियः । क्व ? चेतसि । कया ? युक्त्या ज्ञानप्रधानतया । भूयोपि कथम्भू-
१० तम् ? सिद्धं जीवन्मुक्तम् । भूयोपि कीदृशम् ? सर्वजनप्रबोधजननम् सर्वे च ते जनाश्च तेषां प्रबोधस्तं जनयतीति सर्वजनप्रबोधजननस्तम् । कथम् ? सद्यः झटिति । भूयोपि कीदृशम् ? अकलङ्काश्रयम्-कलङ्कानां द्रव्यकर्मणामभावः अकलङ्कस्तस्याश्रयस्तम् । भूयोपि कथम्भूतम् ? मनोनन्दनम् । कथम् ? नित्यं सर्वदा ।
१५ कुतः ? विद्यानन्दसमन्तभद्रगुणतः-विद्या केवलज्ञानमानन्दः सुखं समन्ततो भद्राणि कल्याणानि समन्तभद्राणि विद्या चानन्दश्च समन्तभद्राणि च तान्येव गुणास्तेभ्यः ततः । भूयोपि कीदृशम् ? निर्दोषं रागादिभावकर्मरहितम् । भूयोपि कथम्भूतम् ? परमागमार्थविषयम्-परमागमार्थो विषयो यस्य स तथोक्तस्तम् । भूयोपि
२० कीदृशम् ? प्रोक्तं प्रकृष्टमुक्तं वचनं यस्यासौ प्रोक्तस्तम् । भूयोपि कथम्भूतम् ? प्रमालक्षणम् ॥ श्रीः ॥

इति श्रीप्रभाचन्द्रविरचिते प्रमेयकमलमार्त्तण्डे परीक्षामुखालङ्कारे प्रथमः परिच्छेदः समाप्तः ॥ श्रीः ॥

---

१ न सम्यग्ज्ञाने । २ कृतकृत्यम् । ३ झटिति । ४ उत्पन्नानन्तरम् । ५ अस्मिन्पदे सिद्धप्रमाणलक्षणवर्द्धमानस्वामिसम्बन्धित्वेनार्थत्रयं बोद्धव्यम् । ६ द्रव्यभावकर्मणामभावस्तस्याश्रयम् । ७ प्रमाणलक्षणस्य सम्यग्ज्ञानरूपत्वात् । ८ सर्वदा । ९ रागादिभावकर्मरहितम् । १० बसः (बहुव्रीहिसमाससंज्ञेयमुपनिबद्धा जैनेन्द्रव्याकरणे) । ११ प्रमाणलक्षणस्य सम्यग्ज्ञानरूपत्वात् । १२ नाज्ञानप्रधानतया ।

। श्रीः ।

२ अथ प्रत्यक्षोद्देशः

अथ[1] प्रमाणसामान्यलक्षणं व्युत्पाद्ये[2]दानीं तद्विशेषलक्षणं व्युत्पादयितु[3]मुपक्र[4]मते[5]। प्रमाणलक्षणविशेषव्युत्पादनस्य च प्रतिनियतप्रमाण[6]व्यक्तिनिष्ठत्वात्तदभिप्रायवांस्तद्व्यक्तिसंख्याप्रतिपादनपूर्वकं तल्लक्षणविशेषमाह—

तद्द्वेधेति ॥ १ ॥

तत्स्वापूर्वे[7]त्यादिलक्षणलक्षितं प्रमाणं द्वेधा द्विप्रकारम्, सकलप्रमाणभेद[8]प्रभेदानामत्रान्तर्भाव[9]विभावनात्[10]। 'परपरिकल्पितैकद्वित्र्यादिप्रमाणसंख्यानियमे तदघटनात्' इत्याचार्यः स्वयमेवाग्रे प्रतिपादयिष्य[11]ति। ये[12] हि प्रत्यक्षमेकमेव प्रमाणमित्याचक्षते न तेषामनुमानादिप्रमाणान्तरस्यात्रान्तर्भावः सम्भवति तद्विलक्षण[13]त्वाद्विभिन्न[14]सामग्रीप्रभवत्वा[15]च्च।

ननु चास्याऽप्रामाण्यान्नान्तर्भावविभावनया किञ्चित्प्रयोजनम्। प्रत्यक्षमेकमेव हि प्रमाणम्, अगौणत्वात्प्रमाणस्य। अर्थनिश्चायकं च[16] ज्ञानं प्रमाणम्, न चानुमानादर्थनिश्चयो घटते—सामान्ये[17] सिद्ध[18]साधनाद्विशेषेऽनुगमा[19]भावात्। तदुक्तम्—

विशेषेऽनुगमाभावः सामान्ये सिद्ध[20]साधनम्[21] [ ] इति।

किञ्च, व्याप्तिग्रहणे पक्षधर्मतावगमे च सत्यनुमानं प्रवर्त्तते[22]। न च व्याप्तिग्रहणमध्यक्षतः; अस्य सन्निहितमात्रार्थग्राहित्वेनाखिलपदार्था[23]क्षेपेण[24] व्याप्तिग्रहणेऽसामर्थ्यात्[25]। नाप्यनुमान[26]तः[27]; अस्य व्याप्ति-

१ अनन्तरम्। २ कथयित्वा। ३ विशदीकर्तुं। ४ प्रारभते। ५ परिच्छेदावतारः। ६ भेद। ७ आद्यं त्रिविधमन्यं पञ्चविधमित्यादिलक्षण। ८ व्यक्तिभेदेपि लक्षणैकत्वमन्तर्भावः। ९ निश्चयनात्। १० कुत एतत्। ११ तदघटनं कथमाचार्यः प्रतिपादयिष्यतीत्युक्ते आह। १२ चार्वाकाः। १३ वैशद्यावैशद्य। १४ इन्द्रियलिङ्गे। १५ अनुमानादेः। १६ किञ्च। १७ साध्ये। १८ न हि अग्निमात्रे कस्यचिद्विप्रतिपत्तिरस्ति सामान्याच्च प्रवर्त्तमानः कथं नियतमभिमुखमेवावश्यं प्रवर्त्तेत। १९ यो यो धूमवान् स स तार्णेनाग्निमानित्यन्वयाभावः। २० नानुमानं प्रमाणं स्यान्निश्चयाभावतस्ततः। २१ हेतोः। २२ उत्पद्यते। २३ अग्न्याधारधूमाधारमहानसादि। २४ स्वीकरणेन। २५ प्रत्यक्षस्य। २६ सर्वत्र धूमोऽग्निना व्याप्तः तदन्वयव्यतिरेकानुविधानात्। २७ व्याप्तिग्रहणम्।

ग्रहणपुरस्सरत्वात्। तत्राप्यनुमानतो व्याप्तिग्रहणे[1]ऽनवस्थेतरेतरा-
श्रयदोषप्रसङ्गः[2]। न चान्यत्प्रमाणं तद्ग्राहकमस्ति। [3]तत्कुतोनुमानस्य
प्रामाण्यम्? इत्यसमीक्षिताभिधानम्; अनुमानादेरप्यध्यक्षवत्प्र-
तिनियतस्वविषयव्यवस्थायामविसंवादकत्वेन प्रामाण्यप्रसिद्धेः।
५ प्रत्यक्षेपि हि प्रामाण्यमविसंवादकत्वादेव प्रसिद्धम्, तच्चान्यत्रापि
समानम् अनुमानादिनाप्यध्यवसितेर्थे विसंवादाभावात्।

यच्च-अगौणत्वात्प्रमाणस्येत्युक्तम्, [4]तत्रानुमानस्य कुतो [गौण-
त्वम्,] गौणा[5]र्थविषयत्वात्, प्रत्यक्षपूर्वकत्वाद्वा? न तावदाद्यो
विकल्पः; अनुमानस्याप्यध्यक्षवद्वा[6]स्तवसामान्यविशेषात्मकार्थवि-
१० षयत्वाभ्युपगमात्। न खलु कल्पितसा[7]मान्यार्थविषयमनुमानं
सौगतवज्जैनैरिष्टम्, तद्विषयत्वस्यानुमाने निराकरिष्यमाणत्वात्।
[8]प्रत्यक्षपूर्वकत्वाच्चानुमानस्य गौणत्वे प्रत्यक्षस्यापि कस्यचिदनुमा-
नपूर्वकत्वाद्गौणत्वप्रसङ्गः, अनुमानात्साध्यार्थं निश्चित्य प्रवर्त्त-
मा[9]नस्याध्यक्षे[10]प्रवृत्तिप्रतीतेः। ऊहाख्यप्रमाणपूर्वकत्वा[11]च्चास्याध्यक्ष-
१५ पूर्वक[12]त्वमसिद्धम्।

यच्चोक्तम् 'न च व्याप्तिग्रहणमध्यक्षतः' इत्यादि; तदप्युक्तिमा-
त्रम्; व्याप्तेः प्रत्यक्षानुपलम्भबलोद्भूतोहाख्यप्रमाणात्प्रसिद्धेः। न
च व्यक्तीनामान[13]न्त्यं देशादि[14]र्व्यभिचारो वा तत्प्रसि[15]द्धेर्बाधकः,
[16]सामान्यद्वारेण-प्रति[17]बन्धावधारणात्तस्य [18]चानुगताऽबाधितप्रत्यय-
२० विषयत्वादस्तित्वम्। प्रसाधयिष्यते च "सामान्यविशेषात्मा
[19]तदर्थः" [परीक्षामुख ४-१] इत्यत्र वस्तुभूतसामान्यसद्भावः।

न [20]चोहप्रमाणमन्तरेण 'प्रत्यक्षमेव प्रमाणमगौणत्वात्' इ[21]त्याद्य-
भिधातुं शक्यम्। त[22]थाहि—अगौणत्वमविसंवादित्वं वा लिङ्गं नाप्र-

१ आद्यानुमानेऽपरानुमानेन व्याप्तिप्रतिपत्तौ अनवस्था। आद्यानुमानेन द्वितीयानु-
माने व्याप्तिप्रतिपत्तौ इतरेतराश्रयः। २ पक्षधर्मतावगमे न सत्यनुमानं प्रवर्तत इत्युक्तं
तत्र पक्षप्रतिपत्तिश्च प्रत्यक्षतोऽनुमानतो वा। न तावत्प्रत्यक्षतः पक्षप्रतिपत्तिरनुमाना-
नर्थक्यप्रसङ्गात्। नाप्यनुमानतः पक्षप्रतिपत्तिरनुमानेपि पक्षप्रतिपत्तिः प्रत्यक्षतोऽनु-
मानतो वा। न तावत्प्रत्यक्षतः उक्तदोषानुषङ्गात्। नाप्यनुमानतोऽनवस्थाप्रसङ्गात्।
कथमनुमानेप्यनुमानात्पक्षप्रतिपत्तिरिति। ३ व्याप्तिग्रहणाभावे सति। ४ ग्रन्थे।
५ उपचरित। ६ परमार्थरूप। ७ अन्यापोहरूप। ८ व्याप्तिज्ञानं प्रत्यक्षम्।
९ नुः। १० ता। ११ किञ्च। १२ साधनम्। १३ अग्निधूमव्यक्तयोऽनन्ता अतः
सम्बन्धोवधारयितुं न शक्यः, यो धूमवान् सोऽग्निमान् पर्वत इति देशादिव्यभिचारो
वा तज्ज्ञप्तेर्बाधकः। १४ काल। १५ ह्नोः। १६ धूमत्वेनाग्नित्वेन। १७ साध्य-
साधनयोरविनाभाव। १८ गौगौरित्याद्यनुस्यूत। १९ प्रमाणार्थः। २० किञ्च।
२१ सर्वमनुमानमप्रमाणं गौणत्वादित्यादि च। २२ उक्तमेव समर्थयन्ते आचार्याः।

सिद्धप्रतिबन्धं[1] सत् प्रत्यक्षस्य प्रामाण्यमनुमापयेद[2]तिप्रसङ्गात्[3]। प्रतिबन्धप्रसिद्धिश्चानवयवेना[4]भ्युपगन्तव्या[5], अन्यथा[6] यस्यामेव प्रत्यक्ष[7]व्यक्तौ प्रामाण्ये[8]नागौणत्वादे[9]रसौ[10] सिद्धस्तस्यामेवागौणत्वादे-स्तत्[11]सिध्येत्, न व्यक्त्यन्तरे[12] तत्र[13] तस्या[14]सिद्धत्वात्। न चासौ साकल्येनाध्यक्षात्सिध्येत्तस्य सन्निहितमात्रविषयकत्वात्। अथैकत्र व्यक्तौ[15] प्रत्यक्षेणानयोः[16] सम्बन्धं[17] प्रतिपद्यान्यत्रा[18]प्येवंविधं[19] प्रत्यक्षं प्रमाणमित्यगौणत्वादिप्रामाण्ययोः सर्वोपसंहारेण[20] प्रतिबन्धप्र[21]-सिद्धिरित्यभिधीयते[22]; न[23] अविषये सर्वोपसंहारेण[24] प्रतिपत्तेरयो-गात्[25]। सर्वोपसंहारेण प्रतिपत्तिश्च[26] नामान्तरेणोह एवोक्तः स्यात्। अग्निधूमादीनां चैवम्[27]अविनाभावप्रतिपत्तिः किन्न स्यात्? येन 'अनुमानमप्रमाणमविनाभावस्याखिलपदार्थाक्षेपेण[28] प्रतिपत्तुमश-क्यत्वात्' इत्युक्तं[29] शोभेत।

किञ्चानुमानमात्रस्याप्रामाण्यं प्रतिपादयितुमभिप्रेतम्[30], अतीन्द्रियार्थानुमानस्य वा? प्रथमपक्षे प्रतीतिसिद्धसकलव्यवहारो-च्छेदः[31]। प्रतीयन्ते[32] हि कुतश्चिदविनाभाविनोऽर्थाद्[33]अर्थान्तरं[34] प्रति-नियतं प्रतियन्तो[35] लौकिकाः, न तु सर्वस्मात्सर्वम्। द्वितीयपक्षे तु कथमतीन्द्रिय[36]प्रत्यक्षेतरप्रमाणानामगौणत्वादिना[37] प्रामाण्येतर-व्यवस्था? कथं वा[38] परचेतसो[39]ऽतीन्द्रियस्य व्यापारव्याहारादिकार्यविशेषात् प्रतिपत्तिः?, स्वर्गा[40]पूर्व[41]देवतादे[42]स्तथाविधस्य[43] प्रतिषेधो-

१ साध्येनाज्ञाताविनाभावम्। २ ज्ञापयेत्। ३ धूमवन्नवह्नितोत्थितस्यापि धूम-लिङ्गात्साध्यप्रतिपत्तिः स्यादज्ञातसम्बन्धत्वाविशेषात्। ४ साकल्येन। ५ परेण। ६ साकल्येन प्रतिबन्धसिद्धेरनभ्युपगमे। ७ अग्निप्रत्यक्षविशेषे महानसाग्निज्ञाने। ८ सह। ९ अविसंवादित्व। १० अविनाभावः। ११ प्रत्यक्षप्रामाण्यम्। १२ प्रकृत-व्यक्तेरन्यव्यक्तौ। १३ घटप्रत्यक्षविशेषे। १४ अविनाभावस्य। १५ अग्निप्रत्यक्ष-विशेषे। १६ अगौणत्वादिप्रामाण्ययोः साध्यसाधनयोः। १७ अविनाभावम्। १८ घटादिसकलप्रत्यक्षे व्यक्त्यन्तरे। १९ अगौणमविसंवादकम्। २० यावत्प्रत्यक्षं तावत्सर्वमगौणमविसंवादकमिति। २१ अविनाभावज्ञप्तिः। २२ परेण। २३ इति चेन्न। २४ स्वीकारेण। २५ अविनाभावस्य। २६ किञ्च। २७ प्रत्यक्षप्रमाणप्रकारेण। २८ स्वीकारेण। २९ भवता। ३० तदिष्टम्। ३१ नाशः। ३२ ज्ञायन्ते। ३३ धूमलक्षणात्। ३४ अग्निलक्षणम्। ३५ जानन्तः। ३६ प्रत्यक्षाणि चेतराणि चानुमानादीनि प्रत्यक्षेतराणि अतीन्द्रियाणि च तानि प्रत्यक्षेतराणि चातीन्द्रियप्रत्यक्षे-तराणि। तानि च तानि प्रमाणानि च। सन्तानान्तरवर्तित्वेन प्रत्यक्षानुमानयोरतीन्द्रियत्वम्। ३७ अविसंवादित्वविसंवादित्वेन। ३८ किञ्च। ३९ शिष्यादिज्ञानस्य। ४० कथं वा। ४१ अदृष्ट। ४२ सर्वज्ञ। ४३ अतीन्द्रियस्य।

ऽनुपलब्धेः स्यात्? सोयं चार्वाकः "प्रमाणस्यागौणत्वादनुमानादर्थनिश्चयो दुर्लभः"[1] [ ] इत्याचक्षाणः कथमत एवाध्यक्षादेः[2] प्रामाण्यादिकं प्रसाधयेत्? प्रसाधयन्वा कथमतीन्द्रियेतरार्थविषयमनुमानं[3] न प्रमाणयेत्? उक्तं च—

५ "प्रमाणेतर[4]सामान्य[5]स्थिते[6]रन्यधियो गतेः[7]।
प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित्[8]॥" [ ] इति।

तन्नानुमानस्याप्रामाण्यम्।

अस्तु[10] नाम प्रत्यक्षानुमानभेदात्प्रमाणद्वैविध्यमित्याशङ्कापनोदार्थम्—

१० **प्रत्यक्षेतरभेदात्[11] ॥ २ ॥**

इत्याह। न खलु प्रत्यक्षानुमानयोर्व्याख्येयागमादिप्रमाणभेदानामन्तर्भावः सम्भवति यतः सौगतोपकल्पितः प्रमाणसंख्यानियमो व्यवतिष्ठेत[12]।

प्रमेयद्वैविध्यात् प्रमाणस्य द्वैविध्यमेवेत्यप्यसम्भाव्यम्, तद्वै-
१५ विध्यासिद्धेः, 'एक एव हि सामान्यविशेषात्मार्थः प्रमेयः प्रमाणस्य' इत्यग्रे[13] वक्ष्यते। किञ्चानुमानस्य सामान्यमात्रगोचरत्वे ततो विशेषेष्वप्रवृत्तिप्रसङ्गः[14]। न खल्वन्यविषयं ज्ञानमन्यत्र प्रवर्त्तकम् अतिप्रसङ्गात्[15]। अथ लिङ्गा[16]नुमितात्सामान्या[17]द्विशेषप्रतिपत्ते[18]स्तत्र प्रवृत्तिः; नन्वेवं लिङ्गादेव[19] तत्प्रतिपत्तिरस्तु किं[20] परम्परया[21]?
२० ननु विशेषेषु लिङ्गस्य प्रतिबन्धप्रतिपत्तेरभावात्कथमतस्तेषां प्रतिपत्तिः? तदेतत्सामान्येपि समानम्[22]। अथाप्रतिपन्नप्रतिबन्धमपि सामान्यं तेषां गमकम्; लिङ्गमप्येवंविधं तद्गमकं किन्न स्यात्[23]?

---

१ प्रत्यक्षं प्रमाणमगौणत्वात्, अनुमानमप्रमाणं गौणत्वादित्याचक्षाणः। २ आदिपदेनानुमानस्याप्रामाण्यम्। ३ इन्द्रियाण्यतिक्रान्ताः स्वर्गादयः। ते च इतरे च प्रत्यक्षग्राह्या अग्न्यादयः। अतीन्द्रियेतरे ते च ते अर्थाश्च ते विषया यस्यानुमानस्य तत्। ४ अप्रमाण। ५ स्व। ६ का। ७ परिज्ञानात्। ८ परोक्ष। ९ स्वर्गादेः। १० आह सौगतः। ११ परोक्ष। १२ अपि तु न कुतोपि स्थितिं कुर्यात्। १३ चतुर्थाध्याये। १४ (ततोऽनुमानादित्यर्थः) अग्निपरमाणुलक्षणस्वलक्षणेषु। १५ घटविषयं ज्ञानं पटे प्रवर्तकं स्यात्। १६ धूम। १७ अग्नित्वात्। १८ विशेषेषु पुरुषत्वस्य। १९ यथा लिङ्गात्सामान्यस्य प्रतिपत्तिरेवं तेषां विशेषाणाम्। २० प्रयोजनम्। २१ लिङ्गात्सामान्यप्रतिपत्तिः सामान्याद्विशेषप्रतिपत्तिरिति। २२ विशेषेषु सामान्यस्य प्रतिबन्धप्रतिपत्तेरभावात्कथं ततस्तेषां प्रतिपत्तिरिति। २३ अप्रतिपन्नप्रतिबन्धत्वाविशेषात्।

सामान्यस्यापि सामान्येनैव विशेषेषु प्रतिबन्धप्रतिपत्तावनवस्था-सामान्याद्धि सामान्यप्रतिपत्तौ विशेषेष्वप्रवृत्तौ पुनस्ततोऽप्यपरसामान्यप्रतिपत्तौ स[1] एव दोषः । अतः सामान्यतदनुमानानामनवस्थानादप्रवृत्तिर्विशेषेषु स्यात् ।

किञ्च व्यापकमेव गम्यम् अव्यभिचारस्य[2] तत्रैव[3] भावात् । ५ व्यापकं च कारणं[4] कार्यस्य[5], स्वभावो[6] भावस्य[7] । तच्च स्वलक्षणमेव, अतस्तदेव गम्यं[8] स्यात्[9] न सामान्यमव्यापकत्वात् । अथ तदपि व्यापकम्, स्वलक्षणवद्वस्तुत्वम्[10], अन्यथा[11] तस्मिन्नधिगतेपि प्रयोजनाभावात्[12] तत्रानुमानमप्रमाणमेव स्यात् ।

किञ्च, तत्प्रमेयद्वित्वं[13] प्रमाणद्वित्वस्य ज्ञातम्, अज्ञातं वा ज्ञापकं १० भवेत्? यद्यज्ञातमेव तत्तस्य ज्ञापकम्; तर्हि तस्य[14] सर्वत्राविशेषात्[15] सर्वेषामविशेषेण[16] तत्प्रतिपत्तिप्रसङ्गतो विवादो न स्यात् । ज्ञातं चेत्कुतस्तज्ज्ञप्तिः? प्रत्यक्षात्, अनुमानाद्वा[17]? न तावत्प्रत्यक्षात्; तेन सामान्याग्रहणात् । ग्रहणे वा तस्य सविकल्पकत्वप्रसङ्गो विषयसङ्करश्च प्रमाणद्वित्वविरोधी[18] भवतो[19]ऽनुपज्येत । नाप्यनुमानतः; १५ अत एव[20] । स्वलक्षणपराङ्मुखतया[21] हि भवता[22]नुमानमभ्युपगतम्—

“अतद्रूप[23]परावृत्तवस्तुमात्र[24]प्रवेदनात् ।
सामान्य[25]विषयं प्रोक्तं लिङ्गं[26] भेदा[27]प्रतिष्ठितेः[28] ॥” [ ]

इत्यभिधानात् । द्वाभ्यां[29] तु प्रमेयद्वित्वस्य ज्ञाने[30](ऽ)स्य प्रमाणद्वित्वज्ञापकत्वायोगः, अन्यथा[31] देवदत्तयज्ञदत्ताभ्यां प्रतिपन्नात्[32] धूमद्वि- २० त्वात् तदन्यतरस्या[33]ग्निद्वित्वप्रतिपत्तिः स्यात् । द्वैविध्य[34]मिति हि द्विष्ठो धर्मः । स च द्वयो[35]र्ज्ञाने[36] ज्ञायते[37] नान्यथा । न ह्यज्ञातसह्य-

---

१ विशेषेष्वप्रवृत्तिरूपः । २ अविनाभावस्य । ३ व्यापके । ४ वह्निः । ५ धूमस्य । ६ वृक्षत्वम् । ७ शिंशपात्वस्य । ८ साध्यम् । ९ लिङ्गस्य । १० सामान्यस्य । ११ अवस्तुत्वे । १२ विशेषेषु प्रवृत्तिलक्षण । १३ सामान्यविशेषभेदेन । १४ अज्ञातप्रमेयद्वित्वस्य । १५ देशे । १६ नृणाम् । १७ द्वाभ्यां वा । १८ अनुमानस्याभाव इत्यर्थः । १९ सौगतस्य । २० अत एवेत्यस्य हेतोरसिद्धत्वं परिहराति । २१ स्वलक्षणागोचरत्वेन । २२ सौगतेन । २३ अनग्निरूप । २४ अग्निमात्र । २५ अन्यापोह । २६ अन्यापोह । २७ स्वलक्षणस्य । २८ अव्यवस्थितेः । कुतोऽव्यवस्थितिः? भेदानामानन्त्येन ग्रहणासम्भवात् । २९ प्रत्यक्षानुमानाभ्याम् । असौ तृतीयो विकल्पः । ३० परिज्ञाने सति अस्य प्रमेयद्वित्वस्य । ३१ प्रमेयद्वित्वस्य प्रमाणद्वित्वज्ञापकत्वं चेत् । ३२ भिन्नदेशे । ३३ देवदत्तस्य यज्ञदत्तस्य वा । ३४ प्रमेयद्वित्वस्य प्रमाणद्वित्वज्ञापकत्वायोगं दर्शयति । ३५ स्वलक्षणसामान्ययोः प्रमेययोः । ३६ सति । ३७ पुरुषेण ।

विन्ध्यस्य[1] तद्[2]गतद्वित्वप्रतिपत्तिरस्ति। परस्पराश्रयानुषङ्गश्च-सिद्धे हि प्रमाणद्वित्वेऽतः प्रमेयद्वित्वसिद्धिः, तस्याश्च प्रमाणद्वित्वसिद्धिरिति। अर्था[3]न्यतः[4] प्रमाणद्वित्वस्य सिद्धिः, व्यर्थस्तर्हि प्रमेयद्वित्वोपन्यासः। तद्[5]प्य[6]न्य[7]देकं वा स्यात्, अनेकं वा? एकं चेद्विषयसङ्करः।[8] प्रत्यक्षं[9] हि स्वलक्षणाकारमनुमानं तु सामान्याकारम्, तद्द्वयस्यैकज्ञानवेद्यत्वे सुप्रसिद्धो विषयसङ्करः। अथानेकज्ञानवेद्यम्; तद[10]प्यपरेणानेकज्ञानेन वेद्यं तदप्यपरेणेत्यनवस्था।

ननु[11] स्वलक्षणाकार[12]ता प्रत्यक्षेणात्म[13]भूतेव वेद्यते सामान्याकार[14]ता त्वनु[15]मानेन, तयोश्च स्वसंवेदनप्रत्यक्षसिद्धत्वात् प्रत्यक्षसिद्धमेव प्रमाणद्वित्वं प्रमेयद्वित्वं च, केवलम्[16][17] य[18]स्तथा[19] प्रतिपद्यमानोपि न व्यवहरति स प्रसिद्धेन प्रमेयद्वैविध्येन प्रमाणद्वैविध्यव्यवहारे प्रवर्त्यते[20][21]; तदप्यसारम्; ज्ञानादर्थान्तर[22]स्यानर्थान्तरस्य[23] वा केवलस्य सामान्यस्य विशेषस्य वा क्वचिज्ज्ञाने प्रतिभासाभावात्, उभया[24]त्मन एवान्तर्बहिर्वा वस्तुनोऽध्यक्षादिप्रत्यये प्रतिभासमानत्वात्। प्रयोगः[25]-असति बाधके यद्यथा प्रतिभासते तत्तथैवाभ्युपगन्तव्यम् यथा नीलं नीलतया, प्रतिभासते चाध्यक्षादि प्रमाणं सामान्यविशेषात्मार्थविषयतयेति।

ननु मा भूत्प्रमेयभेदः, तथाप्यागमादीनां नानुमानादर्थान्तरत्वम्[26]। शब्दादिकं[27][28] हि परोक्षार्थं सम्बद्धम्[29], असम्बद्धं वा गम[30]येत्? न तावदसम्बद्धम्; गवादे[31]रप्यश्वादिप्रतिभासप्रसङ्गात्[32]। सम्बद्धं चेत्; तल्लिङ्गमेव, तज्जनितं च ज्ञानमनुमानमेव। इत्यप्यसाम्प्रतम्; प्रत्यक्षस्याप्येव[33]मनुमानत्वप्रसङ्गात्-तदपि हि स्वविषये

---

१ नरस्य। २ सह्यविन्ध्यपर्वतगत। ३ इतरेतराश्रयपरिहारार्थं परः प्राह। ४ ज्ञानात्। ५ किञ्च। ६ तयोः। ७ ज्ञानम्। ८ युगपद्द्वयोः प्रतिपत्तिर्विषयसङ्करः। ९ विषयसङ्करः कथमित्युक्ते सत्याह। १० तर्हीति शेषः। ११ अनवस्थां परिहरति परः। १२ प्रत्यक्षस्य। १३ स्वरूपगतैव। १४ अनुमानस्य। १५ वेद्यते। १६ सामान्यं विशेषं वा। १७ इति। १८ नरः (शिष्यः)। १९ स्वसंवेदनप्रत्यक्षेण प्रमेयद्वित्वं प्रमाणद्वित्वं च। २० प्रमाणं द्विविधं प्रमेयद्वैविध्यादित्यनुमानं प्रदर्श्य। २१ आचार्येण। २२ अर्थगतस्य। २३ ज्ञानगतस्य। २४ सामान्यविशेषात्मनः। २५ प्रत्यक्षादि प्रमाणं धर्मि सामान्यविशेषार्थविषयत्वेनाभ्युपगन्तव्यं भवतीति साध्यो धर्मः। असति बाधके तथा प्रतिभासमानत्वादिति हेतुः। २६ सम्बद्धार्थविषयत्वात्। २७ आदिशब्देन सादृश्यार्थापत्त्युत्थापकार्थादि। २८ कर्तृ। २९ परोक्षार्थे। ३० परोक्षार्थम्। ३१ गवादिशब्दात्। ३२ असम्बद्धत्वाविशेषात्। ३३ आगमादीनामनुमानत्वप्रकारेण।

सम्बद्धं सत्तस्य गमकम् नान्यथा[1], सर्वस्य प्रमातुः सर्वार्थप्रत्यक्षत्वप्रसङ्गात् । अथ विषयसम्बद्धत्वाविशेषेपि प्रत्यक्षानुमानयोः सामग्रीभेदात्प्रमाणान्तरत्वम्; शाब्दादीनाम[2]प्येवं[3] प्रमाणान्तरत्वं किन्न स्यात्? तथाहि–शाब्दं[4] तावच्छब्दसामग्रीतः प्रभवति–

"शब्दादुदेति यज्ज्ञानमप्रत्यक्षेपि वस्तुनि । ५
शाब्दं तदिति मन्यन्ते प्रमाणान्तरवादिनः[5] ॥" [   ]

इत्यभिधानात् । न चास्य प्रत्यक्षता; सविकल्पकास्पष्टस्वभावत्वात् । नाप्यनुमानता; त्रि[6]रूपलिङ्गाप्रभवत्वादनुमानगोचरार्थाविषयत्वाच्च । तदुक्तम्–

"तस्मादनु[7]मानत्वं शाब्दे प्रत्यक्ष[8]वद्भवेत् । १०
त्रैरूप्यरहितत्वेन ता[9]दृग्विषयव[10]र्जनात् ॥ १ ॥"

[मी० श्लो० शब्दपरि० श्लो० १८]

यादृशो हि धूमादिलिङ्गजस्यानुमानस्य विषयो धर्म[11]विशिष्टो धर्मी[12] तादृशा[13] विषयेण रहितं शाब्दं सुप्रसिद्धं त्रैरूप्यरहितं च । तथा हि–न शब्दस्य पक्षधर्मत्वम्; धर्मिणोऽयोगात् । न चार्थस्य[14] धर्मित्वम्; तेन तस्य सम्बन्धा[15]सिद्धेः । न चाप्रतीतेर्थे तद्धर्मतया[16] शब्दस्य प्रतीतिः सम्भविनी । प्रतीते चार्थे न तद्धर्मतया प्रतिपत्तिः शब्दस्योपयोगिनी[17], तामन्तरेणाप्यर्थस्य प्रागेव प्रतीतेः । अथ शब्दो धर्मी, अर्थवानिति साध्यो धर्मः, शब्द एव च हेतुः[18]; नः प्रतिज्ञार्थ[19]कदेशत्वप्राप्तेः । अथ शब्दत्वं हेतुरिति न प्रतिज्ञार्थैकदेशत्वम्[20]; न[21]; शब्दत्वस्यागमकत्वात्[22], गोशब्द[23]त्वस्य[24] च[25] निषेत्स्यमानत्वेनासिद्धत्वात् । उक्तं च– १५ २०

"सामा[26]न्यविषयत्वं हि पदस्य[27] स्थापयिष्यते[28] ।

---

१ अन्यथा चेत् । २ शब्दादीनि प्रमाणान्तराणि–सामग्रीभेदात् प्रत्यक्षादिवत् । ३ सामग्रीभेदप्रकारेण । ४ मेरुरस्तीति ज्ञानम् । आगमज्ञानमित्यर्थः (हेत्वन्तरमिदम्) । ५ जैनादयः । ६ पक्षधर्मत्वादि । ७ शब्दादुत्पन्नत्वात् । ८ ईप् । ९ अनुमेय । १० च । ११ अग्निमत्त्व । १२ पर्वतः । १३ भा । १४ गोलक्षणस्य । १५ अविनाभाव । १६ अर्थधर्मत्वेन । १७ फलवती । १८ इति चेन्न । १९ पक्षवचनं प्रतिज्ञा तस्या अर्थः पक्षस्तस्यैकदेशो धर्मी धर्मश्च । २० गोशब्दो जगति नित्यो व्यापकत्वेनैक एवेति गोशब्दत्वसामान्याभावः हेतोः । २१ इति चेन्नेत्यर्थः । २२ गोशब्दवदश्वशब्देपि शब्दत्वस्य भावादगमकत्वम् । २३ तस्मिन्निषेधोपि गोशब्दस्यातीतादेरेकत्वात्, नैकव्यक्तौ सामान्यमिति व्यापकत्वेनैकत्वाच्च गोशब्दत्वसामान्याभावः । २४ अर्थस्य । २५ अर्थस्य साध्यस्य ज्ञापकत्वम् । २६ गोत्व । २७ गवादेरागमस्य । २८ स्वग्रन्थापेक्षयाग्रे ।

धर्मी धर्मविशिष्टश्च[1] लिङ्गीत्येतच्च[2] साधितम् ॥
न[3] तावदनुमानं हि यावत्तद्विषयं[4] न तत्[5] ।"
[मी० श्लो० शब्दपरि० श्लो० ५५-५६]

"अथ शब्दोऽर्थवत्त्वेन पक्षः कस्मान्न कल्प्यते[6] ॥
५ प्रतिज्ञार्थैकदेशो हि हेतुस्तत्र प्रसज्यते ।"
[मी० श्लो० शब्दपरि० श्लो० ६२-६३]

"शब्दत्वं गमकं नात्र गोशब्दत्वं निषेत्स्यते ॥
व्यक्तिरेव[9] विशेष्या[10]तो[11] हेतुश्चैका[12] प्रसज्यते ।"
[मी० श्लो० शब्दपरि० श्लो० ६४]

१० न चार्था[13]न्वयो[14]स्यास्ति व्यापारेण[15] हि सद्भावेन[16] सत्तयेति यावत् । विद्यमानस्य ह्यन्वेतृत्वं[17], नाविद्यमानस्य । 'यत्र हि धूमस्तत्रावश्यं वह्निरस्ति' इत्यस्तित्वेन प्रसिद्धोऽन्वेता[18] भवति धूमस्य । न त्वेवं[19] शब्दस्यार्थेनान्वयोस्ति, न हि तत्र शब्दाक्रान्ते देशेऽर्थस्य सद्भावः । न खलु यत्र पिण्डखर्जूरादिशब्दः श्रूयते तत्र पिण्ड-
१५ खर्जूराद्यर्थो[20]ऽस्ति । नापि शब्दकालेऽर्थोऽवश्यं सम्भवति: राव-णशङ्खचक्रवर्त्यादिशब्दा हि वर्त्तमानास्तदर्थस्तु भूतो भविष्यश्च[21], इति कुतोऽर्थः शब्दस्यान्वेतृत्वम्[22]? नित्यविभुत्वाभ्याम् तत्त्वे चा[23]तिप्रसङ्गः[24] । तदुक्तम्—

"अन्वयो[25] न च शब्दस्य प्रमेयेण निरूप्यते[26] ।
२० व्यापारेण[27][28] हि सर्वेषा[29]मन्वेतृत्वं प्रतीयते ॥ १ ॥
यत्र धूमोस्ति तत्राग्निरस्तित्वेनान्वयः स्फुटः ।
न[30] त्वेवं यत्र शब्दोस्ति तत्रार्थोस्तीति निश्चयः ॥ २ ॥

---

१ अनुमानविषयः । २ स्वग्रन्थापेक्षया । ३ उभयस्य (शाब्दानुमानयोः) उभय-(सामान्यविशेष)विषयत्वं यद्यपि तथापि शब्दस्यानुमानरूपता भविष्यतीत्युक्ते सत्याह । ४ धर्मविशिष्टधर्मिविषयम् । ५ शाब्दम् । ६ बौद्धेन न समर्थ्यते । ७ गोशब्दस्य नित्यविभुत्वाविशेषाभावात् । ८ स्वग्रन्थापेक्षया । ९ शब्दस्वलक्षणा । १० धर्मिणी । ११ शब्दत्वं न गमकं गोशब्दत्वस्य प्रतिषेधो वा यतः । १२ ततश्च प्रतिज्ञार्थैकदेशासिद्धो हेतुरित्यभिप्रायः । १३ अर्थेन सहाविनाभावः । १४ शब्दस्य । १५ शब्दस्य । १६ व्यापारेणेति पदस्य सद्भावेनेति सत्तयेति वा पर्यायशब्दौ । १७ व्यापकत्वमन्वयश्च । १८ व्यापकः । १९ धूमाग्निप्रकारेण । २० इति देशान्वयाभावः । २१ कालान्वयाभावः । २२ अन्वयो व्यापकत्वं वा । २३ गोशब्दादश्वार्थप्रतीतिः स्यात् । २४ शब्दस्य सर्वेष्वर्थेष्वनुगमो यतः । २५ सम्बन्धः । २६ विद्वद्भिः । २७ कुतस्तथाहि । २८ सद्भावेन सत्तया वा । २९ अर्थानाम् । ३० धूमाग्निप्रकारेण ।

न तावद्यत्र[1] देशेऽसौ[2] न तत्काले च गम्यते ।
भवेन्नित्यविभुत्वाच्चेत्सर्वार्थेष्वपि[5] तत्[3]समम् ॥ ३ ॥
तेन[4] सर्वत्र दृष्टत्वाद्[6]व्यतिरेकस्य चागतेः[7] ।
सर्वशब्दैरशेषार्थप्रतिपत्तिः प्रसज्यते ॥ ४ ॥"
[मी० श्लो० शब्दपरि० श्लो० ८५-८८] ५

अन्वयाभावे च व्यतिरेकस्याप्यभावः—

"अन्वयेन विना तस्माद्[8]व्यतिरेकः कथं भवेत् ।" [ ]

इत्यभिधानात् । ततः[9] शाब्दं प्रमाणान्तरमेव[10] ।

उपमानं च । अस्य हि लक्षणम्[11]—

"दृश्यमानाद्[12]यदन्यत्र[13] विज्ञानमुपजायते । १०
सादृश्योपाधि[14]तत्तज्ज्ञैरुपमानमिति स्मृतम् ॥ १ ॥" [ ]

येन[15] हि प्रतिपत्रा गौरुपलब्धो[16] न गवयो, न चातिदेशवाक्यं[17] 'गौरिव गवयः' इति श्रुतं तस्यारण्ये पर्यटतो गवयदर्शने प्रथमे उपजाते परोक्षे गवि सादृश्य[18]ज्ञानं यदुत्पद्यते 'अनेन सदृशो गौः' इति[19], तस्य विषयः सादृश्य[20]विशिष्टः परोक्षो[21] गौस्तद्विशिष्टं[22] वा १५
सादृश्यम्, तच्च वस्तुभूतमेव । यदाह[23]—

"सादृश्यस्य च वस्तुत्वं न शक्यमपबाधितुम्[24] ।
भूयो[25]ऽवयवसामान्ययोगो जात्यन्तरस्य[26] तत् ॥"
[मी० श्लो० उपमानपरि० श्लो० १८] इति ।

अस्य[27] चानधिगतार्थाधिगन्तृतया प्रामाण्यम् । गवयविषयेण[28] २०
हि प्रत्यक्षेण गवयो विषयीकृतो, न त्वसन्निहितोपि सादृश्य[29]विशिष्टो गौस्तद्विशिष्टं वा सादृश्यम् । यच्च पूर्वं 'गौः' इति प्रत्यक्षमभूत्तस्यापि गवयोऽत्यन्तमप्रत्यक्ष एव । इति कथं गवि तदपेक्षं[30] तत्[31]सादृश्यज्ञानम्? उक्तं च—

---

१ तत्र प्रदेशेऽर्थोऽस्तीति निश्चयो नास्तीत्यर्थः । २ अर्थः । ३ अन्वेतृत्वम् । ४ कारणेन । ५ अर्थेषु । ६ शब्दस्य । ७ अप्रतिपत्तेः । ८ अन्वयाविनाभावित्वं व्यतिरेकस्य यतः । ९ शब्दार्थयोरन्वयव्यतिरेकौ न स्तो यतः । १० अनुमानात् । ११ भाट्टो ब्रवीति । १२ गवयात् । १३ गवि । १४ उपाधिर्विशेषणम् । १५ कारिकां भावयति । १६ ग्रामादौ । १७ अन्यत्र प्रसिद्धस्यान्यत्रारोपणमतिदेशः । १८ गोगवययोः । १९ तदुपमानम् । २० गवयस्य । २१ स्मर्यमाणो । २२ स्मर्यमाणगोविशिष्टम् । २३ यस्मात्कारणात् । २४ निराकर्तुम् । २५ भूयसां बहूनामवयवानां समानता सामान्यं तेन योगः । २६ एकस्या गवयजातेरन्या गोजातिर्जात्यन्तरम् । एकस्या गोजातेरन्या गवयजातिर्जात्यन्तरम्, तस्य । २७ उपमानस्य । २८ गवयस्य । २९ गोप्रत्यक्षापेक्षम् । ३० ता । ३१ प्रत्यक्षात् ।

"[1]तस्माद्यत्[2]स्मर्यते तत्स्यात्सादृश्येन विशेषितम्।
प्रमेयमुपमानस्य सादृश्यं वा [3]तदन्वितम् ॥ १ ॥
[4]प्रत्यक्षेणावबुद्धेपि [5]सादृश्ये गवि च स्मृते।
[6]विशिष्ट[7]स्यान्यतो[8]ऽसिद्धेरुपमानप्रमाणता ॥ २ ॥
[10]प्रत्यक्षेपि यथा [11]देशे स्मर्यमाणे च पावके।
[12]विशिष्टविषयत्वेन नानुमानाप्रमाणता ॥ ३ ॥"
[मी० श्लो० उपमानपरि० श्लो० ३७-३९] इति।

न चेदं[13] प्रत्यक्षम्; परोक्षविषयत्वात्सविकल्पकत्वाच्च। नाप्यनुमानम्; हेत्वभावात्। तथा हि-गोगतम्, गवयगतं वा सादृश्य[14]मत्र हेतुः स्यात्? तत्र न गोगतम्; तस्य पक्षधर्मत्वेनाग्रहणात्। [15]यदा हि [16]सादृश्यमात्रं धर्मि, 'स्मर्यमाणेन गवा विशिष्टम्' इति [17]साध्यम्, यदा च [18]तादृशो [19]गौः; तदा न[20] [21]तद्धर्मतया ग्रहणमस्ति[22]। अत[23] एव न [24]गवय[25]गतम्। गो[26]गतसादृश्यस्य [27]गौर्वा हेतुत्वे प्रतिज्ञार्थैकदेशत्वप्रसङ्गश्च। [28]न च [29]सादृश्यमत्र[30] [31]प्राक्प्रमेयेण[32] प्रतिबद्धं[33] प्रतिपन्नम्[34]। न चान्वय[35]प्रतिपत्तिमन्तरेण हेतोः साध्यप्रतिपादकत्वमुपलब्धम्। ततो [36]गवा[37]र्थदर्शने[38] गवयं पश्यतः सादृश्येन विशिष्टे गवि पक्षधर्मत्वग्रहणं [39]सम्बन्धानुस्मरणं चान्तरेण प्रतिपत्तिरुत्पद्यमाना नानुमानेऽन्तर्भवतीति प्रमाणान्तरमुपमानम्। उक्तं च—

---

१ गवयात्। २ गोलक्षणं वस्तु। ३ स्मर्यमाणगवान्वितम्। ४ उपमानं गृहीतग्राहित्वादप्रमाणं स्यादित्युक्ते आह। ५ गवयगते। ६ सादृश्यविशिष्टस्य। ७ सादृश्यविशिष्टो गौस्तद्विशिष्टं वा सादृश्यमितिर्विशिष्टविषयः। ८ सादृश्यविशिष्टस्य गोस्तद्विशिष्टस्य वा सादृश्यस्य। ९ स्मरणप्रत्यक्षाभ्याम्। १० अस्मिन्नर्थे दृष्टान्तमाह। ११ पर्वतादौ। १२ देशादिनियतत्वेन। १३ उपमानम्। १४ उपमानस्यानुमानत्वे साध्ये। १५ कः पक्षस्तद्धर्मत्वेनाग्रहणं वा कथं सादृश्यस्येत्यतदाह। १६ सामान्यम्। १७ गोगतसदृशत्वादिति हेतुः। १८ गवयसदृशो गौरिति वा पक्षः। १९ गवयगतसदृशत्वादिति हेतुः। २० गोगतसादृश्यस्य। २१ पक्ष। २२ हेतूपन्यासात्पूर्वं सादृश्यस्याप्रसिद्धत्वात्। २३ पक्षधर्मत्वेनाग्रहणादेव। २४ हेतुः। २५ सादृश्यम्। २६ यद्यपि पक्षधर्मत्वेनाग्रहणं गोगतसादृश्यस्य तथापि हेतुत्वेनोपन्यासः क्रियते इत्युक्ते आह। २७ गौर्गवयेन सदृशः गोगतसादृश्यात्। गौर्गवयेन सदृशः गौर्यतः। २८ उक्तयुक्त्या पक्षधर्मत्वं नास्ति चेन्मा भूदन्वयो भविष्यतीत्युक्ते आह। २९ हेतुः। ३० उपमानस्यानुमानत्वे साध्ये। ३१ हेतूपन्यासात्पूर्वम्। ३२ सादृश्यविशिष्टो गौस्तद्विशिष्टं वा सादृश्यमिति विशिष्टविषयेण। ३३ अविनाभूतम्। ३४ तथा प्रतीतेरभावात्। ३५ सपक्षे सत्त्व। ३६ सादृश्यस्य पक्षधर्मत्वेनाग्रहणमन्वयप्रतिपत्त्यभावो वा यतः। ३७ वसः। ३८ सति। ३९ अन्वय।

"न चैतस्यानुमानत्वं पक्षधर्माद्यसम्भवात् ।
प्राक्प्रमेयस्य सादृश्यं धर्मित्वेन न गृह्यते ॥ १ ॥
गवये गृह्यमाणं च न गवार्थानुमापकम् ।
प्रतिज्ञार्थैकदेशत्वाद्गोगतस्य न लिङ्गता ॥ २ ॥
गवयश्चाप्यसम्बन्धान्न गोलिङ्गत्वमृच्छति ।
सादृश्यं न च सर्वेण पूर्वं दृष्टं तदन्वयि ॥ ३ ॥
एकस्मिन्नपि दृष्टेऽर्थे द्वितीयं पश्यतो वने ।
सादृश्येन सहैवास्मिंस्तदैवोत्पद्यते मतिः ॥ ४ ॥"
[मी० श्लो० उपमानपरि० श्लो० ४३-४६] इति ।

तथार्थापत्तिरपि प्रमाणान्तरम् । तल्लक्षणं हि-"अर्थापत्तिरपि दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यते इत्यदृष्टार्थकल्पना"। [शावरभा० १।१।५] कुमारिलोऽप्येतदेव भाष्यकारवचो व्याचष्टे ।

"प्रमाणषट्कविज्ञातो यत्रार्थोऽनन्यथा भवन् ।
अदृष्टं कल्पयेदन्यं सार्थापत्तिरुदाहृता ॥"
[मी० श्लो० अर्था० परि० श्लो० १]

प्रत्यक्षादिभिः षड्भिः प्रमाणैः प्रसिद्धो योऽर्थः स येन विना नोपपद्यते तस्यार्थस्य कल्पनमर्थापत्तिः । तत्र प्रत्यक्षपूर्विकार्थापत्तिर्यथाग्नेः प्रत्यक्षेण प्रतिपन्नाद्दाहाद्दहनशक्तियोगोऽर्थापत्त्या प्रकल्प्यते। न हि शक्तिः प्रत्यक्षेण परिच्छेद्या; अतीन्द्रियत्वात् । नाप्यनुमानेन; अस्य प्रत्यक्षावगतप्रतिबन्धलिङ्गप्रभवत्वेनाभ्युपगमात्, अर्थापत्तिगोचरस्य चार्थस्य कदाचिदप्यध्यक्षागोचरत्वात् । अनुमानपूर्विका त्वर्थापत्तिर्यथा सूर्ये गमनात्तच्छक्तियोगिता । अत्र हि

१ आदिशब्देन सपक्षे सत्त्वम् । २ अनुमानकालात्पूर्वम् । ३ हेतुः । ४ पक्षधर्मत्वेन सादृश्यम् । ५ तर्हि गवयो हेतुर्भविष्यतीत्युक्ते आह । ६ गवार्थेन । ७ पक्षधर्मत्वं नास्ति चेन्मा भूदन्वयो भविष्यतीत्युक्ते आह । ८ पुंसा । ९ हेतूपन्यासात्पूर्वम् । १० प्रमेयेण । ११ उक्तार्थोपसंहारमाह । १२ गोलक्षणे । १३ गवयम् । १४ पक्षधर्मत्वग्रहणं विना साध्यसाधनसम्बन्धस्मरणं च विना कोऽर्थो गवयदर्शनकाल एव । १५ शाब्दोपमाने यथा प्रमाणान्तरे भवतः । १६ सामर्थ्यात्प्राप्ता । १७ उच्यते । १८ पुनः । १९ प्रत्यक्षादिप्रमाणमात्रगम्यः । २० आगमे । २१ अदृष्टार्थं विना । २२ उपरि वृष्टिलक्षण । २३ आपादनम् । २४ बुद्धौ । २५ नदीपूरादिः । २६ अदृष्टार्थे सत्येव भवन्नित्यर्थः । २७ उपरि वृष्टिलक्षणम् । २८ पूरादन्यम् । २९ कारिकां भावयति । ३० वृष्टेः । ३१ अर्थापत्तिषु मध्ये । ३२ स्फोटात् । ३३ अग्निर्दहनशक्तियुक्तः दाहान्यथानुपपत्तेरिति । ३४ आत्मादिवत् । ३५ भा । ३६ शक्तिलक्षणस्य ।

देशाद्देशान्तरप्राप्त्या सूर्ये गमनम[1]नुमीयते त[2]तस्तच्छक्तिसम्बन्ध इति। श्रु[3]तार्थापत्तिर्यथा–'पीनो देवदत्तो दिवा न भुङ्क्ते'[4] इति वाक्यश्रवणाद्रात्रिभोजनप्रतिपत्तिः। उपमानार्थापत्तिर्यथा—गवयोपमितायां[5] गोस्तज्ज्ञानग्राह्यताशक्तिः। अर्थापत्तिपूर्विकाऽर्थापत्तिर्यथा—शब्देऽर्थापत्तिप्रबोधिताद्वाचकसामर्थ्यादभि[6]धानसिध्यर्थं तन्नित्यत्वज्ञानम्। शब्दाद्ध्यर्थः प्रतीयते, त[7]तो वाचकसामर्थ्यं, ततोपि त[8]न्नित्यत्वमिति। अभावपूर्विकाऽर्थापत्तिर्यथा—प्रमाणाभा[9]वप्रमितचै[10]त्रा[11]भावविशेषिता[12]द्गेहाच्चैत्रबहिर्भावसिद्धिः, 'जीवंश्चैत्रोऽन्यत्रास्ति गृहे अभावात्' इति। तदुक्तम्—

"त[13]त्र प्रत्यक्षतो ज्ञाताद्दाहाद्दहनशक्तता।
वह्नेरनुमितात्सूर्ये यानात्तच्छक्तियोगिता॥ १॥"
[मी० श्लो० अर्था० श्लो० ३]

"पीनो दिवा न भुङ्क्ते चेत्येवमादिवचःश्रुतौ[14]।
रात्रिभोजनविज्ञानं श्रुतार्थापत्तिरुच्यते॥ २॥"
[मी० श्लो० अर्था० श्लो० ५१]

"गवयोपमिताया गो[15]स्तज्ज्ञानग्राह्यशक्तता।
अभिधानप्रसिद्ध्यर्थमर्थापत्त्यावबोधितात्॥ १॥
शब्दे वाचक[16]सामर्थ्यात्तन्नित्यत्वप्रमेय[17]ता।
अभिधानान्य[18]थाऽसिद्धेरिति वाचकशक्तता॥ २॥
अ[19]र्थापत्त्यावग[20]म्यैव त[21]दन्यत्वग[22]तेः पुनः।
अ[23]र्थापत्त्यन्तरेणैव शब्दनित्यत्वनिश्चयः॥ ३॥

---

१ आदित्यो गमनशक्तियुक्तो गतिमत्त्वान्यथानुपपत्तेः। गतिमानादित्यो देशाद्देशान्तरप्राप्तेः, बाणादिवत्। २ सूर्यो गमनशक्तियुक्तो गतिमत्त्वान्यथानुपपत्तेः। ३ आगम। ४ देवदत्तो रात्रौ भुङ्क्ते पीनत्वे सति दिवाभोजनाभावश्रवणान्यथानुपपत्तेः। ५ गौरुपमानज्ञानग्राह्यताशक्तियुक्ता उपमेयत्वान्यथानुपपत्तेः। ६ उच्चारण। ७ शब्दो नित्यो वाचकसामर्थ्यान्यथा(नित्यत्वं विना)ऽनुपपत्तेः। अस्यार्थापत्तिपूर्वकत्वं निरूप्यते। शब्दो वाचकशक्तियुक्तः ततोऽर्थप्रतीत्यन्यथा (वाचकशक्तिं विना)ऽनुपपत्तेः। ८ शब्द। ९ अभावप्रमाण। १० ता। ११ भा। १२ विशेषण। १३ अर्थापत्तिषु मध्ये। १४ सत्याम्। १५ उपमान। १६ यसः। १७ अभिधानसिध्यर्थं तन्नित्यत्वप्रमेयता स्यात्। १८ नियत्वं विना। १९ वाचकशक्तता। अर्थापत्त्यवगम्या न भविष्यति अतश्चार्थापत्तिपूर्विकार्थापत्तिः कथं स्यादित्युक्ते आह। २० अतीन्द्रियत्वात्। २१ शक्ततायाः सकाशादन्यत्वं भिन्नत्वं नित्यत्वस्य। २२ परिज्ञानात्। २३ यथैवार्थापत्त्या वाचकशक्ततावगम्यते तथैव शब्दनित्यत्वं प्रतीयते इति कृतार्थापत्तिपूर्विकार्थापत्तेर्वैयर्थ्यमित्युक्ते आह।

दर्शनस्य परार्थत्वादित्यस्मिन्नभिधास्यते ।
प्रमाणाभावनिर्णीतचैत्राभावविशेषितात् ॥ ४ ॥
गेहाच्चैत्रबहिर्भावसिद्धिर्या त्विह दर्शिता ।
तामभावोत्थितामन्यामर्थापत्तिमुदाहरेत् ॥ ५ ॥"
[मी० श्लो० अर्था० श्लो० ४-९] इत्यादि ।　　५

तथाऽभावप्रमाणमपि प्रमाणान्तरम् । तद्धि निषेध्याधारवस्तुग्रहणादिसामग्रीतस्त्रिप्रकारमुत्पन्नं सत् क्वचित्प्रदेशादौ घटादीनामभावं विभावयति । उक्तं च—

"गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम् ।
मानसं नास्तिताज्ञानं जायतेऽक्षानपेक्षया ॥　　१०
[मी० श्लो० अभाव० श्लो० २७]

"प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते ।
सात्मनोऽपरिणामो वा विज्ञानं वान्यवस्तुनि ॥"
[मी० श्लो० अभाव० श्लो० ११]

"प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते ।　　१५
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता ॥"
[मी० श्लो० अभाव० श्लो० १] इति ।

न चाध्यक्षेणाभावोऽवसीयते; तस्याभावविषयत्वविरोधात्, भावांशेनैवेन्द्रियाणां सम्बन्धात् । तदुक्तम्—

"न तावदिन्द्रियेणैषा नास्तीत्युत्पाद्यते मतिः ।　　२०
भावांशेनैव सम्बन्धो योग्यत्वादिन्द्रियस्य हि ॥"
[मी० श्लो० अभाव० १८] इति ।

नाप्यनुमानेनासौ साध्यते; हेतोरभावात् । न च विषयभूतस्या-

---

१ अभिधानान्यथासिद्धेरिति यदुक्तं तत्समर्थनीयमित्युक्ते आह । २ उच्चारणस्य । ३ 'शिष्यार्थत्वात् । ४ स्वग्रन्थापेक्षयाग्रे वक्ष्यमाणग्रन्थे । ५ अर्थापत्तिनिरूपणप्रस्तावे । ६ प्रमाणपञ्चकाद्भिन्नाम् । ७ भाष्यकारः । ८ घटादि । ९ शुद्धभूतल । १० निषेध्यस्मरणमुपलब्धिलक्षणप्राप्तस्य घटादेरनुपलम्भश्च । ११ अभावप्रमाणसामग्रीतः । १२ त्रिप्रकारमित्येतत्पदं प्रत्यक्षेत्यादिनाऽऽह । १३ भूतले । १४ आदिपदेन काले । १५ बाह्येन्द्रियानपेक्षया । १६ स्वरूपम् । १७ प्रमाणपञ्चकरूपत्वेनाभावप्रमाणस्य । १८ प्रसज्यप्रतिषेधोऽत्र । १९ जीवस्य प्रमाणपञ्चकरूपतया । २० स्वरूपम् । २१ पर्युदासोऽत्र । २२ भुवि । घटांशलक्षणे । २३ घटांशास्तित्वावबोधार्थम् । २४ अनुमानापेक्षया । २५ कारणादेः प्रागभावादिना विभागः कृतः । अभाव इति वा । २६ पदार्थस्य ।

भावस्याभावादभावप्रमाणवैयर्थ्यम्; कारणादिविभागतो व्यवहारस्य लोकप्रतीतस्याभावप्रसङ्गात्। उक्तंच—

"न च स्याद्व्यवहारोयं कारणादिविभागतः।
प्रागभावादिभेदेन नाभावो यदि भिद्यते ॥ १ ॥"
[मी० श्लो० अभाव० श्लो० ७]

प्रागभावादिभेदान्यथानुपपत्तेश्चास्यार्थापत्त्या वस्तुरूपतावसीयते। उक्तंच—

"न चावस्तुन एते स्युर्भेदास्तेनास्य वस्तुता।
कार्यादीनामभावः को भावो यः कारणादिनः(ना) ॥ १ ॥"
[मी० श्लो० अभाव० श्लो० ८]

अनुमानावसेया चास्य वस्तुता। यदाह—

"यद्वानुवृत्तिव्यावृत्तिबुद्धिग्राह्यो यतस्त्वयम्।
तस्माद्गवादिवद्वस्तु प्रमेयत्वाच्च गृह्यताम् ॥ १ ॥"
[मी० श्लो० अभाव० श्लो० ९]

चतुःप्रकारश्चाभावो व्यवस्थितः—प्राक्प्रध्वंसेतरेतराऽत्यन्ताभावभेदात्। उक्तं च—

"वस्त्वऽसङ्करसिद्धिश्च तत्प्रामाण्यं समाश्रिता।
क्षीरे दध्यादि यन्नास्ति प्रागभावः स उच्यते ॥ १ ॥
नास्तिता पयसो दध्नि प्रध्वंसाभावलक्षणम्।
गवि योऽश्वाद्यभावस्तु सोन्योन्याभाव उच्यते ॥ २ ॥
शिरसोऽवयवा निम्ना वृद्धिकाठिन्यवर्जिताः।
शशशृङ्गादिरूपेण सोऽत्यन्ताभाव उच्यते ॥ ३ ॥"
[मी० श्लो० अभाव० श्लो० २-४]

यदि चैतेषां व्यवस्थापकमभावाख्यं प्रमाणं न स्यात्तदा प्रतिनियतवस्तुव्यवस्थाविलोपः स्यात्। तदुक्तम्—

"क्षीरे दधि भवेदेवं दध्नि क्षीरं घटे पटः।
शशे शृङ्गं पृथिव्यादौ चैतन्यं मूर्तितात्मनि ॥

---

१ अन्यथा। २ क्षीर। ३ कार्यं दधि। ४ प्रागभावादिकृतः कारणादिविभागः। ५ लोकप्रतीतः। ६ [अ]भावप्रमाणमन्तरेण। ७ प्रागभावादयः। ८ कारणेन। ९ स्वरूपादीनां च। १० अथवाऽर्थापत्त्यपेक्षया। ११ अभावो वस्तुरूपो भवति अनुवृत्तिव्यावृत्तिबुद्धिग्राह्यत्वाद्गवादिवत्प्रमेयत्वाच्च तद्वत्। १२ शशस्य। १३ कालत्रये।

अप्सु गन्धो रसश्चाग्नौ वायौ रूपेण तौ सह।
व्योम्नि संस्पर्शता ते च न चेदस्य प्रमाणता॥"
[मी० श्लो० अभाव० श्लो० ५-६] इति।

न च निरंशत्वाद्वस्तुनस्तत्स्वरूपग्राहिणाध्यक्षेणास्य सर्वात्मना ग्रहणादगृहीतस्य चापरस्यांशस्य तत्राभावात् कथं तद्व्यवस्थापनाय प्रवर्त्तमानमभावाख्यं प्रमाणं प्रामाण्यमश्नुते? इत्यभिधातव्यम्; यतः सदसदात्मके वस्तुनि प्रत्यक्षादिना तत्र सदंशग्रहणेप्यगृहीतस्यासदंशस्य व्यवस्थापनाय प्रमाणाभावस्य प्रवर्त्तमानस्य न प्रामाण्यव्याहतिः। उक्तं च—

"स्वरूपपररूपाभ्यां नित्यं सदसदात्मके।
वस्तुनि ज्ञायते किञ्चिद्रूपं कैश्चित्कदाचन॥ १॥
यस्य यत्र यदोद्भूतिर्जिघृक्षा चोपजायते।
वेद्यतेनुभवस्तस्य तेन च व्यपदिश्यते॥ २॥
तस्योपकारकत्वेन वर्त्ततेऽशस्तदेतरः।
उभयोरपि संवित्त्या उभयानुगमोस्ति तु॥ ३॥"
[मी० श्लो० अभाव० श्लो० १२-१४]

प्रत्यक्षाद्यवतारश्च भावांशो गृह्यते यदा।
व्यापारस्तदनुत्पत्तेरभावांशे जिघृक्षिते॥ ४॥"
[मी० श्लो० अभाव० श्लो० १७]

न च धर्मिणोऽभिन्नत्वाद्भावांशवदभावांशस्याप्यध्यक्षेणैव ग्रहः; सदसदंशयोर्धर्म(र्म्य)भेदेप्यन्योन्यं भेदान्नायनरश्मिरूपादिवदभावस्यानुद्भूतत्वात्। न चाभावस्य भावरूपेण प्रमाणेन परिच्छित्ति-

---

१ गन्धादयः। २ सद्रूपस्य वस्तुनः। ३ समर्थनाय। ४ व्याप्नोति। ५ सौगतेन। ६ सर्वदा। ७ प्रमाणैः। ८ किञ्चिद्रूपमित्येतत्पदं यस्येत्यादिना विवृणोति। सदंशस्यासदंशस्य वा। ९ उभयात्मके वस्तुनि। १० सदंशग्रहणकाले। ११ अभिव्यक्तिः। १२ पुरुषाणाम्। १३ नरैः। १४ परिच्छित्तिः। १५ सदंशस्यासदंशस्य वा। १६ अभिव्यक्तेन सदंशेन असदंशेन वा। १७ पुंभिर्वस्तु। १८ य एवांशो गृह्यते स एवांशोस्ति न तद्द्वितीय इत्युक्ते आह। १९ गृह्यमाणसदंशस्य। २० सदंशग्रहणकाले। २१ असदंशः। २२ सदसदंशयोः। २३ संवेदनात्। २४ उभयात्मके वस्तुनि। २५ कैश्चिदित्येतत्पदं प्रत्यक्षाद्यवतार इत्यादिना आह। २६ तदा भवेत्। २७ स्यात्। २८ अभावस्य। २९ ग्रहीतुमिष्टे वस्तुनि। ३० तदनुत्पत्तेरित्येतदपरार्द्धार्थं विघटयति। ३१ वस्तुनः। ३२ एकत्वात्। ३३ भेदेप्युभयधर्मयोः प्रत्यक्षेण ग्रहणं कुतो न स्यादित्युक्ते आह। अन्योन्यमिति। ३४ सदंशस्योद्भूतत्वात्॥

युक्ता। प्रयोगः-यो यथाविधो विषयः स तथाविधेनैव प्रमाणेन परिच्छि(च्छे)द्यते, यथा रूपादिभावो भावरूपेण चक्षुरादिना, विवादास्पदीभूतश्चाभावस्तस्मादभावः (दभावेन) परिच्छेद्यत इति। उक्तं च-

५ "न तु (ननु) भावादभिन्नत्वात्सम्प्रयोगोस्ति तेन च।
न ह्यत्यन्तमभेदोस्ति रूपादिवदिहापि नः ॥ १ ॥
धर्मयोर्भेद इष्टो हि धर्म्यभेदेपि नः स्थितेः।
उद्भवाभिभवात्मत्वाद्ग्रहणं चावतिष्ठते ॥ २ ॥"
[मी० श्लो० अभाव० श्लो० १९-२०]

१० "मेयो यद्वदभावो हि मानमप्येवमिष्यताम्।
भावात्मके यथा मेये नाभावस्य प्रमाणता ॥
तथैवाभावमेयेपि न भावस्य प्रमाणता।"
[मी० श्लो० अभाव० ४५-४६] इति।

ततः शाब्दादीनां प्रमाणान्तरत्वप्रसिद्धेः कथं प्रत्यक्षानुमानभेदा-
१५ त्प्रमाणद्वैविध्यं परेषां व्यवतिष्ठेत ?

नन्वेवं प्रत्यक्षेतरभेदात्कथं भवतोपि प्रमाणद्वैविध्यव्यवस्था—तेषां प्रमाणान्तरत्वप्रसिद्धेरविशेषादिति चेत्? तेषां 'परोक्षेऽन्तर्भावात्' इति ब्रूमः। तथाहि—यदेकलक्षणलक्षितं तद्व्यक्तिभेदेप्येकमेव यथा वैशद्यैकलक्षणलक्षितं चक्षुरादिप्रत्यक्षम्, अवैशद्यै-
२० कलक्षणलक्षितं च शाब्दादीति। चक्षुरादिसामग्रीभेदेपि हि तज्ज्ञानानां वैशद्यैकलक्षणलक्षितत्वेनैवाभेदः प्रसिद्धः प्रत्यक्षरूपतानतिक्रमात्, तद्वत् शाब्दादिसामग्रीभेदेप्यवैशद्यैकलक्षितत्वेनैवाभेदः शाब्दादीनाम् परोक्षरूपत्वाविशेषात्। ननु परोक्षस्य स्मृत्यादिभेदेन परिगणितत्वात् उपमानादीनां प्रमाणान्तरत्वमेवे-

---

१ अभावो अभावप्रमाणपरिच्छेद्यः-तथाविधविषयात्। २ भावेन परिच्छेद्योऽभावेन वेति। ३ तथाविधविषयत्वात्। ४ पदार्थात्। ५ अभावस्य। ६ इन्द्रियाणाम्। ७ असदंशेन। ८ रश्मि। ९ यथा रूपादेरत्यन्तमभेदोस्ति, एवं भावाभावधर्मयोरत्यन्तमभेदो नास्ति। १० धर्मस्यात्यन्तमभेदो नास्तीति कुतः?। ११ स्वकीयप्रमाणाभ्यामुभयधर्मयोरपि ग्रहणं कस्मान्न स्यादित्युक्ते आह। १२ सदसदंशयोः। १३ प्रत्यक्षादिप्रमाणैः। १४ अग्रहणं च। १५ अभावरूपम्। १६ सौगतेन। १७ दृष्टान्तमाह। १८ बौद्धानाम्। १९ सौगतमतप्रसिद्धप्रमाणद्वैविध्याव्यवस्थितिप्रकारेण। २० जैनस्य। २१ वयं जैनाः। २२ शब्दादि धर्मि व्यक्तिभेदेप्येकं भवत्येकलक्षणलक्षितत्वात्। २३ स्पर्शनादि।

त्यप्यसमीक्षिताभिधानम्; तेषामत्रैवान्तर्भावात्। उपमानस्य हि प्रत्यभिज्ञानेऽन्तर्भावो वक्ष्यते।

अर्थापत्तेस्त्वनुमानेऽन्तर्भावः; तथा हि—अर्थापत्त्युत्थापकोऽर्थो[1]ऽन्यथा[2]नुपपद्यमानत्वेनानवगतः, अवगतो वाऽदृष्टार्थ[3]परिकल्पनानिमित्तं[4] स्यात्? न तावदनवगतः; अतिप्रसङ्गात्। येन[5] हि विनोपपद्यमानत्वेनावगतस्तमपि परिकल्पयेत्, येन विना नोपपद्यते तमपि वा न कल्पयेत्, अन्यथानुपपद्यमानत्वेनानवगतस्यार्थापत्त्युत्थापकार्थस्यान्यथानुपपद्यमानत्वे सत्यप्यदृष्टार्थपरिकल्पकत्वासम्भवात्। सम्भवे वा लिङ्गस्या[6]प्यनिश्चिताविनाभावस्य परोक्षार्थानुमापकत्वं स्यात्[7]। ततश्चेदं[8] नार्थापत्त्युत्थापकार्थाद् भिद्येत। नाप्यवगतः; अर्थापत्त्य[9]नुमानयोर्भेदाभावप्रसङ्गादेव, अविनाभावित्वेन प्रतिपन्नादेकस्मात्सम्बन्धिनो[10] द्वितीय[11]प्रतीतेरुभयत्राविशेषात्।

किञ्च, अस्या[12]न्यथा[13]नुपपद्यमानत्वावगमोऽर्थापत्तेरेव, प्रमाणान्तराद्वा? प्रथमपक्षेऽन्योन्याश्रयः; तथाहि—अन्यथानुपपद्यमानत्वेन प्रतिपन्नादर्थाद्[14]र्थापत्तिप्रवृत्तिः[15], तत्प्रवृत्तेश्चास्यान्यथानुपपद्यमानत्वप्रतिपत्ति[16]रिति। ततो[17] निराकृतमेतत्[18]—

"अविनाभाविता[19] चात्र[20] तदैव परिगृह्यते।
न प्राग[21]वगतेत्येवं सत्यप्[22]येषा[23] न कारणम्[24] ॥ १ ॥"
[मी० श्लो० अर्था० श्लो० ३०]

"[25]तेन[26] सम्बन्धवेलायां[27] सम्बन्ध्य[28]न्यतरो[29] ध्रुवम्।
अर्थापत्त्यैव गन्तव्यः[30] पश्चाद[31]स्त्वनुमानता ॥"
[मी० श्लो० अर्था० श्लो० ३३] इति।

१ अधःपूरादिः। २ उपरि वृष्टिं विना। ३ उपरि वृष्ट्यादिलक्षण। ४ कारणम्। ५ रासभागमनादिना। ६ धूमादेः। ७ नालिकेरद्वीपायातं नरं प्रति। ८ लिङ्गम्। ९ अन्यथा। १० धूमादिहेतोरधःपूरादिकल्पकाद्वा। ११ अग्न्यादिसाध्यस्योपरिवृष्ट्यादिकल्प्यस्य वा। १२ अधःपूरादेः। १३ उपरि वृष्ट्यादिकं विना। १४ अधःपूरात्। १५ अर्थापत्त्युत्थापकार्थावगमः। १६ अर्थस्य। १७ अन्योन्याश्रयो यतः। १८ वक्ष्यमाणम्। १९ अर्थापत्त्यनुमानयोरभेदः—निश्चिताविनाभाविलिङ्गप्रभवत्वाविशेषादित्युक्ते आह परः। २० अर्थापत्तिकल्पितेऽधःपूरादौ। २१ अर्थापत्त्युत्पत्तेः पूर्वमविनाभाविता नावसिता। २२ सती। २३ अर्थापत्तिं प्रति। २४ अतोऽनुमानादर्थापत्तेर्भेदः। २५ सम्बन्धे गृहीतेऽर्थापत्तेरनुमानरूपता भविष्यतीत्युक्ते आह। २६ येन कारणेनाविनाभाविताऽर्थापत्तिसमये एव गृह्यते तेन कारणेन सम्बन्धे। २७ ग्रहणस्य। २८ अनुमानस्य। २९ सम्बन्धिनोर्वृष्टिपूरयोर्मध्ये अन्यतरो वृष्टिः। ३० पूर्वमर्थापत्तिरेवेत्यर्थः। ३१ उत्तरकालं चेत् तदा।

अथ प्रमाणान्तरात्तद[1]वगमः; तत्किं भूयोदर्शनम्, विपक्षे[2]ऽनुपलम्भो वा? आद्यविकल्पे कास्य[3] भूयोदर्शनम्-साध्यधर्मिणि[4], दृष्टान्तधर्मिणि[5] वा? न तावदाद्यः पक्षः; शक्तेरतीन्द्रियतया[6] साध्यधर्मिण्यस्य[7] तदविनाभावित्वेन[8] भूयोदर्शनासम्भवात्। द्वितीयपक्षोऽप्यत[9] एवायुक्तः। किञ्च, दृष्टान्तधर्मिणि प्रवृत्तं भूयोदर्शनं साध्यधर्मिण्यप्यस्या[10]न्यथा[11]नुपपन्नत्वं निश्चाययति, दृष्टान्तधर्मिण्येव वा? तत्रोत्तरः पक्षोऽयुक्तः; न खलु दृष्टान्तधर्मिणि निश्चितान्यथा[12]नुपपद्यमानत्वोऽर्थो[13]ऽन्यत्र साध्यधर्मिणि तथात्वेनानिश्चितः स्वसाध्यं[14] प्रसाधयति अतिप्रसङ्गात्[15]। प्रथमपक्षे तु लिङ्गार्थापत्त्युत्थापकार्थयोर्भेदाभावः स्यात्।

ननु लिङ्गस्य दृष्टान्तधर्मिणि[16] प्रवृत्तप्रमाण[17]वशात्सर्वोपसंहारेण[18] स्वसाध्यनियतत्व[19]निश्चयः, अर्थापत्त्युत्थापकार्थस्य तु साध्यधर्मि[20]ण्येव प्रवृत्तप्रमाणा[21]त्सर्वोपसंहारेणा[22]दृष्टार्थान्यथानुपपद्यमानत्वनिश्चय[23] इत्यनयोर्भेदः; नैतद्युक्तम्; न हि लिङ्गं सपक्षा[24]नुगम[25]मात्रेण गमकम् वज्रस्य[26] लोहलेख्यत्वे पार्थिवत्ववत्, श्यामत्वे तत्पुत्रत्ववद्वा। किं तर्हि? 'अन्तर्व्याप्तिबलेन'[27] इति प्रतिपादयिष्यते[28], तत्र[29] च किं सपक्षानुगमेनेति च[30]? तदभावे गमकत्वमेवास्य कथमिति चेत्? यथा[31]र्थापत्त्युत्थापका[32]र्थस्य। तथा[33] चार्थापत्तिरेवाखिलमनुमानमिति षट्प्रमाणसंख्याव्याघातः। भवतु वा सपक्षानुगमा[34]नुगमभेदः[35], तथापि नैतावता तयोर्भेदः[36], अन्यथा[37] पक्षधर्मत्वसहि-

१ अर्थापत्त्युत्थापकार्थाविनाभावावगमः। २ यत्र वृष्टिर्नास्ति स विपक्षस्तस्मिन्। ३ अर्थापत्त्युत्थापकार्थस्य कल्प्याविनाभूतकल्पकस्य। ४ साध्यधर्मो दहनशक्तिलक्षणोऽस्याग्नेरस्तीति साध्यधर्मी तस्मिन्। ५ दृष्टान्त एव धर्मी। ६ अग्नौ। ७ दाहस्य साधनस्य। ८ शक्त्या। ९ दृष्टान्ते धर्मिणि शक्त्याविनाभूतस्फोटलक्षणकल्पकाऽदर्शनादेव। १० दाहस्य। ११ शक्तिं विना। १२ शक्तिं विना। १३ दाहः। १४ दाहस्य शक्तिम्। १५ मैत्रपुत्रत्वादेरपि स्वसाध्यं प्रति गमकत्वप्रसङ्गात्। १६ महानसादौ। १७ प्रत्यक्ष। १८ यो यो धूमवान्स सोऽग्निमानिति। १९ अविनाभाव। २० पक्षे। २१ अर्थापत्तिरूपात्। २२ यो यः स्फोटः स सर्वोपि शक्तियुक्ताग्निकार्यः। २३ स्फोटस्य। २४ पाषाणकाष्ठादि। २५ अन्वय। २६ वज्रं लोहलेख्यं पार्थिवत्वात्पाषाणवद्यल्लोहलेख्यं न तत्पार्थिवं न, यथाकाशम्। २७ अन्तर्व्याप्तिबलेनेति कोर्थः पक्षे एव साध्यसाधनयोर्व्याप्तिरन्तर्व्याप्तिः। २८ एतद्वयमेवानुमानाङ्गं नोदाहरणमित्यादिविचारावसरे। २९ अन्तर्व्याप्तिबलेनैव गमकत्वे च। ३० प्रतिपादयिष्यते। ३१ यथार्थापत्त्युत्थापकस्यान्तर्व्याप्तिबलेन गमकत्वं तथा लिङ्गस्यापि। ३२ दाहस्य। ३३ दृष्टान्ताभावे हेतोर्गमकत्वं च। ३४ दृष्टान्ते। ३५ अर्थापत्तेः। ३६ अर्थापत्त्यनुमानयोः। ३७ एतावता भेदश्चेत्।

तया अर्थापत्तेस्तद्रहितार्थापत्तिः प्रमाणान्तरं स्यादिति प्रमाणसंख्याव्याघातः। अस्ति चार्थापत्तिः पक्षधर्मत्वरहिता—

"नदीपूरोऽप्यधोदेशो दृष्टः सन्नुपरि स्थिताम्।
नियम्यो गमयत्येव वृत्तां वृष्टिं नियामिकाम्॥ १॥
पित्रोश्च ब्राह्मणत्वेन पुत्रब्राह्मणतानुमा।
सर्वलोकप्रसिद्धा न पक्षधर्ममपेक्षते॥ २॥
एवं यत्पक्षधर्मत्वं ज्येष्ठं हेत्वङ्गमिष्यते।
तत्पूर्वोक्तान्यधर्मस्य दर्शनाद्व्यभिचार्यते॥ ३॥" [ ]

इत्यभिधानात्।

नियमवतोऽर्थान्तरप्रतिपत्तेरविशेषात्तयोरभेदे स्वसाध्याविनाभाविनोऽर्थादर्थान्तरप्रतिपत्तेरत्राप्यविशेषात्कथमनुमानादर्थापत्तेर्भेदः स्यात्? अथ विपक्षेऽनुपलम्भात्तस्यान्यथानुपपद्यमानत्वावगमः; न; पार्थिवत्वादेरप्येवं स्वसाध्याविनाभावित्वावगमप्रसङ्गात् विपक्षेनुपलम्भस्याविशेषात्, सर्वात्मसम्बन्धिनोऽनुपलम्भस्यासिद्धानैकान्तिकत्वाच्च। नन्वेवं सकलानुमानोच्छेदः, अस्तु नाम तस्यायम् यो भूयोदर्शनाद्विपक्षेऽनुपलम्भाद्व्याप्तिं प्रसाधयति नास्माकम्, प्रमाणान्तरात्तत्प्रसिद्ध्यभ्युपगमाद्। भवतोपि ततस्तदभ्युपगमे प्रमाणसंख्याव्याघातः।

ननु वह्निस्वरूपस्याध्यक्षत एव प्रसिद्धेस्तदतिरिक्तातीन्द्रियशक्तिसद्भावे प्रमाणाभावात्कथं तत्रार्थापत्तेः प्रामाण्यम्? निजा हि

१ हेतोर्व्याप्यवृत्तित्वं पक्षधर्मत्वम्। २ उपरि वृष्टो देवो नदीपूरदर्शनान्यथानुपपत्तेरित्येतस्य अपक्षधर्मत्वं भिन्नदेशत्वात्। यत्र देशे वृष्टिस्तत्र नदीपूरो न। यत्र नदीपूरस्तत्र वृष्टिर्न। अत्र पक्षः उपरिदेशः। ३ पुनः। ४ व्याप्यः। ५ व्यापिकाम्। ६ पुत्रो ब्राह्मणः—पित्रोर्ब्राह्मण्यान्यथानुपपत्तेः। ७ अनुमा अर्थापत्तिः। अप्रत्यक्षा नो बुद्धिरित्याद्यभिधानात्। ८ उक्तप्रकारेण। ९ अन्यस्य पक्षाद्व्यतिरिक्तस्य धर्मो नदीपूरः पितृब्राह्मण्यं च। पूर्वोक्तो नदीपूरादिः स चासावन्यधर्मश्च तस्य। १० यो यो हेतुः स स पक्षधर्मत्वसहित इत्यस्य व्यभिचारः। पक्षधर्मरहितोपि हेतुर्विद्यते यतः। ११ स्फोटात्पूराच्च। १२ पक्षधर्मसहितासहितार्थापत्त्योः। १३ लिङ्गात्पूराच्च। १४ अग्निवृष्ट्योः। १५ अनुमानेऽर्थापत्तौ च। १६ आकाशे लोहलेख्यत्वस्याभावात्। १७ दाहस्य। १८ इति चेन्न। १९ साधनस्य। २० अलोहलेख्ये आकाशलक्षणे विपक्षे पार्थिवत्वस्यानुपलम्भप्रकारेण। २१ वज्रस्य लोहलेख्यत्व। २२ गगने। २३ विपक्षेनुपलम्भः सर्वसम्बन्धीत्यादिप्रकारेण। २४ परः। २५ दृष्टान्ते। २६ जैनानाम्। २७ ऊहात्। २८ मीमांसकस्य। २९ नैयायिकः। ३० वह्नित्वस्य। ३१ स्वरूपातिरिक्त।

शक्तिः पृथिव्यादीनां पृथिवीत्वादिकमेव तद[1]भिसम्बन्धादेव तेषां कार्यकारित्वात्। अन्त्या[2] तु चरम[3]सहकारिरूपा, तत्सद्भावे कार्यकरणादभावे चाकरणात्। तथाहि-सन्तोपि तन्तवो न कार्यमारभन्ते अन्त्यतन्तुसंयोगं विनेति सैव शक्तिस्तेषाम्। ननु[4] कथमर्थान्तरमर्थान्तरस्य[5] शक्तिः? अनर्थान्तरत्वे[6]पि समानमेतत्-'स[7] एव तस्यैव[8] न शक्तिः' इति। अथ यदि पूर्वेषां सहकार्येव शक्तिस्तर्हि तस्याप्यशक्त[9]स्याकारणत्वादन्या शक्तिर्वाच्येत्यनवस्था[10]; तदयुक्तम्; चरमस्य हि सहकारिणः पूर्वसहकारिण एव शक्तिः इतरेतराभिसम्बन्धेन कार्यकरणात्। स एव समग्राणां[11] भावः सामग्रीति भावप्रत्ययेनोच्यते, तेन सता[12] समग्र[13]व्यपदेशात्[14]।

किञ्च, असौ शक्तिर्नित्या, अनित्या वा स्यात्? नित्या चेत्सर्वदा कार्योत्पत्तिप्रसङ्गः। तथा च सहकारिकारणापेक्षा व्यर्थार्थानाम् तद्भावात्प्रागेव कार्यस्योत्पन्नत्वात्। अथानित्यासौ; कुतो जायते? शक्तिमतश्चेत्; किं शक्तात्, अशक्ताद्वा? शक्ताच्चेच्छक्त्यन्तरपरिकल्पनातोऽनवस्था[15] स्यात्। अशक्तात्तदुत्पत्तौ कार्यमेव[16] तथाविधात्ततः किन्नोत्पद्येत? अलमतीन्द्रियशक्तिकल्पनया।

तथा, शक्तिः शक्तिमतो भिन्ना, अभिन्ना वा स्यात्? अभिन्ना चेत्; शक्तिमात्रं शक्तिमन्मात्रं वा स्यात्? भिन्ना चेत्; 'तस्येयम्' इति व्यपदेशाभावः अनुपकारात्। उपकारे वा तया तस्योपकारः, तेन वाऽस्याः? प्रथमपक्षे शक्तिमतः शक्त्योपकारोऽर्थान्तरभूतः, अनर्थान्तरभूतो वा विधीयते? अर्थान्तरभूतश्चेद[19]नवस्था, तस्यापि[20]

१ पृथिवीत्वादिस्वरूप। २ शक्तिः। ३ अन्त्य। ४ जैनादिः। ५ बीजस्य। ६ नैयायिकः। ७ वह्निः। ८ वह्नेः। ९ अपरसहकारिशक्त्यभावादशक्तः। १० अतीन्द्रियया शक्त्या शक्तिमतः उपकारः क्रियते इत्यस्मिन्पक्षे शक्त्या क्रियमाण उपकारः शक्तिमतो भिन्नश्चेत्तदानवस्था। कथम्? उपकारोपि शक्तिमतो भिन्नो यदि तदा शक्तिमतोऽयमुपकार इति सम्बन्धो न स्यात् भिन्नत्वात्। उपकारेणापि स्वसम्बन्धसिद्ध्यर्थमुपकारान्तरं क्रियते चेत्तदा शक्तेनाऽशक्तेन वोपकारेणोपकारान्तरं क्रियते? न तावदशक्तेन-अशक्तस्योपकारकरणे अक्षमत्वात्। शक्तेन चेदुपकारेण स्वसम्बन्धसिद्ध्यर्थमुपकारान्तरं विधीयते तर्हि यया शक्त्या स्वयं शक्तः उपकारः सापि भिन्नाऽभिन्ना वा? भिन्ना चेत्तदोपकारस्येयं शक्तिरिति न-तस्माद्भिन्नत्वात्। शक्त्यापि स्वसम्बन्धसिद्ध्यर्थमुपकारान्तरं क्रियते इत्यादिप्रकारेणानवस्था। ११ कारणानाम्। १२ विद्यमानेन। १३ तन्तूनाम्। १४ इत्यनवस्था परिहृता। १५ यया शक्त्या शक्तिमान् शक्तः सापि नित्याऽनित्या वा? न तावन्नित्या-सर्वदा कार्योत्पत्तिप्रसङ्गात्। अथानित्या, सापि कुतो जायेत? शक्तिमतश्चेच्छक्तादशक्ताद्वेत्यादिप्रकारेण। १६ स्फोटादि। १७ शक्तिः। १८ शक्तिमतः सकाशात्। १९ पूर्ववत्। २० न केवलं शक्तेः।

व्यपदेशार्थमुपकारान्तरपरिकल्पनया[1] शक्त्यन्तरपरिकल्पनात्[2] । अनर्थान्तरभूतोपकारकरणे तु स[3] एव कृतः स्यात् । तथा च न शक्तिमानसौ[4] तत्कार्यत्वाप्रसिद्धतत्कार्यत्वात्[5] । शक्तिमतापि-शक्त्यन्तरान्वितेन, तद्रहितेन वा शक्तेरुपकारः क्रियते? आद्यपक्षे शक्त्यन्तराणां ततो भेदः, अभेदो वा? उभयत्रानन्तरोक्तोभयदोषानुषङ्गोऽनवस्था च । तद्रहितेनानेन शक्तेरुपकारे तु[6] प्राच्यशक्तिकल्पनाप्यपार्थिका[7] तद्व्यतिरेकेणैव कार्यस्याप्युत्पत्तेरुपकारवत्[8][9] । शक्तिशक्तिमतोर्भेदाभेदपरिकल्पनायां विरोधादिदोषानुषङ्गः ।

तथा, असौ किमेका, अनेका वा? तत्रैकत्वे शक्तेर्युगपदनेककार्योत्पत्तिन[10] स्यात् । अनेकत्वेपि अनेकशक्तिमात्मन्यर्थोनेकशक्तिभिर्बिभृयादित्यनवस्थाप्रसङ्ग[11] इति ।

अत्र प्रतिविधीयते । किं ग्राहकप्रमाणाभावाच्छक्तेरभावः[12], अतीन्द्रियत्वाद्वा? तत्राद्यः पक्षोऽयुक्तः; कार्योत्पत्त्यन्यथानुपपत्तिजनितानुमानस्यैव[13] तद्ग्राहकत्वात् । ननु सामग्र्यधीनोत्पत्तिकत्वात्[14] कार्याणां कथं तदन्यथानुपपत्तिर्यतोऽनुमानात्तत्सिद्धिः स्यात्; इत्यप्यसमीचीनम्; यतो नास्माभिः[15] सामग्र्याः कार्यकारित्वं प्रतिषिध्यते, किन्तु प्रतिनियतायास्तस्याः प्रतिनियतकार्यकारित्वम् अतीन्द्रियशक्तिसद्भावमन्तरेणासम्भाव्यमित्यसावप्यभ्युपगन्तव्या[16] । कथमन्यथा प्रतिबन्धकमणिमन्त्रादिसन्निधानेप्यग्निः स्फोटादिकार्यं न कुर्यात् सामग्र्यास्तत्रापि सद्भावात्[17]? तेन[18][19] ह्यग्नेः स्वरूपं प्रतिहन्यते, सहकारिणो वा? न तावदाद्यः पक्षः क्षेमङ्करः; अग्निस्वरूपस्य तदवस्थतयाध्यक्षेणैवाध्यवसायात् । नापि द्वितीयः; सहकारिस्वरूपस्याप्यङ्गुल्यग्निसंयोगलक्षणस्याविकलतयोपलक्षणात् । अतः शक्तेरेवानेन[19] प्रतिबन्धोभ्युपगन्तव्यः[20] ।

---

१ शक्तिमतोऽयमुपकार इति सम्बन्धव्यपदेशार्थम् । २ उपकारस्य । ३ शक्तिमान् । ४ वह्निः । ५ उपकारवत् । ६ द्वितीयपक्षे । ७ निष्फला । ८ स्फोटादेः । ९ शक्तिरहितेन शक्तिमताऽग्निना उपकारस्योत्पत्तिर्यथा । १० अन्धकारनाश, अर्थप्रकाश, वर्त्तिकादाह, तैलशोषादि । ११ अर्थोऽनेकशक्तीरेकशक्त्या बिभर्त्ति चेत्तदानेकशक्तीनामेकत्वप्रसङ्गः—एकशक्त्या धाप्यमानत्वात्तदन्यतमशक्तिवत् । १२ अतीन्द्रियायाः । १३ वह्निलक्षणोर्थो दहनशक्तियुक्तस्तत्र: स्फोटादिकार्योत्पत्त्यन्यथानुपपत्तेरिति । १४ समवाय्यसमवायिनिमित्तकारणानां परस्परसम्बन्धलक्षणा सामग्री । १५ जैनैः । १६ अतीन्द्रियशक्त्यभावेपि सामग्र्याः कार्यकारित्वे । १७ सामग्र्याः प्रतिबन्धकसन्निधाने सद्भावो नास्तीत्युक्ते आह । १८ प्रतिबन्धकेन । १९ प्रतिबन्धकमणिमन्त्रादिना । २० परेण भवता ।

ननु चानेन[1] नाग्नेः सहकारिणो वा स्वरूपं प्रतिहन्यते, किन्तु स्वभाव[2] एव निवर्त्यते, अतः स्फोटादिकार्यस्यानुत्पत्तिः प्रतिबन्धकमणिमन्त्राद्यभावस्यापि तदुत्पत्तौ सहकारित्वात्, तदभावे[3] तदनुत्पत्तेः; इत्यप्यसमीक्षिताभिधानम्; उत्तम्भक[4]मणिसन्निधाने कार्यस्यानुत्पत्तिप्रसङ्गात्[5]। न खलु तदा[6] प्रतिबन्धकमण्याद्यभावोस्ति प्रत्यक्षविरोधात्। ननु यथाग्निः प्रतिबन्धकमण्याद्यभावसहकारी स्फोटादिकार्यं करोति, एवं प्रतिबन्धकमण्यादिः उत्तम्भकमण्याद्यभावसहकारी तत्प्रतिबन्धं करोति, अतो न तत्सन्निधाने कार्यस्यानुत्पत्तिरिति। अस्तु नामैतत्[7]; तथापि-प्रतिबन्धकोत्तम्भकमणिमन्त्रयोरभावेऽग्निः स्वकार्यं करोति, न वा? न तावदुत्तरः पक्षः; प्रत्यक्षविरोधात्। प्रथमपक्षे तु कस्याभावः अग्नेः सहकारी-तयोरन्यतरस्य, उभयस्य वा? न तावदुभयस्य; अन्यतरा[8]भावे कार्यानुत्पत्तिप्रसङ्गात्। अन्यतरस्य चेत्किं प्रतिबन्धकस्य, उत्तम्भकस्य वा? प्रतिबन्धकस्य चेत्; स एवोत्तम्भकमण्यादिसन्निधाने कार्यानुत्पादप्रसङ्गः तदा तस्याभावाप्रसिद्धेः। उत्तम्भकस्य चेत्; अत्राप्ययमेव[9] दोषः। न चाभावस्य कार्यकारित्वं घटते[10] भावरूपतानुषङ्गात्[11], अर्थक्रियाकारित्वलक्षणत्वात्परमार्थसतो लक्षणान्तराभावात्[12]।

कश्चास्या[13]भावः कार्योत्पत्तौ सहकारी स्यात्-किमितरेतराभावः[14], प्रागभावो वा स्यात्, प्रध्वंसो वा, अभावमात्रं वा? न तावदितरेतराभावः; प्रतिबन्धकमणिमन्त्रादिसन्निधानेप्यस्य सम्भवात्। नापि प्रागभावः; तत्प्रध्वंसोत्तरकाले कार्योत्पत्त्यभावप्रसङ्गात्। नापि प्रध्वंसः प्रतिबन्धकमण्यादिप्रागभावावस्थायां कार्यस्यानुत्पत्तिप्रसङ्गात्। न च भावादर्थान्तरस्याभावस्य सद्भावोस्ति, तस्या[15]नन्तरमेव निराकरिष्यमाणत्वात्। अतो निराकृतमेतत्-'यस्यान्वयव्यतिरेकौ कार्येणानुक्रियेते सोऽभावस्तत्र सहकारी सहकारिणामनियमात्[16]' इति।

---

१ प्रतिबन्धकेन। २ स्वस्य प्रतिबन्धकस्य भावः। ३ अभावरूपकारणाभावे। ४ कार्योत्थापक। ५ प्रतिबन्धकमण्याद्यभावस्य सहकारिणोऽभावात्। ६ उत्तम्भकमणिसन्निधानकाले। ७ प्रतिबन्धकाभावे उत्तम्भकसद्भावे चोभयसद्भावे च। ८ उत्तम्भकस्याभावः सहकारी चेदित्यर्थः। ९ उत्तम्भकसद्भावे कार्यानुत्पादप्रसङ्गलक्षणः। १० अभावः कार्यकारी चेत्तर्हीति शेषः। ११ तदोत्तम्भकस्याभावाविशेषाभावादुत्तम्भकसद्भावे कार्यं न स्याच्च। १२ सत्तासम्बन्धः प्रमाणसम्बन्धो वेत्यादि। १३ प्रतिबन्धकस्य। १४ प्रतिबन्धक उत्तम्भको नेति। १५ तुच्छाभावस्य। १६ सहकारिणो भावा अभावा एव वा भवन्तीति नियमो नास्ति।

कथं चैवंवादिनो[1] मन्त्रादिना कञ्चित्प्रति प्रतिबद्धोप्यग्निः स एवान्यस्य स्फोटादिकार्यं कुर्यात्? प्रतिबन्धकाभावस्य सहकारिणः कस्यचिदप्यभावात्[2]। न चास्मत्पक्षेप्येतच्चोद्यं[3] समानम्, वस्तुनोऽनेकशक्त्यात्मकत्वात्कस्याश्चित्केनचित्[4] कञ्चित्[5] [प्रति] प्रतिबन्धेप्यन्यस्याः प्रतिबन्धाभावात्। नाप्यभावमात्रं सहकारि[6]; वस्तुनोर्थान्तरस्याभावस्याभावे तद्गतसामान्यस्याप्यसम्भवात्। न चाभावस्य सामान्यं सम्भवति, द्रव्यगुणकर्मान्यतमरूपतानुषङ्गात्। ततः[7] प्रतिबन्धकमण्यादिप्रतिहतशक्तिर्वह्निः[8] स्फोटादिकार्यस्यानुत्पादकस्तद्विपरीतस्तूत्पादक इत्यभ्युपगन्तव्यम्।

ततो निराकृतमेतत् 'कार्यं[9] स्वोत्पत्तौ प्रतिबन्धकाभावोपकृतोभयवाद्यविवादास्पदकारकव्यतिरिक्तानपेक्षम्, तन्मात्रादुत्पत्ता[10]वनुपपद्यमानबाधकत्वात्, यत्तु[11] यतो[12] व्यतिरिक्तमपेक्षते[13] न तत्तन्मात्रजन्मत्वे[14]ऽनुपपद्यमानबाधकम् यथा तन्तुमात्रापेक्षया पटः, न च तथेदम्, तस्माद्यथोक्तसाध्यम्' इति; हेतोरसिद्धेः; तन्मात्रादुत्पत्तौ कार्यस्य प्रागुक्तन्यायेनानेकबाधकोपपत्तेः।

स्वरूपसहकारिव्यतिरेकेण शक्तेः प्रतीत्यभावादसत्त्वे वा स्रग्वनितादिदृष्टकारणकलापव्यतिरेकेणादृष्टस्या[15]प्यप्रतीतितोऽसत्त्वं स्यात्, तथा[16] चासाधारण[17]निमित्तकारणाय दत्तो[18] जलाञ्जलिः। कथं चैवंवादिनो[19] जगतो महेश्वरनिमित्तत्वं सिध्येत्? विचित्रक्षित्यादिदृष्टकारणकलापादेवाङ्कुरादिविचित्रकार्योत्पत्तिप्रतीतेः। अनुमानात्तस्य तन्निमित्तत्वसाधने शक्तेरप्यत एव सिद्धिरस्तु। तथाहि-यत्कार्यम् तदसाधारणधर्मा[20]ध्यासितादेव कारणादा[21]विर्भवति[22] सहकारीतर[23]कारणमात्राद्वा न भवति[24] यथा सुखा[25]ङ्कुरादि[26], कार्यं चेदं निखिलमाविर्भाववद्वस्त्विति। एतेनैवातीन्द्रियत्वा[27]त्तदभावो[28]ऽपास्तः।

यदप्युक्तम्-'पृथिव्यादीनां पृथिवीत्वादिकमेव[29] निजा शक्तिः' इत्यादि; तदप्यपेशलम्; मृत्पिण्डादिभ्योपि पटोत्पत्तिप्रसङ्गात्

१ कार्योत्पत्तिं प्रत्यभावः सहकारीत्येवं वादिनः। २ प्रागभावादिरूपस्य। ३ जैन। ४ मन्त्रादिना। ५ नरं प्रति। ६ अभावः सहकारी विचार्यमाणो न घटते यतः। ७ स्फोटादिकार्ये धर्मि। ८ वह्नि। ९ अतीन्द्रियशक्तेः। १० कारकमात्रात्। ११ पटादिकार्यम्। १२ तन्तुभ्यः। १३ वेमादिकम्। १४ तन्तुमात्र। १५ पुण्यस्य। १६ पुण्यस्याऽसत्त्वे सति। १७ विशेष। १८ परेण भवता। १९ स्वरूपसहकारिव्यतिरेकेण शक्तेः प्रतीत्यभावः इत्येवंवादिनः। २० शक्ति। २१ पुण्यमहेश्वरादेः। २२ स्वपक्षसिद्धौ साध्यम्। २३ उपादान। २४ परपक्षप्रतिक्षेपे साध्यमिदम्। २५ सुखेऽदृष्टमसाधारणकारणम्। २६ अङ्कुरेऽसाधारणमीश्वरः। २७ द्वितीयविकल्पोयम्। २८ शक्त्यभावः। २९ सामान्यम्।

सहकारीतरशक्तेस्तत्राप्यविशेषात्। अथ न पृथिवीत्वादिमात्रोपलक्षितानामर्थानां पटाद्युत्पत्तौ व्यापारो येनातिप्रसङ्गः स्यात्, तन्तुत्वाद्यसाधारणनिजशक्त्युपलक्षितानामेव तत्र तेषां व्यापारात्; इत्यप्यसाम्प्रतम्; तन्तुत्वाद्युपलक्षितानां दग्धकुथिताद्य-
५ र्थानामपि तज्जनकत्वप्रसङ्गात्। अवस्थाविशेषसमन्वितानां तन्तूनां कार्यारम्भकत्वादयमदोषः; इत्यपि मनोरथमात्रम्; शक्तिविशेषमन्तरेणावस्थाविशेषस्यैवासम्भवात्, अन्यथा दग्धादिस्वभावानामपि तेषां स स्यात्।

यच्चोच्यते-शक्तिर्नित्याऽनित्या वेत्यादिः तत्र किमयं द्रव्यशक्तौ,
१० पर्यायशक्तौ वा प्रश्नः स्यात्, भावानां द्रव्यपर्यायशक्त्यात्मकत्वात्? तत्र द्रव्यशक्तिर्नित्यैव अनादिनिधनस्वभावत्वाद्द्रव्यस्य। पर्यायशक्तिस्त्वनित्यैव सादिपर्यवसानत्वात्पर्यायाणाम्। न च शक्तेर्नित्यत्वे सहकारिकारणानपेक्षयैवार्थस्य कार्यकारित्वानुषङ्गः; द्रव्यशक्तेः केवलायाः कार्यकारित्वानभ्युपगमात्। पर्यायशक्तिस-
१५ मन्विता हि द्रव्यशक्तिः कार्यकारिणी, विशिष्टपर्यायपरिणतस्यैव द्रव्यस्य कार्यकारित्वप्रतीतेः। तत्परिणतिश्चास्य सहकारिकारणापेक्षया इति पर्यायशक्तेस्तदैव भावान्न सर्वदा कार्योत्पत्तिप्रसङ्गः सहकारिकारणापेक्षावैयर्थ्यं वा। कथमन्यथा अदृष्टेश्वरादेः केवलस्यैव सुखादिकार्योत्पादनसामर्थ्ये सर्वदा कार्योत्पादकत्वं सह-
२० कारिकारणापेक्षावैयर्थ्यं वा न स्यात्?

यदप्यभिहितम्-शक्तादशक्ताद्वा तस्याः प्रादुर्भाव इत्यादि; तत्र शक्तादेवास्याः प्रादुर्भावः। न चानवस्था दोषाय; बीजाङ्कुरादिवदनादित्वात्तत्प्रवाहस्य। वर्त्तमाना हि शक्तिः प्राक्तनशक्तियुक्तेनार्थेनाविर्भाव्यते, सापि प्राक्तनशक्तियुक्तेनेति पूर्वपूर्वाव-
२५ स्थायुक्तार्थानामुत्तरोत्तरावस्थाप्रादुर्भाववत्। कथं चैवंवादिनोऽदृष्टस्याप्याविर्भावो घटते? तद्ध्यात्मना अदृष्टान्तरयुक्तेना-

---

१ चक्रचीवरादि। २ पृथिवीत्वादि। ३ अहत्वादि। ४ पटादौ। ५ तन्त्वाद्यर्थानाम्। ६ तन्तुत्वाद्यविशेषात्। ७ शक्तिविशेषं विनावस्थाविशेषो भविष्यति चेत्। ८ शक्तिरहित। ९ तथा च सति पटादिजनकत्वप्रसङ्गः स्यात्। १० द्रव्यशक्तिः पर्यायशक्तिरसिद्धेत्युक्ते सत्याह। ११ द्रवति द्रोष्यति अदुद्रुवदिति द्रव्यम्। १२ परापरविवर्तव्यापि द्रव्यमूर्द्धता मृदिव स्थासादिषु। १३ पर्यायशक्तिरहितायाः। १४ जैनैः। १५ कथमिति चेदाह। १६ स्रग्वनितादि। १७ सहकारिकारणानन्तरम्। १८ परेणाङ्गीकृते सति। १९ शक्तेः। २० शक्तिमतः। २१ शक्ति। २२ अर्थेन। २३ शक्तादशक्ताद्वेत्येवंवादिनः।

विर्भाव्यते, तद्रहितेन[1] वा? प्रथमपक्षेऽनवस्था । द्वितीयपक्षे तु मुक्तात्मवत्तस्य[2] तज्जनकत्वासम्भवः[3] ।

किञ्च, कथं वा महेश्वरस्याखिलकार्यकारित्वम्? सहकारि[4]रहितस्य तत्कारित्वे सकलकार्याणामेकदैवोत्पत्तिप्रसङ्गात् । तत्सहितस्य तत्कारित्वे तु तेपि सहकारिणोऽन्यसहकारिसहितेन[5] कर्त्तव्या इत्यनवस्था । पूर्वपूर्वादृष्टसहकारिसमन्वितयोरात्मेश्वरयोः उत्तरोत्तरादृष्टाखिलकार्यकारित्वे निखिलभावानां पूर्वपूर्वशक्तिसमन्वितानामुत्तरोत्तरशक्त्युत्पादकत्वमस्तु, अलं मिथ्याभिनिवेशेन[6] ।

यच्चान्यदुक्तम्-शक्तिः शक्तिमतो भिन्नाऽभिन्ना वेत्यादि; तदप्ययुक्तम्; तस्यास्तद्वतः कथञ्चिद्भेदाभ्युपगमात्[7] । शक्तिमतो हि शक्तिर्भिन्ना तत्प्रत्यक्षत्वेप्यस्याः प्रत्यक्षत्वाभावात्, कार्यान्यथानुपपत्त्या[8] तु प्रतीयमानासौ । तद्वतो[9] विवेकेन[10] प्रत्येतुमशक्यत्वादभिन्नेति । न चात्र[11] विरोधाद्यवतारः[12]; तदात्मकवस्तुनो जात्यन्तरत्वात्[13] मेचकज्ञानवत्[14]सामान्यविशेषवच्च[15] ।

यत्पुनरुक्तमेकानेका वेत्यादि, तत्रार्थानामनेकैव शक्तिः । तथाहि-अनेकशक्तियुक्तानि कारणानि विचित्रकार्यत्वा[16]न्नार्थवत् । विचित्रकार्याणि वा कारणशक्तिभेदनिमित्तकानि तत्त्वा[17]द्विभिन्नार्थकार्यवत् । न[18] हि कारणशक्तिभेदमन्तरेण कार्यनानात्वं युक्तं रूपादिज्ञानवत्, यथैव हि कर्कटिकादौ रूपादिज्ञानानि रूपादिस्वभावभेदनिबन्धनानि तथा[19] क्षणस्थितेरेकस्मादपि प्रदीपादेर्भावाद् वर्त्तिकादाहतैलशोषादिविचित्रकार्याणि[20] तच्छक्तिभेदनिमित्तकानि व्यवतिष्ठन्ते, अन्यथा[21] रूपादेर्नानात्वं न स्यात् । चक्षुरादि[22]सामग्रीभेदादेव हि तज्ज्ञानप्रतिभासभेदः स्यात्, कर्कटिकादिद्रव्यं तु रूपादिस्वभावरहितमेकमनंशमेव स्यात् । चक्षुरादिबुद्धौ[23]

१ अदृष्टान्तरपरिकल्पनया आत्मन इति पक्षे । २ संसार्यात्मनः । ३ अदृष्टरहितत्वात् । ४ अदृष्टविशेष । ५ महेश्वरेण । ६ अनवस्थाद्यापादनेन । ७ जैनैः । ८ अग्निं विना धूमवत् । ९ पदार्थात् । १० भेदेन । ११ शक्तेः कथञ्चिद्भेदाभेदपक्षे । १२ भेदाभेद । १३ भेदादभेदाद्वा जात्यन्तरत्वात् । १४ दहनो दाहशक्तियुक्तो दाहान्यथानुपपत्तेः[?] । १५ स्वव्यक्तिष्वनुस्यूतत्वात्सामान्यरूपता गोत्वस्य । अश्वत्वादिभ्यो व्यावर्त्तमानत्वाद्विशेषरूपता यथा तथा सर्वत्र प्रतिपत्तव्यम् । सामान्यमेव विशेषस्तस्यैव तद्वत् । १६ विचित्राणि कार्याणि येषां तानि विचित्रकार्याणि तेषां भावस्तत्त्वं तस्माद्धेतोः । १७ विचित्रकार्यत्वात् । १८ सन्दिग्धानैकान्तिकत्वे सत्याह । १९ तैलशोषादिशक्तिभेदं विनापि-तैलशोषादिकार्याणि स्युरिति चेत् । २० तैलशोषादि । २१ तैलशोषादिशक्तिं विनापि शक्तिभेदनिमित्तकानि यदि तैलशोषादिकार्याणि स्युः । २२ किन्तु । २३ रूपादिस्वभावसमर्थनार्थं परः प्राह ।

प्रतिभासमानत्वाद्रूपादेः कथं कर्कटिकादिद्रव्यस्य तद्रहितत्वमिति चेत्? तर्हि तैलशोषादिविचित्रकार्यानुमानबुद्धौ शक्तिनानात्वस्याप्यर्थानां प्रतीतेः कथं तद्रहितत्वं स्यात्? प्रत्यक्षबुद्धौ प्रतिभासमाना रूपादय एव परमार्थसन्तो न त्वनुमानबुद्धौ प्रतिभासमानाः
५ शक्त्यर्थः; इत्यपसु(प्यसु)न्दरम्; अदृष्टेश्वरादेरपरमार्थसत्त्वप्रसङ्गात्। प्रदीपादिद्रव्यस्यैकस्य वर्त्तिकादिसहकारिसामग्रीभेदात्तद्दाहादिकार्यनानात्वं न पुनस्तच्छक्तिस्वभावभेदात्; इत्यप्यविचारितरमणीयम्; रूपादेरप्यभावप्रसङ्गात्। शक्यं हि वक्तुं कर्कटिकादिद्रव्ये चक्षुरादिसामग्रीभेदाद्रूपादिप्रत्ययप्रतिभासभेदो, न पुना
१० रूपाद्यनेकस्वभावभेदादिति । तन्न प्रमाणप्रतिपन्नत्वाद्रूपादिवच्छक्तीनामपलापो युक्त इति।

यत्पुनरर्थापत्त्यर्थापत्तेरुदाहरणं वाचकसामर्थ्यात्तन्नित्यत्वज्ञानमुक्तम्; तदप्ययुक्तम्; वाचकसामर्थ्यस्य तन्नित्यत्वमन्यथाभवनासिद्धेः। निराकरिष्यते चाग्रे नित्यत्वं शब्दस्येत्यलमतिप्रसङ्गेन।

१५ याप्यभावार्थापत्तिः-जीवंश्चैत्रोऽन्यत्रास्ति गृहेऽभावादिति; तत्रापि किं गृहे यत्तस्य जीवनं तदेव गृहे चैत्राभावस्य विशेषणम्, उतान्यत्र? प्रथमपक्षे तत्राभावस्य विशेष्यस्यासिद्धिः, यदा हि चैत्रो गृहे जीवति कथं तदा तत्र तदभावो येनासौ तेन विशेष्येत? यदा च तत्र तदभावो, न तदा तत्र तज्जीवनमिति। द्वितीयपक्षे
२० तु विशेषणस्यासिद्धिः, न खलु चैत्रस्यान्यत्र यज्जीवनं तदर्थापत्त्युदयकाले तथाविधप्रदेशविशेषणत्वेन कुतश्चित्प्रतीयते अर्थापत्तेर्वैयर्थ्यप्रसङ्गात्। येनैव हि प्रमाणेन तज्जीवनं प्रतीयते तेनैव तत्सद्भावोपि। न ह्यप्रतिपन्ने देवदत्ते तद्धर्मो जीवनं प्रत्येतुं शक्यम् अतिप्रसङ्गात्। न चाप्रतीतस्य विशेषणत्वमतं एव । अर्थापत्त्यैव

१ प्रदीपो नानाशक्तियुक्तः तैलशोषादिनानाकार्यान्यथानुपपत्तेरिति। २ दूषणमीत्येवं वचः। ३ ज्ञाने। ४ निरंशत्वप्रतिपादनाय। ५ शब्द। ६ शब्दनित्यत्वं प्रति। ७ अन्यथा नित्यत्वं विना न भवनं तस्य। ८ अविनाभावस्यासिद्धेः। ९ जीवतः। १० बहिर्जीवनम्। ११ विशेष्यस्यासिद्धिमुद्भावयन्ति। १२ चैत्राभावः। १३ गृहजीवनेन। १४ चैत्रस्य बहिर्जीवनं चैत्राभावविशेषणमित्यभिलन्धी। १५ जीवनस्य। १६ असिद्धिमेव प्रदर्शयन्ति। १७ बहिः। १८ अन्यप्रदेश। १९ प्रमाणात्। २० विद्भिः। २१ अन्यथा। २२ अर्थापत्तेर्वैयर्थ्यप्रसङ्गमेव सूचयन्ति। २३ अतोऽर्थापत्त्या चैत्रसद्भावपरिकल्पनं व्यर्थम्। २४ जीवनमेव प्रतीयते न तत्सद्भाव इति परेणोक्ते जैनः प्राह। २५ मेरुप्रतीत्यभावेपि तद्रूपादिप्रतिपत्तिप्रसङ्गात्। २६ जीवनस्य। २७ दण्डाऽज्ञाने दण्डिज्ञानप्रसङ्गात्।

तत्सिद्धा[1]वितरेतराश्रयः-सिद्धे हि तया तस्यान्यत्र जीवने तद्विशे[2]-षितात्त[3]त्प्रदेशाभावादर्थापत्त्युदयः, ततश्च तत्सिद्धिरिति ।

अथ न निश्चितं सज्जीवनं तद्गृहाभावविशेषणं येनायं[4] दोषः, किन्तु 'यदि[5] गृहेऽसन् जीवति तदान्यत्रास्ति' इत्यभिधीयते; तर्हि संशयरूपत्वा[6]त्तस्याः कथं प्रामाण्यम्[7]? या तु प्रमाणं[8] सानु-मानमेव । पञ्चा[9]वय[10]वत्वमप्यत्र सम्भवत्येव । तथाहि-जीवतो देवदत्तस्य गृहेऽभावो बहिस्तत्सद्भावपूर्वकः जीवतो[11] गृहेऽभा-वत्वात् प्राङ्गणे स्थितस्य गृहे जीवदभाववत् । यद्वा, देवदत्तो बहिरस्ति गृहासंसृष्टजीवनाधारत्वात्स्वा[12]त्मवत् । कथं पुनर्देवद-त्तस्यानुपलभ्यमानस्य जीवनं सिद्धं येन त[13]द्धेतुविशेषणमित्यसत्; प्र[14]सङ्गसाधनोपन्यासात् ।

यच्च निषे[15]ध्याधार[16]वस्तुग्रहणादि[17]सामग्रीत इत्याद्युक्तम्; तत्र निषेध्याधारो वस्त्व[18]न्तरं प्रयोगि[19]संसृष्टं प्रतीयते, असंसृष्टं वा? तत्राद्यपक्षोऽयुक्तः; प्रतियोगिसंसृष्टवस्त्वन्तरस्या[20]ध्यक्षेण प्रतीतौ तत्र त[21]दभावग्राहकत्वेनाभावप्रमाणप्रवृत्तिविरोधात् । प्रवृत्तौ वा न प्रा[22]माण्यम्; प्रतियोगिनः सत्त्वेपि तत्प्रवृत्तेः । द्वितीयपक्षे तु अभावप्रमाणवैयर्थ्यम्, प्रत्यक्षेणैव प्रतियोगिनोऽभावप्रतिपत्तेः । अथ प्रतियोग्यसंसृष्टता[23]वगमो वस्त्वन्तरस्या[24]भावप्रमाणसम्पाद्यः; तर्हि त[25]दप्यभावप्रमाणं प्रतियोग्यसंसृष्टवस्त्वन्तरग्रहणे सति प्रव[26]-र्तेत, तदसंसृष्टतावगमश्च पुनरप्यभावप्रमाणसम्पाद्य इत्यन-वस्था । प्रथमाभावप्रमाणात्तदसंसृष्टतावगमे चान्योन्या[27]श्रयः ।

---

१ बहिर्जीवन । २ बहिर्जीवन । ३ गृह । ४ इतरेतराश्रयः । ५ यदि जीवति तदा बहिरस्ति यदि न जीवति तदा नास्तीत्यर्थः । ६ जीवनस्य संशयितत्वात् । ७ अन्यत्र जीवनानिश्चयात् । ८ यथार्थापत्तिर्यथाऽप्रमाणं तथा सर्वाप्यप्रमाणं स्यादित्याशंकायामाह । ९ पञ्चावयववत्त्वाभावे कथमर्थापत्तेरनुमानत्वमिति परेणोक्ते सत्याह । १० प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः । ११ मृतेन व्यभिचारपरिहारार्थमेतत् । १२ प्रमातृस्वरूपवत् । १३ अभावरूपहेतोः । १४ साध्यसाधनयोर्व्याप्यव्यापकभावसिद्धौ व्याप्याभ्युपगमो व्यापकाभ्युपगमनान्तरीयको यत्र (अर्थे) प्रदर्श्यते तत्प्रसङ्गसाधनम् । १५ घट । १६ भूतल । १७ आदिपदेन प्रतिषेध्यस्मरणमुपलब्धिलक्षणप्राप्तस्य घटादेरनुपलम्भश्च । १८ भूतलम् । १९ घटेन । २० रहितम् । २१ घटाभाव । २२ अभावप्रमाणस्य । २३ अभावावगमः । २४ भूतलस्य । २५ आद्यम् । २६ उत्पद्येत । २७ प्रथमाभावप्रमाणात्प्रतियोग्यसंसृष्टतावगमः तदवगमश्च प्रथमाभावप्रमाणोदये इति ।

प्रतियोगिनोपि[1] स्मरणं वस्त्वन्तरसंसृष्टस्य[2], असंसृष्टस्य वा? यदि संसृष्टस्य; तदाऽभावप्रमाणाप्रवृत्तिः[3]। अथासंसृष्टस्य; ननु प्रत्यक्षेण वस्त्वन्तरासंसृष्टस्य प्रतियोगिनो ग्रहणे तथाभूतस्यास्य स्मरणं स्यान्नान्यथा। तथाभ्युपगमे च तदेवा[4]भावप्रमाणवैयर्थ्यं
५ 'वस्त्वसङ्करसिद्धिश्च तत्प्रामाण्यं समाश्रिता'[5] इत्यादिग्रन्थविरोधश्च[6]। वस्तुमात्र[7]स्याध्यक्षेण[8] ग्रहणाभ्युपगमे[9] प्रतियोगीतर[10][11]व्यवहारा[12]भावः।

यदि चानुभूतेपि[13] भावे[14] प्रतियोगिस्मरणमन्तरेणाभाव[15]प्रतिपत्तिर्न स्यात्, तर्हि प्रतियोग्यप्यनुभूत एव स्मर्त्तव्यो[16] नान्यथा अति-
१० प्रसङ्गात्। तदनुभवश्चान्या[17]संसृष्टतयाऽभ्युपगन्तव्यः[18], तस्याप्य[19]न्या[20]संसृष्टताप्रतिपत्तिस्ततो[21]ऽन्यत्र[22] प्रतियोगिस्मरणात् तत्राप्ययमेव न्याय इत्यनवस्था[23]। अथ[24] प्रतियोगिनो भूतलस्य स्मरणाद् घटस्यान्या[25]संसृष्टता प्रतीयते, तत्स्मरणाच्च भूतलस्य[26] तदेतरेतराश्रयः[27]; तथाहि—न यावद्धटासंसृष्टभूभागप्रतियोगिस्मरणाद् घटस्य भूतलासं-
१५ सृष्टताप्रतिपत्तिर्न तावत्तत्स्मरणा[28]द्भूतलस्य घटासंसृष्टताप्रतिपत्तिः, यावच्च भूतलस्य घटासंसृष्टता न प्रतीयते न तावत्तत्स्मरणेन[30] घटस्येति[31]। ततो[32]ऽन्यप्रतियोगिस्मरणमन्तरेणैवाभावांशो[33] भावांशवत्प्रत्यक्षोऽभ्युपगन्तव्यः[34]। भूतलासंसृष्टघटदर्शनाहितसंस्कारस्य[35] च पुनर्घटासंसृष्टभूभागदर्शनानन्तरं तथाविधघटस्मरणे सति 'अस्या[36]-
२० त्राभावः'[37] इति प्रतिपत्तिः प्रत्यभिज्ञान[38]मेव। यदा तु स्वदुरागमाहि-[39]

---

१ स्मृत्वा च प्रतियोगिनमित्येतद्विचारयति। २ भूतल। ३ भूतलसम्बद्धप्रतियोगिसद्भावग्राहकत्वेनैव प्रत्यक्षस्य प्रवृत्तेः। ४ पूर्वोक्तमेव। ५ आयातम्। ६ प्रत्यक्षेणैवाभावस्य प्रतीतत्त्वात्। ७ अनवस्थादिदूषणपरिहारं करोति। ८ भूतलमात्रस्य। ९ अनवस्थादिदोषभयात्परेण। १० घट। ११ भूतल। १२ भूतलस्य। १३ प्रत्यक्षप्रतिपन्ने। १४ भूतललक्षणे। १५ घटस्य। १६ परेण। १७ अन्येन पटेन। १८ परेण। १९ घटस्य। २० पटेन। २१ घटात्। २२ पटे। २३ अन्यथानवस्था स्यात्। २४ अनवस्थापरिहारार्थं परः प्राह। २५ भूभागेन। २६ अन्यासंसृष्टता प्रतीयते। २७ घटासंसृष्टभूभागप्रतियोगिस्मरणात् घटस्य भूतलासंसृष्टताप्रतिपत्तिस्तस्यां सत्यां भूभागासंसृष्टघटप्रतियोगिस्मरणाद्भूतलस्य घटसंसृष्टताप्रतिपत्तिस्तस्यां सत्यां घटासंसृष्टभूभागस्मरणाद् घटस्य भूतलासंसृष्टताप्रतिपत्तिरित्यान्वयमुखेनेतरेतराश्रयः। २८ भूभागासंसृष्टघटप्रतियोगि। २९ दृष्टश्रुतानुभूतेर्थे स्मरणं चोपजायते। ३० घटासंसृष्टभूभाग। ३१ असंसृष्टताप्रतीतिः। ३२ इतरेतराश्रयो यतः। ३३ स्मर्यमाणघटस्य। ३४ प्रतियोगिस्मरणं विना जायमानं ज्ञानं प्रत्यक्षं प्रतियोगिस्मरणानन्तरमुपजायमानमभावप्रमाणं भविष्यतीत्युक्ते आह। ३५ नरस्य। ३६ स्मर्यमाणघटस्य। ३७ भूभागे। ३८ दर्शनस्मरणकारणकत्वाविशेषात्। ३९ आविर्भावतिरोभावात्सर्वं सर्वत्र विद्यते इति।

तत्संस्कारः साङ्ख्यस्तथा[1]ऽप्रतिपद्यमानः तत्प्रसिद्धसत्त्वरजस्तमोलक्षणविषयनिदर्शनोपदर्शनेन[2] अनुपलब्धिविशेषतः प्रतिबोध्यते[3] तदाप्यनुमानमेवेति[4] क्वाभावप्रमाणस्यावकाशः[5]? ततोऽयुक्तमुक्तम्–'न चाध्यक्षेणाभावोऽवसीयते तस्याभावविषयत्वविरोधात्, नाप्यनुमानेन हेतोरभावात्' इति। ५

किञ्च, अभावप्रमाणेनाभावग्रहणे[7] तस्यैव[8] प्रतिपत्तिः[9] स्यान्न प्रतियोगिनिवृत्तेः[10]। अभावप्रतिपत्तेस्तन्निवृत्तिप्रतिपत्तिश्चेत्; सा किं प्रतियोगिस्वरूपसम्बद्धा, असम्बद्धा वा? न तावत्सम्बद्धा; भावाभावयोस्तादात्म्यादिसम्बन्धासंभवस्य वक्ष्यमाणत्वात्[11]। अथासम्बद्धा; तर्हि तत्प्रतिपत्तावपि कथं प्रतियोगिनिवृत्तिसिद्धिः अतिप्रसङ्गात्[12]? तन्निवृत्तेरप्यपरतन्निवृत्तिप्रतिपत्त्यभ्युपगमे[14] चानवस्था[15]। १०

यच्च 'प्रमाणपञ्चकाभावः, तदन्यज्ञानम्[16], आत्मा वा ज्ञाननिर्मुक्तोऽभावप्रमाणम्' इति त्रिप्रकारत्वमस्योक्तम्[17]; तदप्ययुक्तम्; यतः प्रमाणपञ्चकाभावो निरुपाख्यत्वात्[18]कथं प्रमेयाभावं परिच्छिन्द्यात् परिच्छित्तेर्ज्ञानधर्मत्वात्? अथ प्रमाणपञ्चकाभावः प्रमेयाभावविषयं ज्ञानं जनयन्नुपचारादभावप्रमाणमुच्यते[21]; तन्न[22]; अभावस्यावस्तुतया[23] तज्ज्ञानजनकत्वायोगात्। वस्त्वेव हि कार्यमुत्पादयति[24] नावस्तु, तस्य सकलसामर्थ्यविकलत्वात्खरविषाणवत्। सामर्थ्ये वा तस्य भावरूपताप्रसक्तिः, तल्लक्षणत्वात्परमार्थसतो लक्षणान्तराभावात्, सत्तासम्बन्धादेस्[26]तल्लक्षणस्य निषेत्स्यमान[27]- १५ २०

१ अभावं प्रत्यक्षतः। २ दृष्टान्त। ३ अभावम्। ४ इह भूतले घटो नास्ति दृश्यत्वे सत्यनुपलब्धेः। यत्र यस्य दृश्यत्वे सत्यनुपलब्धिस्तत्र तस्याभावो यथा तमसि सत्त्वस्य। ५ विषये। ६ प्रत्यक्षप्रत्यभिज्ञानानुमानैरभावः प्रतीयते यतः। ७ सति। ८ घटाभावस्य। ९ प्रतिपत्तिः स्यात्। १० निवृत्तिः। ११ अनन्तरमेव प्रध्वंसाभावनिराकरणे। १२ निवृत्याऽसम्बद्धस्य प्रतियोगिनो घटस्य यथाऽभावः स्यात्तथा पटस्यापि निवृत्याऽसम्बद्धस्याभावप्रसङ्गः—उभयत्रासम्बद्धत्वाविशेषात्। १३ सा चासौ निवृत्तिश्च तन्निवृत्तिस्तस्याः सकाशात्। १४ परेण। १५ प्रतिपत्तिर्घटेन सम्बद्धाऽसम्बद्धेत्यादिप्रकारेण। १६ निषेध्याद्घटादन्यस्य भूतलस्य परिज्ञानम्। १७ परेण। १८ निःस्वभावत्वात्। १९ गगनाम्भोजवत्। २० निरुपाख्यः स्यात्प्रमेयाभावपरिच्छेदकश्च स्यादित्युक्ते सत्याह। २१ निमित्तेऽयमुपचारः प्रमाणभूतज्ञानजनकत्वेन प्रमाणं प्रमाणपञ्चकाभावो न साक्षात्प्रमाणमिति। २२ तन्न। २३ शशशृङ्गवत्। २४ सद्रूपत्वाद् मृत्पिण्डवत्। २५ देशकालस्वभावतया। २६ आदिशब्देन प्रमाणविषयत्वम्। २७ समवायनिराकरणप्रघट्टके।

त्वात्। न च यत्र प्रमाणपञ्चकाभावस्तत्रावश्यं प्रमेयाभावज्ञानमुत्पद्यते; परचेतोवृत्तिविशेषैरनैकान्तिकत्वात्[२]।

किञ्च, प्रमाणपञ्चकाभावो ज्ञातः[३], अज्ञातो वा तज्ज्ञानहेतुः[४] स्यात्? ज्ञातश्चेत्कुतो ज्ञप्तिः? तद्विषयप्रमाणपञ्चकाभावाच्चेत्[६]; अनवस्था[७]। प्रमेयाभावाच्चेदन्योन्याश्रयः–सिद्धे हि प्रमेयाभावे प्रमाणपञ्चकाभावसिद्धिः, तत्सिद्धेश्च प्रमेयाभावसिद्धिरिति। अज्ञातस्य[८] च ज्ञापकत्वायोगः "नाज्ञातं ज्ञापकं नाम" [ ] इति प्रेक्षावद्भिरभ्युपगमात्, अन्यथातिप्रसङ्गः[९]। अक्षादेस्तु[१०][११] कारकत्वादज्ञातस्यापि ज्ञानहेतुत्वाविरोधः[१२]। न चास्यापि कारकत्वात्तद्धेतुत्वाविरोधः[१३]; निखिलसामर्थ्यशून्यत्वेनास्य[१४] कारकत्वासम्भवादित्युक्तत्वात्। ततोऽयुक्तमुक्तम्–

> "प्रत्यक्षाद्यवतारश्च[१५] भावांशो गृह्यते यदा।
> व्यापारस्तदनुत्पत्तेरभावांशे जिघृक्षिते॥"
> [मी० श्लो० अभाव० श्लो० १.७] इति।

द्वितीयपक्षे तु यत्तदन्यज्ञानं[१६][१७] तत्प्रत्यक्षमेव, पर्युदासवृत्त्या[१८] हि निषेध्याद् घटादेरन्यस्य भूतलादेर्ज्ञानमभावप्रमाणाख्यां प्रतिपद्यमानं तदन्या(न्य)भावलक्षणाभावपरिच्छेदकमिष्टमेव[१९]। तृतीयपक्षे[२०] तु किमसौ[२१] सर्वथा ज्ञाननिर्मुक्तः, कथञ्चिद्वा? तत्राद्यविकल्पे 'माता मे वन्ध्या' इत्यादिवत्स्ववचनविरोधः। सर्वथा हि यद्यात्मा ज्ञाननिर्मुक्तः कथमभावपरिच्छेदकः? परिच्छेदस्य ज्ञानधर्मत्वात्। परिच्छेदकत्वे[२२] वा कथमसौ सर्वथा ज्ञाननिर्मुक्तः स्यात्? अथ कथञ्चित्; तथाहि–'अभावविषयं ज्ञानमस्यास्ति निषेध्यविषयं तु नास्ति' इति; तर्हि तज्ज्ञानमेवाभावप्रमाणं[२३] स्यान्नात्मा। तच्च भावा-[२४]

---

१ अन्यथा। २ प्रमाणपञ्चकाभावेऽपि प्रमेयाभावज्ञानं न परचेतोवृत्तिविशेषेष्वस्ति अतीन्द्रियत्वात्। ३ पुरुषेण। ४ प्रमेयाभाव। ५ वस्तः। ६ प्रमाणपञ्चकाभावलक्षणाभावप्रमाणादित्यर्थः। ७ ग्रन्थानवस्था। ८ अभावस्य। ९ अन्येनाज्ञातस्य धूमस्याग्निज्ञापकत्वप्रसङ्गात्। १० अक्षादेरज्ञातस्य कथं ज्ञापकत्वमित्युक्ते आह। ११ आदिपदेन अदृष्टम्। १२ ज्ञानं प्रति कारणत्वं कारकत्वम्। १३ प्रमेयाभावज्ञान। १४ प्रमाणपञ्चकमभावोऽभावज्ञानहेतुर्न भवति यतः। १५ तदा भवति। १६ निषेध्यघटात्। १७ भूतलस्य। १८ घटाभावः भूतलसद्भाव इति। १९ (तस्माद् घटादन्यद्भूतलम्। तच्चासौ भावश्च (अर्थः) स तदन्यभावो लक्षणं यस्याभावस्य)। २० उभयोरपि सम्मतोयं (भावान्तरस्वभावलक्षणः) विकल्पः। २१ आत्मा। २२ प्रमेयाभावस्य। २३ अभाव। २४ घटादन्यद्भूतलं तदेव स्वभावो यस्याभावस्य।

न्तरस्वभावाभावग्राहकतयेन्द्रियैर्जनितत्वात्प्रत्यक्षमेव । ततो[1] निराकृतमेतत्-"न तावदिन्द्रियेणैषा"[2] इत्यादि, "वस्त्वसङ्करसिद्धिश्च तत्प्रामाण्यं समाश्रिता" इत्यादि च; तस्याः[3] प्रत्यक्षादिप्रमाणत[4] एव प्रसिद्धेः । कथं ततोऽभावपरिच्छित्तिरिति चेत्; कथं भावस्य[5]? प्रतिभासाच्चेदितरत्र समानम् । न खलु प्रत्यक्षेणान्यसंसृष्टः प्रथमतोऽर्थो[6]ऽनुभूयते, पश्चादभावप्रमाणादन्यासंसृष्ट[7] इति क्रमप्रतीतिरस्ति, प्रथममेवान्यासंसृष्टस्यार्थस्याध्यक्षे प्रतिभासनात् । न चान्यासंसृष्टार्थ[11]वेदनादन्यत्तदभाववेदनं नाम ।

एतेनैतदपि प्रत्युक्तम् "स्वरूपपररूपाभ्याम्" इत्यादि[12]; सर्वैः[13] सर्वदोभयरूपस्यै[14]वान्तर्बहि[15]र्वा[16]ऽर्थस्य प्रतिसंवेदनात्, अन्यथा[17] तदभावप्रसङ्गात्[18] ।

यदप्युक्तम्-"यस्य[19] यत्र[20] यदोद्भूतिः" इत्यादि[21]; तदप्ययुक्तम्; न ह्यनुभूतमनुद्भूतं[22][23] नाम । नापि जिघृक्षाप्रभवं सर्वज्ञानम्; इन्द्रियमनोमात्रभावे भावात्तदभावे चाभावात्तस्य ।

यच्चान्यदुक्तम्-"मेयो यद्वदभावो हि" इत्यादि[24]; तत्र 'भावरूपेण प्रत्यक्षेण नाभावो वेद्यते' इति प्रतिज्ञा[25] अन्यासंसृष्टभूतलग्राहिणा प्रत्यक्षेण निराक्रियते अनुष्णाग्निप्रतिज्ञावत् । 'भावात्मके यथा मेये' इत्याद्यप्ययुक्तम्; अभावादपि भावप्रतीतेः, यथा गगनतले पत्रादीनामधःपाताभावाद्[26]वायोरि[27]ति । भावाच्चाग्न्यादेः शीताभावस्य प्रतीतिः सकलजनप्रसिद्धा । 'यो यथाविधः स तथाविधेनैव गृह्यते' इत्यभ्युपगमे चाभावस्य मुद्गरा[28]दिहेतुत्वा-

१ अभावस्य प्रत्यक्षतो ग्रहणं सिद्धं यतः । २ नास्तीत्युत्पाद्यते मतिः । भावांशेनैव सम्बन्धो योग्यत्वादिन्द्रियस्य हि । ३ अभावग्राहकतायाः । ४ प्रत्यक्षादिप्रमाणात्तव मते परिच्छित्तिः । ५ घटेन । ६ भूतललक्षणः । ७ अन्यसंसृष्टज्ञानानन्तरम् । ८ घटेन । ९ एकदैवोभयरूपार्थविषयतयानुभूयमानं ज्ञानं कथमितरांशेऽनुद्भूतमिति भावः । १० भूतललक्षणस्य । ११ भूतललक्षण । १२ नित्यं सदसदात्मके । वस्तुनि ज्ञायते किञ्चिद्रूपं कैश्चित्कदाचनेत्यन्तम् । १३ प्रमाणैः । १४ सदसदात्मकस्य । १५ ज्ञानस्य । १६ घटादेः । १७ उभयरूपार्थवेदनं न चेत् । १८ उभयरूपत्वादर्थस्य । १९ सदंशस्यासदंशस्य वा । २० वस्तुनि । २१ जिघृक्षा चोपजायते । वेद्यतेनुभवस्तस्य तेन च व्यपदिश्यते इत्यन्तम् । २२ प्रत्यक्षप्रतिपन्नम् । २३ अभावरूपम् । २४ मानम (अभावरूपं) प्येवमिष्यताम् । भावात्मके यथा मेये नाऽभावस्य प्रमाणता । तथैवाभावमेयेपि न भावस्य प्रमाणतेति च । २५ अभावोऽभावपरिच्छेद्यः तथाविषयत्वादिति वा प्रतिज्ञा । २६ गगनतले वायुरस्ति पत्रादीनामधःपाताभावान्यथान्यथानुपपत्तेः । २७ प्रतीतिः । २८ भावरूप ।

भावः स्यात् । शक्यं हि वक्तुम्-यो यथाविधः स तथाविधेनैव क्रियते यथा भावो भावेन[1], अभावश्चाभावः[2], तस्मादभावेनैव क्रियते । प्रत्यक्षबाधा[3] चान्यत्रापि[4] समाना ।

यदप्यभिहितम्-'प्रागभावादिभेदाच्चतुर्विधश्चाभावः' इत्यादि; ५ तदप्यभिधानमात्रम्; यतः स्वकारणकलापात्[5] स्वस्वभावव्यवस्थितयो भावाः[6] समुत्पन्ना नात्मानं परेण[7] मिश्रयन्ति[8] तस्य[9] परत्वप्रसङ्गात्[10] । न चान्यतो[11]ऽव्या (तो व्या)वृत्तस्वरूपाणां तेषां[12] भिन्नोऽभाऽवांशः[13] सम्भवति[14] । भावे वा तस्यापि[15] पररूपत्वाद्भावेन[16] ततोपि[17] व्यावर्तितव्यमित्यपरापराभावपरिकल्पनयानवस्था । अतो १० न कुतश्चिद्[18] भावेन व्यावर्त्तितव्यमित्[19]येक[20]स्वभावं[21] विश्वं[22] भवेत्, परभावाभावाच्च[23] व्यावर्त्तमानस्यार्थस्य[24] पररूपताप्रसङ्गः[25] ।

यदि चेतरेतराभाववशाद् घटः पटादिभ्यो व्यावर्त्तेत, तर्हीतरेतराभावोपि भावादभावान्तराच्च प्रागभावादेः किं स्वतो व्यावर्त्तेत, अन्यतो वा? स्वतश्चेत्; तथैव घटोप्यन्येभ्यः[26] किन्न व्यावर्त्तेत? अन्यतश्चेत्; किमसाधारणधर्मात्[27], इतरेतराभावान्तराद्वा? १५ असाधारणधर्माभ्युपगमे स एव पटादिष्वपि युक्तः[28] । इतरेतराभावान्तराच्चेत्; वहुत्वमितरेतराभावस्यानवस्थाकारि[29] स्यात् ।

किञ्च, इतरेतराभावोप्यसाधारणधर्मेणाव्यावृत्तस्य, व्यावृत्तस्य[30] वा भेदकः? यद्यव्यावृत्तस्य; किं नैकव्यक्तेर्[31] भेदकः? अथ व्यावृ- २० त्तस्य; तर्हि घटादिष्वपि स एवास्तु भेदकः किमितरेतराभावकल्पनया?

---

१ मृत्पिण्डादिना । २ घटप्रध्वंसाभावः । ३ घटाभावं प्रति मुद्गरादीनां व्यापारोपलम्भात् । ४ अभावप्रमाणेनाभावो गृह्यते इत्यत्रापि । कथम्? प्रत्यक्षेणाभावप्रतीतेरिति । ५ चक्रचीवरकुलालादि । ६ घटादयः । ७ पटादिभावेन । ८ अन्यथा । ९ तस्य परस्य पटादेः । १० घटत्वप्रसङ्गात् । ११ पटादिभ्यः । १२ घटादिभावानाम् । १३ यतोऽभावात् तेषां (घटादीनां) व्यावृत्तिः (पटादिभ्यः) युक्ता । १४ सम्भवति चेत् कस्य? घटस्य । पटादयः पटरूपा घटादिभ्यः सकाशद्यथा तथा अभावांशोपि । १५ अभावांशस्य । १६ घटादिभ्यः । १७ घटादिपदार्थेन । १८ भावादभावाद्वा । १९ अनवस्थादोषभयात् । २० इति हेतोः । २१ घटादिस्वभावम् । २२ व्यावर्त्तकस्येतरेतराभावस्याभावात् । २३ ततश्च किं भवेत् । २४ घटस्य । २५ भिन्नत्वात् । २६ पटादिभ्यः । २७ पृथुबुध्नोदरादेः । २८ व्यावर्त्तकः । २९ इतरेतराभावान्तरं किं स्वतो व्यावर्त्तते अन्यतो वेत्यादिप्रकारेण । ३० पटादेः सकाशाद्व्यावृत्तस्य घटादेः । ३१ घटस्य ।

किञ्च, अनेन घटे पटः प्रतिषिध्यते, पटत्वसामान्यं वा, उभयं[1] वा? प्रथमपक्षे किं पटविशिष्टे घटे पटः प्रतिषिध्यते, पटविविक्ते वा? न तावदाद्यः पक्षो युक्तः; प्रत्यक्षविरोधात्। नापि द्वितीयः; तथाहि-किमितरेतराभावादन्या घटस्य पटविविक्तता[2], स एव वा विविक्तताशब्दाभिधेयः? भेदे[3]; तयैव घटे पटाभावव्यवहारसिद्धेः किमितरेतराभावेन? अथ स एव तच्छब्दाभिधेयः; तर्हि यस्मादभावात्पटविविक्ते घटे पटाभावव्यवहारः सोन्योऽभावः, विविक्तताशब्दाभिधेयश्चान्य[4] इत्येकस्मिन्वस्तुनीतरेतराभावद्वयमायातम्।

किञ्च, 'घटे पटो नास्ति' इति पटरूपताप्रतिषेधः, सा किं प्राप्ता प्रतिषिध्यते, अप्राप्ता वा? प्राप्तायाः प्रतिषेधे पटेपि पटरूपताप्रतिषेधः स्यात् प्राप्तेरविशेषात्। अप्राप्तायास्तु प्रतिषेधानुपपत्तिः, प्राप्तिपूर्वकत्वात्तस्य। न ह्यनुपलब्धोदकस्य 'अनुदकः कमण्डलुः' इति प्रतिषेधो घटते। अथान्यत्र प्राप्तमेव पटरूपमन्यत्र प्रतिषिध्यते; तत्रापि समवायप्रतिषेधः, संयोगप्रतिषेधो वा? न तावत्समवायप्रतिषेधः; रूपादेरेकत्र[10] समवायेन सम्बद्धस्यान्यत्र[11] वस्त्वन्तरेऽन्योन्याभावतोऽभावव्यवहारानुपलम्भात्। संयोगप्रतिषेधोप्यनुपपन्नः; घटपटयोः कदाचित्संयोगस्यापि सम्भवात्। अथ पटेन संयोगरहिते घटे पटप्रतिषेधो न तत्संयोगवति। नन्वेवं पटसंयोगरहितत्वमेवाभावोस्तु, न त्वन्यस्माद्[12]भावात्पटसंयोगरहिते घटे पटाभाव इति युक्तम्। तन्न घटे पटप्रतिषेधो युक्तः।

नापि[13] पटत्वप्रतिषेधः; तस्याप्येकत्र[14] सम्बद्धस्यान्यत्र सम्बन्धाभावादेव प्रतिषेधानुपपत्तेः। नाप्युभयप्रतिषेधः; प्रागुक्ताशेषदोषानुषङ्गात्।

किञ्च, इतरेतराभावप्रतिपत्तिपूर्विका घटप्रतिपत्तिः, घटग्रहणपूर्वकत्वं वेतरेतराभावग्रहणस्य? आद्यपक्षेऽन्योन्याश्रयत्वम्; तथाहि-'इतरेतराभावो घटसंबन्धित्वेनोपलभ्यमानो[17] घटस्य विशेषणं न पदार्थान्तरसम्बन्धित्वेन, अन्यथा सर्वं सर्वस्य विशेषणं

१ उभयं, पटः पटत्वं चेत्यर्थः। तृतीयपक्षोयम्। २ असाधारणस्वरूपता। ३ इतरेतराभावविविक्ततयोः। ४ इतरेतराभावः। ५ पटस्वरूपस्य। ६ एवं परस्यानिष्टापादनं भवति। ७ उभयत्र। ८ पुरुषस्य। ९ आतानवितानीभूतरूपादेः। १० पटादौ। ११ घटादौ। १२ इतरेतराभावात्। १३ द्वितीयपक्षः। १४ घटे। १५ तृतीयपक्षः। १६ पटपटत्वयोः। १७ घटस्येतरेतराभावोयमिति।

स्यात् । घटसम्बन्धित्वप्रतिपत्तिश्च[1] घटग्रहणे सत्युपपद्यते । सोपि व्यावृत्त एव पटादिभ्यः प्रतिपत्तव्यः । ततो[2] यावत्पूर्वं घटसम्बन्धित्वेन व्यावृत्ते[3]रुपलम्भो न स्यान्न तावद्व्यावृत्तिविशिष्टतया घटः प्रत्येतुं शक्यः, यावच्च पटादिव्यावृत्तत्वेन न प्रतिपन्नो घटो ५ न तावत्स्वसम्बन्धित्वेन व्यावृत्तिं[4] विशेषयति इति ।

अथ[5] घटग्रहणपूर्वकत्वमितरेतराभावग्रहणस्य; अत्राप्यभावो विशेष्यो घटो विशेषणम् । तद्ग्रहणं च पूर्वमन्वेषणीयम् "नागृहीतविशेषणा विशेष्ये बुद्धिः"[6] [ ] इत्यभिधानात् । तत्रापि[7] घटो गृह्यमाणः पटादिभ्यो व्यावृत्तो गृह्यते, अव्यावृत्तो वा? तत्र[8] न १० तावत्पटादिभ्योऽव्यावृत्तस्य घटस्य घटरूपता घटते[9], अन्यथा[10] पटादेरपि तथैव पटादिरूपताप्रसङ्गादभावकल्पनावैयर्थ्यम् । अथ तेभ्यो व्यावृत्तस्य घटस्य घटरूपताप्रतिपत्तिः प्रार्थ्यते[11]; तत्रापि किं कतिपयपटादिव्यक्तिभ्योऽसौ व्यावर्त्तते, सकलपटादिव्यक्तिभ्यो वा? प्रथमपक्षे कुतश्चिदेवासौ व्यावर्त्तेत, न १५ सकलपटादिव्यक्तिभ्यः । द्वितीयपक्षेपि न निखिलपटादिभ्योऽस्य व्यावृत्तिर्घटते, तासामानन्त्येन ग्रहणासम्भवात्[12] । इतरेतराश्रयत्वं च, तथाहि-'यावत्पटादिभ्यो व्यावृत्तस्य घटस्य घटरूपता न स्यान्न तावद् घटात्पटादयो व्यावर्त्तन्ते, यावच्च घटाद्व्यावृत्तानां पटादीनां पटादिरूपता न स्यान्न तावत्पटादिभ्यो घटो व्याव- २० र्त्तते इति ।

अस्तु वा यथाकथञ्चित्पटादिभ्यो घटस्य व्यावृत्तिः[13], घटान्तरात्तु कथमसौ व्यावर्त्तते इति सम्प्रधार्यम्[14]-किं घटरूपतया, अन्यथा[15] वा? यदि घटरूपतया; तर्हि सकलघटव्यक्तिभ्यो व्यावर्त्तमानो घटो घटरूपतामादाय व्यावर्त्तेत इत्यायातम् अघटत्वम- २५ न्यासां घटव्यक्तीनाम् । अथाघटरूपतया[16]; तत्किमघटरूपता पटादिवद् घटेप्यस्ति? तथा चेत्; तर्हि यो व्यावर्त्तते घटान्तरादघटत्वेन घटस्तस्याघटत्वं स्यात् । तच्च विप्रतिषिद्धम्[17]-यद्यघटो घटः, कथं घटः? तस्मान्नार्थादर्थान्तरमभावः ।

---

१ इतरेतराभावस्य । २ इतरेतराभावप्रतिपत्तेर्घटप्रतिपत्तिपूर्वकत्वं यतः । ३ इतरेतराभावस्य । ४ घटसम्बन्धिनमितरेतराभावम् । ५ द्वितीयपक्षः । ६ प्रवर्त्तते । ७ घटस्य पूर्वं ग्रहणेपि । ८ पक्षद्वये । ९ जैनमते स्वगतासाधारणधर्मेण घटः पटादिभ्यो व्यावृत्तो भवति, न तु इतरेतराभावादिति । १० पटादिभ्योऽव्यावृत्तस्य घटस्य घटरूपता यदि । ११ समर्थ्यते परेण । १२ ग्रहणे वा सर्वज्ञत्वादिप्रसङ्गः । १३ इतरेतराभावः । १४ विचार्यम् । १५ अघटरूपतया । १६ तर्हि । १७ विरुद्धम् ।

ननु चाभावस्यार्थान्तरत्वानभ्युपगमे कथं तन्निमित्तको[1] व्यवहारः? तथाहि[3]- किं घटावष्टब्धं भूतलं घटाभावो व्यपदिश्यते, तद्रहितं वा? प्रथमपक्षे प्रत्यक्षविरोधः। द्वितीयपक्षे तु नाममात्रं भिद्येत - घटरहितत्वम्, घटाभावविशिष्टत्वमिति; तदप्यसाम्प्रतम्; यतः किं घटाकारं भूतलं येन 'घटो न भवति' इत्युच्यमाने प्रत्यक्षविरोधः स्यात्, यद्भूतलं तद्घटाकाररहितत्वाद्घटो न भवत्येव। ननु यद्यपि भूतलान्नार्थान्तरं घटाभावः, तर्हि घटसम्बद्धेपि भूतले 'घटो नास्ति' इति प्रत्ययः स्यात्, न चैवम्, ततो यथा भूतलादर्थान्तरं घटस्तथा तदभावोपीति; तदप्यसारम्; घटासम्भविभूतलगतासाधारणधर्मोपलक्षितं हि भूतलं घटाभावो व्यपदिश्यते। घटावष्टब्धं तु घटभूतलगतसंयोगलक्षणसाधारणधर्मविशिष्टत्वेन तथोत्पन्नमिति न 'अघटं भूतलम्' इति व्यपदेशं लभते। तन्नेतरेतराभावो विचारक्षमः।

नापि प्रागभावः; तस्याप्यर्थादर्थान्तरस्य प्रमाणतोऽप्रतिपत्तेः। ननु 'स्वोत्पत्तेः प्रागासीद् घटः' इति प्रत्ययोऽसद्विषयः, सत्प्रत्ययविलक्षणत्वात्, यस्तु सद्विषयः स न सत्प्रत्ययविलक्षणो यथा 'सद्द्रव्यम्' इत्यादिप्रत्ययः, सत्प्रत्ययविलक्षणश्चायं तस्मादसद्विषयः' इत्यनुमानात्ततोऽर्थान्तरस्य प्रागभावस्य प्रतीतिरित्यपि मिथ्या; 'प्रागभावादौ नास्ति प्रध्वंसादिः' इति प्रत्ययेनानेकान्तात्। तस्याप्यसद्विषयत्वेऽभावानवस्था। अथ 'भावे भूभागादौ नास्ति घटादिः' इति प्रत्ययो मुख्याभावविषयः, 'प्रागभावादौ नास्ति प्रध्वंसादिः' इति प्रत्ययस्तूपचरिताभावविषयः, ततो नानवस्थेति; तदप्ययुक्तम्; परमार्थतः प्रागभावादीनां साङ्कर्यप्रसङ्गात्। न खलूपचरितेनाभावेनान्योन्यमभावानां व्यतिरेकः सिध्येत्, सर्वत्र मुख्याभावकल्पनानर्थक्यप्रसङ्गात्।

१ नास्तीति विकल्पो नास्तीत्यभिधानं च। २ अर्थादर्थान्तरमभावं समर्थयन्ति परे। ३ जैनैर्भवद्भिः। ४ नार्थभेदः। ५ भूतलस्य। ६ जैनमते। ७ परमते। ८ घटभूतलयोः किं तादात्म्यं प्रतिषिध्यते आधाराधेयभावो वा? तत्राद्यं पक्षं विवेचयति। ९ भूतलगतं विविक्तत्वं भिन्नं घटगतं विविक्तत्वं भिन्नम्। १० उभयगतत्वात्। ११ घटावष्टब्धत्वेन। १२ घटस्य प्रागभावो मृत्पिण्डलक्षणोऽर्थस्तस्मात्। १३ प्रागभावः। १४ अर्थात्। १५ अयं सत्प्रत्ययविलक्षणश्च भवति, न त्वसद्विषयः। १६ अभावे अभावोऽस्ति यतः। १७ प्रागभावादौ नास्ति प्रध्वंसादिरिति व्यवहारः प्रयोजनमभावानामसङ्करो निमित्तमित्युपचारप्रवृत्तिः—निमित्तप्रयोजनवशादुपचारप्रवृत्तेः। १८ भेदः। १९ अन्यथा।

यदप्युक्तम्–'न भावस्वभावः प्रागभावादिः सर्वदा[1] भावविशेषणत्वात्' इति; तदप्युक्तिमात्रम्; हेतोः पक्षाव्यापकत्वात्[2], 'न प्रागभावः[3] प्रध्वंसादौ[4]' इत्यादेरभावविशेषणस्याप्यभावस्य प्रसिद्धेः। गुणादिनानेकान्ताच्च; अस्य सर्वदा भावविशेषणत्वेपि भावस्व-
५ भावात्। 'रूपं[5] पश्यामि' इत्यादिव्यवहारे गुणस्य स्वतन्त्र[6]स्यापि प्रतीतेः सर्वदा भावविशेषणत्वाभावे 'अभावस्तत्त्वम्' इत्यभावस्यापि स्वतन्त्रस्य प्रतीतेः शश्वद्भावविशेषणत्वं न स्यात्। सामर्थ्यात्तद्विशेष्यस्य[7] द्रव्यादेः सम्प्रत्ययात्सदास्य भावविशेषणत्वे गुणादेरपि सर्वदा भावविशेषणत्वमस्तु, तद्विशेष्यस्य द्रव्यस्य
१० सामर्थ्यतो[8] गम्यमानत्वात्।

किञ्च, प्रागभावः सादिः सान्तः[9] परिकल्प्यते, सादिरनन्तः, अनादिरनन्तः अनादिः सान्तो वा? प्रथमपक्षे प्रागभावात्पूर्वं घटस्योपलब्धिप्रसङ्गः, तद्विरोधिनः प्रागभावस्याभावात्। द्वितीयेपि तदुत्पत्तेः पूर्वमुपलब्धि[10]प्रसङ्गस्तत एव। उत्पन्ने तु प्रागभावे
१५ सर्वदानुपलब्धिः[11] स्यात्तस्यानन्तत्वात्। तृतीये तु सदानुप[12]लब्धिः[13]। चतुर्थे पुनः घटोत्पत्तौ प्रागभावस्याभावे घटोपलब्धिवदशेषकार्योपलब्धिः स्यात्, सकलकार्याणामुत्पत्स्यमानानां प्रागभावस्यैकत्वात्।

ननु[14] यावन्ति कार्याणि तावन्तस्तत्प्रागभावाः, तत्रैकस्य प्राग-
२० भावस्य विनाशेपि शेषोत्पत्स्यमानकार्यप्रागभावानामविनाशान्न घटोत्पत्तौ सकलकार्योपलब्धिरिति; नह्यनन्ताः प्रागभावास्ते किं स्वतन्त्राः, भावतन्त्रा वा? स्वतन्त्राश्चेत्कथं न भावस्वभावाः कालादिवत्? भावतन्त्राश्चेत्किमुत्पन्नभावतन्त्राः, उत्पत्स्यमानभावतन्त्रा वा? न तावदादिविकल्पः; समुत्पन्नभावकाले
२५ तत्प्रागभावविनाशात्। द्वितीयविकल्पोपि न श्रेयान्; प्रागभावकाले स्वयमसतामुत्पत्स्यमानभावानां तदा[15]श्रयत्वायोगात्, अन्यथा

१ दण्डेन रूपेण च व्यभिचारः स्यात्तत्परिहारार्थं सर्वदेति विशेषणं दण्डस्य कदाचिद्विशेष्यरूपतयापि भावात्। कथम्? दण्डं पश्यामीति। २ यतोऽभावोप्यभावस्य विशेषणं भवेत् भावोऽभावस्यापि। ३ प्रागभावो विशेषणमत्र। ४ अतोऽभावोऽभावस्य विशेषणमपि भवेद्भावोऽभावस्यापि। ५ घटस्य। ६ विशेष्यत्वेन। ७ अभावस्तत्त्वम्। कस्य? घटस्येति। ८ यथा अभावः कस्येत्युच्यमाने पटस्येति, तथा गुणाः कस्य? द्रव्यस्येति। ९ विनाशोपेतः। १० घटस्य। ११ घटस्य। १२ तद्विरोधिनः प्रागभावस्य सर्वदा भावादेव। १३ घटादिकार्यस्य। १४ घटोत्पत्तौ घटोपलब्धिवदशेषकार्योपलब्धिं परिहरति परः। १५ तेषां प्रागभावानाम्।

प्रध्वंसाभावस्यापि प्रध्वस्तपदार्थाश्रयत्वप्रसङ्गः[1]। न चानुत्पन्नः प्रध्वस्तो वार्थः कस्यचिदाश्रयो नाम अतिप्रसङ्गात्[2]।

अथैक[3] एव प्रागभावो विशेषणभेदाद्भिन्न उपचर्यते 'घटस्य प्रागभावः पटादेर्वा' इति, तथोत्पन्नार्थविशेषणतया तस्य[4] विनाशेऽप्युत्पत्स्यमानार्थविशेषणत्वेनाविनाशान्नित्यत्वमपीति। नन्वेवं[5] प्रागभावादिचतुष्टयकल्पनानर्थक्यम् सर्वत्रैकस्यैवाभावस्य विशेषणभेदात्तथा[6] भेदव्यवहारोपपत्तेः। कार्यस्य[7] हि पूर्वेण कालेन विशिष्टोर्थः[8] प्रागभावः, परेण विशिष्टः प्रध्वंसाभावः, नानार्थ[9]विशिष्टः स[10] एवेतरेतराभावः, कालत्रयेप्यत्यन्तनानास्वभावभावविशेषणो[11]ऽत्यन्ताभावः स्यात्, प्रत्यय[12]भेदस्यापि तथोपपत्तेः[13], सत्तैकत्वेपि द्रव्यादिविशेषण[14]भेदात्प्रत्ययभेदवत्। यथैव[15] हि सत्प्रत्ययाविशेषाद्विशेषलिङ्गाभावाच्चैकत्वं[16] सत्तायाः तथैवासत्प्रत्ययाविशेषलिङ्गाभावाच्चाभावस्यापि। अथ 'प्रागासीत्[17]' इत्यादिप्रत्यय[18]विशेषाच्चतुर्विधोऽभावः; तर्हि प्रागासीत्पश्चाद्भविष्यति सम्प्रत्यस्तीति कालभेदेन, पाटलिपुत्रेस्ति चित्रकूटेस्तीति देशभेदेन, द्रव्यं गुणः कर्म चास्तीति द्रव्यादिभेदेन च प्रत्ययभेदसद्भावात्प्राक्सत्तादयः[19] सत्ताभेदाः किन्नेष्यन्ते[20]? प्रत्ययविशेषात्तद्विशेषणान्येव[21] भिद्यन्ते तस्य[22] तन्निमित्तकत्वान्न तु सत्ता[23], ततः सैकैवेत्यभ्युपगमे अभावभेदोपि मा भूत्सर्वथा विशेषाभावात्।

अथाभिधीयते—'अभावस्य सर्वथैकत्वे विवक्षितकार्योत्पत्तौ प्रागभावस्याभावे सर्वत्राभावस्याभावानुषङ्गात्सर्वं कार्यमनाद्यनन्तं[24] सर्वात्मकं[25] च स्यात्; तदप्यभिधानमात्रम्; सत्तैकत्वेपि समानत्वात्। विवक्षितकार्यप्रध्वंसे हि सत्ताया अभावे सर्वत्राभावप्रसङ्गः तस्या एकत्वात्, तथा च सकलशून्यता। अथ तत्प्रध्वंसेपि नास्याः

---

१ प्रागभावस्य प्रध्वंसाभावस्य वा। २ अनुत्पन्नः प्रध्वस्तो वा स्तम्भः प्रासादस्याश्रयो भवेत्। ३ घटाद्यर्थे। ४ प्रागभावस्य। ५ घटादि। ६ प्रागभावादिप्रकारेण। ७ पटलक्षणस्योत्पत्तेः सकाशात्। ८ अर्थः। ९ घटपटशकटादि। १० अभावलक्षणोर्थः। ११ अत्यन्तं सर्वथा नाना (भिन्नाः) स्वभावा येषां तेऽत्यन्तनानास्वभावा गगनाम्भोजखरविषाणादयस्ते च ते भावाश्च ते विशेषणं यस्याभावस्य। १२ प्रत्ययो ज्ञानम्। १३ विशेषणभेदादेव। प्रागभावस्यैकत्वकल्पनाप्रकारेण। १४ द्रव्यं सद्गुणः सन्कर्म सत्। १५ परमते। १६ जैनमते एकत्वम्। १७ घटः। १८ कारण। १९ आदिपदेन पश्चात्सत्ता सम्प्रतिसत्ता च ग्राह्या। २० परेण भवता। २१ घटाद्यर्थाः। २२ प्रत्ययविशेषस्य। २३ (सत्तायाः विशेषणनिमित्तकत्वाभावादित्यर्थः)। २४ प्रागभावाभावादनादि प्रध्वंसाभावाभावादनन्तम्। २५ इतरेतराभावाभावात्।

प्रध्वंसो नित्यत्वात्, अन्यथार्थान्तरेषु सत्प्रत्ययोत्पत्तिर्न स्यात्; तदन्यत्रापि[1] समानम्, समुत्पन्नैककार्यविशेषणतया ह्यभावस्याभावेपि न सर्वथाऽभावः[2] भावान्तरेष्वभावप्रतीत्यभावप्रसङ्गात्। यथा चाभावस्य नित्यैकरूपत्वे कार्यस्योत्पत्तिर्न स्यात् तस्य तत्प्र-
५ तिबन्धकत्वात्, तथा सत्तायां नित्यत्वे कार्यप्रध्वंसो न स्यात् तस्यास्तत्प्रतिबन्धकत्वात्। प्रसिद्धं हि प्रध्वंसात्प्राक्प्रध्वंसप्रतिबन्धकत्वं सत्तायाः, अन्यथा[3] सर्वदा प्रध्वंसप्रसङ्गात् कार्यस्य स्थितिरेव न स्यात्। यदि[4] पुनर्बलवत्प्रध्वंसकारणोपनिपाते कार्यस्य सत्ता न ध्वंसं प्रतिबध्नाति, ततः[5] पूर्वं तु बलवद्विनाशकारणोप-
१० निपाताभावात्तं प्रतिबध्नात्येवातो न प्रागपि प्रध्वंसप्रसङ्गः इत्येतदन्यत्रापि न काकैर्भक्षितम्, अभावोपि हि बलवदुत्पादककारणोपनिपाते कार्यस्योत्पादं सन्नपि न प्रतिरुणद्धि, कार्योत्पादात्पूर्वं तूत्पादककारणाभावात्तं प्रतिरुणद्ध्येव, अतो न प्रागपि कार्योत्पत्तिप्रसङ्गो येन कार्यस्यानादित्वं स्यात्।

१५ तन्न प्रागभावोपि तुच्छस्वभावो घटते किन्तु भावान्तरस्वभावः[10]। यद्भावे[11] हि नियमतः कार्योत्पत्तिः[12] स[13] प्रागभावः, प्राग[14]नन्तरपरिणामविशिष्टं मृद्द्रव्यम्। तुच्छस्वभावत्वे चास्य सव्येतरगोविषाणादीनां सहोत्पत्तिनियमवतामुपादानसङ्करप्रसङ्गः[16] प्रागभावाविशेषात्[17]। यत्र[18] यदा यस्य[19] प्रागभावाभावस्तत्र तदा
२० तस्योत्पत्तिरित्यप्ययुक्तम्; तस्यैवानियमात्। स्वोपादानेतर[21]नियमात्तन्नियमेप्यन्योन्याश्रयः।

प्रध्वंसाभावोपि भावस्वभाव एव, यद्भावे हि नियता कार्यस्य

---

१ अभावे। २ प्रागभावस्य। ३ प्रध्वंसात्पूर्वं सत्तायाः प्रध्वंसप्रतिबन्धकत्वं न स्याद्यदि। ४ सर्वदा प्रध्वंसप्रसङ्गात्कार्यस्य स्थितिरेव न स्यादेतत्परिहरति परः। ५ कार्यकालादुत्तरेण कालेन। ६ मुद्गरादि। ७ विनाशकारणसन्निधानात्पूर्वम्। ८ अभावे। ९ मृत्पिण्डादि। १० प्रागभावः कः भावान्तरं च किमित्युक्ते आह। ११ यस्य मृत्पिण्डस्य। १२ स्वस्य विनाशेन घटरूपेण परिणमते मृत्पिण्डः। १३ मृत्पिण्डलक्षणः। १४ घटोत्पत्तेः। १५ स्थासादि। १६ अस्योपादानमेतदस्यैतदिति विवेचयितुमशक्यत्वात्। १७ तुच्छाभावस्य प्रागभावस्यैकत्वात्। १८ उपादानकारणे। १९ कार्यस्य। २० सव्यगोविषाणस्यायं प्रागभावः असव्यस्यायं प्रागभाव इति प्रागभावस्यैव नियमाभावात्। २१ सव्यविषाणकार्ये। २२ स्वानुपादान। २३ प्रागभावनियमे। २४ सव्यविषाणस्योपादाननियमे सिद्धे सव्यस्य प्रागभावनियमः सिध्येत्। प्रागभावनियमसिद्धौ च सव्यस्योपादाननियमसिद्धिरिति। २५ उत्तरक्षणवर्तिकपाललक्षणः। २६ यस्य कपालस्य। २७ घटस्य।

विपत्तिः स प्रध्वंसः, मृद्द्रव्यानन्तरोत्तरपरिणामः[1] । तस्य हि तुच्छस्वभावत्वे मुद्गरादिव्यापारवैयर्थ्यं स्यात् । स हि तद्व्यापारेण[2] घटादेर्भिन्नः, अभिन्नो वा विधीयते ? प्रथमपक्षे घटादेस्तदवस्थत्वप्रसङ्गात् 'विनष्टः' इति प्रत्ययो न स्यात् । विनाशसम्बन्धाद् 'विनष्टः' इति प्रत्ययोत्पत्तौ विनाशतद्वतोः कश्चित्सम्बन्धो वक्तव्यः-स हि तादात्म्यलक्षणः, तदुत्पत्तिस्वरूपो वा स्यात्, तद्विशेषणविशेष्यभावलक्षणो[3] वा ? तत्र न तावत्तादात्म्यलक्षणोसौ घटते; तयोर्भेदाभ्युपगमात्[4] । नापि तदुत्पत्तिलक्षणः[5]; घटादेस्तदकारणत्वात्[6], तस्य मुद्गरादिनिमित्तकत्वात् । तदुभयनिमित्तत्वाददोषः; इत्यप्यसुन्दरम्; मुद्गरादिवद्विनाशोत्तरकालमपि घटादेरुपलम्भप्रसङ्गात् । तस्य स्वविनाशं प्रत्युपादानकारणत्वान्न तत्काले उपलम्भः; इत्यप्यसमीचीनम्; अभावस्य भावान्तरस्वभावताप्रसङ्गात्[7] तं[8] प्रत्येवास्योपादानकारणत्वप्रसिद्धेः । तयोर्विशेषणविशेष्यभावः सम्बन्धः; इत्यप्यसत्; परस्परमसम्बद्धयोस्तदसम्भवात् । सम्बन्धान्तरेण सम्बद्धयोरेव हि विशेषणविशेष्यभावो दृष्टो दण्डपुरुषादिवत् । न च विनाशतद्वतोः सम्बन्धान्तरेण[9] सम्बद्धत्वमस्तीत्युक्तम् । तन्न तद्व्यापारेण[10] भिन्नो[11] विनाशो विधीयते । अभिन्नविनाशविधाने[12] तु 'घटादिरेव तेन विधीयते' इत्यायातम्; तच्चायुक्तम्; तस्य प्रागेवोत्पन्नत्वात्[13] ।

ननु प्रध्वंसस्योत्तरपरिणामरूपत्वे[14] कपालोत्तरक्षणेषु घटप्रध्वंसस्याभावात्तस्य पुनरुज्जीवनप्रसङ्गः; तदप्यनुपपन्नम्; कारणस्य[15] कार्योपमर्दनात्मकत्वाभावात्[16] । कार्यमेव हि कारणोपमर्दनात्मकत्वधर्माधारतया प्रसिद्धम् ।

यच्च कपालेभ्योऽभावस्यार्थान्तरत्वं विभिन्नकारणप्रभवतयोच्यते; तथाहि[17]–'उपादानघटविनाशो बलवत्पुरुषप्रेरितमुद्गराद्यभिघातादवयवक्रियोत्पत्तेरवयवविभागतः[18] संयोगविनाशादेवोत्प-

१ मृद्द्रव्यं कुशूलरूपं तस्यानन्तरपरिणामो घटः । तस्योत्तरपरिणामस्तु कपाललक्षणः । २ कर्त्रा । ३ प्रध्वंसाभावविशिष्टो घट इति । ४ परेण । ५ घटादुत्पत्तिः प्रध्वंसस्येति । ६ तं विनाशं प्रति । ७ यथा घटस्य कपालादि भावान्तरम् । ८ कपाललक्षणं भावान्तरस्वभावम् । ९ तादात्म्यतदुत्पत्तिलक्षणेन । १० मुद्गरादिव्यापारेण कर्त्रा । ११ घटात् । १२ द्वितीयपक्षे । १३ मुद्गरादिव्यापारात् । १४ कपाल । १५ घटस्य । १६ कपाल । १७ हेतोर्विभिन्नकारणत्वं समर्थयति परः । १८ चलनलक्षणायाः ।

घते, उपादेयकपालोत्पादस्तु स्वारम्भकावयव[1]कर्म[2]संयोगविशेषादेवाविर्भवति' इति; तदप्यसमीक्षिताभिधानम्; अस्य विनाशोत्पाद[3]कारणप्रक्रियोद्घोषणस्याप्रातीतिकत्वात्। केवलमन्यप्रतारितेन भवता[4] परः प्रतार्यते। तस्मादन्धपरम्परापरित्यागेन बलवत्पुरुषप्रेरितमुद्गरादिव्यापाराद् घटाकारविकलकपालाकारमृद्द्रव्योत्पत्तिरभ्युपगन्तव्या अलं प्रतीत्यपलापेन।

'क्षीरे दध्यादि यन्नास्ति' इत्याद्यप्यभावस्य भावस्वभावत्वे सत्येव घटते, दध्यादिविविक्तस्य क्षीरादेरेव प्रागभावादितयाऽध्यक्षादिप्रमाणतोऽध्यवसायात्। ततोऽभावस्योत्पत्तिसामग्र्याः विषयस्य चोक्तप्रकारेणासम्भवान्न पृथक्प्रमाणता। इति स्थितमेतत्प्रत्यक्षेतरभेदादेव द्वैधमेव च प्रमाणमिति।

तत्राद्यप्रकारं विशदमित्यादिना व्याचष्टे—

विशदं प्रत्यक्षम्॥ ३॥

विशदं स्पष्टं यद्विज्ञानं तत्प्रत्यक्षम्। तथा च प्रयोगः-विशदज्ञानात्मकं प्रत्यक्षं प्रत्यक्षत्वात्, यत्तु न विशदज्ञानात्मकं तन्न प्रत्यक्षम् यथाऽनुमानादि, प्रत्यक्षं च विवादाध्यासितम्, तस्माद्विशदज्ञानात्मकमिति।

अनेनाऽकस्माद्धूमदर्शनात् 'वह्निरत्र' इति ज्ञानम्, 'यावान् कश्चिद् भावः कृतको वा स सर्वः क्षणिकः, यावान् कश्चिद्धूमवान्प्रदेशः सोऽग्निमान्' इत्यादि व्याप्तिज्ञानं चास्पष्टमपि प्रत्यक्षमाचक्षाणः प्रत्याख्यातः; अनुमानस्यापि प्रत्यक्षताप्रसङ्गात् प्रत्यक्षमेवैकं प्रमाणं स्यात्।

किञ्च, अकस्माद्धूमदर्शनाद्वह्निरत्रेत्यादिज्ञाने सामान्यं वा प्रतिभासेत, विशेषो वा? यदि सामान्यम्[11]; न तर्हि प्रत्यक्षम्, तस्य तद्विषयत्वानभ्युपगमात्[12]। अभ्युपगमे वा 'प्रमाणद्वैविध्यं[13] प्रमेयद्वैविध्यात्' इत्यस्य व्याघातः, सविकल्पकत्वप्रसङ्गश्च[16]। विशेषविषयत्वे ततः प्रवर्त्तमानस्यात्र सन्देहो न स्यात् 'तार्णो

१ परमाणु। २ ततः संयोगविशेषः। ३ तादिः। ४ यौगेन। ५ प्रध्वंसाभावरूपा। ६ भिन्नस्य। ७ अभावप्रमाणस्य। ८ दृष्टान्तस्मरणमन्तरेण। ९ बौद्धः। १० उभयत्रास्पष्टत्वाविशेषात्। ११ प्रत्यक्षं सामान्यविषयं यदि। स्कन्धाकारपरिणतम्। १२ सौगतेन। १३ प्रत्यक्षं विशेषं गृह्णाति अनुमानं सामान्यं गृह्णाति इति बौद्धमतं न घटेत—प्रत्यक्षेणैव सामान्यग्रहणादिति। १४ ग्रन्थस्य। १५ प्रत्यक्षस्य। १६ सामान्यविषयत्वात्। १७ नुः।

वाष्पाग्निः पार्णो वा' इति सन्निहितवत् । न खलु सन्निहितं पावकं पश्यतस्तत्र[1] सन्देहोस्ति । सन्देहे[2] वा शब्दाल्लिङ्गाद्वा प्रति(ती)यतो-प्यसौ स्यात् । तथा[3] चेदमसङ्गतम्–"शब्दाल्लिङ्गाद्वा विशेषप्रतिपत्तौ न तत्र सन्देहः" [ ] इति । तन्नेदं प्रत्यक्षम् । किं तर्हि? लिङ्गदर्शनप्रभवत्वादनुमानम् । 'दृष्टान्तमन्तरेणाप्यनुमानं भवति' इत्येतच्चाग्रे वक्ष्यते । ५

व्याप्तिज्ञानं चास्पष्टत्वेनाप्रत्यक्षं व्यवहारिणां सुप्रसिद्धम् । व्यव-हारानुकूल्येन च प्रमाणचिन्ता[4] प्रतन्यते "प्रामाण्यं व्यवहारेण" [प्रमाणवा० ३।५] इत्यादिवचनात् । न च तेषां सर्वे क्षणिका भावाः कृतका वाऽग्न्यादयो धूमादयो वा स्पष्टज्ञानविषया इत्य-भ्युपगमोऽस्ति, अनुमानानर्थक्यप्रसङ्गात् । सर्वं हि व्याप्यं व्यापकं च स्पष्टतया युगपन्निश्चिन्वतो[5] न किञ्चिदनुमानसाध्यम्, अन्यथा योगिनोप्यनुमानप्रसङ्गः । निश्चिते[6] समारोपस्याप्यस-म्भवो[7] विरोधात् । कालान्तरभाविसमारोपनिषेधकत्वेनानुमानस्य प्रामाण्ये क्वचिदुपलब्धदेवदत्तस्य पुनः कालान्तरेऽनुपलम्भसमा-[10][11] रोपे सति यदनन्तरं[12] तत्स्मरणादिकं[13][14] तदपि प्रमाणं भवेत् । तन्न व्याप्तिज्ञानमप्यस्पष्टत्वात् प्रत्यक्षं युक्तम् । १०

ननु चास्पष्टत्वं[15] ज्ञानधर्मः, अर्थधर्मो वा? यदि ज्ञानधर्मः; कथमर्थस्यास्पष्टत्वम्? अन्यस्यास्पष्टत्वादन्यस्यास्पष्टत्वेऽतिप्रस-ङ्गात्[16] । अर्थधर्मत्वे कथमतो व्याप्तिज्ञानस्याप्रत्यक्षताप्रसिद्धिः? व्यधिकरणाद्धेतोः[17][18] साध्यसिद्धौ 'काकस्य कार्ष्ण्याद्धवलः प्रासादः' इत्यादेरपि गमकत्वप्रसङ्गः इत्यप्यसमीक्षिताभिधानम्; स्पष्ट-त्वेपि समानत्वात् । तदपि हि यदि ज्ञानधर्मस्तर्हि कथमर्थे स्पष्टता अतिप्रसङ्गात्[19]? विषये विषयिधर्मस्योपचाराददोषेऽत एव सोन्यत्रापि[20][21] मा[22] भूत् । संवेदनस्यैव ह्यस्पष्टता धर्मः स्पष्ट- १५ २० २५

१ जानतः । २ सन्देहे सति । ३ जैनं प्रति यदुक्तम् । ४ परीक्षा । ५ पुंसः । ६ समारोपव्यवच्छेदार्थमनुमानमिति चेन्नेत्याह । ७ अर्थे । ८ निश्चयश्चेत्समारोपः कथमिति । ९ सर्वं क्षणिकं सत्त्वात्कृतकत्वाद्वेति । १० नाहमद्राक्षमिति । ११ यस्तः । १२ यस्योपलम्भस्य । १३ तस्य पूर्वोपलब्धस्य देवदत्तस्य । १४ आदिपदेन प्रत्य-भिज्ञानम् । १५ साधनं विचारयति । १६ दूरपादपास्पष्टत्वे पुरोवर्तिपदार्थस्यास्पष्टत्वं स्यात् । १७ भिन्नाधिकरणात् । १८ अस्पष्टत्वं हेतुरर्थे, अप्रत्यक्षत्वं साध्यं ज्ञाने इति । १९ सन्निहिते पादपादौ स्पष्टत्वमनुमेयेपि स्यात् । २० अतिप्रसंगलक्षणो दोषः । २१ ज्ञानास्पष्टत्वस्यार्थधर्मत्वे । २२ ज्ञानस्यैवास्पष्टलक्षणो धर्मोऽर्थे उपचर्य-तेऽतश्चातिप्रसङ्गाभावात्कथं व्यधिकरणासिद्धो हेतुः ।

तावत् । तस्याः विषयधर्मत्वे सर्वदा तथा प्रतिभासप्रसङ्गात्कुतः प्रतिभासपरावृत्तिः? न चास्पष्टसंवेदनं निर्विषयमेव, संवादकत्वात्स्पष्टसंवेदनवत् । क्वचिद्विसंवादात्सर्वत्रास्य विसंवादे स्पष्टसंवेदनेपि तत्प्रसङ्गः । ततो नैतत्साधु—

५ "बुद्धिरेवातदाकारा तत उत्पद्यते यदा ।
तदाऽस्पष्टप्रतीभासव्यवहारो जगन्मतः ॥"

[प्रमाणवार्त्तिकालं० प्रथमपरि०]

द्विचन्द्रादिप्रतिभासेपि तद्व्यवहारानुषङ्गाच्च । स्पष्टप्रतिभासेन बाध्यमानत्वादस्य निर्विषयत्वमन्यत्रापि समानम् । यथैव हि १० दूरादस्पष्टप्रतिभासविषयत्वमर्थस्यारात्स्पष्टप्रतिभासेन बाध्यते तथा सन्निहितार्थस्य स्पष्टप्रतिभासविषयत्वं दूरादस्पष्टप्रतिभासेन, अविशेषात् ।

ननु विषयिधर्मस्य विषयेषूपचारात्तत्र स्पष्टास्पष्टत्वव्यवहारे विषयिणोपि ज्ञानस्य तद्धर्मतासिद्धिः कुतः? स्वज्ञानस्पष्टत्वास्प-१५ ष्टत्वाभ्याम्, स्वतो वा? प्रथमपक्षेऽनवस्था । द्वितीयपक्षे त्वविशेषेणाखिलज्ञानानां तद्धर्मताप्रसङ्गः; इत्यप्यसमीचीनम्; तत्रान्यथैव तद्धर्मताप्रसिद्धेः । स्पष्टज्ञानावरणवीर्यान्तरायक्षयोपशमविशेषाद्धि क्वचिद्विज्ञाने स्पष्टता प्रसिद्धा, अस्पष्टज्ञानावरणादिक्षयोपशमविशेषात्त्वस्पष्टतेति । प्रसिद्धश्च प्रतिबन्धकापायो ज्ञाने २० स्पष्टताहेतू रजोनीहाराद्यावृत्ता(ता)र्थप्रकाशस्येव तद्वियोगः ।

अक्षात्स्पष्टता इत्यन्ये, तेषां दविष्टपादपादिज्ञानस्य दिवोलूकादिवेदनस्य च तत्प्रसङ्गः । तदुत्पादकाक्षस्यातिदूरदेशदिनकरकरनिकरोपहतत्वाददोषोयमिति; अत्राप्यक्षस्योपघातः, शक्तेर्वा?

---

१ अस्पष्टतया । २ गृहीतार्थाव्यभिचारित्वात् । ३ अस्पष्टसंवेदनं सालम्बनं सिद्धं यतः । ४ ज्ञानम् । ५ एवकारोत्र भिन्नप्रक्रमे । तेनातदाकारेत्यस्यानन्तरं द्रष्टव्यः । बुद्धिर्विषयादुत्पद्यते चेत् तदा अतदाकारा कथमिति चेदुच्यते । एकत्वेन व्यवस्थिताच्चन्द्रलक्षणादर्थादुत्पद्यमाना बुद्धिर्यदा द्वित्वमवभासयति एकत्वं नावभासयति तदा अतदाकारा सती अस्पष्टव्यपदेशमर्हति । ६ अविषयाकारा । ७ विषयात् । ८ एतस्य तु स्पष्टत्वमभ्युपगतं बौद्धेन । ९ अतदाकारत्वं यतो बुद्धेः । १० स्पष्टसंवेदनेपि । ११ समीपे । १२ बाधाऽबाधत्वस्योभयत्रापि । १३ स्वयोः स्पष्टास्पष्टज्ञानयोर्ग्राहके च ते ज्ञाने च तयोः स्पष्टत्वास्पष्टत्वाभ्याम् । १४ प्रत्यक्षानुमानानाम् । १५ उक्तविपर्ययेणैव । स्वज्ञानस्य स्पष्टत्वास्पष्टत्वेनैव । १६ वीर्यं शक्तिः । ज्ञानस्य वीर्यस्य चावरणमवरोधकं कर्म । १७ अंशतः क्षयोपशमो भवति न सर्वतः । १८ प्रतिबन्धकोत्रावरणम् । १९ संवेदनस्य विशदत्वम् । २० मीमांसकाः । २१ अतिदूर । २२ परिहारे ।

प्रथमपक्षोऽयुक्तः; तत्स्वरूपस्याविकलस्यानुभवात्। द्वितीयपक्षे तु योग्यतासिद्धिः; भावेन्द्रियाख्य[1]क्षयोपशमलक्षणयोग्यताव्यतिरेकेणाक्षशक्तेरव्यवस्थितेः। तल्लक्षणाच्चाक्षात्स्पष्ट[2]त्वाभ्युपगमेऽस्म[3]न्मतप्रसिद्धिः।

आलोकोप्येतेन[4] तद्धेतुः प्रत्याख्यातः। ततः स्थितं[5]मेतद्विशदज्ञानस्वभावं प्रत्यक्षमिति।

ननु किमिदं ज्ञानस्य वैशद्यं नामेत्याह अव्यवधानेनेत्यादि।

प्रतीत्यन्तराव्यवधानेन विशेषवत्तया वा प्रतिभासनं वैशद्यम् ॥ ४ ॥

तुल्यजातीयापेक्षया च व्यवधानमव्यवधानं वा प्रतिपत्तव्यं न पुनर्देशकालाद्यपेक्षया। यथा 'उपर्युपरि स्वर्गपटलानि' इत्य[6]त्रान्योन्यं तेषां देशादिव्यवधानेपि तुल्यजातीयानामपेक्षाकृता प्रत्यासत्तिः सामीप्यमित्युक्तम्, एवमत्रा[7]प्यव्यवधानेन प्रमाणान्तरै[8]र्निरपेक्षतया प्रतिभासनं वस्तुनोऽनुभवो वैशद्यं विज्ञानस्येति।

नन्वेवमीहादिज्ञानस्यावग्रहाद्यपेक्षत्वादव्यवधानेन प्रतिभासनलक्षणवै[9]शद्याभावात्प्रत्यक्षता न स्यात्; तदसारम्; अपरापरेन्द्रियव्यापारादेवावग्रहादीनामुत्पत्तेस्तत्र तदपेक्षत्वासिद्धेः। एकमेव चेदं विज्ञानमवग्रहाद्यतिशयवदपरापरचक्षुरादिव्यापारादुत्पन्नं सत्स्वतन्त्रतया स्वविषये प्रवर्त्तते इति प्रमाणान्तरा[10]व्यवधानमत्रा[11]पि प्रसिद्धमेव। अनुमानादिप्रतीतिस्तु लिङ्गादिप्रतीत्यै[12]व जनिता सती स्वविषये प्रवर्त्तते इत्यव्यवधानेन प्रतिभासनाभावा[13]न्न प्रत्यक्षेति।

ततो निरवद्यमेवंविधं[14] वैशद्यं प्रत्यक्षलक्षणम्, साकल्येनाखिलाध्यक्षव्यक्तिषु सम्भवेनाव्याप्त्यसम्भवदोषाभावात्। अतिव्याप्तिस्तु दूरोत्सारितैव अध्यक्षत्वानभिमते क्व[15]चिदप्येतल्लक्षणस्यासम्भवात्।

---

१ (लब्ध्युपयोगौ भावेन्द्रियमिति सूत्रकारवचनम्। लब्धिर्हि इन्द्रियस्थानप्राप्तात्मप्रदेशानां तदावरणकर्मक्षयोपशमरूपा)। २ ज्ञानस्य। ३ जैनमतसिद्धिः। ४ अक्षस्य स्पष्टताहेतुनिराकरणपरेण ग्रन्थेन। ५ समर्थितम्। ६ उदाहरणे। ७ ज्ञाने। ८ अनुमानं प्रमाणान्तरेण लिङ्गज्ञानेन जायते इति तद्व्युदासायैतत्पदम्। ९ मतिज्ञानम्। १० अवग्रहादिरूपस्य। ११ ईहादिमतिज्ञाने। १२ न प्रत्यक्षप्रतीत्या। १३ लिङ्गादिप्रतीत्या व्यवधानात्। १४ अव्यवधानेन प्रतिभासनलक्षणम्। १५ अनुमानादौ।

समन्धकारादौ [1]ध्यामलितवृक्षादिवेदनमप्यध्यक्षप्रमाणस्वरूपमेव, [2]संस्थानमात्रे वैशद्या[3]विसंवादित्वसम्भवात्। विशेषांशाध्यवसायस्त्वनुमानरूपः, लिङ्गप्रतीत्या व्यवहितत्वान्नाध्यक्षरूपतां प्रतिपद्यते। [4]अतिदूरदेशे हि पूर्वं संस्थानमात्रं प्रतिपद्य 'अयमेवंवि-
५ धसंस्थानविशिष्टोर्थो वृक्षो हस्ती पलालकूटादिर्वा एवंविधसंस्थानविशिष्टत्वान्यथानुपपत्तेः' इत्युत्तरकालं विशेषं विवेचयति। तरतमभावेन तत्प्रदेशसन्निधाने तु संस्थानविशेषविशिष्टमेवार्थं वैशद्यतरतमभावेनाध्यक्षत एव प्रतिपद्यते, विशदज्ञानावरणस्य[5] तरतमभावेनैवापगमात्।

१० ननु च परोक्षेपि स्मृतिप्रत्यभिज्ञादिस्वरूपसंवेदनेऽस्याध्यक्षलक्षण[6]स्य सम्भवादतिव्याप्तिरेव; इत्यप्यपरीक्षिताभिधानम्; तस्य परोक्षत्वासम्भवात्, क्षायोपशमिकसंवेद[7]नानां स्वरूपसंवेदनस्यानिन्द्रि[8]यप्रधानतयोत्प[9]त्तेरनिन्द्रियाध्यक्षव्यपदेशसिद्धेः सुखादिस्वरूपसंवेदनवत्। [10]बहिरर्थग्रहणापेक्षया हि विज्ञानानां प्रत्यक्षेतर-
१५ व्यपदेशः, त[11]त्र प्रमाणान्त[12]रव्यवधानाव्यवधानसद्भावेन वैशद्येतरसम्भवात्, न तु स्वरूपग्र[13]हणापेक्षया, तत्र तदभा[14]वात्।

त[15]तो निर्दो[16]षत्वाद्वैशद्यं प्रत्यक्षलक्षणं परीक्षादक्षैरभ्युपगन्तव्यं न 'इन्द्रियार्थसन्निकर्षोत्पन्नम्' [न्यायसू० १।१।४] इत्या[18]दिकं तस्याव्यापकत्वादतीन्द्रियप्रत्यक्षे सर्वज्ञविज्ञानेऽस्यासत्त्वात्। न च 'तन्नास्ति'
२० इत्यभिधा[17]तव्यम्; प्रमाणतोऽनन्तरमेवास्य प्रसाधयिष्यमाणत्वात्। तथा सुखादिसंवेदनेप्यस्या[18]सत्त्वम्। न हीन्द्रि[19]यसुखादिसन्निकर्षात्तज्ज्ञानमुत्पद्यते; सुखादेरेव स्वग्रहणात्मकत्वेनोदयादित्युक्त[20]म्। चाक्षुषसंवेदने चास्या[21]सत्त्वम्; चक्षुषोर्थेन सन्निकर्षाभावात्।

अथोच्यते—स्पर्शनेन्द्रियादिवच्चक्षुषोपि प्राप्य[22]कारित्वं प्रमाणा-
२५ त्प्रसाध्य[23]ते। तथा हि-प्राप्तार्थप्रकाशकं चक्षुः बाह्ये[24]न्द्रिय[25]त्वात्स्पर्श-

१ अस्पष्ट। २ आकारमात्रे। ३ द्वन्द्वः। ४ उक्तमेव समर्थयन्ति। ५ कर्मणः। ६ अव्यवधानेन प्रतिभासनत्वलक्षणस्य। ७ स्मृत्यादीनाम्। ८ अनिन्द्रियं। (ईषदिन्द्रियं) मनः। ९ मानसप्रत्यक्षत्वादित्यर्थः। १० एवं चेत्स्मृत्यादीनां परोक्षव्यपदेशो न स्यादित्युक्ते आह। ११ बहिरर्थग्रहणे। १२ अनुमानलक्षणप्रमाणालिङ्गप्रत्यक्षं प्रमाणान्तरम्। १३ स्वसंवेदन। १४ प्रमाणान्तरव्यवधानाभावात्। २५ अव्याप्त्यादिदोषत्रयासम्भवो यतः। १६ परोक्तं प्रत्यक्षलक्षणम्। १७ परेण भवता। १८ इन्द्रियार्थसन्निकर्षोत्पन्नमित्यादिकस्य। १९ मनः। २० जैनैः प्रथमपरिच्छेदे। २१ प्रत्यक्षलक्षणस्य। २२ प्राप्यकारि प्राप्य अर्थं जानातीत्यर्थः। २३ नैयायिकेन। २४ इन्द्रियत्वादित्युक्ते मनसा व्यभिचारस्तत्परिहारार्थं बाह्यग्रहणम्। २५ बहिरर्थग्रहणाभिमुखत्वात्।

न्नेन्द्रियादिवत् । ननु किमिदं बाह्येन्द्रियत्वं नाम-बहिरर्थाभिमुख्यम्, बहिर्देशावस्थायित्वं वा? प्रथमपक्षे मनसानेकान्तः; तस्याप्राप्यकारित्वेपि बहिरर्थग्रहणाभिमुख्येन बाह्येन्द्रियत्वसिद्धेः। द्वितीयपक्षे त्वसिद्धो हेतुः; रश्मिरूपस्य चक्षुषो बहिर्देशावस्थायित्वस्य भ[1]वतानभ्युपगमात् । गोलकान्तर्गततेजोद्रव्याश्रया हि रश्मयस्त्वन्मते प्रसिद्धाः । गोलकरूपस्य तु चक्षुषो बहिर्देशावस्थायिनो हेतु[2]त्वे पक्षस्य प्रत्यक्षबाधनात्कालात्ययापदिष्टत्वम्[3] ।

न च बाह्यविशेषणेन मनो व्यवच्छेद्यम्, न हि तत्[4] सुखादौ संयुक्त[5]समवायादिसम्बन्धं व्याप्तौ च [6]सम्बन्धसम्बन्धमन्तरेण ज्ञानं ज[7]नयति रूपादौ नेत्रादि[8]वत् । अथासौ सम्बन्ध एव न भवति; तर्हि नेत्रादीनां रूपादिभिरप्यसौ न स्यात्, त[9]स्यापि सम्बन्धसम्बन्धत्वात् । तथा चेन्द्रियत्वाविशेषेपि मनोऽप्राप्तार्थप्रका[10]शकं तथा बाह्येन्द्रियत्वाविशेषेपि चक्षुः किं नेष्यते? अथात्र हेतुभावात्तन्नेष्यते; अन्य[11]त्रापि 'इन्द्रिय[12]त्वात्' इति हेतुः केन वार्यते? ततो मनसि तत्[13]साधने प्र[14]माणबाधनमन्यत्रा[15]पि स[16]मानम् ।

चक्षुश्चात्र[17] धर्मि[18]त्वेनोपात्तं गोलकस्वभावम्, रश्मिरूपं वा? तत्राद्यविकल्पे प्रत्यक्षबाधा; अर्थदेशपरिहारेण शरीरप्रदेश एवास्योपलम्भात्, अन्यथा त[19]द्रहितत्वेन नयनपक्ष्मप्रदेशस्योपलम्भः स्यात् । अथ रश्मिरूपं चक्षुः; तर्हि धर्मिणोऽसिद्धिः । न खलु रश्मयः प्रत्यक्षतः प्रतीयन्ते, अर्थव[20]त्तत्र तत्स्वरूपाप्रतिभासनात्, [21]अन्यथा विप्रतिपत्त्य[22]भावः स्यात् । न खलु नीले नीलतयानुभूयमाने कश्चिद्विप्रतिपद्यते ।

[23]किञ्च, इन्द्रियार्थसन्निकर्षजं प्रत्यक्षं भ[24]वन्मते । न चार्थदेशे

---

१ नैयायिकेन । २ चक्षुःप्राप्तार्थप्रकाशकं बहिर्देशावस्थायित्वादित्यस्य । ३ प्रत्यक्षादिप्रमाणबाधिते पक्षे प्रवर्तमानो हेतुः कालात्ययापदिष्टः । ४ कर्तृ । ५ मनसा संयुक्ते आत्मनि सुखादेस्समवाय इति । ६ मन आत्मनात्मा चाशेषपदार्थैः साध्यसाधनरूपैस्सम्बध्यते इति । ७ इति सिद्धं प्रत्यक्षादिप्रमाणबाधनम् । ८ नेत्रादिना संयुक्ते घटादौ रूपादेस्सम्बन्धसम्बन्धो यथा । ९ रूपादिषु नेत्रादीनां सम्बन्धसम्बन्धस्य । १० भवन्मताङ्गीकारेण । ११ मनसि । १२ मनः प्राप्तार्थप्रकाशकमिन्द्रियत्वात्त्वगादिवदिति । १३ प्राप्तार्थप्रकाशकत्वस्य । १४ आगमप्रमाणबाधा । १५ चक्षुषि । १६ प्रत्यक्षप्रमाणबाधनम् । १७ अनुमाने । १८ चक्षुः प्राप्तार्थप्रकाशकं बाह्येन्द्रियत्वात् । १९ गोलक । २० अर्थस्य यथा प्रतिभासनम् । २१ रश्मिस्वरूपं प्रतिभासते चेत् । २२ रश्मिरूपं चक्षुर्गोलकरूपं वेति । २३ रश्मिरूपं चक्षुरित्यस्मिन्पक्षे दूषणान्तरमाह । २४ नैयायिक ।

विद्यमानैस्तैरपरेन्द्रियस्य[1] सन्निकर्षोऽस्ति यतस्तत्र प्रत्यक्षमुत्पद्येत, अ[2]नवस्था[3]प्रसङ्गात्।

अथानुमानात्तेषां सिद्धिः; किमत[4] एव, अनुमानान्तराद्वा? प्रथमपक्षेऽन्योन्याश्रयः—अनुमानोत्थाने ह्यतस्[5]तत्सिद्धिः, अस्याश्चानुमानोत्थानमिति। अथानुमानान्तरा[6]त्तत्सिद्धिस्तदानवस्था[7], तत्राप्यनुमानान्तरात्तत्सिद्धिप्रसङ्गात्।

यदि च गोलकान्तर्भूतात्तेजोद्रव्याद्बहिर्भूता रश्मयश्चक्षुःशब्दवाच्याः पदार्थप्रकाशकाः; तर्हि गोलकस्योन्मीलनमञ्जनादिना संस्कारश्च व्यर्थः स्यात्। अथ गोलका[8]द्याश्रय[9]पिधाने तेषां विषयं प्रति गमनासम्भवात्तदर्थं[10] तदुन्मीलनम्, घृतादिना च पादयोः संस्कारे तत्संस्कारो भवति स्वा[11]श्रयगोलकसंस्कारे तु नितरां स्यात्[12] इत्यस्या[13]पि न वैयर्थ्यम्; तदापि गोलकादिलग्नस्य कामलादेः प्रकाशकत्वं तेषां स्यात्। न खलु प्रदीपकलिकाश्रयास्तद्रश्मयस्तत्कलिकावलग्नं शलाकादिकं न प्रकाशयन्तीति युक्तम्।

न चात्र चक्षुषः सम्बन्धो नास्तीत्यभिधातव्यम्; यतो व्यक्ति[14]रूपं चक्षुस्तत्रासम्बद्धम्, शक्तिस्वभावं वा, रश्मिरूपं वा? प्रथमपक्षे प्रत्यक्षविरोधः; व्यक्तिरूपचक्षुषः काचकामलादौ सम्बन्धप्रतीतेः। द्वितीयपक्षेपि तच्छक्तिरूपं चक्षुर्व्यक्तिरूपचक्षुषो भिन्नदेशम्, अभिन्नदेशं वा? न तावद्भिन्नदेशम्; तच्छक्तिरूपताव्याघातानुषङ्गान्निरो[15]धारत्वप्रसङ्गाच्च। न ह्यन्यशक्तिरन्याधारा युक्ता। तद्देशाद्वारेणैवार्थोपलब्धिप्रसङ्गश्च। ततो[16]ऽभिन्नदेशं चेत्[17]; तत्त्र[18] सम्बद्धम्, असम्बद्धं वा? सम्बद्धं चेत्; बहिरर्थवत्स्वाश्रयं[19] तत्सम्बद्धं चाञ्जनादिकमपि प्रकाशये[20]त्। असम्बद्धं चेत्कथमाधेयं[21] नाम अतिप्रसङ्गात्[22]?

अथ रश्मिरूपं चक्षुः[23], तस्यापि काचकामलादिना सम्बन्धोऽस्त्येव। न खलु स्फटिका[24]दिकूपिकामध्यगतप्रदीपा[25]दिरश्मयस्ततो[26]

---

१ अपरलोकानां लोचनस्य। २ अन्यथा=उत्पद्यते चेत्तर्हि। ३ ग्रन्थानवस्था। ४ प्रथमानुमानात्। ५ अनुमानात्। ६ रश्मिरूपं चक्षुस्तैजसत्वात्प्रदीपवदित्यस्मात्। ७ ग्रन्थानवस्था। ८ भवत्प्रक्रियामात्रेण। ९ वसः। १० गोलकान्तर्भूततेजोद्रव्यस्य। ११ स्वस्य रश्मिरूपचक्षुषः। १२ रश्मिरूपचक्षुषः संस्कारः। १३ गोलकस्याञ्जनादिना संस्कारस्य। १४ गोलकरूपम्। १५ शक्तेः। १६ व्यक्तिरूपचक्षुषः। १७ शक्तिस्वभावम्। १८ व्यक्तिरूपे चक्षुषि। १९ शक्तिरूपेन्द्रियस्याश्रयं गोलकम्। २० उभयत्र सम्बन्धाविशेषात्। २१ शक्तिरूपम्। २२ सह्यस्य विन्ध्याधेयता स्यादसम्बन्धत्वाविशेषात्। २३ तृतीयपक्षे। २४ काचादि। २५ आदिपदेन रत्नादि। २६ स्फटिकादिकूपिकायाः सकाशात्।

निर्गच्छन्तस्तत्संयोगिनो[1] न सम्बद्धास्तत्प्रकाशका[2] वा न भवन्तीति प्रतीतम्। तथा[3] चाञ्जनादेः प्रत्यक्षत एव प्रसिद्धेः परोपदेशस्य दर्पणादेश्च तदर्थस्योपादानमनर्थकमेव[4] स्यात्।

किञ्च, यदि गोलकान्निःसृत्यार्थेनाभिसम्बध्यार्थं ते[5] प्रकाशयन्ति; तर्ह्यर्थं प्रति गच्छतां तैजसानां रूपस्पर्शविशेषवतां[6][7] तेषामु-[8] ५
पलम्भः स्यात्, न चैवम्, अतो दृश्यानामनुपलम्भात्तेषामभावः। अथादृश्यास्तेऽनुद्भूतरूपस्पर्शवत्त्वात्[9]; न; अनुद्भूतरूपस्पर्शस्य तेजोद्रव्यस्याप्रतीतेः। जलहेम्नोर्भासुररूपोष्णस्पर्शयोरनु-[10]
द्भूतिप्रतीतिरस्तीत्यसम्यक्; उभयानुद्भूतेस्तत्राप्यप्रतिपत्तेः[11]। दृष्टा-[12]
नुसारेण चादृष्टार्थकल्पना, अन्यथातिप्रसङ्गात्[13]। तथाहि-रात्रौ १०
दिनकरकराः सन्तोपि नोपलभ्यन्तेऽनुद्भूतरूपस्पर्शत्वाच्चक्षूरश्मिवत्। प्रयोगश्च—मार्जारादीनां[14] चक्षुषा रूपदर्शनं बाह्यालोकपूर्वकम् तत्त्वाद्दिवाऽस्मदादीनां तद्दर्शनवत्। ननु मार्जारादीनां चाक्षुषं तेजोस्ति, तत एव तत्सिद्धेः किं बाह्यालोककल्पनयेत्यन्यत्रापि[15]
समानम्[16]। ननु यथा[17] यद्दृश्यते[18] तथा तत्कल्प्यते, दिवास्मदादीनां १५
चाक्षुषं सौर्यं च तेजो विज्ञानकारणं दृश्यते तत्तथैवं[19] कल्प्यते,
रात्रौ तु चाक्षुषमेव[20], अतस्तदेव तत्कारणं[21] कल्प्यते। ननु किं
मनुष्येषु नायनरश्मीनां दर्शनमस्ति[22][23]? अथानुमेयास्ते[24]; तर्हि रात्रौ
सौर्यरश्मयोप्यनुमेयाः सन्तु। न च रात्रौ तत्सद्भावे[25] नक्तञ्चराणामिव मनुष्याणामपि रूपदर्शनप्रसङ्गः; विचित्रशक्तित्वाद्भावा-[26][27] २०
नाम्[28]। कथमन्यथोलूकादयो दिवा न पश्यन्ति? यथा[29] चात्रालोकः[30][31]

---

१ बहिः। २ श्रीखण्डेन। ३ सम्बन्धे सति। ४ अञ्जनादिपरिज्ञानार्थम्। ५ रश्मयः। ६ भासुर। ७ उष्ण। ८ रश्मीनाम्। ९ इति चेन्नेत्यर्थः। १० अप्रतीतिं परिहरति परः। ११ एकस्मिन्नुष्णोदकलक्षणे हेमलक्षणे वा तैजसद्रव्ये। १२ यदैकस्मिंस्तेजोद्रव्ये उभयानुद्भूतिर्न दृष्टा तथापि चक्षूरश्मिषूभयानुद्भूतिः कल्प्यते इत्युक्ते आह। १३ अदृष्टानुसारेणादृष्टार्थकल्पना यदि स्यात्। १४ रात्रौ। १५ नरनेत्रे। १६ मनुष्याणां चाक्षुषं तेजोस्ति तत एव तत्सिद्धेः किं बाह्यालोककल्पनया। १७ कारणत्वेन। १८ तेजः। १९ कारणत्वेन। २० मार्जारादीनाम्। २१ रूपदर्शनकारणम्। २२ प्रतीतिः। २३ येनैवं परिहारः परेणोच्यते। न सन्तीत्यर्थः। २४ परः। २५ सौर्यरश्मिसद्भावात्। २६ कथं विचित्रशक्तित्वम्? रात्रौ विद्यमानाः सौर्यरश्मयो नक्तञ्चराणां रूपज्ञानहेतवो न मनुष्याणामिति। २७ सौर्यरश्मीनाम्। २८ भावानां विचित्रशक्तित्वं न स्याद्यदि। २९ परमते। ३० दिवसे। ३१ घूकानाम्।

प्रतिबन्धकः, तथान्यत्र तमः। ततो यथानुपलम्भान्न सन्ति रात्रौ भास्करकरास्तथान्यदा नायनकरा इति।

एतेन 'दूरस्थितकुड्यादिप्रतिफलितानां प्रदीपरश्मीनामन्तराले सतामप्यनुपलम्भसम्भवात् तैरनुपलम्भो व्यभिचारी; इत्यपि ५ निरस्तम्; आदित्यरश्मीनामपि रात्रावभावासिद्धिप्रसङ्गात्।

अथोच्यते—चक्षुः स्वरश्मिसम्बद्धार्थप्रकाशकम् तैजसत्वात्प्रदीपवत्। ननु किमनेन चक्षुषो रश्मयः साध्यन्ते, अन्यतः सिद्धानां तेषां ग्राह्यार्थसम्बन्धो वा? प्रथमपक्षे पक्षस्य प्रत्यक्षबाधा, नरनारीनयनानां प्रभासुररश्मिरहितानां प्रत्यक्षतः प्रतीतेः। १० हेतोश्च कालात्ययापदिष्टत्वम्। अथादृश्यत्वात्तेषां न प्रत्यक्षबाधा पक्षस्य। नन्वेवं पृथिव्यादेरपि तत्सत्त्वप्रसङ्गः; तथा हि–पृथिव्यादयो रश्मिवन्तः सत्त्वादिभ्यः प्रदीपवत्। यथैव हि तैजसत्वं रश्मिवत्तया व्याप्तं प्रदीपे प्रतिपन्नं तथा सत्त्वादिकमपि। अथ तेषां तत्साधने प्रत्यक्षविरोधः; सोन्यत्रापि समान इत्युक्तम्।

१५ ननु मार्जारादिचक्षुषोः प्रत्यक्षतः प्रतीयन्ते रश्मयः तत्कथं तद्विरोधः? यदि नाम तत्र प्रतीयन्तेऽन्यत्र किमायातम्? अन्यथा हेम्नि पीतत्वप्रतीतौ पटादौ सुवर्णत्वसिद्धिप्रसङ्गः। प्रत्यक्षबाधनमुभयत्रापि।

किञ्च, मार्जारादिचक्षुषोर्भासुररूपदर्शनादन्यत्रापि चक्षुषि २० तैजसत्वप्रसाधने गवादिलोचनयोः कृष्णत्वस्य नरनारीनिरीक्षणयोर्धावल्यस्य च प्रतीतेरविशेषेण पार्थिवत्वमाप्यत्वं वा साध्यताम्। कथं च प्रभासुरप्रभारहितनयनानां तैजसत्वं सिद्धं यतः सिद्धो हेतुः? किमत एवानुमानात्, तदन्तराद्वा? आद्यविकल्पेऽन्योन्याश्रयः-सिद्धे हि तेषां रश्मिवत्त्वे तैजसत्वसिद्धिः, ततश्च २५ तत्सिद्धिरिति।

---

१ जैनमते। २ रात्रौ। ३ नराणां प्रतिबन्धकम्। ४ दिवा। ५ अपि न सन्ति। ६ रात्रौ दिनकरकराणामभावसाधनपरेण ग्रन्थेन। ७ प्रतिबिम्बितानाम्। ८ प्रदीपकुड्याद्योः। ९ जैनैः। १० अन्यथा। ११ न सन्त्यनुपलभ्यमानत्वादिति। १२ अनुमानेन। १३ प्रमाणात्। १४ मार्जारादिनयनेषु। १५ नरनारीनयनेषु। १६ अन्यत्र प्रतीतस्यान्यत्र विधिर्यदि। १७ हेम्नि पीतत्वात्पटे सुवर्णत्वसाधने प्रत्यक्षबाधनं यथा तथा तैजसत्वाच्चक्षुषि रश्मिवत्त्वसाधने च प्रत्यक्षबाधनम्। १८ नरनयनं रश्मिवत् तैजसत्वान्मार्जारादिचक्षुर्वदिति। १९ अशेषनेत्राणाम्। २० तैजसत्वादित्यस्मात्।

अथ 'चक्षुस्तैजसं रूपादीनां मध्ये रूपस्यैव[1] प्रकाशकत्वात् प्रदीपवत्' इत्यनुमानान्तरात्तत्सिद्धिः[2]; न; अत्रापि गोलकस्य भासुररूपोष्णस्पर्शरहितस्य तैजसत्वसाधने पक्षस्य प्रत्यक्षबाधा, 'न तैजसं चक्षुः तमःप्रकाशकत्वात्, यत्पुनस्तैजसं तन्न तमःप्रकाशकं यथालोकः' इत्यनुमानबाधा च। प्रसाधयिष्यते च[3] 'तमोवत्' इत्यत्र तमसः सत्त्वम्। प्रदीपवत्तैजसत्वे चास्य[4]ालोकापेक्षा न स्यादुष्णस्पर्शा[5]दितयोपलम्भश्च स्यात्, न चैवम्, तदपेक्षतया मनुष्यपारावतबलीवर्दादीनां धवललोहितका[6]लरूपतयानुष्णस्पर्शस्वभावतया चास्योपलम्भात्। तन्न गोलकं चक्षुः।

नाप्यन्यत्[7]; तद्ग्राहक[8]प्रमाणाभावेनाश्रयासिद्धत्वप्रसङ्गाद्धेतोः[9]। 'रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात्' इति हेतुश्च जला[10]ञ्जनचन्द्रमाणिक्या[11]दिभिरनैकान्तिकः[12]। तेषामपि पक्षीकरणे पक्षस्य प्रत्यक्षबाधा, सर्वो हेतुरव्यभिचारी च स्यात्। न च जलाद्यन्तर्गतं तेजोद्रव्यमेव रूपप्रकाशकमित्यभिधातव्यम्; सर्वत्र[13] दृष्टहेतु[14]वैफल्यापत्तेः। तथा च दृष्टान्तासिद्धिः, प्रदीपादावप्यन्यस्यैव[15] तत्[16]प्रकाशकस्य कल्पनाप्रसङ्गात्। प्रत्यक्षबाधनमुभयत्र[17]। निराकरिष्यते च "नार्थालोकौ कारणम्" [परी० २।६] इत्यत्रालोकस्य रूपप्रकाशकत्वम्[18]।

किञ्च, रूपप्रकाशकत्वं तत्र ज्ञानजनकत्वम्। तच्च कारण[19]विषय[20]वादिनो[21] घटादिरूपस्या[22]प्यस्तीत्यनेन हेतो[23]र्व्यभिचारः। 'करणत्वे[24]

---

१ रूपस्येत्युच्यमाने आत्ममनोभ्यां व्यभिचारस्तत्परिहारार्थं रूपस्यैवेत्युक्तम्। रूपस्यैव प्रकाशकत्वादित्युच्यमाने असिद्धत्वम्। कुतः? द्रव्यद्रव्यत्वयोरपि चक्षुषा प्रकाशनात्। तत्परिहारार्थं रूपादीनां मध्ये इत्युक्तम्। अनेन द्रव्यद्रव्यत्वयोः परिहारः—रूपादीनां गुणानामेव निर्धारितत्वात्। २ इति यदुक्तं तन्नेत्यर्थः। ३ नार्थालोकौ कारणं परिच्छेद्यत्वात्तमोवदित्यस्य सूत्रस्य व्याख्यावसरे। ४ चक्षुषः। ५ आदिपदेन स्फोटादि। ६ कृष्ण। ७ धर्मि। ८ रश्मिरूपम्। ९ रश्मिरूपचक्षुषः। १० रूपस्याप्येते प्रकाशकाः। ११ आदिपदेन काचादिभिरपि। १२ यद्रूपादीनां मध्ये रूपस्यैव प्रकाशकं तत्तैजसमित्युक्ते जलाञ्जनादिभिर्हेतुर्व्यभिचारी स्यादित्यर्थः। १३ कार्ये। १४ कारण। १५ पिशाचादेः। १६ रूप। १७ जलादेरेव रूपप्रकाशकत्वोपलम्भादन्यस्य। रूपप्रकाशकत्वकल्पनेपि। १८ साधनविकलो दृष्टान्त इति निरूपितमनेन। १९ यत्कारणं ज्ञानं जनयति तदेव ज्ञानस्य विषयो भवतीति। २० ज्ञानस्य। २१ नैयायिकस्य। २२ घटादिरूपं रूपज्ञानजनकं न तु तैजसम्। २३ प्रकाशकत्वादित्यस्य। तैजसत्वसाध्यस्याभावो(वे)पि साधनमस्ति यतः। २४ चक्षुस्तैजसं करणत्वे सति रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वादित्युक्तेपीत्यर्थः।

सति' इति विशेषणेप्यालोकार्थसन्निकर्षेण[1] चक्षूरूपयोः संयुक्त[2]समवायसम्बन्धेन चानेकान्तः। 'द्रव्यत्वे[3] करणत्वे[4] च सति तत्प्र[5]काशकत्वात्' इति विशेषणेपि चन्द्रादिनानेकान्तः[6]।

किञ्च, द्रव्यं[7] रूपप्रकाशकं भासुररूपम्, अभासुररूपं वा? प्रथमपक्षे उष्णोदकसंसृष्टमपि तत् तत्प्रकाशकं[8] स्यात्। अनुद्भूतरूपत्वान्नेति चेत्, नायनरश्मीनामप्यत एव तन्मा[9]भूत्। तथा[10] दृष्टत्वादित्यप्यनुत्तरम्; संशयात्, न हि तत्र[11] निश्चयोस्ति ते तत्प्रकाशका[12] न गोलकमिति। अनुद्भूतरूपस्य तेजोद्रव्यस्य दृष्टान्तेपि रूपप्रकाशकत्वाप्रतीतेः। तथाच, न चक्षू रूपप्रकाशकमनुद्भूतरूपत्वा[13]ज्जलसंयुक्तानलवत्। द्वितीयपक्षेपि उष्णोदकतेजो[14]रूपं तत्प्रकाशकं[15] स्यात्। न हि तत्तत्र नष्टम्, 'अनुद्भूतम्' इत्यभ्युपगमात्[16]। उद्भूतं तत्तत्प्रकाशक[17]मित्यभ्युपगमे रूपप्रकाशस्तद[18]न्वयव्यतिरेकानुविधायी तस्यैव[19] कार्यो न द्रव्यस्य[20]। न खलु देवदत्तं प्रति पश्वादीनामागमनं तद्गुणा[21]न्वयव्यतिरेकानुविधायि देवदत्तस्य कार्यम्[22]। ततो 'द्रव्यत्वे सति' इति विशेषणासिद्धिः।

किञ्च, सम्बन्धादेरिवा[23][24]ऽतैजसस्यापि द्रव्यरूपकरणस्य कस्यचि[25]द्रूपज्ञानजनकत्वं किन्न स्यात्, विपक्षव्यावृत्तेः[26] सन्दिग्धत्वा[27]दतैज[28]सत्वे रूपज्ञानजनकत्वस्या[29]विरोधात्? तदेवं तैजसत्वासिद्धेर्नातः[30] चक्षुषोरश्मिवत्त्वसिद्धिः।

अथान्यतः[31] सिद्धानां रश्मीनां ग्राह्यार्थसम्बन्धोनेन साध्यते; न[32]; अन्यतः कुतश्चि[33]त्तेषामसिद्धेः, प्रत्यक्षादेस्तत्साधकत्वेन प्राक्प्र-

---

१ सन्निकर्षाः संयुक्तसमवायादयः करणं भवन्ति न तु तैजसम्। २ चक्षुषा संयुक्ते घटे रूपस्य समवायसम्बन्ध इत्यतः सन्निकर्षोपि संयुक्तसमवाय एवात्र। ३ तेजोद्रव्ये सन्निकर्षादयो गुणास्तद्व्यवच्छेदार्थं द्रव्यत्वे सतीति विशेषणम्। ४ चक्षुस्तैजसं द्रव्यत्वे करणत्वे च सति रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात्। ५ रूप। ६ चन्द्रे तैजसत्वाभावात्। ७ तेजोद्रव्यम्। ८ भासुररूपस्य। ९ रूपप्रकाशकत्वम्। १० अनुद्भूतरूपस्यापि तेजोद्रव्यस्य रूपप्रकाशकत्वेन। ११ तेजोद्रव्ये। १२ रूप। १३ भासुर। १४ उष्णोदकगततेजोरूपम्। १५ रूप। १६ परेण। १७ रूप। १८ उद्भूततेजोरूपस्य। १९ गोलकगतोद्भूततेजोरूपस्य। २० तेजोद्रव्यस्य। २१ मन्त्रतन्त्रादि। २२ किन्तु देवदत्तगुणस्यैव कार्यम्। २३ सन्निकर्षादि। २४ आदिपदेन संयोगस्य चन्द्रादेश्च। २५ गोलकरूपस्य। २६ विपक्षादतैजसाज्जलादेः। २७ रूपज्ञानजनकत्वहेतोः। २८ यत्तैजसं न भवति तन्न रूपप्रकाशकमिति। २९ जलादीनाम्। ३० तैजसत्वादिति हेतोः। ३१ द्वितीयपक्षः। ३२ इति चेन्न। ३३ प्रमाणात्।

तिषिद्धत्वात्। तथा चेदमयुक्तम्–"धत्तूरकपुष्पवदादौ सूक्ष्माणामप्यन्ते महत्त्वं तद्रश्मीनां महापर्वतादिप्रकाशकत्वान्यथानुपपत्तेः।" [　　] इति; स्वरूपतोऽसिद्धानां तेषां महत्त्वादिधर्मस्य श्रद्धामात्रगम्यत्वात्। ततो रश्मिरूपचक्षुषोऽप्रसिद्धेर्गोलकस्य च प्राप्यकारित्वे प्रत्यक्षबाधितत्वात्कस्य प्राप्तार्थप्रकाशकत्वं साध्येत? यदि च स्पर्शनादौ प्राप्यकारित्वोपलम्भाच्चक्षुषि तत्साध्येत; तर्हि हस्तादीनां प्राप्तानामेवान्याकर्षकत्वोपलम्भादयस्कान्तादीनां[1] तथा[2] लोहाकर्षकत्वं किन्न साध्येत? प्रमाणबाधा[3]न्यत्रापि[4]।

अथार्थेन चक्षुषोऽसम्बन्धे कथं तत्र ज्ञानोदयः? क एवमाह–'तत्र ज्ञानोदयः' इति? आत्मनि ज्ञानोदयाभ्युपगमात्[5]। न चाप्राप्यकारित्वे चक्षुषः सकृत्सर्वार्थप्रकाशकत्वप्रसङ्गः; प्रतिनियतशक्तित्वाद्भावानाम्[6]। 'यः[7] एव यत्र[8] योग्यः स एव तत्करोति' इत्यनन्तरमेव वक्ष्यते। कार्यकारणयोः[9]रत्यन्तभेदेऽर्थान्तरत्वाविशेषात् 'सर्वम्[10] एकस्मात्[11]कुतो न जायेत[12]' इति, 'रश्मयो वा लोकान्तं कुतो न गच्छन्ति' इति चोद्ये[13] भवतोपि[14] योग्यतैव शरणम्।

किञ्च, चक्षू रूपं प्रकाशयति संयुक्तसमवायसम्बन्धात्, स चास्य गन्धादावपि समान इति तमपि प्रकाशयेत्। तथा चेन्द्रियान्तरवैयर्थ्यम्। योग्यताऽभावात्तदप्रकाशने सर्वत्र[15] सैवास्तु, किमन्तर्गडुना सम्बन्धेन[16]? यदि चायमेकान्त[17]श्चक्षुषा सम्बद्धस्यैव ग्रहणमिति; कथं तर्हि स्फटिकाद्यन्तरितार्थग्रहणम्? तद्रश्मीनां[18] तं प्रति गच्छतां स्फटिकाद्यवयविना प्रतिबन्धात्। तैस्तस्य नाशितत्वाददोषे तद्व्यवहितार्थोपलम्भसमये स्फटिकादेरुपलम्भो न[19] स्यात्। तस्योपरि स्थितद्रव्यस्य[20] च पातप्रसक्तिः आधारभूतस्यावयविनो नाशात्। न हि परमाणवो दृश्याः कस्यचिदाधारा वा; अवयव[21]विकल्पनानर्थक्यप्रसङ्गात्। अवयव्यन्तर[22]स्योत्पत्तेरदोषे तदा तद्व्यवहितार्थानुपलम्भप्रसङ्गः। न चैवम्, युगपत्तयो[23]र्निरन्तरमुपलम्भात्। अथाशु व्यूहान्तरो[24]त्पत्तेर्निरन्तरस्फटिकादिवि-

१ अप्राप्ताकर्षकाणाम्। २ प्राप्तत्वप्रकारेण। ३ प्रत्यक्षबाधा। ४ चक्षुष्यपि। ५ जैनैः। ६ चक्षुरादीनाम्। ७ कुत एतदित्याह। ८ कार्ये। ९ कार्यकारणभावनियमे न योग्यता कारणं किन्त्वन्यदेव कारणमित्युक्ते आह। १० कार्यम्। ११ कारणात्। १२ भिन्नत्वाविशेषात्। १३ जैनैः। १४ नैयायिकस्य। १५ कार्यनियमे। १६ सन्निकर्षेण। १७ नियमः। १८ तस्य चक्षुषः। १९ नष्टत्वात्। २० कलशादेः। २१ अन्यथा। २२ एकस्य नाशेऽपरस्योत्पत्तेः। २३ स्फटिकस्फटिकान्तरितार्थयोः। २४ स्कन्धान्तरस्य।

भ्रमः; तदभावस्याप्याशु प्रवृत्तेरभावविभ्रमः किन्न स्यात्? भावपक्षस्य बलीयस्त्व[1]मित्ययुक्तम्; भावाभावयोः परस्परं स्वकार्यकरणं प्रत्यविशेषात्[2]।

कथं च समलजलान्तरितार्थस्योपलम्भो न स्यात्? ये हि तद्र-
५ श्मयः कठिनमतितीक्ष्णलोहाऽभेद्यं स्फटिकादिकं भिन्दन्ति तेषां जलेऽतिद्रवस्वभावे काऽक्षमा? अथ नीरेण नाशितत्वान्न ते तद्भिन्दन्ति; तर्हि स्वच्छजलव्यवस्थितस्याप्यनुपलम्भप्रसङ्गः। योग्यताङ्गीकरणे[3] सर्वं[4] सुस्थम्। ततः प्रोक्तदोषपरिहारमिच्छता[5] प्रतीतिसिद्धमप्राप्यकारित्वं चक्षुषोऽभ्युपगन्तव्यम्।

१० तथाहि–'चक्षुरप्राप्तार्थप्रकाशकमत्यासन्नार्था[6]प्रकाशकत्वात्, यत्पुनः प्राप्तार्थप्रकाशकं तदत्यासन्नार्थप्रकाशकं दृष्टं यथा श्रोत्रा[7]दि, अत्यासन्नार्थाप्रकाशकं च चक्षुस्तस्मादप्राप्तार्थप्रकाशकम्' इति। न चायमसिद्धो हेतुः; काचकामला[8]द्यत्यासन्नार्थाप्रकाशकत्वस्य चक्षुषि प्रागेव प्रसाधितत्वात्। ननु साध्या[9]विशि-
१५ ष्टोयं हेतुः, 'पर्युदास[10]प्रतिषेधे हि यदेवस्याप्राप्यकारित्वं तदेवात्यासन्नार्थाप्रकाशकत्वम्' इति। प्रसज्य[11]प्रतिषेधस्तु[12] जैनैर्नाभ्युपगम्यते अपसिद्धान्त[13]प्रसङ्गात्; इत्यप्यनुपपन्नम्; प्रसङ्ग[14]साधनत्वादेतस्य[15]। श्रोत्रादौ हि प्राप्यकारित्वात्यासन्नार्थप्रकाशकत्वयोर्व्याप्यव्यापकभावसिद्धौ सत्यां परस्य[16] व्यापका[17]भावेष्ट्या[18]ऽत्यासन्नार्थाप्रकाशकत्व-
२० लक्षणयाऽनिष्टस्य प्राप्यकारित्वलक्षणव्याप्याभावस्यापादानमात्रमेवानेन[19] विधीयते, इत्युक्तदोषाप्रसङ्गः। नाप्यनैकान्तिको विरुद्धो वा; विपक्षै[20]कदेशे तत्रैव वाऽस्या[21]ऽप्रवृत्तेः।

न च स्पर्शनेन प्राप्यकारिणाप्यत्यासन्नस्याभ्यन्तरशरीरावयवस्पर्शस्याप्रकाशनादनेकान्तः; अस्य तत्[22]कारणत्वेन तदविषय-
२५ त्वात्। स्वकारणव्यतिरिक्तो हि स्पर्शादिः स्पर्शनादीन्द्रियाणां

१ बलीयस्त्वादित्यर्थः। २ बलीयस्त्वस्य। ३ समलजले शक्तिर्नास्ति स्वच्छजलेस्ति तर्हि योग्यतैव कारणम्। ४ अप्राप्तार्थप्रकाशकत्वेपि न सकलार्थग्राहकं चक्षुः। यत्र योग्यता तं प्रकाशयति यत्र योग्यता नास्ति तं न प्रकाशयतीति। ५ नैयायिकेन। ६ कामलादि। ७ शब्दादिकं प्रकाशयत्। ८ आदिपदेनाञ्जनादि। ९ साध्यसम इत्यर्थः। १० हेतुस्थितनञो विचारः। ११ अत्यासन्नार्थं न प्रकाशयतीति। १२ सर्वथा तुच्छाभावः। १३ अन्यथा। १४ (जैनो वक्ति) परेष्टयाऽनिष्टापादनं प्रसङ्गसाधनम्। १५ अनुमानस्य। १६ नैयायिकस्य। १७ चक्षुषीत्यध्याह्रियते। १८ चक्षुषा। १९ अनुमानेन। २० प्राप्यकारित्वस्य। २१ हेतोः। २२ तस्य उपादानकारणत्वेन, न तु निमित्तकारणत्वेन।

विषयः, तत्रैवाभिमुख्यसम्भवेनामीषां प्रकाशनयोग्यतोपपत्तेः। कथमन्यथैकशरीरप्रदेशान्तरगतस्पर्शनेन तत्प्रदेशान्तरगतः स्पर्शः प्रकाश्येत? न च कामलादयोऽञ्जनादयो वा चक्षुषः कारणं येन तेषामप्यनेन न्यायेन प्रकाशनं न स्यात्, स्वसामग्रीतस्तत्सन्निधानात्प्रागेवास्योत्पन्नत्वात्। नापि कालात्ययापदिष्टोयम्; प्रत्यक्षस्य पक्षाबाधकत्वेन प्रागेव समर्थनात्, आगमस्य च तद्बाधकस्यासम्भवात्। नापि सत्प्रतिपक्षः; विपरीतार्थोपस्थापकानुमानानां प्रागेव प्रतिध्वस्तत्वादिति। तथा, 'चक्षुर्गत्वा नाऽर्थेनाभिसम्बद्ध्यते इन्द्रियत्वात्स्पर्शनादीन्द्रियवत्' इत्यनुमानाच्चास्याप्राप्यकारित्वसिद्धिः। अर्थस्य च तद्देशागमने प्रत्यक्षविरोध इति।

तच्चोक्तप्रकारं प्रत्यक्षं मुख्यसांव्यवहारिकप्रत्यक्षप्रकारेण द्विप्रकारम्। तत्र सांव्यवहारिकप्रत्यक्षप्रकारस्योत्पत्तिकारणस्वरूपे प्रकाशयति—

इन्द्रियानिन्द्रियनिमित्तं देशतः सांव्यवहारिकम् ॥ ५ ॥

विशदं प्रत्यक्षमित्यनुवर्त्तते। तत्र समीचीनोऽबाधितः प्रवृत्तिनिवृत्तिलक्षणो व्यवहारः संव्यवहारः, स प्रयोजनमस्येति सांव्यवहारिकं प्रत्यक्षम्। नन्वेवंभूतमनुमानमप्यत्र सम्भवतीति तदपि सांव्यवहारिकं प्रत्यक्षं प्राप्नोतीत्याशङ्कापनोदार्थम्-'इन्द्रियानिन्द्रियनिमित्तं देशतः' इत्याह। देशतो विशदं यत्तत्प्रयोजनं ज्ञानं तत्सांव्यवहारिकं प्रत्यक्षमित्युच्यते नान्यदित्यनेन तत्स्वरूपम्, इन्द्रियानिन्द्रियनिमित्तमित्यनेन पुनस्तदुत्पत्तिकारणं प्रकाशयति।

तत्रेन्द्रियं द्रव्यभावेन्द्रियभेदाद् द्वेधा। तत्र द्रव्येन्द्रियं गोलकादिपरिणामविशेषपरिणतरूपरसगन्धस्पर्शवत्पुद्गलात्मकम्, पृथिव्यादीनामत्यन्तभिन्नजातीयत्वेन द्रव्यान्तरत्वासिद्धितस्तस्य प्रत्येकं तदारब्धत्वासिद्धेः। द्रव्यान्तरत्वासिद्धिश्च तेषां विषयपरिच्छेदे प्रसाधयिष्यते। भावेन्द्रियं तु लब्ध्युपयोगात्मकम्। तत्राऽऽवरणक्षयोपशमप्राप्तिरूपार्थग्रहणशक्तिर्लब्धिः, तदभावे सतोप्यर्थ-

१ स्वकारणव्यतिरिक्ते स्पर्शादावाभिमुख्यं नास्ति यदि। २ पूर्वानुमानप्रकारेण। ३ स्वेष्टानिष्टयोरर्थयोः। ४ लोके। ५ अनुमानादि। ६ आचार्यः। ७ इन्द्रियानिन्द्रिययोर्मध्ये। ८ सर्वाङ्गगतत्वग्, जिह्वा, नासा, गोलकपक्ष्मपुट, कर्णशष्कुलीति पञ्चसंख्यात्मकम्। ९ सर्वथा। १० चतुर्थे।

स्याप्रकाशनात्, अन्यथा[1]तिप्रसङ्गः[2]। उपयोगस्तु रूपादिविषयग्रहणव्यापारः[3], विषयान्तरासक्ते चेतसि सन्निहितस्यापि विषयस्याग्रहणात्तत्सिद्धिः। एवं मनोपि द्वेधा द्रष्टव्यम्।

ततः "पृथिव्यप्तेजोवायुभ्यो घ्राणरसनचक्षुःस्पर्शनेन्द्रियभावः" [ ] इति[4] प्रत्याख्यातम्; पृथिव्यादीनामन्योन्यमेका[5]न्तेन द्रव्यान्तरत्वासिद्धेः, अन्यथा जलादे[6]र्मुक्ताफलादिपरिणामाभावप्रसक्तिरात्मादिवत्। न चैवम्, प्रत्यक्षादिविरोधात्।

अथ मतम्–पार्थिवं घ्राणं रूपादिषु सन्निहितेषु गन्धस्यैवाभिव्यञ्जकत्वान्नागकर्णिकाविमर्दककरतलवत्; तदप्यसङ्गतम्; हेतोः सूर्यरश्मिभिरुदकसेकेन चानेकान्तात्। दृश्यते हि तैलाभ्यक्तस्यादित्यमरीचिकाभिर्गन्धाभिव्यक्तिर्भूमेस्तूदकसेकेनेति। 'आप्यं रसनं रूपादिषु सन्निहितेषु रसस्यैवाभिव्यञ्जकत्वाल्लालावत्' इत्यत्रापि हेतोर्लवणेन व्यभिचारः, तस्यानाप्यत्वेपि रसाभिव्यञ्जकत्वप्रसिद्धेः। 'चक्षुस्तैजसं रूपादिषु सन्निहितेषु रूपस्यैवाभिव्यञ्जकत्वात्प्रदीपवत्' इत्यत्रापि हेतोर्माणिक्याद्युद्योतितेनाने[10]कान्तः। 'वायव्यं स्पर्शनं रूपादिषु सन्निहितेषु स्पर्शस्यैवाभिव्यञ्जकत्वात्तोयशीतस्पर्शव्यञ्जकवाय्व[11]वयविवत्' इत्यत्रापि कर्पूरादिना[12] सलिले[13]शीतस्पर्शव्यञ्जकेनानेकान्तः[14]।

पृथिव्यप्तेजःस्पर्शाभिव्यञ्जकत्वाच्चास्य[15] पृथिव्यादिकार्यत्वानुषङ्गो वायुस्पर्शाभिव्यञ्जकत्वाद्वायुकार्यत्ववत्। चक्षुषश्च तेजोरूपाभिव्यञ्जकत्वात्तेजःकार्यत्ववत् पृथिव्यप्समवायिरूपव्यञ्जकत्वात्पृथिव्यप्कार्यत्वप्रसङ्गः। रसनस्य चाप्यरसाभिव्यञ्जकत्वादप्कार्यत्ववत् पृथिवीरसाभिव्यञ्जकत्वात्पृथिवीकार्यत्वप्रसङ्गः।

'नाभसं श्रोत्रं रूपादिषु सन्निहितेषु शब्दस्यैवाभिव्यञ्जकत्वात्' इति चाऽसाम्प्रतम्; शब्दे नभोगुणत्वस्याग्रे प्रतिषेधात्। ततश्चेदमप्ययुक्तम्–"शब्दः स्वसमानजातीय[16]विशेषगुणवतेन्द्रियेण

---

१ तदभावेप्यर्थप्रकाशनं चेत्। २ पिशाचपरमाण्वादेरपि ग्रहणप्रसङ्गः। ३ विषयं प्रत्यभिमुखता। ४ नैयायिकमतम्। ५ सर्वथा। ६ आदिपदेन चन्द्रकान्तादेश्च। ७ पार्थिवत्वाभावात्। ८ नुः। ९ तैजसत्वाभावात्। १० तोयगत। ११ यसः। १२ पार्थिवेन। १३ सलिलगत। १४ वायव्याभावात्। १५ स्पर्शनेन्द्रियस्य। १६ शब्दो विशेषगुणवतेन्द्रियेण गृह्यते इत्युच्यमाने सिद्धसाध्यता भविष्यति। न हि जैनेनापि रूपलक्षणगुणवता श्रोत्रेण शब्दो न गृह्यते इत्यभ्युपगम्यते। तद्व्यवच्छेदार्थं समानजातीयविशेषगुणवतेन्द्रियेण गृह्यते इत्युक्तम्। तथापि स्तम्भगतरूपेण समानजातीयरूपलक्षणविशेषगुणवतेन्द्रियेण शब्दो गृह्यत इत्यभ्युपगमात्सिद्धसाध्यता।

गृह्यते सामान्यविशेषवत्त्वे सति बाह्यैकेन्द्रियप्रत्यक्षत्वात्, बाह्यैकेन्द्रियप्रत्यक्षत्वे सत्यनात्मविशेषगुणत्वाद्वा रूपादिवत्" [ ] इति। ततो नेन्द्रियाणां प्रतिनियतभूतकार्यत्वं व्यवतिष्ठते प्रमाणाभावात्। प्रतिनियतेन्द्रिययोग्यपुद्गलारब्धत्वं[1] तु द्रव्येन्द्रियाणां प्रतिनियतभावेन्द्रियोपकरणभूतत्वान्यथानुपपत्तेर्घटते[2] इति ५ प्रेक्षादक्षैः प्रतिपत्तव्यम्।

ननु चेन्द्रियानिन्द्रियनिमित्तं तदि[3]त्यसाम्प्रतम्, आत्मार्थालोकादे[4]रपि तत्कारणतया[5]त्राभिधानार्हत्वात्[6]; तन्न; आत्मनः[7] समनन्तरप्रत्ययस्य[8] वा[9] प्रत्ययान्तरे[10]ष्यविशेषात् अत्रा[11]नभिधानम् असाधारणकारणस्यैव[12] निरूपयितुमभिप्रेतत्वात्। सन्निकर्षस्य चाऽ- १० व्यापकत्वादसाधकतमत्वाच्चा[13]नभिधानम्। अर्थालोकयोस्तदसाधा[14]रणकारणत्वादत्रा[15]भिधानं तर्हि कर्त्तव्यम्[16]; इत्यप्यसत्; तयोर्ज्ञानकारणत्वस्यैवासिद्धेः। तदाह—

नार्थाऽऽलोकौ कारणं[17] परिच्छेद्यत्वात्तमोवत् ॥ ६ ॥

प्रसिद्धं हि तमसो विज्ञानप्रतिबन्धकत्वेनातत्कारणस्यापि परि- १५ च्छेद्यत्वम्[18]। ननु ज्ञानानुत्पत्तिव्यतिरेकेणान्यस्य तमसोऽभावा-

---

तद्व्युदासार्थं स्वेन शब्दलक्षणेन समानजातीयविशेषगुणवतेन्द्रियेण गृह्यत इत्युक्तम्। साध्यविशेषणसाफल्यानन्तरं हेतुविशेषणसाफल्यमुच्यते। इन्द्रियग्राह्यत्वादित्युच्यमाने घटेनानेकान्तः। घटो हि इन्द्रियग्राह्यो भवति न च स्वसमानजातीयविशेषगुणवतेन्द्रियेण गृह्यते—घटस्य द्रव्यत्वेन तत्समानजातीयस्य गुणस्याभावात्। तेनानेकान्तव्युदासार्थमेकेन्द्रियग्राह्यत्वादित्युक्तम्। न हि घटस्यैकेन्द्रियग्राह्यत्वं स्पर्शनादीन्द्रियेणापि ग्रहणात्। एकेन्द्रियग्राह्यत्वादित्युच्यमाने आत्मनानेकान्तः। आत्मा हि मनोलक्षणैकेन्द्रियग्राह्यो भवति, न च समानजातीयविशेषगुणवतेन्द्रियेण गृह्यते—आत्मनो द्रव्यत्वेन तत्समानजातीयस्य गुणस्य मनस्यभावात्। तत्परिहारार्थं बाह्यैकेन्द्रियग्राह्यत्वादित्युक्तम्। तथा च रूपत्वादिनानेकान्तः। रूपत्वादिकं बाह्यैकेन्द्रियग्राह्यं भवति, न च स्वसमानजातीयविशेषगुणवतेन्द्रियेण गृह्यते—रूपत्वस्य सामान्यभावेन तत्सजातीयगुणस्यैवासम्भवात्। तत्परिहारार्थं सामान्यविशेषवत्त्वे सति बाह्यैकेन्द्रियग्राह्यत्वादित्युक्तम्। न च रूपत्वसामान्यं सामान्यवद्भवति—निस्सामान्यानि सामान्यानीति वचनात्।

१ न चैकपुद्गलजन्यत्वेनैकादृशत्वं योग्यपुद्गलारब्धत्वात्। २ सहाय। ३ सांव्यवहारिकम्। ४ आदिपदेन सन्निकर्षादेः। ५ प्रत्यक्ष। ६ सूत्रे। ७ कारणरूपस्य। ८ पूर्वम्। ९ उपादानत्वेनात्मनासदृश। १० परोक्षज्ञाने। ११ सूत्रे। १२ विशेष। १३ चक्षुषः प्राप्यकारित्वनिराकरणात्। १४ सांव्यवहारिकस्य। १५ सूत्रे। १६ जैनैः। १७ ज्ञानस्य। १८ ज्ञेयत्वम्।

त्कस्य दृष्टान्ता? इत्यप्यसङ्गतम्; तस्यार्थान्तरभूतस्यालोकस्येवार्थ[1]-वानन्तरं समर्थयिष्यमाणत्वात्। ननु परिच्छेद्यत्वं च स्यात्त-योस्[2]तत्कारणत्वं च अविरोधात्; इत्यप्यपेशलम्; तत्कारणत्वे तयोश्चक्षुरादिवत्परिच्छेद्यत्वविरोधात्।

किञ्च, अर्थकार्यतया ज्ञानं प्रत्यक्षतः प्रतीयते, प्रमाणान्तराद्वा? प्रत्यक्षतश्चेत्किं तत[3] एव, प्रत्यक्षान्तराद्वा? न तावत्तत एव, अनेनार्थमात्रस्यैवानुभवात्। [4]तद्धेतुत्वविशिष्टार्थानुभवे वा विवादो न स्यान्नीलत्वादिवत्। न खलु प्रमाणप्रतिपन्ने वस्तुरूपेऽसौ दृष्टो विरोधात्। न हि कुम्भकारादेर्घटादिहेतुत्वेनानुभवे सोस्ति। तन्न [5]तदेवात्[6]मनोऽर्थकार्यतां प्रति[7]पद्यते। नापि प्र[8]त्यक्षान्तरम्; तेनाप्यर्थमात्रस्यैवानुभवात्, [9]अन्यथोक्तदोषानुष[10]ङ्गः, ज्ञाना[11]न्तरस्या[12]नेनाग्रहणाच्च। एको[13]र्थसमवेतानन्त[14]रज्ञानग्राह्यमर्थज्ञानमित्यभ्युप[15]गमेपि अनेनार्थाग्रहणम्। न चोभयविषयं ज्ञानमस्ति यतस्त[16]त्प्रतिपत्तिः[17]।

अथ प्रमाणान्तरात्तस्या[18]र्थकार्यता प्रतीयते; तत्किं [19]ज्ञानविषयम्, अर्थविषयम्, उभयविषयं वा स्यात्? तत्राद्यविकल्पद्वये तयोः[20] कार्यकारणभावाप्रतीतिः एकैकविषयज्ञानग्राह्यत्वात्, कुम्भकारघटयोरन्यतरविषयज्ञानग्राह्यत्वे तद्भावाप्रतीतिवत्। नाप्युभयविषयज्ञा[21]नात्त[22]त्प्रतीतिः; तद्विषयज्ञानस्यास्मादृ[23]शां भवतो[24]ऽनभ्युपगमात्। न खलु 'ज्ञाने प्रवृत्तं ज्ञानमर्थेपि प्रवर्त्ततेऽर्थे वा प्रवृत्तं ज्ञाने' इत्यभ्युपगमो भवतः। अ[25]भ्युपगमे वा प्र[26]माणान्तरत्वप्रसक्तिरिति व्याप्तिज्ञानविचारे विचारयिष्यते।

अथानुमानात्तत्कार्यतावसायः[27]; तथाहि-अर्थालोककार्यं विज्ञानं तदन्वयव्यतिरेकानुविधानात्, यद्यस्यान्वयव्यतिरेकावनु[28]विधत्ते तत्तस्य कार्यम् यथाग्नेर्धूमः, अन्वयव्यतिरेकावनुविधत्ते चार्थालोकयोर्ज्ञानम् इति। न चात्रासिद्धो हेतुस्तत्सद्भावे सत्येवास्य भावादभावे चाभावात्। इत्याशङ्क्याह—

१ ग्रन्थे। २ तत्र ज्ञाने। ३ घटं विषयीकरोति यत्प्रत्यक्षम्। ४ ज्ञान। ५ आद्यप्रत्यक्षम्। ६ स्वस्य। ७ जानाति। ८ विचारलक्षणम्। ९ अर्थज्ञानयोरनुभवश्चेत्प्रत्यक्षान्तरेण। १० प्रथमप्रत्यक्षज्ञानस्य। ११ द्वितीयज्ञानापेक्षया। १२ द्वितीयज्ञानेन। १३ आत्मलक्षण। १४ द्वितीय। १५ परेण। १६ अर्थकार्यतया ज्ञानस्य। १७ अपि तु न कुतोपि। १८ ज्ञानस्य। १९ वस्तुः। २० अर्थज्ञानयोः। २१ प्रमाणान्तरात्। २२ ज्ञानस्यार्थकार्यतायाः। २३ किञ्चिज्ज्ञानाम्। २४ नैयायिकेन। २५ उभयविषयज्ञानस्य। २६ उभयविषयज्ञानस्य पञ्चमस्य। २७ निश्चयः। २८ अनुकरोति।

तदन्वयव्यतिरेकानुविधानाभावाच्च केशोण्डुकज्ञानवन्नक्तञ्चरज्ञानवच्च ॥ ७ ॥

तदन्वयव्यतिरेकानुविधानाभावाच्च, न केवलं परिच्छेद्यत्वात्तयोस्तदकारणताऽपि तु ज्ञानस्य तदन्वयव्यतिरेकानुविधानाभावाच्च। नियमेन हि यद्यस्यान्वयव्यतिरेकावनुकरोति तत्तस्य कार्यम् यथाग्नेर्धूमः। न चानयोरन्वयव्यतिरेकौ ज्ञानेनानुक्रियेते।

अत्रोभयप्रसिद्धदृष्टान्तमाह-केशोण्डुकज्ञानवन्नक्तञ्चरज्ञानवच्च। कामलाद्युपहतचक्षुषो हि न केशोण्डुकज्ञानेर्थः कारणत्वेन व्याप्रियते। तत्र हि केशोण्डुकस्य व्यापारः, नयनपक्ष्मादेर्वा, तत्केशानां वा, कामलादेर्वा गत्यन्तराभावात्? न तावदाद्यविकल्पः; न खलु तज्ज्ञानं केशोण्डुकलक्षणेर्थे सत्येव भवति भ्रमाभावप्रसङ्गात्। नयनपक्ष्मादेस्तत्कारणत्वे तस्यैव प्रतिभासप्रसङ्गात्, गगनतलावलम्बितया पुरःस्थतया केशोण्डुकाकारतया च प्रतिभासो न स्यात्। न ह्यन्यदन्यत्रान्यथा प्रत्येतुं शक्यम्। अथ नयनकेशा एव तत्र तथाऽसन्तोपि प्रतिभासन्ते; तर्हि तद्रहितस्य कामलिनोपि तत्प्रतिभासाभावः स्यात्।

किञ्च, असौ तद्देशे एव प्रतिभासो भवेन्न पुनर्देशान्तरे। न खलु स्थाणुनिबन्धना पुरुषभ्रान्तिस्तद्देशादन्यत्र दृष्टा। कथं च तद्देशतां तदाकारता चाऽसती तज्ज्ञानं जनयेद्यतो ग्राह्या स्यात्। अथ भ्रान्तिवशात्तत्केशा एव तत्र तथा तज्ज्ञानं जनयन्ति; अस्माकमपि तर्हि 'चक्षुर्मनसी रूपज्ञानमुत्पादयेते' इति समानम्। यथैव ह्यन्यविषयजनितं ज्ञानमन्यविषयस्य ग्राहकं तथान्यकारणजनितमपि स्यात्।

अथ कामलादय एव तज्ज्ञानस्य हेतवः, तेभ्यश्चोत्पन्नं तदसदेव केशादिकं प्रतिपद्यते; तर्हि निर्मललोचनमनोमात्रकारणादुत्पद्य-

१ अर्थालोक। २ अर्थालोकयोर्ज्ञानं प्रत्यकारणत्वे साध्ये। ३ अर्थाभावे (कोषेषू-डुकशब्द एव श्रूयते)। ४ आलोकाभावे। ५ भवति चेत्तर्हि। ६ केशोण्डुकज्ञानस्य। ७ नरस्य। ८ केशोण्डुक। ९ नयनदेशे। १० नयनकेशानाम्। ११ गगनतले। १२ गगनतल। १३ नयनकेशेषु। १४ केशोण्डुक। १५ केशोण्डुक। १६ नयन। १७ गगनतले। १८ केशोण्डुकतया। १९ केशोण्डुक। २० नयनकेशेभ्यस्सकाशादन्यत्केशोण्डुकस्य ग्राहकं चेत्। २१ केशोण्डुकादन्ये नयनकेशाः। २२ नयनकेशेभ्यस्सकाशादन्यत्केशोण्डुकं तस्य। २३ अर्थादन्ये इन्द्रियमनसी। २४ केशोण्डुक।

मानं ज्ञानं सदेव वस्तु विषयीकरोतीति किन्नेष्यते[1]? तत्कथमर्थकार्यता ज्ञानस्य अनेन[2] व्यभिचारात् संशयज्ञानेन च?

न हि तदर्थे सत्येव भवति; अभ्रान्तत्वानुषङ्गात्[3], तद्विषयभूतस्य स्थाणुपुरुषलक्षणार्थद्वयस्यैकत्र सद्भावासम्भवाच्च। सद्भावे वारेको[4] न स्यात्। अथोच्यते[6]-"सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षादुभयविशेषस्मृतेश्च संशयः" [वैशे० सू० २।२।१७] विपर्ययः पुनस्तद्विपरीतविशेषस्मृतेः इत्यर्थादेवानयोर्भावः; तदप्युक्तिमात्रम्; तयोः खलु सामान्यं वा हेतुः स्यात्, विशेषो वा, द्वयं वा? न तावत्सामान्यम्; तत्र संशयाद्यभावात् 'सामान्यप्रत्यक्षात्' इत्यभिधानात्, प्रत्यक्षे च संशयादिविरोधात्। विशेषविषयं च संशयादिज्ञानम्। न चास्य सामान्यं जनकं युज्यते। न ह्यन्यविषयं ज्ञानमन्येन जन्यते, रूपज्ञानस्य रसादुत्पत्तिप्रसङ्गात्। यथा च सामान्यादुपजायमानं तद[11]सतो विशेषस्य वेदकं तथेन्द्रियमनोभ्यां जायमानं सतः सामान्यादेरपीति व्यर्थोर्थस्य तद्धेतुत्वकल्पना। सामान्यार्थजन्यत्वे चास्य[13] अर्थानर्थजत्वप्रतिज्ञाविरोधः[14], कामलिनश्च केशोण्डुकादिज्ञानानुत्पत्तिः, न खलु तत्र केशोण्डुकादिसमानधर्मा धर्मो विद्यते यद्दर्शनात्तत्स्यात्। तन्नास्य सामान्यं हेतुः।

नापि विशेषस्तत्र तदभावात्। न खलु पुरोदेशे स्थाणुपुरुषलक्षणो विशेषोस्ति तज्ज्ञानस्याभ्रान्तत्वप्रसङ्गात्। स्थाणुरस्तीति चेत्; कथं ततः किं पुरुषः पुरुष एवेति पुरुषांशावसायः? अन्यथान्यत्रापि[21] ज्ञानेर्थस्य[22] कारणत्वकल्पना व्यर्था। तन्न विशेषोपि तद्धेतुः[23]। नाप्युभयम्; उभयपक्षोक्तदोषानुषङ्गात्। ततः संशयादिज्ञानस्यार्थाभावेप्युपलम्भात्कथं तदभावे ज्ञानाभावसिद्धियतोर्थकार्यतास्य स्यात्?

---

१ भवता नैयायिकेन। २ केशोण्डुकज्ञानेन। ३ अन्यथा। ४ संशयज्ञानस्य। ५ संशयः। ६ परेण। ७ ऊर्द्धतासामान्यस्य ग्राहकं प्रत्यक्षमुपलम्भस्तस्मात्। ८ स्थाणुत्वपुरुषत्वलक्षणो विशेषस्तस्याऽप्रत्यक्षमनुपलम्भस्तस्मात्। ९ विद्यमानविशेषात्। १० तस्माद्विद्यमानविशेषात्सामान्यादिलक्षणात्। ११ ज्ञानम्। १२ सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षादिति सामर्थ्यात: संशयोत्पत्तौ दूषणान्तरमाह। १३ संशयस्य। १४ स्थाणुपुरुषलक्षणयोरंशयोरन्यतर एकस्तु विद्यमानोर्थोऽपरोऽविद्यमानोऽनर्थः। १५ स्थाणुस्थानीयः। १६ आकाशे। १७ शुक्तिकास्थानीयः। १८ संशयादेः। १९ पुरोदेशे। २० अन्यथा। २१ स्थाणावविद्यमानस्य पुरुषांशस्य व्यवसायो यदि। २२ इन्द्रियमनोभ्यामुत्पन्ने सत्यज्ञानेपि। २३ संशयादिहेतुः।

ननु भ्रान्तं तत्तेनापलभ्यते, न चान्यस्य व्यभिचारेन्यस्य व्यभिचारोऽतिप्रसङ्गात्; इत्यप्यसमीक्षिताभिधानम्; स्वपरग्रहणलक्षणं हि ज्ञानम्, तत्र च यथा सत्याभिमतज्ञानं स्वपरग्राहकं तथा केशोण्डुकादिज्ञानमपि। एतावाँस्तु विशेषः-किञ्चित्सत्परं गृह्णाति संवादसद्भावात्किञ्चिदसद्विसंवादात्, न चैतावता जात्यन्तरत्वेनानयोरन्यत्वं ताभ्यां व्यभिचाराभावो वा। अन्यथा 'प्रयत्नानन्तरीयकः शब्दः कृतकत्वाद् घटादिवत्' इत्यादेरप्यप्रयत्नानन्तरीयकैर्विद्युद्वनकुसुमादिभिर्न व्यभिचारः, ताल्वादिदण्डादिजनिताच्छब्दघटादेस्तद्विपरीतस्य विद्युदादेरन्यत्वात्। न चान्यस्य व्यभिचारेऽन्यस्यापि व्यभिचारोऽतिप्रसङ्गात्। तथाप्यत्र व्यभिचारे प्रकृतेपि सोऽस्तु विशेषाभावात्।

किञ्च, 'कारणमेव परिच्छेद्यम्' इत्यभ्युपगमे योगिज्ञानात्प्राक्कालभाविन एवार्थस्यानेन परिच्छित्तिः स्यात् तस्यैव तत्कारणत्वात्; न पुनस्तत्कालभाविनोऽभाविनो वा, तस्यातत्कारणत्वात्। लब्धात्मलाभं हि किञ्चित्कस्यचित्कारणं नान्यथातिप्रसङ्गात्। तथाप्यनेन तत्परिच्छेदेऽन्यज्ञानेनाप्यतत्कारणस्याप्यर्थस्य परिच्छेदः स्यात्। तथा चेदमयुक्तम्-"अर्थसहकारितयार्थवत्प्रमाणम्" [ ] इति। तदपरिच्छेदे चास्यासर्वज्ञतानुषङ्गः। ज्ञानान्तरेण परिच्छेदे तस्यापि ज्ञानान्तरस्य समसमयभाविनोर्थस्यापरिच्छेदकत्वात्कथं सर्वज्ञतेति चिन्त्यम्।

क्षणिकत्वे चार्थस्य ज्ञानकालेऽसत्त्वात्कथं तेन ग्रहणम्? तदाकारता चास्य प्राक्प्रत्युक्ता। सत्यां वा तस्या एव ग्रहणात्परमार्थतोर्थस्याग्रहणात्तदेवाऽसर्वज्ञत्वम्। न खलु चैत्रसदृशे मैत्रे दृष्टे परमार्थतश्चैत्रो दृष्टो भवत्यन्यत्रोपचारात्। साध्वी चोपचारेण सर्वज्ञत्वकल्पना सुगतस्य सर्वस्य तथाप्राप्तेः, एकस्य कस्यचित्सतो वेदने तत्सदृशस्य सत्त्वेन सर्वस्य वेद-

१ कारणेन। २ गोपालघटिकाधूमस्य पावकव्यभिचारे भूधरादिधूमस्यापि तद्व्यभिचारः स्यात्। ३ भ्रान्ताभ्रान्तज्ञानयोः। ४ संशयविपर्ययाभ्याम्। ५ ज्ञानस्यार्थाभावे भावो व्यभिचारस्तस्याभावो न च। ६ एतावतान्यत्वं व्यभिचाराभावो वा स्याद्यदि तर्हि। ७ अपेक्षितपरव्यापारो हि भावः कृतक उच्यते। ८ ताल्वाद्यजनितस्य, मेघादिकारणकस्य। ९ भिन्नजातीयत्वात्। १० प्रयत्नानन्तरीयकत्वं विना भावे। ११ अन्यत्वेपि। १२ कृतकत्वादित्यस्य हेतोः। १३ ज्ञाने। १४ अन्यत्वस्य। १५ ईश्वरज्ञानाद्वा। १६ भविष्यतोर्थस्य। १७ खरविषाणमपि कस्यचित्कारणं स्यादित्यतिप्रसङ्गः। १८ वर्तमानस्य भाविनो वार्थस्य ज्ञानाकारणत्वेपि। १९ योगिनः। २० भाविनोर्थस्य। २१ प्रथमपरिच्छेदे। २२ प्राणिमात्रस्य। २३ सन्निहितस्य।

नसम्भवात् । सत्त्वेन सर्वस्य सर्वेण वेदनमन्यैस्तु धर्मैरवेदनमिति चेत्; तर्हि ["ए] कस्यार्थस्वभावस्य" [प्रमाणवा० १।४४] इत्यादिग्रन्थविरोधः । सत्त्वेनापि तद्ग्रहणे न सादृश्यं ग्रहणकारणमिति कथं सुगतस्योपचारेणापि बहिः प्रमेयग्रहणम्?

कथं चैवंवादिनो भावस्योत्पद्यमानता प्रतीयेत-सा ह्युत्पद्यमानार्थसमसमयभाविना ज्ञानेन प्रतीयते, पूर्वकालभाविना, उत्तरकालभाविना वा? न तावत्समसमयभाविना; तस्याऽतत्कार्यत्वात् । नापि पूर्वकालभाविना; तत्काले तस्याः सत्त्वाभावात् । न चासती प्रत्येतुं शक्या; अकारणत्वात् । तदा खलूत्पत्स्यमानतार्थस्य न तूत्पद्यमानता । नाप्युत्तरकालभाविना; तदा विनष्टत्वात्तस्याः । न हि तदोत्पद्यमानतार्थस्य किं तूत्पन्नता ।

नित्येश्वरज्ञानपक्षे सिद्धमकारणस्याप्यर्थस्यानेन परिच्छेद्यत्वम् । तद्वदन्येनापि स्यात् । अथार्थाकार्यत्वे तद्वन्नित्यत्वान्निखिलार्थग्राहित्वानुषङ्गः; नः चक्षुरादिकार्यत्वेनानित्यत्वात् । प्रतिनियतशक्तित्वाच्च प्रतिनियतार्थग्राहित्वम् । न खलु यैकस्य शक्तिः सान्यस्यापि, अन्यथा सर्वस्य सर्वकर्तृत्वानुषङ्गो महेश्वरवत् । यथैव हीश्वरः कार्यग्रामेणानुपक्रियमाणोप्यविशेषेण तं करोति तथा कुम्भकारादिरपि कुर्यात् । न हि सोपि तेनोपक्रियते येन 'उपकारकमेव कुर्यान्नान्यम्' इति नियमः स्यात् । शक्तिप्रतिनियमात्तदविशेषेपि कश्चित्कस्यचित्कर्त्तेत्यभ्युपगमो ग्राहकत्वपक्षेपि समानः ।

ननु यद्यर्थाभावेपि ज्ञानोत्पत्तिः कुतो न नीलाद्यर्थरहिते प्रदेशे तद्भवति? भवत्येव नयनमनसोः प्रणिधाने । कथं न नीलाद्यर्थग्रहणम्? तत्र तदभावात् । कथं 'तदुत्पन्नम्' इत्यवगमः? न हि

१ पुरुषेण । २ नीलपीतादिलक्षणैः । ३ नीललक्षणस्यार्थस्य प्रत्यक्षतः प्रतीतेः कोन्यो भावो यः प्रमाणान्तरैर्वेद्यते इति ग्रन्थस्य विरोधः । ४ प्रतिबिम्बितस्य सादृश्यस्य ग्रहणं स्यान्न त्वर्थस्य । ५ कारणमेव परिच्छेद्यमिति वादिनः । ६ असदादिज्ञानेन । ७ असदादिज्ञानस्य । न=इति चेन्नेत्यर्थः । ८ असदादिज्ञानस्य । ९ ईश्वरज्ञानस्य । १० असदादिज्ञानस्य । ११ एकस्य या शक्तिः सान्यस्य यदि । १२ नरस्य । १३ सर्वकार्याणाम् । १४ ग्रामः समूहः । १५ अनुपकारककार्यकारणत्वस्याविशेषेपि । १६ घटपटादिषु मध्ये । १७ अर्थकार्यताऽभावेपि ज्ञानं कस्यचिद्योग्यस्य ग्राहकं स्यादिति समानता । १८ पुरोदेशे ।

1 'एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम् ।
कोऽन्यो न भागो दृष्टः स्याद्यः प्रमाणैः परीक्ष्यते ॥'' [प्रमाणवा० १।४४]

विषयमपरिच्छिन्दत् ज्ञानम् 'अस्ति' इति युक्तम्, अन्यथा सर्वत्र[1] सर्वदा सर्वस्य तदनिवार्यं भवेदित्यप्यसारम्; तत्रोपनीतस्य[2] नीलादेस्तेनैव[3] ग्रहणोपलम्भात्। तदैव तदन्यज्ज्ञात(न)मिति चेत्कि-मिदानीं[4] प्रतिविषयं प्रकाशकस्य भेदः? तथाभ्युपगमे प्रदीपा-देरपि प्रतिविषयमन्यत्वप्रसङ्गः। प्रत्यभिज्ञानमुभयत्र[6] समानम्। ५

नन्वर्थाभावेपि ज्ञानसद्भावेऽतीतानागते व्यवहिते च तत्स्या-त्सन्निहितवत्। ननु (ननु) तत्र तत्स्यादिति कोर्थः? किं तत्रोत्प-द्येत, तद्ग्राहकं वा भवेदिति? न तावत्तत्रोत्पद्येत; आत्मनि तदु-त्पत्त्यभ्युपगमात्। नापि तद्ग्राहकं भवेत्; अयोग्यत्वात्। न खलु तदुत्पन्नमपि सर्वं वेत्ति; योग्यस्यैव वेदनात्। कारणेपि[7] चैतच्चोद्यं १० समानम्। तत्रापि हि कारणं[8] कार्येणानुपक्रियमाणं यावत्प्रतिनि-यतं कार्यमुत्पादयति तावत्सर्वं कस्मान्नोत्पादयतीति चोद्ये योग्य-तैव शरणम्। ततो ज्ञानस्यार्थान्वयव्यतिरेकानुविधानाभावात्कथं तत्कार्यता यतः "अर्थवत्प्रमाणम्"[10] [न्यायभा० पृ० १] इत्यत्र भाष्ये "प्रमातृप्रमेयाभ्यामर्थान्तरमव्यपदेश्याऽव्यभिचारिव्यव- १५ सायात्मके ज्ञाने कर्त्तव्येऽर्थसहकारितयार्थवत्प्रमाणम्" [ ] इति व्याख्या शोभेत? तन्नार्थकार्यता विज्ञानस्य।

नाप्यालोककार्यता; अञ्जनादिसंस्कृतचक्षुषां नक्तञ्चराणां चालोकाभावेपि ज्ञानोत्पत्तिप्रतीतेः। अथालोकस्याकारणत्वेऽन्ध-कारावस्थायामप्यस्मदादीनां ज्ञानोत्पत्तिः स्यात्। न चैवम्; तत- २० स्तद्भावे भावात्तदभावे चाभावात्तत्कार्यताऽस्य। अन्यथा[11] धूमो-

१ अर्थे। २ पुरोदेशे। ३ पूर्वज्ञानेनैव। ४ अन्यज्ज्ञानमित्यस्मिन्नवसरे। ५ ज्ञानस्य। ६ य एवायं प्रदीपो घटस्य प्रकाशकः स एवायं पटस्य प्रकाशको यथा तथा य एव नीलज्ञानपरिणत आत्मा स एवान्यज्ञानपरिणतः। ७ कारणचोद्यपक्षेपि। ८ कुलालादिलक्षणम्। ९ घटादिलक्षणेन। १० प्रमाणं भवति। कीदृशम्? अर्थ-वदर्थो विद्यते यस्य तत्। अर्थवत्प्रमाणमित्युक्ते ज्ञानमपि प्रमाणं स्यात्तत्परिहारार्थमर्थ-सहकारितयेति। न च ज्ञानमर्थसहकारितयाऽर्थवत् किन्तु अर्थविषयतयाऽऽत्मवत् अर्थसहकारितयाऽर्थवत्प्रमाणमित्युच्यमाने मनोपि प्रमाणं स्यात्। कथम्? सुखोत्पत्तौ स्रग्वनितादिसहकारितयाऽर्थवद्भवति मनः। इति तद्व्यवच्छेदार्थमव्यपदेश्यादिविशेषण-विशिष्टे ज्ञाने कर्त्तव्ये इत्युक्तम्। एवं चेत्प्रमाता प्रमेयं च प्रमाणं स्यात्। कथम्? प्रागुक्तविशेषणे ज्ञाने कर्त्तव्ये स्तम्भाद्यर्थसहकारितया अर्थवान्प्रमाता भवति। इति प्रागुक्तविशेषणे ज्ञाने कर्त्तव्ये खण्डमुण्डादिव्यक्तिलक्षणार्थसहकारितया अर्थवदिति प्रमेयं गोत्वादि सामान्यरूपम्। इति तत्परिहारार्थं प्रमातृप्रमेयाभ्यामर्थान्तरमित्युक्तम्। ११ अन्वयव्यतिरेकसद्भावेपि आलोकज्ञानयोः कार्यकारणभावो नास्ति यदि।

ष्यग्निजन्यो न स्यात्, त[1]द्व्यतिरेकेणान्यस्य त[2]द्व्यवस्थापकस्याभा-
वादिति चेत्, किं पुनरन्धकारावस्थायां ज्ञानं नास्ति? तथा चेत्;
कथमन्धकारप्रतीतिः? तदन्तरेणापि प्र[3]तीतावन्य[4]त्रापि ज्ञानकल्प-
नानर्थक्यम्। 'प्र[5]तीयते, ज्ञानं नास्ति' इति च स्ववचनविरोधः,
५ प्रतीतेरेव ज्ञानत्वात्।

अथान्धकाराख्यो विषय एव नास्ति यो ज्ञानेन परिच्छिद्येत,
अन्धकारव्यवहारस्तु लोके ज्ञानानुत्पत्तिमात्र इत्युच्[6]यते; यद्येवं[7]
मालोकस्याप्यभावः स्याद्विशदज्ञानव्यतिरेकेणान्यस्यास्याप्यप्र-
तीतेः। तद्व्यवहारस्तु लोके विशदज्ञानोत्पत्तिमात्रः। ननु ज्ञानस्य
१० वैशद्यमेव तदभावे कथम्? इत्यप्यज्ञचोद्यम्; नक्तञ्चरादीनां
रूपेऽस्मदादीनां रसादौ च तदभावेपि तस्य वैशद्योपलब्धेः।

आलोकविषयस्य च ज्ञानस्यार्त[8] एवालोकाद्वैशद्यम्, तदन्तराद्वा,
अन्यतो वा कुतश्चित्? यद्यन्यतः; न तर्ह्या[9]लोककृतं वैशद्यम्। न हि
यद्यदभावेपि भवति तत्तत्कृतमतिप्रसङ्गात्। अथालोकान्तरात्;
१५ तद्विषयस्यापि तस्यालोकान्तरात्त[10]दित्यनवस्था। न चालोकान्तर-
मस्ति। अथास्मा[11]देवालोकात्; स्वविषयादेव तर्हि वैश[12]द्यम्, तथा
घटादिरूपाद[13]प्यस्तु। तस्याभासुरत्वान्नातस्तत्; इत्यप्ययुक्तम्; ब-
हलान्धकारनिशीथिन्यां नक्तञ्चरादीनां तत्र वैशद्याभावप्रसङ्गात्।
'विशदं प्रत्यक्षम्' इत्यत्र चोक्तं वैशद्यकारणम्। यद्येवं प्रदीपाद्यु-
२० पादानमनर्थकं तदन्तरेणापि ज्ञानोत्पत्तिप्रसङ्गात्; नाऽनर्थकम्,
आव[15]रणापनयनद्वारेण विषये ग्राह्यतालक्षणस्य विशेषस्य इन्द्रिय-
[16]मनसोर्वा तज्ज्ञानजनकलक्षणस्यातोऽनादेरिवोत्पत्तेः। न चैता[17]-
वता तस्य तत्कारणता; काण्डपटाद्यावरणापनेतुर्हस्तादेरपि
त[18]त्त्वप्रसङ्गात्। ततो यथा ज्ञानानुत्पत्तिव्यतिरेकेण नान्यत्तमः
२५ तथा[19] विशदज्ञानोत्पत्तिव्यतिरेकेणालोकोप्यन्यो न स्यात्।

ननु 'अत्र प्रदेशे बहल आलोकोऽत्र च मन्दः' इति लोकव्य-
वहारादन्य[20]ः सोऽस्तीति चेत्; तर्हि 'गुहागह्वरादौ बहलं तमोन्यत्र

१ अन्वयव्यतिरेकव्यतिरेकेण। २ कार्यकारणभावव्यवस्थापकस्य। ३ अन्धकारस्य। ४ घटादिविषये। ५ अर्थः। ६ परेण भवता। ७ ज्ञानानुत्पत्तिमात्रान्धकारप्रकारेण। ८ प्रकृतज्ञानविषयात्। ९ खराभावेपि जायमानो धूमः खरहेतुकोन्यथा स्यात्। १० वैशद्यम्। ११ प्रथमालोकादेव। १२ विज्ञानस्य। १३ घटादिज्ञानवैशद्यम्, ततश्च किमालोकपरिकल्पनेन। १४ आवरणप्रक्षयः। १५ तमः। १६ सप्तमीद्विः। १७ प्रदीपादिना मनोलोचनस्यार्थस्य च स्वविशेषजननेपि। १८ वैशद्यकारणत्व। १९ जैनमते। २० विशदज्ञानोत्पत्तेः सकाशात्।

मन्दम्' इति लोकव्यवहारः किं काकैर्भक्षितः? अत्रास्याऽप्रमाणत्वेऽन्यत्र कः समाश्वासः? ननु बहिर्देशादागत्य गृहान्तःप्रविष्टस्य सत्यप्यालोके तमःप्रतीतेर्न पारमार्थिकं तत्, न चालोकतमसोर्विरुद्धयोरेकत्रावस्थानम्, ततो ज्ञानानुत्पत्तिमात्रमेव तदिति चेत्; तर्हि नक्तञ्चरादीनामेवं (वं) विवरादौ प्रदीपाद्यालोकाभावेपि ५ तत्प्रतीतेः सोपि पारमार्थिको न स्यात्। न चैकत्र तमोऽभावेपि तत्प्रतीतेः सर्वत्र तदभावो युक्तः, अन्यथाऽर्थाभावेपि क्वचित्तत्प्रतीतेः सर्वत्र तदभावः स्यात्। तस्मादालोकवत्तमोपि प्रतीतिसिद्धम्। तत्र चालोकाभावेपि ज्ञानोत्पत्तिप्रतीतेः। न च तत्प्रति तस्य कारणता। तन्नार्थालोकयोर्ज्ञानं प्रति कारणत्वम्। १०

एवं तर्हि तत्तयोः प्रकाशकमपि न स्यादित्याह—

अतज्जन्यमपि तत्प्रकाशकम् ॥ ८ ॥

ताभ्यामर्थालोकाभ्यामजन्यमपि तयोः प्रकाशकम्।

अत्रैवार्थे प्रदीपवदित्युभयप्रसिद्धं दृष्टान्तमाह—

प्रदीपवत् ॥ ९ ॥ १५

न खलु प्रकाश्यो घटादिः स्वप्रकाशकं प्रदीपं जनयति, स्वकारणकलापादेवास्योत्पत्तेः। 'प्रकाश्याभावे प्रकाशकस्य प्रकाशकत्वायोगात्स तस्य जनक एव' इत्यभ्युपगमे प्रकाशकस्याभावे प्रकाश्यस्यापि प्रकाश्यत्वाघटनात् सोपि तस्य जनकोऽस्तु। तथा चेतरेतराश्रयः—प्रकाश्यानुत्पत्तौ प्रकाशकानुत्पत्तेः, तदनुत्पत्तौ च प्रकाश्यानुत्पत्तेरिति। स्वकारणकलापादुत्पन्नयोः प्रदीपघटयोरन्योन्यापेक्षया प्रकाश्यप्रकाशकत्वधर्मव्यवस्थाया एव प्रसिद्धेर्नेतरेतराश्रयावकाश इत्यभ्युपगमे ज्ञानार्थयोरपि स्वसामग्रीविशेषवशादुत्पन्नयोः परस्परापेक्षया ग्राह्यग्राहकत्वधर्मव्यवस्थाऽऽस्थीयताम्। कृतं प्रतीत्यपलापेन। २०

२५

ननु चाजनकस्याप्यर्थस्य ज्ञानेनावगतौ निखिलार्थावगतिप्रसङ्गात्प्रतिकर्मव्यवस्था न स्यात्। 'यद्धि यतो ज्ञानमुत्पद्यते तत्तस्यैव ग्राहकं नान्यस्य' इत्यस्यार्थजन्यत्वे सत्येव सा स्यादिति वदन्तं प्रत्याह—

---

१ तमसि। २ नरस्य। ३ तमसोऽभावेपि तमःप्रतीतिप्रकारेण। ४ एकत्राभावे सर्वत्राभावो यदि। ५ तमसि। ६ तमसः। ७ अर्थालोकयोर्ज्ञानं प्रत्यकारणत्वप्रकारेण। ८ स्वरूप। ९ अभ्युपगम्यताम्। १० अलमित्यर्थः। ११ प्रतिनियतविषयव्यवस्था। १२ अर्थात्।

स्वावरणक्षयोपशमलक्षणयोग्यतया हि प्रतिनियतं[1]मर्थं व्यवस्थापयति ॥ १० ॥

तथा हि-यदर्थप्रकाशकं तत्स्वात्मन्यपेतप्रतिबन्धम् यथा प्रदीपादि, अर्थप्रकाशकं च ज्ञानमिति । प्रति[2]नियतस्वावरणक्षयोपशमश्च ज्ञानस्य प्रतिनियतार्थोपलब्धेरेव प्रसिद्धः । न चान्योन्याश्रयः; अस्याः प्रतीतिसिद्धत्वात् । तल्लक्षणयोग्यता च शक्तिरेव । सैव ज्ञानस्य प्रतिनियतार्थव्यवस्थायामङ्गं नार्थोत्पत्त्यादिः[3], तस्य निषिद्धत्वादन्यत्रा[4]दर्शनाच्च[5] । न खलु प्रदीपः प्रकाश्यार्थैर्जन्यस्तेषां प्रकाशको दृष्टः ।

किञ्च, प्रदीपोपि प्रकाश्यार्थाऽजन्यो यावत्काण्डपटाद्यनावृतमेवार्थं प्रकाशयति तावत्तदावृतमपि किन्न प्रकाशयेदिति चोद्ये भवतोप्यतो योग्यतातो न किञ्चिदुत्तरम् ।

कारणस्य[6] च परिच्छेद्यत्वे[7][8] करणादिना[9] व्यभिचारः ॥ ११ ॥

नहीन्द्रियमदृष्टादिकं वा विज्ञानकारणमप्यनेन[10] परिच्छेद्यते । न ब्रूमः-कारणं परिच्छेद्यमेव किन्तु 'कारणमेव परिच्छेद्यम्' इत्यवधारयामः[11]; तन्न; योगिविज्ञानस्य व्याप्ति[12]ज्ञानस्य चाशेषार्थग्राहिणोऽभावप्रसङ्गात् । न हि विनष्टानुत्पन्नाः समसमयभाविनो वार्थास्तस्य कारणमित्युक्तम् । केशोण्डुकादिज्ञानस्य चाजनकार्थग्राहित्वाभावप्रसङ्गः । कथं च कारणत्वाविशेषेपीन्द्रियादेरग्रहणम्? अयोग्यत्वाच्चेत्; योग्यतैव तर्हि प्रतिकर्मव्यवस्थाकारिणी, अलमन्य[13]कल्पनया । स्वाकारार्पकत्वाभावा[14]च्चेन्न; ज्ञाने स्वा[15]कारार्पकत्वस्याप्यपास्तत्वात् । कथं च कारणत्वाविशेषेपि किञ्चित्स्वाकारार्पकं किञ्चिन्नेति प्रतिनियमो योग्यतां विना सिध्येत्? कथं च सकलं विज्ञानं सकलार्थकार्यं न स्यात्? 'प्रतिनियतशक्तित्वाद्भावानाम्' इत्यु[16]त्तरं ग्राह्यग्राहकभावे[17]पि समानम् ।

१ ज्ञानं कर्तृ । २ ज्ञानस्यापेतप्रतिबन्धत्वं कारणमर्थप्रकाशे चेत्तर्हि सकलार्थप्रकाशकं किमिति न स्यादित्युक्ते आह । ३ आदिपदेन तादूप्यादिः । ४ प्रकाशके प्रदीपादौ । ५ तदुत्पत्त्यादेः । ६ धर्मो हेतुश्च । ७ साध्यम् । ८ घटादिवदिति दृष्टान्तः । ९ इन्द्रियादिना । १० ज्ञानेन । ११ वयं सुगताः । १२ यत्सत्तत्सर्वं क्षणिकमिति । १३ उत्पत्त्यादि । १४ इन्द्रियादेः । १५ स्वस्य घटादिवस्तुनः । १६ स्तम्भलक्षणादर्थादनुत्पद्यमानं ज्ञानं स्तम्भस्य ग्राहकं यथा तथा निरशेषार्थग्राहकं कुतो न स्यादित्युत्तरं प्रतिनियतशक्तित्वाद्भावानामित्यत्रापि समानम् । १७ सामस्त्येन ।

अथेदानीं मुख्यप्रत्यक्षप्ररूपणस्यावसरप्राप्तत्वात् तदुत्पत्तिकारणस्वरूपप्ररूपणायाह—

सामग्रीविशेषविश्लेषिताखिलावरणमऽतीन्द्रियमशेषतो मुख्यम् ॥ १२ ॥

'विशदं प्रत्यक्षम्' इत्यनुवर्त्तते। तत्राशेषतो विशदमतीन्द्रियं यद्विज्ञानं तन्मुख्यं प्रत्यक्षम्। किंविशिष्टं तत्? सामग्रीविशेषविश्लेषिताखिलावरणम्। ज्ञानावरणादिप्रतिपक्षभूता हीह सम्यग्दर्शनादिलक्षणान्तरङ्गा बहिरङ्गानुभवादिलक्षणा सामग्री गृह्यते, तस्या विशेषोऽविकलत्वम्, तेन विश्लेषितं क्षयोपशमक्षयरूपतया विघटितमखिलमवधिमनःपर्ययकेवलज्ञानसम्बन्ध्यावरणम् अखिलं निश्शेषं वाऽऽवरणं यस्यावधिमनःपर्ययकेवलज्ञानत्रयस्य तत्तथोक्तम्।

अत्र च प्रयोगः—यद्यत्र स्पष्टत्वे सत्यवितथं ज्ञानं तत्तत्रापगताखिलावरणम् यथा रजोनीहाराद्यन्तरितवृक्षादौ तदपगमप्रभवं ज्ञानम्, स्पष्टत्वे सत्यवितथं च किञ्चिदुक्तप्रकारं ज्ञानमिति। तथाऽतीन्द्रियं तत् मनोऽक्षानपेक्षत्वात्। तदनपेक्षं तत् सकलकलङ्कविकलत्वात्। तद्विकलत्वं चास्यात्रैव प्रसाधयिष्यते। अत एव चाशेषतो विशदं तत्। यत्तु नातीन्द्रियादिस्वभावं न तत्तदनपेक्षत्वादिविशेषणविशिष्टम् यथास्मदादिप्रत्यक्षम्, तद्विशेषणविशिष्टञ्चेदम्, तस्मात्तथेति। तथा मुख्यं तत्प्रत्यक्षम् अतीन्द्रियत्वात् स्वविषयेऽशेषतो विशदत्वाद्वा, यत्तु नेत्थं तन्नैवम्, यथास्मदादिप्रत्यक्षम्, तथा चेदम्, तस्मान्मुख्यमिति।

ननु चावरणप्रसिद्धौ तदपगमाज्ज्ञानस्योत्पत्तिर्युक्ता, न च तत्प्रसिद्धम्। तद्धि शरीरम्, रागादयः, देशकालादिकं वा भवेत्? न तावच्छरीरं रागादयो वा; तद्भावेप्यर्थोपलम्भसम्भवात्। तदुपलम्भप्रतिबन्धकमेव हि काण्डपटादिकं लोके प्रसि-

१ सूत्रे। २ आदिपदेन देशकालादिग्रहणम्। ३ समग्रत्वम्। ४ आवरणापाये। ५ अवधिमनःपर्ययकेवलज्ञानं स्वविषयेऽपगताखिलावरणं तत्र स्पष्टत्वे सत्यवितथज्ञानत्वात्। ६ ज्ञानम्। ७ अर्थे। ८ अनुमानादिना व्यभिचारपरिहारार्थम्। ९ संशयादिना व्यभिचारपरिहारार्थम्। १० रूपिषु, परमनोगतार्थेषु, मूर्तामूर्तसकलवस्तुषु च। ११ क्रमेणावधिमनःपर्ययकेवलाख्यम्। १२ अस्मिन्परिच्छेदे। १३ सकलकलङ्कविकलत्वादेव। १४ अवध्यादित्रयम्। १५ मुख्यम्। १६ बौद्धः प्राह। १७ आदिपदेन स्वभावो वा।

द्धमावरणम् । ननु मेर्वादेर्दूरदेशता रावणादेस्तत्कालता परमाण्वादेः सूक्ष्मस्वभावता मूलकीलोदकादेश्च भूम्यादिः आवरणं प्रसिद्धमेवेति चेत्तदसारम्; तदभावस्य कर्तुमशक्यत्वात् । न खलु सातिशयर्द्धिमतापि योगिना देशाद्यभावो विधातुं शक्यः । ५ न चान्यत् किञ्चिदावरणं प्रतीयते । ततः सामग्रीविशेषविश्लेषिताखिलावरणमित्ययुक्तम्;

अत्रोच्यते-न शरीराद्यावरणम् । किं तर्हि? तद्व्यतिरिक्तं कर्म । तच्चानुमानतः प्रसिद्धम्; तथाहि-स्वपरप्रमेयबोधैकस्वभावस्यात्मनो हीनगर्भस्थानशरीरविषयेषु विशिष्टाऽभिरतिः आत्मतद्व्य- १० तिरिक्तकारणपूर्विका तत्त्वात् कुत्सितपरपुरुषे कमनीयकुलकामिन्यास्तन्त्राद्युपयोगजनितविशिष्टाभिरतिवत् । तथा, भवभृतां मोहोदयः शरीरादिव्यतिरिक्तसम्बन्ध्यन्तरपूर्वको मोहोदयत्वात् मदिराद्युपयोगमत्तस्यात्मगृहादौ मोहोदयवत् ।

ननु चातः कर्ममात्रमेव प्रसिद्धं नावरणम्; ततस्तत्सिद्धावेव १५ प्रमाणमुच्यतां तत्रैव विवादादिति चेदुच्यते यज्ज्ञानं स्वविषयेऽप्रवृत्तिमत् तत्सावरणम् यथा कामलिनो लोचनविज्ञानमेकचन्द्रमसि, स्वविषये अशेषार्थलक्षणेऽप्रवृत्तिमच्च ज्ञानमिति ।

ननु विज्ञानस्याशेषविषयत्वं कुतः सिद्धम्? आवरणापाये तत्प्रकाशकत्वाच्चेदन्योन्याश्रयः-सिद्धे हि सकलविषयत्वे तस्य आव- २० रणापाये तत्प्रकाशनं सिद्ध्यति, अतश्च सकलविषयत्वमिति; तदप्यसमीक्षिताभिधानम्; यतोनुमानमिच्छता भवताप्यवश्यं सकलावरणवैकल्यात्प्रागेव सकलस्य प्राणिमात्रस्याशेषविषयं व्याप्त्यादिज्ञानमभ्युपगतमेव । तथा, यत्स्वविषयेऽस्पष्टं ज्ञानं तत्सावरणम् यथा रजोनीहाराद्यन्तरिततरुनिकरादिज्ञानम्, अस्पष्टं च २५ 'सर्वं सदनेकान्तात्मकम्' इत्यादि व्याप्तिज्ञानम् । मिथ्यादृशां सर्वत्रानेकान्तात्मके भावे विपरीतज्ञानं सावरणं मिथ्याज्ञानत्वात् धत्तूरकाद्युपयोगिनो मृच्छकले काञ्चनज्ञानवदिति । अतः सिद्धमावरणं पौद्गलिकं कर्मेति ।

१ ज्ञानस्य । २ मीमांसकीयपूर्वपक्षे सति जैनैः । ३ हीनशब्दो गर्भादिशब्दैः प्रत्येकमभिसम्बन्धनीयः । ४ विषयस्रग्वनिताचन्दनादिषु । ५ विशिष्टाभिरतित्वात् । ६ आदिपदेनौषधमन्त्रादि । ७ अनुभव । ८ उक्तानुमानद्वयात् । ९ संसारिज्ञानमशेषार्थलक्षणे स्वविषये सावरणं भवति तत्राप्रवृत्तिमत्त्वादिति प्रतिज्ञाहेतू उपरिष्टाज्ज्ञेयौ । १० सावरणम् । ११ अभावात् । १२ आदिपदेनागमजम् । १३ अस्पष्टज्ञानत्वादित्युच्यमाने स्वस्मिन्नस्पष्टत्वं स्यात्तद्व्यवच्छेदार्थं स्वविषये इत्युक्तम् । १४ एकान्तरूपं विपरीतम् । १५ अनुमानत्रयात् ।

नन्नु चाविद्यैवावरणं न पौद्गलिकं कर्म, मूर्त्तेनानेनामूर्त्तस्य ज्ञानादेरावरणायोगात्, अन्यथा शरीरादेरप्याव(वा)रकत्वानुषङ्गात्; इत्यप्यसमीचीनम्; मदिरादिना मूर्त्तेनाप्यमूर्त्तस्य ज्ञाना[3]देरावरणदर्शनात्। अ[4]मूर्त्तस्य चाव(वा)रकत्वे गगनादेर्ज्ञानान्तरस्य च त[5]त्प्रसङ्गः। त[6]द्विरुद्धत्वात्तस्य तन्नेति चेत्; तर्हि शरीरादेरप्यत एव तन्मा भूत्तद्विरुद्धस्यैवावरकत्वप्रसिद्धेः। प्रवाहेण प्रवर्त्तमानस्य ज्ञानादेरवि[7]द्योदये निरोधात्तस्यास्तद्विरोधगतौ मदिरादिवत्पौद्गलिककर्मणोपि सा[8]स्तु विशेषाभावात्। तथाहि-आत्मनो मिथ्याज्ञानादिः पुद्गलविशे[9]षसम्बन्धनिबन्धनः तत्स्वरू[10]पान्यथाभा[11]वस्वभावत्वात् उन्मत्तकादिजनितोन्मादादिवत्। न च मिथ्याज्ञानजनितापरमिथ्याज्ञानेनानेकान्तः; तस्यापरापरपौद्गलिककर्मोदये सत्येव भावात् अपरापरोन्मत्तकादिरससद्भावे तत्कृतोन्मादादिसन्तानवत्।

ननु चात्मगुणत्वात्कर्मणां कथं पौद्गलिकत्वमित्य[12]न्ये; तेप्यपरीक्षकाः; तेषामात्मगुणत्वे तत्पारतन्त्र्यनिमित्तत्वविरोधात् सर्वदात्मनो बन्धानुपपत्तेः सदैव मुक्तिप्रसङ्गात्। न[13] खलु यो यस्य गुणः स तस्य पारतन्त्र्यनिमित्तम् यथा पृथिव्यादे रूपादिः, आत्मगुणश्च धर्माधर्मसंज्ञकं कर्म परैरभ्युपगम्यते इति न तदात्मनः पारतन्त्र्यनिमित्तं स्यात्। न चैवम्, आत्मनः परतन्त्रतया प्रमाणतः प्रतीतेः। तथाहि-परतन्त्रोऽसौ हीनस्था[14]नपरिग्रहवत्त्वात् मद्योद्रेकपरतन्त्राशुचिस्थानपरिग्रहवद्विशिष्टपुरुषवत्। हीनस्थानं हि शरीरम्, आत्मनो दुःखहेतुत्वात्कारागारवत्। तत्परिग्रहवांश्च संसारी प्रसिद्ध एव। न च देवशरीरे तदभावात्पक्षाव्या[15]प्तिः; तस्यापि मरणे दुःखहेतुत्वप्रसिद्धेः। यत्परतन्त्रश्चासौ तत्कर्म इति सिद्धं तस्य पौद्गलिकत्वम्। तथा हि-पौद्गलिकं कर्म आत्मनः पारतन्त्र्यनिमित्तत्वान्निगलादिवत्। न च क्रोधादिभिर्व्यभिचारः;

---

१ पुरुषाद्वैतवादिनो वदतः। २ आत्मनः। ३ आदिपदेनात्मनः। ४ अविद्यास्वरूपस्य। ५ गगनादिकं ज्ञानान्तरं च ज्ञानादेरावरकं भवति अमूर्त्तत्वादविद्यावत्। ६ तेन ज्ञानेन। ७ मिथ्याज्ञानमविद्या। ८ प्रवाहेण प्रवर्त्तमानस्य ज्ञानादेः पौद्गलिककर्मोदये निरोधस्याविशेषात्। ९ कर्मतापन्न। १० सम्यग्ज्ञानादि। ११ मिथ्याज्ञानादि। १२ योगाः। १३ धर्माधर्मसंज्ञकं कर्म आत्मनः पारतन्त्र्यनिमित्तं न भवति आत्मगुणत्वादित्यध्याहारः। १४ कर्मणा। १५ शरीरादिलक्षण। १६ भागासिद्धत्वं दुःखहेतुत्वलक्षणस्य हेतोः। १७ सुखदुःखरागद्वेषादिकृतं पारतन्त्र्यम्। १८ निगलं गलबन्धनम् (शृङ्खलादि)।

तेषां जीवपरिणामानां पारतन्त्र्यस्वभावत्वात्, क्रोधादिपरिणामो हि जीवस्य पारतन्त्र्यं न पुनः पारतन्त्र्यनिमित्तम्।

सत्यम्[1]; नात्मगुणोऽदृष्टं प्रधानपरिणामत्वात्तस्य "प्रधानपरिणामः शुक्लं[2] कृष्णं[3] च कर्म" [ ] इत्यभिधानात्; इत्यपि मनो-
५ रथमात्रम्; प्रधानस्यासत्त्वेन तत्परिणामत्वस्य क्वचिद्[4]प्यसम्भवात्। तदसत्त्वं चात्रैवानन्तरं वक्ष्यामः[5]। तत्परिणामत्वेपि वा तस्यात्मपारतन्त्र्यनिमित्तत्वाभावे कर्मत्वायोगात्, अन्यथातिप्रसङ्गः[6]। प्रधानपारतन्त्र्यनिमित्तत्वात्तस्य कर्मत्वमिति चेन्न; प्रधानस्य तेन बन्धोपगमे मोक्षोपगमे चात्मकल्पनावैयर्थ्यप्रस-
१० ङ्गात्। बन्धमोक्षफलानुभवनस्यात्मनि प्रतिष्ठानान्न तत्कल्पनावैयर्थ्यमित्यसत्; प्रधानस्य तत्कर्तृत्ववत् तत्फलानुभोक्तृत्वस्यापि[7] प्रमाणसामर्थ्यप्राप्तत्वात्, अन्यथा[8] कृतनाश[9]ाकृताभ्यागम[10]दोषानुषङ्गः। अथात्मनश्चेतनत्वात्तत्फ[11]लानुभवनं न तु प्रधानस्याऽचेतनत्वात्; तदप्ययुक्तम्; मुक्तात्मनोपि तत्फ[12]लानुभवनानुषङ्गात्।
१५ तस्य प्रधानसंसर्गाभावान्न तत्फलानुभवनमिति चेत्; तर्हि संसारिणः प्रधानसंसर्गाद्बन्धफलानुभवनम्। तथा चात्मन एव बन्धः सिद्धः, तत्संसर्गस्य बन्धफलानुभवननिमित्तस्य बन्धरूपत्वात्, बन्धस्यैव 'संसर्गः' इति पुद्गलस्य च 'प्रधानम्' इति नामान्तरकरणात्।

२० ननु प्रसिद्धस्यापि यथोक्त[13]प्रकारस्य कर्मणः कार्यकारणप्रवाहेण प्रवर्त्तमानस्यानादित्वाद्विनाशहेतुभूतसामग्रीविशेषस्य चाभावात्कथं तेन विश्लेषिताखिलावरणत्वं ज्ञानस्य; इत्यप्यपेशलम्; सम्यग्दर्शनादित्रयलक्षणस्य तद्विनाशहेतुभूतसामग्रीविशेषस्य सुप्रतीतत्वात्। सञ्चितं हि कर्म निर्जरातश्चारित्रविशेषरूपायाः
२५ प्रलीयते। सा च निर्जरा द्विविधा-उपक्रमेतरभेदात्। तत्रौपक्रमिकी तपसा द्वादशविधेन साध्या। अनुपक्रमा तु यथाकालं संसारिणः स्यात्।

कुतः पुनः साकल्येन पूर्वोपात्तकर्मणां निर्जरा निश्चीयते इति चेदनुमानात्; तथाहि-साकल्येन क्वचिदात्मनि कर्माणि निर्जी-

---

१ साङ्ख्यः। २ पुण्यम्। ३ पापम्। ४ बुध्यादौ विकारे। ५ वयं जैनाः। ६ घटादेरपि कर्मत्वं स्यात्। ७ प्रधानं बन्धफलानुभोक्तृ भवति बन्धाधिकरणत्वान्निगलबद्धदेवदत्तवत्। ८ तत्कर्तृत्वेपि तत्फलानुभोक्तृत्वं न स्याद्यदि तर्हि। ९ कृतस्य कर्मणः प्रधानसम्बन्धित्वेन नाशः। १० अकृतस्य फलस्यात्मनि आगमः। ११ तस्य कर्मणः फलं बन्धमोक्षौ। १२ तस्य कर्मणः। १३ पौद्गलिकस्य।

र्यन्ते विपाकान्तत्वात्, यानि तु न निर्जीर्यन्ते न तानि विपाकान्तानि यथा कालादीनि, विपाकान्तानि च कर्माणि, तस्मात्साकल्येन क्वचिन्निर्जीर्यन्ते। न चेदमसिद्धं साधनम्; तथाहि–विपाकान्तानि कर्माणि फलावसानत्वाद्व्रीह्यादिवत्। न चेदमप्यसिद्धम्; तेषां नित्यत्वानुषङ्गात्। न च नित्यानि कर्माणि नित्यं तत्फलानुभवनप्रसङ्गात्। ५

भावि पुनः कर्म संवरान्निरुध्येत–"अपूर्वकर्मणामास्रवनिरोधः संवरः" [तत्त्वार्थसू० ९।१] इत्यभिधानात्। आस्रवो हि मिथ्यादर्शनाविरतिप्रमादकषाययोगविकल्पात्पञ्चविधः, तस्मिन्सति कर्मणामास्रवणात्। स च संवरो गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रैर्विधीयते इत्यागमे विस्तरतः प्ररूपितं द्रष्टव्यम्। निर्जरासंवरयोश्च सम्यग्दर्शनाद्यात्मकत्वात्तत्प्रकर्षे कर्मणां सन्तानरूपतयाऽनादित्वेऽपि प्रक्षयः प्रसिध्यत्येव। न ह्यनादिसन्ततिरपि शीतस्पर्शो विपक्षस्योष्णस्पर्शस्य प्रकर्षे निर्मूलतलं प्रलयमुपव्रजन्नोपलब्धः, कार्यकारणरूपतया बीजाङ्कुरसन्तानो वाऽनादिः प्रतिपक्षभूतदहनेन निर्दग्धबीजो निर्दग्धाङ्कुरो वा न प्रतीयते इति वक्तुं शक्यम्। १० १५

ननु तत्प्रकर्षमात्रात्कर्मप्रक्षयमात्रमेव सिध्येन्न पुनः साकल्येन तत्प्रक्षयः, सम्यग्दर्शनादेः परमप्रकर्षसम्भवाभावात्; इत्यप्यसङ्गतम्; तत्प्रकर्षस्य क्वचिदात्मनि प्रसिद्धेः। तथाहि—यस्य तारतम्यप्रकर्षस्तस्य क्वचित्परमप्रकर्षः यथोष्णस्पर्शस्य, तारतम्यप्रकर्षश्चासंयतसम्यग्दृष्ट्यादौ सम्यग्दर्शनादेरिति। न च दुःखप्रकर्षेण व्यभिचारः; सप्तमनरकभूमौ नारकाणां तत्परमप्रकर्षप्रसिद्धेः सर्वार्थसिद्धौ देवानां सांसारिकसुखपरमप्रकर्षवत्, मिथ्यादृष्टिष्वनन्तानुबन्धिक्रोधादिपरमप्रकर्षवद्वा। नापि ज्ञानहानिप्रकर्षेणानेकान्तः; तस्यापि क्षायोपशमिकस्य हीयमानतया प्रकृष्यमाणस्य केवलिनि परमापकर्षप्रसिद्धेः। क्षायिकस्य तु हानेवासम्भवात्कुतस्तत्प्रकर्षो यतोऽनेकान्तः। २० २५

इत्थं वा साकल्येन कर्मप्रक्षये प्रयोगः कर्तव्यः–'यस्यातिशये

---

१ फलदानपरिणतिर्विपाकः। २ परमतापेक्षया। ३ सम्यग्दर्शनादेः कर्मविनाशहेतुत्वमुक्तमिदानीमन्यदेवोक्तमिति कथं न पूर्वापरविरोधः? इत्युक्ते आह। ४ सति। ५ सम्यग्दर्शनादि क्वचिदात्मनि परमप्रकर्षं प्राप्नोति तारतम्यप्रकर्षवत्त्वादित्युपरिष्टादध्याह्रियते। ६ केवलज्ञानस्य। ७ तारतम्यप्रकर्षः। ८ विपाकान्तत्वादित्यनुमानापेक्षया बाधकदोऽत्र। ९ क्वचित्कर्मणामत्यन्तहान्यतिशयो धर्मी सम्यग्दर्शनादेरत्यन्तातिशये भवति तस्यातिशये तद्धान्यतिशयदर्शनादित्युपरिष्टादध्याह्रियते।

यद्धान्यतिशयस्तस्यात्यन्तातिशयेऽन्यस्यात्यन्तहानिः यथाग्नेरत्यन्तातिशये शीतस्य, अस्ति च सम्यग्दर्शनादेरत्यन्तातिशयः क्वचिदात्मनि' इति। यद्वा, आवरणहानिः क्वचित्पुरुषविशेषे परमप्रकर्षप्राप्ता प्रकृष्यमाणत्वात् परिमाणवत्। न चात्रासिद्धं साधनम्; ५ तथाहि–प्रकृष्यमाणावरणहानिः आवरणहानित्वात् माणिक्याद्यावरणहानिवत्। तद्धानिपरमप्रकर्षे च ज्ञानस्य परमः प्रकर्षः सिद्धः। यद्धि प्रकाशात्मकं तत्स्वावरणहानिप्रकर्षे प्रकृष्यमाणं दृष्टम् यथा नयनप्रदीपादि, प्रकाशात्मकं च ज्ञानमिति। तदेवमावरणप्रसिद्धिवत्तदभावोप्यनवयवेन प्रमाणतः प्रसिद्धः। तत्प्रभवमेव १० चाशेषार्थगोचरं ज्ञानमभ्युपगन्तव्यम्, लेशतोप्यावरणसद्भावे तस्याशेषार्थगोचरत्वासम्भवात्, यत्रैवावरणसद्भावस्तत्रैवास्य प्रतिबन्धसम्भवात्।

आगमद्वारेणाशेषार्थगोचरं ज्ञानम्; इत्यप्यसुन्दरम्; विशदज्ञानस्य प्रस्तुतत्वात्। न चागमज्ञानं विशदम्। न चागमोप्यशेषार्थ- १५ गोचरः; अर्थपर्यायेषु तस्याप्रवृत्तेः। ते चार्थस्य प्रतिक्षणम् 'अर्थक्रियाकारित्वात्सत्त्वाद्वा सन्ति' इत्यवसीयन्ते। अन्यथास्याऽवस्तुत्वप्रसङ्गः। करणजन्यत्वे चाशेषज्ञानस्यातीन्द्रियार्थेषु प्रतिबन्धः प्रसिद्ध एव, इन्द्रियाणां रूपादिमत्यव्यवहितेऽनेकावयवप्रचयात्मकेऽर्थे प्रवृत्तिप्रतीतेः।

२० ननु योगजधर्मानुगृहीतानामिन्द्रियाणां गगनाद्यशेषातीन्द्रियार्थसाक्षात्कारिज्ञानजनकत्वसम्भवात् कथं तत्राशेषज्ञानस्येन्द्रियजत्वेपि प्रतिबन्धसम्भवः; इत्यप्यसमीक्षिताभिधानम्; योगजधर्मानुग्रहस्येन्द्रियाणां प्रथमपरिच्छेदे प्रतिविहितत्वात्।

भावनाप्रकर्षपर्यन्तजत्वाद्योगिविज्ञानस्य नोक्तदोषानुषङ्गः। २५ भावना हि द्विविधा–श्रुतमयी, चिन्तामयी च। तत्र श्रुतमयी श्रूयमाणेभ्यः परार्थानुमानवाक्येभ्यः समुत्पद्यमानज्ञानेन श्रुतशब्दवाच्यतामास्कन्दिता निर्वृत्ता परमप्रकर्षं प्रतिपद्यमाना स्वार्थानुमानज्ञानलक्षणया चिन्तया निर्वृत्तां चिन्तामयीं भावनामारभते। सा च प्रकृष्यमाणा परं प्रकर्षपर्यन्तं सम्प्राप्ता योगिप्रत्यक्षं जन-

---

१ कर्मणः। २ साकल्येन। ३ आवरणाभावप्रभवम्। ४ परेण। ५ अर्थे। ६ प्रकृतत्वात्। ७ अर्थपर्यायाः। ८ अर्थोऽवस्तु असत्त्वात्। असत्त्वमर्थोऽर्थक्रियाशून्यत्वात्। अर्थक्रियाशून्योर्थः–अर्थपर्यायरहितत्वात् खपुष्पवत्। ९ सौगतो वक्ति। १० आचार्यात्। ११ सर्वं क्षणिकं सत्त्वादिति। १२ प्राप्नुवता। १३ श्रुतमयी भावना कर्त्री।

यतीति तत्कथमस्यावरणापायप्रभवत्वम्? इत्यप्यसारम्; क्षणिकनैरात्म्यादिभावनायाश्चिन्तामय्याः श्रुतमय्याश्च मिथ्यारूपत्वात्। न च मिथ्याज्ञानस्य परमार्थविषययोगिज्ञानजनकत्वमतिप्रसङ्गात्। यथा च न क्षणिकत्वं नैरात्म्यं शून्यत्वं वा वस्तुनस्तथा वक्ष्यते। ५

किञ्च, अखिलप्राणिनां भावनावतां तथाविधज्ञानोत्पत्तिः किन्न स्यात् सुगतवत्? तेषां तथाभूतभावनाऽभावाच्चेत्; न; प्रतिपन्नतत्त्वानां भावनाप्रवृत्तमनसां सर्वेषां समाना भावनैव कुतो न स्यात्? प्रतिबन्धककर्मसद्भावाच्चेत्; तर्हि भावनाप्रतिबन्धककर्मापाये भावनावत् योगिज्ञानप्रतिबन्धककर्मापाये तज्ज्ञानोत्पत्तिरभ्युपगन्तव्या। इति सिद्धं साकल्येनावरणापाये एवातीन्द्रियमशेषार्थविषयं विशदं प्रत्यक्षम्। १०

ननु चाशेषार्थज्ञातुस्त(ज्ञानस्य त)ज्ज्ञानवतः कस्यचित्पुरुषविशेषस्यैवासम्भवात्कथं तज्ज्ञानसम्भवः? तथाहि-न कश्चित्पुरुषविशेषः सर्वज्ञोस्ति सदुपलम्भकप्रमाणपञ्चकागोचरचारित्वाद्वन्ध्यास्तनन्धयवत्। न चायमसिद्धो हेतुः, तथाहि-सकलपदार्थवेदी पुरुषविशेषः प्रत्यक्षेण प्रतीयते, अनुमानादिप्रमाणेन वा? न तावत्प्रत्यक्षेण; प्रतिनियतासन्नरूपादिविषयत्वेन अन्यसन्तानस्थसंवेदनमात्रेऽप्यस्य सामर्थ्यं नास्ति, किमङ्ग पुनरनाद्यनन्तातीतानागतवर्त्तमानसूक्ष्मादिस्वभावसकलपदार्थसाक्षात्कारिसंवेदनविशेषे तदध्यासिते पुरुषविशेषे वा तत्स्यात्? न चातीतादिस्वभावनिखिलपदार्थग्रहणमन्तरेण प्रत्यक्षेण तत्साक्षात्करणप्रवृत्तज्ञानग्रहणम्, ग्राह्याग्रहणे तन्निष्ठग्राहकत्वस्याप्यग्रहणात्। १५ २०

नाप्यनुमानेनासौ प्रतीयते; तद्धि निश्चितस्वसाध्यप्रतिबन्धाद्धेतोरुदयमासादयत्प्रमाणतां प्रतिपद्यते। प्रतिबन्धश्चाखिलपदार्थज्ञसत्त्वेन स्वसाध्येन हेतोः किं प्रत्यक्षेण गृहीत, अनुमानेन वा? न तावत्प्रत्यक्षेण; अस्याऽत्यक्षज्ञानवत्सत्त्वसाक्षात्करणाक्षमत्वेन तत्प्रतिपत्तिनिमित्तहेतुप्रतिबन्धग्रहणेऽप्यक्षमत्वात्। न ह्यप्रतिपन्नसम्बन्धिनस्तद्गतसम्बन्धावगमो युक्तोऽतिप्रसङ्गात्। नाप्य- २५

१ मुख्यप्रत्यक्षस्य। २ द्विचन्द्रादिज्ञानस्यापि योगिज्ञानजनकत्वप्रसङ्गात्। ३ अशेषविषय। ४ सर्वज्ञ। ५ परेण त्वया। ६ मुख्यम्। ७ मीमांसकः। ८ अन्यस्य पुरुषान्तरस्य। ९ अहो। १० तत्सहिते। ११ कश्चित्पुरुषः सकलपदार्थसाक्षात्कारी तद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययत्वादित्यनेन। १२ परमाणोरप्रतिपत्तावपि घटस्य परमाणुना सम्बन्धप्रतिपत्तिप्रसङ्गात्।

नुमानेन; अनवस्थेतरेतराश्रयदोषा[1]नुषङ्गात्। न चात्र[2] धर्मी प्रत्यक्षेण प्रतिपन्नः; अनक्षज्ञानवत्यत्य[3]क्षे[4]ऽध्यक्षस्याप्रवृत्तेः। प्रवृत्तौ वाध्यक्षेणैवास्य प्रतिपन्नत्वान्न किञ्चिदनुमानेन। नाप्यनुमानेन; हेतोः पक्षधर्मतावगममन्तरेणानुमानस्यैवाप्रवृत्तेः। न चाप्रतिपन्ने धर्मिणि[5] हेतोस्तत्सम्बन्धावगमः। नाप्यप्रतिपन्नपक्षधर्मत्वो हेतुः प्रतिनियतसाध्यप्रतिपत्त्यङ्गम्।

किञ्च, स[6]त्तासाधने सर्वो हेतुरसिद्धविरुद्धानैकान्तिकत्वलक्षणां त्रैयीं[7] दोषजातिं नातिवर्त्तते। तथाहि-सर्वज्ञसत्त्वे साध्ये भा[8]वधर्मो हेतुः, अभावधर्मो वा स्यात्, उत उभयधर्मो वा? प्रथमपक्षेऽसिद्धः; भावेऽसिद्धे तद्धर्मस्य सिद्धिविरोधात्। द्वितीयपक्षे तु विरुद्धः; भावे साध्येऽभावधर्मस्याभावाव्यभिचारित्वेन विरुद्धत्वात्। उभयधर्मोऽप्यनैकान्तिकः स[9]त्तासाधने तदु[10][11]भयव्यभिचारित्वात्।

अपि चाविशेषेण सर्वज्ञः कश्चित्साध्यते, विशेषेण वा? तत्राद्यपक्षे विशेषतोऽर्हत्प्रणीतागमाश्रयणमनुपपन्नम्। द्वितीयपक्षे तु हेतोरपरसर्वज्ञस्याभावेन दृष्टान्तानुवृत्त्यसम्भवादसाधारणानैकान्तिकत्वम्।

किञ्च, यतो हेतोः प्रतिनियतोऽर्हन् सर्वज्ञः साध्यते ततो बुद्धोपि साध्यतां विशेषाभावात्, न चात्र सर्वज्ञत्वसाधने हेतुरस्ति।

यदप्युच्यते-सूक्ष्मान्तरितदूरार्थाः कस्यचित्प्रत्यक्षाः प्रमेयत्वात्पावकादिवत्; तदप्युक्तिमात्रम्; यतोऽत्रैकज्ञानप्रत्यक्षत्वं सूक्ष्माद्यर्थानां साध्यत्वेनाभिप्रेतम्, प्रतिनियतविषयानेकज्ञानप्रत्यक्षत्वं वा? तत्राद्यकल्पनायां विरुद्धो हेतुः; प्रतिनियतरूपादिविषयग्राहकानेकप्रत्ययप्रत्यक्षत्वेन व्याप्तस्याग्न्यादिदृष्टान्तधर्मिणि प्रमेयत्वस्योपलम्भात् साध्यविकलता च दृष्टान्तस्य। द्वितीयकल्पनायां सिद्धसाध्यता अनेकप्रत्यक्षैरनुमानादिभिश्च तत्परिज्ञानाभ्युपगमात्।

---

१ निश्चिताविनाभावपूर्वकत्वादनुमानस्य। २ साध्यसाधकानुमाने। ३ परोक्षे। ४ धर्मी प्रतिपन्नः। ५ सर्वज्ञलक्षणे। ६ सर्वज्ञस्य। ७ त्रयोऽवयवा यस्याः। ८ भावस्वरूपः। ९ सर्वज्ञसत्त्वे। १० सर्वज्ञस्य। ११ भावाभावोभय। १२ जैनैः। १३ दृष्टान्तप्रवर्तनाभावात्। १४ विपक्षसपक्षाभ्यां व्यावर्त्तमानो हेतुरसाधारणानैकान्तिकः। अस्योदाहरणमनित्यः शब्दः श्रावणत्वादिति। १५ हेतोः। १६ जगति। १७ अनुमाने। १८ सूक्ष्मान्तरितदूरार्थे।

"यदि षड्भिः प्रमाणैः स्यात्सर्वज्ञः केन वार्यते ।
एकेन तु प्रमाणेन सर्वज्ञो येन कल्प्यते ॥
नूनं स चक्षुषा सर्वान् रसादीन्प्रतिपद्यते ।" [मी० श्लो० चोदनासू० श्लो० १११-१२] इत्यभिधानात् ।

किञ्च, प्रमेयत्वं किमशेषज्ञेयव्यापिप्रमाणप्रमेयत्वव्यक्तिलक्षणमभ्युपगम्यते[1], अस्मदादिप्रमाणप्रमेयत्वव्यक्तिस्वरूपं वा स्यात्, उभयव्यक्तिसाधारणसामान्यस्वभावं वा? प्रथमपक्षोऽयुक्तः; विवादाध्यासितपदार्थेषु[2][3] तथाभूतप्रमाणप्रमेयत्वस्यासिद्धत्वात्, अन्यथा[4] साध्यस्यापि सिद्धेर्हेतूपादानमपार्थकम् । सन्दिग्धान्वयश्चायं[5][6] हेतुः स्यात्; तथाभूतप्रमाणप्रमेयत्वस्य दृष्टान्ते[7]ऽसिद्धत्वात् । द्वितीयपक्षेऽसिद्धो हेतुः[8], अस्मदादिप्रमाणप्रमेयत्वस्य विवादगोचरार्थे[9]ष्वसम्भवात् । सम्भवे वा ततस्तथाभूतप्रत्यक्ष[10]त्वसिद्धिरेव स्यात् । तत्र चाविवादान्न हेतूपन्यासः फलवान् । नाप्युभयप्रमेयत्वव्यक्तिसाधारणं प्रमेयत्वसामान्यं हेतुः; अत्यन्तविलक्षणातीन्द्रियेन्द्रिय[11]विषयप्रमाणप्रमेयत्वव्यक्तिद्वयसाधारणसामान्यस्यैवासम्भवात् । तन्नानुमानात्तत्सिद्धिः[12] ।

नाप्यागमात्[13]; सोपि हि नित्यः, अनित्यो वा तत्प्रतिपादकः स्यात्? न तावन्नित्यः; तत्प्रतिपादकस्य तस्याभावात्, भावेपि प्रामाण्यासम्भवात् कार्ये[14]ऽर्थे तत्प्रामाण्यप्रसिद्धेः । अनित्योऽपि किं तत्प्रणीतः[15], पुरुषान्तरप्रणीतो वा? प्रथमपक्षेऽन्योन्याश्रयः—सर्वज्ञप्रणीतत्वे तस्य प्रामाण्यम्, ततस्तत्प्रतिपादकत्वमिति । नापि पुरुषान्तरप्रणीतः; तस्योन्मत्तवाक्यवदप्रामाण्यात् । तन्नागमादप्यस्य सिद्धिः ।

नाप्युपमानात्; तत्खलूपमानोपमेययोरनवयवे[16]नाध्यक्षत्वे सति सादृश्यावलम्बनमुदयमासादयति; नान्यथातिप्रसङ्गात्[17] । न चोपमानभूतः कश्चित्सर्वज्ञत्वेनाध्यक्षतः सिद्धो येन तत्[18]सादृश्यादन्यस्य[19] सर्वज्ञत्वमुपमानात्साध्येत ।

---

१ जैनादिभिः । २ प्रत्यक्षत्वाप्रत्यक्षत्वेन कारणेन विवादाध्यासितत्वम् । ३ सूक्ष्मादिषु । ४ विवादाध्यासितपदार्थेषु अशेषज्ञेयव्यापिप्रमाणप्रमेयत्वं सिद्धं चेत् । ५ असाधारणानैकान्तिकः । ६ अशेषज्ञेयप्रमाणप्रमेयत्वादित्ययम् । ७ नाकादौ । ८ अस्मदादिप्रमाणप्रमेयत्वादिति हेतुः । ९ सूक्ष्मादिषु । १० अस्मदादिप्रमाणभूत । ११ अतीन्द्रियश्चेन्द्रियविषयश्च तेषां ग्राहकप्रमाणम् । १२ सर्वज्ञ । १३ हिरण्यगर्भं प्रकृत्य सर्वज्ञ इति । १४ अग्निष्टोमेन यजेत स्वर्गकाम इति क्रियमाणेऽर्थे । १५ सर्वज्ञ । १६ साकल्येन । १७ भूभवनवद्धितोत्थितस्योपमानज्ञानप्रसङ्गात् । १८ तस्योपमानभूतसर्वज्ञस्य । १९ नुः ।

नाप्यर्थापत्तितस्तत्सिद्धिः; सर्वज्ञसद्भावमन्तरेणानुपपद्यमानस्य प्रमाणषट्कविज्ञातार्थस्य कस्यचिदभावात्। धर्माद्युपदेशस्य बहुजनपरिगृहीतस्यान्यथापि भावात्। तथा चोक्तम्—

"सर्वज्ञो दृश्यते तावन्नेदानीमस्मदादिभिः।
[मी० श्लो० चोदनासू० श्लो० ११७]
दृष्टो न चैकदेशोस्ति[2] लिङ्गं[3] वा योनुमापयेत्॥ १॥ [ ]
न चागमविधिः कश्चिन्नित्यः सर्वज्ञबोधकः।
न च मन्त्रार्थवादानां तात्पर्यमवकल्पते॥ २॥ [ ]
न चान्यार्थप्रधानैस्तैस्तदस्तित्वं विधीयते।
न चानुवदितुं शक्यः पूर्वमन्यैरबोधितः॥ ३॥ [ ]
अनादेरागमस्यार्थो न च सर्वज्ञ आदिमान्।
कृत्रिमेण त्वसत्येन स कथं प्रतिपाद्यते॥ ४॥ [ ]
अथ तद्वचनेनैव सर्वज्ञोऽन्यैः प्रतीयते।
प्रकल्पेत कथं सिद्धिरन्योन्याश्रययोस्तयोः?॥ ५॥ [ ]
सर्वज्ञोक्ततया वाक्यं सत्यं तेन तदस्तिता।
कथं तदुभयं सिद्ध्येत् सिद्धमूलान्तरादृते॥ ६॥ [ ]
असर्वज्ञप्रणीतात्तु वचनान्मूलवर्जितात्।
सर्वज्ञमवगच्छन्तः स्ववाक्यात्किन्न जानते?॥ ७॥ [ ]
सर्वज्ञसदृशं कश्चिद्यदि पश्येम सम्प्रति।
उपमानेन सर्वज्ञं जानीयाम ततो वयम्॥ ८॥ [ ]
उपदेशो हि बुद्धादेर्धर्माऽधर्मादिगोचरः।
अन्यथा नोपपद्येत सार्वज्ञं यदि नाऽभवत्॥ ९॥ [ ]
बुद्धादयो ह्यवेदज्ञास्तेषां वेदादसम्भवः।
उपदेशः कृतोऽतस्तैर्व्यामोहादेव केवलात्॥ १०॥ [ ]

१ सर्वज्ञाभावेपि। २ सम्बन्ध्यन्तरं हेतुः। ३ लिङ्गं भूतेति शेषः। ४ सर्वज्ञम्। ५ प्रशंसामन्त्रभावनादिः। ६ घटते। ७ यागार्थे। ८ आगमैः। ९ आगमात्। १० अनुभाषणात्। ११ प्रमाणान्तरैः। १२ सर्वज्ञः। १३ अस्मदादिभिः। १४ सर्वज्ञागमसत्यार्थयोः। १५ कथमन्योन्याश्रय इत्युक्ते सत्याह। १६ ज्ञमः। १७ आगमप्रामाण्यलक्षणात् मूलादन्यत् सर्वज्ञप्रामाण्यलक्षणं मूलान्तरं वा द्रष्टव्यम्। १८ मूलं प्रामाण्यम्। १९ सर्वज्ञसदृशदर्शनात्। २० भूत्वा। २१ न विद्यते संभव उत्पत्तिर्यस्योपदेशस्य। २२ अज्ञानात्।

1 'न च मन्त्रार्थवादानां⋯न चानुवदितुं शक्यः' इति श्लोकद्वयं विना सर्वेऽपि श्लोकाः तत्त्वसंग्रहे (पृ० ८३०,८३१,८३२,८३८,८३९,८४०) पूर्वपक्षे कुमारिलकर्तृकत्वेनोपलभ्यन्ते।

ये तु मन्वादयः सिद्धाः प्राधान्येन त्रयीविदाम्।
त्रयीविदाश्रितग्रन्थास्ते वेदप्रभवोक्तयः ॥ ११ ॥" [ ]

इति ।

न च प्रमाणान्तरं सदुपलम्भकं सर्वज्ञस्य साधकमस्ति ।

मा भूदत्रत्येदानीन्तनास्मदादिजनाना (नां) सर्वज्ञस्य साधकं ५
प्रत्यक्षाद्यन्यतमं देशान्तरकालान्तरवर्त्तिनां केषाञ्चिद्भविष्यतीति चाऽयुक्तम्;

"यज्जातीयैः प्रमाणैस्तु यज्जातीयार्थदर्शनम्।
दृष्टं सम्प्रति लोकस्य तथा कालान्तरेऽप्यभूत् ॥"

[मी० श्लो० चोदनासू० श्लो० ११३] १०

इत्यभिधानात् । तथा हि–विवादाध्यासिते देशे काले च प्रत्यक्षादिप्रमाणम् अत्रत्येदानीन्तनप्रत्यक्षादिग्राह्यसजातीयार्थग्राहकं तद्विजातीयसर्वज्ञाद्यर्थग्राहकं वा न भवति प्रत्यक्षादिप्रमाणत्वात् अत्रत्येदानीन्तनप्रत्यक्षादिप्रमाणवत् ।

ननु च यथाभूतमिन्द्रियादिजनितं प्रत्यक्षादि सर्वज्ञाद्यर्थासा- १५
धकं दृष्टं तथाभूतमेव देशान्तरे कालान्तरे च तथा साध्यते, अन्यथाभूतं वा? तथाभूतं चेत्सिद्धसाधनम् । अन्यथाभूतं चेदप्रयोजको हेतुः; जगतो बुद्धिमत्कारणत्वे साध्ये सन्निवेशविशिष्टत्वादिवत्; तदसाम्प्रतम्; तथाभूतस्यैव तथा साधनात् । न च सिद्धसाधनमन्यादृशप्रत्यक्षाद्यभावात् । तथा हि—विवादा- २०
पन्नं प्रत्यक्षादिप्रमाणमिन्द्रियादिसामग्रीविशेषानपेक्षं न भवति प्रत्यक्षादिप्रमाणत्वात्प्रसिद्धप्रत्यक्षादिप्रमाणवत् । न गृद्धवराहपिपीलिकादिप्रत्यक्षेण सन्निहितदेशविशेषानपेक्षिणा नक्तञ्चरप्रत्यक्षेण वालोकानपेक्षिणानेकान्तः, कात्यायनाद्यनुमानातिशयेन, जैमिन्याद्यागमातिशयेन वा; तस्यापीन्द्रियादिप्रणिधानसामग्री- २५
विशेषमन्तरेणासम्भवात्, अतीन्द्रियाननुमेयाद्यर्थाविषयत्वेन स्वार्थातिलङ्घनाभावात् । तथा चोक्तम्—

---

१ सिद्धाः प्रसिद्धाः । २ मध्ये । ३ त्रयीविद्भिराश्रितो ग्रन्थो येषां ते । ४ वेदात्प्रभव उत्पत्तिर्यासामुक्तीनां ता वेदप्रभवाः, वेदप्रभवा उक्तयो येषां मन्वादीनां ते । ५ रूपादिमदल्पानन्त्यादि । ६ अस्मदादिप्रमाणसदृशप्रमाणप्रकारेण । ७ सर्वज्ञवादी मते । ८ अतीन्द्रियप्रत्यक्षम् । ९ सपक्षाव्यापकपक्षव्यावृत्तः प्रतिनियतार्थग्राहित्वे सतीति विशेषणजनितोपाध्याहितसम्बन्धो हेतुरप्रयोजकः । १० अक्रियादर्शिनोपि कृतबुद्ध्युत्पादकत्वे सति । ११ अतीन्द्रिय । १२ देशान्तरकालान्तरवर्त्ति । १३ अत्रत्येदानीन्तनं प्रसिद्धम् । १४ वररुचि । १५ अश्रुतवेदार्थलक्षण । १६ एकाग्रता । १७ स्वस्य प्रत्यक्षादेः ।

"यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात्[1]।
दूरसूक्ष्मादिदृष्टौ[2] स्यान्न रूपे श्रोत्रवृत्तितः (ता) ॥ १ ॥
[मी० श्लो० चोदनासू० श्लो० ११४]

येपि[3] सातिशया दृष्टाः प्रज्ञा[4]मेधा[5]दिभिर्नराः।
५ स्तोकस्तोकान्तरत्वेन न त्वतीन्द्रियदर्शनात् ॥ २ ॥ [ ]
प्राज्ञोपि[6] हि नरः सूक्ष्मानर्थान्द्रष्टुं क्षमोपि सन्।
सजातीरनतिक्रामन्नतिशेते पराञ्नरान् ॥ ३ ॥ [ ]
एक[7]शास्त्रविचारेषु दृश्यतेऽतिशयो महान्।
न तु शास्त्रान्तरज्ञानं तन्मात्रेणैव लभ्यते ॥ ४ ॥ [ ]
१० ज्ञात्वा[8] व्याकरणं दूरं[9] बुद्धिः शब्दापशब्दयोः।
प्रकृष्यते[10] न नक्षत्रतिथिग्रहणनिर्णये ॥ ५ ॥ [ ]
ज्योतिर्विच्च[11][12] प्रकृष्टोपि चन्द्रार्कग्रहणादिषु।
न भवत्यादिशब्दानां साधुत्वं ज्ञातुमर्हति ॥ ६ ॥ [ ]
तथा वेदेतिहासादिज्ञानातिशयवानपि।
१५ न स्वर्गदेवताऽपूर्व[13]प्रत्यक्षीकरणे क्षमः ॥ ७ ॥ [ ]
दशहस्तान्तरं[14] व्योम्नि यो नामोत्प्लुत्य गच्छति।
न योजनमसौ गन्तुं शक्तोऽभ्यासशतैरपि ॥ ८ ॥" [ ]

इति।

प्रसङ्गविपर्ययाभ्यां[15] चास्या[16]शेषार्थविषयत्वं बाध्यते; तथाहि—
२० सर्वज्ञस्य ज्ञानं प्रत्यक्षं यद्यभ्युपगम्यते[17] तदा तद्धर्मादि[18]ग्राहकं न स्याद्विद्यमानोपलम्भनत्वात्। विद्यमानोपलम्भनं तत् सत्सम्प्रयोगजत्वात्। सत्सम्प्रयोगजं तत्, प्रत्यक्षशब्दवाच्यत्वादस्मदादि[19]प्रत्यक्षवत्। तद्धर्मादिग्राहकं चेत् न विद्यमानोपलम्भनं धर्मादेरविद्यमानत्वात्। तत्त्वे[20] चासत्सम्प्रयोगजत्वे चाऽप्रत्यक्षशब्द[21][22]वा-
२५ च्यत्वम्।

१ गृह्णातीन्द्रियं। २ क्रियमाणायाम्। ३ इन्द्रियाणामतिशयो नास्ति येनमा भूत्पुरुषाणां भविष्यतीत्युक्ते सत्याह। ४ अर्थग्रहणशक्तिः प्रज्ञा। ५ मेधा पाठग्रहणशक्तिः। ६ पूर्वोक्तं भावयति। ७ तत्र दृष्टान्तमाह। ८ दृष्टान्तं भावयति। ९ न्यासपर्यन्तम्। १० प्रकृष्टा भवति। ११ पुनरपि दृष्टान्तं भावयति। १२ चकारो दृष्टान्तसमुच्चये। १३ अदृष्ट। १४ लोकप्रसिद्धं दृष्टान्तमाह। १५ प्रसङ्गविपर्ययोर्लक्षणमुत्तरपक्षे वदिष्यति। १६ सर्वज्ञज्ञानस्य। १७ जैनादिभिः सर्वज्ञवादिभिः। १८ पुण्यपापादि। १९ इति प्रसङ्गेन तस्याशेषार्थविषयत्वं बाध्यते। २० तस्य परोक्षत्वमित्यर्थः। २१ इति विपर्ययेण तस्याशेषार्थविषयत्वं बाध्यते। २२ अविद्यमानोपलम्भनत्वे।

1 इमा अशेषाः कारिकाः तत्त्वसंग्रहे (पृ० ८२५-२६) पूर्वपक्षतया उपलभ्यन्ते।

धर्मज्ञत्वनिषेधे चान्याशेषार्थप्रत्यक्षत्वेपि न प्रेरणाप्रामाण्यप्रतिबन्धो धर्मे तस्या एव प्रामाण्यात्। तदुक्तम्—

"सर्वप्रमातृसम्बन्धिप्रत्यक्षादिनिवारणात्।
केवलागमगम्यत्वं लप्स्यते पुण्यपापयोः॥ १॥" [ ]
धर्मज्ञत्वनिषेधस्तु केवलोत्रोपयुज्यते।
सर्वमन्यद्विजानंस्तु पुरुषः केन वार्यते॥ २॥" [ ]

किञ्च, अस्य ज्ञानं चक्षुरादिजनितं धर्मादिग्राहकम्, अभ्यासजनितं वा स्यात्, शब्दप्रभवं वा, अनुमानाविर्भूतं वा? प्रथमपक्षे धर्मादिग्राहकत्वायोगश्चक्षुरादीनां प्रतिनियतरूपादिविषयत्वेन तत्प्रभवज्ञानस्याप्यत्रैव प्रवृत्तेः। अथाभ्यासजनितम्, ज्ञानाभ्यासादिप्रकर्षतरतमादिक्रमेण तत्प्रकर्षसम्भवे सकलस्वभावातिशयपर्यन्तं संवेदनमवाप्यते; इत्यपि मनोरथमात्रम्; अभ्यासो हि कस्यचित्प्रतिनियतशिल्पकलादौ तदुपदेशाद् ज्ञानाच्च दृष्टः। न चाशेषार्थोपदेशो ज्ञानं वा सम्भवति। तत्सम्भवे किमभ्यासप्रयासेनाशेषार्थज्ञानस्य सिद्धत्वात्। अन्योन्याश्रयश्च—अभ्यासात्तज्ज्ञानम्, ततोऽभ्यास इति। शब्दप्रभवं तदित्यप्ययुक्तम्; परस्पराश्रयणानुषङ्गात् सर्वज्ञप्रणीतत्वेन हि तत्प्रामाण्येऽशेषार्थविषयज्ञानसम्भवः, तत्सम्भवे चाशेषज्ञस्य तथाभूतशब्दप्रणेतृत्वमिति। अभ्युपगम्यते च प्रेरणाप्रभवज्ञानवतो धर्मज्ञत्वम्,

"चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थमवगमयितुमलं नान्यत् किंचनेन्द्रियादिकम्" [शाबरभा० १।१।२] इत्यभिधानात्।

अनुमानाविर्भूतमित्यप्यसङ्गतम्; धर्मादेरतीन्द्रियत्वेन तज्ज्ञापकलिङ्गस्य तेन सह सम्बन्धासिद्धेरसिद्धसम्बन्धस्य चाज्ञापकत्वात्।

किञ्च, अनुमानेनाशेषज्ञत्वेऽस्मदादीनामपि तत्प्रसङ्गः, 'भावाभावोभयरूपं जगत्प्रमेयत्वात्' इत्याद्यनुमानस्यास्मदादीनामपि भावात्। अनुमानागमज्ञानस्य चास्पष्टत्वात्तज्जनितस्याप्यवैशद्यसम्भवान्न तज्ज्ञानवान्सर्वज्ञो युक्तः।

१ वैदिकी। २ प्रेरणाप्रामाण्ये। ३ धर्माधर्माभ्यामन्यत्। ४ न केनापि। ५ सर्वज्ञस्य। ६ सकलार्थग्रहणलक्षणातिशय। ७ आगम। ८ धर्मादिग्राहकं सर्वज्ञज्ञानम्। ९ अशेषार्थविषय। १० मन्वादेः। ११ कालेन। १२ देशेन। १३ अनुमानादिज्ञानजनितास्पष्टज्ञानवान्।

1 इमे कारिके तत्त्वसंग्रहे (पृ० ८१६,८२०) पूर्वपक्षतया विधेये।

न च वक्तव्यम्-'पुनःपुनर्भाव्यमानं भावनाप्रकर्षपर्यन्ते योगिज्ञानरूपतामासादयत्तद्वैशद्यभाग् भविष्यति। दृश्यते चाभ्यासबलात्कामशोकाद्युपप्लुतज्ञानस्य वैशद्यम्' इति; तद्वदस्याप्युपप्लुतत्वप्रसङ्गात्।

५ किञ्च, अस्याखिलार्थग्रहणं सकलज्ञत्वम्, प्रधानभूतकतिपयार्थग्रहणं वा? तत्राद्यपक्षे क्रमेण तद्ग्रहणम्, युगपद्वा? न तावत्क्रमेण; अतीतानागतवर्त्तमानार्थानां परिसमाप्त्यभावात्तज्ज्ञानस्याप्यपरिसमाप्तेः सर्वज्ञत्वायोगात्। नापि युगपत्; परस्परविरुद्धशीतोष्णाद्यर्थानामेकत्र ज्ञाने प्रतिभासासम्भवात्। सम्भवे वा
१० प्रतिनियतार्थस्वरूपप्रतीतिविरोधः।

किञ्च, एकक्षण एवाशेषार्थग्रहणाद् द्वितीयक्षणेऽकिञ्चिज्ज्ञः स्यात्। तथा परस्थरागादिसाक्षात्करणाद्रागादिमान्, अन्यथा सकलार्थसाक्षात्करणविरोधः।

नापि प्रधानभूतकतिपयार्थग्रहणम्; इतरार्थव्यवच्छेदेन 'एते-
१५ षामेव प्रयोजननिष्पादकत्वात्प्राधान्यम्' इति निश्चयो हि सकलार्थज्ञाने सत्येव घटते, नान्यथा। तच्च प्रागेव कृतोत्तरम्।

कथं चातीतानागतग्रहणं तत्स्वरूपासम्भवाद्? असतो ग्रहणे तैमिरिकज्ञानवत्प्रामाण्याभावः। सत्त्वेन ग्रहणेऽतीतादेर्वर्त्तमानत्वम्। तथा चान्यकालस्यान्यकालतया वस्तुनो ग्रहणात्तज्ज्ञान-
२० स्याऽप्रामाण्यम्।

कथं चासौ तद्ग्राह्याखिलार्थाज्ञाने तत्कालेऽप्यसर्वज्ञैर्ज्ञातुं शक्यते? तदुक्तम्—

"सर्वज्ञोयमिति ह्येतत्तत्कालेपि बुभुत्सुभिः।
तज्ज्ञानज्ञेयविज्ञानरहितैर्गम्यते कथम्॥ १॥
२५ कल्पनीयाश्च सर्वज्ञा भवेयुर्बहवस्तव।
य एव स्यादसर्वज्ञः स सर्वज्ञं न बुद्ध्यते॥ २॥
सर्वज्ञो नावबुद्धश्च येनैव स्यान्न तं प्रति।
तद्वाक्यानां प्रमाणत्वं मूलाज्ञानेऽन्यवाक्यवत्॥ ३॥"
[मी० श्लो० चोदनासू० श्लो० १३४-३६] इति।

१ आगमानुमानजनितास्पष्टं ज्ञानम्। २ व्याहत। ३ सर्वज्ञज्ञानस्य। ४ मोक्षलक्षण। ५ सर्वज्ञः। ६ तेन सर्वज्ञज्ञानेन। ७ तर्हि सर्वज्ञेनैव सर्वज्ञो ज्ञायते इत्युक्ते सत्याह। ८ यतः। ९ मूलस्य वाक्यकारणस्य सर्वज्ञलक्षणस्य। १० अन्यस्य रथ्यापुरुषस्य।

अत्र प्रतिविधीयन्ते[1]। यत्तावदुक्तम्-सदुपलम्भकप्रमाणपञ्चकाविषयत्वं साधनम्; तदसिद्धम्; तत्सद्भावावेदकस्यानुमानादेः सद्भावात्। तथाहि-कश्चिदात्मा सकलपदार्थसाक्षात्कारी तद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययत्वात्[2], यद्यद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययं तत्तत्साक्षात्कारि यथापगततिमिरादिप्रतिबन्धं लोचनविज्ञानं रूपसाक्षात्कारि, तद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययश्च कश्चिदात्मेति। न तावत्सकलार्थग्रहणस्वभावत्वमात्मनोऽसिद्धम्; चोदनाबलान्निखिलार्थज्ञानोत्पत्त्यन्यथानुपपत्तेस्तस्य तत्सिद्धेः, 'सकलमनेकान्तात्मकं[3] सत्त्वात्' इत्यादिव्याप्तिज्ञानोत्पत्तेर्वा। यद्धि[4] यद्विषयं तत्तद्ग्रहणस्वभावम् यथा रूपादिपरिहारेण रसविषयं रासनविज्ञानं रसग्रहणस्वभावम्, सकलार्थविषयश्चात्मा व्याप्त्यागमज्ञानाभ्यामिति। सोऽयं[5] "चोदना हि भूतं भवन्तं भविष्यन्तं विप्रकृष्टमित्येवंजातीयकमर्थमवगमयितुमलं पुरुषान्" [शाबरभा० १।१।२] इति स्वयं ब्रुवाणो विधिप्रतिषेधविचारणानिबन्धनं साकल्येन व्याप्तिज्ञानं च प्रतिपद्यमानः सकलार्थग्रहणस्वभावतामात्मनो निराकरोतीति कथं स्वस्थः[6]? प्रक्षीणप्रतिबन्धप्रत्ययत्वं च प्रागेव प्रसाधितत्वान्नासिद्धम्[7]।

साध्यसाधनयोश्च प्रतिबन्धो न प्रत्यक्षानुमानाभ्यां प्रतिज्ञायते येनोक्तदोषानुषङ्गः[8] स्यात्, तर्काख्य[9]प्रमाणान्तरात्तत्सिद्धेः।

यच्चाप्रतिपन्नपक्षधर्मत्वो हेतुर्न प्रतिनियतसाध्यप्रतिपत्त्यङ्गमित्युक्तम्[10]; तदप्यपेशलम्; न हि सर्वज्ञोऽत्र[11] धर्मित्वेनोपात्तो येनास्यासिद्धस्[12]यं दोषः। किं तर्हि? कश्चिदात्मा। तत्र चाविप्रतिपत्तेः। न चापक्षधर्मस्य हेतोरगमकत्वम्;

"पित्रोश्च ब्राह्मणत्वेन पुत्रब्राह्मणतानुमा।
सर्वलोकप्रसिद्धा न पक्षधर्ममपेक्षते॥" [ ]

इति स्वयमभिधानात्।

यदप्युक्तम्-सत्तासाधने सर्वो हेतुस्त्रयीं दोषजातिं नातिवर्त्तत इति; तत्सर्वानुमानोच्छेदकारित्वादयुक्तम्; शक्यं हि वक्तुं धूम-

१ जैनैः। २ प्रक्षीणः प्रतिबन्धलक्षणः प्रत्ययः करणं यस्य। ३ वस्तु। ४ आत्मा सकलार्थग्रहणस्वभावो भवति सकलार्थविषयत्वादित्युपरिष्टाद्योज्यम्। ५ मीमांसकः। ६ बुद्धिमान्। ७ विशेष्यम्। ८ अनवस्थेतरेतरानुषङ्गः। ९ अर्थसाक्षात्कारित्वे सत्येव प्रक्षीणप्रतिबन्धप्रत्ययत्वं लोचने सिद्धं स्तम्भादौ न दृष्टम्। अतः साध्यधर्मिणि साध्यसाधनयोः सम्बन्धसिद्धिर्भवत्येव। १० परेण। ११ अनुमाने। १२ धर्मिणः।

त्वादिर्यद्यग्निमत्पर्वतधर्मस्तदाऽसिद्धः; को[1] हि नामाग्निमत्पर्वत-धर्मं हेतुमिच्छन्नग्निमत्त्वमेव नेच्छेत्[2]। तद्विपरीत[3]धर्मश्चेद्विरुद्धः; साध्यविरुद्धसाधनात्। उभयधर्मश्चेद्व्यभिचारी सपक्षेतरयोर्वर्त्त-नात्। विमत्यधिकरणभावापन्नधर्मिधर्मत्वे धूमवत्त्वादेः सर्वं ५ सुस्थम्। यथा चाचलस्याचलत्वा[4]दिना प्रसिद्धसत्ताकस्य सन्दि-ग्धाग्निमत्त्वादिसाध्यधर्मस्य धर्मो हेतुर्न विरुध्यते, तथा प्रसिद्धा-त्मत्वादि[5]विशेषणसत्ताकस्याप्रसिद्धसर्वज्ञत्वोपाधिसत्ताकस्य च धर्मिणो धर्मः प्रकृतो हेतुः कथं विरुध्येत?

यदपि अविशेषेण सर्वज्ञः कश्चित्साध्यते विशेषेण वेत्याद्यऽभि-१० हितम्; तदप्यभिधानमात्रम्; सामान्यतस्तत्साधानात्तत्रैव[6] विवा-दात्। विशेषविप्रतिपत्तौ पुनर्दृष्टेष्टा[7]विरुद्धवाक्त्वादर्हत एवाशेषा-र्थज्ञत्वं सेत्स्यति। कथं वा तत्प्रतिषेधः अत्राप्यस्य दोषस्य समा-नत्वात्? अर्हतो[8] हि तत्प्रतिषेधसाधनेऽप्रसिद्धविशेषणः पक्षो व्याप्तिश्च[9] न सिध्येत्, दृष्टान्त[10]स्य साध्य[11]शून्यतानुषङ्गात्। अनर्हत-[12] १५ श्चेत्; स एव दोषो बुद्धादेः पर[13]स्यासिद्धः, अनिष्टानुषङ्गश्चार्हतस्तद्[14]-प्रतिषेधात्। सामान्यतस्तत्प्रतिषेधे सर्वं[15] सुस्थम्।

यच्चोक्तम्-एकज्ञानप्रत्यक्षत्वं सूक्ष्माद्यर्थानां साध्यत्वेनाभिप्रेतं प्रतिनियतविषयानेकज्ञानप्रत्यक्षत्वं वेत्यादिः तदप्युक्तिमात्रम्; प्रत्यक्षसामान्येन कस्यचित्सूक्ष्माद्यर्थानां प्रत्यक्षत्वसाधनात्। २० प्रसिद्धे च तेषां सामान्यतः कस्यचित्प्रत्यक्षत्वे तत्प्रत्यक्ष[16]स्यैकत्व-मिन्द्रियानिन्द्रियानपेक्षत्वात्सिध्येत्, तदपेक्षस्यैवास्यानेकत्वप्र-सिद्धेः। तदनपेक्षत्वं च प्रमाणान्तरात्सिद्ध्येत्; तथाहि-योगिप्रत्य-क्षमिन्द्रियानिन्द्रियानपेक्षं सूक्ष्माद्यर्थविषयत्वात्, यत्पुनरिन्द्रि-यानिन्द्रियापेक्षं तन्न सूक्ष्माद्यर्थविषयम् यथास्मदादिप्रत्यक्षम्, २५ तथा च योगिनः प्रत्यक्षम्, तस्मात्तथेति।

किञ्च, एवं साध्यविकल्पनेनानुमानोच्छेदः। शक्यते हि वक्तुम्-साध्यधर्मिधर्मोऽग्निः साध्यत्वेनाभिप्रेतः, दृष्टान्तधर्मिधर्मः, उभयधर्मो वा? प्रथमपक्षे विरुद्धो हेतुः; तद्विरुद्धेन दृष्टान्तध-

१ ज्ञानवान्। २ अतश्च हेतूपन्यासो व्यर्थः। ३ अनग्निमत्पर्वतधर्मः। ४ आदि-पदेन स्थूलत्वादिना। ५ आदिपदेन अमूर्त्तत्वम्। ६ सर्वज्ञसाधने। ७ वीतो न सर्वज्ञः पुरुषत्वाद्रथ्यापुरुषवदिति। ८ यो यः पुरुषः स सोऽर्हन् सन् सर्वज्ञो न भवतीति। ९ अन्यथा। १० रथ्यापुरुषस्य। ११ सर्वज्ञभाव। १२ सुगतादेः। १३ मीमांसकस्य। १४ तस्य सर्वज्ञत्वस्य। १५ असत्पक्षेपि समान इत्यर्थः। कथम्? सामान्यतः सर्वज्ञसाधने अप्रसिद्धविशेषणः पक्ष इत्यादिदूषणानि विशेषपक्षो-क्तानि नोपढौकन्ते इति। १६ प्रत्यक्षस्य।

र्मिणि तद्धर्मेणाग्निना धूमस्य व्याप्तिप्रतीतेः। साध्यविकलश्च दृष्टान्तः स्यात्। द्वितीयपक्षे तु प्रत्यक्षादिविरोधः। अथोभयगताग्निसामान्यं साध्यते तर्हि सिद्धसाध्यता।

यच्चान्यदुक्तम्-प्रमेयत्वं किमशेषज्ञेयव्यापिप्रमाणप्रमेयत्वव्यक्तिलक्षणमस्मदादिप्रमाणप्रमेयत्वव्यक्तिस्वरूपं वेत्यादि; तद्धूमादिसकलसाधनोन्मूलनहेतुत्वान्न वक्तव्यम्। तथाहि-साध्यधर्मिधर्मो धूमो हेतुत्वेनोपात्तः, दृष्टान्तधर्मिधर्मो वा स्यात्, उभयगतसामान्यरूपो वा? साध्यधर्मिधर्मत्वे दृष्टान्ते तस्याभावादनन्वयो हेतुदोषः। दृष्टान्तधर्मिधर्मत्वे साध्यधर्मिण्यभावादसिद्धता। उभयगतसामान्यरूपत्वेप्यसिद्धतैव, प्रत्यक्षत्वाप्रत्यक्षत्वेनात्यन्तविलक्षणमहानसाचलप्रदेशव्यक्तिद्वयाश्रितसामान्यस्यैवासम्भवात्। अथ कण्ठाक्षिविक्षेपादिलक्षणधर्मकलापसाधर्म्यान्न महानसाचलप्रदेशाश्रितधूमव्यक्त्योरत्यन्तवैलक्षण्यं येनोभयगतसामान्यासिद्धेरसिद्धता स्यात्; तर्हि स्वापूर्वार्थव्यवसायात्मकत्वादिधर्मकलापसाधर्म्यस्यातीन्द्रियेन्द्रियविषयप्रमाणव्यक्तिद्वयेऽत्यन्तवैलक्षण्यनिवर्त्तकस्य सम्भवादुभयसाधारणसामान्यसिद्धेः कथं प्रमेयत्वसामान्यस्यासिद्धिः?

यच्चेदमुक्तम्-प्रसङ्गविपर्ययाभ्यां चास्याशेषार्थविषयत्वं बाध्यत इत्यादि; तन्मनोरथमात्रम्; साध्यसाधनयोर्व्याप्यव्यापकभावसिद्धौ हि व्याप्याभ्युपगमो व्यापकाभ्युपगमनान्तरीयको यत्र प्रदर्श्यते तत्प्रसङ्गसाधनम्। व्यापकनिवृत्तौ चावश्यं भाविनी व्याप्यनिवृत्तिः स विपर्ययः। न च प्रत्यक्षत्वसत्सम्प्रयोगजत्वविद्यमानोपलम्भनत्वधर्मादिनिमित्तत्वानां व्याप्यव्यापकभावः क्वचित् प्रतिपन्नः। स्वात्मन्येवासौ प्रतिपन्न इत्यप्यसङ्गतम्; चक्षुरादिकरणग्रामप्रभवप्रत्यक्षस्याव्यवहितदेशकालस्वभावाविप्रकृष्टप्रतिनियतरूपादिविषयत्वाभ्युपगमात्, नियमस्य चाभावाद्विप्र-

१ महानसे पर्वताग्नेरभावात्। २ लौकिक। ३ सिद्धं नः (जैनानां) समीहितमिति पाठान्तरम्। ४ पर्वतधूमवत्त्वादित्युक्ते। ५ महानसे। ६ यो यः पर्वतधूमवान् स सोऽग्निमानित्यन्वयो न। ७ महानसधूमवत्त्वादित्युक्ते। ८ अतीन्द्रियविषयश्चेन्द्रियविषयश्च तयोर्ग्राहकं प्रमाणम्। ९ सदृशत्वप्रवर्त्तकस्येत्यर्थः। १० सर्वज्ञस्य। ११ अनुमाने। १२ व्याप्य। १३ व्यापक। १४ व्याप्य। १५ व्यापक। १६ दृष्टान्ते। १७ समीपवर्त्ति। १८ यत्तः। १९ यथाविधे प्रत्यक्षे व्याप्यव्यापकभावः साध्यसाधनानां प्रतिपन्नस्तथाविधेऽसौ स्यान्न सर्वज्ञत्वप्रत्यक्षे तत्र व्याप्यव्यापकभावस्याप्रतिपन्नत्वादित्यर्थः। २० यत्प्रत्यक्षशब्दावाच्यं तदव्यवहितदेशकालार्थग्राहकमिति नियमस्य।

कृष्टार्थग्राहकेऽपि[1] प्रत्यक्षशब्दवाच्यत्वदर्शनात् । तथाहि—अनेकयोजनशतव्यवहितार्थग्राहि वैनतेयप्रत्यक्षं रामायणादौ प्रसिद्धम्, लोके चातिदूरार्थग्राहि गृध्रवराह[2]ादिप्रत्यक्षम्, स्मरणसव्यपेक्षेन्द्रिया[3]दिजन्यप्रत्यभिज्ञाप्रत्यक्षं च कालविप्रकृष्टस्यातीतकालसम्बन्धित्वस्यातीतदर्शनसम्बन्धित्वस्य[4] च ग्राहि पुरोवस्थितार्थे[5] भवतैवा[6]भ्युपगम्यते । अन्यथा—

"देशकालादिभेदे[7]न तत्रा[8]स्त्यवसरो मितेः[9] ।
इदानीन्तनमस्तित्वं न हि पूर्वधिया गतम्[10] ॥"
[मी० श्लो० प्रत्यक्षसू० श्लो० २३३-३४]

इत्यादिना तस्या[11]गृहीतार्थाधिगन्तृत्वं पूर्वापरकालसम्बन्धित्वलक्षणनित्यत्वग्राहकत्वं च प्रतिपा[12]द्यमानं विरुध्येत । प्रातिभं च ज्ञानं शब्दलिङ्गाक्षव्यापारानपेक्षं 'श्वो मे भ्राता आगन्ता' इत्याद्याकारमनागतातीन्द्रियकालविशेषणार्थप्रतिभासं जाग्रद्दशायां स्फुटतरमनुभूयते ।

किञ्च, धर्मादेरतीन्द्रियत्वाच्चक्षुरादिनानुपलम्भः, अविद्यमानत्वाद्वा स्यात्, अविशेषणत्वाद्वा? न तावदाद्यः पक्षः; अतीन्द्रियस्याप्यतीतकालादेरुपलम्भाभ्युपगमात् । नाप्यविद्यमानत्वात्; भाविधर्मा[13]देरतीतकालादेरिवाविद्यमानत्वेप्युपलम्भसम्भवात् । अविशेषणत्वं तु तस्यासिद्धं सकललोकोपभोग्यार्थजनकत्वेन द्रव्यगुणकर्मजन्यत्वेन चास्याखिलार्थविशेषणत्वसम्भवात् । अतीताद्य[14]तीन्द्रियकालादेरिवास्यापि विशेषणग्रहणप्रवृत्तचक्षुरादिना ग्रहणोपपत्तेः कथं धर्मे प्रत्यक्षस्या[15]निमित्तत्व[16]साधने प्रसङ्गविपर्ययसम्भवः? प्रश्ना[17]दिमन्त्रा[18]दिना च संस्कृतं चक्षुर्यथा कालविप्रकृष्टार्थस्य द्रव्यविशेषसंस्कृतं च निर्जीविका[19]दिचक्षुर्जलाद्यन्तरितार्थस्य ग्राहकं दृष्टम्, तथा पुण्यविशेषसंस्कृतं[20] सूक्ष्माद्यशेषार्थग्राहि भविष्यतीति न कश्चिद्दृष्टस्वभावातिक्रमः । 'स्वात्मनि च यावद्भिः कारणैर्जनितं यथाभूतार्थग्राहि प्रत्यक्षं प्रतिपन्नं तथा सर्वत्र सर्वदा प्राण्यन्तरेपि' इति नियमे नक्तञ्चराणामनालोकान्ध-

---

१ ज्ञाने । २ वराहः पिपीलिका । ३ अनिन्द्रियमादिपदेन । ४ धर्मस्य । ५ देवदत्तलक्षणे । ६ मीमांसकेन । ७ स्वभावादिरादिपदेन । ८ पूर्वप्रमाणगृहीतेऽर्थे देवदत्तलक्षणे । ९ प्रत्यभिज्ञायाः । १० परिज्ञातम् । ११ प्रत्यभिज्ञानस्य । १२ भवता । १३ योगजधर्मकारणधर्मोपलम्भे । १४ अनागतमादिपदेन । १५ सर्वज्ञज्ञानस्य । १६ अग्राहकत्वसाधने । १७ आदिपदेन संज्ञा । १८ तन्त्रमादिपदेन । १९ कर्णधार । २० योगिचक्षुः ।

कारव्यवहितरूपाद्युपलम्भो न स्यात्स्वात्मनि तथाऽनुपलम्भात्। प्राण्यन्तरे स्वात्मन्यनुपलब्धस्यानालोकान्धकारव्यवहितरूपाद्युपलम्भलक्षणातिशयस्य सम्भवे सूक्ष्माद्युपलम्भलक्षणातिशयोपि स्यात्। जात्यन्तरत्वं चोभयत्र समानम्। अभ्युपगम्य चाक्षजत्वं सर्वज्ञज्ञानस्यातीन्द्रियार्थसाक्षात्कारित्वं समर्थितं नार्थतः, 5 तज्ज्ञानस्य घातिकर्मचतुष्टयक्षयोद्भूतत्वात्।

यच्चास्य ज्ञानं चक्षुरादिजनितं वेत्याद्यभिहितम्; तदप्यचारु; चक्षुरादिजन्यत्वेऽप्यनन्तरं धर्मादिग्राहकत्वाविरोधस्योक्तत्वात्।

यच्चाऽभ्यासजनितत्वेऽभ्यासो हीत्याद्युक्तम्; तदप्ययुक्तम्; "उत्पादव्ययध्रौव्ययुक्तं सत्" [तत्त्वार्थसू० ५।३०] इत्यखिलार्थ- 10 विषयोपदेशस्याविसंवादिनो ज्ञानस्य च सामान्यतः सम्भवात्। न च तज्ज्ञानवत एवाशेषज्ञत्वाद्व्यर्थोऽभ्यासः; तस्य सामान्यतोऽस्पष्टरूपस्यैवाविर्भावात्, अभ्यासस्य तत्प्रतिबन्धकापायसहायस्याशेषविशेषविषयस्पष्टज्ञानोत्पत्तौ व्यापारात्। नाप्यन्योन्याश्रयः; अभ्यासादेर्वाखिलार्थविषयस्पष्टज्ञानोत्पत्तेरनभ्युपगमात्। 15

शब्दप्रभवपक्षेप्यन्योन्याश्रयानुषङ्गोऽसङ्गतः; कारकपक्षे तदसम्भवात्। पूर्वसर्वज्ञप्रणीतागमप्रभवं ह्येतस्याशेषार्थज्ञानम्, तस्याप्यन्यसर्वज्ञागमप्रभवम्। न चैवमनवस्थादोषानुषङ्गः; बीजाङ्कुरवदनादित्वेनाभ्युपगमादागमसर्वज्ञपरम्परायाः।

यच्चानुमानाविर्भावितत्वपक्षे सम्बन्धासिद्धेरित्युक्तम्; तदसमीचनम्; प्रमाणान्तरात्सम्बन्धसिद्धेरभ्युपगमात्। न खलु कश्चित्तस्यागोचरोस्ति सर्वत्रेन्द्रियातीन्द्रियविषये प्रवृत्तेरन्यथा तत्रानुमानाप्रवृत्तिप्रसङ्गात्, तस्य तन्निबन्धनत्वात्। 20

यच्चानुमानागमज्ञानस्य चास्पष्टत्वादित्यभिहितम्; तदप्यसमीक्षिताभिधानम्; न हि सर्वथा कारणसदृशमेव कार्यं विलक्षणस्याप्यङ्कुरादेर्बीजादेरुत्पत्तिदर्शनात्। सर्वत्र हि सामग्रीभेदात्कार्यभेदः। अत्राप्यागमादिज्ञानेनाभ्यासप्रतिबन्धकापायादिसामग्रीसहायेनासादिताशेषविशेषवैशद्यं विज्ञानमाविर्भाव्यते। 25

भावनाबलाद्वैशद्ये कामाद्युपप्लुतज्ञानवत्तस्याप्युपप्लुतत्वप्रसङ्गः;

१ नक्तञ्चरादौ सर्वज्ञलक्षणे प्राण्यन्तरे च। २ परमार्थतः। ३ सर्वज्ञस्य। ४ पुरुषस्य। ५ अशेषविशेषविषयस्पष्टज्ञान। ६ केवलात्। ७ जैनैः। ८ उत्तरसर्वज्ञस्य। ९ तर्कलक्षणात्। १० इन्द्रियातीन्द्रियाविषये प्रवृत्तिर्न स्याद्यदि। ११ सर्वज्ञे। १२ आदिपदेनानुमानम्। १३ आदिपदेन देशकालादि। १४ अशेषज्ञानस्य।

इत्यप्यसाम्प्रतम्; यतो 'भावनाबलाद् ज्ञानं वैशद्यमनुभवति' इत्येतावन्मात्रेण तज्ज्ञानस्य दृष्टान्तोपपत्तेः। न चाशेषदृष्टान्तधर्माणां साध्यधर्मिण्यापादनं युक्तं सकलानुमानोच्छेदप्रसङ्गात्। न चाशेषज्ञज्ञानं क्रमेणाशेषार्थग्राहीष्यते येन तत्पक्षनिक्षिप्तदोषोपनिपातः; सकलावरणपरिक्षये सहस्रकिरणवद्युगपन्निखिलार्थोद्द्योतनस्वभावत्वात्तस्य कारणक्रमव्यवधानातिवर्त्तित्वाच्च।

यच्चोक्तम्-युगपत्परस्परविरुद्धशीतोष्णाद्यर्थानामेकत्र ज्ञाने प्रतिभासासम्भवः; तदप्यसारम्; तत्र हि तेषामभावादप्रतिभासः, ज्ञानस्यासामर्थ्याद्वा? न तावदभावात्; शीतोष्णाद्यर्थानां सकृत्सम्भवात्। ज्ञानस्यासामर्थ्यादित्यसत्; परस्परविरुद्धानामन्धकारोद्द्योतादीनामेकत्र ज्ञाने युगपत्प्रतिभाससंवेदनात्। सकृदेकत्र विरुद्धार्थानां प्रतिभासासम्भवे 'यत्कृतकं तदनित्यम्' इत्यादिव्याप्तिश्च न स्यात्, साध्यसाधनरूपतया तयोर्विरुद्धत्वसम्भवात्। नाप्येकत्र तेषां प्रतिभासे तज्ज्ञानस्य प्रतिनियतार्थग्राहकत्वविरोधः; अन्धकारोद्द्योतादिविरुद्धार्थग्राहिणोऽपि प्रतिनियतार्थग्राहकत्वप्रतीतेः।

यच्चान्यदुक्तम्-एकक्षण एवाशेषार्थग्रहणाद्द्वितीयक्षणेऽज्ञः स्यात्; तदप्यसम्बद्धम्; यदि हि द्वितीयक्षणेऽर्थानां तज्ज्ञानस्य चाभावस्तदाऽयं दोषः। न चैवम्, अनन्तत्वात्तद्द्वयस्य। पूर्वं हि भाविनोऽर्था भावित्वेनोत्पत्स्यमानतया प्रतिपन्ना न वर्त्तमानत्वेनोत्पन्नतया वा। साप्युत्पन्नता तेषां भवितव्यतया प्रतिपन्ना न भूततया। उत्तरकालं तु तद्विपरीतत्वेन ते प्रतिपन्नाः। यदा हि यद्धर्मविशिष्टं वस्तु तदा तज्ज्ञाने तथैव प्रतिभासते नान्यथा विभ्रमप्रसङ्गात् इति कथं गृहीतग्राहित्वेनाप्यस्याप्रामाण्यम्?

यच्चेदं परस्थरागादिसाक्षात्करणाद्रागादिमानित्युक्तम्; तदप्ययुक्तम्; तथापरिणामो हि तत्त्वकारणं न संवेदनमात्रम्, अन्यथा 'मद्यादिकमेवंविधरसम्' इत्यादिवाक्यात्तच्छ्रोत्रियो यदा प्रतिपद्यते तदाऽस्यापि तद्रसास्वादनदोषः स्यात्। अरसनेन्द्रियजत्वात्तस्यादोषोयम्; इत्यन्यत्रापि समानम्। न हि सर्व-

१ प्राप्नोति। २ सर्वज्ञज्ञाने। ३ जैनैः। ४ भूपदहनाद्यवयविनि। ५ आदिपदेनाहिनकुलादीनां च। ६ कृतकत्वानित्यत्वयोः। ७ अज्ञत्वलक्षणः। ८ भाविनोऽर्थाः। ९ सर्वज्ञज्ञाने। १० उत्पत्स्यमानतादिनिरूपणप्रकारेण। ११ सर्वज्ञज्ञानस्य। १२ रागादिरूपतया। १३ तत्त्वस्य रागादिमत्त्वस्य। १४ जानाति। १५ मद्यादिज्ञानस्य। १६ सर्वज्ञज्ञानेपि।

ज्ञानमिन्द्रियप्रभवं प्रतिज्ञायते । किञ्चाङ्गनालिङ्गनसेवनाद्यभिलाषस्येन्द्रियोद्रेक[1]हेतोराविर्भावाद्रागादिमत्त्वं प्रसिद्धम् । न चासौ प्रक्षीणमोहे भगवत्यस्तीति कथं रागादिमत्त्वस्याशङ्कापि ।

यदप्यभिहितम्-कथं चातीतादेर्ग्रहणं तत्स्वरूपासम्भवादित्यादि; तदप्यसारम्; यतोऽतीता[2]देरतीतादिकालसम्बन्धित्वेनासत्त्वम्, तज्ज्ञानकालसम्बन्धित्वेन वा? नाद्यः पक्षो युक्तः; वर्त्तमानकालसम्बन्धित्वेन वर्त्तमानस्येव स्वकालसम्बन्धित्वेनातीतादेरपि सत्त्वसम्भवात् । वर्त्तमानकालसम्बन्धित्वेन त्वतीतादेरसत्त्वमभिमत[3]मेव, तत्कालसम्बन्धित्वतत्[4]सत्त्वयोः परस्परं भेदात् । न चैतत्कालसम्बन्धित्वेनासत्त्वे स्वकालसम्बन्धित्वेनाप्यतीतादेरसत्त्वम्; वर्त्तमान[5]कालसम्बन्धिनोऽप्यतीतादिकालसम्बन्धित्वेनासत्त्वात् तस्याप्यसत्त्वप्रसङ्गात् सकलशून्यतानुषङ्गः । न चातीतादेः सत्त्वेन ग्रहणे वर्त्तमानत्वानुषङ्गः; स्व[6]कालनियतसत्त्वरूपतयैव तस्य ग्रहणात् । ननु चातीतादेस्तज्ज्ञान[7]काले असन्निधानात्कथं प्रतिभासः, सन्निधाने वा वर्त्तमानत्वप्रसङ्गः प्रसिद्धवर्त्तमानवत्; इत्यपि मन्त्रादिसंस्कृतलोचनादिज्ञानेन व्याप्तिज्ञानेन च प्रागेव कृतोत्तरम् ।

अथोच्यते—'पूर्वं प[8]श्चाद्वा यदि क्व[9]चित्कदाचिन्निखिलदर्शिनो विज्ञानं विश्रा[10]न्तं तर्हि तावन्मात्रत्वात्संसारस्य कुतोऽनाद्यनन्तता? अथ न विश्रान्तं तर्हि नानेकयुगसहस्रेणापि सकलसंसारसाक्षात्करणम्' इति; तदप्युक्तिमात्रम्; यतः किमिदं विश्रान्तत्वं नाम? किं किञ्चित्परिच्छेद्याऽपरस्यापरिच्छेदः, सकलविष[11]यदेशकालगमनासामर्थ्यादर्था[12]न्तरेऽवस्थानं वा, क्वचिद्विषये उत्पद्य विनाशो वा? न तावदाद्यविकल्पो युक्तः; अन[13]भ्युपगमात् । न खलु सर्वज्ञज्ञानं क्रमेणार्थपरिच्छेदकम्, युगपदशेषार्थोद्द्योतकत्वात्तस्येत्युक्तम् । द्वितीयविकल्पोऽप्यन[14]भ्युपगमादेवायुक्तः । न हि विषयस्य देशं कालं वा गत्वा ज्ञानं तत्परिच्छेदकमिति केनाप्यभ्युपगतम्, अप्राप्यकारिणस्तस्य क्वचिद्गमनाभावात् । केवलं यथाऽनाद्यनन्तरूपतया स्थितोऽर्थस्तथैव तत्प्रतिपद्यते । तृतीयविकल्पोऽप्ययुक्तः; क्वचिद्विषये तस्यो[15]त्पन्नस्यात्मस्वभावतया विनाशासम्भवात् । न हि स्वभावो भा[16]वस्य विनश्यति स्फटिकस्य

१ बसः । २ अर्थस्य । ३ जैनानाम् । ४ तस्यातीतार्थस्य । ५ अन्यथा । ६ अतीतकाल । ७ वर्त्तमानज्ञानकाले । ८ उत्तरत्र । ९ अर्थे । १० समाप्तम् । ११ ता । १२ कस्मिंश्चिद्वस्तुनि । १३ जैनानाम् । १४ जैनानाम् । १५ ज्ञानस्य । १६ पदार्थस्य ।

स्वच्छतादिवत्, अन्यथा तस्याप्यभावः स्यात् । औपाधिकमेव हि रूपं नश्यति यथा तस्यैव रक्तिमादि[1]। कथं चैवंवादिनो[2] वेदस्यानाद्यनन्ततप्रतिपत्तिस्तत्राप्युक्तविकल्पानामवतारात्[3]? कथं वा[4] साध्यसाधनयोः साकल्येन व्याप्तिप्रतिपत्तिः, सामान्येन[5] व्याप्ति-
५ प्रतिपत्तावप्यनाद्यनन्तसामान्यप्रतिपत्तावुक्तदोषानुषङ्ग[6] एव ।

यच्चोक्तम्–'कथं चासौ[7] तत्कालेप्यऽसर्वज्ञैर्ज्ञातुं शक्यते? तदपि फल्गुप्रायम्; विषयापरिज्ञाने[8] विषयिणोप्यपरिज्ञानाभ्युपगमे[9][10] कथं जैमिन्यादेः सकलवेदार्थपरिज्ञाननिश्चयोऽसकलवेदार्थविदाम्[11]? तदनिश्चये च कथं तद्व्याख्यातार्थाश्रयणादग्निहोत्रादावनुष्ठाने
१० प्रवृत्तिः? कथं वा व्याकरणादिसकलशास्त्रार्थापरिज्ञाने तदर्थज्ञता-निश्चयो व्यवहारिणाम्? यतो व्यवहारप्रवृत्तिः स्यात् ।

सुनिश्चितासम्भवद्बाधकप्रमाणत्वाच्चाशेषार्थवेदिनो[12] भगवतः सत्त्वसिद्धिः । न चेदमसिद्धम्; तथाहि—सर्वविदोऽभावः प्रत्यक्षेणाधिगम्यः, प्रमाणान्तरेण वा? न तावत्प्रत्यक्षेण; तद्धि सर्वत्र
१५ सर्वदा सर्वः सर्वज्ञो न भवतीत्येवं प्रवर्त्तते, कचित्कदाचित्कश्चिद्वा? प्रथमपक्षे न सर्वज्ञाभावस्तज्ज्ञानवत एवाशेषज्ञत्वात् । न हि सकलदेशकालाश्रितपुरुषपरिषत्साक्षात्करणमन्तरेण प्रत्यक्षतस्तदाधारमसर्वज्ञत्वं प्रत्येतुं शक्यम् । द्वितीयपक्षे तु न सर्वथा सर्वज्ञाभावसिद्धिः ।

२० अथ न प्रवर्त्तमानं प्रत्यक्षं[13] सर्वज्ञाभावसाधकं किन्तु निवर्त्तमानम् । ननु कारणस्य[14] व्यापकस्य[15] वा निवृत्तौ[16] कार्यस्य व्याप्यस्य[17] वा निवृत्तिः प्रसिद्धा नान्यनिवृत्तावन्यनिवृत्तिरतिप्रसङ्गात्[18][19][20] । न चाशेषज्ञस्य प्रत्यक्षं कारणं व्यापकं वा येन तन्निवृत्तौ सर्वज्ञस्यापि निवृत्तिः । न चैवं[22] घटाद्यभावासिद्धिः एकज्ञानसंसर्गिपदार्थो-

१ जपाकुसुमादिजनितम् । २ सर्वज्ञज्ञानस्य कचिद्विश्रान्तत्वान्न सर्वज्ञत्वमित्येवं वादिनः । ३ वेदस्यानाद्यनन्ततामाहकं जैमिन्यादिज्ञानं कचिद्विश्रान्तमित्यादि । ४ किञ्च । ५ व्याप्तिर्विशेषतः प्रत्येतुं नायाति व्यक्तीनामानन्त्यात् । अतः सामान्येनेत्युक्तम् । ६ सामान्यमनाद्यनन्तमीदृशसामान्यस्य ग्राहकं व्याप्तिज्ञानं कचिद्विश्रान्तं न वेत्यादि । ७ सर्वज्ञः । ८ सर्वज्ञ । ९ अर्थे । १० ज्ञानस्य । ११ मत्सदृशाम् । १२ स्वात्मनि सुखादिवत् । १३ अस्मदादेः । १४ अग्न्यादेः । १५ वृक्षत्वस्य । १६ धूमादेः । १७ शिंशपात्वस्य । १८ अकारणस्याऽव्यापकस्य वा । १९ अकार्यस्याऽव्याप्यस्य वा । २० घटनिवृत्तौ पटनिवृत्तिप्रसङ्गात् । २१ अस्मदादेः । २२ सर्वज्ञाभावासिद्धि-प्रकारेण । कथम्? न प्रवर्त्तमानं प्रत्यक्षं घटाभावसाधकं किन्तु निवर्त्तमानमित्युक्ते ननु कारणस्येत्यादिग्रन्थो निवृत्तिपर्यन्तः । किन्तु सर्वज्ञपदस्थाने घटपदं पठनीयम् ।

न्तरोपलम्भात् क्वचित्तत्सिद्धेः । न चात्राप्ययं न्यायः समानस्त-त्संसर्गिण एव कस्यचिदभावत्, अन्यथा सर्वत्र तदभावविरोधो घटादिवत् । तन्न प्रत्यक्षणाधिगम्यस्तदभावः ।

नाप्यनुमानेन; विवादाध्यासितः पुरुषः सर्वज्ञो न भवति वक्तृत्वाद्रथ्यापुरुषवदित्यनुमाने हि प्रमाणान्तरसंवादिनोऽर्थस्य वक्तृत्वं हेतुः, तद्विपरीतस्य वा स्यात्, वक्तृत्वमात्रं वा? प्रथमपक्षे विरुद्धो हेतुः; प्रमाणान्तरसंवादिसूक्ष्माद्यर्थवक्तृत्वस्याशेषज्ञ एव भावात् । द्वितीयपक्षे तु सिद्धसाधनम्; तथाभूतस्य वक्तुरसर्वज्ञत्वेनास्माभिरभ्युपगमात् । वक्तृत्वमात्रस्य तु हेतोः साध्यविपर्ययेण सर्वज्ञत्वेनानुपलब्धेन सह सहानवस्थानपरस्परपरिहारस्थितिलक्षणविरोधासिद्धेस्ततो व्यावृत्त्यभावान्न स्वसाध्यनियतत्वं यतो गमकत्वं स्यात् । सर्वज्ञे वक्तृत्वस्यानुपलब्धेस्ततो व्यावृत्तिरित्यप्यसम्यक्; सर्वसम्बन्धिनोऽनुपलम्भस्यासिद्धेः, तेनैव सर्वज्ञान्तरेण वा तत्र तस्योपलम्भसम्भवात् । सर्वज्ञस्य कस्यचिदभावात्सर्वसम्बन्धिनोऽनुपलम्भस्य सिद्धिरित्यसङ्गतम्, प्रमाणान्तरात्तत्सिद्धावस्य वैयर्थ्यात् । अतः सिद्धौ चक्रकानुषङ्गः । नापि स्वसम्बन्धिनोऽनुपलम्भात्तद्व्यतिरेकनिश्चयः; अस्य परचेतोवृत्तिविशेषैरनैकान्तिकत्वात् ।

न चाखिलसाधनेषु दोषस्यास्य समानत्वान्निखिलानुमानोच्छेदः, तत्र विपक्षव्यावृत्तिनिमित्तस्यानुपलम्भव्यतिरेकेण प्रमाणान्तरस्य भावात् । न चात्र कार्यकारणभावः प्रसिद्धः; असर्वज्ञत्वधर्मानुविधानाभावाद्वचनस्य । यद्धि यत्कार्यं तत्तद्धर्मानुविधायि प्रसिद्धं वह्न्यादिसामग्र्यागतसुरभिगन्धाद्यनुविधायिधूम-

१ भूतल । २ घटाद्यभाव । ३ सर्वज्ञेपि । ४ एकज्ञानसंसर्गिपदार्थान्तरोपलम्भात् क्वचिद् घटाभावप्रतिपत्तिलक्षणः । ५ प्रदेशस्य । ६ एकज्ञानसंसर्गिकोपि कश्चित्प्रदेशो भवेद्यदि । ७ आदिपदेनान्तरितं दूरम् । ८ जैनैः । ९ सर्वज्ञाभाव । १० अतश्च सन्दिग्धविपक्षव्यावृत्तिको हेतुः । ११ वक्तृत्वमात्रस्य । १२ अविनाभूतत्वम् । १३ वक्तृत्वस्य । १४ प्रकृतसर्वज्ञेन । १५ प्रकृतानुमानस्य । १६ वक्तृत्वानुमानस्य । १७ वक्तृत्वानुमानात्सर्वज्ञाभावसिद्धिस्तत्सिद्धौ च सर्वज्ञात्साधनस्य व्यावृत्तिसिद्धिरतश्चानुमानमिति । १८ वक्तृत्वस्य । १९ सर्वज्ञलक्षणाद्विपक्षाद् व्यावृत्तिनिश्चयः । २० अभावसाध्यसाधकानां निखिलसाधनानां पक्षेनुपलम्भः सर्वसम्बन्धी आत्मसंबन्धीवेत्याद्युक्ते असिद्धानैकान्तिकत्वलक्षणस्य । २१ यत्राग्निर्नास्ति तत्र धूमोपि नास्ति । २२ ऊहस्य । २३ वक्तृत्वासर्वज्ञत्वयोः । २४ यतः । २५ वचनमसर्वज्ञकार्यं न भवति तद्धर्मानुविधानाभावात् । २६ सन्दिग्धानैकान्तिकत्वे सतीदमाह । २७ यतः । २८ आदिपदेन श्रीगन्ध ।

वत् । तथाहि असर्वज्ञत्वं सर्वज्ञत्वादन्यत्पर्युदासवृत्त्या किञ्चिज्ज्ञत्वमभिधीयते । न च तत्तरतमभावाद्वचनस्य तथाभावो दृश्यते तद्विप्रकृष्टमत्यल्पज्ञानेषु कृम्यादिषु, न च तत्र वचनप्रवृत्तेः प्रकर्षो दृश्यते । अथ प्रसज्यप्रतिषेधवृत्त्या सर्वज्ञत्वाभावोऽसर्वज्ञत्वं
५ तत्कार्यं वचनम्; तर्हि ज्ञानरहिते मृतशरीरादौ तस्योपलम्भप्रसङ्गो ज्ञानातिशयवत्सु चाखिलशास्त्रव्याख्यातृषु वचनातिशयोपलम्भो न स्यात् । न चैवम्, ततो ज्ञानप्रकर्षतरतमाद्यनुविधानदर्शनात्तस्य तत्कार्यता सातिशयतक्षादिकारणधर्मानुविधायिप्रासादादिकार्यविशेषवत् । तन्नानुमानात्तदभावसिद्धिः ।

१० नाप्यागमात्, स हि तत्प्रणीतः, अन्यप्रणीतः, अपौरुषेयो वा तदभावसाधकः स्यात्? तत्र यद्यागमप्रणेता सकलं सकलज्ञविकलं साक्षात्प्रतिपद्यते युक्तोसौ तत्र प्रमाणम्, किन्तु विद्यमानोपि न प्रकृतार्थोपयोगी, तथा प्रतिपद्यमानस्य तस्यैवाशेषज्ञत्वात् । न प्रतिपद्यते चेत्; तर्हि रथ्यापुरुषप्रणीतागमवन्नासौ
१५ तत्र प्रमाणम् । न ह्यविदितार्थस्वरूपस्य प्रणेतुः प्रमाणभूतागमप्रणयनं नामातिप्रसङ्गात् । द्वितीयविकल्पेप्येतदेव वक्तव्यम् ।

अपौरुषेयोप्यागमो जैमिन्यादिभ्यो यदि सर्वत्र सर्वदा सर्वज्ञाभावं प्रतिपादयेत्तर्हि सर्वेभ्यः प्रतिपादयेन् केनचिन् सह प्रत्यासत्तिविप्रकर्षविरहात् । तथा च—

२० "विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतः पात् ।" [श्वेताश्वत० ३।३]

स वेत्ति विश्वं न हि तस्य वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ।" [श्वेताश्वत० ३।१९] "हिरण्यगर्भ" [ऋग्वेद अष्ट० ८ मं० १० सू० १२१] प्रकृत्य "सर्वज्ञः" इत्यादौ न न कस्यचिद्वि-
२५ प्रतिपत्तिः स्यात्—'किमनेन सर्वज्ञः प्रतिपाद्यते कर्मविशेषो वा स्तूयते' इति । न खलु प्रदीपप्रकाशिते घटादौ कस्यचिद्विप्रतिपत्तिः—'किमयं घटः पटो वा' इति । न च स्वरू-

१ यदि । २ सर्वथा ज्ञानाभावः । ३ ज्ञानातिशय । ४ यमः । ५ सातिशयत्व । ६ सर्वसकलज्ञविकलत्वे । ७ सर्वज्ञाभावलक्षणेऽर्थे । ८ सर्वज्ञाभावे । ९ रथ्यापुरुषस्य प्रमाणभूतागमप्रणेतृत्वं स्यात् । १० मीमांसकेन नैयायिकादिना च । ११ प्रस्तुत्य । १२ वेदवाक्येन । १३ यागलक्षणः ।

1 'सम्बाहुभ्यां धमति सम्पतत्रैः द्यावाभूमी जनयन् देव एकः' इत्युत्तरार्द्धम् ।
2 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः' इति पूर्वार्द्धम् ।

पेऽस्याप्रामाण्यम्। अविसंवादो हि प्रमाणलक्षणं कार्ये स्वरूपे वार्थे, नान्यत्। यत्र सोऽस्ति तत्प्रमाणम्। न चाशेषज्ञाभावावेदकं किञ्चिद्वेदवाक्यमस्ति, तत्सद्भावावेदकस्यैव श्रुतेः। तन्नागमादप्यस्याभावसिद्धिः।

नाप्युपमानात्; तत्खलूपमानोपमेययोरध्यक्षत्वे सति सादृ- ५ श्यावलम्बनमुदयमासादयति नान्यथा। न चात्रत्येदानीन्तनोपमानभूताशेषपुरुषप्रत्यक्षत्वम् उपमेयभूताशेषान्यदेशकालपुरुषप्रत्यक्षत्वं चाभ्युपगम्यते; सर्वज्ञसिद्धिप्रसङ्गात्, निखिलार्थप्रत्यक्षत्वमन्तरेणाशेषपुरुषपरिषत्साक्षात्कारित्वासम्भवात्।

नाप्यर्थापत्तेस्तदभावावगमः; सर्वज्ञाभावमन्तरेणानुपजायमा- १० नस्य प्रमाणपञ्चकविज्ञातस्य कस्यचिदर्थस्यासम्भवात्। वेदप्रामाण्यस्य गुणवत्पुरुषप्रणीतत्वे सत्येव भावात्। अपौरुषेयत्वस्याग्रे विस्तरतो निषेधात्। न चार्थापत्तिरनुमानात्प्रमाणान्तरमित्यग्रे वक्ष्यते। तद्वदत्रापि व्याप्त्यादिचिन्तायां दोषान्तरं चापादनीयम्।

नाप्यभावप्रमाणात्तदभावसिद्धिः; तस्यासिद्धेः, तदसिद्धिश्चा- १५ भावप्रमाणलक्षणस्य

"प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते।
सात्मनोऽपरिणामो वा विज्ञानं वान्यवस्तुनि॥"
[मी० श्लो० अभावप० श्लो० ११]

इत्यादेः प्रागेव विस्तरतो निराकरणात्सिद्धा। इत्यलमतिप्रसङ्गेन। २० न चानुमाने तत्सद्भावावेदके सत्येतत्प्रवर्त्तते—

"प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता॥"
[मी० श्लो० अभावप० श्लो० १]

इत्यभिधानात्। किञ्च, अभावप्रमाणं २५

"गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम्।
मानसं नास्तिताज्ञानं जायतेऽक्षानपेक्षया॥"
[मी० श्लो० अभावप० श्लो० २७]

इति सामग्रीतः प्रादुर्भवति। न चाशेषज्ञनास्तिताधिकरणाखिलदेशकालप्रत्यक्षता कस्यचिदस्त्यतीन्द्रियार्थदर्शित्वप्रसङ्गात्। ३०

---

१ श्रुतिवाक्यस। २ प्रवर्त्तकम्। ३ प्रमाणत्वेनाङ्गीकृतवचनादौ। ४ अभ्युपगम्यते चेत्तर्हि सर्वज्ञो वेदप्रामाण्यान्यथानुपपत्तेः। ५ सपक्षेऽन्वयादि। ६ विचारणायाम्। ७ आश्रयासिद्धिलक्षणाद्दोषादन्यस्सम्बन्धाप्रतिपत्त्यनवस्थेतरेतराश्रयलक्षणं दोषान्तरम्। ८ अभावप्रमाणदूषणविस्तरेण। ९ घटासदंशलक्षणे।

नाप्यशेषज्ञः क्वचित्कदाचित्केनचित्प्रतिपन्नो येनासौ स्मृत्वा निषेध्येत, सर्वत्र सर्वदा तन्निषेधविरोधात्। न च निषेध्यनिषेध्याधारयोरप्रतिपत्तौ निषेधो नामातिप्रसङ्गात्। न ह्यप्रतिपन्ने भूतले घटे च घटनिषेधो घटते। यथा चाभावप्रमाणस्योत्पत्तिः स्वरूपं विषयो ५ वा न सम्भवति तथा प्राक्प्रपञ्चेनोक्तमिति कृतमतिप्रसङ्गेन।

तन्नाभावप्रमाणादप्यशेषज्ञाभावसिद्धिः। तदेवं सिद्धं सुनिश्चितासम्भवद्बाधकप्रमाणत्वमप्यशेषज्ञस्य प्रसाधकम् इत्यलमतिप्रसङ्गेन[1]।

ननु चावरणविश्लेषादशेषवेदिनो विज्ञानं प्रभवतीत्यसाम्प्रतम्; १० तस्यानादिमुक्तत्वेनावरणस्यैवासम्भवादिति[2] चेत्; तदयुक्तम्; अनादिमुक्तत्वस्यासिद्धेः। तथाहि-नेश्वरोऽनादिमुक्तो मुक्तत्वात्तदन्यमुक्तवत्[3]। बन्धापेक्षया च मुक्तव्यपदेशः, तद्रहिते चास्याप्यभावः[4] स्यादाकाशवत्।

ननु चानादिमुक्तत्वं तस्यानादेः क्षित्यादिकार्यपरम्परायाः कर्तृ- १५ त्वात्सिद्धम्। न चास्य तत्कर्तृत्वमसिद्धम्; तथाहि—क्षित्यादिकं बुद्धिमद्धेतुकं कार्यत्वात्, यत्कार्यं तद्बुद्धिमद्धेतुकं दृष्टम् यथा घटादि, कार्यं चेदं क्षित्यादिकम्, तस्माद्बुद्धिमद्धेतुकम्। न चात्र कार्यत्वमसिद्धम्; तथाहि—कार्यं क्षित्यादिकं सावयवत्वात्। यत्सावयवं तत्कार्यं प्रतिपन्नम् यथा प्रासादादि, सावयवं चेदम्, २० तस्मात्कार्यम्।

ननु क्षित्यादिगतात्कार्यत्वात्सावयवत्वाच्चान्यदेव प्रासादादौ कार्यत्वं सावयवत्वं च यदक्रियादर्शिनोपि कृतबुद्ध्युत्पादकम्, ततो दृष्टान्तदृष्टस्य हेतोर्धर्मिण्यभावादसिद्धत्वम्; इत्यसमीक्षिताभिधानम्; यतोऽव्युत्पन्नान्प्रतिपत्तॄनधिकृत्येवमुच्यते, व्युत्प- २५ न्नान्वा? प्रथमपक्षे धूमादावप्यसिद्धत्वप्रसङ्गात्सकलानुमानोच्छेदः। द्वितीयपक्षे तु नासिद्धत्वम्; कार्यत्वादेर्बुद्धिमत्कारणपूर्वकत्वेन प्रतिपन्नाविनाभावस्य क्षित्यादौ प्रसिद्धः पर्वतादौ

---

१ सर्वज्ञसद्भावे प्रमाणोपन्यासविस्तरेण। २ अशेषवेदी सावरणो न भवति अनादिमुक्तत्वात्। यः सावरणः सोऽनादिमुक्तो न भवति यथा स्तम्भादिः। ३ मुक्तो भवति अनादिमुक्तो भवतीति सन्दिग्धानैकान्तिकत्वे सतीदं वक्ष्यमाह। ४ ईश्वरो मुक्तव्यपदेशभाग् न भवति बन्धरहितत्वादाकाशवत्। ५ पुरुषस्य। ६ कार्यत्वस्य सावयवत्वस्य च। ७ प्रासादादौ यदक्रियादर्शिनः कृतबुद्ध्युत्पादकं दृष्टं कार्यत्वं सावयवत्वं वा साधनं तत् क्षित्यादौ नास्तीत्यसिद्धत्वमिति। ८ साध्यसाधनप्रतिपत्तिरहितान्। ९ यथाग्निजो धूमो दृष्टान्ते प्रतिपन्नस्तथाविधस्य दार्ष्टान्तिकेऽभावात्। १० तुः।

धूमादिवत्। दृष्टान्तोपलब्धकार्यत्वादेस्ततो भेदे पर्वतादिधूमान्महानसधूमस्यापि भेदः स्यात्।

ननु कार्यत्वस्य बुद्धिमत्कारणपूर्वकत्वेनाविनाभावोऽसिद्धः, अकृष्टप्रभवैः स्थावरादिभिर्व्यभिचारात्; तन्न; साध्याभावेपि प्रवर्त्तमानो हेतुर्व्यभिचारीत्युच्यते, न च तत्र कर्त्रभावो निश्चितः किन्त्वग्रहणम्। उपलब्धिलक्षणप्राप्तत्वे हि ततः कर्त्तुरभावनिश्चयः, न च तत्तस्येष्यते। ५

अथ क्षित्याद्यन्वयव्यतिरेकानुविधानोपलम्भात्तेषां नातिरिक्तस्य कारणत्वकल्पना अतिप्रसङ्गात्; तर्हि धर्माधर्मयोरपि तत्र कारणता न भवेत्। न च तयोरकारणतैव; तरुतृणादीनां सुखदुःखसाधनत्वाभावप्रसङ्गात्, धर्माधर्मनिरपेक्षोत्पत्तीनां तदसाधनत्वात्। न चैवम्, न हि किञ्चिज्जगत्यस्ति वस्तु यत्साक्षात्परम्परया वा कस्यचित्सुखदुःखसाधनं न स्यात्। १०

ननु क्षित्यादिसामग्रीप्रभवेषु स्थावरादिषु 'बुद्धिमतोऽभावादग्रहणं भावेप्यनुपलब्धिलक्षणप्राप्तत्वाद्वा' इति सन्दिग्धो व्यतिरेकः कार्यत्वस्य; इत्यप्यपेशलम्; सकलानुमानोच्छेदप्रसङ्गात्। यत्र हि वह्नेरदर्शने धूमो दृश्यते तत्र-'किं वह्नेरदर्शनमभावादनुपलब्धिलक्षणप्राप्तत्वाद्वा' इत्यस्यापि सन्दिग्धव्यतिरेकत्वान्न गमकत्वम्। यया सामग्र्या धूमो जन्यमानो दृष्टस्तां नातिवर्त्तते इत्यन्यत्रापि समानम्-कार्यं कर्तृकरणादिपूर्वकं कथं तदतिक्रम्य वर्त्तेतातिप्रसङ्गात्? १५ २०

अनुपलम्भस्तु शरीराद्यभावान्न त्वसत्त्वात्, यत्र हि सशरीरस्य कुलालादेः कर्तृता तत्र प्रत्यक्षेणोपलम्भो युक्तोऽत्र तु चैतन्यमात्रेणोपादानाद्यधिष्ठानान्न प्रत्यक्षप्रवृत्तिः। न च शरीराद्यभावे कर्तृत्वाभावस्तस्य शरीरेणाविनाभावाभावात्। शरीरान्तररहितोपि हि सर्वश्चेतनः स्वशरीरप्रवृत्तिनिवृत्ती करोतीति, प्रयत्नेच्छावशात्तत्प्रवृत्तिनिवृत्तिलक्षणकार्याविरोधे प्रकृतेपि सोस्तु। ज्ञानचिकीर्षाप्रयत्नाधारता हि कर्तृत्वम् न सशरीरेतरता, घटादि- २५

---

१ ता। २ क्षित्यादिगतकार्यत्वादेः(पञ्चमी)। ३ असिद्धत्वे उद्भाविते सकलानुमानोच्छेदः प्रत्युत्तरमित्यर्थः। ४ भूरुहादिभिः। ५ ईश्वरस्य। ६ ईश्वरस्य। ७ कुम्भकारान्वयव्यतिरेकानुविधायिनि घटे तन्तुवायस्य हेतुत्वं स्यात्। ८ कर्तुः। ९ विपक्षव्यावृत्तिः। १० पर्वते। ११ साधनस्य। १२ महानसप्रदेशे। १३ कार्यत्वे। १४ दृष्टम्। १५ घटोपि कुम्भकारहेतुको न स्यात्। १६ ईश्वरस्य। १७ स्थावरादिकार्ये। १८ ज्ञानमात्रेण। १९ कर्तुः। २० प्रेरणात्। २१ स्थावरादौ।

कार्यं कर्तुमजानतः सशरीरस्यापि तत्कर्तृत्वादर्शनात्, जानतोपीच्छापाये तदनुपलम्भात्, इच्छतोपि प्रयत्नाभावे तदसम्भवात्, तत्त्रयमेव कारकप्रयुक्तिं प्रत्यङ्गं न शरीरेतरता।

न च दृष्टान्तेऽनीश्वरासर्वज्ञकृत्रिम[1]ज्ञानवता कार्यत्वं व्याप्तं ५ प्रतिपन्नमित्यत्रापि[2] तथाविधमेवाधिष्ठातारं साधयतीति विशेषविरुद्धता[3] हेतोः इत्यभिधातव्यम्; बुद्धिमत्कारणपूर्वकत्वमात्रस्य साध्यत्वात्। धूमाद्यनुमानेपि चैतत्समानम्-धूमो हि महानसादिदेशसम्बन्धितार्णपार्णादिविशेषाधारेणाग्निना व्याप्तः पर्वतेपि तथाविधमेवाग्निं साधयेदिति विशेषविरुद्धः[4]। देशादिविशेषत्यागेना- १० ग्निमात्रेणास्य व्याप्तेर्न दोषः इत्यन्यत्रापि[5] समानम्।

सर्वज्ञता चास्याशेषकार्यकरणात्सिद्धा। यो हि यत्करोति स तस्योपादानादिकारणकलापं प्रयोजनं चावश्यं जानाति, अन्यथा तत्क्रियाऽयोगात्कुम्भकारादिवत्। तथा "विश्वतश्चक्षुः" [श्वेताश्वतरोप० ३।३] इत्यागमादप्यसौ[6] सिद्धः

१५ "द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर[7][8] एव च।
क्षरः सर्वाणि भूतानि[9] कूटस्थो[10]ऽक्षर उच्यते॥ १॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य[11] बिभर्त्त्य[12]र्व्यय ईश्वरः॥ २॥"
[भगवद्गी० १५।१६-१७]

२० इति व्यासवचनसद्भावाच्च।

न च स्वरूपप्रतिपादकानाम[13]प्रामाण्यम्; प्रमा[14]जनकत्वस्य सद्भावात्। प्रमाजनकत्वेन हि प्रमाणस्य प्रामाण्यं न प्रवृत्तिजनकत्वेन, तच्चेहा[15]स्त्येव। प्रवृत्तिनिवृत्ती तु पुरुषस्य सुखदुःखसाधनत्वाध्यवसाये[16] समर्थस्यार्थित्वाद्भवतः। विधेर[17]ङ्गत्वादमीषां[18] प्रामाण्यं २५ न स्वरूपार्थत्वात्; इत्यसत्; स्वार्थप्रतिपादकत्वेन विध्यङ्गत्वात्[19]। तथाहि-स्तुतेः स्वार्थप्रतिपादकत्वेन प्रवर्तकत्वं निन्दायास्तु निवर्तकत्वम्, अन्यथा[20] हि तेद[21]र्थापरिज्ञाने विहित[22]प्रतिषेधे[23]ष्व-

---

१ अनित्य। २ क्षित्यादौ। ३ नित्यज्ञानेच्छाप्रयत्नवान्विशेषस्तेन। ४ धूमः। ५ ईश्वरे। ६ ईश्वरः। ७ अनित्यः संसारी जीवसमूहः। ८ नित्य ईश्वरः। ९ देहसम्बन्धीनि पृथिव्यादीनि। १० नित्यः। ११ प्रविश्य। १२ विदधाति। १३ वेदवाक्यानाम्। १४ यथार्थानुभवः प्रमा। १५ वेदवाक्ये। १६ सति। १७ प्रवृत्तेः। १८ वेदवाक्यानाम्। १९ वेदवाक्यानाम्। २० वेदवाक्यानां स्वार्थप्रतिपादकत्वेन प्रवर्तकत्वं निवर्तकत्वं वा नास्ति यदि। २१ वेदवाक्य। २२ उपादेय। २३ निषिद्ध।

विशेषेण प्रवृत्तिर्निवृत्तिर्वा स्यात्। तथा[1] विधिवाक्यस्यापि[2] स्वार्थ-प्रतिपादनद्वारेणैव पुरुषप्रेरकत्वं दृष्टमेवं[3] स्वरूपपरेष्वपि[4] वाक्येषु स्यात्[5], वाक्यरूपताया अविशेषाद्विशेषहेतोश्चाभावात्। तथा स्वरूपार्थानाम[6]प्रामाण्ये "मेध्या आपो दर्भः पवित्रममेध्यमशुचि" इत्येवंस्वरूपापरिज्ञाने विध्यङ्गतायामविशेषेण प्रवृत्तिनिवृत्ति-प्रसङ्गः। न चैतदस्ति, मेध्येष्वेव प्रवर्त्तते अमेध्येषु च निवर्त्तते इत्युपलम्भात्।

एवं प्रमाणप्रसिद्धो भगवान् कारुण्याच्छरीरादिसर्गे प्राणिनां प्रवर्त्तते। न चैवं[7] सुखसाधन[8] एव प्राणिसर्गो[9]ऽनुपज्यते; अदृष्टस-हकारिणः कर्तृत्वात्। यस्य[10] यथाविधोऽदृष्टः पुण्यरूपोऽपुण्यरूपो वा तस्य तथाविधफलो[11]पभोगाय तत्सापेक्ष[12]स्तथाविधशरीरादीन्[13]सृ-जतीति। अदृष्टप्रक्षयो हि फलोपभोगं विना न शक्यो विधातुम्।

न चादृष्टादेवा[14]खिलोत्पत्तिरस्तु किं कर्तृकल्पनयेति वाच्यम्[15]; तस्याप्यचेतनतयाधिष्ठात्रपेक्षोपपत्तेः। तथाहि–अदृष्टं चेतनाधि-ष्ठितं[16] कार्ये प्रवर्त्ततेऽचेतनत्वात्तन्त्वादिवत्। न चात्मैवा-धिष्ठायकः[17]; तस्यादृष्टपरमाण्वादिविषयविज्ञानाभावात्। न च (चा)चेतनस्याकस्मात्[18]प्रवृत्तिरुपलब्धा, प्रवृत्तौ वा निष्पन्नेपि कार्ये प्रवर्त्तेत विवेकशून्यत्वात्।

तथा वार्त्तिककारेणापि प्रमाणद्वयं तत्सिद्धये[19]ऽभ्यधायि– "महा[20]भूतादि[21] व्यक्तं[22] चेतनाधिष्ठितं प्राणिनां सुखदुःखनिमित्तं रूपादिमत्त्वात्तुर्यादिवत्। तथा पृथिव्यादीनि महाभूतानि बुद्धि-मत्कारणाधिष्ठितानि स्वासु धारणाद्यासु क्रियासु प्रवर्त्तन्ते-ऽनित्यत्वाद्वास्यादिवत्।" [न्यायवा० पृ० ४६७]

तथा[23]ऽविद्धकर्णेन च–"तनुकरणभुवनोपादानानि[24] चेतनाधि-ष्ठितानि स्वकार्यमारभन्ते रूपादिमत्त्वात्तन्त्वादिवत्।" तथा, "द्वीन्द्रियग्राह्याग्राह्यं विमतिभावा[25]पन्नं बुद्धिमत्कारणपूर्वकं स्वार-

---

१ किञ्च। २ प्रवृत्तिप्रतिपादकस्य। ३ विधिवाक्यप्रकारेण। ४ शब्दार्थे। ५ स्वार्थप्रतिपादकद्वारेण विध्यङ्गता। ६ वेदवाक्यानाम्। ७ कारुण्यात्प्रवर्तनेन। ८ सुखजनकः। ९ प्राणिसम्बन्धी शरीरादिसर्गः। १० प्राणिनः। ११ सुखदुःखादि-जनक। १२ भगवान्। १३ सुखदुःखादिजनकान्। १४ अपि तु न भगवतः। १५ जैनादिभिः। १६ प्रेरितम्। १७ प्रेरकः। १८ कारणं विना। १९ ईशः। २० परमाणुव्यवच्छेदार्थं महदिति पदम्। २१ पृथिव्यादि। २२ कार्यम्। २३ यथा वार्तिककारेणाभ्यधायीति पूर्वेण सम्बन्धः। २४ परमाण्वादिकारणानि। २५ क्षित्यादिकम्।

र्भकावयवसन्निवेशविशिष्टत्वाद् घटादिवत्। वैधर्म्येण परमाणवो यथा" [ ] द्वाभ्यां दर्शनस्पर्शनेन्द्रियाभ्यां ग्राह्यं पृथिव्यप्तेजोलक्षणं त्रिविधं द्रव्यमग्राह्यं वाय्वादिकम्। वायौ हि रूपसंस्काराभावादनुपलब्धिः रूपसंस्कारो रूपसमवायः। द्व्यणुका-
५ दीनां त्वऽमहत्वात्। उक्तं च-"महत्यनेकद्रव्यत्वाद्रूपविशेषाच्च रूपोपलब्धिः" [वैशे० सू० ४।१।६]

प्रशस्तमतिना च; "सर्गादौ पुरुषाणां व्यवहारोऽन्योपदेशपूर्वकः उत्तरकालं प्रबुद्धानां प्रत्यर्थनियतत्वादप्रसिद्धवाग्व्यवहाराणां कुमाराणां गवादिषु प्रत्यर्थनियतो वाग्व्यवहारो यथा
१० मात्राद्युपदेशपूर्वकः" [ ] इति।

उद्द्योतकरेण च; "भुवनहेतवः प्रधानपरमाण्वदृष्टाः स्वकार्योत्पत्तावतिशयवद्बुद्धिमन्तमधिष्ठितारमपेक्षन्ते स्थित्वा प्रवृत्तेस्तन्तुतुर्यादिवत्। तथा, बुद्धिमत्कारणाधिष्ठितं महाभूतादि व्यक्तं सुखदुःखनिमित्तं भवत्यचेतनत्वात्कार्यत्वाद्विनाशित्वाद्रूपादिम-
१५ त्वाद्वा वास्यादिवत्।" [न्यायवा० पृ० ४५७] इत्यनवद्यं भगवतः प्रलयकालेऽप्यलुप्तज्ञानाद्यतिशयस्य साधनम्।

अत्र प्रतिविधीयते-सावयवत्वात्कार्यत्वं क्षित्यादेः प्रसाध्यते। तत्र किमिदं सावयवत्वं नाम? सहावयवैर्वर्त्तमानत्वम्, तैर्जन्यमानत्वं वा, सावयवमिति बुद्धिविषयत्वं वा? प्रथमपक्षे सामा-
२० न्यादिनानेकान्तः; गोत्वादि सामान्यं हि सहावयवैर्वर्त्तते, न च कार्यम्। द्वितीयपक्षेऽप्यसिद्धो हेतुः; परमाण्वाद्यवयवानां प्रत्यक्षतोऽसिद्धौ क्षित्यादेस्तज्जन्यमानत्वस्याप्यसिद्धेः। प्रत्यक्षानुपलम्भसाधनश्च कार्यकारणभावः। द्व्यणुकादिकं स्वपरिमाणादल्पपरिमाणोपेतकारणारब्धं कार्यत्वात्पटादिवदित्यनुमानात्तेषां प्रसिद्धिः;
२० इत्यप्यसमीचीनम्; चक्रकप्रसङ्गात्—परमाणुप्रसिद्धौ हि क्षित्यादे-

---

१ परमाणु। २ रचनाविशेष। ३ व्यतिरेकेण। ४ आदिपदेन द्व्यणुकादिकम्। ५ अनेकद्रव्यत्वाद्रूपविशेषाच्चेत्युच्यमाने द्व्यणुकादौ रूपोपलब्धिः स्यात्तद्व्यवच्छेदार्थं महतीति पदम्। ६ महत्यनेकद्रव्यत्वादित्युच्यमाने वायावपि रूपोपलब्धिः स्यात्तद्व्यवच्छेदार्थं रूपविशेषादित्युक्तम्। ७ सृष्टिप्रारम्भे। ८ आदिपदेन पित्रादि। ९ साङ्ख्योद्देशेनास्य प्रयोगः। १० मीमांसकाद्युद्देशेनास्य पदस्य प्रयोगः। ११ खण्डमुण्डशाबलेयत्वादिस्वव्यक्तिभिः सह वर्तते। १२ नित्यत्वात्तस्य। १३ द्व्यणुकादि। १४ घटमृत्पिण्डादौ कार्यकारणभावः प्रत्यक्षतः सिद्धो द्व्यणुकपरमाण्वादौ तु कार्यकारणभावोऽनुमानादिति भावः। १५ बुद्ध्या (व्यापकत्वान्महत्परिमाणोपेतात्मनः कार्यत्वाद्बुद्ध्यादेः) व्यभिचारपरिहारार्थं द्रव्यत्वे सतीति विशेषणं द्रष्टव्यम्। १६ परमाण्वादीनाम्। १७ त्रिभिरावर्तनं चक्रकदूषणम्।

स्तैर्जन्यमानत्वलक्षणसावयवत्वसिद्धिः, तत्सिद्धौ च कार्यत्वसिद्धिः, ततश्च परमाणुप्रसिद्धिरिति । महापरिमाणोपेतप्रशिथिलावयवकर्पासपिण्डोपादानेन अतिनिविडावयवाल्पपरिमाणोपेतकर्पासपिण्डेन अनेकान्तश्च । बलवत्पुरुषप्रयत्नप्रेरितहस्ताद्यभिघातादवयवक्रियोत्पत्तेः[1] अवयवविभागात् संयोगविनाशात् महाकर्पासपिण्डविनाशः, अल्पकर्पासपिण्डोत्पादस्तु स्वारम्भकावयवकर्मसंयोगविशेषवशादेव भवति; इत्यपि विनाशोत्पादप्रक्रियोद्घोषणमात्रम्[2], प्रमाणतोऽप्रतीतेः । कर्पासद्रव्यं हि महापरिमाणपिण्डाकारपरित्यागेनाल्पपरिमाणपिण्डाकारतयोत्पद्यमानं प्रमाणतः प्रतीयते[3] । आशूत्पत्तेर्भेदानवधारणात्तथा प्रतीतिरित्यप्यसङ्गतम्; सकलभावानां क्षणिकत्वानुषङ्गात् । अभेदाध्यवसायस्तु[4] सदृशापरापरोत्पत्तिविप्रलम्भादित्यनिष्टसिद्धिप्रसङ्गात्[5] । नाप्यागमात्परमाण्वादिप्रसिद्धिस्तत्प्रामाण्याप्रसिद्धेः ।

सावयवमिति बुद्धिविषयत्वमपि, आत्मादिनानैकान्तिकं तस्याकार्यत्वेपि तत्प्रसिद्धेः । सावयवार्थसंयोगान्निरवयवत्वेप्यस्य तद्बुद्धिविषयत्वमित्यौपचारिकम्; तदप्यसङ्गतम्; तस्य निरवयवत्वे व्यापित्वविरोधात् परमाणुवत् । तदपि ह्यौपचारिकमेव स्यात् । तदेवं सावयवत्वासिद्धेः कथं ततः क्षित्यादेः कार्यत्वसिद्धिः?

प्रागसतः स्वकारणसमवायात्, सत्तासमवायाद्वा तत्सिद्धिश्चेत्; कुतः प्राक्? कारणसमवायाच्चेत्; तत्समवायसमये प्रागिवास्य स्वरूपसत्त्वस्याभावः, न वा? अभावे 'प्राक्' इति विशेषणमनर्थकम् । कार्यस्य हि कारणसमवायसमये स्वरूपेण सत्त्वसम्भवे तद्वत्प्रागपि सत्त्वे कार्यता न स्यात् । ततः प्रागित्यर्थवत्स्यात् । प्रागिव तत्समवायसमयेप्यस्य स्वरूपसत्त्वाभावे तु 'असतः' इत्येवाभिधातव्यम् । न चासतः कारणसमवायः; खरविषाणादेरपि तत्प्रसङ्गात् । न चास्य कारणाभावान्न तत्प्रसङ्गः; इत्यभिधातव्यम्; क्षित्यादेरपि तदभावप्रसङ्गादसत्त्वाविशेषात् । क्षित्यादेः कारणोपलम्भान्न दोषः; इत्यप्यसारम्; कार्यकारणयोरुपलम्भे हीदमस्य कारणं कार्यं चेदमिति प्रति(वि)भागः स्यात् । न च प्रत्यक्षतः क्षित्यादेरुपलम्भोऽसतस्तस्य तज्जनकत्वविरोधात्

१ क्रिया । २ कथनमात्रम् । ३ पूर्वपिण्डविनाश एवोत्तरपिण्डोत्पत्तिरित्यभेदतया । ४ आशुवृत्तेः । ५ विसंवादात् । ६ क्षित्यादिकं कार्यं सावयवत्वादित्यस्य । ७ आदिपदेनाकाशादिना । ८ शरीरादिमूर्त्तिमद्भिः । ९ परमाणु । १० इह तन्तुषु पटसमवायो यथा । ११ क्षित्यादिकार्यत्वस्य । १२ क्षित्यादिकार्यत्वस्य । १३ नासतः इति विशेषणम् । १४ कारण । १५ न प्रागिति । १६ परेण त्वया ।

खरविषाणवत् । न चाजनकं[1] विषयः[2], उपलम्भ[3]कारणमुपलम्भ[4]-विषय[5] इत्यभ्युपगमात् ।

प्रागसतः[6] सत्तासम्बन्धेऽप्येतत्सर्वं[7] समानम् । न समानम्; खर-शृङ्गादेः क्षित्यादिकार्यस्य, विशेषसम्भवात् । तद्ध्यत्यन्ताऽसत्, क्षित्यादिकं न सन्नाऽप्यसत्[8]सत्तासम्बन्धात्तु सत्; इत्यपि मनोरथमात्रम्; सत्त्वासत्त्वयोरेकत्रैकदा प्रतिषेधविरोधात् । 'न सत्' इत्यभिधानात्तस्य सत्तासम्बन्धात्प्रागभावः स्यात्सत्प्रतिषेधलक्षण-त्वादस्य[9], 'नाप्यसत्' इत्यभिधानात्तु भावः[10], असत्त्वप्रतिषेधरूप-त्वात्तस्य रूपान्तराभावात् । ततोऽसदेव तदभ्युपगन्तव्यम्[11] । तन्नास्य खरशृङ्गादेर्विशेषः ।

किञ्च, सत्ता सती, असती वा ? यद्यऽसती; कथं तया वन्ध्या-सुतयेव सम्बन्धादन्येषां[12] सत्त्वम् ? सती चेत्स्वतः, अन्यसत्तातो वा ? यद्यन्यसत्तातोऽनवस्था । स्वतश्चेत् पदार्थानामपि स्वत एव सत्त्वं स्यादिति व्यर्थं तत्परिकल्पनम् ।

एतेन द्वितीयविकल्पो[13]ऽप्यपास्तः । कार्यस्य हि स्वतः सत्त्वोपगमे किं तत्कल्पनया[14] साध्यम् ? अनवस्थाप्रसङ्गात् । तदेवं कार्यत्वा-सिद्धेरसिद्धो हेतुः ।

किञ्च, कथञ्चित्कार्यत्वं क्षित्यादेः, सर्वथा[15] वा ? सर्वथा चेत्पु-नरप्यसिद्धत्वं द्रव्यतोऽशेषार्थानामकार्यत्वात् । कथञ्चित् चेद्वि-रुद्धत्वम्; सर्वथा बुद्धिमन्निमित्तत्वात्साध्याद्विपरीतस्य कथञ्चि-द्बुद्धिमन्निमित्तत्वस्य साधनात् ।

अनैकान्तिकं च आत्मादिभिः; तेषां बुद्धिमन्निमित्तत्वाभावेपि तत्सम्भवात्[16] । कथञ्चिदप्यकार्यत्वे चैतेषां[17] कार्यकारित्वस्याभाव-स्तस्याऽकर्तृरूपत्यागेन कर्तृरूपोपादानाविनाभावित्वात् । तत्त्या-गोपादानयोश्चैकरूपे[18] वस्तुन्यसम्भवात्सिद्धं कथञ्चित् कार्यत्वं तेषाम् । कर्तृत्वाकर्तृत्वरूपयोरात्मादिभ्योऽर्थान्तरत्वान्न तद्विना-शोत्पादाभ्यां[19] तेषामपि तथाभावो यतः कार्यत्वं स्यात्; इत्यपि

---

१ प्रत्यक्षस्याजनकक्षित्यादिकम् । २ असत्त्वादेवाजनकम् । ३ प्रत्यक्षस्य । ४ प्रत्यक्षकारणं प्रत्यक्षजनकमित्यर्थः । ५ प्रत्यक्षविषयः । ६ प्रागित्यादि । ७ सत्तासम्बन्धवैयर्थ्यप्रसङ्गात् । ८ खरविषाणादेरपि सत्तासम्बन्धप्रसङ्गात् । ९ न सदित्यस्य । १० सद्भावः । ११ परेण । १२ क्षित्यादीनाम् । १३ न चेत्ययम् । १४ कारण-समवायसत्तासमवायकल्पनया । १५ द्रव्यपर्यायाभ्याम् । १६ कार्यत्व । १७ कूटस्थ-नित्यस्यैव । १८ नित्ये । १९ विनाशोत्पादः ।

श्रद्धामात्रम्; तयोस्ततोऽर्थान्तरत्वे सम्बन्धासिद्धिप्रसङ्गात्। समवायादेश्च कृतोत्तरत्वादित्यलमतिप्रसङ्गेन[1]।

बुद्धिमत्कारणमित्यत्र च[2] मत्वर्थस्य साध्यविशेषण[3]स्यानुपपत्तिः। बुद्धिमतो हि बुद्धिर्व्यतिरिक्ता वा, अव्यतिरिक्ता वा? तत्र तस्यास्ततो व्यतिरेकैकान्ते तस्येति सम्बन्धस्याभावः। सा हि तस्य तद्गुणत्वात्, तत्समवायाद्वा, तत्कार्यत्वाद्वा, तदाधेयत्वाद्वा स्यात्? न तावत्तद्गुणत्वात्सा तस्येत्यभिधातव्यम्[4]; ततो व्यतिरेकैकान्ते सा तस्यैव गुणो नाकाशादेरिति व्यवस्थापयितुमशक्तेः। नापि तत्समवायात्; तस्यैवासम्भवात्। सम्भवे वा तस्य ताभ्यां[5] भेदैकान्ते[6] व्यवस्थापकत्वायोगात्सर्वत्राविशेषाच्च[7]। तत्कार्यत्वात्सा तस्येति चेत्; कुतस्तत्कार्यत्वम्? तस्मिन्सति भावात्[8]; आकाशादौ प्रसङ्गः। तदभावेऽभावाच्चेन्न[9]; नित्यव्यापित्वाभ्यां तस्य तदयोगात्। तदाधेयत्वात्सा तस्येति चेत्; किमिदं तदाधेयत्वं नाम? समवायेन तत्र वर्त्तनं चेत्तत्कृतोत्तरम्। तादात्म्येन वर्त्तनं चेन्न; अनभ्युपगमात्। सम्बन्धमात्रेण वर्त्तनं चेत्; तर्हि घटादेर्भूतलादिगुणत्वप्रसङ्गः, सम्बन्धमात्रेण वर्त्तमानस्य तस्य तदाधेयत्वसम्भवात्।

किञ्च, व्याप्त्या[10] तेनास्यास्तत्र वर्त्तनम्, अव्याप्त्या वा? न तावद्व्याप्त्या; आत्मविशेषगुणत्वादस्मदादिबुद्ध्यादिवत्। परममहापरिमाणेन व्यभिचारः; इत्ययुक्तम्; तत्र विशेषगुणत्वाभावात्[11]।[12] नन्वेवमस्मदादिबुद्ध्यादौ[13] सकलार्थग्राहित्वाभावो दृष्टः सोपि तत्र[14] स्यादिति चेत्; अस्तु नाम, दृष्टान्ते व्याप्तिदर्शनमात्रात्सर्वत्र साध्यसिद्धेर्भवताभ्युपगमात्[15]। कथमन्यथा प्रकृतसिद्धिः[16]? यथा चास्मदादिबुद्धिवैलक्षण्यं तद्बुद्धेरदृष्टं[17] परिकल्प्यते[18] तथा घटादौ[19] कर्म[20]कर्त्तृकरण[21]निर्वर्त्यैककार्यत्वं दृष्टं वने वनस्पत्यादिषु चेतनकर्तृरहितमपि स्यादित्यतैर्व्यभिचारो हेतोः। अथाऽव्याप्त्या; तर्हि देशान्तरोत्पत्तिमत्कार्येषु कथं तस्या व्यापारः असन्निधानात्?

---

१ समवायादिसम्बन्धनिराकरणविस्तरेण। २ किञ्च। ३ साध्यं कारणं तस्य विशेषणं बुद्धिमत्। ४ परेण यौगेन। ५ बुद्धिबुद्धिमद्भ्याम्। ६ बुद्धिमत इयं बुद्धिरिति। ७ गगनादौ समवायस्य व्यापकत्वात्। ८ चेत्तर्हि। ९ खमपि सर्वदाऽस्ति यतः। १० सामस्त्येन। ११ आत्मविशेषगुणेन। १२ आकाशगुणत्वात्परममहापरिमाणस्य जैनानाम्। आत्मा तु तेषां देहपरिमाण इति। १३ व्याप्त्या वर्त्तमानत्वप्रतिषेधे। १४ ईश्वरलक्षणे बुद्धिमति। १५ नैयायिकेन। १६ बुद्धिमत्कारणत्वस्य। १७ का। १८ परेण। १९ घट। २० कुम्भकार। २१ चक्रादि।

तथापि व्यापारेऽदृष्टस्याप्यग्न्यादिदेशेऽसन्निहितस्योर्ध्वज्वलनादिहेतुता स्यादिति-"अग्नेरूर्ध्वज्वलनम्" [प्रश० व्यो० पृ० ४११] इत्याद्यात्मसर्वगतत्वसाधनमयुक्तम्। अव्यतिरेकैकान्ते चात्ममात्रं बुद्धिमात्रं वा स्यात्, तत्कथं मत्वर्थः? न हि तदेव तेनैव
५ तद्वद्भवति।

किञ्च, असौ तद्बुद्धिः क्षणिका, अक्षणिका वा? यदि क्षणिका; तदा तस्याः कथं द्वितीयक्षणे प्रादुर्भावः कारणत्रयाधीनत्वात्तस्य? न चेश्वरेऽसमवायिकारणमात्ममनःसंयोगस्तच्छरीरादिकं च निमित्तं कारणमस्ति। कारणत्रयाभावेप्यस्मदादिबुद्धिवैलक्ष-
१० ण्यात्तस्याः प्रादुर्भावे क्षित्यादिकार्यस्य घटादिकार्यवैलक्षण्याद्बुद्धिमत्कारणमन्तरेणाप्युत्पत्तिः किन्न स्यात्? महेश्वरबुद्धिवच्च मुक्तात्मनामप्यानन्दादिकं शरीरादिनिमित्तकारणमन्तरेणाप्युत्पत्स्यत इति कथं बुद्ध्यादिविकलं जडात्मस्वरूपं मुक्तिः स्यात्?

अथाऽक्षणिका तद्बुद्धिः। नन्वत्रापि 'क्षणिकः शब्दोऽस्मदादि-
१५ प्रत्यक्षत्वे सति विभुद्रव्यविशेषगुणत्वात् सुखादिवत्' इत्यत्रानुमानेऽनयैव हेतोरनेकान्तोऽस्या इव विभुद्रव्यविशेषगुणत्वेऽन्यस्यास्मदादिप्रत्यक्षत्वेपि नित्यत्वसम्भवात्। तथा 'क्षणिका महेश्वरबुद्धिर्बुद्धित्वादस्मदादिबुद्धिवत्' इत्यनुमानविरोधश्च। अथ बुद्धित्वाविशेषेपि ईशास्मदादिबुद्ध्योरक्षणिकत्वेतरलक्षणो
२० विशेषः परिकल्प्यते तथा घटादिक्षित्यादिकार्ययोरप्यकर्तृकर्तृपूर्वकत्वलक्षणो विशेषः किन्नेष्यते? तथा च कार्यत्वादिहेतोरनेकान्तः। तदेवं बुद्धिमत्त्वासिद्धेः कथं तत्कारणत्वेन कार्यत्वं व्याप्येत?

अस्तु वाऽविचारितरमणीयं बुद्धिमत्कारणत्वव्याप्तं कार्यत्वम्;
२५ तथाप्यत्र यादृग्भूतं बुद्धिमत्कारणत्वेनाऽभिनवकूपप्रासादादौ व्याप्तं कार्यत्वं प्रमाणतः प्रसिद्धं यदक्रियादर्शिनोपि जीर्णकूपप्रासादादौ लौकिकेतरयोः कृतबुद्धिजनकं तादृग्भूतस्य क्षित्यादावसिद्धेरसिद्धो हेतुः। सिद्धौ वा जीर्णकूपप्रासादादाविवाऽ-

---

१ मुक्तस्य। २ अग्नेरूर्ध्वज्वलितमन्नादि, तस्य शुभपचनं भोक्तृदेवदत्तादृष्टेनेति। ३ नैयायिकमते आत्मनः सर्वगतत्वात्तद्गुणोऽदृष्टमपि सर्वगतमेवातो देशान्तरे कालान्तरे चान्नपाकपटमुक्ताफलादीन् तद्भोक्तृदेवदत्तादृष्टं तत्र गत्वा सहकारिभूयोत्पादयति। ४ समवाय्यसमवायिनिमित्तेति। ५ समवायिकारणं त्वात्मास्ति। ६ नैयायिकमते। ७ अक्षणिकबुद्धिपक्षेपि। ८ परममहापरिमाणेन व्यभिचारपरिहारार्थमेतत्। ९ परः। १० इतरः परीक्षकः।

क्रियादर्शिनोपि कृतबुद्धिप्रसङ्गः। न च प्रकृत्याऽत्यन्तभिन्नोपि धर्मः शब्दमात्रेणाभेदी हेतुत्वेनोपादीयमानोऽभिमतसाध्यसिद्धये समर्थो भवत्यन्यत्राप्यस्याविरोधेनाशङ्काऽनिवृत्तेः। यथा वल्मीके धर्मिणि कुम्भकारकृतत्वसिद्धये मृद्विकारत्वमात्रं हेतुत्वेनोपादीयमानम्। ५

नन्वेतत्कार्यसमं नाम जात्युत्तरम्। तदुक्तम्—"कार्यत्वान्यत्वलेशेन यत्साध्यासिद्धिदर्शनं तत्कार्यसमम्" [ ] इति। अस्य चासदुत्तरत्वान्नातः प्रकृतसाध्यसिद्धिप्रतिबन्धोऽन्यथा सकलानुमानोच्छेदः। शब्दानित्यत्वे हि साध्ये किं घटादिगतं कृतकत्वं हेतुत्वेनोपादीयते, किं वा शब्दगतम्, उभयगतं वा? १० प्रथमपक्षे हेतोरसिद्धिः; न ह्यन्यगतो धर्मोऽन्यत्र वर्त्तते। द्वितीये तु साधनविकलो दृष्टान्तः। तृतीयेप्युभयदोषानुषङ्गः; इत्यप्यसारम्; कारणमात्रजन्यतालक्षणस्य कृतकत्वस्य विपक्षे बाधकप्रमाणबलादनित्यत्वमात्रव्याप्तत्वेनाऽवधारितस्य शब्देप्युपलम्भात् तत्रोक्तदूषणस्यासदुत्तरत्वाज्जात्युत्तरत्वम्। न चैवं कार्यसामान्यं १५ बुद्धिमत्कारणत्वमात्रव्याप्तं क्षित्यादावुपलभ्यते, विपक्षे बाधकप्रमाणाभावेन सन्दिग्धानैकान्तिकत्वात्तस्य, अन्यथाऽक्रियादर्शिनोपि कृतबुद्धिप्रसङ्गः। यदि च घटादिलक्षणं विशिष्टकार्यं तन्मात्रव्याप्तं प्रतिपद्याऽविशिष्टकार्यस्यापि क्षित्यादेस्तत्पूर्वकत्वं साध्यते; तर्हि पृथ्वीलक्षणभूतस्य रूपरसगन्धस्पर्शवत्त्वं प्रतिपद्य २० भूतत्वादेव वायोरपि तत्साध्यताम्। अथाऽत्र प्रत्यक्षादिप्रमाणबाधः, सोन्यत्रापि समानः।

१ क्षित्यादौ। २ स्वभावेन। ३ कार्यत्वशब्देन। ४ बुद्धिमद्धेतुकत्व। ५ विरुद्धेऽबुद्धिमद्धेतुकत्वादौ। ६ कृतबुद्ध्युत्पादकरूपस्य कार्यस्य। ७ क्षित्यादिकं घटादिवद् बुद्धिमद्धेतुकं सर्वादिवदबुद्धिमद्धेतुकं वेत्याशङ्का। ८ वल्मीकः कुम्भकारकृतो भवति मृद्विकारत्वाद् घटादिवत्। ९ पूर्वोक्तम्। १० भेदलेशः स कीदृशः कृतबुद्ध्यनुत्पादकः। ११ बुद्धिमद्धेतुकत्व। १२ कार्यसमजात्युत्तरात्। १३ घटादिगतकृतकत्वस्य शब्देऽभावात्। १४ शब्दगतकृतकत्वस्य घटादावभावात्। १५ नित्ये। १६ यन्नित्यं तन्न कृतकं यथाऽऽकाशमिति ज्ञानबलात्। १७ बुद्धिमत्कारणरहिते तर्वादौ। १८ बुद्धिमत्कारणरहिते तर्वादौ कार्यसामान्यं वर्तते बुद्धिमत्कारणसहिते घटादौ च कार्यसामान्यं वर्तते। ततः किं बुद्धिमद्धेतुकमबुद्धिमद्धेतुकं वेति सन्दिग्धानैकान्तिकत्वम्। १९ कार्यत्वस्य। २० विपक्षे बाधकं प्रमाणं यदि स्यात्। २१ क्षित्यादौ। २२ दृष्टान्ते इव। २३ अक्रियादर्शिनोपि कृतबुद्ध्युत्पादकत्वमात्रव्याप्तम्। २४ अक्रियादर्शिनः कृतबुद्ध्यनुत्पादकस्य। २५ परेण। २६ क्षित्यादौ बुद्धिमद्धेतुपूर्वकत्वेपि।

यदप्युक्तम्-व्युत्पन्नप्रतिपत्तॄणां नासिद्धत्वं कार्यत्वादेः; तदप्ययुक्तम्; यतः प्रतिबन्धप्रतिपत्तिलक्षणा व्युत्पत्तिस्तेषाम्, तद्व्यतिरिक्ता वा स्यात्? प्रथमपक्षे क्षित्यादिगतकार्यत्वादौ प्रकृतसाध्यसाधनाभिप्रेते व्युत्पत्त्यसम्भवः, यथोक्तसाध्यव्याप्तस्य तत्र तस्याभावात्। भावे वा सशरीरस्यास्मदादीन्द्रियग्राह्यस्यानित्यबुद्ध्यादिधर्मकलापोपेतस्य घटादौ तद्व्यापकत्वेन प्रतिपन्नस्यात्र ततः सिद्धिः। न खलु हेतुव्यापकं विहायाव्यापकस्यात्यन्तविलक्षणसाध्यधर्मस्य धर्मिणि प्रतिपत्तौ हेतोः सामर्थ्यम्। कारणमात्रप्रतिपत्तौ तु सिद्धसाध्यता।

ननु बुद्धिमत्कारणमात्रं ततस्तत्र सिध्यत्पक्षधर्मताबलाद्विशिष्टविशेषाधारमेव सेत्स्यति, निर्विशेषस्य सामान्यस्यासम्भवात्, घटादौ प्रतिपन्नस्य चास्मदादेस्तन्निर्माणासामर्थ्यात्। नन्वेवं क्षित्यादौ बुद्धिमत्कारणत्वासिद्धिरेव स्यादस्मदादेस्तन्निर्माणासामर्थ्यादन्यस्य च हेतुव्यापकत्वेन कदाचनाप्यप्रतिपत्तेः खरविषाणवत्, निराधारस्य च सामान्यस्यासम्भवात्। न हि गोत्वाधारस्य खण्डादिव्यक्तिविशेषस्यासम्भवे तद्विलक्षणमहिष्याद्याश्रितं गोत्वं कुतश्चित्प्रसिद्ध्यति।

अस्मादृशान्यादृशाविशेषपरित्यागेन कर्तृत्वमात्रानुमाने च चेतनेतरविशेषत्यागेन कारणमात्रानुमानं किन्नानुमन्यते? धूममात्रात्पावकमात्रानुमानवत्। यादृशमेव हि पावकमात्रं पैङ्गल्यादिधर्मोपेतं कण्ठाक्षिविक्षेपकादित्वापाण्डुरत्वादिधर्मोपेतधूममात्रस्य प्रत्यक्षानुपलम्भप्रमाणजनितोहाख्यप्रमाणात्सर्वोपसंहारेण व्यापकत्वेन महानसादौ प्रतिपन्नं तादृशस्यैवान्यत्राप्यतोनुमानं नात्यन्तविलक्षणस्य, व्यक्तिसम्बन्धित्वमात्रस्यैव भेदात्। न च व्यक्तीनामप्यात्यन्तिको भेदो महानसादिवदन्यासामपि दृश्यत्वेनोपगमात्। न च कार्यविशेषस्य कर्तृविशेषमन्तरेणानुपलम्भात् तन्मात्रमपि कर्तृविशेषानुमापकं युक्तम्; तस्य कारणत्वमात्रेणवाविनाभावनिश्चयात्, धूममात्रस्याग्निमात्रेणाविनाभावनिश्चयवत्।

---

१ प्रतिबन्धोऽविनाभावः। २ अक्रियादर्शिनोपि कृतबुद्ध्युत्पादकत्वलक्षणे। ३ क्षित्यादौ। ४ कार्यत्व। ५ क्षित्यादौ। ६ अशरीरसर्वज्ञनित्यज्ञानत्वादिलक्षण। ७ प्रोक्तक्षित्यादिके। ८ यतः। ९ क्षित्यादि। १० सर्वज्ञत्वादिधर्मकलापोपेतस्येश्वरस्य। ११ कार्यत्वेति। १२ नेत्रादि। १३ परोक्ष। १४ स्वीकारेण। १५ पर्वतादौ। १६ जलस्य। १७ महानसाख्य। १८ पर्वतादिरूपव्यक्तीनाम्। १९ उनयत्र। २० अक्रियादर्शिनः कृतबुद्ध्युत्पादकलक्षणस्य। २१ बुद्धिमदर्थलक्षण। २२ कार्यमात्रम्। २३ कार्यमात्रस्य।

घटादिलक्षणकार्यविशेषस्य तु कारणविशेषेणाविनाभावावगमः चान्दनादिधूमविशेषस्याग्निविशेषेणाविनाभावावगमवत्। तथापि कार्यमात्रस्य कारणविशेषानुमापकत्वे धूमादिकार्यविशेषस्य महानसादौ तत्कालवन्ह्यविनाभावोपलम्भाद् धूमघटिकादौ तन्मात्रं तत्कालवन्ह्यनुमापकं स्यात्। अथ तत्र तत्कालवन्ह्यनुमाने प्रत्य- ५ क्षविरोधः; सोऽकृष्टजाते भूरुहादौ कर्त्रऽनुमानेपि समानः। तत्कर्तुरतीन्द्रियत्वात्तदविरोधे धूमघटिकादौ वन्हेरप्यतीन्द्रियत्वात्सोस्तु। भास्वररूपसम्बन्ध्यवयविद्रव्यत्वान्नातीन्द्रियत्वं तस्येति चेत्; एतदेव कुतोऽवसितम्? महानसादौ तथाभूतस्यास्योपलम्भाच्चेत्; तर्हि क्षित्यादिकर्तुः शरीरसम्बन्धिनोऽतीन्द्रि- १० यत्वं मा भूत्कुम्भकारादौ तस्यानुपलम्भात्।

ननु वृक्षशाखाभङ्गादौ पिशाचादिः, स्वशरीरावयवप्रेरणे चात्माऽशरीरोऽपि कर्त्तोपलब्धः; इत्यप्यसुन्दरम्; पिशाचादेः शरीरसम्बन्धरहितस्य कार्यकारित्वानुपपत्तेर्मुक्तात्मवत्। तत्सम्बन्धेनैव हि कुम्भकारादौ कार्यकारित्वं दृष्टं नान्यथा। तत्सम्ब- १५ न्धोपगमे चास्य दृश्यत्वप्रसङ्गः कुम्भकारादिवत्। तच्छरीरस्य दृश्यत्वाद्दृश्योसौ न पिशाचादिर्विपर्ययादिति चेत्; ननु शरीरत्वाविशेषेपि यथास्मदादिशरीरविलक्षणं तच्छरीरमभ्युपगम्यते तथा घटादिकार्यविलक्षणं भूरुहादिकार्यं कार्यत्वाविशेषेप्यभ्युपगम्यताम्। तथा चानेन प्रकृतो हेतुर्व्यभिचारी। तथास्मदादेः २० शरीरसम्बन्धमात्रेणैव तदवयवानां प्रेरकत्वोपपत्तेर्नापरशरीरसम्बन्धस्तत्रोपयोगी 'तत्सम्बन्धमन्तरेण हि चेतनस्य स्वशरीरावयवेष्वन्यत्र वा कार्यकारित्वं नास्त्यनुपलम्भात्' इत्येतावन्मात्रमेव नियम्यत इति महेश्वरस्यापि शरीरसम्बन्धेनैव कर्तृत्वमभ्युपगन्तव्यम्। २५

तच्छरीरं च तत्कृतं यद्यभ्युपगम्यते; तर्हि शरीरान्तरं तस्याभ्युपगन्तव्यमित्यनवस्थातः प्रकृतकार्ये तस्याऽव्यापारोऽपरापरशरीरनिर्वर्त्तने एवोपक्षीणशक्तिकत्वात्। तदनिष्पाद्यं चेत्; तत्किं कार्यम्, नित्यं वा? प्रथमपक्षे तेनैव हेतोर्व्यभिचारस्तस्य कार्यत्वेप्यबुद्धिमत्पूर्वकत्वात्। बुद्धिमत्कारणान्तरपूर्वकत्वे चानवस्था, ३० तच्छरीरस्याप्यपरबुद्धिमत्कारणान्तरपूर्वकत्वात्। नित्यं चेत्;

---

१ कार्यविशेषस्यैव कारणविशेषेण व्याप्तिसिद्धावपि। २ गोपालघटिकादौ। ३ गोपालघटिकादौ। ४ अस्मदाद्यात्मा। ५ परेण। ६ ईश्वरस्य। ७ भूरुहादिना। ८ अवयवप्रेरणे। ९ अवयवप्रेरणे। १० तर्हि। ११ परेण। १२ हि। १३ परेण। १४ क्षित्यादिकार्ये।

तर्हि तच्छरीरस्य शरीरत्वाविशेषेपि नित्यत्वलक्षणः स्वभावातिक्रमो यथाभ्युपगम्यते, तथा भूरुहादेः कार्यत्वे सत्यप्यकर्तृपूर्वकत्वलक्षणोप्यभ्युपगम्यताम् इति स एव तैर्व्यभिचारः कार्यत्वादेः। तत्र प्रतिबन्धप्रतिपत्तिलक्षणा व्युत्पत्तिस्तेषाम्।

५ अथ तद्व्यतिरिक्ता व्युत्पत्तिः; सा स्वदुरागमाहितवासनावतां भवतु, न पुनस्तावन्मात्रेण कार्यत्वादेः साध्यं प्रति गमकत्वम्। अन्यथा वेदे मीमांसकस्य वेदाध्ययनवाच्यत्वादेरपौरुषेयत्वं प्रति गमकत्वं स्यात्।

यच्चोक्तम्-'साध्याभावेपि प्रवर्त्तमानो हेतुर्व्यभिचारीत्युच्यते। १० न च तत्र कर्त्रभावो निश्चितः किन्त्वग्रहणम्' इति; तदुक्तिमात्रम्; प्रमाणाविषयत्वेपि स्थावरादौ कर्त्रऽभावानिश्चये गगनादौ रूपाद्यभावानिश्चयः स्यात्। तत्र रूपादीनां बाधकप्रमाणसद्भावेनाभावनिश्चये अत्रापि तथा कर्त्रभावनिश्चयोस्तु। न चास्यानुपलब्धिलक्षणप्राप्तत्वादभावानिश्चयः; शरीरसम्बन्धेन हि कर्तृत्वं नान्यथा १५ मुक्तात्मवत्, तत्सम्बन्धे चोपलब्धिलक्षणप्राप्तत्वप्रसङ्गः कुम्भकारादिवत्। तस्य हि शरीरसम्बन्ध एव दृश्यत्वं नान्यत्, स्वरूपेणात्मनोऽदृश्यत्वात् पिशाचादिशरीरवत्। तच्छरीरस्यादृश्यत्वोपगमे च किञ्चित्कार्यमप्यबुद्धिपूर्वकं स्यादित्युक्तम्।

यत्तूक्तम्-क्षित्याद्यन्वयव्यतिरेकानुविधानात्तेषामेव कारणत्वे २० धर्माधर्मयोरपि तत्र स्यात्; तत्र सूक्तम्; जगद्वैचित्र्यान्यथानुपपत्त्या तयोस्तत्कारणत्वप्रसिद्धेः। भूम्यादेः खलु सकलकार्यं प्रति साधारणत्वात् अदृष्टाख्यविचित्रकारणमन्तरेण तद्वैचित्र्यानुपपत्तिः सिद्धा।

यदप्युक्तम्-तत्र बुद्धिमतोऽभावादग्रहणं भावेप्यनुपलब्धिल- २५ क्षणप्राप्तत्वाद्वेति सन्दिग्धव्यतिरेकित्वे सकलानुमानोच्छेदः। यया सामग्र्या धूमादिर्जन्यमानो दृष्टस्तां नातिवर्त्तत इत्यन्यत्रापि समानम्; तदप्ययुक्तम्; यादृग्भूतं हि घटादिकार्यं यादृग्भूतसामग्रीप्रभवं दृष्टं तादृग्भूतस्यैव तदतिक्रमाभावो नान्यादृग्विधस्य धूमादिवदेवेत्युक्तं प्राक्।

---

१ अनित्यत्वरूपस्वभावस्य। २ पूर्वोक्त एव। ३ स्थावरादिभिः। ४ भूरुहादीनाम्। ५ व्युत्पन्नानाम्। ६ यौग। ७ परेण। ८ कर्तुः। ९ कर्तुः। १० ईश्वरस्य। ११ अशरीरत्वाचस्य। १२ ईश्वर। १३ अक्रियादर्शिनः कृतबुद्ध्युत्पादकम्। १४ चक्रादिरूप। १५ कार्यस्य।

यच्चेदमुक्तम्-ज्ञानचिकीर्षाप्रयत्नाधारता हि कर्तृता न सशरीरेतरता; इत्यप्यसङ्गतम्; शरीराभावे तदाधारत्वस्याप्यसम्भवान्मुक्तात्मवत्। तेषां खलूत्पत्तौ आत्मा समवायिकारणम्, आत्ममनःसंयोगोऽसमवायिकारणम्, शरीरादिकं निमित्तकारणम्। न च कारणत्रयाभावे कार्योत्पत्तिरनभ्युपगमात्। अन्यथा मुक्तात्मनोपि ज्ञानादिगुणोत्पत्तिप्रसङ्गात् "नवानां गुणनामत्यन्तोच्छेदो मुक्तिः" [ ] इत्यस्य व्याघातः। निमित्तकारणमन्तरेणाप्येषामुत्पत्तौ च बुद्धिमत्कारणमन्तरेणाप्यङ्कुरादेः किं नोत्पत्तिः स्यात्? नित्यत्वाभ्युपगमात्तेषामदोषोयमित्ययुक्तम्; प्रमाणविरोधात्। तथाहि-नेश्वरज्ञानादयो नित्यास्तत्त्वादस्मदादिज्ञानादिवत्। तज्ज्ञानादीनां दृष्टस्वभावातिक्रमे भूरुहादीनामपि स स्यात्।

न चाऽचेतनस्य चेतनानधिष्ठितस्य वास्यादिवत्प्रवृत्त्यसम्भवात्, सम्भवे वा निरभिप्रायाणां देशादिनियमाभावप्रसङ्गात् तदधिष्ठातेश्वरः सकलजगदुपादानादिज्ञाताभ्युपगन्तव्यः इत्यभिधातव्यम्; तज्ज्ञत्वेनास्याद्याप्यसिद्धेः। न चास्य तत्कर्तृत्वादेव तज्ज्ञत्वम्; इतरेतराश्रयानुषङ्गात्-सिद्धे हि सकलजगदुपादानाद्यभिज्ञत्वे तत्कर्तृत्वसिद्धिः, तत्सिद्धौ च तदभिज्ञत्वसिद्धिः। अचेतनवच्चेतनस्यापि चेतनान्तराधिष्ठितस्य विष्टिकर्मकरादिवत् प्रवृत्त्युपलम्भात्, महेश्वरेप्यधिष्ठातृ चेतनान्तरं परिकल्पनीयम्। स्वामिनोऽनधिष्ठितस्यापि प्रवृत्त्युपलम्भोऽकृष्टोत्पन्नाङ्कुराद्युपादाने समानः। घटाद्युपादानस्यानधिष्ठितस्याप्रवृत्त्युपलम्भात् तथाङ्कुराद्युपादानस्यापि कल्पने विष्टिकर्मकरादेः स्वाम्यनधिष्ठितस्याप्रवृत्तेर्महेश्वरेपि तथा स्यात्, तथा चानवस्था। चेतनस्याप्यपरचेतनाधिष्ठितस्य प्रवृत्त्यभ्युपगमे च 'अचेतनं चेतनाधिष्ठितम्' इत्यत्र प्रयोगेऽचेतनमिति धर्मिविशेषणस्याचेतनत्वादिति हेतोश्चापार्थकत्वम्, व्यवच्छेद्याभावात्। स्वहेतुप्रतिनियमाच्च अचेतनस्यापि देशादिनियमो ज्यायान्, तस्य भवताप्यवश्याभ्युपगमनीयत्वात्, अन्यथा सर्वत्र सर्वदा सर्वकार्याणामुत्पत्तिः स्यात्, चेतनस्याधिष्ठातुर्नित्यव्यापित्वाभ्यां सर्वत्र सर्वदा सन्निधानात्।

१ ग्रन्थस्य। २ अप्रेरितस्य। ३ ज्ञानशून्यानाम् (कारणानां)। ४ परेण। ५ पालकि डोली इति वा लोके ख्याता संस्कृते च शिबिकेति। ६ तर्हि। ७ चेतनस्य। ८ फलाभावात्। ९ स्वस्य कार्यस्य। १० उपादानकारण। ११ अदृष्टादेः। १२ युक्त इत्यर्थः। १३ योगेन।

न च कारकशक्तिपरिज्ञानाविनाभावि तत्प्रयोक्तृत्वम्, तस्यानेकधोपलम्भात्। किञ्चित्खलूपादानाद्यपरिज्ञानेपि प्रयोक्तृत्वं दृष्टम्, यथा स्वापमदमूर्च्छाद्यवस्थायां शरीरावयवानाम्। किञ्चित्पुनः कतिपयकारकपरिज्ञाने; यथा कुम्भकारादेः करादिव्यापारेण दण्डादिप्रयोक्तृत्वम्। न खलु तस्याखिलकारकोपलम्भोस्ति; धर्माधर्मयोस्तद्धेतुभूतयोरनुपलम्भात्। उपलम्भे वा तयोर्देशादिनियतेषु कार्येष्विच्छाव्याघातो न स्यात्, सर्वश्चाऽतीन्द्रियार्थदर्शी स्यात्। न हि कश्चित्तादृशो बुद्धिमानस्ति यो न किञ्चित्करोति कार्यं वा तादृशं विद्यते यत्राऽदृष्टं नोपयुज्यते। कारणशक्तेश्चातीन्द्रियत्वात्तदपरिज्ञानं सर्वप्राणिनां सुप्रसिद्धम्। यथास्थानं चास्याः सद्भावो निवेदितः। अन्यत्तु शरीराऽनायासतो वाग्व्यापारमात्रेण; यथा स्वामिनः कर्मकरादिप्रयोक्तृत्वम्। अस्तु वा कारकप्रयोक्तृत्वस्य परिज्ञानेनाविनाभावः, तथाप्यशरीरेश्वरे तस्यासम्भवः, सर्वत्र शरीरसम्बन्धे सत्येवास्योपलम्भात्।

यदप्यभ्यधायि–बुद्धिमत्कारणपूर्वकत्वमात्रस्य साध्यत्वान्न विशेषविरुद्धता कार्यत्वस्य, अन्यथा धूमाद्यनुमानोच्छेदः; तदप्यभिधानमात्रम्; कार्यमात्राद्धि कारणमात्रानुमाने विशेषविरुद्धताऽसम्भवस्तस्य तेन व्याप्तिप्रसिद्धेः, न पुनर्बुद्धिमत्कारणानुमाने तस्य तेनाव्याप्तेः प्रतिपादितत्वात्। व्याप्तौ वा अनीश्वरासर्वज्ञत्वादिधर्मकलापोपेत एव कर्त्तात्र सिद्ध्येत्, तथाभूतेनैव घटादौ व्याप्तिप्रसिद्धेः, न पुनरीश्वरत्वादिविरुद्धधर्मोपेतः, तस्य तद्व्यापकत्वेन स्वप्नेप्यप्रतिपत्तेः। तथाप्यस्य तं प्रति गमकत्वे महानसप्रदेशे वन्हिव्याप्तो धूमः प्रतिपन्नो गिरिशिखरादौ प्रतीयमानो वन्हिविरुद्धधर्मोपेतोदकं प्रति गमकः स्यात्। धूमाद्यनुमानोच्छेदासम्भवश्च प्राक्प्रबन्धेन प्रतिपादितः।

यच्चान्यदुक्तम्–'सर्वज्ञता चाशेषकार्यकारणात्' इत्यादि; तदप्ययुक्तम्; कार्यकारित्वस्य कारणपरिज्ञानाविनाभावासम्भवस्योक्तत्वात्। एकस्याशेषकार्यकारिणो व्यवस्थापकप्रमाणाभावात्, कार्यत्वादेश्च कृतोत्तरत्वात्कथमतः सर्वज्ञतासिद्धिः?

---

१ प्रेरकत्वम्। २ प्रेरकत्वम्। ३ प्रेरकत्वम्। ४ तस्य घटादिकार्यस्य। ५ अस्यादृष्टेनेदं कार्यं भवत्येवेदं न भवत्येवेतीच्छा। ६ न च तथा। ७ नेति संबन्धः। ८ प्रयोक्तृत्वम्। ९ विशेषविरुद्धताया असम्भवो न च। १० कार्यत्वस्य। ११ बुद्धिमत्कारणपूर्वकत्वेन। १२ क्षित्यादौ। १३ कर्ता। १४ ईश्वरसर्वज्ञत्वादिधर्मकलापोपेतसाध्यस्य। १५ कार्यत्व। १६ कार्यत्वस्य। १७ ईश्वरसर्वज्ञत्वादिधर्मकलापोपेतसाध्यं प्रति। १८ विस्तरेण।

यच्चोक्तम्-'तथा विश्वतश्चक्षुः' इत्यागमादप्यसौ[1] सिद्धः; तदप्युक्तिमात्रम्; अन्योन्याश्रयानुषङ्गात्-प्रसिद्धप्रामाण्यो ह्यागमस्तत्[2]प्रसाधको नान्यथातिप्रसङ्गात्[3] ततस्[4]तत्प्रामाण्यप्रसिद्धौ महेश्वरसिद्धिः, तत्सिद्धौ च तत्प्रणीतत्वेनागमप्रामाण्यप्रसिद्धिः। अन्येश्वरप्रणीतागमात्तत्सिद्धौ तस्याप्यन्येश्वरप्रणीतागमात्सिद्धावीश्वरागमानवस्था। पूर्वेश्वरप्रणीतागमात्तत्सिद्धौ परस्पराश्रयः। स्वप्रणीतागमात्तत्सिद्धौ चान्योन्यसंश्रयः। नित्यस्य त्वागमस्य परैः[5] प्रामाण्यं नेष्यते महेश्वर[6]कल्पनानर्थक्यप्रसङ्गात्, प्रामाण्यस्योत्पत्तौ ज्ञप्तौ चेश्वरसद्भावस्याकिञ्चित्करत्वात्।

यदप्युक्तम्-कारुण्याच्छरीरादिसर्गे प्राणिनां प्रवर्त्तते; तदप्ययुक्तम्; सुखोत्पादकस्यैव शरीरादिसर्गस्योत्पादकस्य प्रसङ्गात्। न हि करुणावतां यातना[7]शरीरोत्पादकत्वेन प्राणिनां दुःखोत्पादकत्वं युक्तम्। धर्माधर्मसहकारिणः कर्त्तृत्वात्सुखवद्दुःखस्याप्युत्पादकोऽसौ, फलोपभोगेन हि तयोः[8] प्रक्षयादपवर्गः प्राणिनां स्यात् इति करुणयापि तद्विधाने[9] प्रवृत्त्यविरोधः; इत्यप्यसङ्गतम्; तयोरीश्वरानायत्तत्वे[10] कार्यत्वे च आभ्यामेव कार्यत्वादेरनैकान्तिकत्वप्रसङ्गात्, तदुत्पत्तौ तस्याव्यापारे च विनाशेप्यव्यापारोस्तु, कारणान्तरोत्पन्नसुखदुःखलक्षणफलोपभोगेनानयोः प्रक्षयसम्भवात्। न हीश्वरस्यापि तत्फलोत्पादनादन्यत्तयोः क्षयकर्त्तृत्वम्।

किञ्च, धर्माधर्मौ निष्पाद्य पुनस्तयोः क्षयकरणे किमुत्पत्तिकरणप्रयासेन? न हि प्रेक्षाकारी खात्वा[11] पुनः समीकरणन्यायेनात्मानमायासयति "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" [ ] इति प्रसिद्धेश्च। अन्यथा प्रक्षालिताशुचिमोदकपरित्यागन्यायानुसरणप्रसङ्गः।

अपवर्गविधानार्थं चास्य प्रवृत्तौ कथमपूर्वकर्मसञ्चयकर्त्तृत्वम्? तत्सहकारिणश्चास्य सुखदुःखोत्पादकशरीरोत्पादकत्वे वरं तत्फलोपभोक्तृप्राणिगणस्यैव तत्[12]सव्यपेक्षस्य तदुत्पादकत्वमस्तु किमदृष्टे[13]श्वरपरिकल्पनया? सर्वत्र कार्येऽदृष्टस्य व्यापारात्। तथाहि[14]-

१ ईशः। २ ईश्वर। ३ अप्रसिद्धप्रामाण्यादागमादन्येषामीश्वराभावः स्यादपि। ४ यतः प्रसिद्धप्रामाण्यागमः ईश्वरप्रतिपादकः। ५ नैयायिकैः। ६ अन्यथा। ७ तीव्रवेदनाजनक। ८ सुखदुःख। ९ महेश्वरस्य। १० ईशकारणरहितत्वे। ११ भूमिं खनित्वा। १२ तयोर्धर्माधर्मयोः। १३ अप्रसिद्धस्य। १४ निखिलं कार्यं धर्मि प्राण्यदृष्टपूर्वकं भवतीति साध्यो धर्मः तदुपभोग्यत्वात्।

यद्यदुपभोग्यं तत्तददृष्टपूर्वकम् यथा सुखादि, उपभोग्यं च प्राणिनां निखिलं कार्यमिति ।

ननु यथा प्रभुः सेवाभेदानुरोधात्फलप्रदो नाप्रभुस्तथेश्वरोपि कर्मापेक्षः फलप्रदो नान्यः; इत्यपि मनोरथमात्रम्; राज्ञो हि
५ सेवायत्तफलप्रदस्य यथा रागादियोगो नैर्घृण्यं सेवायत्तता च प्रतीता तथेशस्याप्येतत्सर्वं स्यात्, अन्यथाभूतस्य अन्यपरिहारेण क्वचिदेव सेवके सुखादिप्रदत्वानुपपत्तेः ।

अथ यथा स्थपत्यादीनामेकसूत्रधारनियमितानां महाप्रासादादिकार्यकरणे प्रवृत्तिः, तथात्राप्येकेश्वरनियमितानां सुखा-
१० द्यनेककार्यकरणे प्राणिनां प्रवृत्तिः; इत्यप्यसाम्प्रतम्; नियमाभावात् । न ह्ययं नियमः–निखिलं कार्यमेकेनैव कर्त्तव्यम्, नाप्येकनियतैर्बहुभिरिति; अनेकधा कार्यकर्तृत्वोपलम्भात् । तथाहि–क्वचिदेक एवैककार्यस्य कर्त्तोपलभ्यते यथा कुविन्दः पटस्य । क्वचिदेकोप्यनेककार्याणाम् यथा घटघटीशरावोदञ्चना-
१५ दीनां कुलालः । क्वचिदनेकोप्यनेककार्याणाम् यथा घटपटमकुटशकटादीनां कुलालादिः । क्वचिदनेकोप्येककार्यस्य यथा शिबिकोद्वहनादिकार्यस्यानेकपुरुषसंघातः । न चानेकस्थपत्यादिनिष्पाद्ये प्रासादादिकार्येऽवश्यतयैकसूत्रधारनियमितानां तेषां तत्र व्यापारः; प्रतिनियताभिप्रायाणामप्येकसूत्रधाराऽनियमि-
२० तानां तत्करणाविरोधात् ।

किञ्च, अदृष्टापेक्षस्यास्य कार्यकर्तृत्वे तत्कृतोपकारोऽवश्यंभावी अनुपकारकस्यापेक्षायोगात् । तस्य चातो भेदे सम्बन्धासम्भवः । सम्बन्धकल्पनायां चानवस्था । अभेदे तत्करणे महेश्वर एव कृत इत्यदृष्टैकार्यतास्य । नाऽस्यादृष्टेन किञ्चित्क्रियते सम्भूय
२५ कार्यमेव विधीयते सहकारित्वस्यैककार्यकारित्वलक्षणत्वात्; इत्यप्यसाम्प्रतम्; सहकारिसव्यपेक्षो हि कार्यजननस्वभावः तस्यादृष्टादिसहकारिसन्निधानाद्यदि प्रागप्यस्ति तदोत्तरकालभाविसकलकार्योत्पत्तिस्तदैव स्यात् । तथाहि–यद्यदा यज्जननसमर्थं तत्तदा तज्जनयत्येव यथान्त्यावस्थाप्राप्तं बीजमङ्कुरम्, प्रागप्युत्तर-

१ वस्तु । २ यस्य पुरुषस्य । ३ स्वामी । ४ विशेष । ५ अनुसरणात् । ६ निष्कृपत्वम् । ७ तक्षकादीनाम् । ८ ईश्वरस्य । ९ ईश्वरात् । १० ततश्चेश्वरस्य नित्यत्वं विलीयते । ११ ईश्वरादृष्टाभ्यामेकीभूय । १२ एकस्वभावतयाभ्युपगतो महेश्वरो धर्मी उत्तरकालभावि सकलं कार्यमदृष्टादिसन्निधानात्प्रागपि जनयतीति साध्यो धर्मः तदा तस्य तज्जननसामर्थ्यादिति शेषः । १३ नद्यदवस्थाप्राप्तम् ।

कालभाविसकलकार्यजननसमर्थश्चैकस्वभावतयाभ्युपगतो महेश्वर इति। तदा तद्जनने वा तज्जननसामर्थ्याभावः, यद्धि यदा यन्न जनयति न तत्तदा तज्जननसमर्थस्वभावम् यथा कुसूलस्थं बीजमङ्कुरमजनयन्न तज्जननसमर्थस्वभावम्, न जनयति चोत्तरकालभावि सकलं कार्यं पूर्वकार्योत्पत्तिसमये महेश्वर इति। ५

तज्जननसमर्थस्वभावोऽप्यसौ सहकार्यऽभावात्तथा तन्न जनयति; इत्यपि वार्त्तम्; समर्थस्वभावस्यापरापेक्षाऽयोगात्। 'समर्थस्वभावश्चापरापेक्षश्च' इति विरुद्धमेतत्, अनाधेयाऽप्रहेयातिशयत्वात्तस्य।

किञ्च, एते सहकारिणः किं तदायत्तोत्पत्तयः, अतदायत्तोत्पत्तयो वा? प्रथमपक्षे किं नैकदैवोत्पद्यन्ते? तदुत्पादकान्यसहकारिवैकल्याच्चेदनवस्था। तथा चास्यापरापरसहकारिजनने एवोपक्षीणशक्तिकत्वान्न प्रकृतकार्ये व्यापारः। बीजाङ्कुरादिवदनादित्वात्तत्प्रवाहस्य नानवस्था दोषायेत्यभ्युपगमे महेश्वरकल्पनावैयर्थ्यम्, स्वसामग्र्यधीनोत्पत्तितया पूर्वपूर्वसामग्रीविशेषवशादपरापराखिलकार्योत्पत्तिप्रसिद्धेः। अथातदायत्तोत्पत्तयः; तर्हि तैरेव कार्यत्वादिहेतवोऽनैकान्तिकाः इति। १० १५

एतेन 'महाभूतादि व्यक्तं चेतनाधिष्ठितं प्राणिनां सुखदुःखनिमित्तं रूपादिमत्त्वात्तुर्यादिवत्' इत्यादीनि वार्त्तिककारादिभिरुपन्यस्तप्रमाणानि निरस्तानि; यादृशं हि रूपादिमत्त्वमनित्यत्वं च चेतनाधिष्ठितं वास्यादौ प्रसिद्धं तादृशस्य क्षित्यादावसिद्धेः। रूपादिमत्त्वमात्रस्य च चेतनाधिष्ठितत्वेन प्रतिबन्धासिद्धेः आशङ्कितविपक्षवृत्तितयाऽनैकान्तिकत्वम्। प्रतिबन्धाभ्युपगमे चेष्टविपरीतसाधनाद्विरुद्धमित्यादि पूर्वोक्तं सर्वमत्रापि योजनीयम्। २०

किञ्च, ईश्वरबुद्धेरनित्यत्वप्रसाधनात्तदभिन्नस्येश्वरस्यानित्यत्वप्रसिद्धेस्तस्याप्यपरबुद्धिमदधिष्ठितत्वप्रसङ्गः स्यादित्यनवस्था। तदनधिष्ठितत्वे वा तेनैवानेकान्तो हेतोः। २५

यच्चोक्तम्-'सर्गादौ पुरुषाणां व्यवहारः' इत्यादि; तत्रोत्तरकालं प्रबुद्धानामित्येतद्विशेषणमसिद्धम्। न खलु प्रलयकाले प्रलुप्त-

१ आरोपयितुमशक्योऽतिशयोऽनाधेयः। २ अन्यैः स्फोटयितुमशक्योऽतिशयोऽप्रहेयः। ३ ईश्वरानपेक्षोत्पत्तयः ४ सहकारिभिः। ५ सावयवकार्यत्वहेतुनिराकरणपरेण ग्रन्थेन। ६ अविनाभावासिद्धेः। ७ भूरुहादिवच्चेतनानधिष्ठिते महाभूतादिव्यक्ते रूपादिमत्त्वं वर्तते वास्यादिवच्चेतनाधिष्ठिते वा इति। ८ सर्वज्ञत्वादिधर्मोपेताद्विपरीतस्यासर्वज्ञत्वादिधर्मोपेतस्य।

ज्ञानस्मृतयो वितनुकरणाः पुरुषाः सन्ति, तस्यैव सर्वथाऽप्रसिद्धेः। सिद्धौ वा स्वकृतकर्मवशाद्विशिष्टज्ञानान्तरेषु(ष्वन्तरो)त्पत्तेस्तेषां कथं वितनुकरणत्वं प्रलुप्तज्ञानस्मृतित्वं वा? सन्दिग्धविपक्षव्यावृत्तिकत्वादनैकान्तिकश्च हेतुः।

५ किञ्च, अन्योपदेशपूर्वकत्वमात्रे साध्ये सिद्धसाध्यता; अनादेर्व्यवहारस्याशेषपुरुषाणामन्योपदेशपूर्वकत्वेनेष्टत्वात्। ईश्वरोपदेशपूर्वकत्वे तु साध्येऽनैकान्तिकता, अन्यथापि तत्सम्भवात्। साध्यविकलता च दृष्टान्तस्य। न चास्योपदेष्टृत्वसम्भवो विमुखत्वान्मुक्तात्मवत्। तच्च वितनुकरणतयोपगमात्प्रसिद्धम्।

१० 'स्थित्वा प्रवृत्तेः' इति चेश्वरेणैवानैकान्तिकम्, स हि क्रमवत्कार्येषु स्थित्वा प्रवर्त्तते न च चेतनान्तराधिष्ठितोऽनवस्थाप्रसङ्गात् इति।

अनयैव दिशा 'सप्तभुवनान्येकबुद्धिमन्निर्मितानि एकवस्त्वन्तर्गतत्वादेकावसथान्तर्गतापवरकवत्' इत्यादिपरकीयप्रयोगोऽ१५ भ्यूह्यः। न ह्येकावसथान्तर्गतानामपवरकादीनामेकसूत्रधारनिर्मितत्वनियमः येनेश्वरः सकलभुवनैकसूत्रधारः सिद्ध्येत्, अनेकसूत्रधारनिर्मितत्वस्याप्युपलम्भात्।

एकाधिष्ठाना ब्रह्मादयः पिशाचान्ताः परस्परातिशयवृत्तित्वात्, इह येषां परस्परातिशयवृत्तित्वं तेषामेकायत्तता दृष्टा २० यथेह लोके गृहग्रामनगरदेशाधिपतीनामेकस्मिन्सार्वभौमनरपतौ, तथा भुजगरक्षोयक्षप्रभृतीनां परस्परातिशयवृत्तित्वं च, तेन मन्यामहे तेषामेकस्मिन्नीश्वरे पारतन्त्र्यम्; इत्यसम्यक्; अत्र हि 'ईश्वराख्येनाधिष्ठायकेनैकाधिष्ठानाः' इति साध्येऽनैकान्तिकता हेतोर्विपर्यये बाधकप्रमाणाभावात् प्रतिबन्धासिद्धेः। दृष्टान्तस्य च २५ साध्यविकलता। 'अधिष्ठायकमात्रेण साधिष्ठानाः' इति साध्ये सिद्धसाध्यता, स्वनिकायस्वामिनः शक्रादेर्भवान्तरोपात्ताऽदृष्टस्य चाधिष्ठायकतयाभ्युपगमात्।

---

१ प्रलयकालसमये एव न तु पश्चात्। २ परोपदेशरहिते मैथुनादिव्यवहारवति पुंसि। ३ (हेतोः)। ४ ईश्वरोपदेशं विनापि। ५ व्यवहारे प्रत्यर्थनियतत्वस्य। ६ पुत्रादीनां मात्राद्युपदेशपूर्वकत्वेनेश्वरोपदेशपूर्वकत्वाभावात्। ७ विगतमुखत्वात्। ८ साधनम्। ९ आकाश। १० मन्दिर। ११ ईश्वराश्रिताः कार्यकरणे। १२ सन्दिग्धानैकान्तिकता। १३ विपक्षे=कदाचित्स्वतन्त्रेषु गृहग्रामनगरदेशाधिपतिषु। १४ ईश्वराख्येनाधिष्ठायकेन परस्परातिशयवृत्तित्वस्याविनाभावासिद्धेः। १५ सार्वभौमनरपतौ ईश्वरप्रेरणत्वासिद्धेः।

ततो महेश्वरस्याशेषजगत्कर्तृत्वप्रसाधकस्यानवद्यप्रमाणस्यासम्भवात् कुतोऽनादिमुक्तत्वसिद्धिर्यतोऽनाद्यशेषज्ञत्वमस्य स्यात्? प्रयोगः-क्षित्यादिकं नैकैकस्वभावभावपूर्वकं विभिन्नदेशकालाकारत्वात्, यदित्थं तदित्थम् यथा घटपटमकुटशकटादि, विभिन्नदेशकालाकारं चेदम्, तस्मान्नैकैकस्वभावभावपूर्वक- ५ मिति। न चेदमसिद्धं साधनम्; उर्वीपर्वततर्वादौ धर्मिणि विभिन्नदेशकालाकारत्वस्य सुप्रसिद्धत्वात्। नाप्यनैकान्तिकं विरुद्धं वा; विपक्षस्यैकदेशे तत्रैव वा वृत्तेरभावात्।

नन्वेकस्याप्यनेककार्यकरणकुशलस्य कर्त्तुर्विचित्रसहकारिसान्निध्ये विचित्रकार्यकारित्वं दृश्यते, अतोऽनेकान्तः; इत्यप्यनुपप- १० न्नम्; तत्राप्येकस्वभावत्वस्यासिद्धेः, स्वरूपमभेदयतां सहकारित्वस्यासम्भवप्रतिपादनात्। नापि कालात्ययापदिष्टम्; प्रत्यक्षागमाभ्यां पक्षस्याबाध्यमानत्वात्। न हि क्षित्यादौ विचित्रकार्ये प्रत्यक्षेणैकस्वभावः कर्त्तोपलभ्यते, तस्यातीन्द्रियतया प्रत्यक्षागोचरत्वस्य प्रागेव प्रतिपादनात्, आगमस्यापि तत्प्रतिपादकस्य १५ प्रागेव प्रतिषेधात्। नापि सत्प्रतिपक्षम्; विपरीतार्थोपस्थापकस्यानुमानान्तरस्याभावात्, कार्यत्वादिहेतूनां चात्रैवानेकदोषदुष्टत्वप्रतिपादनादिति।

ननु साधूक्तमावरणापाये सर्वज्ञत्वमिति। तत्तु प्रकृतेरेव अत्रैवावरणसम्भवात्, नात्मनस्तस्यावरणाभावात् "प्रधानपरिणामः २० शुक्लं कृष्णं च कर्म" [ ] इत्यभिधानात्। निखिलजगत्कर्तृत्वाद्यास्या एवाशेषज्ञत्वमस्तु; तदेतदप्यसमीक्षिताभिधानम्; कर्मणः प्रधानपरिणामताप्रतिषेधात् सकलजगत्कर्तृत्वस्य चासिद्धेः। ननु प्रकृतिप्रभवैवेयं जगतः सृष्टिप्रक्रिया, तत्कथं तस्यास्तत्कर्तृत्वासिद्धिः? तथा हि— २५

"प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि॥"
[सांख्यका० २२]

प्रथमं हि प्रकृतेर्महान्=विषयाध्यवसायलक्षणा बुद्धिरुत्पद्यते। बुद्धेश्चाहङ्कारोऽहं सुभगोऽहं दर्शनीय इत्याद्यभिमानलक्षणः। ३० अहङ्कारात्पञ्च तन्मात्राणि शब्दस्पर्शरूपरसगन्धात्मकानि, इन्द्रियाणि चैकादश पञ्च बुद्धीन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणलक्षणानि, पञ्च कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थसंज्ञानि,

१ कल्पनातिशयमकुर्वताम्। २ प्रकृतेः। ३ क्रमः।

मनश्च सङ्कल्पलक्षणम्-'भोजनार्थं हि तत्र गृहे यास्यामि किं दधि भविष्यति गुडो वा भविष्यति' इत्येवं सङ्कल्पवृत्तिर्मनः। पञ्चभ्यश्च तन्मात्रेभ्यः पञ्च भूतानि—शब्दादाकाशं, स्पर्शाद्वायुः, रूपात्तेजः, रसादापः, गन्धात्पृथ्वीति। पुरुषश्चेति। पञ्चविंशतितत्त्वानि।

५ प्रकृत्यात्मकाश्चैते महदादयो भेदाः न त्वऽतोऽत्यन्तभेदिनो लक्षणभेदाभावात्। तथाहि—

"त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।
व्यक्तं[1] तथा प्रधानं तद्विपरीतस्तथा[2] च पुमान्॥"

[सांख्यका० ११]

१० लोके[3] हि यदात्मकं कारणं तदात्मकमेव कार्यमुपलभ्यते यथा कृष्णैस्तन्तुभिरारब्धः पटः कृष्णः। एवं प्रधानमपि त्रिगुणात्मकम्, तथा बुद्ध्यहङ्कारतन्मात्रेन्द्रियभूतात्मकं व्यक्तमपि। तथाऽविवेकि-'इमे सत्त्वादय[4] इदं च महदादि व्यक्तम्' इति पृथक्कर्तुं न शक्यते। किन्तु 'ये गुणास्तद्व्यक्तं यद्व्यक्तं ते गुणाः' इति। तथा

१५ व्यक्ताव्यक्तद्वयमपि विषयो भोग्यस्वभावत्वात्। सामान्यं च सर्वपुरुषाणां भोग्यत्वात्पण्यस्त्रीवत्। अचेतनात्मकं च सुखदुःखमोहावेदकत्वात् प्रसवधर्मिवत्। तथाहि-प्रधानं बुद्धिं जनयति, बुद्धिरप्यहङ्कारम्, अहङ्कारोपि तन्मात्राणीन्द्रियाणि चैकादश, तन्मात्राणि च महाभूतानीति।

२० प्रकृतिविकृतिभावेन[7] परिणामविशेषाल्लक्षणभेदोप्यविरुद्धः; यथोक्तम्—

"हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्॥"

[सांख्यका० १०]

२५ व्यक्तमेव हि कारणवत्; तथाहि-प्रधानेन हेतुमती बुद्धिः, बुद्ध्या चाहङ्कारः[10], अहङ्कारेण पञ्च तन्मात्राण्येकादश चेन्द्रियाणि, भूतानि[11] तन्मात्रैः। न त्वेवमव्यक्तम्—तस्य कुतश्चिद्[12]नुत्पत्तेः। तथा व्यक्तमनित्यम् उत्पत्तिधर्मकत्वात्, नाव्यक्तम् तस्यानु-

१ महदादिकार्यं त्रिगुणादिरूपेण व्यक्तम्। २ व्यक्ताऽव्यक्ताभ्याम्। ३ प्रधानमेव त्रिगुणात्मकम्। महदादिकार्यं कथं त्रिगुणात्मकं स्यादित्युक्ते सत्याह। ४ आदिपदेन रजस्तमसी। ५ पुरुषेण। ६ स्वरूपावस्थानम्। ७ लक्षणभेदाभावात्कथं कार्यकारणभावः स्यादित्युक्ते आह। ८ महदादि। ९ प्रधानम्। १० हेतुमान्। ११ महदादि कार्यम्। १२ कारणात्।

त्पत्तिमत्त्वात्। यथा च प्रधानपुरुषौ दिवि चान्तरिक्षेऽत्र सर्वत्र व्यापितया वर्तेते न तथा व्यक्तम्। यथा च संसारकाले त्रयोदशविधेन बुद्ध्यहङ्कारेन्द्रियलक्षणेन संयुक्तं सूक्ष्मशरीरादिकं व्यक्तं संसरति, नैवमव्यक्तं तस्य विभुत्वेन सक्रियत्वायोगात्। बुद्ध्यहङ्कारादिभेदेन चानेकविधं व्यक्तम्, नाव्यक्तम् तस्यैकस्यैव ५ सतो लोकत्रयकारणत्वात्। आश्रितं च व्यक्तम्, यद्यस्मादुत्पद्यते तस्य तदाश्रितत्वात्। न त्वेवमव्यक्तम् तस्याकार्यत्वात्। लिङ्गं च 'लयं गच्छति' इति कृत्वा, प्रलयकाले हि भूतानि तन्मात्रेषु लीयन्ते, तन्मात्राणीन्द्रियाणि चाहङ्कारे, अहङ्कारो बुद्धौ, बुद्धिश्च प्रधाने। न चाव्यक्तं क्वचिदपि लयं गच्छतीति तस्याविद्यमान- १० कारणत्वात्। सावयवं च व्यक्तम् शब्दस्पर्शरूपरसगन्धात्मकैरवयवैर्युक्तत्वात्। न त्वेवमव्यक्तम् प्रधानात्मनि शब्दादीनामनुपलब्धेः। यथा च पितरि जीवति पुत्रो न स्वतन्त्रो भवति तथा व्यक्तं सर्वदा कारणायत्तत्वात्परतन्त्रम्। न त्वेवमव्यक्तं तस्य नित्यमकारणाधीनत्वत्। १५

ननु प्रधानात्मनि कुतो महदादीनां सद्भावसिद्धिर्यतः प्रागुत्पत्तेः सदेव कार्यमिति चेत्;

"असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम्॥"

[सांख्यका० ९]　२०

इति हेतुपञ्चकात्। यदि हि कारणात्मनि प्रागुत्पत्तेः कार्यं नाभविष्यत्तदा तन्न केनचिदकरिष्यत। यदसत्तन्न केनचित्क्रियते यथा गगनाम्भोरुहम्, असच्च प्रागुत्पत्तेः परमते कार्यमिति। क्रियते च तिलादिभिस्तैलादिकार्यम्, तस्मात्तच्छक्तितः प्रागपि सत्, व्यक्तिरूपेण तु कापिलैरपि प्राक् सत्त्वस्यानिष्ट- २५ त्वात्।

यदि चासद्भवेत्कार्यं तर्हि पुरुषाणां प्रतिनियतोपादानग्रहणं न स्यात्। यथाहि शालिबीजादिषु शाल्यादीनामसत्त्वं तथा कोद्रवबीजादिष्वपि। तथा च कोद्रवबीजादयोपि शालिफलार्थिभिरुपादीयेरन्। न चैवम्, तस्मात्तत्र तत्कार्यमस्तीति गम्यते। ३०

१ प्रवर्तेते। २ गच्छति। ३ व्यापकत्वेन। ४ तिरोभावम्। ५ परमते प्रागुत्पत्तेः कार्यं धर्मि, न केनचित्क्रियते इति साध्यो धर्मः—असत्त्वात्। ६ जैनादिमते। ७ मृत्पिण्डे घटो नास्ति पटोपि नास्ति तदा मृत्पिण्डो घटस्योपादानं पटस्य न, तस्य तु तन्तव एवेति नियतोपादानम्। ८ शाल्यादि।

यदि चासदेव कार्यं सर्वस्मात्तृणपांशुलोष्ठादिकात्सर्वं[1] सुवर्ण-रजतादि कार्यं स्यात्, तादात्म्यविगमस्य[2] सर्वस्मिन्[3]नविशिष्टत्वात्। न च सर्वं सर्वतो भवति तस्मात्तत्रैव[5] तस्य सद्भावसिद्धिः।

ननु कारणानां प्रतिनियतेष्वेव[6] कार्येषु प्रतिनियताः शक्तयः। ५ तेन कार्यस्यासत्त्वाविशेषेपि किञ्चिदेव कार्यं कुर्वन्ति; इत्यप्यनु-त्तरम्; शक्ता अपि हि हेतवः शक्यक्रियमेव कार्यं कुर्वन्ति नाशक्यक्रियम्। यच्चासत्[7]तन्न शक्यक्रियं यथा गगनाम्भोरुहम्, असच्च परमते कार्यमिति।

बीजादेः कारणभावाच्च सत्कार्यं कार्यासत्त्वे तदयोगात्। १० तथाहि-न कारणभावो बीजादेः अविद्यमानकार्यत्वात्खरविषा-णवत्। तत्सिद्धमुत्पत्तेः प्राक्कारणे कार्यम्।

तच्च कारणं प्रधानमेवेत्यावेदयति हेतुपञ्चकात्—

"भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य॥"

१५ [सांख्यका० १५]

लोके हि यस्य कर्त्ता भवति तस्य परिमाणं दृष्टम् यथा कुलालः परिमितान्मृत्पिण्डात्परिमितं प्रस्थग्राहिणमाढकग्राहिणं च घटं करोति। इदं च महदादि व्यक्तं परिमितं दृष्टम् एका बुद्धिः, एकोऽहङ्कारः, पञ्च तन्मात्राणि, एकादशेन्द्रियाणि, पञ्चभूता-२० नीति। अतो यत्परिमितं व्यक्तमुत्पादयति तत्प्रधानमित्यवगमः।

इतश्चास्ति प्रधानं भेदानां समन्वयदर्शनात्। यज्जातिसम-न्वितं हि यदुपलभ्यते तत्तन्मयकारणसम्भूतम् यथा घट-शरावादयो भेदा मृज्जातिसमन्विता मृदात्मककारणसम्भूताः, सत्त्वरजस्तमोजातिसमन्वितं चेदं व्यक्तमुपलभ्यते। सत्त्वस्य हि २५ प्रसादलाघवोद्धर्षप्रीत्यादयः कार्यम्। रजसस्तु तापशोषोद्वेगा-दयः। तमसश्च दैन्यबीभत्सगौरवादयः। अतो महदादीनां प्रसाददैन्यतापादिकार्योपलम्भात्प्रधानान्वितत्वसिद्धिः।

---

१ तर्हि। २ अभावस्य। ३ उपादानेऽनुपादाने च। ४ कारणे। ५ तदुपादाने। ६ शक्यक्रियेषु। ७ परमते कार्यं धर्मि शक्यक्रियं न भवति असत्त्वादिति शेषः। ८ महदादि। ९ महदादीनाम्। १० कार्यस्य। ११ महदादिव्यक्तमेककारणपूर्वकं परिमितत्वाद् घटादिवत्। १२ महदादिव्यक्तमेककारणसम्भूतमेकस्वरूपान्वितत्वाद् घटघटीशरावोदञ्चनादिवत्। १३ उत्सव। १४ महदादिव्यक्तस्य।

इतश्चास्ति प्रधानं शक्ति[1]तः प्रवृत्तेः। लोके हि यो यस्मि[2]न्नर्थे प्रवर्त्तते स तत्र शक्तः यथा तन्तुवायः पटकरणे, प्रधानस्य चास्ति शक्तिर्यया व्यक्तमुत्पादयति, सा च निराधारा न सम्भवतीति प्रधानास्तित्वसिद्धिः।

का[3]र्यकारणविभागाच्च; दृष्टो हि कार्यकारणयोर्विभागः, यथा ५ मृत्पिण्डः कारणं घटः कार्यम्। स च मृत्पिण्डाद्विभक्तस्वभावो घटो मधूदकादिधारणाहरणसमर्थो न तु मृत्पिण्डः। एवं महदादि कार्यं दृष्ट्वा साधयामः–'अस्ति प्रधानं यतो महदादिकार्यमुत्पन्नम्' इति।

इ[4]तश्चास्ति प्रधानं वैश्वरूप्यस्याविभागात्। वैश्वरूप्यं हि लोक- १० त्रयमभिधीयते। तच्च प्रलयकाले क्वचिदविभागं गच्छति। उक्तं च प्राक्–'पञ्चभूतानि पञ्चसु तन्मात्रेष्वविभागं गच्छन्ति' इत्यादि। अविभागो हि नामाविवेकः। यथा क्षीरावस्थायाम् 'अन्यत्क्षीरमन्यद्दधि' इति विवेको न शक्यते कर्त्तुं तद्वत्प्रलयकाले व्यक्तमिदमव्यक्तं चेदमिति। अतो मन्यामहेऽस्ति प्रधानं यत्र १५ महदाद्यविभागं गच्छतीति।

अत्र प्रतिविधी[6]यन्ते-प्रकृत्यात्मकत्वे महदादिभेदानां कार्यतया ततः प्रवृत्तिविरोधः। न खलु यद्य[7]स्मात्सर्वथाऽव्यतिरिक्तं तत्तस्य कार्यं कारणं वा युक्तं भिन्नलक्षणत्वात्तयोः। अन्यथा तद्व्यवस्था सङ्कीर्येत। तथा च यद्भवद्भिर्मूलप्रकृतेः कारणत्वमेव, भूतेन्द्रिय- २० लक्षणषोडशकगणस्य कार्यत्वमेव, बुद्ध्यहङ्कारतन्मात्राणां पूर्वोत्तरापेक्षया कार्यत्वं कारणत्वं चेति प्रतिज्ञातं तन्न स्यात्। तथा चेदमसङ्गतम्—

"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः॥" २५

[सांख्यका० ३] इति।

सर्वेषामेव हि परस्परमव्यतिरेके का[10]र्यत्वं कारणत्वं वा प्रस-

१ महदादिभेदानाम्। २ कार्यप्रवृत्तिः शक्तिपूर्विका प्रवृत्तित्वात्तन्तुवायप्रवृत्तिवत्। ३ महदादिव्यक्तमनेककारणपूर्वकं कार्यरूपत्वाद् घटादिवत्। ४ महदाद्यविभागः क्वचिदाश्रितः अविभागत्वात्क्षीरे दध्याद्यविभागवत्। ५ एकत्वम्। ६ जैनैः। ७ प्रकृतेः। ८ प्रधानं महदादेः कारणं न भवति तस्मात्सर्वथाऽव्यतिरिक्तत्वात्। महदादि प्रधानकार्यं न भवति तस्मात्सर्वथाऽव्यतिरिक्तत्वात्। ९ भिन्नलक्षणाभावे। १० प्रकृत्यादि कार्यरूपं कार्यरूपान्महदादेरव्यतिरेकात्।

ज्येत । आपेक्षिकत्वाद्वा[1] तद्भावस्य[2][3], रूपान्तरस्य चापेक्षणीयस्याभावात्सर्वेषां पुरुषवत्प्रकृतिविकृतित्वाभावः । अन्यथा[4] पुरुषस्यापि प्रकृतिविकृतिव्यपदेशः स्यात् ।

यच्चेदम्–हेतुमत्त्वादिधर्मयोगि व्यक्तं विपरीतमव्यक्तम्; तदपि ५ बालप्रलापमात्रम्; न हि यद्यस्मादभिन्नस्वभावं[5] तत्तद्विपरीतं युक्तं भिन्नस्वभावलक्षणत्वाद्विपरीतत्वस्य । अन्यथा[6] भेदव्यवहारोच्छेद्यः(दः) स्यात् । सत्त्वरजस्तमसां चान्योन्यं भिन्नस्वभावनिबन्धनो भेदो न स्यादिति विश्वमेकरूपमेव स्यात् । ततो व्यक्तरूपाव्यतिरेकादव्यक्तमपि हेतुमत्त्वादिधर्मयोगि स्यात् व्यक्तस्वरूप१० वत् । व्यक्तं वाऽहेतुमत्त्वादिधर्मयोगि स्यादव्यक्तस्वरूपाव्यतिरेकात्तत्स्वरूपवदित्येकान्तः[7] ।

किञ्च, अन्वयव्यतिरेकनिश्चयसमधिगम्यो लोके कार्यकारणभावः प्रसिद्धः । न च प्रधानादिभ्यो महदाद्युत्पत्तिनिश्चयेऽन्वयो व्यतिरेको वा प्रतीतोस्ति येन प्रधानान्महान्महतोऽहङ्कार इत्यादि १५ सिद्ध्येत् ।

न च नित्यस्य कारणभावोस्ति, क्रमाऽक्रमाभ्यां तस्यार्थक्रियाविरोधात् । ननु नित्यमपि प्रधानं कुण्डलादौ सर्पवन्महदादिरूपेण[8] परिणामं गच्छत्तेषां कारणमित्युच्यते, ते च तत्परिणामरूपत्वात्तत्कार्यतया व्यपदिश्यन्ते । परिणामश्चैकवस्त्वऽधिष्ठान२० त्वादभेदेपि न विरुध्यते[9] इत्यप्यनेकान्तावलम्बने प्रमाणोपपन्नं नित्यैकान्ते परिणामस्यैवासिद्धेः । स[10] हि तत्र भवन् पूर्वरूपत्यागाद्वा भवेत्, अत्यागाद्वा? यद्यत्यागात्; तदाऽवस्थासाङ्कर्यं वृद्धाद्यवस्थायामपि युवाद्यवस्थोपलब्धिप्रसङ्गात् । अथ त्यागात्; तदा स्वभावहानिप्रसङ्गः ।

२५ किञ्च, सर्वथा तत्त्यागः, कथञ्चिद्वा? सर्वथा चेत्; कस्य परिणामः? पूर्वरूपस्य सर्वथा त्यागादपूर्वस्य चोत्पादात् । कथञ्चित् चेत्; न किञ्चिद्विरुद्धम्, तस्यैवार्थस्य प्राच्य[11]रूपत्यागेना-

१ अपेक्षणीयाभावेपि प्रकृतिविकृतिभावो भविष्यतीत्युक्ते आह । २ भिन्नलक्षणत्वात्कार्यकारणभावयोरित्यस्यापेक्षया वाशब्दः । ३ कार्यकारणभावस्य । ४ अपेक्षणीयस्याभावेपि कस्यचित्प्रकृतित्वं वा घटते चेत् । ५ अव्यक्तं धर्मि व्यक्ताद्विपरीतं न भवति तस्मादभिन्नस्वभावत्वात् । ६ विपरीतत्वं भिन्नस्वभावनिबन्धनं न भवतीति चेत् । ७ सर्वं व्यक्तरूपमेवाऽव्यक्तरूपमेव वा स्यादिति । ८ ऋजुः सर्पो यथा कुण्डलाकारेण जायते स एव ऋज्वाकारेण जायते । कुण्डलादौ स्वर्णवदिति पाठान्तरम् । ९ द्रव्यतया पर्यायतया च । १० प्रधानस्यैव । मनुष्यलक्षणस्य वा । ११ बालावस्थायाः ।

न्यथाभावलक्षणपरिणामोपपत्तेः । नित्यैकान्तता तु तस्य[8] व्याहन्येत । अत्र हि नैकदेशेन तत्त्यागो निरंशस्यैकदेशाभावात् । नापि सर्वात्मना; नित्यत्वव्याघातात् ।

किंच, प्रवर्त्तमानो निवर्त्तमानश्च धर्मो धर्मिणोऽर्थान्तरभूतो वा स्यात्, अनर्थान्तरभूतो वा? यद्यर्थान्तरभूतः; तर्हि धर्मी तद्-५ वस्थ एवेति कथमसौ परिणतो नाम? न ह्यर्थान्तरभूतयोरर्थयोरुत्पादविनाशे सत्यविचलितात्मनो वस्तुनः परिणामो भवति, अन्यथाऽऽत्मापि परिणामी स्यात् । तत्सम्बद्धयोर्धर्मयोरुत्पादविनाशात्तस्य परिणामः; इत्यप्यसुन्दरम्; धर्मिणा सदसतोः सम्बन्धाभावात् । सम्बन्धो हि धर्मस्य सतो भवेत्, असतो वा? १० न तावत्सतः; स्वातन्त्र्येण प्रसिद्धाशेषस्वभावसम्पत्तेरनपेक्षतया क्वचित्पारतन्त्र्यासम्भवात्[11] । नाप्यसतः; तस्य सर्वोपाख्याविरहलक्षणतया[12] क्वचिदप्याश्रितत्वानुपपत्तेः । न खलु खरविषाणादिः क्वचिदाश्रितो युक्तः । न च प्रवर्त्तमानाप्रवर्त्तमानधर्मद्वयव्यतिरिक्तो धर्मी उपलब्धिलक्षणप्राप्तो दर्शनपथप्रस्थायी कस्यचिदिति । अतः १५ स तादृशोऽसद्व्यवहारविषय एव विदुषाम् । अथानर्थान्तरभूतः; तथाप्येकस्माद्धर्मिस्वरूपादव्यतिरिक्तत्वात्तयोरेकत्वमेवेति[13] कथं परिणामो धर्मिणः, धर्मयोर्वा[14] विनाशप्रादुर्भावौ धर्मिस्वरूपवत्? धर्माभ्यां च धर्मिणोऽनन्यत्वाद्धर्मस्वरूपवदपूर्वस्योत्पादः पूर्वस्य[15] विनाश इति नैव कस्यचित्परिणामः सिध्यति । तस्मान्न परिणाम-२० वशादपि भवतां कार्यकारणव्यवहारो युक्तः ।

यच्चेदमुत्पत्तेः प्राक्कार्यस्य सत्त्वसमर्थनार्थमसदकरणादिहेतुपञ्चकमुक्तम्; तद् असत्कार्यवादपक्षेऽपि तुल्यम् । शक्यते ह्येवमप्यभिधातुम्—'न सदकरणादुपादानग्रहणात्सर्वसम्भवाभावात् । शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम् ।' न सत्कार्यमिति २५ सम्बन्धः ।

किञ्च, सर्वथा सत्कार्यम्, कथञ्चिद्वा? प्रथमपक्षोऽसम्भाव्यः; यदि हि क्षीरादौ[18] दध्यादिकार्याणि[19] सर्वथा विशिष्टरसवीर्यविपाका-

१ युवावस्थायाः । २ प्रधानस्य । ३ पूर्वरूपत्यागः । ४ उत्तरपरिणामलक्षणः । ५ पूर्वपरिणामलक्षणः । ६ पुरुषादेः । ७ सा अवस्था यस्य । पूर्वावस्थास्थः । ८ नित्यस्य । ९ प्रधानस्य । १० अभिन्नत्वात् । ११ पारतन्त्र्यं हि सम्बन्ध इति वचनात् । १२ उपाख्या स्वभावः । १३ धर्मिधर्मयोः । १४ धर्मयोर्विनाशप्रादुर्भावौ धर्मिणो न भवत इति साध्यो धर्मिणोऽनर्थान्तरत्वात् । १५ धर्मी उत्पादविनाशवान् उत्पादविनाशरूपधर्माभ्यामभिन्नत्वाद्धर्मस्वरूपवत् । १६ सकाशात् । १७ सर्वेभ्यः कारणेभ्यः । १८ कारणे । १९ आदिना नवनीततक्रादि ।

दिना विभक्तरूपेण मध्यावस्थावत्सन्ति, तर्हि तेषां किमुत्पाद्यमस्ति येन तानि कारणैः क्षीरादिभिर्जन्यानि स्युः? तथा च प्रयोगः-यत्सर्वाकारेण सत्तन्न केनचिज्जन्यम् यथा प्रधानमात्मा वा, सञ्च सर्वात्मना परमते दध्यादीति न महदादेः कार्यता। नापि प्रधानस्य ५ कारणता; अविद्यमानकार्यत्वात्। यदविद्यमानकार्यं तन्न कारणम् यथात्मा, अविद्यमानकार्यं च प्रधानमिति। क्षीराद्यवस्थायामपि दध्यादीनां पश्चादिवोपलम्भप्रसङ्गश्च। अथ कथञ्चिच्छक्तिरूपेण सत्कार्यम्; ननु शक्तिर्द्रव्यमेव, तद्रूपतया सतः पर्यायरूपतया चासतो घटादेरुत्पत्त्यभ्युपगमे जिनपतिमतानुसरणप्रसङ्गः।

१० किञ्च, तच्छक्तिरूपं दध्यादेर्भिन्नम्, अभिन्नं वा? भिन्नं चेत्; कथं कारणे कार्यसद्भावसिद्धिः? कार्यव्यतिरिक्तस्य शक्त्याख्यपदार्थान्तरस्यैव सद्भावाभ्युपगमात्। आविर्भूतविशिष्टरसादिगुणोपेतं हि वस्तु दध्यादि कार्यमुच्यते। तच्च क्षीराद्यवस्थायामुपलब्धिलक्षणप्राप्तानुपलब्धेर्नास्ति। यच्चास्ति शक्तिरूपं तत्कार्यमेव न भवति। १५ न चान्यस्य भावेऽन्यदस्त्यतिप्रसङ्गात्। अथाभिन्नम्; तर्हि दध्यादेर्नित्यत्वात्कारणव्यापारवैयर्थ्यम्।

अभिव्यक्तौ कारणानां व्यापारान्न वैयर्थ्यम्; इत्यप्यसत्; यतोऽभिव्यक्तिः पूर्वं सती, असती वा? सती चेत्; कथं क्रियेत? अन्यथा कारकव्यापारानुपरमः स्यात्। अथासती; तथाप्याकाश- २० कुशेशयवत्कथं क्रियेत? असदकरणादित्यभ्युपगमाच्च।

सर्वस्य सर्वथा सत्त्वेन च कार्यत्वासम्भवादुपादानपरिग्रहोपि न प्राप्नोति। सर्वसम्भवाभावोपि प्रतिनियतादेव क्षीरादेर्दध्यादीनां जन्मोच्यते। तच्च सत्कार्यवादपक्षे दूरोत्सारितम्। शक्तस्य शक्यकरणादिति चात्रासम्भाव्यम्; यदि हि केनचित् किञ्चि- २५ न्निष्पाद्येत तदा निष्पादकस्य शक्तिर्व्यवस्थाप्येत निष्पाद्यस्य च करणं नान्यथा। कारणभावोप्यर्थानां न घटते कार्यत्वाभावादेव।

१ दध्यवस्थावत्। २ दध्यादि धर्मि केनचिज्जन्यं न भवति पूर्वमेव सर्वाकारेण सत्त्वादित्युपरिष्टाद्योज्यम्। ३ इति=अनुमानात्। ४ प्रधानं कस्यचित्कारणं न भवति। ५ दध्यादिकार्यं धर्मि शक्तिरूपे कारणे नास्ति ततो भिन्नत्वात्। ६ ततो भिन्नत्वं स्यात्कारणे विद्यमानत्वं च स्यादिति सन्दिग्धानैकान्तिकत्वं सत्यात्। ७ शक्तिरूपस्य। ८ व्यक्तिरूपं दध्यादिकार्यम्। ९ घटस्य भावे पटस्य भावप्रसङ्गात्। १० विद्यमानापि क्रियमाणा चेत्। ११ अविश्रान्तिः। १२ परेणैव। १३ पदार्थस्य। १४ जैनैः। १५ कारणस्य। १६ कार्यस्य। १७ निष्पाद्यनिष्पादकभावाभावे शक्तिः करणं वा न व्यवस्थाप्यते। १८ कार्यस्य सर्वथा सत्त्वात्। १९ कारणापेक्षया।

किञ्च, एते हेतवो भवत्पक्षे प्रवृत्ताः किं कुर्वन्ति? स्वविषये हि प्रवृत्तं साधनं द्वयं करोति-प्रमेयार्थविषये प्रवृत्तौ संशयविपर्यासौ निवर्त्तयति, निश्चयं चोत्पादयति। तच्च सत्कार्यवादे न सम्भवति। संशयविपर्यासौ हि भवतां मते चैतन्यात्मकौ, बुद्धिमनःस्वभावौ वा? पक्षद्वयेपि न तयोर्निवृत्तिः सम्भवति; चैतन्य- ५ बुद्धिमनसां नित्यत्वेनानयोरपि नित्यत्वात्। नापि निश्चयस्योत्पत्तिः; तस्यापि सदा सत्त्वात्, इति साधनोपन्यासवैयर्थ्यम्। तस्मात्साधनोपन्यासस्यार्थवत्त्वमिच्छता निश्चयोऽसन्नेव साधनेनोत्पाद्यत इत्यङ्गीकर्त्तव्यम्। तथा चासदकरणादेर्हेतुगणस्यानेनैवानैकान्तिकता। यथा चासतोपि निश्चयस्य करणम्, तन्निष्प- १० त्तये च यथा विशिष्टसाधनपरिग्रहः, यथा चास्य न सर्वस्मात्साधनाभासादेः सम्भवः, यथा चासावसन्नपि शक्तैर्हेतुभिः क्रियते, तत्र च हेतूनां कारणभावोस्ति तथान्यत्रापि भविष्यति।

अथ यद्यपि साधनप्रयोगात्प्राक्सन्नेव निश्चयः, तथापि न तत्प्रयोगवैयर्थ्यं तदभिव्यक्तौ तस्य व्यापारात्। तत्र केयमभि- १५ व्यक्तिः-किं स्वभावातिशयोत्पत्तिः, तद्विषयज्ञानं वा, तदुपलम्भावरणापगमो वा? न तावत्स्वभावातिशयः; स हि निश्चयस्वरूपादभिन्नः, भिन्नो वा? यद्यभिन्नः; तर्हि निश्चयस्वरूपवत् सर्वदा सत्त्वान्नोत्पत्तिर्युक्ता। अथ भिन्नः; तस्यासाविति सम्बन्धाभावः। स ह्याधाराधेयभावलक्षणो वा, जन्यजनकभावलक्षणो २० वा? तत्राद्यपक्षोऽयुक्तः; परस्परमनुपकार्योपकारकयोस्तदसम्भवात्। उपकारे वा तस्याप्यर्थान्तरत्वे सम्बन्धासिद्धिरनवस्था च। अनर्थान्तरत्वे साधनप्रयोगवैयर्थ्यं निश्चयादेवोपकाराऽनर्थान्तरस्यातिशयस्योत्पत्तेः। अमूर्त्तत्वाच्चातिशयस्याधोगमनाभावान्न तस्य कश्चिदाधारो युक्तः, अधोगतिप्रतिबन्धकत्वेनाधारस्याव- २५ स्थितेः। नापि जन्यजनकभावलक्षणः; सर्वदैव निश्चयाख्यकारणस्य सन्निहितत्वेन नित्यमतिशयोत्पत्तिप्रसङ्गात्। न च साधनप्रयोगापेक्षया निश्चयस्यातिशयोत्पादकत्वं युक्तम्; अनुपकारिण्यपेक्षाऽयोगात्। उपकारित्वे वा पूर्ववद्दोषोऽनवस्था च।

अपि चायमतिशयः सन्, असन्वा क्रियेत? असत्त्वे पूर्व- ३० वत्साधनानामनैकान्तिकतापत्तिः। सत्त्वे च साधनवैयर्थ्यम्।

---

१ महदादावपि। २ निश्चयस्वभावातिशययोः। ३ निश्चयेनातिशयस्य। ४ अतिशयात्। ५ ग्रन्थस्य। ६ निश्चयेनातिशयस्य क्रियमाण उपकारः अतिशयादनर्थान्तरमित्यस्मिन् दूषणमाह। ७ उपकाराय। ८ न तूपकारकस्योत्पत्तिः।

तत्रा[1]प्यभिव्यक्ता[2]वनवस्था[3]। तन्न स्वभावातिशयोत्पत्तिरभिव्यक्तिः।

नापि तद्[4]विषयज्ञानम्; सत्कार्यवादिनो मते तस्यापि नित्यत्वात्, द्वितीयज्ञानस्या[5]सम्भवाच्च। एकमेव हि भवतां[6] मते विज्ञानम्-"आसर्गप्रलयादेका बुद्धिः" [ ] इति सिद्धान्तस्वीकारात्।

तद्[7]उपलम्भा[8]वरणापगमोऽप्यभिव्यक्तिर्न युक्ता; तदावरणस्य नित्यत्वेनापगमासम्भवात्। तिरोभावलक्षणोऽप्यपगमो न युक्तः; अत्यक्त[9]पूर्वरूपस्य तिरोभावासम्भवात्। द्वितीयोपलम्भस्य चासम्भवात्कथं तदावरणसम्भवो येनास्यापगमोऽभिव्यक्तिः स्यात्? न ह्यावरणमसतो युक्तं सद्वस्तुविषयत्वात्तस्य।

बन्धमोक्षाभावश्च सत्कार्यवादिनोऽनुषज्यते। बन्धो हि मिथ्याज्ञानात्, तस्य च सर्वदावस्थितत्वेन सर्वदा सर्वेषां[10] बद्धत्वात्कुतो मोक्षः? प्रकृतिपुरुषयोः कैवल्यो[11]पलम्भलक्षणतत्त्वज्ञानाच्च मोक्षः, तस्य च सदावस्थितत्वेन सर्वदा सर्वेषां मुक्तत्वात्कुतो बन्धः? सकलव्यवहारो[12]च्छेदप्रसङ्गश्च; लोकः खलु हिताहितप्राप्तिपरिहारार्थं प्रवर्त्तते। सत्कार्यवादपक्षे तु न किञ्चिदप्राप्यमहेयं चास्तीति निरीहमेव जगत्स्यात्।

यद्[13]असत्तन्न केनचित्क्रियते इति चासङ्गतम्; हेतो[14]र्विपक्षे बाधकप्रमाणाभावेनानैकान्तात्। कारणशक्तिप्रतिनियमाद्धि किञ्चिदेवासत्क्रियते यस्योत्पादकं कारणमस्ति। यस्य तु गगनाम्भोरुहादेर्नास्ति कारणं तन्न क्रियते। न हि सर्वं सर्वस्य कारणमिष्टम्। नापि 'यद्यदसत्तत्क्रियत एव' इति व्याप्तिरिष्टा। किं तर्हि? 'यत्क्रियते तत्प्रागुत्पत्तेः कथञ्चिदसदेव' इति। ननु तुल्येऽप्यसत्कारित्वे कारणानां किमिति सर्वं सर्वस्यासतः कारणं न स्यादित्यन्यत्रापि समानम्। समाने हि सत्कारित्वे किमिति सर्वं सर्वस्य सतः[16] कारणं न स्यात्? कारणशक्तिप्रतिनियमात् 'सदप्यात्मादि न क्रियते' इत्यन्यत्रा[17]पि समानम्। प्रतिपादितप्रकारेण सर्वथा

१ स्वभावातिशयेपि। २ साधनेन। ३ प्रागुक्तप्रकारेण ग्रन्थानवस्था। ४ तन्निश्चयम्। ५ निश्चयलक्षणज्ञानापेक्षया निश्चयव्यवस्थापकज्ञानस्य (तद्विषयज्ञानस्य) द्वितीयत्वम्। ६ सांख्यानाम्। ७ निश्चयस्य। ८ निश्चयज्ञानस्य। ९ आवरणस्य अव्यक्तरूपं न संभवति-नित्यत्वात्। १० प्राणिनाम्। ११ विवेकख्यातिलक्षणादेः। १२ बन्धमोक्षलक्षणस्य। १३ परमते दध्यादिकार्यं धर्मि न केनचित्क्रियते। १४ असन्नपि क्रियत इत्यस्मिन्। १५ खरविषाणादेः। १६ आत्मादेः। १७ असत्कार्यवादपक्षेपि।

सतः कार्यत्वासम्भवात्कथञ्चिदसत्कार्यवादे एव चोपादानग्रहणादित्यादेर्हेतुचतुष्टयस्य विरुद्धता साध्यविपर्ययसाधनात्। तन्नोत्पत्तेः प्राक्कारण(णे)कार्यसद्भावसिद्धिः।

यच्चोक्तम्-भेदानां परिमाणादित्यादिहेतोः कारणं च प्रधानमेवैकं सिद्ध्यति; तदप्युक्तिमात्रम्; 'भेदानां परिमाणात्' इत्यस्यैककारणपूर्वकत्वेनाविनाभावासिद्धेः, अनेककारणपूर्वकत्वेऽप्यस्याविरोधात्। कारणमात्रपूर्वकत्वेनैव हि तस्याविनाभावः, तत्साधने च सिद्धसाधनम्।

'भेदानां समन्वयदर्शनात्' इति चासिद्धम्; न खलु सुखदुःखमोहसमन्वितं प्रमाणतः प्रसिद्धम्, शब्दादिव्यक्तस्याचेतनतया चेतनसुखादिसमन्वयविरोधात्। प्रयोगः-ये चैतन्यरहिता न ते सुखादिसमन्वयाः यथा गगनाम्भोजादयः, चैतन्यरहिताश्च शब्दादय इति।

ननु चैतन्येन सुखादिसमन्वयस्य यदि व्याप्तिः प्रसिद्धा, तदा तन्निवर्त्तमानं शब्दादिपु सुखादिसमन्वयत्वं निवर्त्तयेत्। न चासौ सिद्धा, पुरुषस्य चेतनत्वेपि सुखादिसमन्वयासिद्धेः; इत्यप्यपेशलम्; स्वसंवेदनसिद्धिप्रस्तावे सुखादिस्वभावतयात्मनः प्रसाधनात्।

यच्चान्यदुक्तम्-प्रसादतापदैन्यादिकार्योपलम्भात्प्रधानान्वितत्वसिद्धिः; तदप्ययुक्तम्; अनेकान्तात्, कापिलयोगिनां हि पुरुषं प्रकृतिविभक्तं भावयतां पुरुषमालम्ब्य स्वभ्यस्तयोगानां प्रसादो भवति प्रीतिश्च, अनभ्यस्तयोगानां क्षिप्रतरमात्मानमपश्यतामुद्वेगः, प्रकृत्या जडमतीनां मोहो जायते, न चासौ पुरुषः प्रधानान्वितः परैरिष्टः। सङ्कल्पात्प्रीत्याद्युत्पत्तिर्न पुरुषादिति शब्दादिष्वपि समानम्। सङ्कल्पमात्रभावित्वे च प्रीत्यादीनामात्मरूपताप्रसिद्धिः, सङ्कल्पस्य ज्ञानरूपत्वात्, ज्ञानस्य चात्मधर्मतया स्वसंवेदनसिद्धिप्रस्तावे प्रतिपादितत्वात् इत्यलमतिप्रसङ्गेन।

अस्तु वा प्रीत्यादिसमन्वयो व्यक्ते, तथापि न प्रधानप्रसिद्धिः, साधनस्यान्वयासिद्धेः। न खलु यथाभूतं त्रिगुणात्मकमेकं नित्यं व्यापि चास्य कारणं साधयितुमिष्टं तथाभूतेन कैचिद्धेतोः प्रति-

१ पर्यायरूपतया। २ परमते सर्वथा सत्कार्यं साध्यम्। ३ कथञ्चिदसत्कार्यस्य। ४ शब्दादिव्यक्तम्। ५ तथा इति मूलपुस्तके पाठः। ६ भिन्नम्। ७ मनसः। ८ सङ्कल्पात्प्रीत्यादिहेतुः शब्दादिरिति। ९ ज्ञानस्यात्मधर्मत्वसमर्थनविस्तरेण। १० समन्वयदर्शनादित्यस्य। ११ व्याप्त्यसिद्धेः। १२ दृष्टान्ते।

बन्धः सिद्धः । नापि यदात्मकं[1] कार्यमुपलभ्यते कारणेनाप्यवश्यं तदात्मना भाव्यम्, अन्यथा महदादौ हेतुमत्त्वानित्यत्वाव्यापित्वादिधर्मोपलम्भात् प्रधानेपि तादूप्यप्रसिद्धिप्रसङ्गाद्धेतोर्विरुद्धतानुषङ्गः[2] ।

यच्चेदं निदर्शनमुक्तम्-'यथा घटशरावादयो मृज्जातिसमन्विताः' इति; तदप्यसङ्गतम्; साध्यसाधनविकलत्वादस्य । न हि मृत्त्वसुवर्णत्वादिजातिर्नित्यनिरंशव्याप्येकरूपा प्रमाणतः प्रसिद्धा[3] येन तदात्मककारणसम्भूतत्वं[4] तत्समन्वितत्वं च प्रसिद्ध्येत्, प्रतिव्यक्ति तस्याः प्रतिभासभेदाद्भेदसिद्धेः । विस्तरेण[5] चास्याः सिद्ध्यभावं सामान्यविचारप्रस्तावे प्रतिपादयिष्याम इत्यलमतिविस्तरेण ।

तथा 'समन्वयात्'[6] इत्यस्यानेकान्तः; चेतनत्वभोक्तृत्वादिधर्मैः[7] पुरुषाणाम्, प्रधानपुरुषाणां च नित्यत्वादिधर्मैः[8] समन्वितत्वेपि तथाविधैककारणपूर्वकत्वानभ्युपगमात्[9] ।

एतेन[10] शक्तितः प्रवृत्तेरित्याद्यप्यनैकान्तिकत्वादिदोषदुष्टत्वादेककारणपूर्वकत्वासाधनमित्यवसातव्यम्[11] । तथा हि-प्रेक्षावत्कारणमेतेभ्यः[12] [13] प्रसाध्यते, कारणमात्रं वा? प्रथमविकल्पे अनेकान्तः[14], विनापि हि प्रेक्षावता कर्त्रा स्वहेतुसामर्थ्यप्रतिनियमात्प्रतिनियतकार्यस्योत्पत्त्यविरोधात् । न च प्रधानं प्रेक्षावद्युक्तं तस्याचेतनत्वात् प्रेक्षायाश्च चेतनापर्यायत्वात् । अथ कारणमात्रं[15] साध्यते, तर्हि सिद्धसाध्यता । न ह्यस्माकं[16] कारणमन्तरेण कार्यस्योत्पादोऽभीष्टः । कारणमात्रस्य च 'प्रधानम्' इति संज्ञाकरणे न किञ्चिद्विरुध्यतेऽर्थभेदाभावात्[17] ।

किञ्च, शक्तितः प्रवृत्तेरित्यनेन यदि कथञ्चिदव्यतिरिक्तशक्तियोगि[18][19]कारणमात्रं साध्यते; तदा सिद्धसाध्यता । अथ व्यतिरिक्त-

१ सत्त्वादि । २ समन्वयादिति हेतुर्नित्यत्वादिधर्मोपेते प्रधाने साध्ये प्रयुक्तोऽनित्यत्वादिधर्मोपेतप्रधानप्रसाधनाद्विरुद्धः । ३ सा नित्यनिरंशव्याप्येकरूपजातिः । ४ तया नित्यनिरंशव्याप्येकरूपजात्या । ५ नित्यनिरंशव्याप्येकरूपजातिनिराकरणविस्तरेण । ६ नित्यनिरंशव्याप्येकरूपजात्या । ७ हेतोः । ८ निरंशत्वादिभिश्च । ९ परेण । १० हेतुद्वयनिराकरणपरेण ग्रन्थेन । ११ हेतुत्रयमपि । १२ नित्यत्वमेषां यतः । १३ हेतुभ्यः । १४ अकृष्यभूरुहादिकं प्रेक्षावत्कारणमन्तरेणापि दृश्यतेऽतः सर्वं प्रेक्षावत्कारणपूर्वकं वा नेति सन्दिग्धानेकान्तः । १५ कारणसामान्यम् । १६ जैनानाम् । १७ अस्माभिः कारणमात्रं भवद्भिः प्रधानं प्रतिपाद्यते इत्यत्र । १८ द्रव्यस्वभावेन । १९ कार्यनिष्पादने ।

विचित्रशक्तियुक्तमेकं नित्यं कारणम्; तदानैकान्तिकता हेतोः। तथाभूतेन क्वचिदन्वयासिद्धेरसिद्धता च, न खलु व्यतिरिक्तशक्तिवशात् कस्यचित्कारणस्य क्वचित्कार्ये प्रवृत्तिः प्रसिद्धा, शक्तीनां स्वात्मभूतत्वात्।

यच्चेदमुक्तम्-अविभागाद्वैश्वरूप्यस्य; तदप्यसाम्प्रतम्; प्रलयकालस्यैवाप्रसिद्धेः। सिद्धौ वा तदासौ महदादीनां लयो भवन् पूर्वस्वभावप्रच्युतौ भवेत्, अप्रच्युतौ वा? यदि प्रच्युतौ; तर्हि तेषां तदा विनाशसिद्धिः स्वभावप्रच्युतेर्विनाशरूपत्वात्। अथाप्रच्युतौ; तर्हि लयानुपपत्तिः, नहि अविकलमात्मनस्तत्त्वमनुभवतः कस्यचिल्लयो युक्तोऽतिप्रसङ्गात्। परस्परविरुद्धं चेदम् 'अविभागो वैश्वरूप्यम्' इति च। वैश्वरूप्यं च प्रधानपूर्वत्वे नोपपद्यत एव, तन्मयत्वेन सर्वस्य जगतस्तत्स्वरूपवदेकत्वप्रसङ्गात्, इति कस्याऽविभागः स्यादिति? तन्न प्रधानस्य सकलजगत्कर्तृत्वं सिद्धम्, यतस्तत्सिद्धौ प्रधानस्य सर्वज्ञता, कर्तृत्वस्य कारणशक्तिपरिज्ञानाविनाभावासिद्धेरित्युक्तं प्रागीश्वरनिराकरणे, तदलमतिप्रसङ्गेन।

एतेन सेश्वरसाङ्ख्यैर्यदुक्तम्-'न प्रधानादेव केवलादमी कार्यभेदाः प्रवर्त्तन्ते तस्याचेतनत्वात्। न ह्यचेतनोऽधिष्ठायकमन्तरेण कार्यमारभमाणो दृष्टः। न चान्यात्माऽधिष्ठायको युक्तः; सृष्टिकाले तस्याज्ञत्वात्। तथा हि-बुद्ध्यध्यवसितमेवार्थं पुरुषश्चेतयते। बुद्धिसंसर्गाच्च पूर्वमसावज्ञ एव, न जातु कञ्चिदर्थं विजानाति। न चाज्ञानमर्थं कश्चित्कर्त्तुं शक्तः। अतो नासौ कर्त्ता। तस्मादीश्वर एव प्रधानापेक्षः कार्यभेदानां कर्त्ता, न केवलः। न खलु देवदत्तादिः केवलः पुत्रम्, कुम्भकारो वा घटं जनयति' इति; तदपि प्रतिव्यूढम्; प्रत्येकं तयोः कर्तृत्वस्यासम्भवे सहितयोरप्यसम्भवात्, अन्यथा प्रत्येकपक्षनिक्षिप्तदोषानुषङ्गः।

अथोच्यते-यदि नाम प्रत्येकं तयोः कर्तृत्वासम्भवस्तथापि सहितयोः कथं तदभावः? न हि केवलानां चक्षुरादीनां रूपादि-

१ धर्मस्वभावे भेदः। २ साध्यते इति शेषः। ३ सन्दिग्धरूपा। ४ स्वस्य। ५ स्वरूपम्। ६ वस्तुनः। ७ प्रधानात्मनोरपि लयप्रसङ्गात्। ८ अविभागाद्वैश्वरूप्यमिति। ९ एकत्वम्। १० अनेकत्वम्। ११ लोके आदौ विभागोऽस्ति यदि तदा पश्चाद्विभागानामविभागः स्यात्। १२ कर्तृत्वं कारणशक्तिज्ञानाविनाभावि न भवतीति समर्थनेन। १३ प्रकृतीश्वरनिराकरणपरेण ग्रन्थेन। १४ महदादयः। १५ ईश्वरं प्रेरकम्। १६ संसार्यात्मा। १७ कार्यम्। १८ सहितयोस्तयोः कर्तृत्वसम्भवश्चेत्। १९ आलोकादीनां च।

ज्ञानोत्पत्तिसामर्थ्याभावे सहितानामप्यसौ युक्तः; तदप्युक्तिमात्रम्; यतः साहित्यं नामानयोरन्योन्यं सहकारित्वम्। तच्चान्योन्यातिशयाधानाद्वा स्यात्, एकार्थकारित्वाद्वा? न तावदाद्यकल्पना युक्ता; नित्यत्वेनानयोर्विकाराभावात्। नापि द्वितीय-
५ कल्पना युक्ता; कार्याणां यौगपद्यप्रसङ्गात्। अप्रतिहतसामर्थ्यस्येश्वरप्रधानाख्यकारणस्य सदा सन्निहितत्वेनाविकलकारणत्वात्तेषाम्। तथाहि-यद्यदाऽविकलकारणं तत्तदा भवत्येव यथाऽन्त्यक्षणप्राप्तायाः सामग्रीतोऽङ्कुरः, अविकलकारणं चाशेषं कार्यमिति।

ननु यद्यपि कारणद्वयमेतन्नित्यं सन्निहितं तथापि क्रमेणैवामी
१० कार्यभेदाः प्रवर्त्तिष्यन्ते। महेश्वरस्य हि प्रधानगताः सत्त्वादयस्त्रयो गुणाः सहकारिणः, तेषां च क्रमवृत्तित्वात्कार्याणामपि क्रमः। तथाहि-यदोद्भूतवृत्तिना रजसा युक्तो भवत्यसौ तदा सर्गहेतुः प्रजानां भवति प्रसवकार्यत्वाद्रजसः, यदा तु सत्त्वमुद्भूतवृत्ति संश्रयते तदा लोकानां स्थितिकारणं भवति सत्त्वस्य
१५ स्थितिहेतुत्वात्, यदा तमसोद्भूतशक्तिना समायुक्तो भवति तदा प्रलयं सर्वजगतः करोति तमसः प्रलयहेतुत्वात्। तदुक्तम्—

"रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ प्रजानां प्रलये तमःस्पृशे। अजाय सर्गस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने नमः ॥ १ ॥" [कादम्बरी पृ० १]

२० इत्यप्यसाम्प्रतम्; यतः प्रकृतीश्वरयोः सर्गस्थितिप्रलयानां मध्येऽन्यतमस्य क्रियाकाले तदपरकार्यद्वयोत्पादने सामर्थ्यमस्ति, न वा? यद्यस्ति; तर्हि सृष्टिकालेपि स्थितिप्रलयप्रसङ्गोऽविकलकारणत्वादुत्पादवत्। एवं स्थितिकालेप्युत्पादविनाशयोः, विनाशकाले च स्थित्युत्पादयोः प्रसङ्गः, न चैतद्युक्तम्। न खलु पर-
२५ स्परपरिहारेणावस्थितानामुत्पादादिधर्माणामेकत्र धर्मिण्येकदा सद्भावो युक्तः। अथ नास्ति सामर्थ्यम्; तदेकमेव स्थित्यादीनां मध्ये कार्यं सदा स्यात् यदुत्पादने तयोः सामर्थ्यमस्ति, नापरं कदाचनापि तदुत्पादने तयोः सदा सामर्थ्याभावात्। अविकारिणोश्च प्रकृतीश्वरयोः पुनः सामर्थ्योत्पत्तिविरोधात्, अन्यथा
३० नित्यैकस्वभावताव्याघातः।

अथ तत्स्वभावेपि प्रधाने सत्त्वादीनां मध्ये यदेवोद्भूतवृत्ति तदेव कारणतां प्रतिपद्यते नान्यत्, तत्कथं स्थित्यादीनां यौगपद्य-

---

१ प्रसव उत्पत्तिः। २ ईश्वरः कर्ता। ३ न जायते [illegible]। ४ त्रयी वेदास्त्रयी। ५ सत्त्वरजस्तमोरूपाय। ६ स्थितिप्रलयौ धर्मिणो सृष्टिकाले भवतः तदा अविकलकारणत्वात्। ७ प्रजालक्षणे। ८ सामर्थ्यमुत्पद्यते चेत्।

प्रसङ्ग इति? अत्रोच्यते-तेषामुद्धृतवृत्तित्वं नित्यम्, अनित्यं वा? न तावन्नित्यम्; कादाचित्कत्वात्, स्थित्यादीनां यौगपद्यप्रसङ्गाच्च। अथानित्यम्; कुतोऽस्य प्रादुर्भावः? प्रकृतीश्वरादेव, अन्यतो वा हेतोः, स्वतन्त्रो वा? प्रथमपक्षे सदास्य सद्भावप्रसङ्गः, प्रकृतीश्वराख्यस्य हेतोर्नित्यरूपतया सदा सन्निहितत्वात्। न चान्यतस्त- ५ त्प्रादुर्भावो युक्तः; प्रकृतीश्वरव्यतिरेकेणापरकारणस्यानभ्युपगमात्। तृतीयपक्षे तु कादाचित्कत्वविरोधोऽस्य स्वातन्त्र्येण भवतो देशकालनियमायोगात्। स्वभावान्तरायत्तवृत्तयो हि भावाः कादाचित्काः स्युः तद्भावाभावप्रतिबद्धत्वात्तत्सत्त्वासत्त्वयोः, नान्ये तेषामपेक्षणीयस्य कस्यचिदभावात्। १०

किञ्च, आत्मानं जनयति भावो निष्पन्नः, अनिष्पन्नो वा? न तावन्निष्पन्नः; तस्यामवस्थायामात्मनोपि निष्पन्नरूपाव्यतिरेकितया निष्पन्नत्वान्निष्पन्नस्वरूपवत्। नाप्यनिष्पन्नः; अनिष्पन्नस्वरूपत्वादेव गगनाम्भोजवत्। तस्मात्प्रकारान्तरेणाशेषज्ञत्वासिद्धेरावरणापाये एवाशेषविषयं विज्ञानम्। तच्चात्मन एवेति परीक्षा- १५ दक्षैः प्रतिपत्तव्यम्। तच्च विज्ञानमनन्तदर्शनसुखवीर्याविनाभावित्वादनन्तचतुष्टयस्वभावत्वमात्मनः प्रसाधयतीति सिद्धो मोक्षो जीवस्यानन्तचतुष्टयस्वरूपलाभलक्षणः, तस्यापेतप्रतिबन्धकस्यात्मस्वरूपतया जीवन्मुक्तिवत्परममुक्तावप्यभावासिद्धेः॥

ये त्वात्मनो जीवन्मुक्तौ कवलाहारमिच्छन्ति तेषां तत्रास्यान- २० न्तचतुष्टयस्वभावाभावोऽनन्तसुखविरहात्। तद्विरहश्च बुभुक्षाप्रभवपीडाक्रान्तत्वात्। तत्पीडाप्रतीकारार्थो हि निखिलजनानां कवलाहारग्रहणप्रयासः प्रसिद्धः। ननु भोजनादेः सुखाद्यनुकूलत्वात्कथं भगवतोऽतोऽनन्तसुखाद्यभावः? दृश्यते ह्यस्मदादौ क्षुत्पीडिते निश्शक्तिके च भोजनसद्भावे सुखं वीर्यं चोत्प- २५ द्यमानम्; इत्यप्ययुक्तम्; अस्मदादिसुखादेः कादाचित्कतया विषयेभ्य एवोत्पत्तिसम्भवात्। भगवत्सुखादेश्च तत्सम्भवेऽनन्तताव्याघातः। तथाहि-क्षुत्क्षामकुक्षिर्निश्शक्तिकश्चासौ यदा कवलाहारग्रहणे प्रवृत्तस्तदैव तदीयसुखवीर्ययोर्नष्टत्वात्कुतोऽनन्तता? वीतरागद्वेषत्वाच्चास्य तद्ग्रहणप्रयासायोगः। प्रयोगः-केवली न ३०

१ कारणस्य। २ जायमानस्य। ३ कार्यलक्षणाद्भावादपरः कारणलक्षणो भावः स्वभावान्तरम्। ४ कारणाधीनवृत्तय इत्यर्थः। ५ तस्य कार्यस्य। ६ स्वरूपम्। ७ कार्यलक्षणः। ८ निष्पन्नायाम्। ९ जगत्कर्तृत्वादिलक्षणेन। १० जीवमयत्वेन। ११ श्वेतपटाः। १२ भगवदीय।

भुङ्क्ते रागद्वेषाभावानन्तवीर्यसद्भावान्यथानुपपत्तेः। ननु सममित्रशत्रूणां साधूनां भोजनादिकं कुर्वतामपि वीतरागद्वेषत्वसम्भवादनैकान्तिको हेतुः; इत्यप्यसाम्प्रतम्; मोहनीयकर्मणः सद्भावे भोजनादिकं कुर्वतां प्रमत्तगुणस्थानप्रवृत्तीनां साधूनां परमार्थतो ५ वीतरागत्वासम्भवात्। तन्नानैकान्तिकोयं हेतुः । नापि विरुद्धो विपक्षे[3] वृत्तेरभावात्।

कवलाहारित्वे चास्य सरागत्वप्रसङ्गः। प्रयोगः–यो यः कवलं भुङ्क्ते स स न वीतरागः यथा रथ्यापुरुषः, भुङ्क्ते च कवलं भवन्मतः केवलीति। कवलाहारो हि स्मरणाभिलाषाभ्यां भुज्यते, १० भुक्तवता च कण्ठोष्ठप्रमाणतस्तृप्तेनाऽरुचितस्त्यज्यते । तथा चाभिलाषाऽरुचिभ्यामाहारे प्रवृत्तिनिवृत्तिमत्त्वात्कथं वीतरागत्वम्? तदभावान्नाप्तता। अथाभिलाषाद्यभावेप्याहारं गृह्णात्यसौ तथाभूतातिशयत्वात्[4], ननु चाहाराभावलक्षणोप्यतिशयोऽस्याभ्युपगन्तव्योऽनन्तगुणत्वाद्गगनगमनाद्यतिशयवत्।

१५ अथाहाराभावे देहस्थितिरेवास्य न स्यात्; तथाहि–भगवतो देहस्थितिः आहारपूर्विका देहस्थितित्वादस्मदादिदेहस्थितिवत्। नन्वनेनानुमानेनास्याहारमात्रम्, कवलाहारो वा साध्येत? प्रथमपक्षे सिद्धसाध्यता, 'आसयोगकेवलिनो जीवा आहारिणः' इत्यभ्युपगमात्, तत्र च कवलाहाराभावेप्यन्यस्य कर्मनोकर्मा- २० दानलक्षणस्याविरोधात्। षड्विधो ह्याहारः—

"णोकम्म कम्महारो कवलाहारो य लेप्पमाहारो।
ओज मणो वि य कमसो आहारो छव्विहो णेयो॥" [ ]

इत्यभिधानात् । न खलु कवलाहारेणैवाहारित्वं जीवानाम्; एकेन्द्रियाण्डजत्रिदशानामभुञ्जानतिर्यग्मनुष्याणां चानाहारित्व- २५ प्रसङ्गात्। न चैवम्—

"विग्गहगइमावण्णा केवलिणो समुहदो अजोगी य।
सिद्धा य अणाहारा सेसा आहारिणो जीवा॥"

[जीवकाण्ड गा० ६६५, श्रावकप्रज्ञ० गा० ९८]

---

१ कवलाहाराभावमन्तरेणानुपपत्तेस्तयोः । २ हेतोरेकांशं गृहीत्वा दूषयति । ३ कवलाहारिणि । ४ अभिलाषाद्यभावेप्याहारग्रहणलक्षण । ५ जैनैः । ६ नोकर्म (१), कर्माहारः (२), कवलाहारः (३), लेप्यः आहारः (४) ओजः (५), मानसिकः (६) अपि च क्रमशः आहारः षड्विधो ज्ञेयः । ७ विग्रहगतिमापन्नाः केवलिनः समुद्घात (दण्डकपाटेति समुद्घातद्वय) गताः अयोगिनश्च। सिद्धाश्च अनाहाराः शेषा आहारिणो जीवाः । ८ दण्डकबाटावस्थायाम्। ९ अर्हदवस्थातः अन्ते सिद्धावस्थात आदौ या अवस्था सा अयोगावस्था।

इत्यभिधानात्। द्वितीयपक्षे तु त्रिदशादिभिर्व्यभिचारः; तेषां कवलाहाराभावेपि देहस्थितिसम्भवात्। अथ 'औदारिकशरीरस्थितित्वात्' इति विशेष्योच्यते। तथाहि–या या औदारिकशरीरस्थितिः सा सा कवलाहारपूर्विका यथास्मदादीनाम्, औदारिकशरीरस्थितिश्च भगवतः, इति न त्रिदशशरीरस्थित्या व्यभिचारः; इत्यप्यसारम्; तदीयौदारिकशरीरस्थितेः परमौदारिकशरीरस्थितिरूपतयाऽस्मदाद्यौदारिकशरीरस्थितिविलक्षणत्वात्। तस्याश्च केवलावस्थायां केशादिवृद्ध्यभाववद्भुक्त्यभावोप्यविरुद्ध एव। ५

कथं चैवं[1] वादिनो[2] भगवत्प्रत्यक्षमतीन्द्रियं स्यात्? शक्यं हि वक्तुम्–तत्प्रत्यक्षमिन्द्रियजं प्रत्यक्षत्वादस्मदादिप्रत्यक्षवत्। तथा सरागोऽसौ[4] वक्तृत्वात्तद्वदेव। न ह्यस्मदादौ दृष्टो धर्मः[3] कश्चित्तत्र[5] साध्यः कश्चिन्नेति वक्तुं युक्तम्, स्वेच्छाकारित्वानुषङ्गात्। तथा[6] च न कश्चित्केवली वीतरागो वा, इति कस्य भुक्तिः प्रसाध्यते? यदि चैकत्र[7] तच्छरीरस्थितेः कवलाहारपूर्वकत्वोपलम्भात्सर्वत्र तथाभावः साध्यते; तर्हि घटादौ सन्निवेशादेर्बुद्धिमत्पूर्वकत्वोपलम्भात्तन्वादीनामप्यतो बुद्धिमत्पूर्वकत्वसिद्धिः स्यात्। द्विचन्द्रादिप्रत्ययस्य निरालम्बनत्वोपलम्भाच्चाखिलप्रत्ययानां निरालम्बनत्वप्रसङ्गः स्यात्। अथ यादृशं बुद्धिमत्कारणव्याप्तं सन्निवेशादि घटादौ दृष्टं तादृशस्य तन्वादिष्वभावान्नातस्तेषां तत्पूर्वकत्वसिद्धिः; तर्हि यादृशमौदारिकशरीरस्थितित्वमस्मदादौ तद्भुक्तिपूर्वकं[8] दृष्टं तादृशस्य भगवत्परमौदारिकशरीरस्थितावभावान्नातस्तस्यास्तद्भुक्तिपूर्वकत्वसिद्धिः[9][10]। यथा च प्रत्ययत्वाविशेषेपि कस्यचिन्निरालम्बनत्वमन्यस्यान्यत्वम्[11][12][13], तथा च तच्छरीरस्थितेस्तत्त्वाविशेषेपि निराहारत्वमितरस्य[14] चेष्यतामविशेषात्। १० १५ २० २५

अथ 'अन्यादृशमौदारिकशरीरस्थितित्वमन्यादृशाश्च[15][16] पुरुषा न सन्ति' इत्युच्यते तर्हि मीमांसकमतानुप्रवेशः[17]। अतो यथान्या-

१ औदारिकशरीरस्थितित्वात्कवलाहारित्वमेवेति। २ कवलाहारलक्षणः। ३ सरागत्वसेन्द्रियत्वलक्षणः। ४ भगवतः सरागत्वे तत्प्रत्यक्षस्येन्द्रियजत्वे च। ५ अस्मदादौ। ६ अक्रियादर्शिनः कृतबुद्ध्युत्पादकत्वम्। ७ सप्तधातुमलोपेतम्। ८ तस्य=कवलस्य। ९ औदारिकशरीरस्थितित्वादिति हेतोः। १० कवलस्य। ११ द्विचन्द्रादिप्रत्ययस्य। १२ घटादिप्रत्ययस्य। १३ सालम्बनत्वम्। १४ आहारपूर्वकत्वम्। १५ परमौदारिकम्। १६ अनाहारिणः। १७ मीमांसकमतेपि सर्वज्ञलक्षणोऽन्यादृशः पुरुषो नास्ति।

दृशाः सन्ति पुरुषास्तथा तत्स्थितित्वमपि। कथमन्यथा सप्तधातुमलापेतत्वं तच्छरीरस्य स्यात्? तत्सम्भवे तत्स्थितेरतद्भुक्तिपूर्वकत्वमपि स्यात्।

तपोमाहात्म्याच्चतुरास्यत्वादिवच्चाभुक्तिपूर्वकत्वे तस्याः को ५ विरोधः? दृश्यते च पञ्चकृत्वो भुञ्जानस्य यादृशी तच्छरीरस्थितिस्तादृश्येव प्रतिपक्षभावनोपेतस्य चतुस्त्रिद्व्येकभोजनस्यापि। तथा प्रतिदिनं भुञ्जानस्य यादृशी सा तादृश्येवैकद्व्यादिदिनान्तरितभोजिनोपि। श्रूयते च बाहुबलिप्रभृतीनां संवत्सरप्रमिताहारवैकल्येपि विशिष्टा शरीरस्थितिः। आयुःकर्मैव हि प्रधानं तत्स्थिते-१० र्निमित्तम्, भुक्त्यादिस्तु सहायमात्रम्। तच्छरीरोपचयोपि लाभान्तरायविनाशात्प्रतिसमयं तदुपचयनिमित्तभूतानां दिव्यपरमाणूनां लाभाद् घटते। एवं छद्मस्थावस्थावच्च केवल्यवस्थायामप्यस्य भुक्त्यऽभ्युपगमे अक्षिपक्ष्मनिमेषो नखकेशवृद्ध्यादिश्चाभ्युपगम्यताम्। तदभावातिशयाभ्युपगमे वा भुक्त्यभावातिशयो-१५ प्यभ्युपगन्तव्यो विशेषाभावात्।

ननु मासं वर्षं वा तदभावे तत्स्थितावपि नाऽऽकालं तत्स्थितिः पुनस्तदाहारे प्रवृत्त्युपलम्भादिति चेत्; कुत एतत्? आकालं तत्स्थितेरनुपलम्भाच्चेत्; सर्वज्ञवीतरागस्याप्यत एवासिद्धेर्लाभमिच्छतो मूलोच्छेदः स्यात्। दोषावरणयोर्हान्यतिशयोपलम्भेन २० क्वचिदात्यन्तिकप्रक्षयसिद्धेस्तत्सिद्धौ क्वचिच्छरीरिण्यात्यन्तिको भुक्तिप्रक्षयोपि प्रसिध्येत् तदुपलम्भस्यात्राप्यविशेषात्। तन्न शरीरस्थितेर्भगवतो भुक्तिसिद्धिः।

अथोच्यते–वेदनीयकर्मणः सद्भावात्तत्सिद्धिः; तथाहि–भगवति वेदनीयं स्वफलदायि कर्मत्वादायुःकर्मवत्; तदप्युक्ति-२५ मात्रम्; यतोऽतोप्यनुमानात्तत्फलमात्रं सिद्ध्येन्न पुनर्भुक्तिलक्षणम्। अथ क्षुदादिनिमित्तवेदनीयसद्भावाद्भुक्तिसिद्धिः; ननु तन्निमित्तं तत्तत्रास्तीति कुतः? क्षुदादिफलाच्चेदन्योन्याश्रयः–सिद्धे हि भगवति तन्निमित्तकर्मसद्भावे तत्फलसिद्धिः, तस्याश्च तन्निमित्तकर्मसद्भावसिद्धिरिति।

---

१ अन्यादृशौदारिकशरीरस्थितेः। २ अकवल। ३ भोजने विरक्तभावनोपेतस्य। ४ पुष्टिः। ५ वीतरागस्य। ६ अतिशये। ७ कालमभिव्याप्य। मरणपर्यन्तमित्यर्थः। ८ कवलाहारमन्तरेण। ९ तस्य कवलस्य। १० सर्वज्ञसद्भावम्। (कवलाहारत्वम्) ११ सर्वज्ञसद्भावोच्छेदः। १२ दोषा रागादिभावकर्म। १३ आवरणं द्रव्यकर्म। १४ दृष्टान्ते। १५ आत्मनि। १६ स्वफलं क्षुदादिदुःखम्।

अथाऽसातवेदनीयोदयात्तत्र तत्सिद्धिः; न; सामर्थ्यवैकल्यात् तस्य। अविकलसामर्थ्यं ह्यसातादिवेदनीयं स्वकार्यकारि, सामर्थ्यवैकल्यं च मोहनीयकर्मणो विनाशात्सुप्रसिद्धम्। यथैव हि पतिते सैन्यनायकेऽसामर्थ्यं सैन्यस्य तथा मोहनीयकर्मणि नष्टे भगवत्यसामर्थ्यमघातिकर्मणाम्। यथा च मन्त्रेण निर्विषीकरणे कृते मन्त्रि- ५ णोपभुज्यमानमपि विषं न दाहमूर्च्छादिकं कर्त्तुं समर्थम्, तथा असातादिवेदनीयं विद्यमानोदयमप्यसति मोहनीये निःसामर्थ्यत्वान्न क्षुद्दुःखकरणे प्रभु सामग्रीतः कार्योत्पत्तिप्रसिद्धेः।

मोहनीयाभावश्च प्रसिद्धो भगवतः, तीव्रतरशुक्लध्यानानलनिर्दग्धघनघातिकर्मेन्धनत्वात्। यदि च तदभावेपि तदुदयः स्वकार्य- १० कारी स्यात्; तर्हि परघातकर्मोदयात्परान् यष्ट्यादिभिस्ताडयेत् स एव वा परैस्ताड्येत। परघातोदयोपि हि संयतानामर्हदवसानानामस्ति। अथ परमकारुणिकत्वात्तदुदयेपि न परांस्ताडयति उपसर्गाभावाच्च न च तैस्ताड्यते; तर्ह्यनन्तसुखवीर्यत्वाद्बाधाविरहाच्चासातादिवेदनीयोदये सत्यपि भोजनादिकं न कुर्यात्। मोह- १५ कार्यत्वाच्च करुणायाः कथं तत्क्षये परमकारुणिकत्वं तस्य स्यात्?

किञ्च, कर्मणां यद्युदयो निरपेक्षः कार्यमुत्पादयति; तर्हि त्रिवेदानां कषायाणां वा प्रमत्तादिषूदयोस्तीति मैथुनं भ्रूकुट्यादिकं च स्यात्। ततश्च मनसः संक्षोभात्कथं शुक्लध्यानातिः क्षपकश्रेण्यारोहणं वा? तदभावाच्च कथं कर्मक्षपणादि घटेत? २०

नन्वेवं[1] नामाद्युदयोपि तत्र स्वकार्यकारी न स्यात्; इत्यप्यसङ्गतम्; शुभप्रकृतीनां तत्राप्रतिबद्धत्वेन स्वकार्यकारित्वसम्भवात्। यथा हि बलवता राज्ञा स्वमार्गानुसारिणा लब्धे देशे दुष्टा जीवन्तोपि न स्वदुष्टाचरणस्य विधातारः सुजनास्त्वप्रतिहततया स्वकार्यस्य विधातारस्तथा प्रकृतमपि। कथं पुनरशुभप्रकृतीनामेवार्हति २५ प्रतिबद्धं सामर्थ्यम् न पुनः शुभप्रकृतीनामिति चेत्; उच्यते-अशुभप्रकृतीनामर्हन्नऽनुभागं घातयति न तु शुभानाम्, यतो गुणघातिनां दण्डो नाऽदोषाणाम्। यदि च प्रतिबद्धसामर्थ्यमप्यसातादिवेदनीयं स्वकार्यकारि स्यात्; तर्हि दण्डकवाटप्रतरादिविधानं भगवतो व्यर्थम्। तद्धि यदा न्यूनमायुर्वेदनीयादिकमधिक- ३० स्थितिकं भवति तदाऽनेन कर्मणां समस्थित्यर्थं विधीयते। न चाधिकस्थितिकत्वेन फलदानसमर्थं कर्म उपायशतेनाप्यन्यथा

१ इति चेन्न। २ केवलिगुणस्थानान्तानाम्। ३ उदितस्य कर्मणः स्वकार्यकारित्वाभावप्रकारेण। ४ दुष्टनिग्रहशिष्टपालनकारिणा। ५ शुभाशुभकर्म। ६ शक्तिम्।

कर्त्तुं शक्यमिति न कश्चिन्मुक्तः स्यात् । अथ तपोमाहात्म्या-
न्निर्जीर्णमधिकस्थितिकत्वेन फलदानासमर्थम् आयुःकर्मसमानं
क्रियते[1]; तथा वेद्यमपि[2] क्रियतामविशेषात्[3]।

एतेनेदमप्यपास्तम्-यदि वेदनीयमफलम्[4] तत्र तन्नास्त्येव
५ ज्ञानावरणादिवत्, तथा च कर्मपञ्चकस्याभावस्तत्र प्राप्नोतीति।
कथम्[5]? यद्यायुरधिकानि वेद्यादीनि स्वफलदानसमर्थानि; तर्हि
मुक्त्यभावः। नो[6] चेन्न[7] तेषां कर्मत्वमिति[8] तदपनयनाय योगिनो
लोकपूरणादिप्रयासो व्यर्थः। अनुष्ठानविशेषेणापहृतसामर्थ्यानां[9]-
मवस्थानं[10] वेद्येपि समानम्। न च कारणमस्तीत्येतावतैव कार्यो-
१० त्पत्तिः, अन्यथेन्द्रियादि[11]कार्य[12]स्याप्यनुषङ्गाद्भगवतो मतिज्ञानस्य
रागादीनां च प्रसङ्गः। अथावरणक्षयोपशमस्य मोहनीयकर्मणश्च
सहकारिणो विरहान्नेन्द्रियादि स्वकार्ये व्याप्रियते; अत एव वेद-
नीयमपि न व्याप्रियेत। न ह्यत्यन्तमात्मनि परत्र वा विरतव्यामो-
हस्तदर्थं किञ्चिदादातुं हातुं वा प्रवर्त्तते। प्रयोगः-यो यत्रात्यन्तं
१५ व्यावृत्तव्यामोहः स तदर्थं किञ्चिदादातुं हातुं वा न प्रवर्त्तते यथा
व्यावृत्तव्यामोहा माता पुत्रे, व्यावृत्तात्यन्तव्यामोहश्च भगवान्,
ततः सोपि भोजनमादातुं क्षुदादिकं वा हातुं न प्रवर्त्तते। प्रवृत्तौ
वा मोहवत्त्वप्रसङ्गः; तथाहि-यस्तदादातुं हातुं वा प्रवर्त्तते स
मोहवान् यथाऽस्मदादिः, तथा चायं श्वेतपटाभिमतो जिन इति।
२० तथा च कुतोऽस्याप्तता रथ्यापुरुषवत्?

न चेयं बुभुक्षा मोहनीयानपेक्षस्य वेदनीयस्यैव कार्यम्, येना-
त्यन्तव्यावृत्तव्यामोहेप्यस्याः सम्भवः। भोक्तुम्[13]इच्छा[14] हि बुभुक्षा,
सा कथं वेदनीयस्यैव कार्यम्? इतरथा योन्यादिषु रन्तुमिच्छा
रिरंसा तत्कार्यं स्यात्। तथा च कवलाहारवत् स्त्र्यादावपि तत्प्र-
२५ वृत्तिप्रसङ्गान्नेश्वरादस्य विशेषः। यथा च रिरंसा प्रतिपक्षभाव-
नातो निवर्त्तते तथा बुभुक्षापि। प्रयोगः-भोजनाकाङ्क्षा प्रतिपक्ष-
भावनातो निवर्त्तते आकाङ्क्षात्वात् स्त्र्याद्याकाङ्क्षावत्। नन्वस्तु
तद्भावनाकाले तन्निवृत्तिः, पुनस्तदभावे प्रवृत्तिरित्येतत् स्त्र्याद्या-
काङ्क्षायामपि समानम्। यथा चास्याश्चेतसः प्रतिपक्षभावनाम-
३० यत्वादत्यन्तनिवृत्तिस्तथा प्रकृताकाङ्क्षाया अपि।

---

१ शुक्लध्यानतपोमाहात्म्येन भगवता। २ फलदानासमर्थम्। ३ अघातिकर्म-
त्वस्य। ४ फलदानासमर्थम्। ५ कथमपास्तमित्युच्यते। ६ फलदानसमर्थानि न
भवन्तीति चेत्। ७ तर्हीत्यध्याह्रियते। ८ इति सप्तानामभावेन परस्यानिष्टापादनम्।
९ नामगोत्रविशेषाणाम्। १० कर्मत्वेन। ११ आदिना त्रिभेदम्। १२ मतिज्ञानस्य
रागादेश्च। १३ इच्छा हि लोभभेदत्वेन मोहनीयस्य कार्यम्। १४ नरस्य।

अथाकाङ्क्षारूपा क्षुन्न भवति, तेन वीतमोहेप्यस्याः सम्भवः; तदप्ययुक्तम्; अनाकाङ्क्षारूपत्वेप्यस्या दुःखरूपतयाऽनन्तसुखे भगवत्यसम्भवात्। तथाहि—यत्र यद्विरोधि बलवदस्ति न तत्राभ्युदितकारणमपि तद्भवति[1] यथाऽत्युष्णप्रदेशे शीतम्, अस्ति च क्षुद्दुःखविरोधि बलवत् केवलिन्यनन्तसुखम्। तथा यत्[2]कार्य[3]विरोध्य[4]निवर्त्यं[5] यत्रास्ति तत्र तद[6]विकलमपि स्वकार्यं[8] न करोति यथा श्लेष्मादिविरुद्धानिवर्त्यपित्तविकाराक्रान्ते[7] न दध्यादि श्लेष्मादि करोति, वेद्यफलविरुद्धाऽनिवर्त्यसुखं[9] च भगवतीति।

अस्तु वा वेद्यं[10] तत्र बुभुक्षाफलप्रदायि, तथापि-बुभुक्षातः समवसरणस्थित एवासौ भुङ्क्ते, चर्यामार्गेण वा गत्वा? प्रथमपक्षे मार्गस्तेन[11] नाशितः स्यात्। कथं च बुभुक्षोदयानन्तरमाहारासम्पत्तौ म्लानस्य[12] यथावद्बोधहीनस्य मार्गोपदेशो घटेत? अथ तदुदयानन्तरं देवास्तत्राहारं सम्पादयन्ति; न; अत्र[13] प्रमाणाभावात्। 'आगमः' इति चेन्न; उभयप्रसिद्धस्यास्याप्यभावात्। स्वप्रसिद्धस्य[14] भावेपि नातस्तत्सिद्धिः, 'भुक्त्युपसर्गाभावः' इत्यादेरपि प्रमाणभूतागमस्य[15] भावात्। अथ चर्यामार्गेण गत्वासौ भुङ्क्ते; तत्रापि किं गृहं गृहं गच्छति, एकस्मिन्नेव वा गृहे भिक्षालाभं ज्ञात्वा प्रवर्त्तते? तत्राद्यपक्षे भिक्षार्थं गृहं गृहं पर्यटतो जिनस्याज्ञानित्वप्रसङ्गः। द्वितीयपक्षे तु भिक्षाशुद्धिस्तस्य न स्यात्। कथं चासौ मत्स्यादीन् व्याधलुब्धकप्रभृतिभिः सर्वत्र सर्वदा व्याहन्यमानान्प्राणिनस्तेषां पिशितानि च तथाऽशुच्यादीश्चार्थान् साक्षात्कुर्वन्नाहारं गृह्णीयात्? अन्यथा निष्करुणः स्यात्। जीवानां हि वधं विष्ठादिकं च साक्षात्कुर्वन्तो व्रतशीलविहीना अपि न भुञ्जते, भगवांस्तु व्रतादिसम्पन्नस्तत्साक्षात्कुर्वन् कथं भुञ्जीत? अन्यथा तेभ्योप्यसौ हीनसत्त्वः स्यात्।

यदप्युच्यते—यत्किञ्चिद्दृष्टं शुद्धमशुद्धं तत्स्मरन्तो यथास्मदादयो भोजनं कुर्वन्ति तथा केवली साक्षात्कुर्वन्निति; तदप्युक्तिमात्रम्; न ह्यस्मदादीनां परमचारित्रपदप्राप्तनाशेषज्ञेन भगवता साम्यमस्ति। अस्मदादयोपि हि यथा(यदा)कथञ्चित्[16]किञ्चिदशुद्धं वस्तु दृष्टं

---

१ क्षुदादिदुःखं धर्मि। २ यस्य वेदनीयस्य। ३ कार्यं क्षुत्। ४ अनन्तसुखम्। ५ न केनापि निराकर्तुं शक्यम्। ६ वेदनीयम्। ७ (नरे)। ८ श्लेष्मादिलक्षणस्य कार्यस्य करणे अविकलमपि। ९ अनन्तसुखम्। १० वेदनीयम्। ११ श्वेतपटस्य। १२ भगवतः। १३ अर्थे। १४ श्वेतपटमते प्रसिद्धस्यागमस्य। १५ जैनागमस्य। १६ केनचित्प्रकारेण मार्गादिगमनलक्षणेन।

स्मरन्तो भोजनपरित्यागेऽसमर्थास्तद्भुञ्जते तदा तद्दोषविशुद्ध्यर्थं गुरुवचनादात्मानं निन्दन्तः प्रायश्चित्तं कुर्वन्ति। ये तु तत्त्यागे समर्थाः पिण्डविशुद्धावुद्यतमनसो निर्वेदस्य परां काष्ठामापन्नास्त्यक्तशरीरापेक्षा जितजिव्हा अन्तरायविषये निपुणमतयस्ते
५ स्मरन्तोपि न भुञ्जते।

किञ्च, असौ भोजनं कुर्वाणः किमेकाकी करोति, शिष्यैर्वा परिवृतः? यदि एकाकीः पश्चाल्लग्नान् शिष्यान्विनिवार्य श्रावकानां गृहे गत्वा भुङ्क्ते तर्हि दीनः स्यात्। अथ तैः परिवृतः; तर्हि सावद्यप्रसङ्गः।

१० किञ्च, असौ भुक्त्वा प्रतिक्रमणादिकं करोति वा, न वा? करोति चेत्; अवश्यं दोषवान् सम्भाव्यते, तत्करणान्यथानुपपत्तेः। न करोति चेत्; तर्हि भुजिक्रियातः समुत्पन्नं दोषं कथं निराकुर्यात्? आहारकथामात्रेणापि ह्यप्रमत्तोपि सन् साधुः प्रमत्तो भवति, नार्हन्भुञ्जानोपीति श्रद्धामात्रम्। प्रमत्तत्वे चास्य
१५ श्रेणितः पतितत्वान्न केवलभाक्त्वम्।

किमर्थं चासौ भुङ्क्ते-शरीरोपचयार्थम्, ज्ञानध्यानसंयमसंसिद्ध्यर्थं वा, क्षुद्वेदनाप्रतीकारार्थं वा, प्राणत्राणार्थं वा? न तावच्छरीरोपचयार्थम्; लाभान्तरायप्रक्षयात्प्रतिसमयं विशिष्टपरमाणुलाभतस्तत्सिद्धेः। तदर्थं तद्ग्रहणे चासौ कथं निर्ग्रन्थः स्यात्
२० प्राकृतपुरुषवत्? नापि ज्ञानादिसिद्ध्यर्थम्; यतो ज्ञानं तस्याखिलार्थविषयमक्षयस्वरूपम्, संयमश्च यथाख्यातः सर्वदा विद्यते। ध्यानं तु परमार्थतो नास्ति निर्मनस्कत्वात्, योगनिरोधत्वेनोपचारतस्तत्रास्य सम्भवात्। नापि प्राणत्राणार्थम्; अपमृत्युरहितत्वात्। नापि क्षुद्वेदनाप्रतीकारार्थम्; अनन्तसुखवीर्ये भगव-
२५ त्यस्याः सम्भवाभावस्योक्तत्वात्।

ननु भगवतो भोजनाभावे कथम् 'एकादश जिने परीषहाः' इत्यागमविरोधो न स्यात्? तदसत्; तेषां तत्रोपचारेणैव प्रतिपादनात्, उपचारनिमित्तं च वेदनीयसद्भावमात्रम्। परमार्थतस्तु तत्र तेषां सद्भावे क्षुदादिपरीषहसद्भावाद्बुभुक्षावद् रोगवध-
३० तृणस्पर्शपरीषहसद्भावान्महद्दुःखं स्यात्, तथा च दुःखितत्वान्नासौ जिनोऽस्मदादिवत्। तथा भोजनं रसनेन शीतादिकं च

१ यतयः। २ पृष्ठे। ३ भगवतो भुक्तिक्रियातो दोष एव न सम्पद्यते इत्युक्ते आह। ४ प्रमत्तो न भवतीति यावत्। ५ प्राकृतो नीचः। ६ आयुषोऽपवर्तरहितत्वात्। ७ जिने। ८ द्रव्यरूपेण। ९ भोजनं रसनेनानुभवेद्वा केवलज्ञानेन वेति विकल्प्य क्रमेण दूषयन्नाह।

स्पर्शनादिनेन्द्रियेण यद्यसावनुभवेत्; तर्हि भगवतो मतिज्ञानानुषङ्गः। अथ केवलज्ञानेन; तत्रापि सर्वं भोजनादिकं परशरीरस्थमप्यस्यानुपज्यते। न चात्मशरीरस्थमेवास्य तज्ज्ञान्यदित्यभिधातव्यम्; भगवतो वीतमोहस्य स्वपरशरीरमतिविभागाभावात्।

यच्चोपचारतोऽप्यस्यैकादश परीषहा न सम्भाव्यन्ते तत्र तन्निषेधपरत्वात् सूत्रस्य, 'एकेनाधिका न दश परीषहा जिने एकादश जिने' इति व्युत्पत्तेः। प्रयोगः-भगवान् क्षुदादिपरीषहरहितोऽनन्तसुखत्वात्सिद्धवत्। ५

किञ्च, भोजनं कुर्वाणो भगवान् किल लोकैर्नावलोक्यते चक्षुषेत्यभिधीयते भवता। तत्रादर्शनेऽयुक्तसेवित्वादेकान्तमाश्रित्य भुङ्क्ते इति कारणम्, वहलान्धकारस्थितभोजनं वा, विद्याविशेषेण स्वस्य तिरोधानं वा? तत्राद्यपक्षे पारदारिकवद्दीनवद्वा दोषसम्भावनाप्रसङ्गः। अन्धकारस्तु न सम्भाव्यते, तद्देहदीप्त्या तस्य निहतत्वात्। विद्याविशेषोपयोगे चास्य निर्ग्रन्थत्वाभावः। कथं चादृश्याय तस्मै दानं दातृभिर्दीयते? अथातिशयविशेषः कश्चित्तस्य, येन भुञ्जानो नावलोक्यते; तर्हि भोजनाभावलक्षण एवास्यातिशयोऽस्तु किं मिथ्याभिनिवेशेन? ततो जीवन्मुक्तस्यात्मनोऽनन्तचतुष्टयस्वभावत्वमिच्छता कवलाहाररहितत्वमेवेष्टव्यमित्यलमतिप्रसङ्गेन। १० १५

ननु च 'अनन्तचतुष्टयस्वरूपलाभो मोक्षः' इत्ययुक्तम्; बुद्ध्यादिविशेषगुणोच्छेदरूपत्वात्तस्य। तदुच्छेदे च प्रमाणम्-नवानामात्मविशेषगुणानां सन्तानोऽत्यन्तमुच्छिद्यते सन्तानत्वात् प्रदीपसन्तानवत्। न चायमसिद्धो हेतुः पक्षे प्रवर्त्तमानत्वात्। नापि विरुद्धः सपक्षे प्रदीपादौ सत्त्वात्। नाप्यनैकान्तिकः; पक्षसपक्षवद्विपक्षे परमाण्वादावप्रवृत्तेः। नापि कालात्ययापदिष्टः; विपरीतार्थोपस्थापकयोः प्रत्यक्षागमयोरसम्भवात्। नापि सत्प्रतिपक्षः; प्रतिपक्षसाधनाभावात्। २० २५

१ तर्हि। २ केवलज्ञानेन तत्राप्यनुभवोऽस्तीति भावः। ३ (एकादश जिने इति सूत्रस्य जिननिष्ठैकादशपरीषहाणां निषेधपरत्वात्)। ४ ग्रन्थे। ५ मां दृष्ट्वा कश्चिद्भोजनं याचिष्यत इति दीनचित्तत्वं दोषो दीनचित्तस्य। ६ व्यापारे। ७ प्रपञ्चेन। ८ बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारलक्षणानाम्। ९ धर्माधर्माभ्यां बुद्धिरुत्पद्यते बुद्धेः संस्कारः संस्कारादिच्छाद्वेषौ इच्छाद्वेषाभ्यां प्रयत्नस्ततस्सुखदुःखे भवत इति नवानां गुणानां सन्तानः। १० सर्वथा। ११ नित्ये। १२ प्रतिपक्षसाधको हेतुः सत्प्रतिपक्षः।

ननु सन्तानोच्छेदरूपेपि मोक्षे हेतुर्वाच्यो निर्हेतुकविनाशानभ्युपगमात्; इत्यप्यचोद्यम्; तत्त्वज्ञानस्य विपर्ययज्ञानव्यवच्छेदक्रमेण निःश्रेयसहेतुत्वोपपत्तेः। दृष्टं च सम्यग्ज्ञानस्य मिथ्याज्ञानोच्छेदे शुक्तिकादौ सामर्थ्यम्। ननु चातत्त्वज्ञानस्यापि तत्त्वज्ञानोच्छेदे सामर्थ्यं दृश्यते, ज्ञानस्य ज्ञानान्तरविरोधित्वेन मिथ्याज्ञानोत्पत्तौ सम्यग्ज्ञानोच्छेदप्रतीतेः; इत्यप्ययुक्तम्; यतो नानयोरुच्छेदमात्रमभिप्रेतम्। किं तर्हि? सन्तानोच्छेदः। यथा च सम्यग्ज्ञानान्मिथ्याज्ञानसन्तानोच्छेदो नैवं मिथ्याज्ञानात्सम्यग्ज्ञानसन्तानस्य, अस्य सत्यार्थत्वेन बलीयस्त्वात्। निवृत्ते च मिथ्याज्ञाने तन्मूला रागादयो न सम्भवन्ति कारणाभावे कार्यानुत्पादात्। रागाद्यभावे तत्कार्या मनोवाक्कायप्रवृत्तिर्व्यावर्त्तते। तदभावे च धर्माधर्मयोरनुत्पत्तिः। आरब्धशरीरेन्द्रियविषयकार्ययोस्तु सुखदुःखफलोपभोगात्प्रक्षयः। अनारब्धतत्कार्ययोरव्यवस्थितयोस्तत्फलोपभोगादेव प्रक्षयः। तथा चागमः—

"नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" [ ] इति।

अनुमानं च, पूर्वकर्माण्युपभोगादेव क्षीयन्ते कर्मत्वात् प्रारब्धशरीरकर्मवत्। न चोपभोगात्प्रक्षये कर्मान्तरस्यावश्यं भावात्संसारानुच्छेदः; समाधिबलादुत्पन्नतत्त्वज्ञानस्यावगतकर्मसामर्थ्योत्पादितयुगपदशेषशरीरद्वारावाप्ताशेषभोगस्योपात्तकर्मप्रक्षयात्, भाविकर्मोत्पत्तिनिमित्तमिथ्याज्ञानजनितानुसन्धानविकलत्वाच्च संसारोच्छेदोपपत्तेः। अनुसन्धानं हि रागद्वेषौ 'अनुसन्धीयते गतं चित्तमाभ्याम्' इति व्युत्पत्तेः। न च मिथ्याज्ञानाभावेऽभिलापस्यैवासम्भवाद्भोगानुपपत्तिः; नैदुपभोगं विना हि कर्मणां प्रक्षयानुपपत्तेः तत्त्वज्ञानिनोपि कर्मक्षयार्थितया प्रवृत्तेर्वैद्योपदेशनातुरवदौषधाचरणे। यथैव ह्यातुरस्यानभिलषितेप्यौषधाचरणे व्याधिप्रक्षयार्थं प्रवृत्तिः, तद्व्यतिरेकेण तत्प्रक्षयानुपपत्तेस्तथात्रापि।

१ मिथ्या। २ सम्यग्ज्ञानान्मिथ्याज्ञानाभावस्तदभावाद्रागाद्यभावस्तदभावाच्च मनोवाक्कायप्रवृत्तिरूपप्रयत्नाभावस्तदभावाद्धर्माधर्मयोरभाव इति। ३ द्विचन्द्रादिज्ञानस्य। ४ एकचन्द्रज्ञानस्य। ५ आमूलतः सन्ततिच्छेदे एवाभिप्रायः। ६ स्रग्वनितादिकं सुखहेतुरिति अहिकण्टकादिकं दुःखहेतुरिति च सम्यग्ज्ञानात्। ७ स्रग्वनितादिकं दुःखहेतुरिति ज्ञानात्। ८ धर्माधर्मयोः। (वसः)। ९ प्रारब्धं शरीरं येन तच्च तत्कर्म च। १० ध्यान। ११ नुः। १२ पूर्वोपात्त। १३ सम्बध्यते। १४ अनेन पूर्वं ममेष्टुविषयं दुःखादिकं दत्तमिति। १५ बुद्धिः। १६ तत्त्वज्ञानिनः पुरुषस्य। १७ कर्मफलस्य। १८ कर्मफलोपभोगे। १९ उक्तमेव समर्थयति। २० कर्मफलोपभोगे तत्त्वज्ञानिनः।

ननु तत्त्वज्ञानिनां तत्त्वज्ञानादेव सञ्चितकर्मप्रक्षय इत्यप्यागमोस्ति—

"यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुते क्षणात्।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा"
[भगवद्गी० ४।३७] इति। ५

तथा च विरुद्धार्थत्वादुभयोरेकत्रार्थे कथं प्रामाण्यम्? इत्ययुक्तम्; तत्त्वज्ञानस्य साक्षात्तद्विनाशे व्यापाराभावात्। तद्धि कर्मसामर्थ्यावगमतोऽशेषशरीरोत्पत्तिद्वारेणोपभोगात्कर्मणां विनाशे व्याप्रियते इत्यग्निरिवोपचर्यते ज्ञानमित्यागमव्याख्यानादविरोधः। न चैतद्वाच्यम्–'तत्त्वज्ञानिनां कर्मविनाशस्तत्त्वज्ञानादितरेषां १० तूपभोगात्' इति; ज्ञानेन कर्मविनाशे प्रसिद्धोदाहरणाभावात्, फलोपभोगात्तु तत्प्रक्षये तत्सद्भावात्।

अन्ये तु मिथ्याज्ञानजनितसंस्कारस्य सहकारिणोऽभावाद्विद्यमानान्यपि कर्माणि न जन्मान्तरे शरीराद्यारम्भकाणीति मन्यन्ते; तेषामनुत्पादितकार्यस्यादृष्टस्याप्रक्षयान्नित्यत्वसङ्गः। १५ अनागतयोर्धर्माधर्मयोरुत्पत्तिप्रतिषेधे तत्त्वज्ञानिनो नित्यनैमित्तिकानुष्ठानं किमर्थमिति चेत्? प्रत्यवायपरिहारार्थम्। न च मिथ्याज्ञानाभावे दुष्कर्मणोऽभावात् कस्य परिहारार्थं तदित्यभिधातव्यम्; यतो मिथ्याज्ञानाभावे निषिद्धाचरणनिमित्तस्यैव प्रत्यवायस्याभावो न विहितानुष्ठाननिमित्तस्य, २०

"अकुर्वन्विहितं कर्म प्रत्यवायेन लिप्यते" [ ] इत्यागमात्। ततस्तदनुष्ठानं तत्परिहारार्थं युक्तम्। तदुक्तम्—

"नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया।
मोक्षार्थी न प्रवर्त्तेत तत्र काम्यनिषिद्धयोः॥ १॥
[मी० श्लो० सम्बन्धा० श्लो० ११०] २५

१ दीप्तः। २ तथाप्यागमसद्भावे च। ३ आगमयोः। ४ मोक्षोपायकथने। ५ अग्रे वक्ष्यमाणम्। ६ अतत्त्वज्ञानिनाम्। ७ कुतः?। ८ प्रारब्धशरीरकर्मवदिति। ९ तत्त्वज्ञाने समुत्पन्ने सतीति शेषः। १० भावनारूपस्य। ११ इन्द्रियविषयादेश्च। १२ नैयायिकविशेषाः। १३ धर्माधर्मस्य। १४ ततोऽनुभवनप्रकारेणैव मोक्षोऽभ्युपगन्तव्यः। १५ सति। प्रागुक्तन्यायेन। १६ नरस्य। १७ दुष्कर्म। १८ जैनादिना। १९ विप्रवधादि। २० नित्यनैमित्तिकादेः। २१ कर्मणी। २२ काम्यं यागः। २३ निषिद्धं विप्रवधादि। २४ कर्मणोः।

नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्।
ज्ञानं च विमलीकुर्वन्नभ्यासेन तु पाचयेत्॥ २॥
अभ्यासात्पक्वविज्ञानः कैवल्यं लभते नरः।
काम्ये निषिद्धे च परं प्रवृत्तिप्रतिषेधतः॥ ३॥" [ ]

५ 'स्वर्गकामः' इत्याद्यागमजनितकामेन यागाभिलाषेण निर्वर्त्यं हि काम्यमग्निष्टोमादि। कैवल्यं तु सकलविशेषगुणोच्छेदविशिष्टात्मस्वरूपं निर्वाणम्। न च विपर्ययज्ञानप्रध्वंसादिक्रमेण तद्विशिष्टात्मस्वरूपनिर्वाणस्य तत्त्वज्ञानकार्यत्वादनित्यत्वं वाच्यम्; यतो विशेषगुणोच्छेदस्यानित्यत्वमापाद्यते, तद्विशिष्टात्मनो वा? १० न तावद्विशेषगुणोच्छेदस्य; अस्य प्रध्वंसाभावरूपत्वात्। कार्यवस्तुनो ह्यनित्यत्वं प्रसिद्धम्। तद्विशिष्टात्मनश्च वस्तुत्वेपि कार्यत्वाभावान्नानित्यत्वम्। न च बुद्ध्यादिविनाशे गुणिनस्तथाभावो युक्तः; तयोरत्यन्तभेदात्। तत्तादात्म्ये त्वयं दोषः स्यादेव।

अथ मोक्षावस्थायां चैतन्यस्याप्युच्छेदान्न कृतबुद्धयस्तत्र प्रव- १५ र्त्तन्ते इत्यानन्दरूपो मोक्षोऽभ्युपगन्तव्यः—

"आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते" [ ]

इत्यागमात्। 'आत्मा सुखस्वभावोऽत्यन्तप्रियबुद्धिविषयत्वात्, अनन्यपरतयोपादीयमानत्वाच्च। यद्यदेवंविधं तत्तत्सुखस्वभावम् यथा वैषयिकं सुखम्, तथा चात्मा एवंविधः, तस्मात्सुखस्व- २० भावः' इत्यनुमानाच्चास्यानन्दस्वभावताप्रतीतिः; इत्यप्यसाम्प्रतम्; यतस्तत्सुखं नित्यम्, अनित्यं वा? न तावदनित्यम्; तत्स्वभावतयात्मनोप्यनित्यत्वप्रसङ्गात्। नित्यं चेत्; तत्संवेदनमपि नित्यम्,

१ अनुष्ठानैः। २ मनुष्यः। ३ विस्तारयेत्। ४ उत्कृष्टविज्ञानः। ५ मोक्षम्। ६ (मूलपाठस्तत्र 'कैवलं' इति। अनेन विसर्गविकारेण छन्दोभङ्गः स्यादिति 'पर' शब्दो नियोजितः। केवलशब्दस्य परशब्दोर्थः टिप्पण्या निश्चितश्च)। ७ निष्पाद्यमनुष्ठानम्। ८ मिथ्याज्ञान। ९ निरस्वरूपत्वात्। १० गुणगुणिनोः। ११ गुणगुणिनोः। १२ गुणविनाशे गुणिविनाशलक्षणः। १३ वेदान्ती भास्करीयः। १४ बुद्धेः। १५ विनाशात्। १६ प्रेक्षावन्तः। १७ वैशेषिकाः। १८ आत्मनः। १९ व्यक्तीक्रियते। २० संसारिमुक्तात्मनोः साधारणमनुमानम्। २१ पुत्रादिशरीरेण व्यभिचारपरिहारार्थमत्यन्तपदोपादानम्। २२ आत्मनः। २३ वनिताशरीरेण व्यभिचारपरिहारार्थमनन्यपरतयेत्युक्तम्। २४ स्वप्रधानत्वेनेत्यर्थः। २५ अनन्यपरतयोपादीयमानत्वादिति कोर्थः? आत्मन आत्मनि लीनतया स्वस्वरूपस्योपादीयमानत्वं ग्राह्यमाणत्वं यस्यात्मन इति। २६ वैषयिकसुखप्रकारेण। २७ संसारावस्थायां मुक्तावस्थायां च।

अनित्यं वा? यदि नित्यम्; मुक्तेतरावस्थयोरविशेषप्रसङ्गः तत्सुखसंवेदनयोर्नित्यत्वेनोभयत्र सत्त्वाविशेषात्। स्मरणानुपपत्तिश्च; अनुभवस्यैवावस्थानात्। संस्कारानुपपत्तिश्च; अनुभवस्य निरतिशयत्वात्। करणजन्यसुखेन चास्य संसारावस्थायां साहचर्यग्रहणप्रसङ्गात् सुखद्वयोपलम्भः सदा स्यात्।

अथ धर्माधर्मफलेन सुखादिना शरीरादिना वा नित्यसुखसंवेदनस्य प्रतिबद्धत्वेनानुभवाभावान्न मुक्तेतरावस्थयोरविशेषः सदा सुखद्वयोपलम्भो वा; तदयुक्तम्; शरीरादेः सुखार्थत्वेन तत्प्रतिबन्धकत्वायोगात्। न हि यद्यदर्थं तत्तस्यैव प्रतिबन्धकं युक्तम्। नापि वैषयिकसुखाद्यनुभवेन तत्प्रतिबन्धः। तेन हि नित्यसुखस्य तदनुभवस्य वा प्रतिबन्धोऽनुत्पत्तिलक्षणो विनाशलक्षणो वा न युक्तः; द्वयोरपि नित्यत्वाभ्युपगमात्। न च संसारावस्थायां बाह्यविषयव्यासङ्गाद्विद्यमानस्याप्यनुभवस्यासंवेदनम्, तदभावात्तु मोक्षावस्थायां संवेदनमित्यभिधातव्यम्; तदनुभवस्य नित्यत्वेन व्यासङ्गानुपपत्तेः। आत्मनो हि व्यासङ्गो रूपादौ विषये ज्ञानोत्पत्तौ विषयान्तरे ज्ञानानुत्पत्तिः, इन्द्रियस्याप्येकस्मिन्विषये ज्ञानजनकत्वेन प्रवृत्तस्य विषयान्तरे ज्ञानाजनकत्वम्। स चात्रानुपपन्नः; सुखवत्तज्ज्ञानस्यापि सदा सत्त्वात्। शरीरादेस्तु प्रतिबन्धकत्वे तदपहन्तुर्हिंसाफलं न स्यात्, प्रतिबन्धकविघातकारकस्योपकारकत्वेन लोके प्रतीतेः।

अथानित्यं तत्संवेदनम्; तदोत्पत्तिकारणं वाच्यम्। अथ योगजधर्मापेक्षः पुरुषान्तःकरणसंयोगोऽसमवायिकारणम्। ननु योगजधर्मस्य मुक्तावसम्भवात् कथमसौ तत्संयोगेनापेक्ष्येत

१ संसारावस्थायां मुक्तावस्थायां च। २ अस्ति च संसारावस्थायां सुखस्मरणम्। ३ प्रत्यक्षस्य। ४ प्रत्यक्षविशेषो धारणाज्ञानं संस्कारः। ५ अस्ति च संस्कारस्योत्पत्तिः संसारावस्थायाम्। ६ भावरूपस्य। ७ नित्यसुखस्य। ८ नित्यानित्यसुखद्वयस्य। ९ यदा यदा वैषयिकं सुखमुत्पद्यते तदा तदा द्वयोरुपलम्भ इत्यर्थः। १० कार्येण। ११ दुःखादिना च। १२ इन्द्रियादिना च। १३ प्रतिहतत्वेन। १४ अत्रार्थः प्रयोजनम्। १५ भोगायतनं शरीरमिति वचनात्। १६ प्रतिपक्षम्। १७ वनितादिवत्। १८ नित्यसुखसंवेदनयोः। १९ वेदान्तिना। २० नित्यसुखानुभवस्य। २१ वेदान्तिना। २२ आत्मन इन्द्रियस्य वा। २३ तत्समये। २४ व्यासङ्गः। २५ रूपे। २६ रसे। २७ नित्यसुखे। २८ सुखतत्संवेदनयोः। २९ नरस्य। ३० वेदान्तिना। ३१ मनः। ३२ आत्मा तु समवायिकारणम्। ३३ नित्यसुखसंवेदनस्य। ३४ वैशेषिकः।

यतस्तत्र तनस्तदुत्पत्तिः स्यात्? अथाद्यं योगजधर्मापेक्षान्तः-करणसंयोगो विज्ञानं जनयति तदपेक्ष्योत्तरोत्तरं ज्ञानम्; तदप्ययुक्तम्; न हि शरीरसम्बन्धानपेक्षं विज्ञानमेवान्तःकरणसंयोगस्य ज्ञानोत्पत्तौ सहकारिकारणं दृष्टम्। न च दृष्टविपरीतं ५ शक्यं कल्पयितुमतिप्रसङ्गात्। आकस्मिकं तु कार्यं न भवत्येव, अहेतोः सर्वत्र सर्वदा भावप्रसङ्गात्।

किञ्च, यथा मुक्तावस्थायामनित्यसुखमतिक्रम्य नित्यं परिकल्प्यते, तथा नित्यत्वधर्माधिकरणं शरीरादिकमपि परिकल्पनीयम्। कार्यत्वात् तस्य कथं नित्यत्वधर्माधिकरणत्वम् दृष्टविरो-१० धादप्रमाणकत्वाच्च? इत्यन्यत्रापि समानम्। न खलु नित्यसुखसाधकत्वेन प्रत्यक्षानुमानागमानां मध्ये किञ्चित्प्रवर्त्तते, अस्मदादीन्द्रियजप्रत्यक्षस्यात्र व्यापारानुपलम्भात्। 'योगिप्रत्यक्षं त्वेवं प्रवर्त्ततेऽन्यथा वा' इत्यत्रापि विवादपदापन्नम्।

यच्चात्मा सुखस्वभाव इत्यनुमानं तदपि न नित्यसुखस्वभावता-१५ साधकम्; सुखस्वभावतामात्रस्यैवातः प्रसिद्धेः।

किञ्च, सुखस्वभावत्वं सुखत्वजातिसम्बन्धित्वम्; तच्चात्मनि सम्भाव्यते गुणे एवास्योपलम्भात्। न ह्येका काचिज्जातिर्द्रव्यगुणयोः साधारणोपलभ्यते। अथ सुखाधिकरणत्वम्; तन्न; अस्य नित्यानित्यविकल्पानुपपत्तेः। तथा सुखत्वस्य सुखस्य वाधिकरण-२० तायां तज्ज्ञानस्यापि नित्यानित्यविकल्पः समानः।

साधनं च अत्यन्तप्रियबुद्धिविषयत्वमनन्यपरतयोपादीयमानत्वं चानैकान्तिकत्वादसाधनम्; दुःखाभावेऽपि भावात्। अनन्यपरतयोपादीयमानत्वं चासिद्धम्; न ह्यात्माऽन्यार्थं नोपादीयते; सुखार्थ-

१ नित्यसुख। २ नित्यसुखसंवेदनम्। ३ आत्मान्तःकरणसंयोगो जनयति। ४ किन्तु शरीरसम्बन्धापेक्षं सद्विज्ञानं सहकारिकारणं दृष्टम्। ५ सौगतादेरपि संवेदनस्य क्षणिकत्वादिसिद्धिप्रसङ्गात्। ६ वैदान्तिना भवता। ७ इन्द्रियं च। ८ नित्यसुखे। ९ नित्यसुखग्राहकत्वेन। १० नित्यासुखग्राहकत्वेन। ११ जातिः= सामान्यम्। १२ निश्चीयते। १३ सुखलक्षणे। १४ सुखाधिकरणत्वस्य सुखस्वभावत्वस्य। १५ अन्यलीनतया। १६ वैशेषिकः। १७ नित्यं चेन्मुक्तेतरावस्थायाः अविशेषप्रसङ्ग इत्यादि दूषणम्। अनित्यं चेदुत्पत्तिकारणं वाच्यमित्यादि दूषणम्। १८ तथा दूषणान्तरसमुच्चये। १९ आत्मनः। २० दुःखाभावो हि लोकभरस्यात्यन्तप्रियबुद्धिविषयः अनन्यपरतयोपादीयमानश्च। न त्वसौ सुखस्वभावस्तस्य तुच्छरूपत्वात्। २१ अभावस्य निःस्वरूपत्वाभावापत्तिकादिमते। २२ सुखलीनतयाऽहं सुखीत्युल्लेखेन।

मस्योपादानात् । अत्यन्तप्रियबुद्धिविषयत्वमप्यसिद्धम्; दुःखितायामप्रियबुद्धेरपि भावात् ।

'आनन्दं ब्रह्मणो रूपम्' इत्याद्यागमो नित्यसुखसद्भावावेदकः; इत्यप्यसमीचीनम्; तस्यैतदर्थत्वासिद्धेः । आनन्दशब्दो ह्यात्यन्तिकदुःखाभावे प्रयुक्तत्वाद्गौणः। दृष्टश्च दुःखाभावे सुखशब्दप्रयोगः, यथा भाराक्रान्तस्य ज्वरादिसन्तप्तस्य वा तदपाये । ५

किञ्च, आत्मस्वरूपात्तन्नित्यसुखमव्यतिरिक्तम्, तद्व्यतिरिक्तं वा? प्रथमपक्षे आत्मस्वरूपवत् सर्वदा सुखसंवित्तिप्रसङ्गाद्बद्धमुक्तयोरविशेषप्रसङ्गः ।

अनाद्यविद्याच्छादितत्वान्न स्वप्रकाशानन्दसंवित्तिः संसारिणः; इत्यप्यपेशलम्; आच्छाद्यते ह्यप्रकाशस्वरूपं वस्तु, यत्तु प्रकाशस्वरूपं तत्कथमन्येनाच्छाद्येत? मेघादिना त्वादित्यादेराच्छादनं युक्तम् तस्यातोऽर्थान्तरत्वात्, मूर्त्तस्य मूर्त्तेनाच्छादनापत्तेः (दनोपपत्तेः)। अविद्यायास्तु सत्त्वान्यत्वाभ्यामनिर्वचनीयतया तुच्छस्वभावत्वात् न स्वप्रकाशानन्दाच्छादकत्वम् । तन्नाद्यः पक्षो युक्तः । १० १५

द्वितीयपक्षोऽप्ययुक्तः; नित्यसुखस्यात्मनोऽर्थान्तरस्य प्रत्यक्षादेः प्रतिपादकस्य प्रतिषिद्धत्वाद्बाधकस्य च प्रदर्शितत्वात् । तन्न परमानन्दाभिव्यक्तिर्मोक्षः ।

नापि विशुद्धज्ञानोत्पत्तिः; रागादिमतो विज्ञानात्तद्रहितस्यास्योत्पत्त्ययोगात् । यथैव हि बोधाद्बोधरूपता ज्ञानान्तरे तथा रागादेरपि स्यात्तादात्म्यात्, अन्यथा तादात्म्याभावः स्यात् । न च 'बोधादेव बोधरूपता' इति प्रमाणमस्ति; विलक्षणादपि कारणाद्विलक्षणकार्यस्योत्पत्तिदर्शनात् । बोधस्य च बोधान्तरहेतुत्वे पूर्वकालभावित्वं समानजातीयत्वमेकसन्तानत्वं वा न हेतुः; व्यभिचारात्; तथाहि-पूर्वकालभावित्वं तत्समानक्षणैः, समानजातीयत्वं च सन्तानान्तरज्ञानैर्व्यभिचारि, तेषां हि पूर्वकालभावित्वे तत्समानजातीयत्वे च सत्यपि न विवक्षितज्ञानहेतुत्वम् । २० २५

१ अवस्थायाम् । २ आगमे । ३ बद्धः संसारी । ४ ब्रह्मणः सकाशात् । ५ विद्यमानत्वाविद्यमानत्वाभ्याम् । ६ सौगतमाशङ्क्य । ७ मोक्षः । ८ पूर्वज्ञानात् । ९ उत्तरज्ञाने । १० बोधस्य रागादिना । ११ रागादिर्यदि न स्यात् । १२ बीजादेः । १३ अङ्कुरादेः । १४ प्रथमस्य । १५ एकात्मत्वम् । १६ उत्तरज्ञानजनकप्राक्तनबोधस्य । १७ पुरुषान्तरबोधैः पूर्वकालभाविभिः । १८ ज्ञानत्वेन समानजातीयत्वम् । १९ पुरुषान्तरबोधैः पूर्वकालभाविभिः । २० पूर्वज्ञानस्य । २१ विवक्षितमुत्तरम् ।

एकसन्तानत्वं च अन्त्य[1]ज्ञानेन[2] व्यभिचारि । अथ नेष्यत[3] एवान्त्यज्ञानं सर्वदा[4]ऽऽरम्भात्[5]; तथाहि–मरणशरीरज्ञानमपि ज्ञानान्त[6]रहेतुर्जाग्रदवस्थाज्ञानं[7] च सुषुप्तावस्थाज्ञानस्येति[8] । नन्वेवं मरणशरीरज्ञानस्यान्तराभव[9]शरीरज्ञानहेतुत्वे गर्भशरीरज्ञानहेतुत्वे वा सन्तानान्तरेपि ज्ञानजनकत्वं किन्न स्यान्नियतहेतोरभावात्? अथेष्यते[10] एव उपाध्यायज्ञानं शिष्यज्ञानस्य हेतुः । अन्यस्य[11][12] कस्मान्न भवति? कर्म[13]वासना[14][15] नियामिका[16] चेन्न[17]; तस्या ज्ञानव्यतिरेकेणासम्भवात् । तत्[18]तादात्म्ये हि विज्ञानं बोधरूपतया अविशिष्टं[19] बोधाच्च[20] बोधरूपतेत्य[21]विशेषेण[22] ज्ञानं[23] विदध्यात्[24] ।

सुषुप्तावस्थाज्ञानस्य जाग्रदवस्थाज्ञानं कारणम्; इत्यप्यसम्भाव्यम्; सुषुप्तावस्थायां च ज्ञानाभ्युपगमे[25] जाग्रदवस्थातो[26] विशेषो न स्यादुभयत्रापि[27] स्वसंविदितज्ञानसद्भावाविशेषात् । मिद्धेनाभिभूतत्वं[28][29] विशेषः; इत्यप्यसत्; तस्यापि तद्धर्मतया[30] तादात्म्येनाभिभावकत्वायोगात् । तद्व्यतिरेके[31] तु[32] रूपवेदनादि[33]पदार्थस्वरूपव्यतिरिक्तं तत्स्वरूपं निरूप्यताम् । अभिभवश्च यदि विनाशः कथं तत्र[34] ज्ञानस्य सत्त्वं विनाशस्य वा निर्हेतुकत्वम्? अथ तिरोभावः; न; विज्ञानसत्त्वैव संवेदनमित्यभ्युपगमे तस्या[35]नुपपत्तेः । अतः सुषुप्तावस्थायां विज्ञानासत्त्वेनान्त्यज्ञानसद्भावादेकसन्तानत्वं व्यभिचारीति ।

यच्चोच्यते[36]-विशिष्टभावनाभ्यासवशाद्रागादिविनाशः; तदप्यसङ्गतम्; निर्हेतुकत्वाद्विनाशस्य अभ्यासानुपपत्तेश्च[37] । अभ्यासो

१ बौद्धानां मते योगिनां मरणे चरमचित्तमुत्तरचित्तं नोत्पादयतीति भावः । २ योगिचरमचित्तेन । ३ मया । ४ पूर्वविज्ञानेन विज्ञानान्तरस्य । ५ जननात् । ६ गर्भशरीरज्ञानस्य । ७ (जाग्रदवस्थाज्ञानवदिति सुष्ठुतरम्) (?) । ८ जैनमतमङ्गीकृत्य यौगं प्रति सौगतेनोक्तम् । ९ मध्यभवशरीरस्य कार्मणस्य । १० बौद्धेन । ११ वैशेषिकः । १२ शिष्यात् । १३ बौद्धः । १४ वासना ज्ञानरूपैव । १५ अदृष्टं क्रिया च । १६ कथं नियामिका? मरणशरीरज्ञानादन्तराभवशरीरज्ञानं गर्भशरीरज्ञानं चोत्पद्यते उपाध्यायज्ञानाच्छिष्यज्ञानं चेति । १७ वैशेषिकः । १८ विज्ञानस्य । १९ साधारणम् । २० विशेषरहितम् । २१ हेतोः । २२ सन्तानान्तरेपि । २३ उत्तरम् । २४ पूर्वज्ञानं कर्तृ । २५ बौद्धेन त्वया । २६ सुषुप्तावस्थाजाग्रदवस्थयोः । २७ सुषुप्तावस्थाजाग्रदवस्थयोः । २८ अतिजाड्येनातिनिद्रया वा । २९ पराभवः । ३० बौद्धानां मते यथा नैर्मल्यादिगुणो ज्ञानस्य तथा मिद्धादिदोषोपि ज्ञानस्य धर्म इति । ३१ ज्ञानात् । ३२ मिद्धस्य । ३३ आदिशब्देन विज्ञानसंज्ञासंस्कारा गृह्यन्ते । ३४ सुषुप्तावस्थायाम् । ३५ विज्ञानस्य (तिरोभावस्य) । ३६ बौद्धेन । ३७ किञ्च ।

ह्यवस्थिते ध्यातर्यतिशयाधायकत्वेन स्यान्न क्षणिकज्ञानमात्रे। न च सन्तानापेक्षयाऽतिशयो युक्तः; तस्यैवासत्त्वात्, अविशिष्टा[1]द्विशिष्टो[2]त्पत्तेरयोगाच्च[3]। अविशिष्टाद्धि पूर्वज्ञानादुत्तरोत्तरं सातिशयं कथमुत्पद्येत? तत्कथं योगिनां सकलकल्पनाविकल[4]ज्ञानसम्भव इति?　　५

यच्च 'सन्तानोच्छित्तिर्निःश्रेयसम्' इति मतम्[5]; तत्र निर्हेतुकतया विनाशस्योपाय[6]वैयर्थ्यमयत्नसिद्ध[7]त्वादिति।

अन्ये[8] त्वनेकान्तभावनातो विशिष्टप्रदेशे[9]ऽक्षयशरीरा[10]दि[11]लाभो निःश्रेयसमिति मन्यन्ते। तथाहि-नित्यत्वभावनायां स्नेहो[12]ऽनित्यत्वे च द्वेष इत्युभयपरिहारार्थमनेकान्तभावना[13]; इत्यप्यपरीक्षिताभिधानम्; मिथ्याज्ञानस्य निःश्रेयसकारणत्वायोगात्। अनेकान्तज्ञानं मिथ्यैव विरोधवैयधिकरण्याद्यनेकबाधकोपनिपातात्। स्वदेशादिषु सत्त्वं परदेशादिषु चासत्त्वम् इतरेतराभावादिष्यते[14] एव। स्वकार्येषु कर्तृत्वं कार्यान्तरेषु चाकर्तृत्वं न प्रतिषिध्यते, यद्[15]यस्या[16]न्वयव्यतिरेकाभ्यामुत्पत्तौ व्याप्रियमाणमुपलब्धं तत्तस्य कारणं नान्यस्येत्यभ्युपगमात्। तथा[17] मुक्तावप्यनेकान्तो न व्यावर्त्तत इति 'स एव मुक्तः संसारी च' इति प्रसक्तम्। तथाऽनेकान्तेप्यनेकान्तप्रसङ्गात् सदसन्नित्यानित्यादिरूपव्यतिरिक्तं रूपा[18]न्तरमपि प्रसज्येतेति।　　१०　　१५

अन्ये[19] त्वात्मैकत्वज्ञानात्परमात्मनि लयः[20] सम्पद्यते इति ब्रुवते[21]। तथाहि-आत्मैव परमार्थसंस्ततोऽन्यत्र भेदे प्रमाणाभावात्। प्रत्यक्षं[22] हि पदार्थानां[23] सद्भावस्यैव ग्राहकं न भेदस्य, त्व[24]विद्या[25]समारोपितो[26] भेदः; तेप्यतत्त्वज्ञाः; आत्मैकत्वज्ञानस्य मिथ्यारूपतया निःश्रेयसाऽसाधकत्वात्। तन्मिथ्यात्वं चार्थानां[27] प्रमाणतो[28] वास्तव[29]भेदप्रसिद्धेः।　　२०　　२५

---

१ रागादिसहितत्वेन। २ विशुद्धज्ञानोत्पत्तेः। ३ किञ्च। ४ निर्विशेषस्य। ५ योगाचारस्य। ६ ध्यानादेः। ७ विनाशस्य। ८ जैनाः। ९ मोक्षशिलोपरि। १० स्वरूपदेहो वा। ११ आदिशब्देन ज्ञानादि। १२ स्नेहः। १३ युक्ता। १४ वैशेषिकेणापि मया। १५ कारणम्। १६ कार्यस्य। १७ दूषणान्तरम्। १८ सत्त्वे सत्त्वमसत्त्वं चेत्यनेन प्रकारेण। १९ ब्रह्माद्वैतवादिनः। २० प्रवेशः। २१ मोक्षम्। २२ निर्विकल्पकम्। २३ घटापटादीनाम्। २४ हेतोः। २५ मिथ्याज्ञानेन। २६ कल्पितः। २७ घटपटादीनाम्। २८ प्रत्यक्षादेः। २९ परमार्थ।

एवं[1] शब्दाद्वैतज्ञानमपि मिथ्यारूपतया निःश्रेयसाप्रसाधकं द्रष्टव्यम्। निरस्तं चात्माद्वैतं शब्दाद्वैतं च प्राक्प्रबन्धेनेत्यलमतिप्रसङ्गेन[2]।

प्रकृति[3]पुरुषविवेकोपलम्भः[4] स्वरूपे चैतन्यमात्रेऽवस्थानलक्षण-
५ निःश्रेयसस्य साधनमित्यन्ये। तथाहि–पुरुषार्थसम्पादनाय प्रधानं प्रवर्त्तते। पुरुषार्थश्च द्वेधा–शब्दादिविषयोपलब्धिः, प्रकृतिपुरुषविवेकोपलम्भश्च। सम्पन्ने हि पुरुषार्थे चरितार्थत्वात्प्रधानं न शरीरादिभावेन परिणमते, विज्ञानं(तं) वा दुष्टतया कुष्टिनीस्त्रीवद्भोगसम्पादनाय पुरुषं[5] नोपसर्पति; इत्यप्यसाम्प्रतम्; प्रधाना-
१० सत्त्वस्य प्रागेवोक्तत्वात्। सति हि प्रधाने पुरुषस्य तद्विवेकोपलम्भः स्यात्। अस्तु वा तत्; तथापि पुरुषस्थं निमित्तमनपेक्ष्य तत्प्रवर्त्तेत, अपेक्ष्य वा? न तावदनपेक्ष्य; मुक्तात्मन्यपि शरीरादिसम्पादनाय तत्प्रवृत्तिप्रसङ्गात्। अथापेक्ष्य प्रवर्त्तते; किं तदपेक्ष्यम्? विवेकानुपलम्भः[6], अदृष्टं वा? न तावद्विवेकानुप-
१५ लम्भः; तस्य विवेकोपलम्भविनष्टत्वेन मुक्तात्मन्यपि सम्भवात्। न चानुत्पत्तिविनाशयोरसत्त्वेन विशेषं पश्यामः। द्वितीयविकल्पोऽप्ययुक्तः; अदृष्टस्यापि प्रधाने शक्तिरूपतया व्यवस्थितस्योभयत्राविशेषात्।

दुष्टतया च विज्ञातं प्रधानं पुरुषं नोपसर्पतीति चायुक्तम्;
२० तस्याचेतनतया 'अहमनेन दुष्टतया विज्ञातम्' इति ज्ञानासम्भवात्। ततः पूर्ववत्प्रवृत्तिरविशेषेणैव स्यात् इत्यलमतिप्रसङ्गेन।

'तदा[13][14] द्रष्टुः[15] स्वरूपेऽवस्थानं[16] मोक्षः' इति चाभ्युपगतमेव[17], विशेषगुणरहितात्मस्वरूपे तस्यावस्थानाभ्युपगमात्। 'चिद्रूपेऽवस्थानम्' इत्येतत्तु न घटते; अनित्यत्वेन चिद्रूपतायाः
२५ विनाशात्। न चाक्षाद्यन्वयव्यतिरेकानुविधायिन्यास्तस्या नित्यत्वे

---

१ वास्तवभेदसिद्धिप्रकारेण। २ अद्वैतनिराकरणस्य। ३ का। ४ भेदभावनाज्ञानम्। ५ प्रति प्रधानं। ६ भेदभावनाभावः। ७ भेदभावनाया योग्यवस्थायां सम्भवात्। मुक्त्यवस्थायां तु तस्या विनाशात्प्रयोजनाभावात्। ८ किञ्च। ९ विवेकानुपलम्भो नाम विवेकोपलम्भाभावः। कथम्? विवेकोपलम्भस्यानुत्पत्तिः संसार्यात्मनि विवेकोपलम्भस्य विनाशो मुक्तात्मनि। १० संसारिमुक्तात्मनोः। ११ पुरुषेण। १२ साङ्ख्यपरिकल्पितमुक्त्युपायनिराकरणेन। १३ उक्तरीत्या मोक्षोपायस्वरूपं विचार्यमाणं नास्ति चेन्मा भून्मोक्षस्वरूपं तु स्यादित्युक्ते आह। १४ मुक्त्यवस्थायाम्। १५ आत्मनः। १६ (आत्मनः)। १७ यौगेन। १८ स्वरूपे निर्दिष्टमेतत्। १९ योगमते चिद्रूपं बुद्धिः।

प्रमाणमस्ति । आत्मस्वरूपतास्तीति चेत्; ननु चिद्रूपतात्मनोऽभिन्ना, भिन्ना वा स्यात्? अभेदे पर्यायमात्रम्[1] 'आत्मा, चिद्रूपता च' इति, तस्य च नित्यत्वाभ्युपगमात् सिद्धसाध्यता। भेदे तु संयोगादिभिरनैकान्तिकत्वम्: तेषामात्मधर्मत्वेपि नित्यत्वाभावात् । गुणगुणिनोश्च तादात्म्यविरोधादित्युपरम्यते[2] । ततो ५ बुद्ध्यादिविशेषगुणोच्छेदविशिष्टात्मस्वरूप एव मोक्षस्तत्त्वज्ञानादिति स्थितम् ।

अत्र प्रतिविधीयते । यत्तावदुक्तम्-नवानामात्मविशेषगुणानां सन्तानोत्यन्तमुच्छिद्यते: तत्रात्मनो भिन्नानां बुद्ध्यादिविशेषगुणानामात्मन्येव समवायादिना वृत्त्यसिद्धेः प्रागेवोक्तत्वात् कथ- १० मात्मविशेषगुणानां सन्तानः सिद्धो यतः हेतोराश्रयासिद्धिर्न स्यात्? तथा तेषां परेणास्वसंविदितत्वेनाभ्युपगमात् । ज्ञानान्तरग्राह्यत्वे चानवस्थादिदोषप्रसक्तेः, अज्ञानस्य च सत्त्वाप्रसिद्धेः पुनरप्याश्रयासिद्धत्वम् । आत्मनोऽभिन्नानां तत्साधने तु तस्याप्यत्यन्तोच्छेदप्रसङ्गात् कस्यासौ मोक्षः? कथञ्चिदभेदस्तु नाभ्युपग- १५ म्यते । अभ्युपगमे वा नात्यन्तोच्छेदसिद्धिः इत्यनन्तरं वक्ष्यामः ।

सन्तानत्वं च हेतुः सामान्यरूपम्, विशेषरूपं वा? सामान्यरूपं चेत्; परसामान्यरूपम्, अपरसामान्यरूपं वा? प्रथमपक्षे गगनादिनानेकान्तः: अत्यन्तोच्छेदाभावेप्यत्र हेतोर्वर्तनात् । सत्तासामान्यरूपत्वे च सन्तानत्वस्य 'सत् सत्' इति प्रत्ययहेतुत्वमेव २० स्यात् न पुनः सन्तानप्रत्ययहेतुत्वम् । अथ विशेषगुणाश्रिता जातिः सन्तानत्वम्; तर्हि द्रव्यविशेषे प्रदीपदृष्टान्ते तस्याऽसम्भवात्साधनविकलो दृष्टान्तः । न च सन्तानत्वं परमपरं वा सामान्यं सर्वथा भिन्नं बुद्ध्यादिषु वृत्तिमत्प्रसिद्धम्; तद्वृत्तेः समवायस्य प्रतिषिद्धत्वात् इति स्वरूपासिद्धत्वम् । २५

अथ विशेषरूपम्; तत्राप्युपादानोपादेयभूतबुद्ध्यादिलक्षणक्षणविशेषरूपम्, पूर्वापरसमानजातीयक्षणप्रवाहमात्ररूपं वा? प्रथमपक्षे सन्तानत्वस्यासाधारणानैकान्तिकत्वं तथाभूतस्यास्या-

---

१ नाममात्रम् । २ पराभ्युपगतमोक्षनिराकरणे । ३ मया । ४ तदाश्रयत्वं तद्गुणत्वादि । ५ बुद्ध्यादीनाम् । ६ उच्छेद इत्यन्वयः । ७ वैशेषिकेण । ८ बुद्ध्यन्तर । ९ आदिनेतरेतराश्रयः । १० सन्तानस्य । ११ परेण । १२ अभिन्नेष्वादे । १३ सत्ताख्यम् । १४ साध्याभावे । १५ किञ्च । १६ द्वितीयविकल्पः । १७ सामान्यम् । १८ किञ्च । १९ सन्तानत्वम् । २० सह । २१ रूपत्वेन सजातीयत्वम् ।

न्यत्रानुवृत्तेः। अभ्युपगमविरोधश्च; न खलु परेण बुद्ध्यादिक्षणोपादानोऽपरोऽखिलो बुद्ध्यादिक्षणोऽभ्युपगम्यते। अन्यथा मुक्त्यवस्थायामपि पूर्वपूर्वबुद्ध्याद्युपादानक्षणादुत्तरोत्तरोपादेयबुद्ध्यादिक्षणोत्पत्तिप्रसङ्गान्न बुद्ध्यादिसन्तानस्यात्यन्तोच्छेदः ५ स्यात्। द्वितीयपक्षे तु पाकजपरमाणुरूपादिनानेकान्तः; तथाविधसन्तानत्वस्यात्र सद्भावेप्यत्यन्तोच्छेदाभावात्।

विरुद्धश्चायं हेतुः; कार्यकारणभूतक्षणप्रवाहलक्षणसन्तानत्वस्य एकान्तनित्यवदनित्येप्यसम्भवात्, अर्थक्रियाकारित्वस्यानेकान्ते एव प्रतिपादयिष्यमाणत्वात्।

१० शब्दविद्युत्प्रदीपादीनामप्यत्यन्तोच्छेदासम्भवात् साध्यविकलो दृष्टान्तः। न च ध्वस्तस्यापि प्रदीपादेः परिणामान्तरेण स्थित्यभ्युपगमे प्रत्यक्षबाधा; वारि स्थिते तेजसि भासुररूपाभ्युपगमेपि तत्प्रसङ्गात्। अथोष्णस्पर्शस्य भासुररूपाधिकरणतेजोद्रव्याभावेऽसम्भवात् तत्रानुद्भूतस्यास्य परिकल्पनमनुमानतः; तर्हि 'प्रदीपादे- १५ रप्यनुपादानोत्पत्तेरिव अन्त्यावस्थातोऽपरापरपरिणामाधारत्वमन्तरेण सत्त्वकृतकत्वादिकं न सम्भवति' इत्यनुमानतस्तत्सन्तत्यनुच्छेदः किन्न कल्प्यते? तथाहि-पूर्वापरस्वभावपरिहारावाप्तिस्थितिलक्षणपरिणामवान् प्रदीपादिः सत्त्वात् कृतकत्वाद्वा घटादिवत्।

सत्प्रतिपक्षश्च; तथाहि-बुद्ध्यादिसन्तानो नात्यन्तोच्छेदवान्, २० अखिलप्रमाणानुपलभ्यमानतथोच्छेदत्वात्, य एवं स न तत्त्वेनोपेयो यथा पाकजपरमाणुरूपादिसन्तानः, तथा चायम्, तस्मान्नात्यन्तोच्छेदवानिति। न च प्रस्तुतानुमानत एव सन्तानोच्छेदप्रतीतेः सर्वप्रमाणानुपलभ्यमानतथोच्छेदत्वमसिद्धम्; सन्तानत्वसाधनस्यासत्प्रतिपक्षत्वासिद्धेः, तत्सिद्धौ हि हेतोर्गम- २५ कत्वम्। कालात्ययापदिष्टत्वं च; अनेनैवानुमानेन बाधितपक्षनिर्देशानन्तरं प्रयुक्तत्वात्।

यच्च तत्त्वज्ञानस्य विपर्ययज्ञानव्यवच्छेदक्रमेण निःश्रेयसहेतुत्वमित्युक्तम्; तदप्युक्तिमात्रम्; ततो विपर्ययज्ञानव्यवच्छेदक्रमेण धर्माधर्मयोस्तत्कार्यस्य च शरीरादेरभावेपि अनन्तातीन्द्रियाखि- ३० लपदार्थविषयसम्यग्ज्ञानसुखादिसन्तानस्याभावासिद्धेः। इन्द्रियजज्ञानादिसन्तानोच्छेदसाधने च सिद्धसाधनम्। इन्द्रियाद्य-

---

१ दृष्टान्ते प्रदीपे। २ उपादेयः। ३ आदिना गन्धरसादि। ४ कथञ्चिन्नित्यानित्ये। ५ तमोरूपेण। ६ उष्णे। ७ जले। ८ इपू। ९ सन्तानत्वं हेतुः। १० अभ्युपगम्यः। ११ सन्तानत्वादित्यनः।

पाये ज्ञानादिसन्तानसद्भावश्चाशेषज्ञसिद्धिप्रस्तावे प्रतिपादितः।
कथं चातीन्द्रियज्ञानाद्यनभ्युपगमे महेश्वरे तत्सद्भावः स्यात्?
नित्यत्वं चेश्वरज्ञानस्येश्वरनिराकरणे प्रतिषिद्धम्। शरीराद्यपा-
येप्यस्य ज्ञानाद्यभ्युपगमेऽन्यात्मनोपि सोस्तु तत्स्वभावत्वात्। न
च स्वभावापाये तद्वतोऽवस्थानमतिप्रसङ्गात्।   ५

यत्तूक्तम्-आरब्धकार्ययोश्चोपभोगात्प्रक्षयः; तदपि न सूक्तम्;
उपभोगात्कर्मणः प्रक्षये तदुपभोगसमये अपरकर्मनिमित्तस्याभि-
लापपूर्वकमनोवाक्कायव्यापारादेः सम्भवात् अविकलकारणस्य
प्रचुरतरकर्मणो भवतः कथमात्यन्तिकः प्रक्षयः? सम्यग्ज्ञानस्य
तु मिथ्याज्ञानोच्छेदक्रमेण बाह्याभ्यन्तरक्रियानिवृत्तिलक्षणचा-   १०
रित्रोपबृंहितस्यागामिकर्मानुत्पत्तिसामर्थ्यवत् सञ्चितकर्मक्षयेपि
सामर्थ्यं सम्भाव्यत एव। यथोष्णस्पर्शस्य भाविशीतस्पर्शा-
नुत्पत्तौ सामर्थ्यवत् प्रवृत्ततत्स्पर्शादिध्वंसेपि सामर्थ्यं प्रती-
यते। किन्तु परिणामिजीवाजीवादिवस्तुविषयमेव सम्यग्ज्ञानम्,
न पुनरेकान्तनित्यानित्यात्मादिविषयम्; तस्य विपरीतार्थग्राहक-   १५
त्वेन मिथ्यात्वोपपत्तेरित्यग्रे निवेदयिष्यते। अतो यदुक्तम्-'यथै-
धांसि' इत्यादि; तत्सर्वं संवररूपचारित्रोपबृंहितसम्यग्ज्ञानाग्नेर-
शेषकर्मक्षये सामर्थ्याभ्युपगमात्सिद्धसाधनम्।

यच्चाभ्यधायि-समाधिबलादुत्पन्नतत्त्वज्ञानस्येत्यादि; तदप्यभि-
धानमात्रम्; अभिलापरूपरागाद्यभावेऽङ्गनाद्युपभोगासम्भवात्।   २०
तत्सम्भवे वावश्यंभावी गृद्धिमतो भवदभिप्रायेण योगिनोपि प्रचु-
रतरधर्माधर्मसम्भवो नृपत्यादेरिवातिभोगिनः। वैद्योपदेशादा-
तुरोप्यौषधाद्याचरणे नीरुग्भावाभिलाषेणैव प्रवर्त्तते, न पुनर्ज्ञान-
मात्रात्। तन्नाशेषशरीरद्वारायातोशेषभोगस्य कर्मान्तरानुत्पत्तिः।
किं तर्हि? परिपूर्णसम्यग्दर्शनज्ञानचारित्रस्य, इत्यलं विवादेन,   २५
जीवन्मुक्तेरपि त्रितयात्मकादेव हेतोः सिद्धेः। संसारकारणं हि

---

१ किञ्च। २ तद्=ज्ञानम्। ३ पृथुबुध्नोदराद्याकाराभावे घटावस्थानप्रसङ्गात्। ४ तस्य कर्मफलस्य। ५ उत्पद्यमानस्य। ६ सम्यग्ज्ञानान्मिथ्याज्ञानाभावः, मिथ्याज्ञानाभावाद्रागाद्यभावः, रागाद्यभावाद्बाह्या (वचनादि) भ्यन्तर (चिन्तन) क्रियानिवृत्तिरिति। ७ सहितस्य। ८ अङ्गकम्पउद्धर्षणादेः। ९ अस्मदीयमपि तत्त्वज्ञानं सञ्चितकर्मक्षयनिबन्धनमागामिकर्मानुत्पत्तिकारणं स्यादित्युक्ते आह। नित्यादिवस्तुविषयज्ञानस्य सम्यग्ज्ञानता न प्रतीयते किन्तु इत्यादि। १० नित्यात्मादिविषयज्ञानस्य। ११ अनेकान्तसिद्धौ। १२ आकाङ्क्षावतः। १३ न केवलं योगी। १४ सम्यग्दर्शनादित्रयमोक्षकारणविषयविवादेन। १५ न केवलं परममुक्तेः। १६ कारणात्।

मिथ्यादर्शनादित्रयात्मकं न पुनर्मिथ्याज्ञानमात्रात्मकम्, तच्चैकस्मात्सम्यग्ज्ञानमात्रात्कथं व्यावर्त्तेत इत्युक्तं सर्वज्ञसिद्धिप्रस्तावे।

यच्चान्यदुक्तम्-नित्यनैमित्तिकानुष्ठानं केवलज्ञानोत्पत्तेः प्राक् काम्यनिषिद्धानुष्ठानपरिहारेण ज्ञानावरणादिदुरितक्षयनिमित्त-
५ त्वेन केवलज्ञानप्राप्तिहेतुः; तदिष्टमेवास्माकम्।

आनन्दरूपता तु मोक्षस्याभीष्टैव । एकान्तनित्यता तु तस्याः प्रतिषिध्यते । चिद्रूपतावदानन्दरूपताप्येकान्तनित्या; इत्यप्ययुक्तम्; चिद्रूपताया अप्येकान्तनित्यत्वासिद्धेः, सकलवस्तुस्वभावानां परिणामिनित्यत्वेनाग्रे समर्थयिष्यमाणत्वात्।

१० अथानित्यत्वे तस्याः तत्संवेदनस्य चोत्पत्तिकारणं वक्तव्यम्; ननूक्तमेव प्रतिबन्धापायलक्षणं तत्कारणं सर्वज्ञसिद्धिप्रस्तावे। आत्मैव हि प्रतिबन्धकापायोपेतो मोक्षावस्थायां तथाभूतज्ञानसुखादिकारणम्, घटाद्यावरणापायोपेतप्रदीपक्षणवत् स्वपरप्रकाशकापरप्रदीपक्षणोत्पत्तौ, तदुत्पादन[स्व]भावस्यान्यापेक्षा-
१५ योगात्। यद्धि यदुत्पादनस्वभावं न तत्तदुत्पादनेऽन्यापेक्षम् यथान्त्या कारणसामग्री स्वकार्योत्पादने, तदुत्पादनस्वभावश्चातीन्द्रियज्ञानसुखाद्युत्पत्तौ प्रतिबन्धकापायोपेत आत्मेति।[12] संसारावस्थायामप्युपलभ्यते-वासीचन्दनकल्पानां सर्वत्र समवृत्तीनां विशिष्टध्यानादिव्यवस्थितानां सेन्द्रियशरीरव्यापाराऽजन्यः पर-
२० माह्लादरूपोऽनुभवः। अस्यैव भावनावशादुत्तरोत्तरावस्थामासादयतः परमकाष्ठा गतिः सम्भाव्यत एव।

आनन्दरूपताभिव्यक्तिश्चानाद्यऽविद्याविलयात्; इत्यभीष्टमेव; अष्टप्रकारपारमार्थिककर्मप्रवाहरूपाऽनाद्यविद्याविलयाद् अनन्तसुखसंज्ञानादिस्वरूपप्रतिपत्तिलक्षणमोक्षावाप्तेरभीष्टत्वात्।

२५ विशुद्धज्ञानसन्तानोत्पत्तिलक्षणोऽप्यसौ मोक्षोऽभ्युपगम्यते। स तु चित्त[21]सन्तानः सान्वयो[22] युक्तः। बद्धो हि मुच्यते नाबद्धः।

---

१ चतुर्थपरिच्छेदे। २ अतीन्द्रिय। ३ एव। ४ घटस्थप्रदीपवत्। ५ उत्तर। ६ आत्मनः। ७ इन्द्रियवनितादेः। ८ प्रतिबन्धकापायोपेत आत्मा धर्मी अतीन्द्रियज्ञानसुखाद्युत्पत्तौ अन्यं नापेक्षते इति साध्यं, तदुत्पादनस्वभावत्वादिति शेषः। ९ अन्त्यतन्तुसंयोगः। १० पटलक्षणस्य। ११ स प्रसिद्ध उत्पादनस्वभावो यस्यात्मनः। १२ असिद्धत्वे हेतोरुद्भाविते परिहारमाह। १३ कुठार। १४ तुल्यानाम्। १५ शत्रुमित्रयोः। १६ आदिना दानम्। १७ भेदः। १८ निश्चीयते। १९ प्राप्ति। २० बौद्धविशेषैरभ्युपगतः। २१ ज्ञानस्य। २२ सद्रूपः।

न च निरन्वये चित्तसन्ताने बद्धस्य मुक्तिः। तत्र ह्य[1]न्यो बद्धोऽ-न्य[2]श्च मुच्यते।

सन्तानैक्याद्बद्धस्यैव मुक्तिर[3]पीति चेत्; ननु यदि सन्ता[4]-नार्थः परमार्थसन्; तदात्मैव सन्तानशब्देनोक्तः स्यात्। अथ संवृ[5]तिसन्; तदे[6]कस्[7]य परमार्थसतोऽसत्त्वात् 'अन्यो बद्धोऽन्यश्च मुच्यते' इति मुक्त्यर्थं प्रवृत्तिर्न स्यात्। अथात्यन्तनानात्वेपि दृढ-तरैकत्वाध्यवसायाद् 'बद्धमात्मानं मोचयिष्यामि' इत्यभिसन्धा-नवतः[8] प्रवृत्तेर्नायं दोषः; न तर्हि नैरात्म्यदर्शनम्[9], इति कुतस्तन्नि-बन्धना मुक्तिः? अथास्ति तद्दर्शनं शास्त्रसंस्कारजम्[10]; न तर्ह्ये-कत्वाध्यवसायोऽस्खलद्रूप इति कुतो बद्धस्य मुक्त्यर्थं प्रवृत्तिः[11] स्यात्? तथा[12] च—

"मिथ्याध्यारोपहानार्थं यत्नोऽ[13]सत्यपि मोक्तरि" [प्रमाणवा० २।१९२] इति ब्रुवते। तस्मा[14]त्सान्वया[15] चित्तसन्ततिरभ्युपग-न्तव्या, सकलविज्ञानक्षणत्वेपि जीवाभावे बन्धमोक्षयोस्तदर्थं वा प्रवृत्तेरनुपपत्तेः[16]। न चान्योन्यविलक्षणाऽपरा[17]परचित्तक्ष-णानामनुयायिजीवाभावो[18] विरोधात्; इत्यभिधातव्यम्; स्वसंवेदन[19]-प्रत्यक्षेण तत्रानुयायिरूपतया तस्य प्रतीतेः। प्रतीयमानस्य च कथं विरोधो नाम अनुपलम्भसाध्यत्वात्तस्य?

तद्व्यापारे[20] चासति आत्मनि प्रत्यभिज्ञानप्रत्ययस्य प्रादुर्भावो न स्यात्। अथात्मन्य[21]ध्यारोपि[22]तैकत्वविषयत्वादस्य प्रादुर्भावः[23]; न[24]; अस्यारोपितैक[25]त्वविषयत्वे स्वात्मन्यनुमानात्[26]क्षणिकत्वं निश्चिन्वतो निवृ[27]त्तिप्रसङ्गात्, निश्चयारो[28]पमनसोर्विरो[29]धात्[30]। निवर्तत एवेति[31]

१ पूर्वक्षणः। २ उत्तरक्षणः। ३ अपिशब्दाद्बन्धोपि। ४ बौद्धानां मते पूर्वोत्तर-क्षणानामेक आधारभूतः सन्तानः स अपरमार्थः सन्केवलः पूर्वक्षणः उत्तरक्षणः सन्तानी स तु परमार्थसन्। ५ कल्पनासन्। ६ आत्मनः। ७ क्षणानाम्। ८ अभि-प्रायवतः। ९ निर्विकल्पकस्य। १० भावना। ११ बद्धस्य मुक्त्यर्थं प्रवृत्त्यभावे च। १२ नैरात्म्यभावनालक्षणः। १३ विनश्यति। १४ अन्वयाभावे बन्धो मोक्षो वा न घटते यतः। १५ सद्रूव्या। १६ अन्यथा। १७ परेण। १८ पूर्वक्षणे अहमेव दुःखी उत्तरक्षणेऽहमेव सुखीति। १९ स्वस्मिन्। २० न केवलं बहिः। २१ संवृत्या। २२ चेदिति शेषः। २३ स्वरूपे। २४ यत्सत्तत्क्षणिकमित्यादि। २५ आरोपितै-कत्वविषयस्य प्रत्यभिज्ञाप्रत्ययस्य। २६ अनुमानेन। २७ सोऽहं प्रत्यभिज्ञानरूपो विकल्पः। २८ मनः=ज्ञानम्। २९ एकत्र। ३० अनुमानमनित्यत्वसाधने एक-स्मिन्वस्तुनि प्रवृत्तं प्रत्यभिज्ञानं त्वेकत्वसाधने इति विरोधः। ३१ क्षणिकत्वनिश्चय-समये एकत्वविषयं प्रत्यभिज्ञानम्।

चेत्; तर्हि सहजस्याभिसंस्कारिकस्य च सत्त्वदर्शनस्याभावात्तद्दैवे तन्मूलरागादिनिवृत्तेर्मुक्तिः स्यात्। भ्रान्तत्वे चास्य प्रत्यक्षस्याशेषस्यापि भ्रान्तत्वप्रसङ्गः, बाह्याध्यात्मिकभावेष्वेकत्वग्राहकत्वेनैवाशेषप्रत्यक्षाणां प्रवृत्तिप्रतीतेः । तथा च प्रत्यक्षस्याभ्रान्तत्वविशे-
५ षणमसम्भाव्यमेव स्यात् । समर्थयिष्यते च प्रत्यभिज्ञानप्रत्ययस्यानारोपितार्थग्राहकत्वमभ्रान्तत्वं च । तन्नैकत्वाभावः । अनुभूयमानस्यापि चैकत्वस्यानेकत्वेन विरोधे ग्राह्यग्राहकसंवित्तिलक्षणविरुद्धरूपत्रयाध्यासितज्ञानस्य, अर्थस्वलक्षणस्य चैकदा स्वपरकार्यकर्तृत्वाकर्तृत्वलक्षणविरुद्धधर्मद्वयाध्यासितस्य एकत्व-
१० विरोधः स्यात् ।

यच्चान्यत्-रागादिमतो विज्ञानान्न तद्रहितस्यास्योत्पत्तिरित्याद्युक्तम्; तदप्यसाम्प्रतम्; रागादिरहितस्याखिलपदार्थविषयविज्ञानस्याशेषज्ञसाधनप्रस्तावे प्रतिपादितत्वात् । न च बोधाद्बोधरूपतेति प्रमाणमस्ति; इत्यप्ययुक्तम्; विलक्षणकारणाद्विलक्षण-
१५ कार्यस्योत्पत्त्यभ्युपगमे अचेतनाच्छरीरादेश्चैतन्योत्पत्तिप्रसङ्गाच्चार्वाकमतानुषङ्गः। प्रसाधितश्च परलोकी प्रागित्यलमतिप्रसङ्गेन ।

यच्चाभ्यधायि-सुषुप्तावस्थायां विज्ञानसद्भावे जाग्रदवस्थातो न विशेषः स्यात्; तदप्यभिधानमात्रम्; यतस्तदा विज्ञानसद्भावेपि अतिनिद्रयाभिभूतत्वान्न जाग्रदवस्थातोऽविशेषः, मत्तमूर्च्छिता-
२० द्यवस्थायां मदिराद्युत्पादितमदवेदनाद्यभिभूतविज्ञानवत् ।

ननु कोयं मिद्धेनाभिभवः? ज्ञानस्य नाशश्चेत्; कथं तस्य सत्त्वम्? तिरोभावश्चेत्; न; स्वपरप्रकाशरूपज्ञानाभ्युपगमे तस्याप्यसम्भवात्; इत्यप्यचर्चिताभिधानम्; मणिमन्त्रादिनाग्न्यादिप्रतिबन्धे शरावादिना प्रदीपादिप्रतिबन्धे च समानत्वात्। न हि तत्राप्यग्न्या-
२५ देर्नाशः प्रतिबन्धः; प्रत्यक्षविरोधात् । नापि तिरोभावः; स्वपरप्रकाशस्वभावस्य स्फोटादिकार्यजननसमर्थस्य तिरोभावस्याप्यस-

---

१ ग्राम्यजनसम्बन्धिनः। २ पण्डितजनसम्बन्धिनः। ३ जीव। ४ प्रत्यभिज्ञानस्य। ५ क्षणिकत्वनिश्चयसमये एव। ६ सौगतस्य। ७ प्रत्यक्षं कल्पनापोढमभ्रान्तमित्यत्र सूत्रे। ८ किञ्च। ९ सुखदुःखनानालक्षणोपलम्भेन। १० नीलस्वलक्षणस्य। ११ उत्तरनीलादिक्षणस्य। १२ अर्थान्तरपीतादेः। १३ अचेतनादात्मनः। १४ ज्ञानलक्षणस्य। १५ दूरस्थितेन चार्वाकेणोक्तमस्मदीयमतमेवास्तु। तत्राह। १६ सुप्तावस्था ज्ञानवती आत्मनः अवस्थात्वान्मत्तमूर्च्छिताद्यवस्थावत्। १७ मत्तता। १८ पीडा। १९ विषयपीडा। २० सुषुप्तावस्थायाम्। २१ मणिमन्त्रशरावादिना अग्निप्रदीपप्रतिबन्धे।

म्भवात्। प्रतीत्यनतिक्रमेणात्र स्वरूपसामर्थ्यप्रतिबन्धाभ्युपगमो-ऽन्यत्रापि समानः। मिद्धादिसामग्रीविशेषवशाद्धि बाह्याध्यात्मिकार्थविचारविधुरं गच्छत्तृणस्पर्शज्ञानसमानं सुषुप्तावस्थायां ज्ञानमास्ते।

न हि स्वपरप्रकाशस्वभावत्वमात्रेणैवास्य तन्निरूपणसाम- ५ र्थ्यम्; सर्वत्रानभिभूतस्यैवार्थस्य स्वकार्यकारित्वप्रतीतेः, अन्यथा दहनादिस्वभावस्याग्नेः सदा दाहकत्वप्रकाशकत्वप्रसङ्गः, गच्छत्तृणस्पर्शसंवेदनस्य वा तदर्थनिरूपकत्वानुषङ्गः। अथात्र मनोव्यासङ्गोऽस्मरणकारणम्; अन्यत्र मिद्धादिकमित्यविशेषः। अस्ति चात्र स्वापलक्षणार्थनिरूपणम्–'एतावत्कालं निरन्तरसुप्तोहमेता- १० वत्कालं सान्तरम्' इत्यनुस्मरणप्रतीतेः। न च स्वापलक्षणार्थाननुभवेपि सुप्तोत्थानानन्तरं 'गाढोहं तदा सुप्तः' इत्यनुस्मरणं घटते; तस्यानुभूतवस्तुविषयत्वेनानुभवाविनाभावित्वात्, अन्यथा घटाद्यर्थाननुभवेपि तत्रानुस्मरणसम्भवात्कुतस्तदनुभवोपि सिद्ध्येत्? न च मत्तमूर्च्छिताद्यवस्थायामपि विज्ञानाभावाद् दृष्टा- १५ न्तस्य साध्यविकलता; इत्याशङ्कनीयम्; तदवस्थातः प्रच्युतस्योत्तरकालं 'मया न किञ्चिदप्यनुभूतम्' इत्यनुभवाभावप्रसङ्गात्, स्मृतेरनुभवपूर्वकत्वात्। अतो येनानुभवेन सतात्मा निखिलानुभवविकलोऽनुभूयते तस्यामवस्थायां सोऽवश्याभ्युपगन्तव्यः।

किञ्च, सुप्ताद्यवस्थायां विज्ञानाभावं स एवात्मा प्रतिपद्यते, २० पार्श्वस्थो वा? स एव चेत्; तत एव ज्ञानात्, तदभावाद्वा, ज्ञानान्तराद्वा? न तावत्तत एव; अस्यासत्त्वात्, 'तदेव नास्ति तत्र, तत एव चाभावगतिः' इत्यन्योन्यं विरोधात्। ज्ञानाभावात्तत्र तदभावपरिच्छित्तिः; इत्ययुक्तम्; परिच्छेदस्य ज्ञानधर्मतयाऽभावेऽसम्भवात्, अन्यथा ज्ञानस्यैव 'अभावः' इति नामकृतं स्यात्। २५

अथ ज्ञानान्तरात्तत्र तदभावगतिः किं तत्कालभाविनः, जाग्रत्प्रबोधकालभाविनो वा? प्रथमपक्षे कथं सुषुप्ताद्यवस्थायां सर्वथा ज्ञानाभावः? अथ जाग्रत्प्रबोधकालभाविविज्ञानाभ्यामन्तराले ज्ञाना-

१ ज्ञानस्य स्वपरप्रकाशरूपं तिरोहितमतिरोहितं चैतन्यम्। २ चैतन्यस्य। ३ देशे। ४ अभिभूतस्य स्वकार्यकारित्वं यदि स्यात्। ५ प्रतिबन्धसमयेपि। ६ कार्यान्तरे प्रवृत्तिः। ७ असावधानत्वं वा। ८ किञ्च। ९ सुप्तोहमिति शेषः। १० प्रत्यक्षेण। ११ अनुभवाविनाभावित्वं स्मरणस्य यदि न स्यात्। १२ स्मृति। १३ अन्यः। १४ सुषुप्तावस्थायां यस्य ज्ञानस्याभावस्तस्मादेव ज्ञानात्। १५ ज्ञानस्य। १६ ज्ञानाभावे परिच्छेदो यदि स्यात्। १७ ज्ञानमन्तरेण परिच्छेदानुपपत्तिर्यतः। १८ सन्ध्याकालप्रातःकालः, तत्र भावि।

भावोऽवसीयते; ननु तद्दशाभाविज्ञानयोः सुषुप्ताद्यवस्थाभाविज्ञानं नोपलब्धिलक्षणप्राप्तम्, तत्कथं ताभ्यां तदभावोऽवसीयेत ? अन्यथाऽदृष्टस्यापि परलोकादेरभावोऽध्यक्षत एव स्यात् । तथा च "प्रमाणेतरसामान्यस्थितेः" [ ] इत्याद्यऽसङ्गतम् ।

५ नापि पार्श्वस्थोन्यस्तत्र तदभावं प्रतिपद्यते; कारणस्वभावव्यापकानुपलब्धेर्विरुद्धविधेर्वा तदभावाविनाभाविनो लिङ्गस्यात्रानुपलब्धेः । न तत्र विज्ञानसद्भावेपि लिङ्गाभावः समान इत्यभिधातव्यम्; स्वात्मनि स्वसंविदितज्ञानाविनाभावित्वेनाऽवधारितस्य प्राणापानशरीरोष्णताकारविशेषादेस्तत्सद्भावावेदिनो लिङ्गस्या-
१० त्रोपलब्धेः, जाग्रद्दशायामप्यन्यचेतोवृत्तेस्तद्व्यतिरेकेणान्यतोऽप्रतीतेः ।

ननु द्विविधोऽत्र प्राणादिः चैतन्यप्रभवो जाग्रद्दशायाम्, प्राणादिप्रभवश्च सुषुप्ताद्यवस्थायामिति । तत्र चैतन्यप्रभवप्राणादेर्जाग्रद्दशायां चैतन्यानुमानं युक्तम्, न पुनः प्राणादिप्राणादेः । न
१५ खलु गोपालघटादौ धूमप्रभवधूमादग्न्यनुमानं दृष्टम्, अग्निप्रभवधूमादेव तद्दर्शनात्; इत्यप्यसङ्गतम्; सुषुप्तेतरावस्थयोः प्राणादेर्विशेषाऽप्रतीतेः । यथैव हि सुषुप्तः प्राणिति तथेतरोपि, अन्यथा 'किमयं सुषुप्तः किं वा जागर्ति' इति सन्देहो न स्यात् । यदि चैते सुषुप्तस्य चैतन्यप्रभवा न स्युः किन्तु प्राणा-
२० दिप्रभवाः; तर्हि जाग्रतः परवञ्चनाभिप्रायेण सुषुप्तव्याजेनावस्थितस्य तादृशामेव तेषां भावो न स्यात् । न ह्यग्नेर्जायमानो धूमः प्रयत्नशतैरपि धूमादन्यतो वा जायते धूमप्रभवो वाग्नेरिति । दृश्यन्ते च ते यादृशा एव सुषुप्तस्य तादृशा एवास्यापि । तन्नैते भिन्नकारणप्रभवाः । चैतन्येतरप्रभवांश्च प्राणादीन् विवेचयन्वीत-
३० रागेतरप्रभवव्यापारादीनपि विवेचयतु । तथा च

"सरागा अपि वीतरागवच्चेष्टन्ते वीतरागाश्च सरागवदिति वीतरागेतरविभागो निश्चेतुमशक्यः ।" [ ] इति ब्रुवते ।

---

१ तादिः । २ यथा घट उपलब्धिलक्षणप्राप्तो भवति तदा पश्चादन्यत्र घटाभावोऽवसीयते । ३ अनुपलब्धिलक्षणप्राप्तस्य प्रत्यक्षाद्यभावः स्याद्यदि । ४ प्रतिषेधाश्च कस्यचिदितिपर्यन्तम् । ५ अन्यपुरुषैः । ६ आत्मावस्थायाम् । ७ उभयोर्मध्ये । ८ प्रभव । ९ पुरुषः । १० श्वासोच्छ्वासं गृह्णाति । ११ जीवति । १२ जाग्रत् । १३ उभयोः श्वासे विशेषश्चेत् । १४ यतः सादृश्ये एव सन्देहः । अस्ति च सन्देहः । १५ किञ्च । १६ सुषुप्तस्य यादृशः प्राणः । १७ घटादेः । १८ धूमः । १९ न जायते । २० प्राण ।

धूमश्चाग्नेर्धूमाच्चोत्पद्यमानो यथा प्रतिपन्नस्तथा प्राणादिश्चैतन्यात्तदभावाच्चोत्पद्यमानः स्वात्मनि परत्र चानेन प्रत्येतुं न शक्यते क्वचित्तदभावस्य निश्चेतुमशक्यत्वादित्युक्तम्। धूमे च 'किमयं धूमोऽग्नेः, धूमान्तराद्वा' इति सन्देहः प्रवृत्तस्याग्निदर्शनेतराभ्यां निवर्त्तते। प्राणादौ तु 'किमयमनन्तरचैतन्यप्रभवः, किं वा भूतभाविजन्मान्तरचैतन्यप्रभवः' इति सन्देहः कुतो निवर्त्तेत परचैतन्यस्य द्रष्टुमशक्यत्वात्? ततोऽस्य न निश्शङ्कं परप्रतिपादनार्थं शास्त्रप्रणयनं युक्तम्। सन्देहात्तु तत्प्रणयनं चार्वाकस्याप्यविरुद्धम्, इत्ययुक्तमुक्तम्–"अन्यधियो गतेः" [ ] इति।

सुषुप्तादौ चास्य प्राणादिः कुतो जायताम्? जाग्रद्विज्ञानसहकारिणो जाग्रत्प्राणादेरिति चेत्; न; एकस्माज्जाग्रद्विज्ञानादनन्तरभावीप्राणादिः कालान्तरभावि च प्रबोधज्ञानमित्यस्यासम्भाव्यमानत्वात्। न ह्येकस्मात्सामग्रीविशेषात् क्रमभाविकार्यद्वयसम्भवो नाम, अन्यथा नित्यादप्यक्रमात्क्रमवत्कार्योत्पत्तिप्रसङ्गः। तथाच "नाऽक्रमात्क्रमिणो भावाः" [प्रमाणवा० १।४५] इत्यस्य विरोधः। तस्मात्तत्कालभाविन एव ज्ञानात् प्राणादिप्रभवोऽभ्युपगन्तव्यः। तत्कथं तत्र ज्ञानाभावसिद्धिः?

स्वापसुखसंवेदनं चात्र सुप्रतीतम्–'सुखमहमस्वापम्' इत्युत्तरकाले तत्प्रतीत्यन्यथानुपपत्तेः। न ह्यननुभूते वस्तुनि स्मरणं प्रत्यभिज्ञानं चोपपद्यते। न च तदा स्वापसुखनिरूपणाभावात्तत्संवेदनाभावः; तदहर्जातबालकस्य सुखप्राप्तिस्तन्यजनितसुखसंवेदनेन व्यभिचारात्। न खलु तत्तेन 'इदमित्थम्' इति निरूप्यते।

न च दुःखाभावात्सुखशब्दप्रयोगोऽत्र गौणः; अभावस्य प्रतियोगिभावान्तरस्वभावतया व्यवस्थितेः इत्यलमतिप्रसङ्गेन।

यच्चोक्तम्–अनेकान्तज्ञानस्य बाधकसद्भावेन मिथ्यात्वोपपत्तेर्न निःश्रेयससाधकत्वम्; तदप्ययुक्तिमात्रम्; तज्ज्ञानस्यैवाबाधित-

१ सांगतेन। २ [illegible]। ३ जाग्रदवस्थायाम्। ४ [illegible]। ५ [illegible]। ६ [illegible]। ७ [illegible]। ८ [illegible]। ९ स्वापदशा। १० सुषुप्तावस्थायाम्। ११ [illegible]। १२ सुषुप्तावस्थायाम्। १३ सुखसंवेदनं विना। १४ सुषुप्तावस्थायाम्। १५ दुग्ध। १६ दुःखाभावे सुखशब्दो न पारमार्थिकसुखस्य वाचक इति हेतोः। १७ सुखमहमस्वापमित्यस्मिन्वाक्ये। १८ औपचारिकः। १९ दुःखस्य। २० दुःखलक्षणाद्भावादपरं सुखलक्षणं भावान्तरम्। २१ स्यागमस्यायं ज्ञानसद्भावसाधनविस्तरेण।

तया सम्यक्त्वेन वक्ष्यमाणत्वात्। नित्यानित्यत्वयोर्विधिप्रतिषेधरूपत्वादभिन्ने धर्मिण्यभावः; इत्याद्यप्ययुक्तम्; प्रतीयमाने वस्तुनि विरोधासिद्धेः। न च येन रूपेण नित्यत्वविधिस्तेनैवानित्यत्वविधिः, येनैकत्र विरोधः स्यात्; अनुवृत्त-व्यावृत्ताकारतया नित्या-
५ नित्यत्वविधेरभ्युपगमात्। विभिन्नधर्मनिमित्तयोश्च विधिप्रतिषेधयोर्नैकत्र प्रतिषेधः अतिप्रसङ्गात्। न चानुवृत्तव्यावृत्ताकारयोः सामान्यविशेषरूपतयाऽऽत्यन्तिको भेदः; पूर्वोत्तरकालभाविस्वपर्यायतादात्म्येनावस्थितस्यानुगताकारस्य बाह्याध्यात्मिकार्थेषु प्रत्यक्षप्रतीतौ प्रतिभासनादित्यग्रे प्रपञ्चयिष्यते।

१० स्वदेशादिषु सत्त्वं परदेशादिष्वसत्त्वं च वस्तुनोऽभ्युपगम्यत एवेतरेतराभावात्; इत्यप्यसमीक्षिताभिधानम्; इतरेतराभावस्य घटादभेदे तद्विनाशे पटोत्पत्तिप्रसङ्गात् पटाभावस्य विनष्टत्वात्। अथ घटाद्भिन्नोऽसौ; तर्हि घटादीनामन्योन्यं भेदो न स्यात्। यथैव हि घटस्य घटाभावाद्भिन्नत्वाद् घटरूपता तथा पटादेरपि
१५ स्यात्। नाप्येषां परस्पराभिन्नानामभावेन भेदः कर्तुं शक्यः; भिन्नाभिन्नभेदकरणे तस्याकिञ्चित्करत्वप्रसङ्गात्। नापि भेदव्यवहारः; स्वहेतुभ्योऽसाधारणतयोत्पन्नानां सकलभावानां प्रत्यक्षे प्रतिभासनादेव भेदव्यवहारस्यापि प्रसिद्धेः। प्रतिक्षिप्तश्चेतरेतराभावः प्रागेवेति कृतं प्रयासेन।

२० कार्यान्तरेषु चाऽकर्तृत्वं न प्रतिषिध्यते; इत्याद्यप्यसारम्; एकान्तपक्षे कार्यकारित्वस्यैवासम्भवात्।

यच्च मुक्तावप्यनेकान्तो न व्यावर्त्तते; तदिष्यत एव। अनेकान्तो हि द्वेधा-क्रमानेकान्तः, अक्रमानेकान्तश्च। तत्र क्रमानेकान्तापेक्षया य एव प्रागमुक्तः स एवेदानीं मुक्तः संसारी
२५ चेत्यविरोधः। अनेकान्तेऽनेकान्ताभ्युपगमोप्यदूषणमेव; प्रमाण-

१ अनेकान्तसिद्धौ। २ एकस्मिन्। ३ नित्यानित्यात्मकतया। ४ बसः। ५ अन्यथा। ६ कर्तृत्वाकर्तृत्वधर्मयोरेकत्र धर्मिणि प्रतिषेधप्रसङ्गात्। ७ अनेकान्तसिद्धौ। ८ घटे पटाभावः पटे घटाभाव इतीतरेतराभावः। ९ कपालेषु। १० घटे। ११ घटाभावाद्भिन्नरूपत्वाद् घटरूपता। १२ बसः। १३ अभिन्नभेदकरणे पदार्थ एव कृतो भवेद्। भिन्नभेदकरणे पदार्थसाङ्कर्यम्। १४ अभावकृतः। १५ इतरेतराभावनिराकरणप्रयासेनालम्। १६ अनेकान्त एवेति योसावेकान्तः (सर्वथा) सोऽनेकान्ते प्रतिषिध्यते। केन? द्वितीयानेकान्तपदेन। कथम्? न विद्यते अनेकान्त एवेति एकान्तो यस्यानेकान्तस्य तस्याभ्युपगमः। १७ अनवस्थादिकम्।

परिच्छेद्यस्यानेकधर्माध्यासितवस्तुस्वरूपानेकान्तस्य[1] नयपरिच्छेद्यैकान्ताविनाभावित्वात्।

'आत्मैकत्वज्ञानात्' इत्यादिग्रन्थस्तु सिद्धसाध्यतया न समाधानमर्हति।

न च गुणपुरुषान्तरविवेकदर्शनं[2][3][4] निःश्रेयससाधनं घटते; प्रकर्षपर्यन्तावस्थायामप्यात्मनि[5] शरीरेण सहावस्थानान्मिथ्याज्ञानवत्।[6]

अथ फलोपभोगकृतोपात्तकर्मक्षयापेक्षं तत्त्वज्ञानं परनिःश्रेयसस्य साधनम्, तदनपेक्षं चाऽपरनिःश्रेयसस्येत्युच्यते;[7] तदप्युक्तिमात्रम्; फलोपभोगस्यौपक्रमिकानौपक्रमिकविकल्पानतिक्रमात्।[8] तस्यौपक्रमिकत्वे कुतस्तदुपक्रमोऽन्यत्र[9] तपोतिशयात्, इति तत्त्वज्ञानं तपोतिशयसहायमन्तर्भूततत्त्वार्थश्रद्धानं परनिःश्रेयसकारणमित्यनिच्छतोऽ[10][11][12]यायातम्। तस्यानौपक्रमिकत्वे तु सदा सद्भावानुषङ्गः[13]।

यच्च स्वरूपे चैतन्यमात्रेऽवस्थानं मोक्ष इत्युक्तम्; तदयुक्तम्; चैतन्यविशेषेऽनन्तज्ञानादिस्वरूपेऽवस्थानस्य मोक्षत्वसाधनात्। न ह्यनन्तज्ञानादिकमात्मनोऽस्वरूपं सर्वज्ञत्वादिविरोधात्। प्रधानस्य सर्वज्ञत्वादिस्वरूपं नात्मन इत्यसत्; तस्याचेतनत्वेनाकाशादिवत्तद्विरोधात्। ज्ञानादेरप्यचेतनत्वात् प्रधानस्वभ(भा)वत्वाविरोधश्चेत्; कुतस्तदचेतनत्वसिद्धिः? 'अचेतना ज्ञानादय उत्पत्तिमत्त्वाद् घटादिवत्' इत्यनुमानाच्चेत्; न; हेतोरनुभवेनानेकान्तात्, तस्य चेतनत्वेप्युत्पत्तिमत्त्वात्।[14][15] न चोत्पत्तिमत्त्वमसिद्धम्; परापेक्षत्वाद्बुद्ध्यादिवत्। परापेक्षोसौ बुद्ध्यध्यवसायापेक्षत्वात्[16][17][18] "बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते"[19] [ ] इत्यभिधानात्।

कालात्ययापदिष्टश्चायं हेतुः; ज्ञानादीनां स्वसंवेदनप्रत्यक्षाच्चेतनत्वप्रसिद्धेरध्यक्षबाधितपक्षानन्तरं प्रयुक्तत्वात्। चेतनसंसर्गात्तेषां चेतनत्वप्रसिद्धिः; इत्यप्यचर्चिताभिधानम्; शरीरादेरपि तत्प्रसिद्धिप्रसङ्गात् चेतनप्र(न्व)संसर्गाविशेषात्। शरीराद्यसम्भवी तेषां

१ यसः। कथम्? स चासावनेकान्तश्च तस्य। २ प्रकृतिसत्त्वादिगुणयोरभेदाद्गुण इत्युक्ते प्रकृतिर्ग्राह्या। ३ पुरुषविशेष। ४ भेदभावनाज्ञानम्। ५ विवेकदर्शनस्य। ६ असन्मते तु सम्यग्दर्शनादिकं परमप्रकर्षप्राप्तं शरीरेण सहावस्थायि न भवति अयोगिचरमसमये एव शरीराभावलक्षणे तत्सद्भावात्। ७ जीवन्मुक्तिः। ८ सकामनिर्जरा अकामनिर्जरा चेति। ९ भेद। १० वर्जने। ११ यौगस्य। १२ फलोपभोगश्चेति कृत्वा। १३ सदा मुक्तिप्रसङ्गः। १४ दर्शनेन। १५ अनुभवस्य। १६ अर्थप्रतिबिम्बन। १७ निश्चितम्। १८ आत्मा। १९ अनुभवति।

संसर्गविशेषोस्तीति चेत्; स कोन्योऽन्यत्र कथञ्चित्तादात्म्यात्? तद्‌दृष्टकृतकत्वादेः शरीरादावपि भावात्। ततो नाचेतना ज्ञानादयः स्वसंवेद्यत्वादनुभववत्। स्वसंवेद्यास्ते परसंवेदनान्यथानुपपत्तेरिति स्वसंवेदनसिद्धिप्रस्तावे प्रतिपादितम्। तथा चात्म-५स्वभावास्ते चेतनत्वादनुभववत्। सुखमप्यात्मस्वभाव एव मोक्षेऽभिव्यज्यमानत्वाद् ज्ञानवत्। अनात्मस्वभावत्वे तत्र तदभिव्यक्तिर्न स्याद्दुःखवत्।

तथा सुखात्मको मोक्षश्चेतनात्मकत्वे सत्यखिलदुःखविवेकात्मकत्वात् संहृतसकलविकल्पध्यानावस्थावत्। तथानन्तं तत् १० आत्मस्वभावत्वे सत्यपेतप्रतिबन्धत्वात् ज्ञानवदेव। अपेतप्रतिबन्धत्वं तु मोहनीयादेः प्रतिबन्धकस्य कर्मणोऽपायात्प्रसिद्धमेव। इति सिद्धमनन्तज्ञानादिचैतन्यविशेषेऽवस्थानं पुंसो मोक्ष इति।

ननु पुंस एवानन्तज्ञानादिस्वरूपलाभलक्षणो मोक्ष इत्ययुक्तम्; स्त्रीणामप्यस्योपपत्तेः। तथाहि-अस्ति स्त्रीणां मोक्षोऽविकलकारण-१५त्वात् पुरुषवत्; तदसत्; हेतोरसिद्धेः, तथाहि-मोक्षहेतुज्ञानादिपरमप्रकर्षः स्त्रीषु नास्ति परमप्रकर्षत्वात् सप्तमपृथ्वीगमनकारणापुण्यपरमप्रकर्षवत्। यदि नाम तत्र तत्कारणापुण्यपरमप्रकर्षाभावो मोक्षहेतोः परमप्रकर्षाभावे किमायातम्? कार्यकारणव्याप्यव्यापकभावाभावे हि तयोः कथमन्यस्याभावेऽन्यस्याभावोऽतिप्र-२०सङ्गात् इति चेत्; सत्यम्; अयं हि तावन्नियमोस्ति-यद्वेदस्य मोक्षहेतुपरमप्रकर्षस्तद्वेदस्य तत्कारणापुण्यपरमप्रकर्षोप्यस्त्येव, यथा पुंवेदस्य। न च चरमशरीरेण व्यभिचारः पुंवेदसामान्यापेक्षयोक्तेः।

१ विना। २ पुरुषादृष्टकृतः अन्यः संसर्गविशेषो ज्ञानादिभिरात्मनोऽस्तीत्युक्ते आह। ३ संसर्गस्य। ४ घटादिः परः। ५ ज्ञानस्य स्वसंविदितत्वाभावे। ६ चेतनत्वसिद्धितया। ७ सुखस्य। ८ अखिलदुःखविवेकात्मकत्वादित्युक्ते घटेन व्यभिचारस्तत्परिहारार्थं चेतनात्मकत्वे सतीत्युक्तम्। ९ चेतनात्मकत्वादित्युच्यमाने स्वप्नज्ञानेन व्यभिचारस्तत्परिहारार्थमखिलदुःखविवेकात्मकत्वादित्युक्तम्। १० आत्मस्वभावत्वादित्युच्यमाने दुःखेन व्यभिचारस्तत्परिहारार्थमपेतप्रतिबन्धत्वादित्युक्तम्। ११ अपेतप्रतिबन्धत्वादित्युच्यमाने प्रदीपेन व्यभिचारस्तत्परिहारार्थमात्मस्वभावत्वे सतीत्युक्तम्। १२ लक्षणम्। १३ श्वेतपटः। १४ मोक्षहेतुज्ञानादिपरमप्रकर्षतत्कारणापुण्यपरमप्रकर्षयोः। १५ अकारणस्याव्यापकस्य वा। १६ अकार्यस्याव्यापकस्य वा। १७ घटाभावे त्रैलोक्याभावो भवेत्। १८ अविनाभावः। १९ पुंसि सप्तमपृथ्वीगमनकारणापुण्यप्रकर्षोस्ति मोक्षहेतुज्ञानादिपरमप्रकर्षत्वात्। २० व्याप्यो हेतुः। २१ साध्यो व्यापकः। २२ इति पुंसि अनयोर्व्याप्यव्यापकभावः सिद्धः सन् स्त्रीषु व्यापकाभावे व्याप्याभावं साधयत्येवेति भावः। २३ आत्मना।

विपरीतं[1]तु नियमो[2] न सम्भवत्येव; नपुंसकवेदे तत्कारणापुण्यपरमप्रकर्षे सत्यप्यन्यस्यानभ्युपगमात् पुंस्यभ्युपगमाच्च, अनित्यत्वस्य[3] प्रयत्नानन्तरीयकत्वेतरत्ववत्। ततश्च[4] स्त्रीवेदस्यापि यदि मोक्षहेतुः परमप्रकर्षः स्यात्, तदा तदभ्युपगमाद्वापरो[5]ऽप्यनिष्टोऽवश्यमापद्यते, अन्यथा पुंस्यपि न स्यात्। सिद्धे च प्रतिबन्धद्व[6]याभावेपि कृत्तिकोदयादिवदुक्तप्रकर्षयो[7]रविनाभावे स्त्रीणां तत्कारणापुण्यपरमप्रकर्षप्रतिषेधेन मोक्षहेतुपरमप्रकर्षो[8] निषिध्यते।

न च 'नपुंसकस्य मोक्षहेतुपरमप्रकर्षोऽस्ति तत्कारणापुण्यपरमप्रकर्षसद्भावात् पुंवत्। पुंसो वा नास्त्यत एव नपुंसकवत्। तत्कारणाऽपुण्यपरमप्रकर्षो वा नपुंसके नास्ति परमप्रकर्षत्वात् स्त्रीवदित्यप्यनिष्टापत्तिः उभयप्रसिद्धाद्धेतोरुभयप्रसिद्धस्य[9] निषेधेनोभयो[10]स्तुल्यत्वात्[11]' इत्यभिधातव्यम्; उभयाभिप्रतागमेन बाधनात्[12]। स्त्रीणां तु तत्कारणापुण्यपरमप्रकर्षं परै[13]रभ्युपगतेनैव मोक्षहेतुपरमप्रकर्षेणापाद्य तत्प्रतिषेधेन तद्धेतुरेव प्रतिषिध्यत इत्यस्ति विशेषः[14]।

यद्वा[15] नोक्तानुमाने तत्कारणापुण्यपरमप्रकर्षाभावाद्धेतोर्मोक्ष[16]हेतुपरमप्रकर्षः स्त्रीषु निषिध्यते, अपि तु परमप्रकर्षत्वाद् दृष्टान्ते दृष्टसाध्यव्याप्तिकात्[17]। न चात्र[18] केनचिद्व्यभिचारः; स्त्रीसम्बन्धिनः कस्यचित्परमप्रकर्षस्यासम्भवात्। मायापरमप्रकर्षोऽस्तीति चेत्; न; स्त्रीणां मायाबाहुल्यमात्रस्यै[19]वागमे प्रसिद्धेः। अन्यथा[20] पुंवत्सप्तमपृथिवीगमनानुषङ्गः[21]। 'मायापरमप्रकर्षादन्यत्वे सति' इति विशेषणाद्वा न दोषः[22]। ननु ज्ञानादिपरमप्रकर्षो मोक्षहेतुस्तत्रास्तीत्य[23]-

१ मोक्षहेतुपरमप्रकर्षो व्यापकः साध्यं तत्कारणापुण्यपरमप्रकर्षो व्याप्यो हेतुरिति। २ अविनाभावः। ३ शब्दः प्रयत्नानन्तरीयकः अनित्यत्वादित्यत्रानित्यत्वस्य व्याप्यरूपस्य हेतोर्यथा प्रयत्नानन्तरीयकत्वम्। ४ नियमः सिद्धो यतः। ५ मोक्षहेतुपरमप्रकर्षसद्भावेपि अपरोऽनिष्टो नोपपद्यते चेत्। ६ तादात्म्यतदुत्पत्तिलक्षणे द्वे। ७ मोक्षहेतुपरमप्रकर्षसप्तमपृथ्वीगमनकारणापुण्यपरमप्रकर्षलक्षणयोः। ८ मोक्षहेतुपरमप्रकर्षः। ९ साध्यस्य। १० वादिप्रतिवादिनोः। ११ सितपटप्रसिद्धस्य स्त्रीनिर्वाणस्यास्माभिः प्रतिषेधादस्मत्प्रसिद्धस्य सितपटेन प्रतिषेधात् इति तुल्यत्वम्। १२ सितपटपक्षस्य। १३ परः सितपटः। १४ इति कथं तुल्यत्वमुभयोः?। १५ प्रागुक्तस्य परिहारान्तरे यद्वाशब्दः। १६ व्यापकाभावाद् व्याप्याभावं न कुर्म इत्यर्थः। १७ यो यः परमप्रकर्षः स स स्त्रीषु नास्तीति। १८ स्त्रीषु मोक्षप्रतिषेधे। १९ प्राचुर्यमात्रं न तु परमप्रकर्षः। २० मायापरमप्रकर्षः स्त्रीष्वस्ति यदि। २१ परमप्रकर्षत्वे। २२ व्यभिचारलक्षणः। २३ परमप्रकर्षत्वादित्यत्रानुमाने।

सिद्धो हेतुः। न खलु ज्ञानादयो यथा पुरुषे प्रकृष्यमाणाः प्रमाणतः प्रतीयन्ते तथा स्त्रीष्वपि, अन्यथा नपुंसके ते तथा स्युः, तथा चास्याप्यपवर्गप्रसङ्गः।

संयमस्तु तद्धेतुस्तत्रासम्भाव्य एव; तथाहि-स्त्रीणां संयमो न मोक्षहेतुः नियमेनर्द्धिविशेषाहेतुत्वान्यथानुपपत्तेः। यत्र हि संयमः सांसारिकलब्धीनामप्यहेतुः तत्रासौ कथं निःशेषकर्मविप्रमोक्षलक्षणमोक्षहेतुः स्यात्? नियमेन च स्त्रीणामेव ऋद्धिविशेषहेतुः संयमो नेष्यते, न तु पुरुषाणाम्। यदि हि नियमेन लब्धिविशेषस्याजनकः संयमः कचिदन्यत्राविवादास्पदीभूते मोक्षहेतुः प्रसिद्ध्येत् तदा तद्दृष्टान्तावष्टम्भेनात्राप्यसौ तथा प्रत्येतुं शक्येत, नान्यथातिप्रसङ्गात्। संयममात्रं तु सदप्यासां न तद्धेतुः तिर्यग्गृहस्थादिसंयमवत्।

सचेलसंयमत्वाच्च नासौ तद्धेतुर्गृहस्थसंयमवत्। न चायमसिद्धो हेतुः; न हि स्त्रीणां निर्वस्त्रः संयमो दृष्टः प्रवचनप्रतिपादितो वा। न च प्रवचनाभावेपि मोक्षसुखाकाङ्क्षया तासां वस्त्रत्यागो युक्तः; अर्हत्प्रणीतागमोल्लङ्घनेन मिथ्यात्वाराधनाप्राप्तेः। यदि पुनर्नृणामचेलोसौ तद्धेतुः स्त्रीणां तु सचेलः; तर्हि कारणभेदान्मुक्तेरप्यनुपज्येत भेदः स्वर्गादिवत्। देशसंयमिनश्चैवं मुक्तिः प्रसज्यते। तथा च लिङ्गग्रहणमनर्थकम्। सचेलसंयमश्च मुक्तिहेतुरिति कुतोऽवगतम्? स्वागमाच्चेत्; न; अस्यास्मान् प्रत्यागमाभासत्वाद् भवतो यज्ञानुष्ठानागमवत्।

स्त्रियो न मोक्षहेतुसंयमवत्यः साधूनामवन्द्यत्वाद् गृहस्थवत्। न चात्रासिद्धो हेतुः;

"वरिससयदिक्खियाए अज्जाए अज्ज दिक्खिओ साहू।
अभिगमणवंदणणमंसणविणएण सो पुज्जो॥" [ ]

इत्यभिधानात्।

बाह्याभ्यन्तरपरिग्रहवत्त्वाच्च न तास्तद्वत्यस्तद्वत्। न चायमसिद्धो हेतुः; प्रत्यक्षेणावगतो हि वस्त्रग्रहणादिबाह्यपरिग्रहोऽभ्य-

१ अविकलकारणत्वादिति। २ स्त्रीषु ज्ञानादयः प्रकृष्यमाणाश्चेत्तर्हि। ३ स्त्रीणां मोक्षहेतुसंयमो विद्यते चेत्। ४ तु पुनः। ५ स्त्रीणां मोक्षहेतुसंयमो विद्यते चेत्तर्हि। ६ ऋद्धीनाम्। ७ दृष्टान्तत्वमन्तरेण। ८ गृहस्थस्यापि मोक्षः स्यात् स्वसंयमात्। ९ निर्वस्त्रसंयमः। १० अदृष्टलक्षणकारणभेदाद्यथा स्वर्गादेः प्रथमद्वितीयादिप्रकारेण भेदः। ११ सचेलसंयमवत्स्त्रीमुक्तिप्रकारेण। १२ निर्ग्रन्थतालक्षणम्। १३ सितपटस्य। १४ महेश्वराय। १५ अनुमाने। १६ वर्षशतदीक्षितायाः आर्यिकायाः अद्य दीक्षितः साधुः। अभिगमनवन्दनानमस्कारेण विनयेन स पूज्यः। १७ सम्मुखगमन। १८ गुरुभक्तिपूर्वक। १९ नमस्कार।

न्तरं स्वशरीरानुरागादिपरिग्रहमनुमापयति । न च शरीरोष्मणा वातकायिकादिजन्तूपघातनिवारणार्थं स्वशरीरानुरागाद्यभावेऽप्य-सावुपादीयते इत्यभिधेयम्; पुंसामाचेलक्यव्रतस्य हिंसात्वानुषङ्गात्। तथा चार्हदादयो मुक्तिभाजस्तदुपदेष्टारो वा न स्युः, किन्तु सवस्त्रा एव गृहस्था मुक्तिभाजो भवेयुः । न चाचेलक्यं नेष्यते ५

"आचेलक्कुद्देसिय सेज्जाहररायपिंडकिदिकम्म" [जीतकल्प-भा० गा० १९७२] इत्यादेः पुरुषं प्रति दशविधस्य स्थिति-कल्पस्य मध्ये तदुपदेशात्।

किञ्च, गृहीतेपि वस्त्रे जन्तूपघातस्तदवस्थः, तेनानावृतपाणि-पादादिप्रदेशोष्मणा तदुपघातस्य परिहर्तुमशक्तेः । वस्त्रस्य १० यूकालिक्षाद्यनेकजन्तुसम्मूर्च्छनाधिकरणत्वाच्च । तथाविधस्यापि स्वीकरणे मूर्द्धजानां लुञ्चनादिक्रिया न स्यात्। वस्त्राकुञ्चनादेर्जात-वातेनाकाशप्रदेशावस्थितजन्तूपपीडनाच्च व्यजनादिवातवत्।

किञ्च, एवमनेकप्राण्युपघातनिवारणार्थमविहारोऽप्यनुष्ठेयो वस्त्र-ग्रहणवदविशेषात् । प्रयत्नेन गच्छतो जन्तूपघातेऽप्यहिंसा निश्च- १५ लेपि समा। यथा च यज्ञानुष्ठानं पशुहिंसाङ्गत्वेनाऽश्रेयस्करत्वात् त्याज्यं तथा वस्त्रग्रहणमप्यविशेषात्।

एतेन संयमोपकरणार्थं तदित्यपि निरस्तम्।

किञ्च, बाह्याभ्यन्तरपरिग्रहपरित्यागः संयमः । स च याचन-सीवनप्रक्षालनशोषणनिक्षेपादानचौरहरणादिमनःसंक्षोभकारिणि २० वस्त्रे गृहीते कथं स्यात्? प्रत्युत संयमोपघातकमेव तत् स्याद्बा-ह्याभ्यन्तरनैर्ग्रन्थ्यप्रतिपन्थित्वात्।

> ह्रीशीतार्तिनिवृत्त्यर्थं वस्त्रादि यदि गृह्यते ।
> कामिन्यादिस्तथा किन्न कामपीडादिशान्तये ? ॥ १ ॥
> येन येन विना पीडा पुंसां समुपजायते । २५
> तत्तत्सर्वमुपादेयं लावकादिपलादिकम् ॥ २ ॥

१ परेण । २ आचेलक्यौद्देशिकशय्याधरराजकीयपिण्डोक्षाकृतिकर्मव्रतरोपणयोग्यत्वं ज्येष्ठता प्रतिक्रमणं मासिकवासिता स्थितिकल्पो योगश्च वार्षिको दशमः । ३ अनु-प्रेक्षासंयमस्य । ४ यूकाद्यनेकजन्तुसम्मूर्छनाधिकरणत्वाविशेषात् एषां निवारणार्थम् । ५ प्रसारणाच्च । ६ व्यजनं । ७ जन्तूपघातपरिहारार्थं वस्त्रस्योपादानप्रकारेण । ८ अगमनम् । ९ वस्त्रस्य जन्तूपघातसमर्थनपरेण प्रन्थेन । १० विशेषतः । ११ विरोधित्वात् । १२ ताम्बूलादिश्च । १३ वस्त्रग्रहणप्रकारेण । १४ गृह्यते । १५ यदि तर्हीति शेषः । १६ लावकः पक्षिविशेषः । पलं मांसम् । १७ उपादेयम् ।

वस्त्रखण्डे गृहीतेपि विरक्तो यदि तत्त्वतः ।
स्त्रीमात्रेपि तथा किन्न तुल्याक्षेपसमाधितः ॥ ३ ॥
नापि तन्वीमनःक्षोभनिवृत्त्यर्थं तदादृतम् ।
तद्वाञ्छाऽहेतुकत्वेन तन्निषेधस्य सम्भवात् ॥ ४ ॥
चक्षुरुत्पाटनं पट्टबन्धनं च प्रसज्यते ।
लोचनादेस्तदुत्पत्तौ निमित्तत्वाविशेषतः ॥ ५ ॥
चलच्चित्ताङ्गना काचित्संयतं च तपस्विनम् ।
यदीच्छति भ्रातृवत्किं दोषस्तस्य मतो नृणाम् ॥ ६ ॥
बीभत्सं मलिनं साधुं दृष्ट्वा शवशरीरवत् ।
अङ्गना नैव रज्यन्ते विरज्यन्ते तु तत्त्वतः ॥ ७ ॥
स्त्रीपरीषहभङ्गश्च वस्त्ररागश्च विग्रहे ।
वस्त्रमादीयते यस्मात्सिद्धं ग्रन्थद्वयं ततः ॥ ८ ॥

न चैवं जन्तुरक्षागण्डादिप्रतीकारार्थं पिच्छौषधादौ गृह्यमाणेप्ययं दोषः समानः; त्रिचतुरपिच्छग्रहणस्य जन्तुरक्षार्थत्वात्, शरीरे ममेदम्भावाऽसूचकत्वाच्च, औषधस्यापि प्रतिपन्नसामर्थ्यस्य गण्डादेर्व्यावृत्तिहेतुत्वात् नाग्न्याविरोधित्वाच्च, वस्त्रे तु विपर्ययात्, परमनैर्ग्रन्थ्यसिद्ध्यर्थं पिच्छस्याप्यग्रहणाच्चौषधवत्। पिण्डौषध्यादयो हि सिद्धान्तानुसारेणोद्गमादिदोषरहिता रत्नत्रयाराधनहेतवो गृह्यमाणा न कस्यापि मोक्षहेतोः हन्तारः। न हि तद्ग्रहणे रागादयोऽन्तरङ्गा बहिरङ्गा वा भूषावेषादयो ग्रन्था जायन्ते, अतस्ते मोक्षहेतोरुपकर्त्तार एव। पिण्डग्रहणमन्तरेण ह्यपूर्णकालेपि विपत्तिरपत्तेरात्मघातित्वं स्यात्, न तु वस्त्रे। षष्ठाष्टमादिक्रमेण च मुमुक्षुभिः पिण्डोपि त्यज्यते, न तु स्त्रीभिः कदाचिद्वस्त्रम्।

१ रागादिसद्भावे सत्येव स्त्रीपरिग्रह इत्याक्षेपो वस्त्रेपि समान इति समाधानम्। एवं यदि वस्त्रमात्रे गृहीते न रागस्तर्हि स्त्रीमात्रपरिग्रहेपि न रागः। २ वस्त्रस्य। ३ श्रोत्रादेश्च। ४ यथा भ्रातृसमानत्वं वनितायाम्। कुत एतत्तस्य? इच्छारहितत्वात्तस्य तपस्विनः। ५ शरीरे। ६ कारणात्। ७ वस्त्ररागलक्षणबाह्याभ्यन्तरपरिग्रहः। ८ तत इत्ययं शब्दः श्लोकादौ द्रष्टव्यस्तेनायमर्थः वस्त्रस्वीकरणे अपरं प्रयोजनं नास्ति यतस्ततः। ९ वस्त्रप्रकारेण। १० गण्डो रोगविशेषः। ११ मूर्च्छा–। १२ नैर्ग्रन्थ्य–। १३ जन्तुरक्षार्थाभावान्ममेदम्भावसूचकत्वाद् गण्डाद्यव्यावृत्तिहेतुत्वाद् नाग्न्यविरोधित्वाच्च। १४ किञ्च। १५ औषधादेर्यथाऽग्रहणम्। १६ सम्यग्दर्शनादेः। १७ अलङ्कार–। १८ मण्डन–। १९ देशनैपथ्येन वस्त्रपरिधानादिलक्षणो वेषः। २० अगृह्यमाणे आत्मघातित्वं स्यादिति शेषः।

अथ वस्त्रादन्यस्याखिलस्य त्यागात्साकल्येनासां बाह्यं नैर्ग्रन्थ्यम्; तर्हि लोभादन्यकषायत्यागादेवाबाह्यमपि स्यात्। न च गृहीतेपि वस्त्रे ममेदम्भावस्याभावात्तदवतिष्ठते; विरोधात्-'बुद्धिपूर्वकं हि हस्तेन पतितवस्त्रमादाय परिदधानोपि तन्मूर्च्छारहितः' इति कश्चेतनः श्रद्दधीत? तन्वीमाश्लिष्यतोपि तद्रहितत्वप्रसङ्गात्। ततो वस्त्रग्रहणे बाह्याभ्यन्तरपरिग्रहप्राप्तेर्नैर्ग्रन्थ्यद्वयासम्भवान्न स्त्रीणां मोक्षः। स हि बाह्याभ्यन्तरकारणजन्यः कार्यत्वान्माषपाकादिवत्। तच्च बाह्यमभ्यन्तरं च कारणमाकिञ्चन्यम्, तदभावे कथं स स्यात्? इति परहेतोरसिद्धेर्नानुमानात् स्त्रीमुक्तिसिद्धिः।   १०

नाप्यागमात्; तन्मुक्तिप्रतिपादकस्यास्याभावात्।

"पुंवेदं वेदंता जे पुरिसा खवगसेढिमारूढा।
सेसोदयेण वि तहा झाणुवजुत्ता य ते दु सिज्झंति॥"
[   ]

इत्यादेरप्यागमस्य स्त्रीमुक्तिप्रतिपादकत्वाभावः। स हि पुंवेदोदयवत् शेषवेदोदयेनापि पुंसामेवापवर्गविदक उभयत्रापि 'पुरुषाः' इत्यभिसम्बन्धात्। उदयश्च भावस्यैव न द्रव्यस्य।   १५

स्त्रीत्वान्यथानुपपत्तेश्चासां न मुक्तिः। आगमे हि जघन्येन सप्ताष्टभिर्भवैः उत्कर्षेण द्वित्रैर्जीवस्य रत्नत्रयाराधकस्य मुक्तिरुक्ता। यदा चास्य सम्यग्दर्शनाराधकत्वम् तत्प्रभृति सर्वासु स्त्रीषूत्पत्तिरेव न सम्भवतीति कथं स्त्रीमुक्तिसिद्धिः।   २०

ननु चानादिमिथ्यादृष्टिरपि जीवः पूर्वभवनिर्जीर्णाशुभकर्मा प्रथमतरमेव रत्नत्रयमाराध्य भरतपुत्रादिवन्मुक्तिमासादयत्यतः स्त्रीत्वेनोत्पन्नस्यापि मुक्तिरविरुद्धेति; तदप्ययुक्तम्; पूर्वं निर्जीर्णाशुभकर्मणः स्त्रीवेदेनोत्पत्तेरसम्भवात्, तस्याप्यशुभकर्मत्वेन निर्जीर्णत्वात्। कथं पुनः स्त्रीवेदस्याशुभकर्मत्वमिति चेत्; सम्यग्दर्शनोपेतस्य तत्त्वेनोत्पत्तेरयोगात्।   २५

ततो नास्ति स्त्रीणां मोक्षः पुरुषादन्यत्वात् नपुंसकवत्। अन्यथाऽस्याप्यसौ स्यात्। न चैतद्वाच्यम्-नास्ति पुंसो मोक्षः स्त्रीतो-

१ तत्=रागादि। २ बाह्यमभ्यादिकमन्तरा शक्तिरेव यथा न हेतुः। ३ सितपटप्रयुक्तस्य अविकलकारणत्वादित्यस्य। ४ अनुभवन्तः। ५ नपुंसकस्त्रीवेदोदयेनापि। ६ ध्यानोपयुक्ताः। ७ पुरुषाः। ८ मुक्तिसद्भावे सति। ९ द्विव्यवस्थादिषु। १० अन्यथानुपपत्तिः सिद्धा यतः। ११ स्त्रीणां मोक्षश्चेत्।

न्यत्वात् नपुंसकवत्; उभयवादिसम्मतागमेन बाधितत्वात्, [1]भवदागमस्य चास्मान्प्रति अप्रमाणत्वात्।

तथा स्त्रीणां मोक्षो नास्ति उत्कृष्टध्यानफलत्वात् सप्तमपृथ्वीगमनवत्। अतोपि न तासां मुक्तिसिद्धिः। ततोऽनन्तचतुष्टय-
५ स्वरूपलाभलक्षणो मोक्षः पुरुषस्यैवेति प्रेक्षादक्षैः प्रतिपत्तव्यम्।

[2]मुख्यं सांव्यवहारिकं च गदितं भानुप्रदीपोपमम्,
प्रत्यक्षं विशदस्वरूपनियतं साकल्यवैकल्यतः।
निर्बाधं नियत[3]स्वहेतुजनितं मिथ्येतरैः[4] कल्पितम्[5],
तल्लक्ष्मेति विचारचारुधिषणैश्चेतस्यलं चिन्त्यताम्॥ १॥

१० इति श्रीप्रभाचन्द्रविरचिते प्रमेयकमलमार्त्तण्डे परीक्षामुखालङ्कारे द्वितीयः परिच्छेदः समाप्तः॥ २॥

१ पुरुषादन्यत्वादित्यनुमानं न वक्तव्यमसदागमेन बाधितत्वादिति सितपटेनोक्तं तं प्रत्याह सूरिः। २ अनेन पद्येन परिच्छेदार्थमुपसंहरन्नाह। ३ सामग्रीविशेषत्वादिकमिन्द्रियानिन्द्रियं च। ४ नैयायिकादिभिः। ५ कृतम्।

। श्रीः ।

॥ अथ तृतीयः परोक्षपरिच्छेदः ॥

अथेदानीं परोक्षप्रमाणस्वरूपनिरूपणाय—

परोक्षमितरत् ॥ १ ॥

इत्याह । प्रतिपादितविशदस्वरूपविज्ञानाद्यदन्यदऽविशदस्वरूपं विज्ञानं तत्परोक्षम् । तथा च प्रयोगः—अविशदज्ञानात्मकं परोक्षं परोक्षत्वात् । यन्नाऽविशदज्ञानात्मकं तन्न परोक्षम् यथा मुख्ये- ५ तरप्रत्यक्षम्, परोक्षं चेदं वक्ष्यमाणं विज्ञानम्, तस्मादविशदज्ञानात्मकमिति ।

तन्निमित्तप्रकारप्रकाशनाय प्रत्यक्षेत्याद्याह—

प्रत्यक्षादिनिमित्तं स्मृतिप्रत्यभिज्ञान-तर्कानुमानागमभेदम् ॥ २ ॥ १०

प्रत्यक्षादिनिमित्तं यस्य, स्मृत्यादयो भेदा यस्य तथोक्तम् ।

तत्र स्मृतेस्तावत्संस्कारेत्यादिना कारणस्वरूपे निरूपयति—

संस्कारोद्बोधनिबन्धना तदित्याकारा स्मृतिः ॥ ३ ॥

संस्कारः सांव्यवहारिकप्रत्यक्षभेदो धारणा । तस्योद्बोधः प्रबोधः । स निबन्धनं यस्याः तदित्याकारो यस्याः सा तथोक्ता १५ स्मृतिः ।

विनेयानां सुखावबोधार्थं दृष्टान्तद्वारेण तत्स्वरूपं निरूपयति—

यथा स देवदत्त इति ॥ ४ ॥

यथेत्युदाहरणप्रदर्शने । स देवदत्त इति । एवंप्रकारं तच्छब्द-परामृष्टं यद्विज्ञानं तत्सर्वं स्मृतिरित्यवगन्तव्यम् । न चासावप्रमाणं २०

१ स्मृतिप्रत्यभिज्ञानतर्कानुमानागमविशेषाः स्वभाविनो धर्मिणः प्रसिद्धाः । तत्र परोक्षत्वं सामान्यरूपं वादिप्रतिवादिनोः प्रसिद्धस्वभावः—तेन वस्तुनोऽनेकधर्मात्मकत्वात् । तत्र स्थितो द्वितीयोऽविशदज्ञानात्मकोऽप्रसिद्धः साध्यते इति विशेषं स्वभाविनं (स्वभावस्वभाविनोर्भेदात्) सामान्यस्वभावं ब्रुवतां दोषाभावात् । २ कारण । ३ भेद । ४ स्मृतिः प्रत्यक्षपूर्विका । प्रत्यभिज्ञानं प्रत्यक्षस्मरणपूर्वकम् । तर्कः प्रत्यक्षस्मरणप्रत्यभिज्ञानपूर्वकः । अनुमानं प्रत्यक्षस्मरणप्रत्यभिज्ञानतर्कपूर्वकम् । आगमस्तु श्रावणाध्यक्षसङ्केतस्मृतिपूर्वकः । ५ संस्कारस्य कारणमाद्यं देवदत्तदर्शनम् । उद्बोधस्य कारणं पाश्चात्यं तत्सदृशतत्कार्यादिदर्शनम् । ६ प्राकट्यम् ।

संवादकत्वात् । यत्संवादकं तत्प्रमाणं यथा प्रत्यक्षादि, संवादिका च स्मृतिः, तस्मात्प्रमाणम् ।

ननु कोयं स्मृतिशब्दवाच्योर्थः-ज्ञानमात्रम्, अनुभूतार्थविषयं वा विज्ञानम्? प्रथमपक्षे प्रत्यक्षादेरपि स्मृतिशब्दवाच्यत्वानुषङ्गः। तथा च कस्य दृष्टान्तता? न खलु तदेव तस्यैव दृष्टान्तो भवति। द्वितीयपक्षेपि देवदत्तानुभूतार्थे यज्ञदत्तादिज्ञानस्य स्मृतिरूपताप्रसङ्गः। अथ 'येनैव यदेव पूर्वमनुभूतं वस्तु पुनः कालान्तरे तस्यैव तत्रैवोपजायमानं ज्ञानं स्मृतिः' इत्युच्यते ननु 'अनुभूते जायमानम्' इत्येतत् केन प्रतीयताम्? न तावदनुभवेन; तत्काले स्मृतेरेवासत्त्वात् । न चासती विषयीकर्तुं शक्या। न चाविषयीकृता 'तत्रोपजायते' इत्यधिगतिः। न चानुभवकालेऽर्थस्यानुभूततास्ति, तदा तस्यानुभूयमानत्वात्, तथा च 'अनुभूयमाने स्मृतिः' इति स्यात्। अथ 'अनुभूते स्मृतिः' इत्येतत्स्मृतिरेव प्रतिपद्यते; न; अनयाऽतीतानुभवार्थयोरविषयीकरणे तथा प्रतीत्ययोगात् । तद्विषयीकरणे वा निखिलातीतविषयीकरणप्रसङ्गोऽविशेषात्। यदि चानुभूतता प्रत्यक्षगम्या स्यात्; तदा स्मृतिरपि जानीयात् 'अहमनुभूते समुत्पन्ना' इति अनुभवानुसारित्वात्तस्याः। न चासौ प्रत्यक्षगम्येत्युक्तम्; इत्यप्यसमीक्षिताभिधानम्; स्मृतिशब्दवाच्यार्थस्य प्रागेव प्ररूपितत्वात् । 'तदित्याकारानुभूतार्थविषया हि प्रतीतिः स्मृतिः' इत्युच्यते ।

ननु चोक्तमनुभूते स्मृतिरित्येतच्च स्मृतिप्रत्यक्षाभ्यां प्रतीयते; तदप्यपेशलम्; मतिज्ञानापेक्षणात्मना अनुभूयमानाऽनुभूतार्थविषयतायाः स्मृतिप्रत्यक्षाकारयोश्चानुभवसम्भवात् चित्राकारप्रतीतिवत् चित्रज्ञानेन । यथा चाशक्यविवेचनत्वाद् युगपच्चित्राकारतैकस्याविरुद्धा, तथा क्रमेणापि अवग्रहेहावायधारणास्मृत्यादिचित्रत्वसंभावना। न च प्रत्यक्षेणानुभूयमानतानुभवे तदैवार्थेऽनुभूततायाः अप्यनुभवोऽनुपपन्नः; स्मृतिविशेषणापेक्षत्वात्तत्र तत्प्रतीतेः, नीलाद्याकारविशेषणापेक्षया ज्ञाने चित्रप्रतिपत्तिवत् ।

न चानुभूतार्थविषयत्वे स्मृतेर्गृहीतग्राहित्वेनाऽप्रामाण्यम्; [प]रिच्छित्तिविशेषसम्भवात् । न खलु यथा प्रत्यक्षे विशदाकार-

१ सासती शक्ता । २ अनुभवेनेति । ३ अनुभूतेऽर्थे । ४ अनुभवकालेऽर्थस्यानुभूयमानत्वे च । ५ अनुभवस्यार्थश्च अनुभवार्थौ । अतीतौ च तावनुभवार्थौ च । ६ अतीतस्य । ७ कर्त्री । ८ प्रत्यक्षस्मरणयोः । ९ विज्ञानस्य । १० आदिना प्रत्यभिज्ञानादि । ११ एकस्यात्मनोऽविरुद्धा । १२ उत्तरकालमात्मनः । १३ अग्रे दर्शयति ।

तथा वस्तुप्रतिभासः तथैव स्मृतौ तत्र तस्या (तस्य) वैशद्याऽप्रतीतेः। पुनः पुनर्भावयतो वैशद्यप्रतीतिस्तु भावनाज्ञानम्, तच्च तद्रूपतया भ्रान्तमेव स्वप्नादिज्ञानवत्। तथाप्यनुभूतार्थविषयत्वमात्रेणास्याः प्रामाण्यानभ्युपगमे अनुमानेनाधिगतेऽग्नौ यत्प्रत्यक्षं तदप्यप्रमाणं स्यात्। असत्यतीतेऽर्थे प्रवर्त्तमानत्वात्तदप्रामाण्ये प्रत्यक्षस्यापि तत्प्रसङ्गः, तदर्थस्यापि तत्कालेऽसत्त्वात्। तज्जन्मादेस्तत्रास्य प्रामाण्ये स्मरणेपि तदस्तु। निराकृतं चार्थजन्मादि ज्ञानस्य प्रागेवेति कृतं प्रयासेन।

न चाविसंवादकत्वं स्मृतेरसिद्धम्; स्वयं स्थापितनिक्षेपादौ तद्गृहीतार्थे प्राप्तिप्रमाणान्तरप्रवृत्तिलक्षणाविसंवादप्रतीतेः। यत्र तु विसंवादः सा स्मृत्याभासा प्रत्यक्षाभासवत्। विसंवादकत्वे चास्याः कथमनुमानप्रवृत्तिः सम्बन्धस्यातोऽप्रसिद्धेः? न च सम्बन्धस्मृतिमन्तरेणानुमानमुदेत्यतिप्रसङ्गात्।

किञ्च, सम्बन्धाभावात्तस्याः विसंवादकत्वम्, कल्पितसम्बन्धविषयत्वाद्वा, सतोप्यस्याऽनया विषयीकर्त्तुमशक्यत्वाद्वा? प्रथमपक्षे कुतोऽनुमानप्रवृत्तिः? अन्यथा यतः कुतश्चित्सम्बन्धरहिताद्यत्र क्वचिदनुमानं स्यात्। कल्पितसम्बन्धविषयत्वेनास्याः विसंवादित्वे दृश्यप्राप्यैकत्वे प्राप्यविकल्प्यैकत्वे च प्रत्यक्षानुमानयोरविसंवादो न स्यात्। तत्सम्बन्धस्य कल्पितत्वे च अनुमानमप्येवंविधमेव स्यात्। तथा च कथमतोऽभीष्टतत्त्वसिद्धिः? अथ सन्नपि सम्बन्धोऽनया विषयीकर्त्तुं न शक्यते, यत्तु विषयीक्रियते सामान्यं तस्याऽसत्त्वात् स्मृतेर्विसंवादित्वम्; तदेतदनुमानेपि समानम्। अध्यवसितस्वलक्षणाव्यभिचारित्वं स्मृतावपि।

१ वैशद्यमेव नास्ति कुतः [illegible] इत्यभिप्रायं वक्ति बौद्धः। २ अवग्रहादिभेदेनानुभवतो नरस्य। ३ क्षणिकत्वात्। ४ आदिना ताद्रूप्यम्। ५ अर्थजन्मादिनिराकरणप्रयासेन। ६ प्रत्यक्षे। ७ विस्मृतसम्बन्धस्यापि अनुमानोत्पत्तिप्रसङ्गात्। ८ दृष्टान्तसाध्यसाधनयोः। ९ सम्बन्धाभावे अनुमानप्रवृत्तिर्यदि स्यात्। १० अर्थालिङ्गस्यानीयात्। ११ यदेव दृष्टं जलस्वलक्षणं तदेव प्राप्तमिति। १२ अनुमानलक्षणो विकल्पः। विकल्पस्य विषयो विकल्प्यो यो जलादिः। पूर्वं विकल्प्यः पश्चात्प्राप्य इति। कथम्? विवादापन्नो देशः प्रवृत्तस्य स्नानादिमान् जलत्वात्सम्प्रतिपन्नदेशवत्। इति यदेवानुमितं स्नानादिकं तदेव प्राप्तमिति। १३ स्मृतिगृह्यमाण। १४ सर्वं क्षणिकं सत्त्वादिति क्षणिकत्वसिद्धिः। १५ तादात्म्यतदुत्पत्तिलक्षणः। १६ अन्यापोहः। १७ न्यायरूपमनुमानेन स्वलक्षणं विद्यमानं न विषयीक्रियते (यद्विषयीक्रियते) सामान्यं तद्विद्यमानं न भवतीति। १८ प्रत्यक्षेण। १९ यतः। २० स्वलक्षणं न व्यभिचरतीति न स्मृतेश्चेति। २१ समानम्।

किञ्च, लिङ्गलिङ्गिसम्बन्धः सत्तामात्रेणानुमानप्रवृत्तिहेतुः, तद्दर्शनात्, तत्स्मरणाद्वा? तत्राद्यविकल्पे नालिकेरद्वीपायातस्याप्रतिपन्नाग्निधूमसम्बन्धस्यापि धूमदर्शनादग्निप्रतिपत्तिः स्यात्। न चाविज्ञातः सम्बन्धोस्ति उपलम्भनिबन्धनत्वात्सद्व्यवहारस्य, ५ अन्यथातिप्रसङ्गात्। तद्दर्शनमात्रेण तत्प्रवृत्तौ बालावस्थायां प्रतिपन्नाग्निधूमसम्बन्धस्य पुनर्वृद्धदशायां धूमदर्शनादग्निप्रतिपत्तिप्रसङ्गः, न चैवम्। तत्स्मृतावस्त्येवेति चेत्; कथं नासौ प्रमाणम्? को हि स्मृतिपूर्वकमनुमानमभ्युपगम्य पुनस्तां निराकुर्यात्? अनुमानस्यापि निराकरणानुषङ्गात्। न खलु कारणाभावे कार्योत्पत्तिर्नामाऽतिप्रसङ्गात्। १०

समारोपव्यवच्छेदकत्वाच्चास्याः प्रामाण्यमनुमानवत्। न च स्मृतिविषयभूते सम्बन्धादौ समारोपस्यैवासम्भवात् कस्य व्यवच्छेद इत्यभिधातव्यम्; साधर्म्यदृष्टान्ताभिधानानर्थक्यप्रसङ्गात्। तत्र स्मृतिहेतुभूतं हि तत्, अन्यथा हेतुरेव केवलोभिधीयेत। १५ ततस्तदभिधानान्यथानुपपत्तेस्तद्विषयभूते सम्बन्धादौ विस्मरणसंशयविपर्यासलक्षणः समारोपोस्तीत्यवगम्यते। तन्निराकरणाच्चास्याः प्रामाण्यमिति।

अथेदानीं प्रत्यभिज्ञानस्य कारणस्वरूपप्ररूपणार्थं दर्शनेत्याद्याह—

२० **दर्शन-स्मरणकारणकं सङ्कलनं प्रत्यभिज्ञानम्। तदेवेदं तत्सदृशं तद्विलक्षणं तत्प्रतियोगीत्यादि ॥५**

दर्शनस्मरणे कारणं यस्य तत्तथोक्तम्। सङ्कलनं विवक्षितधर्मयुक्तत्वेन प्रत्यवमर्शनं प्रत्यभिज्ञानम्। ननु प्रत्यभिज्ञायाः प्रत्यक्षप्रमाणस्वरूपत्वात् परोक्षरूपतयात्राभिधानमयुक्तम्; तथाहि— २५ प्रत्यक्षं प्रत्यभिज्ञा अक्षान्वयव्यतिरेकानुविधानात् तदन्यप्रत्यक्षवत्। न च स्मरणपूर्वकत्वात्तस्याः प्रत्यक्षत्वाभावः; सत्सम्प्रयोगजत्वेन स्मरणपश्चाद्भाविन्वेप्यस्याः प्रत्यक्षत्वाविरोधात्। उक्तं च—

---

१ परपक्षप्रतिक्षेपं करोति सूरिः। २ ग्रहण। ३ अज्ञातस्यापि सत्त्वसिद्धिश्चेत्। ४ ईश्वरादेरपि सत्त्वसिद्धिप्रसङ्गात्। ५ विस्मृतसम्बन्धस्य। ६ अनुमानप्रवृत्तिः। ७ मृत्पिण्डाभावे घटोत्पत्तिप्रसङ्गात्। ८ साध्यसाधनविषये। ९ समारोपाभावे इति शेषः। १० यत्सत्तत्सर्वं क्षणिकं यथा जलधरः। ११ सम्बन्धस्मृतिहेतुभूतो दृष्टान्तो यदि न स्यात्। १२ एकत्वसादृश्यादिलक्षण। १३ पुनर्ग्रहणम्। १४ मीमांसकः। १५ परोक्षप्रमाणे। १६ सतो विद्यमानस्यार्थस्येन्द्रियेण सह संयोगः सन्निकर्षस्तस्माज्जातः सत्सम्प्रयोगजस्तस्य भावस्तत्त्वं तेन।

"न हि स्मरणतो यत्प्राक् तत् प्रत्यक्षमितीदृशम् ।
वचनं राजकीयं वा लौकिकं वापि विद्यते ॥ १ ॥
न चापि स्मरणात्पश्चादिन्द्रियस्य प्रवर्त्तनम् ।
वार्यते केनचिन्नापि तत्तदानीं प्रदुष्यति ॥ २ ॥
तेनेन्द्रियार्थसम्बन्धात्प्रागूर्ध्वं चापि यत्स्मृतेः । ५
विज्ञानं जायते सर्वं प्रत्यक्षमिति गम्यताम् ॥ ३ ॥"
[मी० श्लो० सू० ४ श्लो० २३४-२३७]

अनेकदेशकालावस्थासमन्वितं सामान्यं द्रव्यादिकं च वस्त्वस्याः प्रमेयमित्यपूर्वप्रमेयसद्भावः । तदुक्तम्—

"गृहीतमपि गोत्वादि स्मृतिस्पृष्टं च यद्यपि । १०
तथापि व्यतिरेकेण पूर्वबोधात्प्रतीयते ॥ १ ॥
देशकालादिभेदेन तत्रास्त्यवसरो मितेः ।
यः पूर्वमवगतोंऽशः स न नाम प्रतीयते ॥ २ ॥
इदानीन्तनमस्तित्वं न हि पूर्वधिया गतम् ।"
[मी० श्लो० सू० ४ श्लो० २३२-२३४] १५

तदप्यसमीचीनम्; प्रत्यभिज्ञानेऽक्षान्वयव्यतिरेकानुविधानस्यासिद्धेः, अन्यथा प्रथमव्यक्तिदर्शनकालेऽप्यस्योत्पत्तिः स्यात् । पुनर्दर्शने पूर्वदर्शनाहितसंस्कारप्रबोधोत्पन्नस्मृतिसहायमिन्द्रियं तज्जनयति; इत्यप्यसाम्प्रतम्; प्रत्यक्षस्य स्मृतिनिरपेक्षत्वात् । तत्सापेक्षत्वेऽपूर्वार्थसाक्षात्कारित्वाभावः स्यात् । २०

देशकालेत्याद्यप्ययुक्तमुक्तम्; यतो देशादिभेदेनाप्यध्यक्षं चक्षुःसम्बद्धमेवार्थं प्रकाशयत्प्रतीयते । न च प्रत्यभिज्ञा तं प्रकाशयति पूर्वोत्तरविवर्त्तवर्त्त्येकत्वविषयत्वात्तस्याः । वर्त्तमानश्चायं चक्षुःसम्बद्धः प्रसिद्धः ।

---

१ ज्ञानम् । २ स्मरणानन्तरमिन्द्रियमर्थग्रहणाय न प्रवर्त्तते इत्युक्ते आह । ३ स्मरणोत्तरकालम् । ४ दुष्टं भवति । ५ राजकीयं लौकिकं वचनं न विद्यते येन । स्मरणादिन्द्रियस्य प्रवर्त्तनं वा केनचिद्वा न विचार्यते येन । इन्द्रियं वा दुष्टं न भवति येन कारणेन । ६ प्रत्यक्षस्मरणगृहीतग्राहित्वात्प्रत्यभिज्ञानं प्रत्यक्षमप्रमाणं स्यादित्यारेकायामाह । ७ तिर्यक्सामान्यम् । ८ आदिना गुणः । ९ भेदेन । १० स्मरणप्रत्यक्षरूपात् । ११ कथं पूर्वबोधाद्भेदेन प्रतीयते इत्युक्ते आह । १२ अवस्थाभेदेन । १३ प्रत्यभिज्ञानलक्षणप्रत्यक्षप्रमाणस्य । १४ प्रत्यभिज्ञानलक्षणप्रत्यक्षस्य । १५ पूर्वादिपर्यायः । १६ भाव । १७ यसः । १८ भासः । १९ यसः । २० तासः । २१ कासः । २२ यसः । २३ यसः । २४ सन्दिग्धानैकान्तिकत्वे उद्भाविते इदं वाक्यं परिहारः ।

यदप्युच्यते-स्मरतः[1] पूर्वदृष्टार्थानुसन्धानादुत्पद्यमाना[2] मतिश्चक्षुः-सम्बद्धत्वे[3] प्रत्यक्षमिति; तदप्यसारम्; न हीन्द्रियमतिः स्मृति-विषयपूर्वरूपग्राहिणी, तत्कथं सा तत्सन्धानमात्मसात्कुर्यात्? पूर्वदृष्टसन्धानं[4] हि तत्प्रतिभासनम्, तत्सम्भवे चेन्द्रियमतेः
५ परोक्षार्थग्राहित्वात् परिस्फुटप्रतिभासता न स्यात्। यदि च स्मृतिविषयस्वभावतया दृश्यमानोर्थः प्रत्यक्षप्रत्ययैरवगम्येत तर्हि स्मृतिविषयः पूर्वस्वभावो वर्त्तमानतया प्रतिभातीति विप-रीतख्यातिः[5] सर्वं प्रत्यक्षं स्यात्[6]। अव्यवधानेन[7] प्रतिभासनलक्षण-वैशद्याभावाच्च न प्रत्यभिज्ञानं प्रत्यक्षम् इत्यलमतिप्रसङ्गेन[8]।

१० तच्च[9] तदेवेदं तत्सदृशं तद्विलक्षणं तत्प्रतियोगीत्यादिप्रकारं प्रतिपत्तव्यम्। तदेवोक्तप्रकारं[10] प्रत्यभिज्ञानमुदाहरणद्वारेणाखिल-जनावबोधार्थं स्पष्टयति—

यथा स एवायं देवदत्तः ॥ ६ ॥

गोसदृशो गवयः ॥ ७ ॥

१५ **गोविलक्षणो महिषः ॥ ८ ॥**

इदमस्माद्दूरम् ॥ ९ ॥

वृक्षोयमित्यादि[11] ॥ १० ॥

ननु[12] स एवायमित्यादि प्रत्यभिज्ञानं नैकं विज्ञानम्-'सः' इत्यु-ल्लेखस्य स्मरणत्वात् 'अयम्' इत्युल्लेखस्य चाध्यक्षत्वात्। न चाभ्यां
२० व्यतिरिक्तं ज्ञानमस्ति यत्प्रत्यभिज्ञानशब्दाभिधेयं स्यात्। नाप्यन-योरैक्यं प्रत्यक्षानुमानयोरपि तत्प्रसङ्गात्। स्पष्टेतररूपतया तयो-र्भेदेऽत्रापि सोऽस्तु; तदसाम्प्रतम्; स्मरणप्रत्यक्षजन्यस्य पूर्वोत्त-रविवर्तवर्त्येकद्रव्यविषयस्य सङ्कलनज्ञानस्यैकस्य प्रत्यभिज्ञानत्वेन सुप्रतीतत्वात्। न खलु स्मरणमेवातीतवर्त्तमानविवर्त्तवर्तिद्रव्यं
२५ सङ्कलयितुमलं तस्यातीतविवर्त्तमात्रगोचरत्वात्। नापि दर्शनम्;

---

१ पुरुषस्य। २ प्रतिभासात्। ३ तर्कस्य प्रत्यक्षतापरिहारार्थमाह। ४ इन्द्रिय-मतिः स्मृतिविषयरूपग्राहिणी न भवति इन्द्रियमतित्वादित्यस्मिन्ननुमाने सन्दिग्धानैका-न्तिकत्वे परिहारे इदं वाक्यम्। ५ दृश्यमानार्थाद्विपरीतस्मृतिविषयो विपरीतख्यातिः। ६ इत्यापद्यते। ७ पूर्वस्मरणमुत्तरदर्शनं च व्यवधायकं प्रत्यभिज्ञानस्य। ८ प्रत्यभि-ज्ञानभेदलक्षणप्रत्यक्षप्रमाणस्य निराकरणविस्तरेण। ९ प्रत्यभिज्ञानभेदं दर्शयति। १० प्रागुक्तलक्षणलक्षितमेव। ११ तेन सदृश इत्यादि च। १२ अत्राह सौगतः।

तस्य वर्तमानमात्रपर्यायविषयत्वात्। तदुभयसंस्कारजनितं कल्पनाज्ञानं तत्सङ्कलयतीति कल्पने तदेव प्रत्यभिज्ञानं सिद्धम्।

प्रत्यभिज्ञानानभ्युपगमे च 'यत्सत्तत्सर्वं क्षणिकम्' इत्याद्यनुमानवैयर्थ्यम्। तद्ध्येकत्वप्रतीतिनिरासार्थम् न पुनः क्षणक्षयप्रसिद्ध्यर्थं तस्याध्यक्षसिद्धत्वेनाभ्युपगमात्। समारोपनिषेधार्थं तत्; ५ इत्यप्यपेशलम्; सोयमित्येकत्वप्रतीतिमन्तरेण समारोपस्याप्यसम्भवात्। तदभ्युपगमे च 'अयं सः इत्यध्यक्षस्मरणव्यतिरेकेण नापरमेकत्वज्ञानम्' इत्यस्य विरोधः। न चाध्यक्षस्मरणे एव समारोपः; तेनानयोर्व्यवच्छेदेऽनुमानस्यानुत्पत्तिरेव स्यात् तत्पूर्वकत्वात्तस्य। कथं चास्याः प्रतिक्षेपेऽभ्यासेतरावस्थायां प्रत्यक्षानुमा- १० नयोः प्रामाण्यप्रसिद्धिः? प्रत्यभिज्ञाया अभावे हि 'यद्दृष्टं यच्चानुमितं तदेव प्राप्तम्' इत्येकत्वाध्यवसायाभावेनानयोरविसंवादासम्भवात्। तथा च "प्रमाणमविसंवादि ज्ञानम्" [प्रमाणवा० २।१] इति प्रमाणलक्षणप्रणयनमयुक्तम्। अन्यद् दृष्टमनुमितं वा प्राप्तं चान्यदित्येकत्वाध्यवसायाभावेप्यविसंवादे प्रामाण्ये चानयोरभ्यु- १५ पगम्यमाने मरीचिकाचक्रे जलज्ञानस्यापि तत्प्रसङ्गः।

न चैवंवादिनो नैरात्म्यभावनाभ्यासो युक्तः फलाभावात्। न चात्मदृष्टिनिवृत्तिः फलम्; तस्या एवासम्भवात्। 'सोहम्' इत्यस्तीति चेत्; न; स्मरणप्रत्यक्षोल्लेखव्यतिरेकेण तदनभ्युपगमात्। तथा च कुतस्तन्निमित्ता रागादयो यतः संसारः स्यात्? २०

ननु पूर्वापरपर्याययोरेकत्वग्राहिणी प्रत्यभिज्ञा, तस्य चासम्भवात् कथमियमविसंवादिनी यतः प्रमाणं स्यात्? प्रत्यक्षेण हि तद्द्रूपयोः प्रतीतिः स्वकालनियतार्थविषयत्वात्तस्य; इत्यपि मनोरथमात्रम्; सर्वथा क्षणिकत्वस्याग्रे निराकरिष्यमाणत्वात्। प्रत्यक्षेणाऽतद्द्रूपतयार्थप्रतीतेश्चानुभवात् कथं विसंवादकत्वं तस्याः? २५ ततः प्रमाणं प्रत्यभिज्ञा स्वगृहीतार्थाविसंवादित्वात् प्रत्यक्षादिवत्। नीलाद्यनेकाकाराक्रान्तं चैकं ज्ञानमभ्युपगच्छतः 'स एवायम्' इत्याकारद्वयाक्रान्तैकज्ञाने को विद्वेषः?

---

१ तदुभयस्य कार्यः संस्कारः सौगताभिप्रायेण वा सता तेन जनितम्। २ प्रथममेव विशरारवः (क्षणक्षयिनः) परमाणवः प्रत्यक्षेण निश्चीयन्ते इति वचनात्। ३ अन्यस्य। ४ किञ्च। ५ अर्थाव्यभिचारित्वमविसंवादः। ६ प्रमाणे अविसंवादित्वादिति प्रसिद्धहेतुभूतधर्मेण प्रामाण्यमप्रसिद्धधर्मः साध्यते इति प्रामाण्याविसंवादधर्मिदः। ७ जलम्। ८ अन्यज्जलमित्यर्थः। ९ प्रत्यभिज्ञानाभावादित्येवंवादिनः। १० पश्चाद्दारमदर्शनाभावः। ११ कुतः। १२ नष्टपद्रूपयोः। १३ चतुर्थपरिच्छेदे। १४ अन्वयरूपतया। १५ परस्परतादात्म्येन।

ननु स एवायमित्याकारद्वयं किं परस्परानुप्रवेशेन प्रतिभासते, अननुप्रवेशेन वा? प्रथमपक्षेऽन्यतराकारस्यैव प्रतिभासः स्यात्। द्वितीयपक्षे तु परस्परविविक्तप्रतिभासद्वयप्रसङ्गः। अथ प्रतिभासद्वयमेकाधिकरणमित्युच्यते; न; एकाधिकरणत्वासिद्धेः। न खलु ५ परोक्षापरोक्षरूपौ प्रतिभासावेकमधिकरणं बिभ्राते सर्वसंविदामेकाधिकरणत्वप्रसङ्गात्। इत्यप्यसारम्; तदाकारयोः कथञ्चित्परस्परानुप्रवेशेनात्माधिकरणतयात्मन्येवानुभवात्। कथं चैवंवादिनश्चित्रज्ञानसिद्धिः? नीलादिप्रतिभासानां परस्परानुप्रवेशे सर्वेषामेकरूपतानुषङ्गात् कुतश्चित्रतैकनीलाकारज्ञानवत्? तेषां तदन- १० नुप्रवेशे भिन्नसन्ताननीलादिप्रतिभासानामिवात्यन्तभेदसिद्धेर्नितरां चित्रताऽसम्भवः। एकज्ञानाधिकरणतया तेषां प्रत्यक्षतः प्रतीतेः प्रतिपादितदोषाभावे प्रकृतेप्यसौ मा भून्तत एव।

अथोच्यते–'पूर्वमुत्तरं वा दर्शनमेकत्वेऽप्रवृत्तं कथं स्मरणसहायमपि प्रत्यभिज्ञानमेकत्वे जनयेत्? न खलु परिमलस्मरण- १५ सहायमपि चक्षुर्गन्धे ज्ञानमुत्पादयति' इति; तदप्युक्तिमात्रम्; तथा च तज्जनकत्वस्यात्र प्रमाणप्रतिपन्नत्वात्। न च प्रमाणप्रतिपन्नं वस्तुस्वरूपं व्यलीकविचारसहस्रेणाप्यन्यथाकर्त्तुं शक्यं सहकारिणां चाचिन्त्यशक्तित्वात्। कथमन्यथाऽसर्वज्ञज्ञानमभ्यासविशेषसहायं सर्वज्ञज्ञानं जनयेत्? एकत्वविषयत्वं च दर्शन- २० स्यापि, अन्यथा निर्विषयकत्वमेवास्य स्यादेकान्ताऽनित्यत्वस्य कदाचनाप्यप्रतीतेः। केवलं तेनैकत्वं प्रतिनियतवर्त्तमानपर्यायाधारतयार्थस्य प्रतीयते, स्मरणसहायप्रत्यक्षजनितप्रत्यभिज्ञानेन तु स्मर्यमाणानुभूयमानपर्यायाधारतयेति विशेषः।

न च लूनपुनर्जातनखकेशादिवत्सर्वत्र निर्विषया प्रत्यभिज्ञा; २५ क्षणक्षयैकान्तस्यानुपलम्भात्। तदुपलम्भे हि सा निर्विषया स्यात् एकचन्द्रोपलम्भे द्विचन्द्रप्रतीतिवत्। लूनपुनर्जातनखकेशादौ च 'स एवायं नखकेशादिः' इत्येकत्वपरामर्शिप्रत्यभिज्ञानं 'लूननखकेशादिसदृशोयं पुनर्जातनखकेशादिः' इति सादृश्यनिबन्धनप्रत्यभिज्ञानान्तरेण बाध्यमानत्वादप्रमाणं प्रसिद्धम्, ३० न पुनः सादृश्यप्रत्यवमर्शि तत्रास्याऽबाध्यमानतया प्रमाणत्व-

१ उभयोर्मध्ये। २ एकज्ञानस्य। ३ भिन्न। ४ एकत्वहानिः स्यादिति दूषणम्। ५ एकज्ञान। ६ जैनैः। ७ देवदत्तयज्ञदत्तादि। ८ द्रव्यापेक्षया। ९ एकाधिकरणप्रतीतेः। १० प्रत्यक्षम्। ११ पूर्वोत्तरविवर्त्तवर्त्त्येकत्वे। १२ दर्शनस्य। १३ प्रत्यक्ष। १४ अभावरूपत्वेन। १५ सहकारिणामचिन्त्यशक्तित्वं यदि न स्यात्। १६ न केवलं प्रत्यभिज्ञानस्य। १७ दर्शनमेकत्वविषयं यदि न स्यात्।

प्रसिद्धेः । न चैकत्रैकत्वपरामर्शिप्रत्यभिज्ञानस्य मिथ्यात्वदर्शना-
त्सर्व[1]त्रास्य मिथ्यात्वम्; प्रत्यक्षस्यापि सर्वत्र भ्रान्तत्वानुषङ्गान्न
किञ्चि[2]त्कुत[3]श्चित्कस्य[4]चित्प्रसिद्ध्येत्। त[5]तो यथा शुक्ले शङ्खे पीता-
भासं प्रत्यक्षं तत्रैव शुक्लाभासप्रत्यक्षान्तरेण बाध्यमानत्वादप्रमा-
णम्, न पुनः पीते कनकादौ तथा प्रकृतमपीति ।   ५

कथं च प्रत्यभिज्ञानविलोपेऽनुमानप्रवृत्तिः? येनैव[6] हि पूर्वधू-
मोऽग्नेर्दृष्ट[7]स्तस्यैव पुनः पूर्वधूमसदृशधूमदर्शनादग्निप्रतिपत्तिर्युक्ता
नान्य[8]स्यान्य[9]दर्शनात् । न च प्रत्यभिज्ञानमन्तरेण 'तेनेदं सदृशम्'
इति प्रतिपत्तिरस्ति; पूर्वप्रत्यक्षेणोत्त[10]रस्य तत्प्रत्यक्षेण च
पूर्वस्या[11]ग्रहणात्, द्वयप्रतिपत्तिनिबन्धनत्वादुभयस्मादृश्यप्रतिपत्तेः   १०
स[12]म्बन्धप्रतिपत्तिवत्। ततः प्रत्यभिज्ञा प्रमाणमभ्युपगन्तव्या ।

तदप्रामाण्यं हि गृहीतग्राहित्वात्, स्मरणानन्तरभावित्वात्,
शब्दाकारधारित्वाद्वा, बाध्यमानत्वाद्वा स्यात्? न तावदाद्य-
विकल्पो युक्तः; न हि तद्विषयभूतमेकं द्रव्यं स्मृतिप्रत्यक्षग्राह्य-
मित्युक्तम् । तद्गृहीतातीतवर्त्तमानविवर्त्ततादात्म्येनावस्थितद्रव्यस्य   १५
क[13]थञ्चित्पूर्वार्थत्वेपि तद्विषयप्रत्यभिज्ञानस्य नाप्रामाण्यम्, लैङ्गि-
का[14]देरप्यप्रामाण्यप्रसङ्गात् तस्यापि सर्वथैवापूर्वार्थत्वासिद्धेः, स-
म्बन्धग्राहिविज्ञा[15]नविषयसाध्यादि[16]सामान्यात् कथञ्चिदभिन्नस्यानु-
मेय[17]स्य देशकालविशिष्टस्य तद्विषयत्वात् कथञ्चित्पूर्वार्थत्वसिद्धेः ।
तन्न गृहीतग्राहित्वात्तत्राप्रामाण्यम् ।   २०

नापि स्मरणानन्तरभावित्वात्; रूपस्मरणानन्तरं रससन्नि[18]पाते
समुत्पन्नरसज्ञानस्याप्यप्रामाण्यप्रसङ्गात् । तत्र हि रूपस्मृतेः
पूर्वकालभावित्वात् समनन्तरकारणत्वं "बोधाद्बोधरूपता" [ ]
इत्यभ्युपगमात् । न चात्र बोधरूपतया समनन्तरकारणत्वमन्य[19]त्र
स्मृतिरूपतयेत्यभिधातव्यम्; स्मृतिरूप-बोधरूपयोस्तादात्म्ये   २५
क्वचिद्बोधरूपतया तत्तस्य क्वचित्तु स्मृतिरूपतयेति व्यवस्थापयि-
तुमशक्तेः । कथं[20] त्वेवंवा[21]दिनोऽनुमानं प्रमाणम्? तद्धि लिङ्गलिङ्गि-

१ देवदत्तादावपि । २ किञ्चिद्वस्तु । ३ प्रमाणात् । ४ प्रतिपत्तुः । ५ अप्र-
सिद्धेर्यतः । ६ एकत्वनिबन्धनस्य सादृश्यनिबन्धनस्य च । ७ देवदत्तेन । ८ यज्ञ-
दत्तस्य । ९ विपक्षलक्षणप्रस्तरदर्शनात् । १० वृद्धत्वादिपर्यायस्य । ११ युवादि-
पर्यायस्य । १२ संयोगादि । १३ द्रव्यापेक्षया । १४ आदिना शब्दस्य ।
१५ तर्के । १६ आदिना साधनम् । १७ अग्न्यादेः । १८ सान्निध्ये । १९ स्मृति-
रूपता बोधरूपता चास्ति स्मरणज्ञानस्य । २० स्मृतौ । २१ स्मरणानन्तरभावित्वान्न
प्रमाणं प्रत्यभिज्ञा इत्येवम् ।

सम्बन्धस्मरणानन्तरमेवोपजायते, अन्यथा साधर्म्यदृष्टान्तोपन्यासो व्यर्थः स्यात्।

शब्दाकारधारित्वं च प्रागेव प्रतिषिद्धम्।

बाध्यमानत्वं चासिद्धम्; न खलु प्रत्यक्षं तद्बाधकम्; तस्य
५ तद्विषयप्रवृत्त्यऽसम्भवात्। यद्धि यद्विषये न प्रवर्त्तते न तत्र तस्य साधकं बाधकं वा यथा रूपज्ञानस्य रसज्ञानम्, न प्रवर्त्तते च प्रत्यभिज्ञानस्य विषये प्रत्यक्षमिति। नाप्यनुमानं तद्बाधकम्; प्रत्यभिज्ञानविषये तस्याप्यप्रवृत्तेः, क्वचिदनुमेयमात्रे प्रवृत्तिप्रसिद्धेः। तस्य तद्विषये प्रवृत्तौ वा सर्वथा बाधकत्वविरोधः।
१० ततः प्रमाणं प्रत्यभिज्ञा सकलबाधकरहितत्वात्प्रत्यक्षादिवत्।

एतेनैव 'गोसदृशो गवयः' इत्यादि सादृश्यनिबन्धनं प्रत्यभिज्ञानं प्रमाणमावेदितं प्रतिपत्तव्यम्, तस्यापि स्वविषये बाधविधुरत्वस्य संवादकत्वस्य च प्रसिद्धेः।

ननु सादृश्यस्यार्थेभ्यो भिन्नाभिन्नादिविकल्पैर्विचार्यमाणस्यायो-
१५ गात्तद्विषयप्रत्यभिज्ञानस्य बाधविधुरत्वमविसंवादकत्वं चासिद्धम्; इत्यप्यास्तां तावत्, प्रत्यक्षादिप्रमाणविषयभूतत्वेनाबाधिततत्स्वरूपस्य सामान्यसिद्धिप्रक्रमे प्रतिपादयिष्यमाणत्वात्। न च तस्मिन्नेव स्वपुत्रादौ 'तादृशोयम्' इति प्रत्यभिज्ञानं सादृश्यनिबन्धनं 'स एवायम्' इत्येकत्वनिबन्धनप्रत्यभिज्ञानेन बाध्य-
२० मानमप्रमाणं प्रतिपाद्य स्वपुत्रादिना सदृशे पुरुषे 'तादृशोयम्' इत्यपि प्रत्यभिज्ञानमप्रमाणं प्रतिपादयितुं युक्तम्; तस्याबाध्यमानत्वेन प्रमाणत्वात्।

स्यान्मतम्-प्रत्यभिज्ञानमनुमानत्वेन प्रमाणमिष्यत एव; तथाहि-पूर्वोत्तरार्थक्षणयोरनर्थान्तरभूतं सादृश्यं तत्प्रत्यक्षाभ्यां
२५ प्रतीयत एव। यस्तु तथा प्रतिपद्यमानोपि सादृश्यव्यवहारं न करोति घटविविक्तभूतलप्रतिपत्तावपि घटाभावव्यवहारवत्, स 'प्रागुपलब्धार्थसमानोयं तत्सदृशाकारोपलम्भात्' इत्युभय-

१ ज्ञाने। २ शब्दाद्वैतनिराकरणे। ३ अश्यादौ। ४ एकत्वनिबन्धनप्रत्यभिज्ञानप्रामाण्यसमर्थनग्रन्थेन। ५ देवदत्तेन सदृशो यज्ञदत्त इत्यादि च। ६ आदिना उभयग्रहणम्। ७ पुनः। ८ आदिनानुमानादि। ९ एकस्मिन्। १० बौद्धसिद्धान्तोयम्। ११ गोगवयलक्षणौ पूर्वोत्तरकालभाविप्रत्यक्षसम्बन्धित्वेन पूर्वोत्तरार्थक्षणौ। १२ यथा घटभावे व्यवहारं न करोति साङ्ख्यः इत्यर्थः। १३ पूर्वदृष्टेन यज्ञदत्तादिना। १४ दृश्यमानो देवदत्तादिः। १५ अयं दृश्यमानो गवयो गोसदृशः गोसदृशाकारत्वाद्गोगवयप्रत्यक्षत्वे सति सादृश्यव्यवहाराद्। १६ व्यक्तिद्वयगत।

गतसदृशाकारदर्शनेन तथा व्यवहारं कार्यते, दृश्यानुपलम्भोपदर्शनेन घटाभावव्यवहारवत्; तदप्यसङ्गतम्; 'प्राक्प्रतिपन्नधूमसदृशोयं धूमः' इत्यादिलिङ्गप्रत्यभिज्ञाज्ञानस्य लैङ्गिकत्वे तल्लिङ्गप्रत्यभिज्ञाज्ञानस्यापि लैङ्गिकत्वमित्यनवस्थाप्रसङ्गात्।

किञ्च, अर्थे सादृश्यव्यवहारस्य सदृशाकारनिबन्धनत्वे सदृशाकारेपि कुतस्तद्व्यवहारसिद्धिः? अपरतद्गतसदृशधर्मदर्शनाच्चेत्; अनवस्था। धर्मिसादृश्यव्यवहारे चान्योन्याश्रयः। तन्नेयं सादृश्यप्रत्यभिज्ञा लिङ्गजाभ्युपगन्तव्या।

ननु गोदर्शनाहितसंस्कारस्य पुनर्गवयदर्शनाद्गवि स्मरणे सति 'अनेन समानः सः' इत्येवमाकारस्य ज्ञानस्योपमानरूपत्वान्न प्रत्यभिज्ञानता। सादृश्यविशिष्टो हि विशेषो विशेषविशिष्टं वा सादृश्यमुपमानस्यैव प्रमेयम्। उक्तं च—

"तस्माद्यत्स्मर्यते तत्स्यात्सादृश्येन विशेषितम्।
प्रमेयमुपमानस्य सादृश्यं वा तदन्वितम्॥ १॥
प्रत्यक्षेणावबुद्धेपि सादृश्ये गवि च स्मृते।
विशिष्टस्यान्यतः सिद्धेरुपमानप्रमाणता॥ २॥"

[मी० श्लो० उपमान० श्लो० ३७-३८] इति।

तदप्यसमीक्षिताभिधानम्; एकत्वसादृश्यप्रतीत्योः सङ्कलना(न)ज्ञानरूपतया प्रत्यभिज्ञानतानतिक्रमात्। 'स एवायम्' इति हि यथोत्तरपर्यायस्य पूर्वपर्यायेणैकताप्रतीतिः प्रत्यभिज्ञा, तथा सादृश्यप्रतीतिरपि 'अनेन सदृशः' इत्यविशेषात्। पूर्वोत्तर-

१ अत्र घटो नास्ति दृश्यत्वे सत्यनुपलब्धेरिति। २ इयं शिंशपा पूर्वदृष्टशिंशपासमाना इति च। ३ लिङ्गरूपस्य। ४ अनुमानरूपत्वे अङ्गीक्रियमाणे। ५ तद्गतधर्मस्य। ६ पर्वतधूमः पूर्वदृष्टधूमसदृशस्तत्सदृशाकारत्वात्सम्प्रतिपन्नधूमवत्। तत्सदृशाकारत्वेन समानं सदृशाकारत्वात् सम्प्रतिपन्नसदृशाकारवत्। ७ गोगवयलक्षणे। ८ गोगवयौ सदृशौ सदृशाकारत्वाद्[illegible]वत्। गोगवयाकारौ सदृशौ सादृशाकारत्वात् तद्वत्। द्वितीयौ आकारौ सादृशौ सदृशाकारत्वादित्यादि। ९ स्वादि। १० मीमांसकः। ११ पश्चात्। १२ गोलक्षणो धर्मी। १३ धर्मः। १४ दृश्यमानात्। १५ गवयात्। १६ स्मर्यमाणम्। १७ वस्तु। १८ स्मर्यमाणगवान्वितम्। १९ उपमानस्यैवेत्यत्र यः एवकारस्तस्य संवादं दर्शयति। २० गवयगते। २१ सादृश्यविशिष्टस्य गोस्तद्विशिष्टस्य वा सादृश्यादेः। २२ स्मरणप्रत्यक्षाभ्याम्। २३ स्मरणप्रत्यक्षाभ्यां सकाशादन्यदुपमानं ततः। २४ प्रत्यभिज्ञा। २५ सङ्कलनरूपतायाः।

प्रत्ययवेद्यैकत्वगोचरत्वात्तस्याः[1] प्रत्यभिज्ञानत्वे सादृश्यप्रतीतावपि तत्स्यात्। न हि तत्ताभ्यां न परिच्छिद्यते[2]—

"वस्तुत्वे सति चास्यैवं[3] सम्बद्धस्य च चक्षुषा।
द्वयोरेकत्र[4][5] वा दृष्टौ[6] प्रत्यक्षत्वं न वार्यते[7] ॥ १ ॥
सामान्यवच्च[8] सादृश्यमेकैकत्र समाप्यते।
प्रतियोगिन्यदृष्टेऽपि तत्तस्मादुपलभ्यते ॥ २ ॥"
[मी० श्लो० उपमान० श्लो० ३४-३५]

इत्यस्य विरोधानुषङ्गात्। यथा[9] च पूर्वोत्तरप्रत्ययाभ्यां गवयगवादिविशिष्टमप्रतिपन्नं सादृश्यमनेन प्रतीयते तथा पूर्वोत्तरपर्यायविशिष्टमेकत्वं[10] प्रत्यभिज्ञानेन।

यदि च 'एकत्वज्ञानमेव प्रत्यभिज्ञा सादृश्यज्ञानं तूपमानम्' इत्यभ्युपगमः; तर्हि वैलक्षण्यज्ञानं किन्नाम प्रमाणं स्यात्? यथैव हि गोदर्शनाहितसंस्कारस्य गवयदर्शिनः 'अनेन समानः सः' इति प्रतिपत्तिस्तथा महिष्यादिदर्शिनः 'अनेन विलक्षणः सः' इति वैलक्षण्यप्रतीतिरप्यस्ति। सा च न प्रत्यभिज्ञोपमानयोरन्यतरा तदेकत्वसादृश्याविषयत्वात्[11], अतः प्रमाणान्तरं[12] प्रमाणसंख्यानियमविघातकृद्भवेत्परस्य[13]।

ननु सादृश्याभावो वैलक्षण्यम्, तस्याभावप्रमाणविषयत्वान्न[14] प्रमाणसंख्यानियमविघातः; तर्हि[15] वैलक्षण्याभावः सादृश्यमिति स एव[16] दोषः। नन्वनेकस्य[17] समानधर्मयोगः सादृश्यम्, तत्कथं वैलक्षण्याभावमात्रं स्यादिति चेत्; तर्हि वैलक्षण्यमपि विसदृशधर्मयोगः[18], तत्कथं सादृश्याभावमात्रं स्यादिति समानम्?

एतेन[19] 'गौरिव[20] गवयः' इत्युपमानवाक्याहितसंस्कारस्य पुनर्वने गवयदर्शनात् 'अयं गवयशब्दवाच्यः' इति संज्ञासंज्ञि[21][22]सम्बन्धप्रति-

१ पूर्वोत्तरप्रत्ययवेद्यत्वाविशेषात्। २ अन्यथा। ३ उक्तप्रकारेण मीमांसकग्रन्थापेक्षया सादृश्यस्य वस्तुत्वं कथमिति प्रश्ने अवयवसामान्ययोगप्रकारेण वस्तुत्वम्। ४ गोगवयलक्षणयोर्विशेषयोः। ५ गवये वा। ६ प्रत्यक्षे सति। ७ एकत्र प्रत्यक्षत्वं कथं न वार्यते इत्युक्ते आह। ८ ग्रन्थस्य। ९ एतावता ग्रन्थेन एकत्वप्रतीतिवत्सादृश्यप्रत्यभिज्ञानस्यापि पूर्वोत्तरप्रत्ययवेद्यसादृश्यगोचरत्वमस्तीति समर्थितम्। १० अप्रतिपन्नं प्रतीयते। ११ प्रत्यभिज्ञानस्य उपमानस्य च। १२ वैलक्षण्यज्ञानं। १३ मीमांसकस्य। १४ वैलक्षण्याभावलक्षणसादृश्यस्याभावप्रमाणवेद्यत्वात् उपमानप्रमाणभावे सति। १५ गोगवयलक्षणार्थस्य। १६ गवय। १७ तुच्छाभावरूपम्। १८ अवयव। १९ मीमांसकं प्रत्युपमानस्य प्रत्यभिज्ञानत्वसमर्थनपरेण ग्रन्थेन। २० उपमानस्य। २१ गवयशब्दस्य। २२ गवयपिण्डस्य।

पत्तिरुपमानमिति नैयायिकमतमपि प्रत्युक्तम्। यथैव ह्येकदा घटमुपलब्धवतः पुनस्तस्यैव दर्शने 'स एवायं घटः' इति प्रतिपत्तिः प्रत्यभिज्ञा, तथा 'गोसदृशो गवयः' इति सङ्केतकाले गोसदृशगवयाभिधानयोर्वाच्यवाचकसम्बन्धं प्रतिपद्य पुनर्गवयदर्शनात्तत्प्रतिपत्तिः प्रत्यभिज्ञा किन्नेष्यते? न खलु पूर्वमप्रतिपन्नेऽपूर्वदर्शनात्स्मृतिर्युक्ता, यतस्तथा प्रतिपत्तिः स्यात्। ५

गोविलक्षणमहिष्यादिदर्शनाच्च 'अयं गवयो न भवति' इति तत्संज्ञासंज्ञिसम्बन्धप्रतिषेधप्रतिपत्तिश्च यद्युपमानम्–"प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम्" [न्यायसू० १।१।६] इति व्याहन्येत। अथ प्रसिद्धार्थवैधर्म्यादपीष्यते; तर्हि 'प्रसिद्धार्थवैधर्म्याच्च साध्यसाधनमुपमानम्' इत्युपसङ्ख्यानं सूत्रे कर्त्तव्यम्। १०

किञ्च, प्रसिद्धार्थैकत्वात्साध्यसाधनमुपमानमित्यप्यभ्युपगम्यताम्। तथा च प्रत्यभिज्ञानस्य प्रत्यक्षेन्तर्भावोऽयुक्तः।

तथा स्वसमीपवर्त्तिप्रासादादिदर्शनोपजनितसंस्कारस्य तत्प्रतियोगिभूधराद्युपलम्भात् 'इदमस्माद्दूरम्' इति प्रतिपत्तिः, आमलकदर्शनाहितसंस्कारस्य बिल्वादिदर्शनात् 'अतस्तत्सूक्ष्मम्' इति, ह्रस्वदर्शनाविर्भूतसंस्कारस्य तद्विपरीतार्थोपलम्भात् 'अतोऽयं प्रांशुः' इति च प्रतिपत्तिः किं नाम मानं स्यात्? १५

तथा वृक्षाद्यनभिज्ञो यदा कश्चित्कञ्चित्पृच्छति कीदृशो वृक्षादिरिति? स तं प्रत्याह–'शाखादिमान्वृक्ष एकशृङ्गो गण्डकोऽष्टपादः शरभः चारुसटान्वितः सिंहः' इत्यादि। तद्वाक्याहितसंस्कारः प्रष्टा यदा शाखादिमतोऽर्थान् प्रतिपद्य 'अयं स वृक्षशब्दवाच्यः' इत्यादिरूपतया तत्संज्ञासंज्ञिसम्बन्धं प्रतिपद्यते तदा किं नाम तत्प्रमाणं स्यात्? उपमानम्; इत्यसम्भाव्यम्; सर्वत्रोक्तप्रकारप्रतिपत्तौ प्रसिद्धार्थसाधर्म्यासम्भवात्। ततः प्रति- २० २५

१ ज्ञानवतः। २ आटविकाद् ज्ञात्वा। ३ वाच्यवाचकसम्बन्धे। ४ गवय। ५ गोः। ६ ज्ञातार्थसम्बन्धसाधर्म्यात्। ७ गवयस्य। ८ साध्यस्य अयं गवयशब्दवाच्य इति संज्ञासंज्ञिसम्बन्धस्य। ९ गवा। १० महिषस्य। ११ साध्यसाधनमुपमानम्। १२ गोगवयलक्षणेन। १३ महिषस्य। १४ साध्यस्य अयं गवयशब्दवाच्य इति संज्ञासंज्ञिसम्बन्धस्य। १५ गणना। १६ तन्नास्त्येव नवदीये सूत्रे। १७ पूर्वपर्यायेण। १८ उत्तरपर्यायस्य। १९ स एवायमित्यादि। २० दूषणान्तरसमुच्चये। २१ कुब्ज। २२ प्रमाणम्। २३ पृच्छ्यमानपुरुषस्य। २४ ते च ते संज्ञासंज्ञिनश्च, वृक्ष इति संज्ञा, शाखादिमान् पदार्थः संज्ञी। २५ अयं वृक्षशब्दवाच्य इत्यादिकम्। २६ इदमस्माद्दूरमित्यादौ च।

नियतप्रमाणव्यवस्थामभ्युपगच्छता प्रतिपादितप्रकारा प्रतीतिः प्रत्यभिज्ञैवेत्यभ्युपगन्तव्यम् ।

अथेदानीमूहस्योपलम्भेत्यादिना कारणस्वरूपे निरूपयति—

उपलम्भानुपलम्भनिमित्तं व्याप्तिज्ञानमूहः ॥११॥

५ उपलम्भानुपलम्भौ साध्यसाधनयोर्यथाक्षयोपशमं सकृत् पुनःपुनर्वा दृढतरं निश्चयानिश्चयौ न भूयोदर्शनादर्शने । तेनातीन्द्रियसाध्यसाधनयोरागमानुमाननिश्चयानिश्चयहेतुकसम्बन्धबोधस्यापि सङ्ग्रहान्नाव्याप्तिः । यथा 'अस्त्यस्य प्राणिनो धर्मविशेषो विशिष्टसुखादिसद्भावान्यथानुपपत्तेः' इत्यादौ, 'आदित्यस्य गम-
१० नशक्तिसम्बन्धोऽस्ति गतिमत्त्वान्यथानुपपत्तेः' इत्यादौ च । न खलु धर्मविशेषः प्रवचनादन्यतः प्रतिपत्तुं शक्यः, नाप्यतोनुमानादन्यतः कुतश्चित्प्रमाणादादित्यस्य गमनशक्तिसम्बन्धः साध्यत्वाभिमतः, साधनं वा गतिमत्त्वं देशाद्देशान्तरप्राप्तिमत्त्वानुमानादन्यत इति । तौ निमित्तं यस्य व्याप्तिज्ञानस्य तत्तथोक्तम् ।
१५ व्याप्तिः साध्यसाधनयोरविनाभावः, तस्य ज्ञानमूहः ।

न च बालावस्थायां निश्चयानिश्चयाभ्यां प्रतिपन्नसाध्यसाधनस्वरूपस्य पुनर्वृद्धावस्थायां तद्विस्मृतौ तत्स्वरूपोपलम्भेप्यविनाभावप्रतिपत्तेरभावात्तयोस्तद्धेतुत्वम्; स्मरणादेरपि तद्धेतुत्वात् । भूयो निश्चयानिश्चयौ हि स्मर्यमाणप्रत्यभिज्ञायमानौ तत्कारण-
२० मिति स्मरणादेरपि तन्निमित्तत्वप्रसिद्धिः । मूलकारणत्वेन तूपलम्भादेरत्रोपदेशः, स्मरणादेस्तु प्रकृतत्वादेव तत्कारणत्वप्रसिद्धेरनुपदेश इत्यभिप्रायो गुरूणाम् ।

तच्च व्याप्तिज्ञानं तथोपपत्त्यन्यथानुपपत्तिभ्यां प्रवर्त्तत इत्युपदर्शयति-इदमस्मिन्नित्यादि ।

---

१ प्रसिद्धार्थेन पूर्वप्रतिपन्नेन प्रासादादिना शाखादिमान्वृक्ष इत्यादिवाक्येन । २ तत्सदृशं तद्विलक्षणमित्यादिरूपा । ३ एकवारम् । ४ अग्नेरनुपलम्भो भावान्तरोपलम्भोऽनिश्चयः । ५ प्रत्यक्षेण साध्यसाधनयोः । ६ उपलम्भानुपलम्भौ निश्चयानिश्चयौ येन कारणेन । ७ तौ हेतू यस्य सम्बन्धबोधस्य । ८ प्रत्यक्षपूर्वकनिश्चयानिश्चययोः सङ्ग्रहः अपिशब्दात् । ९ निश्चयानिश्चयहेतुकसम्बन्धबोधस्य सङ्ग्रहः क इत्युक्ते आह । १० अस्य प्राणिनोऽधर्मविशेषोस्ति दुःखादिसद्भावादित्यादौ च । ११ चन्द्रो गमनशक्तियुक्तो गतिमत्त्वादित्यादौ च । १२ केवलमुपलम्भानुपलम्भयोः । १३ साध्यसाधनयोः । १४ आदिना प्रत्यभिज्ञानम् । १५ अनुपलम्भस्य च । १६ सूत्रे । १७ प्रस्तुतत्वात् ।

इदमस्मिन् सत्येव भवति असति तु न भवत्येवेति ॥ १२ ॥

इदं साधनत्वेनाभिप्रेतं वस्तु, अस्मिन्साध्यत्वेनाभिप्रेते वस्तुनि सत्येव सम्भवतीति तथोपपत्तिः । अन्यथा साध्यमन्तरेण न भवत्येवेत्यन्यथानुपपत्तिः । वाशब्द उभयप्रकारसूचकः । ५

तावेवोभयप्रकारौ सुप्रसिद्धव्यक्तिनिष्ठतया सुखावबोधार्थं प्रदर्शयति-

यथाग्नावेव धूमस्तदभावे न भवत्येवेति च ॥१३॥

ननु चास्याऽप्रमाणत्वात्किं कारणस्वरूपनिरूपणप्रयासेन; इत्यप्यसाम्प्रतम्; यतोस्याप्रामाण्यं गृहीतग्राहित्वात्, विसंवादि- १० त्वाद्वा स्यात्, प्रमाणविषयपरिशोधकत्वाद्वा? प्रथमपक्षे साध्यसाधनयोः साकल्येन व्याप्तिः प्रत्यक्षात् प्रतीयते, अनुमानाद्वा? न तावत्प्रत्यक्षात्; तस्य सन्निहितमात्रगोचरतया देशादिविप्रकृष्टाशेषार्थालम्बनत्वानुपपत्तेः, तत्रास्य वैशद्यासम्भवाच्च । न खलु सत्त्वानित्यत्वादयोऽग्निधूमादयो वा सर्वे भावाः सन्निधान- १५ वत् प्रत्यक्षे विशदतया प्रतिभान्ति, प्राणिमात्रस्य सर्वज्ञतापत्तेरनुमानानर्थक्यप्रसङ्गाच्च । अविचारकतया चाध्यक्षं 'यावान् कश्चिद्धूमः स सर्वोपि देशान्तरे कालान्तरे वाग्निजन्माऽन्यजन्मा वा न भवति' इत्येतावतो व्यापारान् कर्त्तुमसमर्थम् । पुरोव्यवस्थितार्थेषु प्रत्यक्षतो व्याप्तिं प्रतिपद्यमानः सर्वोपसंहारेण प्रति- २० पद्यते; इत्यप्यसुन्दरम्; अविषये सर्वोपसंहारायोगात् ।

प्रत्यक्षपृष्ठभाविनो विकल्पस्यापि तद्विषयमात्राध्यवसायत्वात् सर्वोपसंहारेण व्याप्तिग्राहकत्वाभावः, तथा चानिश्चितप्रतिबन्धकत्वाद्देशान्तरादौ साधनं साध्यं न गमयेत् ।

ननु कार्यं धूमो हुतभुजः कार्यधर्मानुवृत्तितो विशिष्टप्रत्यक्षा- २५ नुपलम्भाभ्यां निश्चितः, स देशान्तरादौ तदभावेपि भवंस्तत्कार्य-

१ उल्लेखोयम् । २ तथोपपत्त्यन्यथानुपपत्तिरूपौ । ३ अनुमान । ४ अनिर्णयरूपत्वात्तर्कस्याप्रामाण्यमित्यभिप्राये सत्याह । ५ क्षणिकत्व । ६ अन्यथेति शेषः । ७ निर्विकल्पकस्य परामर्शशून्यत्वात् । ८ न विद्यते विचारः यावान्कश्चिद्धूमः स सर्वोप्यग्नेरेव कार्यं नार्थान्तरस्येति । ९ जनः । १० प्रत्यक्षस्य । ११ प्रत्यक्षतः सर्वोपसंहारे व्याप्तिग्रहणाभावे च । १२ कर्तुं । १३ अग्नेः । १४ कार्यस्य धर्मः कारणे सति भवनलक्षणस्तदभावे अभवनलक्षणः ।

तामेवातिवर्त्तेत[1], इत्याकस्मिको[2]ऽग्निनिवृत्तौ न क्वचिदपि[3] निवर्त्तेत, नाप्यवश्यंतया तत्सद्भावे एव स्यादिति[4], अहेतोः खरविषाणवत्तस्यासत्त्वात् क्वचिदप्युपलम्भो न स्यात्, सर्वत्र सर्वदा सर्वाकारेण वोपलम्भः स्यात्। स्वभावश्च[5] 'तद्धेतोर्[6]थस्याभावेपि यदि स्यात्तदार्थस्य निःस्वभावत्वं स्वभावस्य वाऽसत्त्वं स्यात्, तत्स्वभावतया चास्य कदाचिदप्युपलम्भो न स्यात्। उक्तञ्च—

"कार्यं धूमो हुतभुजः कार्यधर्मानुवृत्तितः।
सम्भवंस्तदभावेपि हेतुमत्तां विलङ्घयेत्॥"
[प्रमाणवा० १।३५]

"स्वभावेप्यविनाभावो भावमात्रानुबन्धि[7]नि[8]।
तदभावे[9] स्वयं भावस्या[10]भावः स्याद्[11]भेद[12]तः[13]॥"
[प्रमाणवा० १।४०] इति।

व्याप्तिप्रतिपत्तावपि तन्निश्चयकालोपलब्धेनैव व्यापकेन व्याप्यस्य व्याप्तिः स्यात् तस्यैव[14] तथा[15] निश्चयात्, न तादृशस्य[16]। तादृशस्यापि[17] साध्यव्याप्तत्वग्रहणे तद्ग्राहिणो विकल्पस्यागृहीत[18]ग्राहित्वं कथं न स्यात्? यत्तु प्रत्यक्षेण क्वचित्प्रदेशे[19] साध्यव्याप्तत्वेन प्रतिपन्नं[20] ततस्तस्या[21]नुमाने विशेषतो दृष्टानुमानं[22] स्यात्, अन्यदेशादिस्थसाध्येनास्याव्याप्तेः।

पारिशेष्यात्तादृशेन[23] व्यापकेनान्यत्र[24] तादृशस्य व्याप्तिसिद्धिश्चेत्, ननु किमिदं पारिशेष्यम्–प्रत्यक्षम्, अनुमानं वा? न तावत्प्रत्यक्षम्; देशान्तरस्थस्यानुमेयस्य प्रत्यक्षेणाप्रतिपत्तेः, अन्यथानुमानानर्थक्यानुषङ्गः। नाप्यनुमानम्[25]; तत्राप्यनुमानान्तरेण व्याप्तिप्रतिपत्तावनवस्थाप्रसङ्गात्, तेनैव तत्प्रतिपत्तावन्योन्याश्रयः।

---

१ अतिक्रमेत्। २ अकारणकः। ३ भूधरप्रदेशे। ४ स्वलक्षणहेतुर्व्याप्यः। ५ स्वलक्षणो हेतुर्व्याप्यः। ६ अनित्यत्वलक्षणस्य साध्यस्य व्यापकस्य। ७ अनुयायिनि। ८ इति व्यक्तिः। ९ स्वभावस्य भावस्य वा। १० स्वभावस्य अर्थस्य वा। ११ साध्यसाधनयोः। १२ स्वात्मक्षयेणानवस्थानाभावात्स्वभावस्य। १३ अविशेषादित्यर्थः। १४ व्याप्तिनिश्चयकालोपलब्धस्य व्याप्यस्य साधनस्य। १५ साध्येन व्याप्तत्वप्रकारेण। १६ पूर्वदृष्टधूमसदृशस्य धूमस्य न तथा निश्चयः। १७ पूर्वदृष्टसदृशस्यापि धूमस्य। १८ सादृश्यमगृहीतम्। १९ महानसे। २० साधनम्। २१ साध्यस्य। २२ विशेषतः खदिरादिरूपतया दृष्टस्य महानसादौ यादृशाग्निः प्रतिपन्नस्तस्य भूधरादौ अनुमानस्य। २३ महानसस्थाग्निसदृशेन। २४ भूधरनितम्बादौ २५ अयं धूमोऽग्निना व्याप्तो धूमत्वान्महानसधूमवदिति।

एतेन[1] साध्यसाधनयोः साकल्येनानुमानाद्व्याप्तिप्रतिपत्तेस्तर्कस्याप्रामाण्यमिति[2] प्रत्युक्तम्। तत्र प्रत्यक्षानुमानयोः साकल्येन व्याप्तिप्रतिपत्तौ सामर्थ्यम्।

अथास्मदादिप्रत्यक्षस्य व्याप्तिप्रतिपत्तावसामर्थ्येऽपि योगिप्रत्यक्षस्य तत् स्यात्; इत्यप्यसत्; तस्याप्यविचारकतया[3] तावतो व्यापारान् कर्तुमसमर्थत्वाविशेषात्। कुतश्चास्योत्पत्तिः-विकल्पमात्राभ्यासात्, अनुमानाभ्यासाद्वा? प्रथमपक्षे कामशोकादिज्ञानवत्तस्याप्रामाण्यप्रसङ्गः[4]। द्वितीयपक्षेऽप्यन्योन्याश्रयः-व्याप्तिविषये हि योगिप्रत्यक्षे[5] सत्यनुमानम्, तस्मिंश्च सति तदभ्यासाद्योगिप्रत्यक्षमिति। अस्तु वा योगिप्रत्यक्षम्; तथापि-तत्प्रतिपन्नार्थेष्वनुमानवैयर्थ्यम्। साध्यसाधनविशेषेषु स्पष्टं प्रतिभातेष्वपि अनुमाने सर्वत्रानुमानानुषङ्गात्[6] स्वरूपस्याप्यध्यक्षतोऽप्रसिद्धिः।

परार्थं[7] तस्यानुमानमिति चेत्; तर्हि योगी[8] परार्थानुमानेन गृहीतव्याप्तिकम्, अगृहीतव्याप्तिकं वा परं प्रतिपादयेत्? गृहीतव्याप्तिकं चेत्; कुतस्तेन गृहीता व्याप्तिः? न तावत्स्वसंवेदनेन्द्रियमनोविज्ञानैः[9]; तेषां तदविषयत्वात्। योगिप्रत्यक्षेण व्याप्तिप्रतिपत्तावनुमानवैयर्थ्यमित्युक्तम्। अगृहीतव्याप्तिकस्य च प्रतिपादनानुपपत्तिरतिप्रसङ्गात्।

मानसप्रत्यक्षाद्व्याप्तिप्रतिपत्तिरित्यन्ये; तेऽप्यतत्त्वज्ञाः; प्रत्यक्षस्येन्द्रियार्थसन्निकर्षप्रभवत्वाभ्युपगमात्। अणुस्वभावमनसो[10] युगपदशेषार्थैस्तत्सम्बन्धस्य च प्रागेव प्रतिविहितत्वात् कथं तत्प्रत्ययेनापि व्याप्तिप्रतिपत्तिः?

ननु साध्यसाधनधर्मयोः[11] क्वचिद्व्यक्तिविशेषे प्रत्यक्षत एव सम्बन्धप्रतिपत्तिः; इत्यप्ययुक्तम्; साकल्येन तत्प्रतिपत्त्यभावानुषङ्गात्। साध्यं च किमग्निसामान्यम्[12], अग्निविशेषः[13], अग्निसामान्यविशेषो वा? न तावदग्निसामान्यम्; तदनुमाने[14] सिद्धसाध्यतापत्तेः[15], विशेषतोऽसिद्धेश्च[16]? नाप्यग्निविशेषः; तस्यानन्वयात्[17]।

---

१ अनुमानेन व्याप्तिग्रहणेऽनवस्थेतरेतराश्रयत्वनिरूपणपरेण ग्रन्थेन। २ तद्ग्राहित्वादस्याप्रामाण्यमित्यत्रासौ यो विकल्पः। ३ निर्विकल्पकत्वेन। ४ विकल्पस्याप्रमाणत्वेनाङ्गीकरणात्। ५ उत्पन्ने। ६ स्वस्वरूपादौ। ७ धूमवत्त्वाद्वह्निमत्त्वमपि नरं प्रतिपादयेत्। ८ यौगाः। ९ तैरेव। १० अणुपरिमाणं मनः। ११ ते एव धर्मौ। १२ अग्नित्वसामान्यम्। १३ यत्र यत्र धूमस्तत्र तत्र खदिराग्निरिति। १४ अग्नित्वस्य। १५ साधनवैयर्थ्यमिति भावः। १६ तत्राविवादाद्व्याप्तिग्रहणकाले एवास्य प्रसिद्धेः। कथमन्यथा साध्यसाधनयोर्व्याप्तिनिर्णीतिः स्यात्? १७ देशादिना। १८ अग्नित्वस्य।

अग्निसामान्यविशेषस्य साध्यत्वे तेन धूमस्य सम्बन्धः कथं सकलदेशकालव्याप्त्याध्यक्षतः सिद्ध्येत्? तथा तत्सम्बन्धासिद्धौ च यत्र यत्र यदा यदा धूमोपलम्भस्तत्र तत्र तदा तदाग्निसामान्यविशेषविषयमनुमानं नोदयमासादयेत् । न ह्यन्यथा सम्बन्धग्रहणमन्यथानुमानोत्थानं नाम, अतिप्रसङ्गात् । ततः सर्वाक्षेपेण व्याप्तिग्राही तर्कः प्रमाणयितव्यः ।

ननु 'यावान्कश्चिद्धूमः स सर्वोऽप्यग्निजन्माऽनग्निजन्मा वा न भवति' इत्यूहापोहविकल्पज्ञानस्य सम्बन्धग्राहिप्रत्यक्षफलत्वान्न प्रामाण्यम्; इत्यप्यसमीचीनम्; प्रत्यक्षस्य सम्बन्धग्राहित्वप्रतिषेधात् । तत्फलत्वेन चास्याऽप्रामाण्ये विशेषणज्ञानफलत्वाद्विशेष्यज्ञानस्याप्यप्रामाण्यानुषङ्गः । हानोपादानोपेक्षाबुद्धिफलत्वात्तस्य प्रामाण्ये च ऊहापोहज्ञानस्यापि प्रमाणत्वमस्तु सर्वथा विशेषाभावात् । तन्नास्य गृहीतग्राहित्वादप्रामाण्यम् ।

नापि विसंवादित्वात्; स्वविषयेऽस्य संवादप्रसिद्धेः । साध्यसाधनयोरविनाभावो हि तर्कस्य विषयः, तत्र चाविसंवादकत्वं सुप्रसिद्धमेव । कथमन्यथानुमानस्याविसंवादकत्वम्? न खलु तर्कस्यानुमाननिबन्धनसम्बन्धे संवादाभावेऽनुमानस्यासौ घटते ।

ननु चास्य निश्चितः संवादो नास्ति विप्रकृष्टार्थविषयत्वात्; तदसत्; तर्कस्य संवादसन्देहे हि कथं निस्सन्देहानुमानोत्थानम्? तदभावे च कथं सामस्त्येन प्रत्यक्षस्याप्रामाण्यव्यवच्छेदेन प्रामाण्यप्रसिद्धिः? ततो निस्सन्देहमनुमानमिच्छता साध्यसाधनसम्बन्धग्राहि प्रमाणमसन्दिग्धमेवाभ्युपगन्तव्यम् ।

समारोपव्यवच्छेदकत्वाच्चास्य प्रामाण्यमनुमानवत् ।

प्रमाणविषयपरिशोधकत्वान्नोहः प्रमाणम्; इत्यपि वार्त्तम्; प्रमाणविषयस्याप्रमाणेन परिशोधनविरोधात् मिथ्याज्ञानवत्प्रमेयार्थवच्च । प्रयोगः-प्रमाणं तर्कः प्रमाणविषयपरिशोधकत्वादनुमानादिवत् । यस्तु न प्रमाणं स न प्रमाणविषयपरिशोधकः

१ अग्निसामान्यविशेषेण । २ देशान्तरकालान्तरसम्बन्धित्वेन । ३ अप्यविनाभूतधूमाज्ज्वलानुमानोत्पत्तिप्रसङ्गात् । ४ स्वीकारेण । ५ अन्वय । ६ व्यतिरेक । ७ साकल्येन । ८ दण्डज्ञान । ९ दण्डि । १० अनुमानलक्षणफलसद्भावात् । ११ तर्कस्य । १२ साकल्येन । १३ तर्कस्य अविसंवादकत्वं सुप्रसिद्धं यदि न स्यात् । १४ विषये । १५ प्रत्यक्षं प्रमाणमविसंवादकत्वादिति । १६ तर्कस्य संवादसन्देहे निस्सन्देहानुमानोत्थानं न स्याद्यतः । १७ तर्कः । ८ अनुमान । ९ तर्कः । २० दूरस्थितस्यार्थस्य प्रत्यक्षविषयस्य यथानुमानं परिशोधकम् ।

यथा मिथ्याज्ञानं प्रमेयो वार्थः, प्रमाणविषयपरिशोधकश्चायम्, तस्मात्प्रमाणम् ।

तथा, प्रमाणं तर्कः प्रमाणानामनुग्राहकत्वात्, यत्प्रमाणानामनुग्राहकं तत्प्रमाणम् यथा प्रवचनानुग्राहकं प्रत्यक्षमनुमानं वा, प्रमाणानामनुग्राहकश्चायमिति । न चायमसिद्धो हेतुः; प्रमाणानुग्रहो हि प्रथमप्रमाणप्रतिपन्नार्थस्य प्रमाणान्तरेण तथैवावसायः, प्रतिपत्तिदार्ढ्यविधानात् । स चात्रास्ति प्रत्यक्षादिप्रमाणेनावगतस्य देशतः साध्यसाधनसम्बन्धस्य दृढतरमनेनावगमात् । ततः साध्यसाधनयोरविनाभावावबोधनिबन्धनमूहज्ञानं परीक्षादक्षैः प्रमाणमभ्युपगन्तव्यम् ।

न चोहः सम्बन्धज्ञानजन्मा यतोऽपरापरोहानुसरणादनवस्था स्यात्; प्रत्यक्षानुपलम्भजन्मत्वात्तस्य । स्वयोग्यताविशेषवशाच्च प्रतिनियतार्थव्यवस्थापकत्वं प्रत्यक्षवत् । प्रत्यक्षे हि प्रतिनियतार्थपरिच्छेदो योग्यनात एव न पुनस्तदुत्पत्त्यादेः, ततस्तत्परिच्छेदकत्वस्य प्राक्प्रतिषिद्धत्वात् । योग्यताविशेषः पुनः प्रत्यक्षस्येवास्य स्वविषयज्ञानावरणवीर्यान्तरायक्षयोपशमविशेषः प्रतिपत्तव्यः ।

ननु यथा तर्कस्य स्वविषये सम्बन्धग्रहणनिरपेक्षा प्रवृत्तिस्तथानुमानस्याप्यस्तु सर्वत्र ज्ञाने स्वावरणक्षयोपशमस्य स्वार्थप्रकाशनहेतोरविशेषात्, तथा चानर्थकं सम्बन्धग्रहणार्थं तर्कपरिकल्पनम्; तदप्यसमीचीनम्; यतोऽनुमानस्याभ्युपगम्यत एव स्वयोग्यताग्रहणनिरपेक्षमनुमेयार्थप्रकाशनम्, उत्पत्तिस्तु लिङ्गलिङ्गिसम्बन्धग्रहणनिरपेक्षा नास्ति, अगृहीततत्सम्बन्धस्य प्रतिपत्तुः क्वचित्कदाचित्तदुत्पत्त्यप्रतीतेः । न च प्रत्यक्षस्याप्युत्पत्तिः करणार्थसम्बन्धग्रहणापेक्षा प्रतिपन्ना; स्वयमगृहीततत्सम्बन्धस्यापि प्रतिपत्तुस्तदुत्पत्तिप्रतीतेः । तद्वदूहस्यापि स्वार्थसम्बन्धग्रहणानपेक्षस्योत्पत्तिप्रतिपत्तेर्नोत्पत्तौ सम्बन्धग्रहणापेक्षा युक्तिमतीत्यनवद्यम् ।

अथेदानीमनुमानलक्षणं व्याख्यातुकामः साधनादित्याद्याह—

१ प्रत्यक्ष । २ दूरस्थजलक्षणस्य । ३ द्वितीयप्रत्यक्षेण । ४ एकदेशतः । ५ निश्चयात् । ६ यथानुमानं साध्यसाधनसम्बन्धग्राहितर्कपूर्वकमूहोऽपि तथा स्यात्, तथा चानवस्था इत्युक्ते आह । ७ धूमधूमध्वजविषय एक एवोहः सकलानुमानव्यवस्थापकः कुतो न स्यादित्युक्ते आह । ८ तस्य अर्थस्य । ९ स्वस्यानुमानस्य कारणभूता योग्यता । १० अपिशब्देनानुमानस्य सङ्ग्रहः । ११ इन्द्रिय । १२ घटादि । १३ स्वमात्मीयं तत्किमुपलम्भानुपलम्भौ अर्थ इति सम्बन्धः, अथवा उपलम्भानुपलम्भयोश्च सम्बन्धः । १४ व्याप्तिज्ञानस्य कारणस्वरूपनिरूपणम् । १५ स्वरूपम् ।

साधनात्साध्यविज्ञानमनुमानम् ॥ १४ ॥

साध्याऽभावाऽसम्भवनियमनिश्चयलक्षणात् साधनादेव हि शक्या[1]ऽभिप्रेता[2]प्रसिद्धत्व[3]लक्षणस्य साध्यस्यैव यद्विज्ञानं तदनुमानम् । प्रोक्त[4]विशेषण[5]योरन्यतर[6]स्याप्यपाये ज्ञानस्यानुमानत्वा- ५सम्भवात् ।

ननु चास्तु साधनात्साध्यविज्ञानमनुमानम् । तत्तु साधनं निश्चितपक्षधर्मत्वादिरूपत्रययुक्तम् । पक्षधर्मत्वं हि तस्यासिद्धत्वव्यवच्छेदार्थं लक्षणं निश्चीयते । सपक्ष एव सत्त्वं तु विरुद्धत्वव्यवच्छेदार्थम् । विपक्षे[7] चासत्त्वमेव अनैकान्तिकत्वव्यवच्छि- १०त्तये । तदनिश्चये साधनस्यासिद्धत्वादिदोषत्रयपरिहारासम्भवात् । उक्तञ्च—

"हेतोस्त्रिष्वपि रूपेषु निर्णयस्तेन[8] वर्णितः ।
असिद्धविपरीतार्थव्यभिचारिविपक्षतः[9] ॥" [प्रमाणवा० १।१६] इत्याशङ्क्याह—

१५ साध्याविनाभावित्वेन[10] निश्चितो हेतुः ॥ १५ ॥

असाधारणो हि स्वभावो भावस्य लक्षणमव्यभिचारादग्नेरौष्ण्यवत् । न च त्रैरूप्यस्यासाधारणता; हेतौ तदाभासे च तत्सम्भवात्पञ्चरूपत्वादिवत् । असिद्धत्वादिदोषपरिहारश्चास्य अन्यथानुपपत्तिनियमनिश्चयलक्षणत्वादेव प्रसिद्धः, स्वयमसिद्ध- २०स्यान्यथानुपपत्तिनियमनिश्चयासम्भवाद् विरुद्धानैकान्तिकवत् ।

किञ्च, त्रैरूप्यमात्रं हेतोर्लक्षणम्, विशिष्टं वा त्रैरूप्यम्? तत्राद्यविकल्पे धूमवत्त्वादिवद्वक्तृत्वादावप्यस्य सम्भवात्कथं तल्लक्षणत्वम्? न खलु 'बुद्धोऽसर्वज्ञो वक्तृत्वाद् रथ्यापुरुषवत्' इत्यत्र हेतोः पक्षधर्मत्वादिरूपत्रयसद्भावे परैर्गमकत्वमिष्यतेऽन्यथानुप- २५पन्नत्वविरहात् । द्वितीयविकल्पे तु कुतो वैशिष्ट्यं त्रैरूप्यस्यान्यत्रान्यथानुपपन्नत्वनियमनिश्चयात्, इति स एवास्य लक्षणमक्षूणं[16] परीक्षादक्षैरुपलक्ष्यते । तद्भावे पक्षधर्मत्वाद्यभावेपि 'उदे-

---

१ शक्यं=प्रत्यक्षाद्यबाधितम् । २ अभिप्रेतम्=इष्टम् । ३ अप्रसिद्धत्वम्=असिद्धम् । ४ यतः । ५ साध्यसाधनयोः । ६ साध्यस्य साधनस्य वा । ७ सपक्ष एव सत्त्वमित्युच्यमाने विपक्षे एकदेशेन सत्त्वनिवृत्तिः स्यात् । तद्व्यवच्छेदार्थं साध्येन विपक्षे हेतोरसत्त्वं यथा स्यादिति विपक्षे चासत्त्वं चेत्युक्तम् । ८ दिग्नागेन । ९ एते एव विपक्षास्तेभ्यस्ततः । १० स्वरूपेण । ११ यतः । १२ तादिः । १३ अनुमाने । १४ बौद्धैः । १५ वर्जने । १६ परिपूर्णम् ।

ष्यति शकटं कृत्तिकोदयात्' इत्यादेर्गमकत्वेन वक्ष्यमाणत्वात्, सपक्षे सत्त्वरहितस्य च श्रावणत्वादेः शब्दानित्यत्वे साध्ये गमकत्वप्रतीतेः।

ननु नित्यादाकाशादेर्विपक्षादिव सपक्षादप्यनित्याद् घटादेः सतो व्यावृत्तत्वेन श्रावणत्वादेरसाधारणत्वादनैकान्तिकता; तद्- ५ सत्यम्; असाधारणत्वस्यानैकान्तिकत्वेन व्याप्त्यऽसिद्धेः। सपक्ष-विपक्षयोर्हि हेतुरसत्त्वेन निश्चितोऽसाधारणः, संशयितो वा? निश्चितश्चेत्; कथमनैकान्तिकः? पक्षे साध्याभावेनुपपद्यमानतया निश्चितत्वेन संशयहेतुत्वाभावात्।

श्रावणत्वं हि श्रवणज्ञानग्राह्यत्वम्, तज्ज्ञानं च शब्दादात्मानं १० लभमानं तस्य ग्राहकम् नान्यथा, "नाकारणं विषयः" [ ] इत्यभ्युपगमात्। शब्दश्च नित्यस्तज्जननैकस्वभावो यदि; तर्हि श्रवणप्रणिधानात्पूर्वं पश्चाच्च तज्ज्ञानोत्पत्तिप्रसङ्गः। न ह्यविकले कारणे कार्यस्यानुत्पत्तिर्युक्ता अतत्कार्यत्वप्रसङ्गात्। प्रयोगः- यस्मिन्नविकले सत्यपि यन्न भवति न तत्तत्कार्यम् यथा सत्यप्य- १५ विकले कुलाले अभवन्पटो न तत्कार्यः, सत्यपि शब्दे पूर्वं पश्चाच्चाविकले न भवति च तज्ज्ञानमिति। ननु च श्रोत्रप्रणि-धानात्पूर्वं पश्चाच्च तज्ज्ञानजननैकस्वभावोपि शब्दस्तन्न जनयत्या-वृतत्वात्; तदप्यसङ्गतम्; आवरणं हि द्रष्टृदृश्ययोरन्तराले वर्तमानं वस्तु लोके प्रसिद्धम्, यथा काण्डपटादिकम्। श्रोत्र- २० शब्दयोश्च व्यापकत्वे सर्वत्र सर्वदा तत्करणैकस्वभावयोरत्यन्त-संश्लिष्टयोः किं नामान्तराले वर्त्तेत? वृत्तौ वा तयोर्व्यापकत्व-व्याघातः, तदवष्टब्धदेशपरिहारेणानयोर्वर्तनादिति 'आप्तवच-नादिनिबन्धनमर्थज्ञानमागमः' (परीक्षामु० ३।१००) इत्यत्र विस्तरेण विचारयिष्यामः। तन्नास्याऽऽवृतत्वात्तज्ज्ञानाजनकत्वं २५ किन्त्वसत्त्वादेव, इति श्रावणत्वादेः सपक्षविपक्षाभ्यां व्यावृ-त्तत्वेपि पक्षे साध्याविनाभावित्वेन निश्चितत्वाद्गमकत्वमेव। न च सपक्षविपक्षयोरसत्त्वेन निश्चितः पक्षे साध्याविनाभावित्वेन निश्चेतुमशक्यः; सर्वानित्यत्वे साध्ये सत्त्वादेरहेतुत्वप्रसङ्गात्।

---

१ शब्दत्वादेश्च। २ विद्यमानात्। ३ यद्यदसाधारणं तत्तदनैकान्तिकमिति। ४ शब्दे। ५ अनित्यत्वस्य। ६ श्रावणत्वहेतोः। ७ साध्याभावे अनुपपद्यमानतया निश्चितत्वं हेतोः कथमित्युक्ते आह। ८ एकाग्रतायाः। ९ शब्दक्षणे। १० श्रवण-ज्ञानस्य। ११ श्रवणज्ञानं शब्दकार्यं न भवति शब्देऽविकले सति पूर्वं पश्चाच्चानुत्पद्य-मानत्वात्। १२ आवारकवायुभिः। १३ द्रष्टृधर्ययोः। १४ मध्ये। १५ वस्त्रविशेषः। १६ आवरणाभावं। १७ शब्दस्य। १८ हेतुः। १९ सर्वमनित्यं सत्त्वादिति।

न खलु सत्त्वादिर्विपक्ष एवासत्त्वेन निश्चितः, सपक्षेपि तदसत्त्वनिश्चयात्।

सपक्षस्याभावात्तत्र सत्त्वादेरसत्त्वनिश्चयान्निश्चयहेतुत्वम्, न पुनः श्रावणत्वादेः सद्भावेपीति चेत्; ननु श्रावणत्वादिरपि यदि सपक्षे स्यात्तदा तं व्याप्नुयादेवेति समानान्तर्व्याप्तिः। सति विपक्षे धूमादिश्चासत्त्वेन निश्चितो निश्चयहेतुर्मा भूत्। विपक्षे सत्यसति चासत्त्वेन निश्चितः साध्याविनाभावित्वाद्धेतुरेवेति चेत्; तर्हि सपक्षे सत्यसति चासत्त्वेन निश्चितो हेतुरस्तु तत एव। नन्वेवं सपक्षे तदेकदेशे वा सन्कथं हेतुः? 'सपक्षेऽसन्नेव हेतुः' इत्यनवधारणात्। विपक्षेपि तदसत्त्वानवधारणमस्तु; इत्ययुक्तम्; साध्याविनाभावित्वव्याघातानुषङ्गात्।

यदि पुनः सपक्षविपक्षयोरसत्त्वेन संशयितोऽसाधारण इत्युच्यते; तदा पक्षत्रयवृत्तितया निश्चितया संशयितया वाऽनैकान्तिकत्वं हेतोरित्यायातम्। न च श्रावणत्वादौ सास्तीति गमकत्वमेव। विरुद्धताप्येतेन प्रत्युक्ता। यो हि विपक्षैकदेशेपि न वर्त्तते, स कथं तत्रैव वर्त्तेत? असिद्धता तु दूरोत्सारितैव, श्रावणत्वस्य शब्दे सत्त्वनिश्चयात्। तन्न पक्षधर्मत्वं सपक्षे सत्त्वं वा हेतोर्लक्षणम्।

विपक्षे पुनरसत्त्वमेव निश्चितं साध्याविनाभावनियमनिश्चयस्वरूपमेव। इति तदेव हेतोः प्रधानं लक्षणमस्तु किमत्र लक्षणान्तरेण? न च सपक्षे सत्त्वाभावे हेतोरनन्वयत्वानुषङ्गः; अन्तर्व्याप्तिलक्षणस्य तथोपपत्तिरूपस्यान्वयस्य सद्भावादन्यथानुपपत्तिरूपव्यतिरेकवत्। न खलु दृष्टान्तधर्मिण्येव साधर्म्यं वैधर्म्यं वा हेतोः प्रतिपत्तव्यमिति नियमो युक्तः; सर्वस्य क्षणिकत्वादिसाधने सत्त्वादेरहेतुत्वप्रसङ्गात्।

---

१ नित्ये। २ निश्चयहेतुत्वम्। ३ सपक्षस्य। ४ सपक्षेऽसत्त्वनिश्चयादिति शेषः। ५ सपक्षे (पक्षे)। ६ श्रावणत्वादेः सति विपक्षे तत्रासत्त्वेन निश्चितस्य स्वसाध्यसाधकत्वे अङ्गीक्रियमाणे। ७ पक्षे। ८ स्वसाध्यस्य। ९ सति विपक्षे असत्त्वाविशेषात्। १० हेतुः। ११ सपक्षे असत्त्वेन निश्चितस्य हेतुत्वप्रकारेण। १२ चेतनास्तरवः स्वापादिमत्त्वात् सत्त्वादिति हेतुः सिद्धेषु न प्रवर्त्तते अन्यत्र प्रवर्तते। १३ नित्ये। १४ न केवलं सपक्षे। १५ अनैकान्तिकत्वनिराकरणपरेण ग्रन्थेन। १६ पक्षधर्मत्वसपक्षेसत्त्वलक्षणेन। १७ पक्षे एव। १८ अन्वयः। १९ व्यतिरेकः। २० दृष्टान्तस्यासत्त्वात्।

ननु त्रैरूप्यं हेतोर्लक्षणं मा भूत् 'पक्वान्येतानि फलान्येकशाखाप्रभवत्वादुपयुक्तफलवत्' इत्यादौ 'मूर्खोऽयं देवदत्तस्तत्पुत्रत्वादितरतत्पुत्रवत्' इत्यादौ च तदाभासेऽपि तत्सम्भवात्। पञ्चरूपत्वं तु तल्लक्षणं युक्तमेवानवद्यत्वात्, एकशाखाप्रभवत्वस्याबाधितविषयत्वासम्भवाद् आत्मताग्राहिप्रत्यक्षेणैव तद्विषयस्य बाधितत्वात्, तत्पुत्रत्वादेश्चासत्प्रतिपक्षत्वाभावात् तत्प्रतिपक्षस्य शास्त्रव्याख्यानादिलिङ्गस्य सम्भवात्।

प्रकरणसमस्याप्यसत्प्रतिपक्षत्वाभावादहेतुत्वम्। तस्य हि लक्षणम् "यस्मात् प्रकरणचिन्ता स प्रकरणसमः"। [न्यायसू० १।२।७] इति। प्रक्रियेते साध्यत्वेनाधिक्रियेते अनिश्चितौ पक्षप्रतिपक्षौ यौ तौ प्रकरणम्। तस्य चिन्ता संशयात्प्रभृत्याऽऽनिश्चयात्पर्यालोचना यतो भवति स एव, तन्निश्चयार्थं प्रयुक्तः प्रकरणसमः। पक्षद्वयेऽप्यस्य समानत्वादुभयत्राप्यन्वयादिसद्भावात्। तद्यथा-'अनित्यः शब्दो नित्यधर्मानुपलब्धेर्घटादिवत्, यत्पुनर्नित्यं तन्नानुपलभ्यमाननित्यधर्मकम् यथात्मादि' एवमेकेनान्यतरानुपलब्धेरनित्यत्वसिद्धौ साधकत्वेनोपन्यासे सति द्वितीयः प्राह-यद्यनेन प्रकारेणानित्यत्वं प्रसाध्यते तर्हि नित्यतासिद्धिरप्यस्त्वऽन्यतरानुपलब्धेस्तत्रापि सद्भावात्। तथा हि-नित्यः शब्दोऽनित्यधर्मानुपलब्धेरात्मादिवत्, यत्पुनर्न नित्यं तन्नानुपलभ्यमानाऽनित्यधर्मकम् यथा घटादि;

इत्यप्यविचारितरमणीयम्; साध्याविनाभावित्वव्यतिरेकेणापरस्याबाधितविषयत्वादेरसम्भवात् तदेव प्रधानं हेतोर्लक्षणमस्तु किं पञ्चरूपप्रकल्पनया? न च प्रमाणप्रसिद्धत्रैरूप्यस्य हेतोर्विषये बाधा सम्भवति; अनयोर्विरोधात्। साध्यसद्भावे एव हि हेतो-

१ यौगः। २ भक्षित। ३ स श्यामस्तत्पुत्रत्वादित्यादौ च। ४ अनुष्णोऽग्निर्द्रव्यत्वाज्जलवद् इति च। ५ साध्यस्य। ६ तत्पुत्रो विद्वान् शास्त्रव्याख्यानसद्भावात्। ७ तत्पुत्रत्वादिति हेतोः। ८ हेतोः। ९ स्वीक्रियेते। १० वादिना यः पक्षो निश्चितः स प्रतिवादिना अनिश्चितः। यः प्रतिवादिना निश्चितः स वादिना न निश्चितः। ११ वादिप्रतिवादिभ्याम्। १२ बाधकादिमध्ये। १३ आ मर्यादायाम्। १४ हेतोः। १५ हेतुः। १६ हेतोः। १७ पक्षधर्मत्वादि। १८ सपक्षधर्मत्वादि। १९ तथा हि। २० नित्यत्व। २१ यौगेन। २२ अनित्यधर्मस्य। २३ मीमांसकः। २४ असत्प्रतिपक्षत्वस्य च। २५ यौगमतमालम्ब्य सूरिभिरुच्यते। २६ बसः। २७ किं त्रैरूप्यं का च बाधा कथं च तयोर्विरोध इत्युक्ते आह।

धर्मिणि[1] सद्भावस्त्रैरूप्यम्[2], तदभावे एव च तत्र तत्सम्भवो बाधा, भावाभावयो[3]श्चैकत्रैकस्य विरोधः।

किञ्च, आध्यक्षागमयोः कुतो हेतुविर्षयबाधकत्वम्? स्वार्थ-(र्था)व्यभिचारित्वाच्चेत्; हेतावपि सति त्रैरूप्ये तत्समानमित्यसा-
५ वप्यनयोर्विषये बाधकः स्यात्। दृश्यते हि चन्द्रार्कादिस्थैर्यग्राह्यऽ-ध्यक्षं देशान्तरप्राप्तिलिङ्गप्रभवानुमानेन बाध्यमानम्। अथैक-शाखाप्रभवत्वाद्यनुमानस्य भ्रान्तत्वाद्बाध्यत्वम्। कुतस्तद्भ्रान्त-त्वम्-अध्यक्षबाध्यत्वात्, त्रैरूप्यवैकल्याद्वा? प्रथमपक्षेऽन्योन्या-श्रयः-भ्रान्तत्वेऽध्यक्षबाध्यत्वम्, ततश्च भ्रान्तत्वमिति। द्वितीय-
१० पक्षस्त्वयुक्तः; त्रैरूप्यसद्भावस्यात्र परेणाभ्युपगमात्। अनभ्युप-गमे वाऽत एवास्याऽगमकत्वोपपत्तेः किमध्यक्षबाधासाध्यम्?

किञ्च, अबाधितविषयत्वं निश्चितम्, अनिश्चितं वा हेतोर्लक्षणं स्यात्? न तावदनिश्चितम्; अतिप्रसङ्गात्। नापि निश्चितम्; तन्निश्चयासम्भवात्। स हि स्वसम्बन्धी, सर्वसम्बन्धी वा?
१५ स्वसम्बन्धी चेत्; तत्कालीनः, सर्वकालीनो वा? न तावत्तत्का-लीनः; तस्यासम्यगनुमानेपि सम्भवात्। नापि सर्वकालीनः; तस्यासिद्धत्वात्, 'कालान्तरेऽप्यत्र बाधकं न भविष्यति' इत्यसर्व-विदा निश्चेतुमशक्यत्वात्।

सर्वसम्बन्धिनोपि तत्कालस्योत्तरकालस्य वा तन्निश्चयस्या-
२० सिद्धत्वम्; अर्वाग्दृशा 'सर्वत्र सर्वदा सर्वेषामत्र बाधकस्याभावः' इति निश्चेतुमशक्तेस्तन्निश्चयनिबन्धनस्याभावात्। तन्निबन्धनं ह्यनुपलम्भः, संवादो वा स्यात्? न तावदनुपलम्भः; सर्वात्मसम्ब-न्धिनोऽस्याऽसिद्धानैकान्तिकत्वात्। नापि संवादः; प्रागनुमान-प्रवृत्तेस्तस्यासिद्धेः। अनुमानोत्तरकाले तत्सिद्ध्यभ्युपगमे पर-
२५ स्पराश्रयः-अनुमानात्प्रवृत्तौ संवादनिश्चयः, ततश्चाबाधितविषय-त्वावगमेऽनुमानप्रवृत्तिरिति। न चाविनाभावनिश्चयादेवाबाधित-विषयत्वनिश्चयः; हेतौ पञ्चरूपयोगिन्यऽविनाभावपरिसमाप्ति-

---

१ पर्वते। २ यदा हेतोर्धर्मिणि सद्भावस्तदा पक्षधर्मत्वम्। यदा च साध्यसद्भावे हेतोर्धर्मिणि सद्भावस्तदान्वयः। यदा च साध्यसद्भावे एव हेतोर्धर्मिणि सद्भावस्तदा विपक्षेऽसत्त्वम्। कथं साध्यसद्भाव एव इत्येवकारेण विपक्षेऽसत्त्वं गम्यम्। ३ साध्यस्य। ४ साध्य। ५ एकशाखाप्रभवत्वलक्षणे। ६ योगेन। ७ पक्षधर्मत्वादेरप्यनिश्चितस्य हेत्वङ्गत्वप्रसङ्गात्। ८ अनुमानकालीनः। ९ एकशाखाप्रभवत्वलक्षणे। १० सम्य-गनुमाने। ११ अनुमान। १२ नृणाम्। १३ अनुमानविषये। १४ मातुकस्य। १५ आत्मनः स्वस्य।

वादिनामबाधितविषयत्वाऽनिश्चये अविनाभावनिश्चयस्यैवासम्भवात्। तन्नैकशाखाप्रभवत्वादेर्बाधितविषयत्वाद्धेत्वाभासत्वम्।

नापि तत्पुत्रत्वादेः सत्प्रतिपक्षत्वात्। यतः प्रतिपक्षस्तुल्यबलः, अतुल्यबलो वा सन् स्यात्? न तावदाद्यः पक्षः; द्वयोस्तुल्यबलत्वे 'एकस्य बाधकत्वमपरस्य च बाध्यत्वम्' इति ५ विशेषानुपपत्तेः। न च पक्षधर्मत्वाद्यभाव एकस्य विशेषः; तस्यानभ्युपगमात्। अभ्युपगमे वा अत एवैकस्य दुष्टत्वसिद्धेर्न किञ्चिदनुमानबाधया? द्वितीयपक्षेऽप्यतुल्यबलत्वं तयोः पक्षधर्मत्वादिभावाभावकृतम्, अनुमानबाधाजनितं वा स्यात्? प्रथमपक्षोनभ्युपगमादेवायुक्तः, पक्षधर्मत्वादेरुभयोरप्यभ्युपगमात्। १० द्वितीयोऽप्यसम्भाव्यः; तस्याद्यापि विवादपदापन्नत्वात्। न खलु द्वयोस्त्रैरूप्याविशेषतस्तुल्यत्वे सति 'एकस्य बाध्यत्वमपरस्य च बाधकत्वम्' इति व्यवस्थापयितुं शक्यमविशेषेणैव तत्प्रसङ्गात्। इतरेतराश्रयश्च–अतुल्यबलत्वे सत्यनुमानबाधा, तस्यां चातुल्यबलत्वमिति। १५

यच्च प्रकरणसमस्यानित्यः शब्दोनुपलभ्यमाननित्यधर्मकत्वादित्युदाहरणम्; तत्रानुपलभ्यमाननित्यधर्मकत्वं शब्दे तत्त्वतोऽप्रसिद्धम्, न वा? प्रथमपक्षे पक्षवृत्तितयाऽस्याऽसिद्धेरसिद्धत्वम्। द्वितीयपक्षे तु साध्यधर्मान्विते धर्मिणि तत्प्रसिद्धम्, तद्रहिते वा? आद्यविकल्पे साध्यवत्येव धर्मिण्यस्य सद्भावसिद्धिः, कथमगम- २० कत्वम्? न हि साध्यधर्ममन्तरेण धर्मिण्यऽभवनं विहायापरं हेतोरविनाभावित्वम्। तच्चेत्समस्ति, कथं न गमकत्वम् अविनाभावनिबन्धनत्वात्तस्य? द्वितीयपक्षे तु विरुद्धत्वम्; साध्यधर्मरहिते धर्मिणि प्रवर्त्तमानस्य विपक्षवृत्तितया विरुद्धत्वोपपत्तेः। अथ सन्दिग्धसाध्यधर्मवति तत्तत्र प्रवर्त्तते; तर्हि सन्दिग्ध- २५ विपक्षव्यावृत्तिकत्वादस्याऽनैकान्तिकत्वम्।

नन्वेवं सर्वो हेतुरनैकान्तिकः स्यात्, साध्यसिद्धेः प्राक्साध्यधर्मिणः साध्यधर्मसदसत्त्वाश्रयत्वेन सन्दिग्धत्वात्, ततोऽनुमेयव्यतिरिक्ते साध्यधर्मवति धर्म्यन्तरे साध्याभावे च प्रवर्त्तमानो

१ यौगादीनाम्। २ उक्तन्यायेन। ३ तत्पुत्रत्वव्याख्यानवक्त्वहेत्वोः। ४ तत्पुत्रत्वादित्येतस्य। ५ यौगेन। ६ तत्पुत्रत्वादित्येतस्य। ७ तत्पुत्रत्वव्याख्यानवक्त्वहेत्वोः। ८ तत्पुत्रत्वस्य पक्षधर्माद्यभावः व्याख्यानवक्त्वस्य च पक्षधर्मादिसद्भावः। ९ तत्पुत्रत्वव्याख्यानवक्त्वहेत्वोः। १० सन्दिग्धसाध्यधर्मवति प्रवर्त्तमानस्यानैकान्तिकत्वप्रकारेण। ११ पर्वतस्य शब्दस्य वा। १२ अनित्यतयाऽनुमेयाच्छब्दात्। १३ घटे। १४ आकाशादौ। १५ सपक्षविपक्षयोरिति यावत्।

हेतुरनैकान्तिकः, साध्याभाववत्येव तु पक्षधर्मत्वे सति विरुद्धः[1], यस्तु विपक्षाद्व्यावृत्तः सपक्षे चानुगतः पक्षधर्मो निश्चितः स्वसाध्यं गमयत्येवेत्यभ्युपगन्तव्यम्; इत्यप्यसुन्दरम्; यतो यदि साध्य[2]धर्मिव्यतिरिक्ते धर्म्यन्तरे[3] हेतोः स्वसाध्येन प्रतिबन्धोऽ-
५ भ्युपगम्यते; तर्हि साध्यधर्मिण्[4]युपादीयमानो हेतुः कथं साध्यं साधयेत्, तत्र साध्यमन्तरेणाप्यस्य सद्भावाभ्युपगमात्? तद्व्यतिरिक्ते एव धर्म्यन्तरे[5] साध्येनास्य प्रतिबन्धग्रहणात्। न चान्यत्र साध्याविनाभावित्वेन निश्चितो हेतुरन्यत्र[6] साध्यं गमयत्यतिप्रसङ्गात्। ततः साध्यधर्मिण्येव हेतोर्व्याप्तिः प्रतिपत्तव्या।

१० ननु यदि साध्यधर्मान्वितत्वेन साध्यधर्मिण्यसौ[9] पूर्वमेव[10] प्रतिपन्नः, तर्हि साध्यधर्मस्यापि पूर्वमेव प्रतिपन्नत्वाद्धेतोः पक्षधर्मताग्रहणस्य वैयर्थ्यम्; तदप्यसङ्गतम्; यतः प्रतिबन्धसाधकप्रमाणेन[11] सर्वोपसंहारेण 'साधनधर्मः साध्यधर्माभावे क्वचिदपि न भवति' इति सामान्येन प्रतिबन्धः प्रतिपन्नः। पक्षधर्मताग्रहणकाले
१५ तु 'यत्रैव धर्मिण्युपलभ्यते हेतुस्तत्रैव साध्यं साधयति[12]' इति पक्षधर्मताग्रहणस्य विशेषविषयप्रतिपत्तिनिबन्धनत्वान्नानुमानस्य वैयर्थ्यम्। न खलु[13] विशिष्टधर्मिण्युपलभ्यमानो हेतुस्तद्गतसाध्यमन्तरेणोपपत्तिमान्[14], तस्य[15] तेन व्याप्त्यभावप्रसङ्गात्। अत एव प्रतिपन्नप्रतिबन्धकहेतु[16]सद्भावे धर्मिणि[17] न विपरीत[18]साध्योप-
२० स्थापकहेत्वन्तरस्य[19] सद्भावः, अन्यथा द्वयोरप्यनयोः[20] स्वसाध्याविनाभावित्वात्, नित्यत्वानित्यत्वयोश्चैकत्र[21]कदैकान्तवादिमते विरोधतोऽसम्भवात्, तद्व्यवस्थापकहेत्वोरप्यसम्भवः। सम्भवे वा तयोः स्वसाध्याविनाभूतत्वान्नित्यत्वानित्यत्वधर्मसिद्धिर्धर्मिणः स्यादिति कुतः प्रकरणसमस्यागमकता एकान्तत्व[22]सिद्धिर्वा?

१ शब्दो नित्यः कृतकत्वाद्घटवत्। साध्याभाववत्येव घटे कृतकत्वस्य शब्दलक्षण-पक्षधर्मत्वे सति प्रवर्त्तमानस्य विरुद्धत्वम्। २ शब्दात् पर्वतात् वा। ३ घटे महानसादौ वा। ४ शब्दे पर्वते वा। ५ घटे महानसे वा। ६ घटे महानसे वा। ७ शब्दे पर्वते वा। ८ काष्ठे लोहलेख्यत्वोपलम्भाद्वज्रेऽपि तथाप्रसङ्गात्। ९ शब्दे। १० पक्ष-धर्मताग्रहणात्। ११ ऊहेन। १२ हेतुः। १३ ननु यथास्माकं साध्यधर्मिव्यतिरिक्ते एव धर्म्यन्तरे स्वसाध्येन हेतोः प्रतिबन्धग्रहणाभ्युपगमे साध्यधर्मिणि साध्यधर्ममन्तरेणाप्यस्य सद्भावादगमकत्वम्। तथा भवतामपि प्रतिबन्धप्रसाधकप्रमाणेन सामान्येनैवाविनाभाव-प्रतिपत्तेर्विशिष्टधर्मिणि उपलभ्यमानस्य हेतोस्तद्गतसाध्यमन्तरेणाप्युपपत्तिसम्भवादित्युक्ते वक्ति न खल्विति। १४ अन्यथा। १५ सर्वत्र। १६ अनुपलभ्यमाननित्यधर्मत्व-लक्षणस्य। १७ शब्दे। १८ नित्यत्वलक्षण। १९ अनुपलभ्यमानानित्यधर्मकत्व-लक्षणस्य। २० हेत्वोः। २१ शब्दे धर्मिणि। २२ अनित्यत्वमेव शब्दस्येति।

अथान्यतरस्यात्र[1] स्वसाध्याविनाभाववैकल्यम्; तथाप्यत एवास्या-गमकतेति किं तत्प्रतिपादनप्रयासेन ?

किञ्च, नित्यधर्मानुपलब्धिः प्रसज्यप्रतिषेधरूपा, पर्युदासरूपा वा शब्दानित्यत्वे हेतुः स्यात् ? तत्राद्यः पक्षोऽयुक्तः; तुच्छाभावस्य साध्यासाधकत्वान्निषिद्धत्वाच्च । द्वितीयपक्षे तु अनित्यधर्मोपलब्धिरेव हेतुः, सा च शब्दे यदि सिद्धा कथं नानित्यतासिद्धिः ? अथ त[2]च्चिन्तासम्बन्धिपुरुषेणा[3]सौ प्रयुज्यत इति त[4]त्रासिद्धा; तर्हि कथं न सन्दिग्धो हेतुर्वादिनं प्रति ? प्रतिवादिनस्त्वसौ स्वरूपासिद्ध एव; नित्यधर्मोपलब्धेस्तत्रास्य[5] सिद्धेः । तन्न पञ्चरूपत्वमप्यस्य लक्षणं घटते अबाधितविषयत्वादे[6]र्विचार्यमाणस्यायोगात्पक्षधर्मत्वादिवत् ।

यदि चैकस्य हेतोः पक्षधर्मत्वाद्यनेकधर्मात्मकत्वमिष्यते, तदाऽनेकान्तः समाश्रितः स्यात् । न च यदेव प[7]क्षधर्मस्य सपक्षे एव सत्त्वम्[8] तदेव विपक्षात्सर्वतोऽसत्त्वमित्यभिधातव्यम्; अन्वयव्यतिरेक[9]योर्भावाभावरूपयोः सर्वथा तादात्म्यायोगात्, तत्त्वे वा के[10]वलान्वयी केवल[11]व्यतिरेकी वा सर्वो हेतुः स्यात्, न त्रिरूपवान् ।

व्यतिरेक[12]स्य चाभावरूपत्वाद्धेतोस्तद्रूपत्वेऽभावरूपो हेतुः स्यात् । न चा[13]भावस्य तुच्छरूपत्वात्स्वसाध्येन धर्मिणा स[14]म्बन्धः । यदि च सपक्ष एव सत्त्वं विपक्षासत्त्वम् न ततो भिन्नम्; तर्हि तदेवास्या-साधारणं कथं स्यात् ? वस्तुभू[15]ता[16]न्या[17]भावमन्तरेण[18] प्रतिनियतस्याऽस्याप्यत्रासम्भवात् । अथ ततस्तदन्यधर्मान्तरम्; तर्ह्येकस्यानेकधर्मात्मकस्य हेतोस्तथाभूतसाध्याविनाभावित्वेन निश्चितस्य अनेकान्तात्मकार्थप्रसाधकत्वात् कथं न प[19]रोपन्यस्तहेतूनां विरुद्धता ? एकान्तविरुद्धेनानेकान्तेन व्याप्तत्वात् ।

किञ्च, परैः सामान्यरूपो हेतुरुपादीयते, विशेषरूपो वा, उभयम्, अनुभयं वा ? सामान्यरूपश्चेत्; तत्किं व्यक्तिभ्यो भिन्नम्, अभिन्नं वा ? भिन्नं चेत्; न; व्यक्तिभ्यो भिन्नस्य सामान्यस्याऽप्रति-

१ द्वयोर्मध्ये एकस्याभावस्य । २ प्रकरण । ३ नित्यधर्मानुपलब्धेरनित्यत्वं प्रतिपादयामः । अनित्यधर्मानुपलब्धेर्नित्यत्वं साधयामः इति । ४ शब्दे धर्मिणि । ५ शब्दे । ६ असत्प्रतिपक्षत्वस्य च । ७ हेतोः । ८ सपक्षे सत्त्वम् । ९ विपक्षेऽसत्त्वम् । १० अस्मिन्पक्षे व्यतिरेकस्यान्वयरूपत्वे तादात्म्यम् । ११ अत्र पक्षे अन्वयस्य व्यतिरेकरूपित्वे तादात्म्यम् । १२ केवलव्यतिरेकीत्यस्मिन्पक्षे । १३ हेतुरूपस्य । १४ अभावपक्षे हेतोः । १५ यतः । १६ भिन्न । १७ यतः । १८ विपक्षासत्त्वलक्षणम् । १९ वैशेषिक ।

भासमानतयाऽसिद्धत्वात्। तथाभूतस्यास्य सामान्यविचारे निराकरिष्यमाणत्वाच्च। अथाभिन्नम्; कथञ्चित्, सर्वथा वा? सर्वथा चेत्; न; सर्वथा व्यक्त्यव्यतिरिक्तस्यास्य व्यक्तिस्वरूपवद्व्यक्त्यन्तराननुगमतः सामान्यरूपतानुपपत्तेः। कथञ्चित्पक्षस्त्वनभ्युपगमा-
५ देवायुक्तः। नापि व्यक्तिरूपो हेतुः; तस्यासाधारणत्वेन गमकत्वायोगात्। नाप्युभयं परस्परानानुविद्धम्; उभयदोषप्रसङ्गात्। नाप्यनुभयम्; अन्योन्यव्यवच्छेदरूपाणामेकाभावे द्वितीयविधानादनुभयस्यासत्त्वेन हेतुत्वायोगात्। ततः पदार्थान्तरानुवृत्तिव्यावृत्तरूपमात्मानं बिभ्रदेकमेवार्थस्वरूपं प्रतिपत्तुर्भेदाभेदप्रत्ययप्रसू-
१० तिनिबन्धनं हेतुत्वेनोपादीयमानं तथाभूतसाध्यसिद्धिनिबन्धनमभ्युपगन्तव्यम्।

किञ्च, एकान्तवाद्युपन्यस्तहेतोः किं सामान्यं साध्यम्, विशेषो वा, उभयं वा, अनुभयं वा? न तावत्सामान्यम्; केवलस्य[11]स्यासम्भवादर्थक्रिया[12]कारित्वविकलत्वाच्च। नापि विशेषः; तस्या-
१५ [13]ननुयायितया हेत्वऽव्यापकस्य साधयितुमशक्तेः। नाप्युभयम्; उभयदोषानतिवृत्तेः। नाप्यनुभयम्; तस्यासतो हेत्वव्यापकत्वेन साध्यत्वायोगात्।

यच्चान्यदुक्तम्-"प्रत्यक्ष[14]पूर्वकं त्रिविधमनुमानं पूर्ववच्छेष[15]वत्सामान्यतो दृष्टं च।" [न्यायसू० १।१।५] इति। तत्र पूर्व[16]वच्छेषव-
२० त्केवलान्[18]वयि, यथा सद[19]सद्वर्गः[20] कस्यचिदेकज्ञानालम्बनमनेकत्वात् पञ्चाङ्गुलवत्। पञ्चाङ्गुलव्यतिरिक्तस्य सदसद्वर्गस्य पक्षीकरणाद[21]न्यस्याभावाद्विपक्षाभावः, अत एव व्यतिरेकाभावः। पूर्ववत्सामान्यतोऽदृष्टम् केवलव्यतिरेकि, यथा सात्मकं जीवच्छरीरं प्राणादिमत्त्वादिति। पूर्ववच्छेषवत्सामान्यतो[22]ऽदृष्टमन्वयव्यतिरेकि,

---

१ पराभ्युपगतसामान्यं धर्मि सामान्यरूपतां न भजति व्यक्त्यन्तराननुगमात् व्यक्तिस्वरूपवत्। सामान्यं व्यक्त्यन्तरं नानुगच्छति व्यक्तिभ्योऽभिन्नत्वात् व्यक्तिस्वरूपवत्। २ परेण। ३ दृष्टान्तेऽसत्त्वेन। ४ परस्परानुविद्धं तु परैर्नाभ्युपगम्यते। ५ निरपेक्षम्। ६ व्यक्त्यन्तरेषु। ७ सदृशपरिणामेन। ८ व्यक्तिभेदेषु। ९ देशकालादिभेदेन भेदप्रत्ययः। १० धूमो धूम इत्यभेदप्रत्ययः। ११ व्यक्तिरहितस्य। १२ पाकादि। १३ अन्यत्र व्यक्तिविशेषेषु। १४ लिङ्गप्रत्यक्षं यतः। १५ समासरहितानि पदान्यत्र। १६ सर्वावयवापेक्षयाऽऽदौ प्रयुज्यमानत्वात्पक्षः पूर्वः पूर्वमस्य हेतोरस्तीति पूर्ववत्पक्षधर्म इत्यर्थः। १७ शेषो दृष्टान्तः सोऽस्य हेतोरस्तीति शेषवत्सपक्षे सन्नित्यर्थः। १८ सपक्षे सत्साध्यम्। १९ द्रव्यगुणादि। २० प्रागभावादि। २१ पक्षीभूताद् दृष्टान्तभूतादन्यस्य व्यतिरिक्तस्य विपक्षस्य। २२ साधनसामान्यस्य साध्यसामान्येन व्याप्तिः सामान्यं ततोऽदृष्टं व्यतिरेकिदृष्टान्ते।

यथा[1] विवादास्पदं तनुकरणभुवनादि बुद्धिमत्कारणं कार्यत्वा-
दिभ्यो घटादिवत्। यत्पुनर्बुद्धिमत्कारणं न भवति न तत्कार्यत्वा-
दिधर्माधारो यथात्मादिः[2]' इति।

तदप्येतेन[3] प्रत्याख्यातम्; सर्वत्रा[4]न्यथानुपपन्नत्वस्यैव हेतु-
लक्षणतोपपत्तेः, तस्मिन्सत्येव हेतोर्गमकत्वप्रतीतेः। ५

केवलान्वयिनो हि यद्यन्यथानुपपन्नत्वं प्र[5]माणनिश्चितमस्ति,
किमन्वयाभिधानेन? अ[6]थान्वयाभावे तदभावस्तदनिश्चयो वेति
तदभिधानम्; स्यादेतत् यद्यविनाभावस्तेन व्याप्तः स्यात्, अ[7]व्या-
पकनिवृत्तेर्व्याप्यनिवृत्तावतिप्रसङ्गात्[10]। व्याप्तश्चेत्; तर्हि प्राणादौ
तन्निवृत्तावविनाभावनिवृत्तेरगमकत्वं स्यात्। न खलु य[11]द्यस्य[12] १०
व्यापकं त[13]त्तदभावे भवति वृक्षत्वाभावे शिंशपात्ववत्। गमकत्वे
वास्य नान्वयेनासौ[14] व्याप्तः स्यात्। यदभावे हि यद्भवति न तत्तेन
व्याप्तम् यथा रासभाभावे भवन्धूमादिर्न तेन व्याप्तः, भवति
चान्वयाभावेपि तदविनाभाव इति।

'सदसद्वर्गः कस्यचिदेकज्ञानालम्बनमनेकत्वात्' इत्ययं च हेतुः १५
कुतः केवलान्वयी? व्यतिरेकाभावाच्चेद्; अयमपि कुतः? तद्विष-
यस्य विपक्षस्याभावाच्चेद्: अथ कोयं विपक्षाभावः–पक्षसपक्षावेव,
निवृत्तिमात्रं वा? प्रथमपक्षे पर[16]मतप्रसङ्गः अभावस्य भावान्तर-
स्वभावतास्वीकारात्। द्वितीयपक्षे तु स तथाविधः प्रतिपन्नः, न
वा? न प्रतिपन्नश्चेत्; तर्हि विपक्षाभावसन्देहाद्व्यतिरेकाभावोपि २०
सन्दिग्ध इति केवलान्वयोपि तादृगेव। अथ प्रतिपन्नः; स
यदि साध्यनिवृत्त्या साधननिवृत्त्याधारः प्रतिपन्नः; तर्हि स एव
विपक्षः, कथं विपक्षाभावो यतो व्यतिरेकाभावः? साध्यसाधना-
भावाधारतया निश्चितस्य विपक्षत्वात्। त[19]च्च भाववदभावस्यापि
न विरुध्यते, क[20]थमन्यथा 'सदसद्वर्गः कस्यचिदेकज्ञानालम्बनम्' २५
इत्यत्रासन् पक्षः स्यात्? असन् पक्षो भवति न विपक्ष[21] इति कि[22]ङ्कृतो

---

१ व्यतिरेकिदृष्टान्तः। २ गगनं च। ३ अन्यथानुपपन्नत्वमेव हेतुलक्षणमिति समर्थनपरेण ग्रन्थेन। ४ अनुमाने। ५ तर्कलक्षण। ६ दृष्टान्ते हेतोः सत्त्वमन्वयः। ७ अन्वयस्य। ८ अविनाभावस्य। ९ सत्याम्। १० घटनिवृत्तौ पटनिवृत्तिप्रसङ्गात्। ११ अविनाभावोऽन्वयेन। १२ अविनाभावस्य। १३ अन्वयः। १४ अविनाभावः। १५ प्रसज्यः। १६ जैनमत। १७ जैनेन। १८ विपक्षाभावो विपक्षो भवति साध्यनिवृत्त्या साधननिवृत्त्याधारः स्यात्सम्प्रतिपन्नविपक्षवत्। १९ भाव एव महान्हदलक्षणः आकाशलक्षणो वा विपक्षः स्यात् न त्वभाव इत्युक्ते आह। २० अभावस्य विपक्षत्वे विरोधश्चेत्। २१ असन्। २२ केन।

विभागः? अथाऽसद्वर्गशब्देन[1] सामान्यसमवायान्त्यविशेषा एवोच्यन्ते, नाभावः; तर्हि तद्विषयं ज्ञानं न कस्यचिदनेन[2] प्रसाधितमिति सुव्यवस्थितम्[3] ईश्वरस्याखिलकार्यकारणग्रामपरिज्ञानम्! प्रागभावाद्यज्ञाने कार्यत्वादेः[4][5] अप्यज्ञानात्।

किञ्च, यद्यभावो[6]ऽत्र पक्षसपक्षाभ्यां बहिर्भूतः; तर्ह्यनेनानेकत्वादित्यनैकान्तिको[7] हेतुः, तदनेकत्वेपि कस्यचिदेकज्ञानावलम्बनत्वानभ्युपगमात्[8]। अभ्युपगमे वा कथमभावो न पक्षः? तथा विपक्षोप्यस्तु[9]। नन्वेवं[10] विपक्षाभावोपि[11] तदालम्बनमिति पक्ष एव स्यात्, तथा च पुनरपि विपक्षाभाव[12] एव इति चेत्; तर्हि पुनरपि तदेव[13] चोद्यम्—'कोयं विपक्षाभाव इति? यदि पक्षसपक्षावेव[14]; भावाद्भिन्नस्याभावस्याभावः।

अथ तुच्छा विपक्षनिवृत्तिस्तदभावः; सोपि यद्यप्रतिपन्नस्तर्हि सन्दिग्धः। तत्सन्देहे च व्यतिरेकाभावोपि तादृगेवेति न निश्चितः केवलान्वयः' इत्यादि तदवस्थं[15] पुनः पुनरावर्त्तते इति चक्रक[16]प्रसङ्गः। ततः केवलान्वयित्वेनाभ्युपगतस्य[17] विपक्षाभाव एव तुच्छो विपक्षः। ततः साध्यनिवृत्त्या साधननिवृत्तिश्चेति कथं न व्यतिरेकः? अत[18] एवाविनाभावस्य तत्परिज्ञानस्य च प्राणादिमत्त्ववद्भावात्[19] किमन्वयेन[20]?

अथ विपक्षाभावस्यो[21]पादानत्वायोगान्न ततः साध्यसाधनयोर्व्यावृत्तिः; तन्न; 'भावः प्रागभावादिभ्यो भिन्नस्ते वा परस्परतो भिन्नाः' इत्यादावप्यभावस्यापादानत्वाभावप्रसङ्गात् सर्वेषां[22] साङ्कर्यं स्यात्।

किञ्च, अन्वयो व्याप्तिरभिधीयते। सा च त्रिधा-बहिर्व्याप्तिः, साकल्यव्याप्तिः, अन्तर्व्याप्तिश्चेति। तत्र प्रथमव्याप्तौ भग्नघटव्यतिरिक्तं सर्वं क्षणिकं सत्त्वात्कृतकत्वाद्वा तद्वत्, विवादापन्नाः प्रत्यया

---

१ ये सत्तासम्बन्धात्सन्तस्ते सद्वर्गवाच्याः। ये तु स्वतः सन्तस्ते असद्वर्गशब्दवाच्या इत्यर्थः। २ अनेकत्वादित्यनेन अनुमानेन। ३ उपहासः। ४ प्रागसत्कार्यं यस्मिन् कपाले उत्पन्ने यस्य वस्तुनो घटलक्षणस्य नियमेन प्रध्वंसस्तत्कारणम्। ५ कारणत्वस्य। ६ प्रागभावादिरूपः। ७ अनुमाने। ८ अभावस्यैकभावावलम्बनत्वम्। ९ तुच्छरूपोऽभावः। १० अभावस्य विपक्षतासद्भावप्रकारेण। ११ विपक्षश्चासावभावश्चेति। १२ एकज्ञानरूपः। १३ पूर्वोक्तमेव। १४ विपक्षाभावस्तर्हि। १५ सा प्राक्तनी अवस्था यस्य। १६ ग्रन्थचक्रक। १७ हेतोः। १८ व्यतिरेकसद्भावादेव। १९ ईश्वरे वत्। २० अनेकत्वादिगतेन। २१ तुच्छरूपत्वादपादानत्वायोगः। २२ भावाभावानां प्रागभावादीनां भावाभावादीनाम्।

निरालम्बनाः प्रत्ययत्वात्स्वप्नप्रत्ययवत्, ईश्वरः किञ्चिज्ज्ञो रागादिमान्वा वक्तृत्वादिभ्यो रथ्यापुरुषवत्' इत्यादेर्गमकत्वं स्यात् केवलान्वयस्यात्र सुलभत्वात् । ननु सर्वं न सत्त्वादिकं क्षणिकत्वादिना व्याप्तम् आत्मादौ क्षणिकत्वाद्यसत्त्वात्; तन्न; तदसत्त्वे तत्रार्थक्रियाऽसत्त्वात् सत्त्वं न स्यात् । ५

किञ्च, घटादिदृष्टान्ते सत्त्वादिकं क्षणक्षयादौ सति दृष्टमपि यदि क्वचित्तदभावेपि स्यान्न तर्हि बहिर्व्याप्तिरन्वयः, लक्षणर्युक्ते बाधासम्भवे तल्लक्षणमेव दूषितं स्यात् ।

अथ सकलव्याप्तिरन्वयः; ननु केयं सकलव्याप्तिः? 'दृष्टान्तधर्मिणीव साध्यधर्मिण्यन्यत्र च साध्येन साधनस्य व्याप्तिः सा' १० इति चेत्; सा कुतः प्रतीयताम्? प्रत्यक्षतः, अनुमानाद्वा? प्रत्यक्षतश्चेत्; किमिन्द्रियात्, मानसाद्वा? न तावदिन्द्रियात्; चक्षुरादेरिन्द्रियस्य सकलसाध्यसाधनार्थसन्निकर्षवैधुर्ये तदनुपपत्तेः। न हि तद्वैधुर्ये तद्युक्तम् "इन्द्रियार्थसन्निकर्षोत्पन्नमव्यपदेश्यमऽव्यभिचारि व्यवसायात्मकं ज्ञानं प्रत्यक्षम्" [न्यायसू० १।१।४] १५ इत्यभिधानात् । तस्य तत्सन्निकर्षे वा प्राणिमात्रस्याशेषज्ञत्वप्रसङ्गान्न कश्चिदीश्वराद्विशेष्येत ।

ननु साध्यसाधनयोः साकल्येन ग्रहणं सकलव्याप्तिग्रहणम् । साध्यं चाग्निसामान्यं साधनं च धूमसामान्यम्, तयोश्चानवयवयोरेकत्रापि साकल्येन ग्रहणमस्ति, विशेषप्रतिपत्तिस्तु सर्वत्र २० पक्षधर्मताबलादेवेति चेत्; तर्हि क्षणिकत्वादि साध्यम्, सत्त्वादि साधनम्, तयोश्चानवयवयोः प्रदीपादौ सहदर्शनादेव सकलव्याप्तिग्रहः किन्न स्यात्? मानसप्रत्यक्षादपि व्याप्तिप्रतिपत्तावयमेव दोषः। तन्न प्रत्यक्षतः सकलव्याप्तिग्रहः। नाप्यनुमानतोऽनवस्थाप्रसङ्गात्। २५

सामान्यस्य च साध्यत्वे साधनवैफल्यम् तत्राविवादात्, व्याप्तिग्रहणकाल एवास्य प्रसिद्धेः। कथमन्यथा सामान्यधर्मयोः साकल्येन व्याप्तिर्निर्णीता स्यात्?

---

१ यौगं प्रति । २ लक्षणम् । ३ लक्ष्यम् । ४ सत्त्वादिलक्षणे हेतौ । ५ बहिर्व्याप्तिरूपस्यान्वयस्य कथं बाधासम्भवः? आत्मादौ क्षणिकत्वाभावेपि सत्त्वमस्ति यतः । ६ सकलेषु साध्यसाधनेषु । ७ व्यक्त्यन्तरेषु । ८ अशब्दजम् । ९ सकलयोः । १० अनुमाने । ११ अनुमाने । १२ हेतोः । १३ निरंशयोः । १४ युगपत् । १५ पर्वतोऽग्निमान्धूमवत्त्वादिति सत्यानुमाने धूमोऽग्निकार्यं तदन्वयव्यतिरेकानुविधायित्वादित्यनेनानुमानेन व्याप्तिः प्रतीयते इत्यादिप्रकारेण । १६ साध्यसामान्यस्य । १७ व्याप्तिग्रहणकाले साध्यसामान्यस्य सिद्धिर्नास्ति चेत् । १८ साध्यसाधनयोः ।

साध्यत्वं चास्यासतः करणम्, सतो ज्ञापनं वा? प्रथमपक्षे सामान्यस्यानित्यत्वाऽसर्वगतत्वप्रसङ्गः। द्वितीयपक्षेप्यस्य दृश्यत्वे धर्मिवत्प्रत्यक्षत्वमिति किं केन ज्ञाप्यते? अन्यथा धूमसामान्यमप्यग्निसामान्येन ज्ञाप्येत। अथ व्यक्तिसहायत्वाद्धूमसामान्यमेव प्रत्यक्षं
५ नान्यत् ततोऽयमदोषः; न; अस्य सामान्यविचारे सहायापेक्षाप्रतिक्षेपात्।

यच्चोक्तम्-विशेषप्रतिपत्तिस्तु पक्षधर्मताबलादेवेति; तत्र पक्षधर्मता धूमस्य, तत्सामान्यस्य वा? तत्राद्यः पक्षोऽसङ्गतः; विशेषेण व्याप्तेरप्रतिपत्तितस्तद्गमकत्वायोगात्।

१० द्वितीयपक्षेप्यग्निसामान्यस्यैव धूमसामान्यात्सिद्धिः स्यात् तेनैव तस्य व्याप्तेः, नाग्निविशेषस्य अनेनाव्याप्तेः। अथ साधनसामान्यात् साध्यसामान्यप्रतिपत्तेरेवेष्टविशेषप्रतिपत्तिः सामान्यस्य विशेषनिष्ठत्वात्। ननु तत्सामान्यमपि विशेषमात्रेण व्याप्तं सत्तदेव गमयेन्नान्यत्। अथ विशिष्टविशेषाधारं लिङ्गसामान्यं
१५ प्रतीयमानं विशिष्टविशेषाधिकरणं साध्यसामान्यं गमयतीत्युच्यते; तदप्युक्तिमात्रम्; तथा व्याप्तेरभावात्। अथ विपक्षे सद्भावबाधकप्रमाणवशात्तत्सिद्धिरिष्यते; तर्हि तावतैव पर्याप्तत्वात् किमन्वयेन परस्य?

एतेनान्तर्व्याप्तिरपि चिन्तिता। न खलु प्रत्यक्षादितः साऽपि
२० प्रसिध्यति। तन्न पूर्ववच्छेषवदिति सूक्तम्।

यच्चान्यदुक्तम्-'पूर्ववत्सामान्यतोदृष्टं चेति चशब्दो भिन्नप्रक्रमः 'सामान्यतः' इत्यस्यानन्तरं द्रष्टव्यः। ततोयमर्थः-पूर्ववत्पक्षवत्सामान्यतोपि न केवलं विशेषतो दृष्टं विपक्षे। अनेन केवलव्यतिरेकी हेतुर्दर्शितः-'सात्मकं जीवच्छरीरं प्राणादिमत्त्वात्'
२५ इत्यादिः; तदप्ययुक्तम्; यतः प्राणादेरन्वयाभावे कुतोऽविनाभावावगतिः? व्यतिरेकाच्चेत्; तथाहि-यस्माद् घटादेः सात्मकत्व-

---

१ निष्पादनम्। २ हेतुना। ३ साध्यसामान्यस्य। ४ हेतुना। ५ प्रत्यक्षमपि ज्ञाप्यते चेत्। ६ धूमविशेष। ७ अग्निसामान्यम्। ८ साध्यसाधनसामान्यस्य। ९ ग्रन्थे। १० साध्यसाधनयोः। ११ यत्र यत्र पुरो भवति पर्वतस्थधूमस्तत्राग्निरिति। १२ सिद्धिः। १३ धूमसामान्यस्य। १४ यतः। १५ अग्निविशेष। १६ भेष्टविशेषम्। १७ पर्वतस्थधूम। १८ पर्वतस्थाग्नि। १९ यतः। २० यो यः पुरोवर्तिपर्वतस्थधूमः स पुरोवर्तिपर्वतस्थाग्निमानिति। २१ हेतोः। २२ अनुपलम्भ। २३ व्याप्ति। २४ व्याप्तेः। २५ यौगस्य। २६ साकल्यव्याप्तिशोधनपरेण ग्रन्थेन। २७ निराकृता। २८ अन्वयदृष्टान्तस्य। २९ कारणात्।

निवृत्तौ प्राणादयो नियमेन निवर्त्तन्ते तस्मात्सात्मकत्वाभावः प्राणाद्यभावेन व्याप्तो धूमाभावेनैव पावकाभावः । जीवच्छरीरे च प्राणाद्यभावविरुद्धः प्राणादिसद्भावः प्रतीयमानस्तदभावं निवर्त्तयति । स च निवर्त्तमानः स्वव्याप्यं सात्मकत्वाभावमादाय निवर्त्तते इति सात्मकत्वसिद्धिस्तत्र; इत्यप्यसारम्; यतोनुमा- ५ नान्तरेप्येवमविनाभावप्रसिद्धेः केवलव्यतिरेक्येव सर्वमनुमानं स्यात्, अन्वयमात्रेण तन्सिद्धावतिप्रसङ्गस्योक्तत्वात् ।

किञ्च, साध्यनिवृत्त्या साधननिवृत्तिर्व्यतिरेकः, स च क्वचित् कदाचित्, सर्वत्र सर्वदा वा स्यात्? न तावदाद्यः पक्षः; तथा व्यतिरेकस्य साधनाभासेपि सम्भवात् । द्वितीयपक्षोप्ययुक्तः; १० साकल्येन व्यतिरेकप्रतिपत्तेः प्रत्यक्षादिप्रमाणतः परेषामन्वयप्रतिपत्तेरिवासम्भवात् ।

एतेन पूर्ववच्छेषवत्सामान्यतोदृष्टमन्वयव्यतिरेक्यनुमानं प्रत्याख्यातम्; पक्षद्वयोपक्षिप्तदोषानुषङ्गात् ।

यच्च तदुदाहरणम्-विवादापन्नं तनुकरणभुवनादिकं बुद्धिमद्धे- १५ तुकं कार्यत्वादिभ्यो घटादिवदित्युक्तम्; तदपीश्वरनिराकरणप्रकरणे विशेषतो दूषितमिति पुनर्न दूष्यते ।

अथ "पूर्ववत्-कारणात्कार्यानुमानम्, शेषवत्-कार्यात्कारणानुमानम्, सामान्यतो दृष्टम् अकार्यकारणादकार्यकारणानुमानम् सामान्यतोऽविनाभावमात्रात्" [न्यायभा०, वार्त्ति० १।१।५] इति २० व्याख्यायते; तदप्यविनाभावनियमनिश्चायकप्रमाणाभावादेवायुक्तं परेषाम् । स्याद्वादिनां तु तेषूक्तं तत्सद्भावात् इत्याचार्यः स्वयमेव कार्यकारणेत्यादिना हेतुप्रपञ्चं प्रपञ्चयिष्यति ।

---

१ कारणात् । २ व्यापकेन । ३ धूमाभावः पावकाभावे सत्यसति च भवति धूमाभावस्य व्यापकत्वेन सदसन्निष्ठत्वात् । ४ देशे । ५ स श्यामस्तत्पुत्रत्वादितरतत्पुत्रवदित्यादौ । ६ केवलान्वयिकेवलव्यतिरेकिलक्षणपक्षद्वयनिराकरणपरेण ग्रन्थेन । ७ पूर्वं कारणं तल्लिङ्गमस्यानुमानस्यास्तीति पूर्ववत् । कारणलिङ्गजनितमनुमानमित्यर्थः । ८ असौ पुमान् रूपादिज्ञानवान् चक्षुरादिमत्त्वादस्मदादिवदित्युदाहरणम् । शेषवदिति शेषः कार्यं तल्लिङ्गमस्यानुमानस्यास्तीति शेषवत् । कार्यलिङ्गजनितमनुमानमित्यर्थः । सात्मकं जीवच्छरीरं प्राणादिमत्त्वादित्युदाहरणम् । ९ दृष्टान्ते । १० कार्यं यो हेतुर्न भवति कारणं वा यो हेतुर्न भवति तस्माद्धेतोः कार्यं यत्र भवति साध्यं कारणं वा यत्र भवति साध्यं तस्यानुमानम् । मातुलिङ्गं रूपवद्रसवत्त्वात्सम्प्रतिपन्नमातुलिङ्गवदित्युदाहरणम् । ११ सूत्रम् । १२ व्याख्यानम् । १३ ऊह । १४ जटाधराणाम् । १५ अनुमानत्रितयम् ।

यदपि-पूर्ववत्पूर्वं लिङ्गलिङ्गिसम्बन्धस्य क्वचिन्निश्चयादन्यत्र प्रवर्त्तमानमनुमानम् । शेषवत्परिशेषानुमानम्, प्रसक्तप्रतिषेधे परिशिष्टस्य प्रतिपत्तेः । सामान्यतो दृष्टं विशिष्टव्यक्तौ सम्बन्धाग्रहणात्सामान्येन दृष्टम्, यथा गतिमानादित्यो देशाद्देशान्तरप्राप्तेर्देवदत्तवदिति । तदप्येतेन प्रत्याख्यातम्; उक्तप्रकाराणां प्रमाणतः प्रसिद्धाविनाभावानां प्रतिपादयिष्यमाणहेतुप्रपञ्चत्वेन स्याद्वादिनामेव सम्भवात् ।

न चायं भेदो घटते । सर्वं हि लिङ्गं पूर्ववदेव; परिशेषानुमानस्यापि पूर्ववत्त्वप्रसिद्धेः-प्रसक्तप्रतिषेधस्य परिशिष्टप्रतिपत्त्यविनाभूतस्य पूर्वं क्वचिन्निश्चितस्य विवादाध्यासितपरिशिष्टप्रतिपत्तौ साधनस्य प्रयोगात् । सामान्यतो दृष्टस्याऽपि पूर्ववत्त्वप्रतीतेः; क्वचिद्देशान्तरप्राप्तेर्गतिमत्त्वाविनाभाविन्या एव देवदत्तादौ प्रतिपत्तेः, अन्यथा तदनुमानाप्रवृत्तेः । परिशेषानुमानमेव वा सर्वम्; पूर्ववतोपि धूमात्पावकानुमानस्य प्रसक्ताऽपावकप्रतिषेधात्प्रवृत्तिघटनात्, तदप्रसक्तौ विवादानुपपत्तेरनुमानवैयर्थ्यं स्यात् । सामान्यतो दृष्टस्यापि देशान्तरप्राप्तेरादित्यगत्यनुमानस्य तदगतिमत्त्वस्य प्रसक्तस्य प्रतिषेधादेवोपपत्तेः । सकलं सामान्यतो दृष्टमेव वा; सर्वत्र सामान्येनैव लिङ्गलिङ्गिसम्बन्धस्य प्रतिपत्तेः, विशेषतस्तत्सम्बन्धस्य प्रतिपत्तुमशक्तेः । ततोनुमानं तत्प्रभेदं चेच्छताऽविनाभाव एवैकं हेतोः प्रधानं लक्षणं प्रतिपत्तव्यम् ।

ननु चास्तु प्रधानं लक्षणमविनाभावो हेतोः । तत्स्वरूपं तु निरूप्यतामप्रसिद्धस्वरूपस्य लक्षणत्वायोगादित्याशङ्क्य सहक्रमेत्यादिना तत्स्वरूपं निरूपयति—

१ लिङ्गलिङ्गिसम्बन्धः पूर्वं निश्चीयमानत्वात् पूर्वः सोस्यानुमानस्यास्तीति पूर्ववत् । अग्निमान्पर्वतो धूमवत्त्वान्महानसवदित्युदाहरणम् । २ महानसे । ३ पर्वते । ४ शेषः परिशिष्यमाणोर्थः सोस्यास्तीति शेषवत् । अत्रोदाहरणं शब्दः क्वचिदाश्रितो गुणत्वाद्रूपवदिति । ५ उद्धरितार्थस्याकाशादेः । ६ अनुमानम् । ७ साध्यसाधनं नास्तीति चेत् । ८ हेतूनाम् । ९ देवदत्ते गतिमत्त्वदेशाद्देशान्तरप्राप्त्योः साध्यसाधनयोर्विशेषेण सामान्येन प्रतिपत्तिः । १० पूर्ववच्छेषवत्सामान्यतोदृष्टलक्षणानाम् । ११ ऊहलक्षणात् । १२ क्वचिदनाश्रितत्वस्य । १३ घटस्य । १४ क्वचिदाश्रितत्वस्य । १५ आकाशस्य । १६ क्वचिदाश्रितत्वस्य । १७ रूपादौ । १८ शब्दे क्वचिदाश्रितत्वस्य । १९ गुणवत्त्वस्य । २० देशाद्देशान्तरप्राप्तेर्गतिमत्त्वाविनाभाविन्या देवदत्ते प्रतिपत्तिर्नास्तीति चेत् । २१ आदित्यगतिमत्त्वस्य । २२ पूर्ववच्छेषवदित्यनुमानद्वयम् । २३ अनुमाने । २४ यौगेन भवता ।

सहक्रमभावनियमोऽविनाभावः ॥ १६ ॥

सहभावनियमः क्रमभावनियमश्चाविनाभावः प्रतिपत्तव्यः। कयोः पुनः सहभावः कयोश्च क्रमभावो यन्नियमोऽविनाभावः स्यादित्याह—

सहचारिणोः व्याप्यव्यापकयोश्च सहभावः ॥१७॥ ५

पूर्वोत्तरचारिणोः कार्यकारणयोश्च क्रमभावः ॥१८॥

सहचारिणो रूपरसादिलक्षणयोर्व्याप्यव्यापकयोश्च शिंशपात्ववृक्षत्वादिस्वभावयोः सहभावः प्रतिपत्तव्यः। पूर्वोत्तरचारिणोः कृत्तिकाशकटोदयादिस्वरूपयोः कार्यकारणयोश्चाग्निधूमादिस्वरूपयोः क्रमभाव इति। १०

कुतोऽसौ प्रोक्तप्रकारोऽविनाभावो निर्णीयते इत्याह—

तर्कात्तन्निर्णयः ॥ १९ ॥

न पुनः प्रत्यक्षादेरित्युक्तं तर्कप्रामाण्यप्रसाधनप्रस्तावे।

ननु साधनात्साध्यविज्ञानमनुमानमित्युक्तम्। तत्र किं साध्यमित्याह— १५

इष्टमबाधितमसिद्धं साध्यम् ॥ २० ॥

संशयादिव्यवच्छेदेन हि प्रतिपन्नमर्थस्वरूपं सिद्धमुच्यते, तद्विपरीतमसिद्धम्। तच्च—

सन्दिग्धविपर्यस्ताव्युत्पन्नानां साध्यत्वं यथा स्यादित्यसिद्धपदम् ॥ २१ ॥ २०

किमयं स्थाणुः पुरुषो वेति चलितप्रतिपत्तिविषयभूतो ह्यर्थः सन्दिग्धोऽभिधीयते। शुक्तिकाशकले रजताध्यवसायलक्षणविपर्यासगोचरस्तु विपर्यस्तः। गृहीतोऽगृहीतोपि वार्थो यथावदनिश्चितस्वरूपोऽव्युत्पन्नः। तथाभूतस्यैवार्थस्य साधने साधनसामर्थ्यात्, न पुनस्तद्विपरीतस्य तत्र तद्वैफल्यात्। २५

इष्टाऽबाधितविशेषणद्वयस्यानिष्टेत्यादिना फलं दर्शयति—

---

१ ताद्भिः (धर्मादिवचनमित्यर्थः)। ययोः। २ तस्य अविनाभावस्य। ३ साध्यत्वेनाभिप्रेतम्। ४ अर्थानाम्। ५ पूर्वम्। ६ सिद्धौ। ७ सूत्रेण।

अनिष्टाध्यक्षादिबाधितयोः साध्यत्वं माभूदितीष्टाबाधितवचनम् ॥ २२ ॥

अनिष्टं हि सर्वथा नित्यत्वं शब्दे जैनस्य । अश्रावणत्वं तु प्रत्यक्षबाधितम् । आदिशब्देनानुमानादिबाधितपक्षपरिग्रहः । ५ तत्रानुमानबाधितः यथा-नित्यः शब्द इति । आगमबाधितः यथा-प्रेत्याऽसुखप्रदो धर्म इति । स्ववचनबाधितः यथा-माता मे बन्ध्येति । लोकबाधितः यथा-शुचि नरशिरःकपालमिति । तयोरनिष्टाध्यक्षादिबाधितयोः साध्यत्वं मा भूदितीष्टाबाधितवचनम् ।

१० ननु यथा शब्दे कथञ्चिदनित्यत्वं जैनस्येष्टं तथा सर्वथाऽनित्यत्वमाकाशगुणत्वं चान्यस्येति तदपि साध्यमनुपज्यते । न च वादिनो यदिष्टं तदेव साध्यमित्यभिधातव्यम्; सामान्याभिधायित्वेनेष्टस्यान्यस्याप्यविशेषात् । इत्याशङ्कापनोदार्थमाह—

न चासिद्धवदिष्टं प्रतिवादिनः ॥ २३ ॥

१५ विशेषणम् । न हि सर्वं सर्वापेक्षया विशेषणं प्रतिनियतत्वाद्विशेषणविशेष्यभावस्य । तत्रासिद्धमिति साध्यविशेषणं प्रतिपाद्यपेक्षया न पुनर्वाद्यपेक्षया, तस्यार्थस्वरूपप्रतिपादकत्वात् । न चाविज्ञातार्थस्वरूपः प्रतिपादको नामातिप्रसङ्गात् । प्रतिवादिनस्तु प्रतिपाद्यत्वात्तस्य चाविज्ञातार्थस्वरूपत्वाविरोधात् तदपेक्षयैवेदं २० विशेषणम् । इष्टमिति तु साध्यविशेषणं वाद्यपेक्षया, वादिनो हि यदिष्टं तदेव साध्यं न सर्वस्य । तदिष्टमप्यध्यक्षाद्यबाधितं साध्यं भवतीति प्रतिपत्तव्यं तत्रैव साधनसामर्थ्यात् ।

तदेव समर्थयमानः प्रत्यायनाय हीत्याद्याह—

प्रत्यायनाय हीच्छा वक्तुरेव ॥ २४ ॥

२५ इच्छया खलु विषयीकृतमिष्टमुच्यते । स्वाभिप्रेतार्थप्रतिपादनाय चेच्छा वक्तुरेव ।

तस्य चोक्तप्रकारस्य साध्यस्य हेतोर्व्याप्तिप्रयोगकालापेक्षया साध्यमित्यादिना भेदं दर्शयति—

१ शब्दः अश्रावणः इत्युक्ते । २ प्रत्यभिज्ञायमानत्वादिति हेतुः । ३ कृतकत्वादिति हेतुना बाध्यः पक्षोऽत्र । ४ पुरुषाश्रितत्वादधर्मवत् । ५ पुरुषसंयोगेऽपि अगर्भत्वात् प्रसिद्धवन्ध्यावत् । ६ प्राण्यङ्गत्वाच्छङ्खशुक्तिवत् । ७ साध्ययोः । ८ वैशेषिकस्य । ९ जैनस्य । १० प्रतिवादिन्यपि । ११ इष्टाऽसिद्धयोर्मध्ये । १२ सम्बन्धिनः ।

साध्यं धर्मः क्वचित्तद्विशिष्टो वा धर्मी ॥ २५ ॥

क्वचिद्व्याप्तिकाले साध्यं धर्मो नित्यत्वादिस्तेनैव हेतोर्व्याप्तिसम्भवात्। प्रयोगकाले तु तेन साध्यधर्मेण विशिष्टो धर्मी साध्यमभिधीयते, प्रतिनियतसाध्यधर्मविशेषणविशिष्टतया हि धर्मिणः साधयितुमिष्टत्वात् साध्यव्यपदेशाविरोधः। ५

अस्यैव पर्यायमाह—

पक्ष इति यावत् ॥ २६ ॥

ननु च कथं धर्मी पक्षो धर्मधर्मिसमुदायस्य तत्त्वात्; तन्न; साध्यधर्मविशेषणविशिष्टतया हि धर्मिणः साधयितुमिष्टस्य पक्षाभिधाने दोषाभावात्। १०

स च पक्षत्वेनाभिप्रेतः—

प्रसिद्धो धर्मी ॥ २७ ॥

तत्प्रसिद्धिश्च क्वचिद्विकल्पतः क्वचित्प्रत्यक्षादितः क्वचिच्चोभयत इति प्रदर्शनार्थम् 'प्रत्यक्षसिद्धस्यैव धर्मित्वम्' इत्येकान्तनिराकरणार्थं च विकल्पसिद्ध इत्याद्याह— १५

विकल्पसिद्धे तस्मिन् सत्तेतरे साध्ये ॥ २८ ॥

अस्ति सर्वज्ञः नास्ति खरविषाणमिति ॥ २९ ॥

विकल्पेन सिद्धे तस्मिन्धर्मिणि सत्तेतरे साध्ये हेतुसामर्थ्यतः। यथा अस्ति सर्वज्ञः सुनिश्चितासम्भवद्बाधकप्रमाणत्वात्, नास्ति खरविषाणं तद्विपर्ययादिति। न खलु सर्वज्ञखरविषाणयोः सदसत्तायां साध्यायां विकल्पादन्यतः सिद्धिरस्ति; तत्रेन्द्रियव्यापाराभावात्। २०

ननु चेन्द्रियप्रतिपन्न एवार्थे मनोविकल्पस्य प्रवृत्तिप्रतीतेः कथं तत्रेन्द्रियव्यापाराभावे विकल्पस्यापि प्रवृत्तिः; इत्यप्यपेशलम्; धर्माधर्मादौ तत्प्रवृत्त्यभावानुषङ्गात्। आगमसामर्थ्यप्रभवत्वेनास्यात्र प्रवृत्तौ प्रकृतेऽप्यतस्तत्प्रवृत्तिरस्तु विशेषाभावात्। २५

१ शब्दस्य। २ इति। ३ पक्ष इति। ४ अनुमाने। ५ निश्चितसंवादः संवादः (अनिश्चितसंवादःसंवादः) शब्दप्रत्ययो विकल्पस्तेन। ६ असत्ता। ७ इन्द्रियव्यापाराभावात्। ८ शब्दगम्यत्वाविशेषात्।

प्रमाणोभयसिद्धे तु साध्यधर्मविशिष्टता ॥ ३० ॥
अग्निमानयं देशः परिणामी शब्द इति यथा ३१

प्रमाणं प्रत्यक्षादिकम्, उभयं प्रमाणविकल्पौ, ताभ्यां सिद्धे पुनर्धर्मिणि साध्यधर्मेण विशिष्टता साध्या। यथाग्निमानयं देशः, ५ परिणामी शब्द इति। देशो हि धर्मित्वेनोपात्तोऽध्यक्षप्रमाणत एव प्रसिद्धः, शब्दस्तूभाभ्याम्। न खलु देशकालान्तरिते ध्वनौ प्रत्यक्षं प्रवर्त्तते, श्रूयमाणमात्र एवास्य प्रवृत्तिप्रतीतेः। विकल्पस्य त्वऽनियतविषयतया तत्र प्रवृत्तिरविरुद्धैव।

ननु चैवं[2] देशस्याप्यग्निमत्त्वे साध्ये कथं प्रत्यक्षसिद्धता? तत्र १० हि दृश्यमानभागस्याग्निमत्त्वसाधने प्रत्यक्षबाधनं साधनवैफल्यं वा, तत्र साध्योपलब्धेः। अदृश्यमानभागस्य तु तत्साधने कुतस्तत्प्रत्यक्षतेति? तदप्यसमीचीनम्; अवयविद्रव्यापेक्षया पर्वतादेः सांव्यवहारिकप्रत्यक्षप्रसिद्धताभिधानात्। अतिसूक्ष्मेक्षिकापर्यालोचने न किञ्चित्प्रत्यक्षं स्यात्, बहिरन्तर्वाऽस्मदादिप्रत्यक्षस्या- १५ शेषविशेषतोऽर्थसाक्षात्करणेऽसमर्थत्वात्, योगिप्रत्यक्षस्यैव तत्र सामर्थ्यात्।

ननु प्रयोगकालवद्व्याप्तिकालेपि तद्विशिष्टस्य धर्मिण एव साध्यव्यपदेशः कुतो न स्यादित्याशङ्क्याह—

व्याप्तौ तु साध्यं धर्म एव ॥ ३२ ॥

२० न पुनस्तद्वान्।

अन्यथा तदघटनात् ॥ ३३ ॥

अनेन हेतोरन्वयासिद्धेः। न खलु यत्र यत्र कृतकत्वादिकं प्रतीयते तत्र तत्रानित्यत्वादिविशिष्टशब्दाद्यन्वयोस्ति।

'ननु प्रसिद्धो धर्मीत्यादिपक्षलक्षणप्रणयनमयुक्तम्; अग्निमानयं २५ इत्याद्यनुमानप्रयोगे पक्षप्रयोगस्यैवासम्भवात् अर्थादापन्नत्वात्तस्य। अर्थादापन्नस्याप्यभिधाने पुनरुक्तत्वप्रसङ्गः-"अर्थादापन्नस्य स्वशब्देनाभिधानं पुनरुक्तम्" [न्यायसू० ५।२।१५] इत्यभिधानात्। तत्प्रयोगेपि च हेत्वादिवचनमन्तरेण साध्याप्रसिद्धे-

१ प्रसिद्धः। २ शब्दस्य केवलप्रत्यक्षतः सिद्ध्यभावप्रकारेण। ३ स्यात्। ४ नाऽवयव(प्रदेश)द्रव्यापेक्षया। ५ असर्वज्ञप्रत्यक्ष। ६ विचार। ७ साध्यधर्मे। ८ बौद्धः। ९ अर्थादापन्नस्य।

स्तद्वचनादेव च तत्प्रसिद्धेर्व्यर्थः पक्षप्रयोगः' इत्याशङ्क्य साध्यधर्माधारेत्यादिना प्रतिविधत्ते—

साध्यधर्माधारसन्देहापनोदाय गम्यमानस्यापि पक्षस्य वचनम् ॥ ३४ ॥

साध्यधर्मोऽस्तित्वादिः, तस्याधार आश्रयः यत्रासौ साध्यधर्मो वर्त्तते, तत्र सन्देहः-किमसौ साध्यधर्मोऽस्तित्वादिः सर्वत्र वर्त्तते सुखादौ वेति, तस्यापनोदाय गम्यमानस्यापि पक्षस्य वचनम् ।

साध्यधर्मिणि साधनधर्मावबोधनाय पक्षधर्मोपसंहारवत् ॥ ३५ ॥

तस्याऽवचनं साध्यसिद्धिप्रतिबन्धकत्वात्, प्रयोजनाभावाद्वा? तत्र प्रथमपक्षोऽयुक्तः; वादिना साध्याविनाभावनियमैकलक्षणेन हेतुना स्वपक्षसिद्धौ साधयितुं प्रस्तुतायां प्रतिज्ञाप्रयोगस्य तत्प्रतिबन्धकत्वाभावात् ततः प्रतिपक्षासिद्धेः । द्वितीयपक्षोऽप्ययुक्तः; तत्प्रयोगे प्रतिपाद्यप्रतिपत्तिविशेषस्य प्रयोजनस्य सद्भावात्, पक्षाऽप्रयोगे तु केषाञ्चिन्मन्दमतीनां प्रकृतार्थाप्रतिपत्तेः । ये तु तत्प्रयोगमन्तरेणापि प्रकृतार्थं प्रतिपद्यन्ते तान्प्रति तदप्रयोगोऽभीष्ट एव । "प्रयोगपरिपाटी तु प्रतिपाद्यानुरोधतः" [[illegible]] इत्यभिधानात् । ततो युक्तो गम्यमानस्याप्यस्य प्रयोगः, कथमन्यथा शास्त्रादावपि प्रतिज्ञाप्रयोगः स्यात्? न हि शास्त्रे नियतकथायां प्रतिज्ञा नाभिधीयते-'अग्निरत्र धूमात्, वृक्षोयं शिंशपात्वात्' इत्याद्यभिधानानां तत्रोपलम्भात् । परानुग्रहप्रवृत्तानां शास्त्रकाराणां प्रतिपाद्यावबोधनाधीनधियां शास्त्रादौ प्रतिज्ञाप्रयोगो युक्तिमानेवोपयोगित्वात्तस्यन्यभिधाने वादेपि सोऽस्तु तत्रापि तेषां तादृशत्वात् ।

अमुमेवार्थं को वेत्यादिना परोपहसनव्याजेन समर्थयते—

को वा त्रिधा हेतुमुक्त्वा समर्थयमानो न पक्षयति? ॥ ३६ ॥

को वा प्रामाणिकः कार्यस्वभावानुपलम्भभेदेन पक्षधर्मत्वादि-

१ व्याप्तिप्रदर्शनद्वारेण । २ सुनिश्चिताऽसम्भवद्बाधकप्रमाणत्वादिति साधनस्य पक्षधर्मत्वेन प्रदर्शनमुपसंहारस्तद्वत् । ३ अस्ति सर्वज्ञ इति । ४ गम्यमानस्य पक्षस्य प्रयोगो न स्यादिति । ५ सुखादिषु । ६ धर्मकीर्त्यादीनाम् । ७ सौगतेन । ८ त्रिधा ।

रूपत्रयभेदेन वा त्रिधा हेतुमुक्त्वाऽसिद्धत्वादिदोषपरिहारद्वारेण समर्थयमानो न पक्षयति ? अपि तु पक्षं करोत्येव । न चाऽसमर्थितो हेतुः साध्यसिद्ध्यङ्गमतिप्रसङ्गात् । ततः पक्षप्रयोगमनिच्छता हेतुमनुक्त्वैव तत्समर्थनं कर्त्तव्यम् । हेतोरवचने कस्य ५समर्थनमिति चेत् ? पक्षस्याप्यनभिधाने क्व हेत्वादिः प्रवर्त्तताम् ? गम्यमाने प्रतिज्ञाविषये एवेति चेत्; गम्यमानस्य हेत्वादेरपि समर्थनमस्तु । गम्यमानस्यापि हेत्वादेर्मन्दमतिप्रतिपत्त्यर्थं वचने तदर्थमेव प्रतिज्ञावचनमप्यस्तु विशेषाभावात् । ततः साध्यप्रतिपत्तिमिच्छता हेतुप्रयोगवत्पक्षप्रयोगोऽप्यभ्युपगन्तव्यः । १० तद्द्वयस्यैवानुमानाङ्गत्वात्, इत्याह—

एतद्द्वयमेवानुमानाङ्गम्, नोदाहरणम् ॥ ३७ ॥

ननु "पक्षहेतुदृष्टान्तोपनयनिगमनान्यवयवाः" [न्यायसू० १।१।३२ (?)] इत्यभिधानाद् दृष्टान्तादेरप्यनुमानाङ्गत्वसम्भवादेतद्द्वयमेवाङ्गमित्ययुक्तमुक्तम् । प्रतिज्ञा ह्यागमः । हेतुरनुमानम्, १५प्रतिज्ञातार्थस्य तेनानुमीयमानत्वात् । उदाहरणं प्रत्यक्षम्, "वादिप्रतिवादिनोर्यत्र बुद्धिसाम्यं तदुदाहरणम्" [ ] इति वचनात् । उपनय उपमानम्, दृष्टान्तधर्मिसाध्यधर्मिणोः सादृश्यात्, "प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम्" [न्यायसू० १।१।६] इत्यभिधानात् । सर्वेषामेकविषयत्वप्रदर्शनफलं निगमनमित्या-२०शङ्क्योदाहरणस्य तावत्तदङ्गत्वं निराकुर्वन्नाह—नोदाहरणम् । अनुमानाङ्गमिति सम्बन्धः ।

तद्धि किं साक्षात्साध्यप्रतिपत्त्यर्थमुपादीयते, हेतोः साध्याविनाभावनिर्णयार्थं वा, व्याप्तिस्मरणार्थं वा प्रकारान्तरासम्भवात् ? तत्राद्यविकल्पोऽयुक्तः—

२५ **न हि तत्साध्यप्रतिपत्त्यङ्गं तत्र यथोक्तहेतोरेव व्यापारात् ॥ ३८ ॥**

१ हेत्वाभासस्यापि साध्यसिद्ध्यङ्गताप्रसङ्गात् । २ न केवलं हेतोः । ३ साध्यं च । ४ साध्यसाधनस्यैव परिहारेण दृष्टान्तस्य समर्थनमादिशब्देन ग्राह्यम् । ५ पक्षत्व । ६ करणे युट् । ७ महानसादि । ८ धूमवत्त्वेन । ९ प्रसिद्धं महानसं तेन साधर्म्यं पर्वतस्य धूमवत्त्वेन । १० धूमवांश्चायम् । ११ धूमवत्त्वशब्दवाच्यत्वं पर्वतस्य साध्यं तस्य साधनं ज्ञानम् । १२ प्रमाणानाम् । १३ अभिलष । १४ अक्रमपरम्परया साध्यप्रतिपत्तिः कथमेवंविधाद्धेतोः साध्यसिद्धिरिति ।

न हि तत् साध्यप्रतिपत्त्यङ्गं तत्र यथोक्तहेतोरेव साध्याविनाभावनियमैकलक्षणस्य व्यापारात्। द्वितीयविकल्पोप्यसम्भाव्यः—

तदविनाभावनिश्चयार्थं वा विपक्षे बाधकादेव तत्सिद्धेः ॥ ३९ ॥

न हि हेतोस्तेन साध्येनाविनाभावस्य निश्चयार्थं वा तदुपादानं ५ युक्तम्; विपक्षे बाधकादेव तत्सिद्धेः। न हि सपक्षे सत्त्वमात्राद्धेतोर्व्याप्तिः सिद्ध्यति, 'स श्यामस्तत्पुत्रत्वादितरतत्पुत्रवत्' इत्यत्र तदाभासेपि तत्सम्भवात्। ननु साकल्येन साध्यनिवृत्तौ साधन निवृत्तेरत्रासम्भवात्परत्र गौरेपि तत्पुत्रे तत्पुत्रत्वस्य भावान्न व्याप्तिः; तर्हि साकल्येन साध्यनिवृत्तौ साधननिवृत्तिनिश्चयरूपा- १० द्वाधकादेव व्याप्तिप्रसिद्धेरलं दृष्टान्तकल्पनया।

व्यक्तिरूपं च निदर्शनं सामान्येन तु व्याप्तिः तत्रापि तद्विप्रतिपत्तावनवस्थानं स्यात् दृष्टान्तान्तरापेक्षणात् ॥ ४० ॥

किञ्च, वादिप्रतिवादिनोर्यत्र बुद्धिसाम्यं स दृष्टान्तो भवति १५ प्रतिनियतव्यक्तिरूपः, यथाऽग्नौ साध्ये महानसादिः। व्यक्तिरूपं च निदर्शनं कथं तदविनाभावनिश्चयार्थं स्यात्? प्रतिनियतव्यक्तौ तन्निश्चयस्य कर्तुमशक्तेः। अनियतदेशकालाकाराधारतया सामान्येन तु व्याप्तिः। कथमन्यथान्यत्र साधनं साध्यं साधयेत्? तत्रापि दृष्टान्तेपि तस्यां व्याप्तौ विप्रतिपत्तौ सत्यां दृष्टान्तान्तरा- २० न्वेषणेऽनवस्थानं स्यात्।

नापि व्याप्तिस्मरणार्थं तथाविधहेतुप्रयोगादेव तत्स्मृतेः ॥ ४१ ॥

नापि व्याप्तिस्मरणार्थं दृष्टान्तोपादानं तथाविधस्य प्रतिपन्नाविनाभावस्य हेतोः प्रयोगादेव तत्स्मृतेः। एवं चाप्रयोजनं २५ तदुदाहरणम्।

---

१ कथात्। २ अविनाभावः। ३ कथात्। ४ पर्वते। ५ साध्यसाधनयोः। ६ प्रतिनियतव्यक्तौ तन्निश्चयस्य कर्तुमशक्तेरित्येतद्भावयति। ७ सामान्येन व्याप्तिर्न स्यादि। ८ दृष्टान्तादन्यत्र।

तत्परमभिधीयमानं साध्यधर्मिणि साध्यसाधने सन्देहयति ॥ ४२ ॥

कुतोऽन्यथोपनयनिगमने ? ॥ ४३ ॥

परं केवलमभिधीयमानं साध्यसाधने साध्यधर्मिणि सन्देह-
५यति सन्देहवती[1] करोति । कुतोऽन्यथोपनयनिगमने[2] ?

मा भूदृष्टान्तस्यानुमानं प्रत्यङ्गत्वमुपनयनिगमनयोस्तु स्यादि-
त्याशङ्कापनोदार्थमाह—

न च ते तदङ्गे साध्यधर्मिणि हेतुसाध्ययोर्वचनादेवाऽसंशयात् ॥ ४४ ॥

१० न च ते तदङ्गे साध्यधर्मिणि हेतुसाध्ययोर्वचनादेव हेतु-
साध्यप्रतिपत्तौ संशयाभावात् । तथापि दृष्टान्तादेरनुमानाव-
यवत्वे हेतुरूपत्वे[3] वा—

समर्थनं वा वरं हेतुरूपमनुमानावयवो-वास्तु साध्ये तदुपयोगात् ॥ ४५ ॥

१५ समर्थनमेव[4] वरं हेतुरूपमनुमानावयवो वास्तु[5] साध्ये तस्यो-
पयोगात् । समर्थनं हि नाम हेतोरसिद्धत्वादिदोषं निराकृत्य
स्वसाध्येनाऽविनाभावसाधनम्[6] । साध्यं प्रति हेतोर्गमकत्वे च
तस्यैवोपयोगो नान्यस्येति ।

ननु व्युत्पन्नप्रज्ञानां साध्यधर्मिणि हेतुसाध्ययोर्वचनादेवा-
२० संशयादर्थप्रतिपत्तेर्दृष्टान्तादिवचनमनर्थकमस्तु । बालानां त्वव्यु-
त्पन्नप्रज्ञानां व्युत्पत्त्यर्थं तन्नानर्थकमित्याह—

बालव्युत्पत्त्यर्थं तत्त्रयोपगमे शास्त्र एवासौ न वादेऽनुपयोगात् ॥ ४६ ॥

बालव्युत्पत्त्यर्थं तत्त्रयोपगमे दृष्टान्तोपनयनिगमनत्रयाभ्युप-

---

१ यदि सन्देहवती न करोति । २ उपनयनिगमनादेश्च । ३ सपक्षे दृष्टान्ते सत्त्वमुपनयश्च हेतुस्वरूपम् । कुतः ? त्रिरूपो हेतुर्यत इति सौगतः । ४ हेतुलक्षणं कीदृशम् ? दृष्टान्तोपनयनिगमनलक्षणत्रिरूपत्वप्रदर्शनस्वरूपम् । ५ हेतुरूपोऽस्तु । कथम् ? हेतोः समर्थनं हेतुरेवेत्यनेन प्रकारेण । ६ विपक्षे साकल्येन बाधकप्रमाणप्रदर्शनं हेतुसमर्थनम् । ७ एतदेव ।

गमे, शास्त्र एवासौ तदभ्युपगमः कर्तव्यः न वादेऽनुपयोगात्। न खलु वादकाले शिष्या व्युत्पाद्यन्ते व्युत्पन्नप्रज्ञानामेव वादेऽधिकारात्। शास्त्रे चोदाहरणादौ व्युत्पन्नप्रज्ञा वादिनो वादकाले ये प्रतिवादिनो यथा प्रतिपद्यन्ते तान् तथैव प्रतिपादयितुं समर्था भवन्ति, प्रयोगपरिपाट्याः प्रतिपाद्यानुरोधतो जिनपतिमतानुसारिभिरभ्युपगमात्। ५

तत्र तद्व्युत्पादनार्थं दृष्टान्तस्य स्वरूपं प्रकारं चोपदर्शयति—

दृष्टान्तो द्वेधाऽन्वयव्यतिरेकभेदात् ॥ ४७ ॥

दृष्टो हि विधिनिषेधरूपतया वादिप्रतिवादिभ्यामविप्रतिपत्त्या प्रतिपन्नोऽन्तः साध्यसाधनधर्मौ यत्रासौ दृष्टान्त इति व्युत्पत्तेः। १०

अथ कोऽन्वयदृष्टान्तः कश्च व्यतिरेकदृष्टान्त इति चेत्—

साध्यव्याप्तं साधनं यत्र प्रदर्श्यते सोन्वयदृष्टान्तः ॥ ४८ ॥

यथाग्नौ साध्ये महानसादिः।

साध्याभावे साधनव्यतिरेको यत्र कथ्यते स व्यतिरेकदृष्टान्तः ॥ ४९ ॥ १५

यथा तस्मिन्नेव साध्ये महाह्रदादिः।

अथ को नाम उपनयो निगमनं वा किमित्याह—

हेतोरुपसंहार उपनयः ॥ ५० ॥

प्रतिज्ञायास्तु निगमनम् ॥ ५१ ॥ २०

प्रतिज्ञायास्तूपसंहारो निगमनम्। उपनयो हि साध्याविनाभावित्वेन विशिष्टे साध्यधर्मिण्युपनीयते येनोपदर्श्यते हेतुः सोभिधीयते। निगमनं तु प्रतिज्ञाहेतूदाहरणोपनयाः साध्यलक्षणैकार्थतया निगम्यन्ते सम्बद्ध्यन्ते येन तदिति।

तच्चानुमानं द्व्यवयवं त्र्यवयवं पञ्चावयवं वा त्रिप्रकारं भवतीति दर्शयन्— २५

---

१ शास्त्रे यदुदाहरणादि तस्मिन्। २ वा। ३ एवं च सति। ४ सामान्यतः स्वरूपं दृष्टान्तेनोक्तं शेषतस्तत्स्वरूपं तु साध्यव्याप्तमित्यादिना दर्शयति। ५ यतः। ६ जैनस्य। ७ मीमांसकस्य। ८ यौगस्य।

तदनुमानं द्वेधा ॥ ५२ ॥

इत्याह ।

कुतस्तद् द्वेधेति चेत्?

स्वार्थपरार्थभेदात् ॥ ५३ ॥

५ तत्र—

स्वार्थमुक्तलक्षणम् ॥ ५४ ॥

स्वार्थमनुमानं साधनात्साध्यविज्ञानमित्युक्तलक्षणम् ।

किं पुनः परार्थानुमानमित्याह परार्थमित्यादि—

परार्थं तु तदर्थपरामर्शिवचनाज्जातम् ॥ ५५ ॥

१० तस्य स्वार्थानुमानस्यार्थः साध्यसाधने तत्परामर्शिवचनाज्जातं यत्साध्यविज्ञानं तत्परार्थानुमानम् ।

ननु वचनात्मकं परार्थानुमानं प्रसिद्धम्, तत्रोक्तप्रकारं साध्यविज्ञानं परार्थानुमानमिति वर्णयता कथं तत्सङ्गृहीतमित्याह—

तद्वचनमपि तद्धेतुत्वात् ॥ ५६ ॥

१५ तद्वचनमपि तदर्थपरामर्शिवचनमपि तद्धेतुत्वात् ज्ञानलक्षणमुख्यानुमानहेतुत्वादुपचारेण परार्थानुमानमुच्यते । उपचारनिमित्तं चास्य प्रतिपादकप्रतिपाद्यापेक्षयानुमानकार्यकारणत्वम् । तत्प्रतिपादकज्ञानलक्षणानुमान(नं)हेतुः कारणं यस्य तद्वचनस्य, तस्य वा प्रतिपाद्यज्ञानलक्षणानुमानस्य हेतुः कारणम्, तद्भाव-
२० स्तद्धेतुत्वम्, तस्मादिति । मुख्यरूपतया तु ज्ञानमेव प्रमाणं परनिरपेक्षतयाऽर्थप्रकाशकत्वादिति प्राक्प्रतिपादितम् ।

यथा चानुमानं द्विप्रकारं तथा हेतुरपि द्विप्रकारो भवतीति दर्शनार्थं स हेतुर्द्वेधेत्याह—

स हेतुर्द्वेधा उपलब्ध्यनुपलब्धिभेदात् इति ॥५७॥

२५ योऽविनाभावलक्षणलक्षितो हेतुः प्राक्प्रतिपादितः स द्वेधा भवति उपलब्ध्यनुपलब्धिभेदात् ।

तत्रोपलब्धिर्विधिसाधिकैवानुपलब्धिश्च प्रतिषेधसाधिकैवेत्यनयोर्विषयनियममुपलब्धिरित्यादिना विघटयति—

---

१ अनेन प्रकारेण । २ तद्योत । ३ परार्थानुमानमुच्यते इति सम्बन्धः । ४ हेतोः । ५ अनेन प्रकारेण ।

उपलब्धिर्विधिप्रतिषेधयोरनुपलब्धिश्च ॥ ५८ ॥

अविनाभावनिमित्तो हि साध्यसाधनयोर्गम्यगमकभावः । यथा चोपलब्धेर्विधौ साध्येऽविनाभावाद्गमकत्वं तथा प्रतिषेधेपि । अनुपलब्धेश्च यथा प्रतिषेधे ततो गमकत्वं तथा विधावपीत्यग्रे स्वयमेवाचार्यो वक्ष्यति । ५

सा चोपलब्धिर्द्विप्रकारा भवत्यविरुद्धोपलब्धिर्विरुद्धोपलब्धिश्चेति—

अविरुद्धोपलब्धिर्विधौ षोढा व्याप्यकार्यकारण-पूर्वोत्तरसहचरभेदात् ॥ ५९ ॥

तत्र साध्येनाविरुद्धस्य व्याप्यादेरुपलब्धिर्विधौ साध्ये षोढा १० भवति व्याप्यकार्यकारणपूर्वोत्तरसहचरभेदात् ।

ननु कार्यकारणभावस्य कुतश्चित्प्रमाणादप्रसिद्धेः कथं कार्यं कारणस्य तद्वा कार्यस्य गमकं स्यादित्यप्यसत्; तावद्विषयपरिच्छेदे सम्बन्धपरीक्षायां कार्यकारणतादिसम्बन्धस्य प्रसाधयिष्यमाणत्वात् । १५

ननु प्रसिद्धेपि कार्यकारणभावे कार्यमेव कारणस्य गमकं तस्यैव तेनाविनाभावात्, न पुनः कारणं कार्यस्य तदभावात्; इत्यसङ्गतम्; कार्याविनाभावितयाऽवधारितस्यानुमानकालप्राप्तस्य छत्रादेर्विशिष्टकारणस्य छायादिकार्यानुमापकत्वेन सुप्रसिद्धत्वात् । न ह्यनुकूलमात्रमन्त्यक्षणप्राप्तं वा कारणं लिङ्गमुच्यते, येन प्रतिबन्धवैकल्यसम्भवाद्व्यभिचारि स्यात्, द्वितीयक्षणे कार्यस्य प्रत्यक्षीकरणादनुमानानर्थक्यं वा । तदेव समर्थयमानो रसादेकसामग्र्यनुमानेनेत्याद्याह—

रसादेकसामग्र्यनुमानेन रूपानुमानमिच्छद्भिरिष्टमेव किञ्चित्कारणं हेतुर्यत्र सामर्थ्याप्रतिबन्धकारणान्तरावैकल्ये ॥ ६० ॥ २५

१ साध्ये । अविनाभावाद्गमकत्वमुपलब्धेः । २ साध्ये । ३ साध्ये । ततो गमकत्वमनुपलब्धेः । ४ स्वभावहेतुरयम् । ५ ज्ञानाद्वैतवादी शून्यवादी वा बौद्धविशेषः प्राह । ६ न केवलमग्रे प्राक्तनं वक्ष्यतीत्यपि । ७ आदिना संयोगादिग्रहणम् । ८ चन्द्रसूर्ययोर्वा । ९ आदिना समुद्रवृद्धिः । १० तन्तुसंयोगरूपं । ११ मन्त्रौषधादिना प्रतिबन्धः । १२ द्वन्द्वः । १३ सहकारिणां क्षित्यादीनां वैकल्यम् ।

आस्वाद्यमानाद्धि रसात्तज्जनिका सामग्र्यनुमीयते । पश्चात्त-दनुमानेन रूपानुमानम् । सजातीयं हि रूपक्षणान्तरं जनयन्नेव प्राक्तनो रूपक्षणो विजातीयरसादिक्षणान्तरोत्पत्तौ प्रभुर्भवेन्नान्यथा । तथा चैकसामग्र्यनुमानेन रूपानुमानमिच्छद्भिरिष्टमेव ५ किञ्चित्कारणं हेतुर्यत्र सामर्थ्याप्रतिबन्धकारणान्तरावैकल्ये भवतः ।

अथ पूर्वोत्तरचारिणोः प्रतिपादितहेतुभ्योऽर्थान्तरत्वसमर्थनार्थमाह—

न च पूर्वोत्तरकालवर्त्तिनोस्तादात्म्यं तदुत्पत्तिर्वा
१० कालव्यवधाने तदनुपलब्धेः ॥ ६१ ॥

प्रयोगः-यद्यत्काले अनन्तरं वा नास्ति न तस्य तेन तादात्म्यं तदुत्पत्तिर्वा यथा भविष्यच्छङ्खचक्रवर्त्तिकाले असतो रावणादेः, नास्ति च शकटोदयादिकाले अनन्तरं वा कृत्तिकोदयादिकमिति । तादात्म्यं हि समसमयस्यैव कृतकत्वानित्यत्वादेः प्रतिपन्नम् । १५ अग्निधूमादेश्चान्योन्यमव्यवहितस्यैव तदुत्पत्तिः, न पुनर्व्यवहितकालस्य अतिप्रसङ्गात् ।

ननु प्रज्ञाकराभिप्रायेण भाविरोहिण्युदयकार्यतया कृत्तिकोदयस्य गमकत्वात्कथं कार्यहेतौ नास्यान्तर्भाव इति चेत्? कथमेवमभूद्भरण्युदयः कृत्तिकोदयादित्यनुमानम्? अथ भरण्यु-२० दयोपि कृत्तिकोदयस्य कारणं तेनायमदोषः; ननु येन स्वभावेन भरण्युदयात्कृत्तिकोदयस्तेनैव यदि शकटोदयात्; तदा भरण्युदयादिवाऽसोपि पश्चादसौ स्यात् । यथा च शकटोदयात्प्राक्तथैव भरण्युदयादपि । यदि चातीतानागतयोरेकत्र कार्ये व्यापारः; तर्ह्यास्वाद्यमानरसस्यातीतो रसो भावि च रूपं हेतुः स्यात् । ततो

१ तस्य सहकारिकारणस्य । २ समर्थः । ३ विशिष्टं नानुकूलादिरूपं कारणम् । ४ मणिमन्त्रादिना । ५ क्षित्युदकादिकस्य । ६ हेत्वोः । ७ साध्यसाधनयोः । ८ तादात्म्यतदुत्पत्ती धर्मिणी कृत्तिकोदयशकटोदययोर्न भवतः शकटोदयकालेऽनन्तरं वा कृत्तिकोदयस्यानुपलब्धेः । ९ तादात्म्यं तदुत्पत्तिर्वा । १० सन्दिग्धानैकान्तिकत्वे सतीदं वाक्यम् । ११ रावणशङ्खचक्रवर्तिनोरतीतानागतयोस्तादात्म्यतदुत्पत्तिप्रसङ्गात् । १२ बौद्धानां मध्ये प्रज्ञाकरबौद्धो नाम भाविकारणवादी कश्चिद्ग्रन्थकारः । १३ पूर्वचरस्य । १४ पूर्वचरस्य कार्यहेतावन्तर्भावप्रकारेण । १५ भूतकारणवादिमतमाश्रित्योच्यते । १६ अनुमानाभावलक्षणः । १७ कृत्तिकोदयः । १८ रोहिणी । १९ कृत्तिकोदयः । २० प्राक् कृत्तिकोदयः स्यात् ।

न वर्त्तमानस्य रूपस्य वातीतस्य वा प्रतीतिः। इत्ययुक्तमुक्तम्-"अतीतैककालानां गतिर्नाऽनागतानाम्" [प्रमाणवा० स्ववृ० १।१३] इति। अथान्यतरत्कार्यमसौ; तर्ह्यन्यतरस्यैवातः प्रतीतिर्भवेत्।

ननु स्वसत्तासमवायात्पूर्वमसन्तोपि मरणादयोऽरिष्टादिकार्यकारिणो दृष्टास्ततोऽनेकान्तो हेतोरित्याशङ्क्य भाव्यतीतयोरित्यादिना प्रतिविधत्ते— ५

भाव्यतीतयोर्मरणजाग्रद्बोधयोरपि नारिष्टोद्बोधौ प्रति हेतुत्वम् ॥ ६२ ॥

तद्व्यापाराश्रितं हि तद्भावभावित्वम् ॥ ६३ ॥

न च पूर्वमेवोत्पन्नमरिष्टं करतलरेखादिकं वा भाविनो मरणस्य १० राज्यादेर्व्यापारमपेक्षते, स्वयमुत्पन्नस्यापरापेक्षायोगात्। अथाभ्योत्पत्तिर्मरणादिनैव क्रियते; न; असतः खरविषाणवत्कर्तृत्वायोगात्। कार्यकालेऽसत्त्वेपि स्वकाले सत्त्वाददोषश्चेत्; ननु किं भाविनो मरणादेः स्वकाले पूर्वं सत्त्वम्, अरिष्टादेर्वा। भाविनः पूर्वं सत्त्वे ततः पश्चादरिष्टादिकमुपजायमानं पाश्चात्यं न पूर्वम्। १५ इत्ययुक्तमुक्तम् 'पूर्वमसन्तोपि मरणादयोऽरिष्टादिकार्यकारिणः' इति। अथान्यभाविमरणाद्यपेक्षयारिष्टादिकं पूर्वमुच्यते; ननु तदपि सत् स्वकाले यदि ततः प्रागेव स्यात्; तर्हि पाश्चात्यमरिष्टादिकं कथं ततः पूर्वमुच्यते? अन्यभाविमरणाद्यपेक्षया चेदनवस्था।

अथ पूर्वमरिष्टादिकं स्वकाले पश्चाद्भाविमरणादिकं स्वकाल- २० नियतं भवेत्; तर्हि निष्पन्नस्य निराकाङ्क्षस्यास्य पश्चादुपजायमानेन मरणादिना कथं करणं कृतस्य करणायोगात्? अन्यथा न कस्यचित्कार्यं कस्यचित्कारणस्य कदाचिदुपरमः स्यात्, पुनःपुनस्तस्यैव करणात्। अथ निष्पन्नस्याप्यनिष्पन्नं किञ्चिद्रूपमस्ति तत्करणात्तत्कारणं कल्प्यते, तत्ततो यद्यभिन्नम्; तदेव तत्तस्य च २५ न करणमित्युक्तम्। भिन्नं चेत्; तदेव तेन क्रियते नारिष्टादिकमित्यायातम्। तत्सम्बन्धिनस्तस्य करणात्तदपि कृतमिति चेत्;

१ अतीतश्चैककश्च अतीतैकौ कालौ येषां रूपादीनाम्। २ साध्यार्थानाम्। ३ शकोदयमरणुदययोर्मध्ये। ४ कारणस्य। ५ आदिना राज्यादयश्च। ६ उत्पातकरतलरेखादि। ७ अरिष्टादिना। ८ कारणस्य। ९ कारणस्य। १० इति चेत्। ११ अरिष्टादिकाले। १२ मरणादेः सकाशात्पूर्वं सत्त्वम्। १३ सकाशात्। १४ द्वितीयविकल्पोयम्। १५ अरिष्टादेः। १६ परेण।

भिन्नयोः कार्यकारणभावाद्वान्यः सम्बन्धः, स्वयं सौगतैस्तथोऽभ्युपगमात्। तत्र चारिष्टादिना तत्क्रियेत, तेन वारिष्टादिकम्? प्रथमपक्षेऽरिष्टादेरेव तन्निष्पन्नं मरणादिकमकिञ्चित्करमेव क्वचिदप्यनुपयोगात्। तेनारिष्टादिकरणे पूर्वनिष्पन्नस्य पश्चादुपजायमानेन तेन किं क्रियत इत्युक्तम्। अथाऽनिष्पन्नं किञ्चिदस्ति; तत्रापि पूर्ववच्चर्चाऽनवस्था च।

ननु यद्यत्र कार्यकारणभावो न स्यात्कथं तर्हि एकदर्शनादन्यानुमानमिति चेत्; 'अविनाभावात्' इति ब्रूमः। तादात्म्यतदुत्पत्तिलक्षणप्रतिबन्धेप्यविनाभावादेव गमकत्वम्। तदभावे वक्तृत्वतत्पुत्रत्वादेस्तादात्म्यतदुत्पत्तिप्रतिबन्धे सत्यपि असर्वज्ञत्वे श्यामत्वे च साध्ये गमकत्वाप्रतीतेः। तदभावेपि चाविनाभावप्रसादात् कृत्तिकोदय-चन्द्रोदय-उद्गीताण्डकपिपीलिकोत्सर्पण-एकाम्रफलोपलभ्यमानमधुररसस्वरूपाणां हेतूनां यथाक्रमं शकटोदय-समानसमयसमुद्रवृद्धि-भाविवृष्टि समसमयसिन्दूरारुण-रूपस्वभावेषु साध्येषु गमकत्वप्रतीतेश्च। तदुक्तम्—

"कार्यकारणभावादिसम्बन्धानां द्वयी गतिः।
नियमानियमाभ्यां स्यादनियमादनङ्गता॥ १॥
सर्वेप्यनियमा ह्येते नानुमोत्पत्तिकारणम्।
नियमात्केवलादेव न किञ्चिन्नानुमीयते॥ २॥" [ ]

ततः शरीरनिर्वर्तकाऽदृष्टादिकारणकलापादरिष्टकरतलरेखादयो निष्पन्नाः भाविनो मरणराज्यादेरनुमापका इति प्रतिपत्तव्यम्।

जाग्रद्बोधस्तु प्रबोधबोधस्य हेतुरित्येतत्प्रागेव प्रतिविहितम्, स्वापाद्यवस्थायामपि ज्ञानस्य प्रसाधितत्वात्। ततो भाव्यतीत-

१ निष्पन्नानिष्पन्नयोः। २ संयोगादिः। ३ अन्यसम्बन्धाभावप्रकारेण। ४ अनिष्पन्नम्। ५ अनिष्पन्नरूपेण। ६ कार्ये। ७ अरिष्टादि। ८ घटन। ९ अन्धकारावस्थायामास्वाद्यमानमाम्रफलं सिन्दूरारुणरूपयुक्तं भवति मधुररसोपेतत्वादनुभुक्ताम्रफलवत्। १० आदिना तादात्म्यसंयोगादि। ११ प्रकारः। १२ अविनाभावाभावात्। १३ अनुमानं प्रति। १४ अनियमादनङ्गतेत्येतदेवाचष्टे सर्वे इत्यादिना। १५ कार्यकारणतादात्म्यादयः। १६ वक्तृत्वतत्पुत्रत्वादीनां हेत्वाभासानां येऽविनाभावरहिताः कार्यकारणादिसम्बन्धास्ते सर्वे अनुमानोत्पत्तिकारणं न भवन्ति। १७ तर्ह्यनुमानोत्पत्तिं प्रति किं कारणमित्युक्ते सत्याह। १८ अविनाभावात्। १९ साध्यम्। २० आदिनास्मादि। २१ योगेन। २२ मोक्षविचारावसरे।

योर्मरणजाग्रद्बोधयोरपि नारिष्टोद्बोधौ प्रति हेतुत्वम्, येनाऽयामनैकान्तिको हेतुः स्यादिति स्थितम्।

यथा च पूर्वोत्तरचारिणोर्न तादात्म्यं तदुत्पत्तिर्वा तथा—

सहचारिणोरपि परस्परपरिहारेणावस्थानात्सहोत्पादाच्च[2] ॥ ६४ ॥ ५

यथोः परस्परपरिहारेणावस्थानं न तयोस्तादात्म्यम् यथा घटपटयोः, परस्परपरिहारेणावस्थानं च सहचारिणोरिति। एककालत्वाच्चानयोर्न तदुत्पत्तिः। ययोरेककालत्वं न तयोस्तदुत्पत्तिः यथा सव्येतरगोविषाणयोः, एककालत्वं च सहचारिणोरिति।

न चास्वाद्यमानाद्रसात्सामग्र्यनुमानं ततो रूपानुमानमनुमितानुमानादित्यभिधातव्यम्; तथा व्यवहाराभावात्। न हि आस्वाद्यमानाद्रसाद् व्यवहारी सामग्रीमनुमिनोति, रससमसमयस्य रूपस्यानेनानुमानात्। व्यवहारेण च प्रमाणचिन्ता भवता प्रतन्यते। "प्रामाण्यं व्यवहारेण" [प्रमाणवा० २।५] इत्यभिधानात्। सामग्रीतो रूपानुमाने च कारणात्कार्यानुमानप्रसङ्गाल्लिङ्गसंख्याव्याघातः स्यात्। १० १५

तानेव व्याप्यादिहेतून् बालव्युत्पत्त्यर्थमुदाहरणद्वारेण स्फुटयति। तत्र व्याप्यो हेतुर्यथा—

परिणामी शब्दः, कृतकत्वात्[10], य एवं स एवं दृष्टः यथा घटः, कृतकश्चायम्, तस्मात्परिणामीति। यस्तु न परिणामी स न कृतकः यथा वन्ध्यास्तनन्धयः, कृतकश्चायम्, तस्मात् परिणामीति ॥६५॥ २०

'दृष्टान्तो द्वेधा अन्वयव्यतिरेकभेदात्' इत्युक्तम्। तत्रान्वयदृष्टान्तं प्रतिपाद्य व्यतिरेकदृष्टान्तं प्रतिपादयन्नाह—यस्तु न परिणामी स न कृतको दृष्टः यथा वन्ध्यास्तनन्धयः, कृतकश्चायम्, तस्मात्परिणामीति। कृतकत्वं हि परिणामित्वेन व्याप्तम्। २५

१ साध्यसाधनयोः। २ तादात्म्यतदुत्पत्त्योरभावः। ३ तादात्म्यं सहचारिणोर्नास्ति परस्परपरिहारेणावस्थानात्। ४ रूपम्। ५ अनुमितायाः सामग्र्याः सकाशादनुमानं रूपस्य। ६ परेण भवता। ७ सौगतेन। ८ भि। ९ तदिदानेव। १० अपेक्षितपरव्यापारः कृतक उच्यते।

पूर्वोत्तराकारपरिहारावाप्तिस्थितिलक्षणपरिणामशून्यस्य सर्वथा नित्यत्वे क्षणिकत्वे वा शब्दस्य कृतकत्वानुपपत्तेर्वक्ष्यमाणत्वात्।

किं पुनः कार्यलिङ्गस्योदाहरणमित्याह—

अस्त्यत्र शरीरे बुद्धिर्व्याहारादेः ॥ ६६ ॥

५ व्याहारो वचनम्। आदिशब्दाद्व्यापाराकारविशेषपरिग्रहः। ननु ताल्वाद्यन्वयव्यतिरेकानुविधायितया शब्दस्योपलम्भात्कथमात्मकार्यत्वं येनातस्तदस्तित्वसिद्धिः स्यात्? न खल्वात्मनि विद्यमानेपि विवक्षावैद्धर्यपरिकरे कफादिदोषकण्ठादिव्यापाराभावे वचनं प्रवर्त्तते; तदप्यसारम्; शब्दोत्पत्तौ ताल्वादिसहायस्यै-
१० वात्मनो व्यापाराभ्युपगमात्। घटाद्युत्पत्तौ चक्रादिसहायस्य कुम्भकारादेर्व्यापारवत्, कथमन्यथा घटादेरप्यात्मकार्यता? कार्यकार्यादेश्च कार्यहेतावेवान्तर्भावः।

कारणलिङ्गं यथा—

अस्त्यत्र छाया छत्रात् ॥ ६७ ॥

१५ कारणकारणादेरत्रैवानुप्रवेशान्नार्थान्तरत्वम्।

पूर्वचरलिङ्गं यथा—

उदेष्यति शकटं कृत्तिकोदयात् ॥ ६८ ॥

पूर्वपूर्वचरादनेनैव सङ्गृहीतम्।

उत्तरचरं लिङ्गं यथा—

२० **उदगाद्भरणिस्तत एव ॥ ६९ ॥**

कृत्तिकोदयादेव। उत्तरोत्तरचरमेतेनैव सङ्गृह्यते।

सहचरं लिङ्गं यथा—

अस्त्यत्र मातुलिङ्गे रूपं रसात् ॥ ७० ॥

संयोगिन एकार्थसमवायिनश्च साध्यसमकालस्यात्रैवान्तर्भावो
२५ द्रष्टव्यः।

---

१ आत्मा। २ मुच्छायतनादि। ३ सहित। ४ सहाय। ५ कण्ठादिव्यवहारभाव एव कारणम्। ६ जैनैः। ७ ताल्वाद्यन्वयव्यतिरेकानुविधायित्वेन ताल्वादेरेव कार्यं शब्द इत्येवं यदि। ८ अभूदत्र शिवकः स्थासात्। ९ महोऽत्रस्थानां कण्ठाक्षेपविक्षेपकारी धूमवदग्निमत्त्वात्। कण्ठादिविक्षेपस्य कारणं धूमस्तस्य च कारणं वह्निरिति। १० उदाहियते। ११ आत्मनोऽत्राऽस्तित्वं विशिष्टशरीरात्। अत्रापि नैयायिकमतानुसरणे कार्यहेतोरेव धूमादेरियं संज्ञा। १२ नैयायिकमतानुसरणे सहचरहेतोरियं संज्ञा। १३ हेतोः।

अथाविरुद्धोपलब्धिमुदाहृत्येदानीं विरुद्धोपलब्धिमुदाहर्तुं विरुद्धेत्याद्याह—

विरुद्धतदुपलब्धिः प्रतिषेधे तथेति ॥ ७१ ॥

प्रतिषेध्येन[1] यद्विरुद्धं तत्सम्बन्धिनां तेषां व्याप्यादीनामुपलब्धिः प्रतिषेधे साध्ये तथाऽविरुद्धोपलब्धिवत् षट्प्रकारा। ५

तानेव षट् प्रकारान् यथेत्यादिना प्रदर्शयति—

(यथा) नास्त्यत्र शीतस्पर्श औष्ण्यात् ॥ ७२ ॥

यथेत्युदाहरणप्रदर्शने। औष्ण्यं हि व्याप्यमग्नेः। स च विरुद्धः शीतस्पर्शेन प्रतिषेध्येनेति।

विरुद्धकार्यं लिङ्गं यथा— १०

नास्त्यत्र शीतस्पर्शो धूमात् ॥ ७३ ॥

विरुद्धकारणं लिङ्गं यथा—

नास्मिन् शरीरिणि सुखमस्ति हृदयशल्यात् ॥७४॥

सुखेन हि प्रतिषेध्येन विरुद्धं दुःखम्। तस्य कारणं हृदयशल्यम। तत्कृतश्चित्तदुपदेशादेः सिद्ध्यन्सुखं प्रतिषेधतीति। १५

विरुद्धपूर्वचरं यथा—

नोदेष्यति मुहूर्त्तान्ते शकटं रेवत्युदयात् ॥ ७५ ॥

शकटोदयविरुद्धो ह्यश्विन्युदयस्तत्पूर्वचरो रेवत्युदय इति।

विरुद्धोत्तरचरं यथा— २०

नोदगाद्भरणिर्मुहूर्त्तात्पूर्वं पुष्योदयात् ॥ ७६ ॥

भरण्युदयविरुद्धो हि पुनर्वसूदयस्तदुत्तरचरः पुष्योदय इति।

विरुद्धसहचरं यथा—

नास्त्यत्र भित्तौ परभागाभावोऽर्वाग्भागात् ॥७७॥

परभागाभावेन हि विरुद्धस्तत्सद्भावस्तत्सहचरोऽर्वाग्भाग २५ इति।

---

१ साध्येन। २ प्रतिषेध्येन।

अथोपलब्धिं व्याख्यायेदानीमनुपलब्धिं व्याचष्टे । सा चानुपलब्धिरुपलब्धिवद्विप्रकारा भवति । अविरुद्धानुपलब्धिर्विरुद्धानुपलब्धिश्चेति । तत्राद्यप्रकारं व्याख्यातुकामोऽविरुद्धेत्याद्याह—

अविरुद्धानुपलब्धिः प्रतिषेधे सप्तधा स्वभावव्यापककार्यकारणपूर्वोत्तरसहचरानुपलम्भभेदादिति ॥ ७८ ॥

प्रतिषेध्येनाविरुद्धस्यानुपलब्धिः प्रतिषेधे साध्ये सप्तधा भवति । स्वभावव्यापककार्यकारणपूर्वोत्तरसहचरानुपलब्धिभेदात् ।

तत्र स्वभावानुपलब्धिर्यथा—

नास्त्यत्र भूतले घट उपलब्धिलक्षणप्राप्तस्यानुपलब्धेः ॥ ७९ ॥

पिशाचादिभिर्व्यभिचारो मा भूदित्युपलब्धिलक्षणप्राप्तस्येति विशेषणम् । कथं पुनर्यो नास्ति स उपलब्धिलक्षणप्राप्तस्तत्प्राप्तत्वे वा कथमसत्त्वमिति चेदुच्यते–आरोप्यैतद्रूपं निषिध्यते सर्वत्रारोपितरूपविषयत्वान्निषेधस्य । यथा 'नायं गौरः' इति । न ह्यत्रैतच्छक्यं वक्तुम् सति गौरत्वे न निषेधो निषेधे वा न गौरत्वमिति । नन्वेवमदृश्यमपि पिशाचादिकं दृश्यरूपतयाऽऽरोप्य प्रतिषेध्यतामिति चेन्न; आरोपयोग्यत्वं हि यस्यास्ति तस्यैवारोपः । यश्चार्थो विद्यमानो नियमेनोपलभ्येत स एवारोपयोग्यः, न तु पिशाचादिः । उपलम्भकारणसाकल्ये हि विद्यमानो घटो नियमेनोपलम्भयोग्यो गम्यते, न पुनः पिशाचादिः । घटस्योपलम्भकारणसाकल्यं चैकज्ञानसंसर्गिणि प्रदेशादावुपलभ्यमाने निश्चीयते । घटप्रदेशयोः खलूपलम्भकारणान्यविशिष्टानीति ।

१ व्याप्य । २ प्रतिषेध्येन घटेनाविरुद्धः कः तत्स्वभावो घटस्वभाव इत्यर्थः । ३ कुतः । ४ प्रकृतस्य घटस्यानुपलब्धित्वेन भूतलम् । ५ कश्चिदपि न निषेध्यस्यारोपितरूपविषयत्वमित्युक्ते आह । ६ वस्तुनि । ७ आरोपितस्य प्रतिषेध्यत्वे । ८ विद्यमानत्वे पिशाचादिरप्युपलभ्येतेत्युक्ते आह । ९ पिशाचादिरप्यारोपयोग्यः कुतो न स्यादित्युक्ते आह । १० प्रत्यक्ष । ११ इन्द्रियालोकादिना । १२ निषेध्यस्य घटस्य कथमुपलम्भकारणसाकल्यं निश्चीयत इत्युक्ते आह । १३ इन्द्रिय । १४ घटेन । १५ घटस्योपलम्भकारणसाकल्यं च न स्यात् एकज्ञानसंसर्गिपदार्थान्तरोपलम्भश्च भविष्यतीत्युक्ते आह । १६ समानानि ।

येऽश्च यद्देशाधेयतया कल्पितो घटः स एव तेनैकज्ञानसंसर्गी, न देशान्तरस्थः। ततश्चैकज्ञानसंसर्गिपदार्थान्तरोपलम्भे योग्यतया सम्भावितस्य घटस्योपलब्धिलक्षणप्राप्तानुपलम्भः सिद्धः।

ननु चैकज्ञानसंसर्गिण्युपलभ्यमाने सत्यपीतरविषयज्ञानोत्पादनशक्तिः सामग्र्याः समस्तीत्यवसातुं न शक्यते, प्रभावक्तो योगिनः पिशाचादेर्वा प्रतिबन्धात्सतोपि घटस्यैकज्ञानसंसर्गिणि प्रदेशादावुपलभ्यमानेप्यनुपलम्भसम्भवात्; तदयुक्तम्; यतः प्रदेशादिनैकज्ञानसंसर्गिण एव घटस्याभावो नान्यस्य। यस्तु पिशाचादिनाऽन्यत्वमापादितः स नैव निषेध्यते। इह चैकज्ञानसंसर्गिभासमानोर्थस्तज्ज्ञानं च पर्युदासवृत्त्या घटस्याऽसत्तानुपलब्धिश्चोच्यते।

ननु चैवं केवलभूतलस्य प्रत्यक्षसिद्धत्वात्तद्रूपो घटाभावोपि सिद्ध एवेति किमनुपलम्भसाध्यम्? सत्यमेवैतत्, तथापि प्रत्यक्षप्रतिपन्नेप्यभावे यो व्यामुह्यति साङ्ख्यादिः सोनुपलम्भं निमित्तीकृत्य प्रतिपाद्यते। अनुपलम्भनिमित्तो हि सत्त्वरजस्तमःप्रभृतिष्वसद्व्यवहारः। स चात्राप्यस्तीति निमित्तप्रदर्शनेन व्यवहारः प्रसाध्यते। दृश्यते हि विशाले गवि सास्नादिमत्त्वात्प्रवर्त्तितगोव्यवहारो मूढमतिर्विशङ्कटे सादृश्यमुत्प्रेक्षमाणोपि न गोव्यवहारं प्रवर्त्तयतीति विशङ्कटे वा प्रवर्त्तितो गोव्यवहारो न विशाले, स निमित्तप्रदर्शनेन गोव्यवहारे प्रवर्त्यते। सास्नादिमत्त्वमात्रनिमित्तको हि गोव्यवहारस्त्वया प्रवर्त्तितपूर्वो न विशालत्वविशङ्कटत्वनिमित्तक इति। तथा महत्यां शिंशपायां प्रवर्त्तितवृक्षव्यवहारो मूढमतिः स्वल्पायां तस्यां तद्व्यवहारमप्रवर्त्तयन्निमित्तोपदर्शनेन प्रवर्त्यते वृक्षोयं शिंशपात्वादिति।

व्यापकानुपलब्धिर्यथा—

१ घटप्रदेशयोर्भिन्नज्ञानग्राह्यत्वादेकज्ञानसंसर्गित्वाभावो भूतलस्येत्युक्ते आह। २ कल्पितस्य घटस्यैकज्ञानसंसर्गित्वं सिद्धं यतः। ३ भूतल। ४ दृश्यत्वेन। ५ प्रदेशे। ६ घट। ७ अतिशयवतो मायाविनः कुतश्चित्। ८ भिन्नज्ञानसंसर्गिणः। ९ अदृश्यत्वम्। १० कुतो न प्रतिषिध्यतेऽत्युक्ते आह। ११ भूतललक्षणः। १२ जैनैः। १३ भूतलसद्भाव एव घटाभाव इत्येवम्। १४ अनेन हेतुना। १५ प्रतिबोध्यते। १६ प्रत्यक्षसिद्धेऽभावे व्यवहारः स्वयमेव स्यात्किमन्यसात्, ततोऽनुपलम्भो व्यर्थ इत्युक्ते आह। १७ सत्त्वे रजो नास्त्यनुपलब्धेरिति। १८ कथं निमित्तप्रदर्शनमित्याह स चात्राप्यस्तीति। १९ अस्मिन्। २० हस्ते। २१ सास्नादिमत्त्वादि निमित्तम्। २२ कथम्। २३ काष्ठादिसहकारिवैकल्याभावतः।

नास्त्यत्र शिंशपा वृक्षाऽनुपलब्धेः ॥ ८० ॥

कार्यानुपलब्धिर्यथा—

नास्त्यत्राऽप्रतिबद्धसामर्थ्योऽग्निर्धूमानुपलब्धेः ८१

नास्त्यत्र धूमोऽनग्नेः ॥ ८२ ॥

५ इति कारणानुपलब्धिः।

न भविष्यति मुहूर्त्तान्ते शकटं कृत्तिकोदया-नुपलब्धेः ॥ ८३ ॥

इति पूर्वचरानुपलब्धिः।

नोदगाद्भरणिर्मुहूर्त्तात्प्राक् तत एव ॥ ८४ ॥

१० कृत्तिकोदयानुपलब्धेरेव। इत्युत्तरचरानुपलब्धिः।

नास्त्यत्र समतुलायामुन्नामो नामानुपलब्धेः ८५

इति सहचरानुपलब्धिः।

अथानुपलब्धिः प्रतिषेधसाधिकैवेति नियमप्रतिषेधार्थं विरुद्ध-त्याद्याह—

१५ **विरुद्धानुपलब्धिः विधौ त्रेधा विरुद्धकार्य-कारणस्वभावानुपलब्धिभेदात् ॥ ८६ ॥**

विधेयेन[1] विरुद्धस्य कार्यादेरनुपलब्धिर्विधौ साध्ये सम्भवन्ती त्रिधा भवति-विरुद्धकार्यकारणस्वभावानुपलब्धिभेदात्।

तत्र विरुद्धकार्यानुपलब्धिर्यथा—

२० **अस्मिन्प्राणिनि व्याधिविशेषोस्ति निरामय-चेष्टानुपलब्धेः ॥ ८७ ॥**

आमयो हि व्याधिः, तेन विरुद्धस्तदभावः, तत्कार्या विशिष्ट-चेष्टा तस्या अनुपलब्धिर्व्याधिविशेषास्तित्वानुमानम्।

विरुद्धकारणानुपलब्धिर्यथा—

२५ **अस्त्यत्र देहिनि दुःखमिष्टसंयोगाभावात् ॥ ८८ ॥**

---

१ नमन। २ साध्येन। ३ परेषामनुपलब्धयः।

दुःखेन हि विरुद्धं सुखम्, तस्य कारणमभीष्टार्थेन संयोगः, तदभावस्तदनुपलब्धिर्दुःखास्तित्वं गमयतीति।

विरुद्धस्वभावानुपलब्धिर्यथा—

अनेकान्तात्मकं वस्त्वेकान्तानुपलब्धेः ॥ ८९ ॥

अनेकान्तेन हि विरुद्धो नित्यैकान्तः क्षणिकैकान्तो वा। तस्य ५ चानुपलब्धिः प्रत्यक्षादिप्रमाणेनाऽस्य ग्रहणाभावात्सुप्रसिद्धा। यथा च प्रत्यक्षादेस्तद्ग्राहकत्वाभावस्तथा विषयविचारप्रस्तावे विचारयिष्यते।

ननु चैतत्साक्षाद्विधौ निषेधे वा परिसङ्ख्यातं साधनमस्तु। यत्तु परम्परया विधेर्निषेधस्य वा साधकं तदुक्तसाधनप्रकारे- १० भ्योऽन्यत्वादुक्तसाधनसङ्ख्याव्याघातकारि छलसाधनान्तरमनुषज्येत। इत्याशङ्क्य परम्परयेत्यादिना प्रतिविधत्ते—

परम्परया संभवत्साधनमत्रैवान्तर्भावनीयम् ॥ ९०

यतः परम्परया सम्भवत्कार्यकार्यादि साधनमत्रैव अन्तर्भावनीयं ततो नोक्तसाधनसङ्ख्याव्याघातः। १५

तत्र विधौ कार्यकार्यं कार्याविरुद्धोपलब्धौ अन्तर्भावनीयम् यथा—

अभूदत्र चक्रे शिवकः स्थासात्।
कार्यकार्यमविरुद्धकार्योपलब्धौ ॥ ९१-९२ ॥

शिवकस्य हि साक्षाच्छत्रकः कार्यं स्थासस्तु परम्परयेति। २०

निषेधे तु कारणविरुद्धकार्यं विरुद्धकार्योपलब्धौ यथाऽन्तर्भाव्यते तद्यथा—

नास्त्यत्र गुहायां मृगक्रीडनं मृगारिशब्दनात्
कारणविरुद्धकार्यं विरुद्धकार्योपलब्धौ
यथेति ॥ ९३ ॥ २५

मृगक्रीडनस्य हि कारणं मृगः। तेन च विरुद्धो मृगारिः। तत्कार्यं च तच्छब्दनमिति।

---

१ एकान्तस्वरूपानुपलब्धेरिति पाठान्तरम्। २ विद्यमानम्। ३ कार्यादिष्वेव। ४ साध्ये। ५ ता। ६ तथा कार्यकार्यं कार्याऽविरुद्धोपलब्धावन्तर्भावनीयमिति सम्बन्धः।

ननु यद्यव्युत्पन्नानां व्युत्पत्त्यर्थं दृष्टान्तादियुक्तो हेतुप्रयोगस्तर्हि व्युत्पन्नानां कथं तत्प्रयोग इत्याह—

व्युत्पन्नप्रयोगस्तु तथोपपत्त्याऽन्यथाऽनुपपत्त्यैव वा ॥ ९४ ॥

५ एतदेवोदाहरणद्वारेण दर्शयति—

अग्निमानयं देशस्तथा धूमवत्त्वोपपत्तेर्धूमवत्त्वान्यथानुपपत्तेर्वा ॥ ९५ ॥

कुतो व्युत्पन्नानां तथोपपत्त्यन्यथाऽनुपपत्तिभ्यां प्रयोगनियम इत्याशङ्क्य हेतुप्रयोगो हीत्याद्याह—

१० **हेतुप्रयोगो हि यथाव्याप्तिग्रहणं विधीयते, सा च तावन्मात्रेण व्युत्पन्नैरवधार्यते इति ॥ ९६ ॥**

यतो हेतोः प्रयोगो व्याप्तिग्रहणानतिक्रमेण विधीयते । सा च व्याप्तिस्तावन्मात्रेण तथोपपत्त्यन्यथानुपपत्तिप्रयोगमात्रेण व्युत्प-
१५ न्नैर्निश्चीयते इति न दृष्टान्तादिप्रयोगेण व्याप्त्यवधारणार्थेन किञ्चित्प्रयोजनम् ।

नापि साध्यसिद्ध्यर्थं तत्प्रयोगः फलवान्—

तावतैव च साध्यसिद्धिः ॥ ९७ ॥

यतस्तावतैव चकार एवकारार्थे निश्चितविपक्षासम्भवहेतु-
२० प्रयोगमात्रेणैव साध्यसिद्धिः ।

तेन पक्षः तदाधारसूचनाय उक्तः ॥ ९८ ॥

तेन पक्षो गम्यमानोपि व्युत्पन्नप्रयोगे तदाधारसूचनाय साध्याधारसूचनायोक्तः । यथा च गम्यमानस्यापि पक्षस्य प्रयोगो नियमेन कर्त्तव्यस्तथा प्रागेव प्रतिपादितम् ।

२५ अथेदानीमवसरप्राप्तस्यागमप्रमाणस्य कारणस्वरूपे प्ररूपयन्नाप्तेत्याद्याह—

१ अग्निमत्त्वे सति । २ अनुमानप्रमाणप्रतिपादनानन्तरम् ।

आप्तवचनादिनिबन्धनमर्थज्ञानमागमः ॥ ९९ ॥

आप्तेन प्रणीतं वचनमाप्तवचनम्। आदिशब्देन हस्तसंज्ञादिपरिग्रहः। तन्निबन्धनं यस्य तत्तथोक्तम्। अनेनाक्षरश्रुतमनक्षरश्रुतं च सङ्गृहीतं भवति। अर्थज्ञानमित्यनेन चान्यापोहज्ञानस्य शब्दसन्दर्भस्य चागमप्रमाणव्यपदेशाभावः। शब्दो हि प्रमाण-५ कारणकार्यत्वादुपचारत एव प्रमाणव्यपदेशमर्हति।

ननु चातीन्द्रियार्थस्य द्रष्टुः कस्यचिदाप्तस्याभावात् तत्राऽपौरुषेयस्यागमस्यैव प्रामाण्यात् कथमाप्तवचननिबन्धनं तद्? इत्यपि मनोरथमात्रम्; अतीन्द्रियार्थद्रष्टुर्भगवतः प्राक्प्रसाधितत्वात्, आगमस्य चाऽपौरुषेयत्वासिद्धेः। तद्धि पदस्य, वाक्यस्य, वर्णानां १० वाऽभ्युपगम्येत प्रकारान्तराऽसम्भवात्? तत्र न तावत्प्रथमद्वितीयविकल्पौ घटेते; तथाहि-वेदपदवाक्यानि पौरुषेयाणि पदवाक्यत्वाद्भारतादिपदवाक्यवत्।

अपौरुषेयत्वप्रसाधकप्रमाणाभावाच्च कथमपौरुषेयत्वं वेदस्योपपन्नम्? न च तत्प्रसाधकप्रमाणाभावोऽसिद्धः; तथाहि-तत्प्र-१५ साधकं प्रमाणं प्रत्यक्षम्, अनुमानम्, अर्थापत्त्यादि वा स्यात्? न तावत्प्रत्यक्षम्; तस्य शब्दस्वरूपमात्रग्रहणे चरितार्थत्वेन पौरुषेयत्वापौरुषेयत्वधर्मग्राहकत्वाभावात्। अनादिसत्त्वस्वरूपं चापौरुषेयत्वं कथमक्षप्रभवप्रत्यक्षपरिच्छेद्यम्? अक्षाणां प्रतिनियतरूपादिविषयतया अनादिकालसम्बन्धाऽभावतस्तत्सम्बन्ध-२०

१ मुखेन संज्ञा। २ अर्थज्ञानमित्येतावत्युच्यमाने प्रत्यक्षादावतिव्याप्तिरत उक्तं वाक्यनिबन्धनमिति। वाक्यनिबन्धनमर्थज्ञानमित्युच्यमानेऽपि यादृच्छिकसंवादिषु विप्रलम्भवाक्यजन्येषु सुप्तोन्मत्तादिवाक्यजन्येषु वा नदीतीरफलसंसर्गादिज्ञानेष्वतिव्याप्तिः अत उक्तमाप्तेति। आप्तवाक्यनिबन्धनज्ञानमित्युच्यमानेऽप्याप्तवाक्यकर्मके (कारणे) श्रावणप्रत्यक्षेऽतिव्याप्तिरत उक्तमर्थेति। अर्थस्तात्पर्यरूढः प्रयोजनारूढ इति यावत्। तात्पर्यमेव वचसीत्यभियुक्तवचनात् वचसां प्रयोजनस्य प्रतिपादकत्वात्। ३ आप्तवचनादि। ४ अर्थज्ञानस्य। ५ आदिपदेन। ६ आप्तशब्दोपादानादपौरुषेयत्वव्यवच्छेदः। ७ अन्यस्मात्पदार्थादन्यस्य पदार्थस्यापोहो निराकरणं तस्य व्यावृत्तिरूपापोहविषय एव शब्दो न स्वार्थविषय इति बौद्धः। ८ अगोः व्यावृत्तिर्गौः। व्यावृत्तिस्तुच्छा अर्थरूपा न भवति। ९ शब्द एवार्थो न बाह्यार्थः। १० ज्ञान। ११ ता। १२ गणधरादिप्रतिपाद्यज्ञानापेक्षया कारणत्वं शब्दस्य (दिव्यध्वनेः)। १३ प्रतिपादकज्ञानस्य (सर्वज्ञज्ञानस्य) हि कार्यं शब्दः। १४ अर्थज्ञानम्। १५ परेण मीमांसकेन। १६ श्रावणप्रत्यक्षम्। १७ बसः। १८ ता।

सत्त्वेनाप्यसम्बन्धात् । सम्बन्धे वा तद्वदनागतकालसम्बद्ध-धर्मादिस्वरूपेणापि सम्बन्धसम्भवान्न धर्मज्ञप्रतिषेधः स्यात् ।

नाप्यनुमानं तत्प्रसाधकम्; तद्धि कर्त्रऽस्मरणहेतुप्रभवम्, वेदाध्ययनशब्दवाच्यत्वलिङ्गजनितं वा स्यात्, कालत्वसाधनस-
५ मुत्थं वा? तत्राद्यपक्षे किमिदं कर्त्तुरस्मरणं नाम-कर्तृस्मरणाभावः, अस्मर्यमाणकर्तृकत्वं वा? प्रथमपक्षे व्यधिकरणाऽसिद्धो हेतुः, कर्तृस्मरणाभावो ह्यात्मन्यपौरुषेयत्वं वेदे वर्त्तते इति ।

द्वितीयपक्षे तु दृष्टान्ताभावः; नित्यं हि वस्तु न स्मर्यमाणकर्तृकं नाप्यस्मर्यमाणकर्तृकं प्रतिपन्नम्, किन्त्वकर्तृकमेव । हेतुश्च व्यर्थ-
१० विशेषणः; सति हि कर्तरि स्मरणमस्मरणं वा स्यान्नासति खर-विषाणवत् । अथाऽकर्तृकत्वमेवात्र विवक्षितम्; तर्हि स्मर्यमाण-ग्रहणं व्यर्थम्, जीर्णकूपप्रासादादिभिर्व्यभिचारश्च । अथ सम्प्र-दायाऽविच्छेदे सत्यऽस्मर्यमाणकर्तृकत्वं हेतुः; तथाप्यनेकान्तः । सन्ति हि प्रयोजनाभावादस्मर्यमाणकर्तृकाणि 'वटे वटे वैश्रवणः'
१५ [ ] इत्याद्यनेकपदवाक्यान्यविच्छिन्नसम्प्रदायानि । न च तेषामपौरुषेयत्वं भवताप्यिष्यते । असिद्धश्चायं हेतुः; पौरा-णिका हि ब्रह्मकर्तृकत्वं स्मरन्ति "वक्त्रेभ्यो वेदास्तस्य विनिः-सृताः" [ ] इति । "प्रतिमन्वन्तरं चैव श्रुतिरन्या विधीयते" [ ] इति चाभिधानात् । "यो वेदांश्च
२० प्रहिणोति" [ ] इत्यादिवेदवाक्येभ्यश्च तत्कर्त्ता स्मर्यते ।

स्मृतिपुराणादिवच्च ऋषिनामाङ्किताः काण्वमाध्यन्दिनतैत्तिरी-यादयः शाखाभेदाः कथमस्मर्यमाणकर्तृकाः? तथाहि-एतास्तत्कृत-

---

१ न केवलमनादिकालेन । २ अनुष्ठेयत्वेन । ३ पुण्य । ४ आदिना पापम् । ५ इति । ६ कर्तृविषयं यत्स्मरणं ज्ञानं तस्याभावः । ७ सर्वज्ञागकर्तृप्रतिषेधः । ८ आकाशवदिति दृष्टान्तः । ९ भिन्नाधिकरणः सन् । १० दृष्टान्ते । ११ व्यर्थ-विशेषणः कथमित्युक्ते आह । १२ खरविषाणे यथा स्मरणमस्मरणं वा नास्ति कर्त्रऽ-भावात् । १३ अनुमाने । १४ वेदे वर्णक्रमः पाठक्रमः उदात्तादिक्रमश्च सम्प्र-दायः । १५ चत्वरे चत्वरे ईश्वरः पर्वते पर्वते रामः सर्वत्र मधुसूदनः । मा ते भवतु सुप्रीता देवी गिरिनिवासिनी । विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा । १६ कथम् । १७ चतुर्भ्यः । १८ ब्रह्मणः । १९ अस्मर्यमाणकर्तृकस्य हेतोरने-कान्तिकत्वासिद्धत्वे ते उद्भाव्य पुनरप्यसिद्धत्वमुद्भावयन्ति । २० एकस्मान्मनोः सका-शादपरो मनुः मन्वन्तरम् । तत्तत्प्रति प्रतिमन्वन्तरम् । २१ वेदः । २२ स्मृतिः । २३ भिन्ना । २४ करोति । २५ प्रसन्नो भवतु इत्यादिरूपाश्च । २६ सन्तानः । २७ गोत्रभेदाः ।

कत्वात्तन्नामभिरङ्किताः, तद्दृष्टत्वात्, तत्प्रकाशितत्वाद्वा? प्रथमपक्षे कथमासामपौरुषेयत्वमस्मर्यमाणकर्तृकत्वं वा? उत्तरपक्षद्वयेपि यदि तावदुत्सन्ना शाखा कण्वादिना दृष्टा प्रकाशिता वा तदा कथं सम्प्रदायाऽविच्छेदोऽतीन्द्रियार्थदर्शिनः प्रतिक्षेपश्च स्यात्? अथानवच्छिन्नैव सा सम्प्रदायेन दृष्टा प्रकाशिता वा; ५
तर्हि यावद्भिरुपाध्यायैः सा दृष्टा प्रकाशिता वा तावतां नामभिस्तस्याः किन्नाङ्कितत्वं स्याद्विशेषाभावात्?

एतेन 'छिन्नमूलं वेदे कर्तृस्मरणं तस्य ह्यनुभवो मूलम्। न चासौ तत्र तद्विषयत्वेन विद्यते' इत्यपि प्रत्युक्तम्। यतोऽध्यक्षेण तदनुभवाभावात् तत्र तच्छिन्नमूलम्, प्रमाणान्तरेण वा? अध्य- १०
क्षेण चेत्; किं भवत्सम्बन्धिना, सर्वसम्बन्धिना वा? यदि भवत्सम्बन्धिना; तर्ह्यागमान्तरेपि कर्तृग्राहकत्वेन भवत्प्रत्यक्षस्याप्रवृत्तेस्तत्कर्तृस्मरणस्य छिन्नमूलत्वेनास्मर्यमाणकर्तृकत्वस्य भावाद् व्यभिचारी हेतुः। अथागमान्तरे कर्तृग्राहकत्वेनास्मत्प्रत्यक्षस्याप्रवृत्तावपि परैः कर्तृसद्भावाभ्युपगमात् ततो व्यावृत्तमस्मर्यमाण- १५
कर्तृकत्वमपौरुषेयत्वेनैव व्याप्यते इति अव्यभिचारः; न; परकीयाभ्युपगमस्याप्रमाणत्वात्, अन्यथा वेदेपि परैः कर्तृसद्भावाभ्युपगमतोऽस्मर्यमाणकर्तृकत्वादित्यसिद्धो हेतुः स्यात्।

अथ वेदे सविगानकर्तृविशेषे विप्रतिपत्तेः कर्तृस्मरणमऽतोऽप्रमाणम् तत्र हि केचिद्धिरण्यगर्भम्, अपरे अष्टकादीन् कर्तॄन् २०
स्मरन्तीति। नन्वेवं कर्तृविशेषे विप्रतिपत्तेस्तद्विशेषस्मरणमेवाप्रमाणं स्यात् न कर्तृमात्रस्मरणम्, अन्यथा कादम्बर्यादीनामपि कर्तृविशेषे विप्रतिपत्तेः कर्तृमात्रस्मरणत्वेनास्मर्यमाणकर्तृकत्वस्य भावात्पुनरप्यनेकान्तः। अथ वेदे कर्तृविशेषे विप्रतिपत्तिवत्कर्तृमात्रेपि विप्रतिपत्तेस्तत्स्मरणमप्यप्रमाणम्, कादम्बर्यादीनां तु २५
कर्तृविशेषे एव विप्रतिपत्तेस्तत्प्रमाणमित्यनैकान्तिकत्वाभावोऽस्मर्यमाणकर्तृकत्वस्य विपक्षे प्रवृत्त्यभावात्। ननु वेदे सौगतादयः कर्तारं स्मरन्ति न मीमांसका इत्येवं कर्तृमात्रे विप्रतिपत्तेर्यदि तदप्रमाणम्; तर्हि तद्वदस्मरणमप्यऽप्रमाणं किन्न स्याद्विप्रतिपत्तेरविशेषात्? तथा चासिद्धो हेतुः। ३०

१ कण्वादि। २ कण्वादि। ३ नष्टा। ४ कर्तृस्मरणमूलका वेदपदवाक्यानीत्याद्यनुमानेऽस्य पुराणस्मृतिवेदवाक्यस्य च प्रवर्तनपरेण ग्रन्थेन। ५ कारणम्। ६ कथम्। ७ ज्ञानादिपिटकत्रये। ८ सौगतैः। ९ व्यावृत्तिम्। १० सविप्रतिपत्तिक। ११ यदि कर्तृविशेषे विप्रतिपत्तिः कर्तृमात्रस्मरणस्याऽप्रामाण्यम्। १२ बाणः शङ्करो वेति। १३ कादम्बर्यादौ।

अथ यद्यनुपलम्भपूर्वकमस्मर्यमाणकर्तृकत्वं हेतुत्वेनोच्येत; तदोक्तप्रकारेणाऽसिद्धानैकान्तिकत्वे स्याताम्, तदभावपूर्वके तु तस्मिंस्तयोरनवकाशः; न; अत्र कर्त्रऽभावग्राहकस्य प्रमाणान्तरस्यैवाऽसम्भवात्। अस्मादेवानुमानात्तदभावसिद्धावन्योन्या-
५ श्रयः-अतो ह्यऽनुमानात्तदभावसिद्धौ तत्पूर्वकमस्मर्यमाणकर्तृकत्वं सिध्यति, तत्सिद्धौ चातोऽनुमानात्तदभावसिद्धिरिति।

ननु वेदे कर्तृसद्भावाभ्युपगमे तत्कर्त्तुः पुरुषस्यावश्यं तदनुष्ठानसमये अनुष्ठातृणामनिश्चितप्रामाण्यानां तत्प्रामाण्यप्रसिद्धये स्मरणं स्यात्। ते ह्यदृष्टफलेषु कर्मस्वेवं निःसंशयाः प्रवर्त्तन्ते। यदि
१० तेषां तद्विषयः सत्यत्वनिश्चयः, सोपि तदुपदेष्टुः स्मरणात्स्यात्। यथा पित्रादिप्रामाण्यवशात्स्वयमदृष्टफलेष्वपि कर्मसु तदुपदेशात्प्रवर्त्तन्ते 'पित्रादिभिरेतैदुपदिष्टं तेनानुष्ठीयते', एवं वैदिकेष्वपि कर्मस्वनुष्ठीयमानेषु कर्त्तुः स्मरणं स्यात्। न चाभियुक्तानामपि वेदार्थानुष्ठातॄणां त्रैवर्णिकानां तत्स्मरणमस्ति। तथा चेदं प्रयोगः-
१५ 'कर्त्तुः स्मरणयोग्यत्वे सत्यस्मर्यमाणकर्तृकत्वादपौरुषेयो वेदः'। तदप्यसम्बद्धम्; आगमान्तरेऽप्यस्य हेतोः सद्भावबाधकप्रमाणाऽसम्भवेन सद्भावसम्भवतः सन्दिग्धविपक्षव्यावृत्तिकत्वेनानैकान्तिकत्वात्।

किञ्च, विपक्षविरुद्धं विशेषणं विपक्षाद्व्यावर्त्तमानं स्वविशेष्य-
२० मादाय निवर्त्तेत। न च पौरुषेयत्वेन सह कर्त्तुःस्मरणयोग्यत्वस्य सहानवस्थानलक्षणः परस्परपरिहारस्थितिलक्षणो वा विरोधः सिद्धः। सिद्धौ वा तत एव साध्यप्रसिद्धेः 'अस्मर्यमाणकर्तृकत्वात्' इति विशेष्योपादानं व्यर्थम्।

१ उक्तप्रकारेण हेतोरसिद्धत्वं प्रतिपादितेऽनुमानबलेन हेतुसिद्धिं करोति परः। २ अनुपलम्भेन हेतुना साधिते अस्मर्यमाणकर्तृकत्वं साधनं तत्र। ३ अनुपलम्भः स्वसम्बन्धी सर्वसम्बन्धी वा स्यात्? परस्यपक्षेऽसिद्धत्वम्। पाश्चात्यपक्षेऽनैकान्तिकत्वम्। ४ वेदः अस्मर्यमाणकर्तृकः अनुपलभ्यमानकर्तृकत्वात् आकाशवत् इत्यनेनानुमानेन हेतुसिद्धिं विदधाति। ५ अनुपलम्भलक्षणस्य हेतोरुभयदोषदुष्टत्वाद्धेत्वन्तरेण प्रकृतहेतुं साधयति। ६ वेदः अस्मर्यमाणकर्तृकः कर्त्रभावादव्योमवत् इत्यनेनानुमानेन साधिते। ७ अस्मर्यमाणकर्तृकत्वादेव। ८ अस्मर्यमाणकर्तृकत्वात्। ९ अस्मर्यमाणकर्तृकत्वात्। १० कुत एतदित्याह। ११ अनिरीक्षितफलेषु। १२ यागेषु। १३ वक्ष्यमाणप्रकारेण। १४ कथं निःसंशयाः प्रवर्त्तन्ते। १५ कर्म। १६ कारणेन। १७ व्याघ्रातानाम्। १८ उक्तप्रकारेण। १९ वक्ष्यमाणरीत्या। २० पिटके। २१ पौरुषेयपिटके। २२ पौरुषेयत्वं विपक्षः। २३ विरोधस्य। २४ अपौरुषेयत्वमिति।

यच्चोक्तम्-तदनुष्ठानसमय इत्यादि; तदागमान्तरेपि समानम्। 'न च' इति चिन्त्यताम्-न चायं नियमः-'अनुष्ठातारोऽभिप्रेतार्थानुष्ठानसमये तत्कर्त्तारमनुस्मृत्यैव प्रवर्त्तन्ते'। न खलु पाणिन्यादिप्रणीतव्याकरणप्रतिपादितशब्दव्यवहारानुष्ठानसमये तदर्थानुष्ठातारोऽवश्यन्तया व्याकरणप्रणेतारं पाणिन्यादिकमनुस्मृत्यैव प्रवर्त्तन्त इति प्रतीतम्। निश्चिततत्समयानां कर्तृस्मरणव्यतिरेकेणाप्याशुतरं भवत्यादिसाधुशब्दोपलम्भात्। तत्र भवत्सम्बन्धिप्रत्यक्षेणानुभवाभावात् तत्र तच्छिन्नमूलम्।

नापि सर्वसम्बन्धिप्रत्यक्षेण; तेन ह्यनुभवाभावोऽसिद्धः। न ह्यर्वाग्दृशां 'सर्वेषां तत्र कर्तृग्राहकत्वेन प्रत्यक्षं न प्रवर्त्तते' इत्यवसातुं शक्यमिति तत्र तत्स्मरणस्य छिन्नमूलत्वासिद्धेरस्मर्यमाणकर्तृकत्वादित्यसिद्धो हेतुः।

अथ प्रमाणान्तरेणानुभवाभावः; तन्न; अनुमानस्य आगमस्य च प्रमाणान्तरस्य तत्र कर्तृसद्भावावेदकस्य प्राक्प्रतिपादितत्वात्।

किञ्च, अस्मर्यमाणकर्तृकत्वं वादिनः, प्रतिवादिनः, सर्वस्य वा स्यात्? वादिनश्चेत्; तदनैकान्तिकं "सा ते भवतु सुप्रीता" [ ] इत्यादौ विद्यमानकर्तृकेप्यस्य सम्भवात्। प्रतिवादिनश्चेत्; तदसिद्धम्; तत्र हि प्रतिवादी स्मरत्येव कर्त्तारम्। एतेन सर्वस्यास्मरणं प्रत्याख्यातम्। सर्वात्मज्ञानविज्ञानरहितो वा कथं सर्वस्य तत्र कर्त्रऽस्मरणमवैति?

किञ्च, अतः स्वातन्त्र्येणापौरुषेयत्वं साध्येत, पौरुषेयत्वसाधनमनुमानं वा बाध्येत? प्राच्यविकल्पे स्वातन्त्र्येणापौरुषेयत्वस्यादः साधनम्, प्रसङ्गो वा? स्वातन्त्र्यपक्षे नाऽतोऽपौरुषेयत्वसिद्धिः पदवाक्यत्वतः पौरुषेयत्वप्रसिद्धेः। अतो न ज्ञायते किमस्मर्यमाणकर्तृत्वादपौरुषेयो वेदः पदवाक्यात्मकत्वात्पौरुषेयो वा? न च सन्देहहेतोः प्रामाण्यम्।

ननु न प्रकृताद्धेतोः सन्देहोत्पत्तिर्येनास्याऽप्रामाण्यम् किन्तु प्रतिहेतुतः, तस्य चैतस्मिन्सत्यऽप्रवृत्तेः कथं संशयोत्पत्तिः?

१ अभिप्रेतार्थप्रतिपादकवाक्य। २ भवतीत्यादि। ३ उच्चारण। ४ अस्य शब्दस्यायमर्थ इति। ५ संकेतानाम्। ६ तस्मात्। ७ असर्वज्ञानाम्। ८ वेदे। ९ वेदे। १० प्रसज्य। ११ वेदे। १२ वेदे। १३ अस्मर्यमाणकर्तृकत्वात्। १४ अस्मर्यमाणकर्तृकत्वादिति। १५ साधनम्। १६ अस्मर्यमाणकर्तृकत्वात्। १७ कारणस्य। १८ अस्मर्यमाणकर्तृत्वस्य। १९ अपौरुषेयत्वलक्षणस्य साध्यसाधकस्य। २० अस्मर्यमाणकर्तृत्वादिति। २१ विप्रतिकूलहेतुतः।

तदयुक्तम्; यथैव हि प्रकृतहेतोः सद्भावे पौरुषेयत्वसाधकहेतोरप्रवृत्तिरभिधीयते तथा पदवाक्यत्वलक्षणहेतुसद्भावे सत्यस्मर्यमाणकर्तृकत्वस्याप्यप्रवृत्तिरस्तु विशेषाभावात्। तन्न स्वतन्त्रसाधनमिदम्।

५ नापि प्रसङ्गसाधनम्; तत्खलु 'पौरुषेयत्वाभ्युपगमे वेदस्य तत्कर्तुः पुरुषस्य स्मरणप्रसङ्गः स्यात्'। इत्यनिष्टापादनस्वभावम्। न च कर्तृस्मरणं परस्यानिष्टम्; स हि पदवाक्यत्वेन हेतुना तत्कर्तुः स्मरणं प्रतीयन् कथं तत्स्मरणस्याऽनिष्टतां ब्रूयात्?

पौरुषेयत्वसाधनानुमानबाधापक्षेऽपि किमनेनास्य स्वरूपं बाध्यते, १० विषयो वा? न तावत्स्वरूपम्; अपौरुषेयत्वानुमानस्याप्यनेन स्वरूपबाधनानुपपत्तेः, तयोस्तुल्यबलत्वेनान्योन्यं विशेषाभावात्। अतुल्यबलत्वे वा किमनुमानबाधया? येनैव दोषेणास्याऽतुल्यबलत्वं तत एवाप्रामाण्यप्रसिद्धेः। विषयबाधाप्यनुपपन्ना; तुल्यबलत्वेन हेत्वोः परस्परविषयप्रतिबन्धे वेदस्योभयधर्मशून्यत्वा- १५ नुपपत्तेः। एकस्य वा स्वविषयसाधकत्वेऽन्यस्यापि तत्प्रसङ्गाद् धर्मद्वयात्मकत्वं स्यात्। अतुल्यबलत्वे तु यत एवातुल्यबलत्वं तत एवाऽप्रामाण्यप्रसिद्धेः किमनुमानबाधयेत्युक्तम्।

एतेन

"वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्।

२० वेदाध्ययनवाच्यत्वादधुनाध्ययनं यथा" [मी० श्लो० अ० ७ श्लो० ३५५] इत्यनेनानुमानेन पौरुषेयत्वप्रसाधकानुमानस्य बाधाः इत्यपि प्रत्याख्यानम्; प्रकृतदोषाणामत्राप्यविशेषात्।

किञ्च, अत्र निर्विशेषणमध्ययनशब्दवाच्यत्वमपौरुषेयत्वं प्रतिपादयेत्, कर्त्रऽस्मरणविशिष्टं वा? निर्विशेषणस्य हेतुत्वे निश्चित- २५ कर्तृकेषु भारतादिष्वपि भावादनैकान्तिकत्वम्।

---

१ प्रकृतहेतौ सति पदवाक्यत्वं हेत्वन्तरं न प्रवर्तते। पदवाक्यत्वे तु सत्यपि प्रकृतो हेतुः वर्तते इति योऽसौ विशेषस्तस्याभावात्। २ वेदः स्मर्यमाणकर्तृकः पौरुषेयत्वाद्भारतवत्। हेतुरूपव्याप्याभ्युपगमेनानिष्टस्य साध्यरूपव्यापकाभ्युपगमस्यापादनं प्रसङ्गः। ३ जैनस्य। ४ जानन्। ५ पदवाक्यत्वलक्षण। ६ पौरुषेयत्वाऽपौरुषेयत्वानुमानयोः। ७ पौरुषेयत्वलक्षणस्य विषयस्य। ८ पदवाक्यत्वाऽस्मर्यमाणकर्तृकत्वलक्षणयोः। ९ अपौरुषेयत्वपौरुषेयत्वलक्षण। १० पौरुषेयत्वाऽपौरुषेयत्वलक्षण। ११ वेदस्य। १२ अस्मर्यमाणकर्तृकत्वानुमानस्यापौरुषेयत्वप्रसाधनानुमानं प्रति बाधकत्वानिराकरणपरेण अन्येन। १३ विशेषणमेतत्।

किञ्च, यथाभूतानां पुरुषाणामध्ययनपूर्वकं दृष्टं तथाभूतानामेवाध्ययनशब्दवाच्यत्वमध्ययनपूर्वकत्वं साधयति, अन्यथाभूतानां वा? यदि तथाभूतानां तदा सिद्धसाधनम्। अथान्यथाभूतानां तर्हि सन्निवेशादिवदऽप्रयोजको हेतुः। अथ तथाभूतानामेव तत्तथा ततः साध्यते, न च सिद्धसाधनं सर्वपुरुषाणामतीन्द्रियार्थदर्शनशक्तिवैकल्येनातीन्द्रियार्थप्रतिपादकप्रेरणाप्रणेतृत्वासामर्थ्येनेदृशत्वात्। तदप्यसाम्प्रतम्; यतो यदि प्रेरणायास्तथाभूतार्थप्रतिपादने अप्रामाण्याभावः सिद्धः स्यात् स्यादेतत्-यावता गुणवद्वक्त्रऽभावे तद्गुणैरनिराकृतैर्दोषैरपोहितत्वात् तत्र सापवादं प्रामाण्यम्, तथाभूतां प्रेरणामतीन्द्रियार्थदर्शनशक्तिविरहिणोपि कर्तुं समर्था इति कुतस्तथाभूतप्रेरणाप्रणेतृत्वासामर्थ्येनाऽशेषपुरुषाणामीदृशत्वसिद्धिर्यतः सिद्धसाधनं न स्यात्?

अथ न गुणवद्वक्तृकत्वेनैव शब्देऽप्रामाण्यनिवृत्तिरपौरुषेयत्वेनाप्यस्याः सम्भवात् तेनायमदोषः। तदुक्तम्—

"शब्दे दोषोद्भवस्तावद्वक्त्रधीन इति स्थितम्।
तदभावः क्वचित्तावद्गुणवद्वक्तृकत्वतः ॥ १ ॥
तद्गुणैरपकृष्टानां शब्दे सङ्क्रान्त्यऽसम्भवात्।
यद्वा वक्तुरभावेन न स्युर्दोषा निराश्रयाः ॥ २ ॥"
[मी० श्लो० सू० २ श्लो० ६२-६३]

इति। तदप्यसमीचीनम्; यतोऽपौरुषेयत्वमस्याः किमन्यतः प्रमाणात्प्रतिपन्नम्, अत एव वा? यद्यन्यतः; तदाऽस्य वैयर्थ्यम्। अत एव चेत्; नन्वतोऽनुमानादपौरुषेयत्वसिद्धौ प्रेरणायामप्रा-

१ अधुनातनमनुष्याणाम्। २ अतीतैरपि तथाभूतानां गुर्वध्ययनपूर्वकत्वं प्रतिपाद्यते। ३ अतीन्द्रियार्थदर्शिनाम्। ४ आदिना कार्यत्वादिवत्। ५ अकिञ्चित्करो हेतुस्तेषां गुर्वध्ययनपूर्वकत्वं नास्ति यतः। ६ सपक्षव्यापकपक्षव्यावृत्तो ह्युपाध्याहितसम्बन्धो हेतुरप्रयोजकः। ७ जैनानां तु मते सर्वपुरुषाणामतीन्द्रियार्थदर्शने शक्तिवैकल्यं नास्ति केषाञ्चिदतीन्द्रियार्थदर्शनशक्तिरस्तीति भावः। ८ अग्निष्टोमेन यजेतेति लिङादिश्रवणानन्तरं शब्दो मां प्रेरयतीति दर्शनात् प्रेरणान्वितत्तया कृतिः (यागः) प्रतीयते। सा च प्रेरणा वेद इत्यर्थः। ९ तर्हि। १० न कुतोपि। ११ येन कारणेन। १२ प्रामाण्यनिराकृतत्वात्। १३ सदोषम्। १४ अप्रामाण्यभूतानाम्। १५ सङ्क्रमः। १६ न तु स्वभावतः। १७ अपौरुषेयवेदवाक्यानन्तरोत्पन्नेषु स्मृतिवाक्येषु। १८ एतदेव समर्थयत्यग्रे। १९ अपौरुषेयवेदे। २० निराकृतानाम्। २१ असंबन्धादयः। २२ आश्रयः पुरुषः। २३ वेदाध्ययनवाच्यत्वादिति। २४ वेदाध्ययनवाच्यत्वस्य। २५ वेदाध्ययनवाच्यत्वात्। २६ वेदाध्ययनवाच्यत्वात्।

माण्याभावः स्यात्, तदभावाच्च तथाभूतप्रेरणाप्रणेतृत्वासामर्थ्येन सर्वपुरुषाणामीदृशत्वसिद्धिरित(रितीत)रेतराश्रयः । तन्न निर्विशेषणोयं हेतुः प्रकृतसाध्यसाधनः ।

अथ सविशेषणः; तदा विशेषणस्यैव केवलस्य गमकत्वाद्विशे-
५ष्योपादानमनर्थकम् । भवतु विशेषणस्यैव गमकत्वम् का नो हानिः, सर्वथाऽपौरुषेयत्वसिद्ध्या प्रयोजनात्; तदप्ययुक्तम्; यतः कर्त्रऽस्मरणं विशेषणं किमभावाख्यं प्रमाणम्, अर्थापत्तिः, अनुमानं वा? तत्राद्यः पक्षो न युक्तः; अभावप्रमाणस्य स्वरूपसामग्रीविषयाऽनुपपत्तितः प्रामाण्यस्यैव प्रतिषिद्धत्वात् ।

१० किञ्च, सदुपलम्भकप्रमाणपञ्चकनिवृत्तिनिबन्धनास्य प्रवृत्तिः "प्रमाणपञ्चकं यत्र" [मी० श्लो० अभाव० श्लो० १] इत्याद्यभिधानात् । न च प्रमाणपञ्चकस्य वेदे पुरुषसद्भावावेदकस्य निवृत्तिः, पदवाक्यत्वलक्षणस्य पौरुषेयत्वप्रसाधकत्वेनानुमानस्य प्रतिपादनात् । न चास्याऽप्रामाण्यमभिधातुं शक्यम्; यतोऽ-
१५स्याऽप्रामाण्यम्-किमनेन बाधितत्वात्, साध्याविनाभावित्वाभावाद्वा स्यात्? तत्राद्यपक्षे चक्रकप्रसङ्गः; तथाहि-न यावदभावप्रमाणप्रवृत्तिर्न तावत्प्रस्तुतानुमानबाधा, यावच्च न तस्य बाधा न तावत्सदुपलम्भकप्रमाणनिवृत्तिः, यावच्च न तस्य निवृत्तिर्न तावत्तन्निबन्धनाऽभावाख्यप्रमाणप्रवृत्तिः, तदप्रवृत्तौ च नानु-
२०मानबाधेति । द्वितीयपक्षस्त्वयुक्तः; स्वसाध्याविनाभावित्वस्यात्र सम्भवात् । न खलु पदवाक्यात्मकत्वं पौरुषेयत्वमन्तरेण क्वचिद्दृष्टं येनास्य स्वसाध्याविनाभावाभावः स्यात् ।

एतेन कर्तुरस्मरणमन्यथानुपपद्यमानं कर्त्रऽभावनिश्चायकमर्थापत्तिगम्यमपौरुषेयत्वं वेदानामित्यपास्तम्; अन्यथानुपपद्यमान-
२५त्वासम्भवस्यात्र प्रागेव प्रतिपादितत्वात् । कर्त्रऽस्मरणमनुमानरूपमऽपौरुषेयत्वं प्रसाधयतीत्यप्यनुपपन्नम्; प्रागेव कृतोत्तरत्वात् ।

एतेन—

"अतीतानागतौ कालौ वेदकारविवर्जितौ ।
कालत्वात्तद्यथा कालो वर्त्तमानः समीक्ष्यते ॥ १ ॥"[ ]

१ अप्रामाण्याभावात् । २ अनुमानबाधेति । ३ कथम्? । ४ च । ५ अभावप्रमाणप्रवृत्तौ प्रस्तुतानुमानबाधा तस्यां सदुपलम्भकप्रमाणनिवृत्तिस्तस्यां च पदवाक्यत्वस्य स्वसाध्याविनाभावित्वमिति समर्थनपरेण ग्रन्थेन । ६ अपौरुषेयत्वं विना । ७ वेदोऽपौरुषेयः कर्त्रऽस्मरणान्यथानुपपत्तेः । ८ कर्त्रस्मरणादित्यत्र । ९ पिटकादौ । १० वटे वटे वैश्रवण इत्यादिनाऽनैकान्तिकसमर्थनेन ।

इत्यपि प्रत्युक्तम्; प्राक्तनानुमानद्वयोक्ताशेषदोषाणामत्राप्य-
विशेषात्। आगमान्तरेप्यस्य तुल्यत्वाच्च।

किञ्च, इदानीं यथाभूतो वेदाकरणसमर्थपुरुषयुक्तस्तत्कर्तृ-
पुरुषरहितो वा कालः प्रतीतोऽतीतोऽनागतो वा तथाभूतः
कालत्वात्साध्येत, अन्यथाभूतो वा? यदि तथाभूतः; तदा सिद्ध- ५
साध्यता। अथान्यथाभूतः; तदा सन्निवेशादिवदप्रयोजको हेतुः।
अथ तथाभूतस्यैवातीतस्यानागतस्य वा कालस्य तद्रहितत्वं
साध्यते, न च सिद्धसाध्यताऽन्यथाभूतस्य कालस्यासम्भवात्।
नन्वन्यथाभूतः कालो नास्तीत्येतत्कुतः प्रमाणात्प्रतिपन्नम्? यद्य-
न्यतः; तर्हि तत एवापौरुषेयत्वसिद्धेः किमनेन? अत एवेति १०
चेत्; ननु 'अन्यथाभूतकालाभावसिद्धावतोऽनुमानात्तद्रहितत्व-
सिद्धिः, तत्सिद्धेश्चान्यथाभूतकालाभावसिद्धिः' इत्यन्योन्याश्रयः।

नाप्यागमतोऽपौरुषेयत्वसिद्धिः; इतरेतराश्रयानुषङ्गात्। तथा-
हि- आगमस्याऽपौरुषेयत्वसिद्धावप्रामाण्याभावसिद्धिः, तत्सिद्धे-
श्चातोऽपौरुषेयत्वसिद्धिरिति। न चाऽपौरुषेयत्वसिद्धिरिति। न १५
चाऽपौरुषेयत्वप्रतिपादकं वेदवाक्यमस्ति। नापि विधिवाक्यादऽ-
परस्य परैः प्रामाण्यमिष्यते, अन्यथा पौरुषेयत्वमेव स्यात्तत्प्रति-
पादकानां "हिरण्यगर्भः समवर्तताग्रे" [ऋग्वेद अष्ट० ८ मं० १०
सू० १२१] इत्यादिप्रचुरतरवेदवाक्यानां श्रवणात्।

अपौरुषेयत्वधर्माधारतया प्रमाणप्रसिद्धस्य कस्यचित्पदवाक्या- २०
देरसम्भवान्न तत्सादृश्येनोपमानादप्यपौरुषेयत्वसिद्धिः।

नाप्यर्थापत्तेः; अपौरुषेयत्वव्यतिरेकेणानुपपद्यमानस्यार्थस्य
कस्यचिदप्यभावात्। स ह्यप्रामाण्याभावलक्षणो वा स्यात्, अती-
न्द्रियार्थप्रतिपादनस्वभावो वा, परार्थशब्दोच्चारणरूपो वा? न
तावदाद्यः पक्षः; अप्रामाण्याभावस्यागमान्तरेपि तुल्यत्वात्। न २५
चासौ तत्र मिथ्या; वेदेपि तन्मिथ्यात्वप्रसङ्गात्। अथागमान्तरे
पुरुषस्य कर्तुरभ्युपगमात्, पुरुषाणां तु रागादिदोषदुष्टत्वेन तज्ज-
नितस्याऽप्रामाण्यस्यात्र सम्भवात्तत्रासौ मिथ्या, न वेदे तत्रा-
प्रामाण्योत्पादकदोषाश्रयस्य कर्तुरभावात्। नन्वत्र कुतः कर्तुर-
भावो निश्चितः? अन्यतः, अत एव वा? यद्यन्यतः; तदेवोच्यताम्, ३०

१ कालत्वादिलिङ्गेनानुमानेन पौरुषेयत्वसाधकानुमानस्य स्वरूपं बाध्येत विषयो वेत्यादिप्रकारेण। २ वेद। ३ साधनात्। ४ तेन वेदकर्त्रा। ५ वेदकर्त्रा। ६ अस्तु वा वेदवाक्यमपौरुषेयत्वप्रतिपादकं तथापि। ७ प्रतिषेधवाक्यादेः। ८ मीमांसकैः। ९ अपरस्य प्रामाण्यं यदीष्यते। १० जातः। ११ आदौ। १२ प्रमाणात्।

किमर्थापत्त्या? अर्थापत्तेश्चेत्; नः इतरेतराश्रयानुषङ्गात्–अर्थापत्तितो हि पुरुषाभावसिद्धावप्रामाण्याभावसिद्धिः, तत्सिद्धौ चार्थापत्तितः पुरुषाभावसिद्धिरिति।

द्वितीयपक्षोप्ययुक्तः; अतीन्द्रियार्थप्रतिपादनलक्षणार्थस्यागमा-५न्तरेपि सम्भवात्।

परार्थशब्दोच्चारणान्यथानुपपत्तेर्नित्यो वेदः; इत्यप्यसमीचीनम्; धूमादिवत्सादृश्यादप्यर्थप्रतिपत्तेः प्रतिपादयिष्यमाणत्वात्।

किञ्च, अपौरुषेयत्वं प्रसज्यप्रतिषेधरूपं वेदस्याभ्युपगम्यते, पर्युदासस्वभावं वा? प्रथमपक्षे तत्किं सदुपलम्भकप्रमाणग्राह्यम्, १० उताऽभावप्रमाणपरिच्छेद्यम्? तत्राद्यः पक्षोऽयुक्तः; सदुपलम्भकप्रमाणपञ्चकस्यापौरुषेयग्राहकत्वप्रतिषेधात्। तद्ग्राह्यस्य तुच्छस्वभावाभावरूपत्वानुपपत्तेश्च। प्रतिक्षिप्तश्च तुच्छस्वभावाभावः प्राक्प्रबन्धेन। द्वितीयपक्षस्तु श्रद्धामात्रगम्यः; अभावप्रमाणस्याऽसम्भवतस्तेन तद्ग्रहणानुपपत्तेः। तदसम्भवश्च तत्सामग्री- १५ स्वरूपयोः प्राक्प्रबन्धेन प्रतिषिद्धत्वात्सिद्धः।

अथ पर्युदासरूपं तदभ्युपगम्यते। तत्रापि किं पौरुषेयत्वादन्यत्पर्युदासवृत्त्याऽपौरुषेयत्वशब्दाभिधेयं स्यात्? तत्सत्त्वमिति चेत्; तत्किं निर्विशेषणम्, अनादिविशेषणविशिष्टं वा? प्रथमपक्षे सिद्धसाध्यता; ततोऽन्यस्य वेदसत्त्वमात्रस्याध्यक्षादिप्रमाणप्रसि- २० द्धस्यास्माभिरभ्युपगमात्। पौरुषेयत्वं हि कृतकत्वम्, ततश्चान्यत्सत्त्वमित्यत्र को वै विप्रतिपद्यते? द्वितीयपक्षः पुनरविचारितरमणीयः; वेदानादिसत्त्वे प्रत्यक्षादिप्रमाणतः प्रसिद्ध्यसम्भवस्याऽनन्तरमेव प्रतिपादितत्वात्।

अस्तु वाऽपौरुषेयो वेदः; तथाप्यसौ व्याख्यातः, अव्याख्यातो २५ वा स्वार्थे प्रतीतिं कुर्यात्? न तावदव्याख्यातः; अतिप्रसङ्गात्। व्याख्यातश्चेत्; कुतस्तद्व्याख्यानम्-स्वतः, पुरुषाद्वा? न तावत्स्वतः; 'अयमेव मदीयपदवाक्यानामर्थो नायम्' इति स्वयं वेदेनाऽप्रतिपादनात्, अन्यथा व्याख्याभेदो न स्यात्। पुरुषाच्चेत्; कथं तद्व्याख्यानात्पौरुषेयादर्थप्रतिपत्तौ दोषाशङ्का न स्यात्? ३० पुरुषा हि विपरीतमप्यर्थं व्याचक्षाणा दृश्यन्ते। संवादेन प्रामा-

१ इति। २ नित्यत्वादपौरुषेयत्वम्। ३ वेदे। ४ जैनैः। ५ द्विजवरमीमांसानाप्यर्थप्रतीतिं कुर्यात्। ६ वेदस्य जडत्वेन वक्तुमशक्यत्वात्। ७ यदि वेदः प्रतिपादयति। ८ भवनाविधिनियोगादिः। ९ व्याख्यातानाम्। १० व्याख्यातानाम्।

[1]व्याभ्युपगमे च अपौरुषेयत्वकल्पनाऽनर्थिका तद्वद्वेदस्यापि प्रमाणान्तरसंवादादेव प्रामाण्योपपत्तेः । न च व्याख्यानानां संवादोऽस्ति; परस्परविरुद्धभावनानियोगादिव्याख्यानानामन्योन्यं विसंवादोपलम्भात् ।

किञ्च, असौ तद्व्याख्याताऽतीन्द्रियार्थद्रष्टा, तद्विपरीतो वा? ५ प्रथमपक्षे अतीन्द्रियार्थदर्शिनः प्रतिषेधविरोधो धर्मादौ चास्य प्रामाण्योपपत्तेः "धर्मे चोदनैव प्रमाणम्" [　　　　] इत्यवधारणानुपपत्तिश्च ।

अथ तद्विपरीतः; कथं तर्हि तद्व्याख्यानाद्यथार्थप्रतिपत्तिः अयथार्थाभिधानाशङ्कया तदनुपपत्तेः? न च मन्वादीनां सातिशय- १० प्रज्ञत्वात्तद्व्याख्यानाद्यथार्थप्रतिपत्तिः; तेषां सातिशयप्रज्ञत्वासिद्धेः । तेषां हि प्रज्ञातिशयः स्वतः, वेदार्थाभ्यासात्, अदृष्टात्, ब्रह्मणो वा स्यात्? स्वतश्चेत्; सर्वस्य स्याद्विशेषाभावात् । वेदार्थाभ्यासाच्चेत् किं ज्ञातस्य, अज्ञातस्य वा तदर्थस्याभ्यासः स्यात्? न तावदज्ञातस्याऽतिप्रसङ्गात् । ज्ञातस्य चेत्; कुतस्तज्ज्ञप्तिः-स्वतः, १५ अन्यतो वा? स्वतश्चेत्; अन्योन्याश्रयः-सति हि वेदार्थाभ्यासे स्वतस्तत्परिज्ञानम्, तस्मिंश्च तदर्थाभ्यास इति । अन्यतश्चेत्; तस्यापि तत्परिज्ञानमन्यत इत्यतीन्द्रियार्थदर्शिनोऽनभ्युपगमेऽन्धपरम्परातो यथार्थनिर्णयानुपपत्तिः ।

अदृष्टोपि प्रज्ञातिशयाऽसाधकः; तस्यान्मान्तरेपि सम्भवात् । २० न तथाविधोऽदृष्टोऽन्यत्र मन्वादावेवास्य सम्भवादिति चेत्; कुतोऽत्रैवास्य सम्भवः? वेदार्थानुष्ठानविशेषाच्चेत्; स तर्हि वेदार्थस्य ज्ञातस्य, अज्ञातस्य वाऽनुष्ठाता स्यात्? अज्ञातस्य चेत्; अतिप्रसङ्गः । ज्ञातस्य चेत्; परस्पराश्रयः-सिद्धे हि वेदार्थज्ञानातिशये तदर्थानुष्ठानविशेषसिद्धिः, तत्सिद्धौ च तज्ज्ञानाति- २५ शयसिद्धिरिति ।

ब्रह्मणोपि वेदार्थज्ञाने सिद्धे सत्यऽतो मन्वादेस्तदर्थपरिज्ञानातिशयः स्यात् । तच्चास्य कुतः सिद्धम्? धर्मविशेषाच्चेत्; स

---

१ प्रत्यक्षप्रमाणार्थे प्रत्यक्षं संवादकमनुमेयेऽर्थे अनुमानमेव संवादकं परोक्षेऽर्थे पूर्वापराविरोधः संवादः । २ मीमांसकमते । ३ तस्मादतीन्द्रियार्थद्रष्टुः । ४ अतीन्द्रियार्थद्रष्टुर्विपरीतस्य किञ्चिज्ज्ञस्य । ५ गोपालकादीनामपि वेदार्थस्याभ्यासप्रसङ्गात् । ६ पुण्यात् । ७ परस्य तव । ८ भवेत् । ९ प्रज्ञातिशयसाधकः । १० प्रज्ञातिशयसाधकादृष्टस्य । ११ प्रज्ञातिशयसाधकादृष्टस्य । १२ गोपालकादीनामपि वेदार्थानुष्ठानप्रसङ्गः ।

एवेतरेतराश्रयः-वेदार्थपरिज्ञानाभावे हि तत्पूर्वकानुष्ठानजनितधर्मविशेषानुत्पत्तिः, तदनुत्पत्तौ च वेदार्थपरिज्ञानाभाव इति। तन्नातीन्द्रियार्थदर्शिनोऽनभ्युपगमे वेदार्थप्रतिपत्तिर्घटते।

ननु व्याकरणाद्यभ्यासाल्लौकिकपदवाक्यार्थप्रतिपत्तौ तदविशिष्टवैदिकपदवाक्यार्थप्रतिपत्तिरपि प्रसिद्धेरश्रुतकाव्यादिवत्, तन्न वेदार्थप्रतिपत्तावतीन्द्रियार्थदर्शिना किञ्चित्प्रयोजनम्; इत्यप्यसारम्; लौकिकवैदिकपदानामेकत्वेऽप्यनेकार्थत्वव्यवस्थितेः अन्यपरिहारेण व्याचिख्यासितार्थस्य नियमयितुमशक्तेः। न च प्रकरणादिभ्यस्तन्नियमः; तेषामप्यनेकप्रवृत्तेर्द्विसन्धानादिवत्। यदि च लौकिकेनाग्न्यादिशब्देनाविशिष्टत्वाद्वैदिकस्याग्न्यादिशब्दस्यार्थप्रतिपत्तिः; तर्हि पौरुषेयेणाविशिष्टत्वात्पौरुषेयोऽसौ कथं न स्यात्? लौकिकस्य ह्यग्न्यादिशब्दस्यार्थवत्त्वं पौरुषेयत्वेन व्याप्तम्। तत्रायं वैदिकोऽग्न्यादिशब्दः कथं पौरुषेयत्वं परित्यज्य तदर्थमेव ग्रहीतुं शक्नोति? उभयमपि हि गृह्णीयाज्जह्याद्वा।

न च लौकिकवैदिकशब्दयोः शब्दस्वरूपाविशेषे सङ्केतग्रहणसव्यपेक्षत्वेनाऽर्थप्रतिपादकत्वे अनुच्चार्यमाणयोश्च पुरुषेणाऽश्रवणे समाने अन्यो विशेषो विद्यते यतो वैदिका अपौरुषेयाः शब्दा लौकिकास्तु पौरुषेया स्युः। सङ्केत(ता)नतिक्रमेणार्थप्रत्यायनं चोभयोरपि।

न चापौरुषेयत्वे पुरुषेच्छावशादर्थप्रतिपादकत्वं युक्तम्, उपलभ्यन्ते च यत्र पुरुषः सङ्केतिनः शब्दास्तं तमर्थमविगानेन प्रतिपादयन्तः, अन्यथा तत्सङ्केतभेदपरिकल्पनानर्थक्यं स्यात्। ततो ये नररचितवचनरचनाऽविशिष्टास्ते पौरुषेयाः यथाऽभिनवकूपप्रासादादिरचनाऽविशिष्टा जीर्णकूपप्रासादादयः, नररचितवचनाऽविशिष्टं च वैदिकं वचनमिति।

न चात्राश्रयासिद्धो हेतुः; वैदिकानां वचनरचनानां प्रत्यक्षतः प्रतीतेः। नाप्यप्रसिद्धविशेषणः पक्षः; अभिनवकूपप्रासादादौ

१ आदिना निघण्टुः। २ [illegible]। ३ नाटकादौ। ४ अन्यार्थस्य। ५ द्विसन्धानकाव्यवत्। ६ तद्वृत्त्वात्। ७ शब्देन। ८ अग्न्यादिशब्दस्यार्थवत्त्वे पौरुषेयत्वेन व्याप्ते सति। ९ अपौरुषेयत्वपौरुषेयत्वद्वयम्। १० वैदिकानां शब्दानां कश्चन विशेषोऽस्ति ततोऽपौरुषेयत्वमित्याशङ्कायामाह। ११ समानत्वे। १२ अस्य शब्दस्यायमर्थ इति। १३ समाने। १४ समानम्। १५ वेदे। १६ अर्थे। १७ वैदिकं वचनं पक्षः पौरुषेयं भवति नररचितवचनरचनाऽविशिष्टत्वात्। १८ अनुमाने। १९ श्रवणेन। २० स्वमतापेक्षया। २१ साध्यं पौरुषेयत्वम्। २२ सपक्षे।

पुरुषपूर्वकत्वेनास्य साध्यविशेषणस्य सुप्रसिद्धत्वात्। न च हेतोः स्वरूपासिद्धत्वम्; तद्वचनरचनासु विशेषग्राहकप्रमाणाभावेनास्याऽभावात्।

न चाप्रामाण्याभावलक्षणो विशेषस्तत्रेत्यभिधातव्यम्; तस्य विद्यमानस्यापि तन्निराकारकत्वाभावात्। यादृशो हि विशेषः प्रतीयमानः पौरुषेयत्वं निराकरोति तादृशस्यास्याऽभावादऽविशिष्टत्वम् न पुनः सर्वथा विशेषाभावात्, एकान्तेनाऽविशिष्टस्य कस्यचिद्वस्तुनोऽभावात्। अप्रामाण्याभावलक्षणश्च विशेषो दोषवन्तमप्रामाण्यकारणं पुरुषं निराकरोति न गुणवन्तमप्रामाण्यनिवर्त्तकम्। न च गुणवतः पुरुषस्याभावादन्यस्य चानेन विशेषेण निराकृतत्वात्सिद्धमेवापौरुषेयत्वं तत्रेत्यभ्युपगन्तव्यम्; तत्सद्भावस्य प्राक्प्रतिपादितत्वात्। तदभावेऽप्रामाण्याभावलक्षणविशेषाभावप्रसङ्गाच्च।

पौरुषेये प्रासादादौ हेतोर्दर्शनादपौरुषेये चाकाशादावऽदर्शनान्नानैकान्तिकत्वम्। अत एव न विरुद्धत्वम्; पक्षधर्मत्वे हि सति विपक्ष एव वृत्तिर्यस्य स विरुद्धः, न चास्य विपक्षे वृत्तिः। नापि कालात्ययापदिष्टत्वम्; तद्धि हेतोः प्रत्यक्षागमबाधितकर्मनिर्देशानन्तरप्रयुक्तः भवतीष्यते। न च यत्र स्वसाध्याविनाभूतो हेतुर्धर्मिणि प्रवर्त्तमानः स्वसाध्यं प्रसाधयति तत्रैव प्रमाणान्तरं प्रवृत्तिमासादयत्तमेव धर्मं व्यावर्त्तयति; एकस्यैकदैकत्र विधिप्रतिषेधयोर्विरोधात्। प्रकरणसमत्वमपि प्रतिहेतोर्विपरीतधर्मप्रसाधकस्य प्रकरणचिन्ताप्रवर्त्तकस्य तत्रैव धर्मिणि सद्भावोऽभिधीयते। न च स्वसाध्याविनाभूतहेतुप्रसाधितधर्मिणो विपरीतधर्मोपेतत्वं सम्भवतीति न विपरीतधर्माधायिनो हेत्वन्तरस्य तत्र प्रवृत्तिरिति। तन्न वेदपदवाक्ययोर्नित्यत्वं घटते।

१ पौरुषेयत्वस्य। २ [illegible] वैदिकं नेति भेदः। ३ पौरुषेयत्वस्य। ४ वैदिकलौकिकशब्दयोरविशिष्टत्वम्। ५ अविशिष्टत्वात्। ६ सर्वथा वैदिकलौकिकशब्दयोरविशेषाऽभेदो भवत्विति परानुक्ते आह। ७ सर्वप्रकारेण। ८ अभेदरूपस्य। ९ वैदिकलौकिकशब्दयोः [illegible] यतः। १० वेदे। ११ प्रासादादिप्रस्तावे। १२ यथा शब्दो नित्यः कृतकत्वादिति कृतकत्वस्य शब्दधर्मेऽपि नित्यत्वसाध्याद्विपरीतेऽनित्ये विपक्षे वृत्तिमत्त्वाद्विरुद्धः। १३ हेतोः। १४ पक्ष। १५ धर्मिक्रियाविषयस्य कर्मणोऽभिधानम्। १६ प्रत्यक्षागमलक्षणम्। १७ धर्मस्य। १८ प्रतिपक्षसाधकस्य। १९ संशयात्प्रवृत्याऽनिश्चयात्पर्यालोचना। २० सत्प्रतिपक्षो हेतुः प्रकरणसम इति वचनात्। २१ प्रसाधकस्य। २२ विधिप्रतिषेधरूपयोः।

नापि वर्णानां कृतकत्वतः शब्दमात्रस्यानित्यत्वसिद्धौ तेषामप्यनित्यत्वसिद्धौ तेषामप्यनित्यत्वोपपत्तेः। तथाहि-अनित्यः शब्दः कृतकत्वाद् घटवत्। न च कृतकत्वमसिद्धम्; तथाहि-कृतकः शब्दः कारणान्वयव्यतिरेकानुविधायित्वात्तद्वदेव। न चेदमप्य-५सिद्धम्; ताल्वादिकारणव्यापारे सत्येव शब्दस्यात्मलाभप्रतीतेस्तदभावे वाऽप्रतीतेः, चक्रादिव्यापारसद्भावासद्भावयोर्घटस्यात्मलाभालाभप्रतीतिवत्।

ननु शब्दस्याऽनित्यत्वोपगमे ततोर्थप्रतीतिर्न स्यात्, अस्ति चासौ। ततो 'नित्यः शब्दः स्वार्थप्रतिपादकत्वान्यथानुपपत्तेः' इत्य-१०भ्युपगन्तव्यम्। स्वार्थेनावगतसम्बन्धो हि शब्दः स्वार्थं प्रतिपादयति, अन्यथाऽगृहीतसङ्केतस्यापि प्रतिपत्तुस्ततोऽर्थप्रतीतिप्रसङ्गः।

सम्बन्धावगमश्च प्रमाणत्रयसम्पाद्यः; तथाहि-यदैको वृद्धोऽन्यस्मै प्रतिपन्नसङ्केताय प्रतिपादयति 'देवदत्त गामभ्याज शुक्लां दण्डेन' इति, तदा पार्श्वस्थोन्योऽव्युत्पन्नसङ्केतः शब्दार्थौ प्रत्य-१५क्षतः प्रतिपद्यते, श्रोतुश्च तद्विषयक्षणादिचेष्टोपलम्भानुमानतो गवादिविषयां प्रतिपत्तिं प्रतिपद्यते, तत्प्रतिपत्त्यन्यथानुपपत्त्या च तच्छब्दस्यैव तत्र वाचिकां शक्तिं परिकल्पयति पुनः पुनस्तच्छब्दोच्चारणादेव तदर्थस्य प्रतिपत्तेः। सोयं प्रमाणत्रयसम्पाद्यः सम्बन्धावगमो न सकृद्वाक्यप्रयोगात्सम्भवति। न चाऽस्थिरस्य २०पुनः पुनरुच्चारणं घटते, तदभावे नान्वयव्यतिरेकाभ्यां वाचकशक्त्यवगमः, तदसत्त्वाच्च प्रेक्षावद्भिः परावबोधाय वाक्यमुच्चार्येत। न चैवम्। ततः परार्थवाक्योच्चारणान्यथानुपपत्त्या निश्चीयते नित्योसौ।

तदुक्तम्-"दर्शनस्य परार्थत्वान्नित्यः शब्दः" [जैमिनिसू० १।१।८]

२५ अथ मतम्-पुनः पुनरुच्चार्यमाणः शब्दः सादृश्यादेकत्वेन निश्चीयमानोऽर्थप्रतिपत्तिं विदधाति न पुनर्नित्यत्वात्; तदसमी-

१ नित्यत्वमन्तरेण। २ जैनेन त्वया। ३ गृहीत। ४ प्रत्यक्षानुमानार्थापत्तीति। ५ पूर्वं गुरोः सकाशात्। ६ ना। ७ बालकाय। ८ तृतीयः। ९ गुरुसन्निधौ गवानयनसमये। १० गोशब्दं श्रावणप्रत्यक्षेण, गोलक्षणमर्थं नायनप्रत्यक्षेण। ११ यं देवदत्तं प्रति वाक्यं प्रोक्तं तस्य। १२ आदिना ताडनप्रेरणादि। १३ तृतीयः। १४ शिष्यो गोलक्षणार्थं ज्ञानवान् तद्विषयचेष्टावत्त्वान्मद्वत्। १५ गोशब्दो गोलक्षणार्थवाचकशक्तियुक्तो गोप्रतीत्यन्यथानुपपत्तेरिति। १६ गौ इति। १७ अनित्यस्य शब्दस्य। १८ गोशब्दे उच्चारिते गोलक्षणार्थप्रतिपत्तिर्भवति, अनुच्चारिते गोलक्षणार्थप्रतिपत्तिर्न भवतीति। १९ वाचकशक्त्यवगमस्य। २० शब्दः। २१ उच्चारणस्य। २२ घटोयं पुनर्देशकालान्तरे घटोयमिति।

चीनम्; सादृश्येन ततोऽर्थाऽप्रतिपत्तेः। न हि सदृशतया शब्दः प्रतीयमानो वाचकत्वेनाध्यवसीयते किन्त्वेकत्वेन। य एव हि सम्बन्धग्रहणसमये मया प्रतिपन्नः शब्दः स एवायमिति प्रतीतेः।

किञ्च, सादृश्यादर्थप्रतीतौ भ्रान्तः शाब्दः प्रत्ययः स्यात्। न ह्यन्यस्मिन्नगृहीतसङ्केतेऽन्यस्मादर्थप्रत्ययोऽभ्रान्तः, गोशब्दे गृहीतसङ्केतेऽश्वशब्दाद्गवार्थप्रत्ययेऽभ्रान्तत्वप्रसङ्गात्। न च भूयोऽवयवसाम्ययोगस्वरूपं सादृश्यं शब्दे सम्भवति; विशिष्टवर्णात्मकत्वाच्छब्दानां वर्णानां च निरवयवत्वात्। न च गत्वादिविशिष्टानां गादीनां वाचकत्वं युक्तम्; गत्वादिसामान्यस्याऽभावात्, तदभावश्च गादीनां नानात्वायोगात्, सोपि प्रत्यभिज्ञया तेषामेकत्वनिश्चयात्। न चात्र प्रत्यभिज्ञा सामान्यनिबन्धना; भेदनिष्ठस्य सामान्यस्यैव गादिष्वसम्भवात्।

किञ्च, गत्वादीनां वाचकत्वम्, गादिव्यक्तीनां वा? न तावद्गत्वादीनाम्; नित्यस्य वाचकत्वेऽस्मन्मताश्रयणप्रसङ्गात्। नापि गादिव्यक्तीनाम्; तथा हि–गादिव्यक्तिविशेषो वाचकः, व्यक्तिमात्रं वा? न तावद्गादिव्यक्तिविशेषः; तस्यानन्वयात्। नापि व्यक्तिमात्रम्; तद्धि सामान्यान्तःपाति, व्यक्त्यन्तर्भूतं वा? सामान्यान्तःपातित्वे स एवास्मन्मतप्रवेशः। व्यक्त्यन्तर्भूतत्वे तदवस्थोऽनन्वयदोष इति। ततोऽर्थप्रतिपादकत्वान्यथानुपपत्तेर्नित्यः शब्दः। तदुक्तम्—

"अर्थापत्तिरियं चोक्ता पक्षधर्मादिवर्जिता।

१ उत्तरः। २ एकत्वान्नित्यत्वम्। ३ ज्ञानम्। ४ शब्दे। ५ शब्दात्। ६ अन्यस्याऽविशेषात्। ७ अन्यथा। ८ नष्ट मते। ९ गृहीतसङ्केतशब्दस्य नष्टत्वात्। १० वस्तु। ११ सम्बन्ध। १२ सामान्यम्। १३ सादृश्यधर्मैरहितत्वधर्मः, स एव विशेषस्तेनोपलक्षितो वर्णः, स आत्मा स्वरूपं यस्य शब्दस्य। १४ वर्णानां पुद्गलात्मकत्वात् शब्दस्य च वर्णात्मकत्वाच्छब्दे तथाविधं सादृश्यं भविष्यतीत्यारेकायामाह। १५ निरंशत्वात्। अंशाभावे हि केन सादृश्यं स्यात्?। १६ गत्वादिना च। १७ अकारादीनां च। १८ अनेकसमवेतत्वात्सामान्यस्य। १९ स एवायं गकार इति। २० गत्वादि। २१ विशेष। २२ अभेदरूपेषु। २३ गकार एक एवेति गभेदाभावात्। २४ सामान्यरूपाणाम्। २५ अन्यथानुपपत्तिरनिद्देश्युक्ते आह। २६ गोपिण्डस्य। २७ मीमांसक। २८ सङ्केतकाले गृहीतस्य शब्दस्य व्यवहारकाले आगमनाभावात् सङ्केतव्यवहारशब्दयोर्भेदो यतः। २९ सामान्यस्य नित्यत्वात्। ३० विपक्षेऽनित्यत्वे शब्दस्यार्थप्रतिपादकत्वं न घटते यतः। ३१ वाचकसामर्थ्यमित्यर्थः ३२ आदिना सपक्षे सत्त्वम्। ३३ अर्थापत्तौ पक्षधर्मादीनां प्रयोजनं नास्ति यतः।

यदि नाशिनि नित्ये वा विनाशिन्येव वा भवेत् ॥ १ ॥
शब्दे वाचकसामर्थ्यं ततो दूषणमुच्यताम् ।
फलवद्व्यवहाराङ्गभूतार्थप्रत्ययाङ्गता ॥ २ ॥
निष्फलत्वेन शब्दस्य योग्यत्वादवगम्यते ।
५ परीक्षमाणस्तेनास्य युक्त्या नित्यविनाशयोः ॥ ३ ॥
स धर्मोऽभ्युपगन्तव्यो यः प्रधानं न बाधते ।
न ह्यङ्गाऽनुरोधेन प्रधानफलबाधनम् ॥ ४ ॥
युज्यते नाशिपक्षे च तदेकान्तात्प्रसज्यते ।
न ह्यदृष्टार्थसम्बन्धः शब्दो भवति वाचकः ॥ ५ ॥
१० तथा च स्यादपूर्वोऽपि सर्वः सर्वं प्रकाशयेत् ।
सम्बन्धदर्शनं चास्य नाऽनित्यस्योपपद्यते ॥ ६ ॥
सम्बन्धज्ञानसिद्धिश्च ध्रुवं कालान्तरस्थितिः ।
अन्यस्मिन् ज्ञातसम्बन्धे न चान्यो वाचको भवेत् ॥ ७ ॥
गोशब्दे ज्ञातसम्बन्धे नाऽश्वशब्दो हि वाचकः ।"
१५ [मी० श्लो० शब्दनि० श्लो० २३७-२४४] इति ।

अथ विभिन्नदेशादितयोपलभ्यमानत्वाद्गकारादीनां नानात्वाऽनित्यत्वे साध्येते; तन्न; अनेकप्रतिपत्तृभिर्विभिन्नदेशादितयोपलभ्यमानेनादित्येनानेकान्तात् । विभिन्नदेशादितयोपलम्भश्चैषां व्यञ्जकध्वन्यधीनो, न स्वरूपभेदनिबन्धनः । तदुक्तम्—

२० "नित्यत्वं व्यापकत्वं च सर्ववर्णेषु संस्थितम् ।
प्रत्यभिज्ञानतो मानाद्बाधसङ्गमवर्जितात् ॥ १ ॥" [ ]

१ अर्थापत्तिरेवास्तां तथाप्यन्यथासिद्धत्वेनान्यथ नित्यत्वं वा स्यादित्युक्ते आह । २ उभयात्मके । ३ केवलेऽनित्ये । ४ नित्यानित्यात्मके केवलेऽनित्ये शब्दे वाचकसामर्थ्यस्य वर्तमानात् । ५ न भवतीति भावः । ६ फलं ग्राह्यत्यागौ प्रवृत्तिनिवृत्तिलक्षणव्यवहारश्च तस्याङ्गभूतं कारणभूतं च तदर्थप्रत्ययश्च, तस्याङ्गता कारणता शब्दस्य । ७ अन्यथा । ८ हेतुना । ९ अर्थप्रतीतिलक्षणफलरहिते । १० अर्थप्रतिपत्तिः । ११ उक्तप्रकारेण सफलत्वनाशात् शब्दस्येति फलं भवतु को दोष इत्युक्ते आह परीक्षेत्यादि । १२ फलवत्त्वं सिद्धं शब्दस्य येन कारणेन । १३ द्वयोर्धर्मयोर्मध्ये । १४ नित्यफललक्षणः । १५ नित्यधर्मस्य फलम् । १६ नित्यत्वं बाधकं भविष्यति प्रधानफलस्येत्युक्ते आह न हीत्यादि । १७ कारणे । १८ भावेन । १९ लक्षणतः । २० अर्थप्रतीतिलक्षणमुख्यफलस्य । २१ नित्यपक्षवन्नाशिपक्षेऽपि प्रधानफलबाधनं नास्तीत्युक्ते आह । २२ नियमेन । २३ अज्ञातार्थे । २४ शब्दस्य । २५ गृहीतसम्बन्ध एव प्रकाशकोऽस्त्वित्याह । २६ अवश्यम् । २७ शब्दस्य कालान्तरस्थितिपक्षे । २८ आदिना कालः । २९ गादयो धर्मिणो नाना अनित्याश्च भवन्ति विभिन्नदेशकालत्वादित्यनुमानेन । ३० प्रमाणात् । ३१ संगमः=संबन्धः ।

"यो यो गृहीतः सर्वस्मिन्देशे शब्दो हि विद्यते ।
न चास्याऽवयवाः सन्ति येन वर्त्तेत भागशः ॥ २ ॥
शब्दो वर्त्तत इत्येव तत्र सर्वात्मकश्च सः ।
व्यञ्जकध्वन्यऽधीनत्वात्तद्देशे स च गृह्यते ॥ ३ ॥
न च ध्वनीनां सामर्थ्यं व्याप्तुं व्योम निरन्तरम् ।
तेनाऽविच्छिन्नरूपेण नासौ सर्वत्र गृह्यते ॥ ४ ॥
ध्वनीनां भिन्नदेशत्वं श्रुतिस्तत्रानुरुध्यते ।
अपूरितान्तरालत्वाद्विच्छेदश्चावगीयते ॥ ५ ॥
तेषां चाल्पकदेशत्वाच्छब्देप्यऽविभुतामतिः ।
गतिमद्वेगवत्त्वाभ्यां ते चायान्ति यतो यतः ॥ ६ ॥
श्रोता ततस्ततः शब्दमायान्तमिव मन्यते ।"

[मी० श्लो० शब्दनि० श्लो० १७२-१७५]

अथैकेन भिन्नदेशोपलम्भाद् घटादिवन्नानात्वम्; न; आदित्येनानेकान्तात् । दृश्यते ह्येकेनादित्यो भिन्नदेशः, न चैतावतासौ नाना । अथ 'युगपदेकेन भिन्नदेशोपलब्धेः' इति विशेष्योच्यते; तथाप्यनेनैवानेकान्तः । जलपात्रेषु हि भिन्नदेशेषु सवितैकोप्येकेन युगपद्भिन्नदेशो गृह्यते । उक्तं च—

"सूर्यस्य देशभिन्नत्वं न त्वेकेन न गृह्यते ।
न नाम सर्वथा तावद्गृण्यस्यानेकदेशता ॥ १ ॥
सविशेषेण हेतुश्चेत्तथापि व्यभिचारिता ।
दृश्यते भिन्नदेशोयमित्येकोपि हि बुध्यते ॥ २ ॥
जलपात्रेषु चैकेन नानेकः सवितेक्ष्यते ।
युगपन्न च भेदस्य प्रमाणं तुल्यवेदनात् ॥ ३ ॥"

[मी० श्लो० शब्दनि० श्लो० १७६-१७८]

१ प्रत्यभिज्ञानाच्छब्दस्य व्यापकत्वं कथमित्युक्ते आह । २ अवयवसद्भावात् भागशो वर्तेत इत्युक्ते आह । ३ भागशो न वर्तते तर्हि कथं वर्तेते इत्युक्ते आह । ४ सर्वत्र विद्यते चेत्तर्हि सर्वत्रैवोपलम्भः स्यादित्युक्ते आह । ५ ध्वनयोपि सकलदेशं कथं न व्याप्नुवन्तीत्युक्ते आह । ६ नानादेशेषूपलभ्यमानत्वम् । ७ शब्दश्रवणम् । ८ शब्दव्यञ्जकवायूनाम् । ९ अत एव श्रवणव्यभिचारो दृश्यते । १० गतिः= क्रियारूपा । वेगः=संस्कारविशेषः । ११ भिन्नदेशश्चेदुपलभ्यते तदा भिन्नदेशो भविष्यतीत्युक्ते आह नेति । १२ सूर्यस्य । १३ युगपदिति । १४ कथं व्यभिचारो दृश्यते इत्याशङ्कायामाह । १५ एकः सूर्यो भिन्नदेशतया कथं बुध्यते इत्युक्ते आह । १६ एवं चेत्तर्हि सूर्यो नानारूपो भविष्यतीत्युक्ते आह । १७ आदित्य आदित्य इति समानरूपतावेदनादेक एवायमित्यनुमीयते । न चास्य भेदे प्रमाणं किञ्चिदित्यर्थः ।

कश्चिदाह–न तत्र सवितेक्ष्यते तस्य नभसि व्यवस्थानात्, तन्निमित्तानि तु तेषु प्रतिबिम्बानि प्रतीयन्ते, ततो नानेकान्तः।

"आहैकेन निमित्तेन प्रतिपात्रं पृथक् पृथक्।
भिन्नानि प्रतिबिम्बानि गृह्यन्ते युगपन्मया ॥ १ ॥"

५ [मी० श्लो० शब्दनि० श्लो० १७९]

एतत्कुमारिलः परिहरन्नाह–

"अत्र ब्रूमो यदा यावज्जले सौर्येण तेजसा।
स्फुरता चाक्षुषं तेजः प्रतिस्रोतैः प्रवर्त्तितम् ॥ १ ॥
स्वदेशमेव गृह्णाति सवितारमनेकधा।
१० भिन्नमूर्त्ति यथापात्रं तदास्यानेकता कुतः ॥ २ ॥"

[मी० श्लो० शब्दनि० श्लो० १८०-१८१]

यथा च प्रदीपः।

"ईषत्सम्मिलितेऽङ्गुल्या यथा चक्षुषि दृश्यते।
पृथगेकोपि भिन्नत्वाच्चक्षुर्वृत्तेस्तथैव नः ॥ १ ॥
१५ अन्ये तु चोदयन्त्यत्र प्रतिबिम्बोदयैषिणः।
स एव चेत्प्रतीयेत कस्मान्नोपरि दृश्यते ॥ २ ॥
कूपादिषु कुतोऽधस्तात्प्रतिबिम्बाद्विनेक्षणम्।
प्राङ्मुखो दर्पणं पश्यन् स्याच्च प्रत्यङ्मुखः कथम् ॥ ३ ॥
तत्रैव बाधयेदर्थं बहिर्यातं यदीन्द्रियम्।
२० तत एतद्भवेदेवं शरीरे तत्तु बाधकम् ॥ ४ ॥"

[मी० श्लो० शब्दनि० श्लो० १८२-१८५]

अत्राह–

"अप्सूर्यदर्शिनां नित्यं द्वेधा चक्षुः प्रवर्त्तते।
एकमूर्द्ध्वमधस्ताच्च तत्रोर्द्ध्वांशप्रकाशिनम् ॥ १ ॥
२५ अधिष्ठानानृजुत्वाच्च नात्मा सूर्यं प्रपद्यते।
पारम्पर्यार्पितं स तमर्वाग्वृत्त्या तु बुध्यते ॥ २ ॥

१ जैनादिः। २ स सूर्यो निमित्तं येषां तानि। ३ सूर्येण। ४ नानात्वेन। ५ क्रियाविशेषणमेतत्। ६ पात्राण्यनतिक्रम्य। ७ यदा दृश्यते। ८ अग्रेतनश्लोका-न्तर्यथाशब्दः केन सह सम्बन्धनीय इत्यन्वयार्थो 'यथा च प्रदीपः' शब्द उक्तः। ९ एक एव सविता नाना कथं दृश्यते इत्याह ईषदिति। १० नानारूपेण। ११ चक्षुःप्रवृत्तिर्नानारूपास्ति यत इत्यर्थः। १२ नः=अस्माकमपि, तथैव=प्रदीप-प्रकारेणैव। एकोप्यादित्यो नानात्वेन दृश्यते चक्षुषः प्रवृत्तेर्भिन्नत्वात्। १३ कूपादिषु कुत इत्यस्य समाधानमिदमग्रेतनम्।

ऊर्द्धवृत्ति तदेकत्वादवागिव च मन्यते।
अधस्तादेव तेनार्कः सान्तरालः प्रतीयते ॥ ३ ॥
एवं प्राग्गतया वृत्त्या प्रत्यग्वृत्तिसमर्पितम्।
बुध्यमानो मुखं भ्रान्तेः प्रत्यगित्यवगच्छति ॥ ४ ॥
अनेकदेशवृत्तौ च सत्यपि प्रतिबिम्बके। ५
समानबुद्धिगम्यत्वान्नानात्वं नैव विद्यते ॥ ५ ॥"
[मी० श्लो० शब्दनि० श्लो० १८६-१९०]

किञ्च,

"देशभेदेन भिन्नत्वं मतं तच्चानुमानिकम्।
प्रत्यक्षस्तु स एवेति प्रत्ययस्तेन बाधकः ॥ ६ ॥ १०
पर्यायेण यथा चैको भिन्नदेशान् व्रजन्नपि।
देवदत्तो न भिद्येत तथा शब्दो न भिद्यते ॥ ७ ॥
ज्ञातैकत्वो यथा चासौ दृश्यमानः पुनः पुनः।
न भिन्नः कालभेदेन तथा शब्दो न देशतः ॥ ८ ॥
पर्यायादविरोधश्च व्यापित्वादपि दृश्यताम्। १५
दृष्टसिद्धो हि यो धर्मः सर्वथा सोऽभ्युपेयताम् ॥ ९ ॥"
[मी० श्लो० शब्दनि० श्लो० १९७-२००] इति।

अत्र प्रतिविधीयते। नित्यः शब्दोऽर्थप्रतिपादकत्वान्यथानुपपत्तेरित्ययुक्तम्; धूमादिवदनित्यस्यापि शब्दस्यावगतसम्बन्धस्यादृश्यतोऽर्थप्रतिपादकत्वसम्भवात्। न खलु य एव सङ्केतकाले २० दृष्टस्तेनैवार्थप्रतीतिः कर्त्तव्येति नियमोऽस्ति, महानसदृष्टधूमसदृशादपि पर्वतधूमादग्निप्रतिपत्त्युपलम्भात्। न हि महानसप्रदेशोपलब्धैव धूमव्यक्तिरन्यत्राप्यग्निं गमयति; सदृशपरिणामाक्रान्तव्यक्त्यन्तरस्य तद्गमकत्वप्रतीतेः, अन्यथा सर्वस्य सर्वगतत्वानुषङ्गः। सदृशपरिणामप्रधानतया च साध्यसाधनयोः २५ सम्बन्धावधारणम्। न ह्यनाश्रितसमानपरिणतीनां निखिलधूमादिव्यक्तीनां स्वसाध्येनाऽर्वाग्दृशा सम्बन्धः शक्यो ग्रहीतुम्;

१ गच्छन्त्या। २ संमुखम्। ३ सूर्यस्योपलम्भद्वारेण। ४ इत्यस्यापि प्रतिबिम्बके सूर्यस्योपलम्भद्वारेणानेकदेशवृत्तिकं तत्रश्चानैकान्तिकत्वं प्रकृतसाधनस्यानेनेति चेन्न तस्यापि नानात्वसंभवात् इति वदन्तं प्रति। ५ एवमनेकान्तदूषणमुद्राप्य कालात्ययापदिष्टत्वमुद्भावयति। भिन्नदेशस्यैकत्वं नास्तीति प्रत्यक्षं कथमनुमानबाधकमित्युक्ते आह। ६ गकारादीनाम्। ७ कारणेन। ८ कालक्रमेण। ९ व्यवहारकाले। १० समानत्वमित्यर्थः। ११ अग्निधूमयोः शब्दार्थयोश्च। १२ शब्दप्रकारेण= शब्दव्यक्तिर्भवति पक्षे शब्दत्वादिति वक्तव्यम्। १३ असर्वज्ञेन।

असाधारणरूपेण तस्य तासामप्रतिभासनात्, अथ धूमसामान्य-
मेवाग्निप्रतिपत्तिकारणम्; न; व्यक्तिसादृश्यव्यतिरेकेण तद-
सम्भवात्। न च 'धूमत्वान्मया प्रतिपन्नोऽग्निः' इति प्रतिपत्तिः,
किन्तु धूमात्। सा च सामान्यविशिष्टव्यक्तिमात्रयोः सम्बन्ध-
५ ग्रहणे घटते। न तु धूमाग्निसामान्ययोरवश्यं चानुमेयानुमाप-
कयोः सामान्यविशिष्टविशेषरूपतोपगन्तव्या, अन्यथा सामान्य-
मात्रस्य दाहाद्यर्थक्रियासाधकत्वाऽभावात् ज्ञानाद्यर्थक्रियायाश्च
तत्साध्यायास्तदैवोत्पत्तेः, दाहाद्यर्थिनामनुमेयार्थप्रतिभासात्
प्रवृत्त्यभावतोऽस्याप्रामाण्यप्रसङ्गः। सामान्यविशिष्टविशेषरूपता
१० चात्र वाच्यवाचकयोरपि समाना न्यायस्य समानत्वात्।

यदप्युक्तम्—

"सदृशत्वात्प्रतीतिश्चेत्तद्द्वारेणाप्यवाचकः।
कस्य चैकस्य सादृश्यात्कल्प्यतां वाचकोऽपरः॥ १॥
अदृष्टसङ्गतत्वेन सर्वेषां तुल्यता यदा।
१५ अर्थवान्पूर्वदृष्टश्चेत्तस्य तावान्क्षणः कुतः॥ २॥
द्विस्तावानुपलब्धो हि अर्थवान्सम्प्रतीयते।"

[मी० श्लो० शब्दनि० श्लो० २४८-२५०]

इत्यादि; तदप्यसारम्; अनुमानवार्त्तोच्छेदप्रसङ्गात्। धूमादि-
लिङ्गात्पूर्वोपलब्धधूमादिसादृश्यतोऽग्न्यादिसाध्यप्रतिपत्तावप्यस्य
२० सर्वस्य समानत्वात्।

एतेनैवमपि प्रत्युक्तम्—

"शब्दं तावदनुच्चार्य सम्बन्धकरणं कुतः।
न चोच्चारितनष्टस्य सम्बन्धेन प्रयोजनम्॥"

[मी० श्लो० शब्दनि० श्लो० २५६] इत्यादि।

२५ यतोऽदृष्टे धूमे सम्बन्धो न शक्यते कर्त्तुम्। नापि दृष्टनष्टस्यास्य
सम्बन्धेन प्रयोजनं किञ्चित्।

---

१ शब्दपक्षे शब्दसामान्यमेवार्थप्रतिपत्तिकारणमिति वाच्यम्। २ धूमसामान्यात्। ३ सादृश्यपरिणामविशिष्टा व्यक्तिरेव मात्रा स्वरूपं ययोः साध्यसाधनयोस्तयोः। ४ साध्यसाधनयोः। ५ शब्दस्योच्चारणसमये, अग्न्याद्यनुमानसमये च। ६ विशेषे पर्वतादौ। ७ सामान्यस्य। ८ नहीत्यादिपूर्वोक्तस्य। ९ संकेतकालोपलब्धशब्देन व्यवहारकालोपलब्धशब्दस्य। १० तदेति शेषः। कथमवाचक इत्युक्ते कस्येत्याह। कस्य=संकेतकालोपलब्धस्य। ११ व्यवहारकालोपलब्धः शब्दः। १२ अगृह-संबन्धेन। १३ शब्दानाम्। १४ वाच्यवाचकसंबन्धवान् शब्दः। १५ द्विवारम्। १६ वाच्येन सह। १७ साध्येनाग्निना सह।

यच्च सादृश्ये दूषणमुक्तम्—

"तथा भिन्नमभिन्नं वा सादृश्यं व्यक्तितो भवेत् ।
एवमेकमनेकं वा नित्यं वाऽनित्यमेव वा ॥ १ ॥

भिन्ने चैकत्वनित्यत्वे जातिरेव प्रकल्पिता ।
व्यक्त्यऽनन्यदनेकं च सादृश्यं नित्यमिष्यते ॥ २ ॥ ५
व्यक्तिनित्यत्वमापन्नं तथा सत्यसमीहितम् ।"

[मी० श्लो० शब्दनि० श्लो० २७१-२७३] इत्यादि;

तदप्ययुक्तम्; स्वहेतोरेकस्य हि यादृशः परिणामस्तादृश एवापरस्य सादृश्यम्, न तु स एव । स च व्यक्तिभ्यो भिन्नोऽभिन्नश्च, तथाप्रतीतेः । न च जातिस्तथाभूता; नित्यव्यापित्वेनाभ्यु- १० पगमात् । तथाभूताश्चास्याः सामान्यनिराकरणे निराकरिष्यमाणत्वात् । ततः प्रवृत्तिमिच्छता लिङ्गाच्छब्दाद्वा न सामान्यमात्रस्य प्रतिपत्तिरभ्युपगन्तव्या ।

ननु सामान्यस्य विशेषमन्तरेणानुपपत्तितो लक्षितलक्षणया विशेषप्रतिपत्तेर्न प्रवृत्त्याद्यभावानुषङ्गः; इत्यप्रातीतिकम्; क्रमप्र- १५ तीतेरभावात् । न हि वाचकोद्भूतवाच्यप्रतिभासे प्राक् सामान्यावभासः पश्चाद्विशेषप्रतिभास इत्यनुभवोऽस्ति ।

किञ्च, सामान्याद्विशेषः प्रतिनियतेन रूपेण लक्ष्येत, साधारणेन वा? न तावदाद्यः पक्षः; प्रतिनियतरूपतयाऽस्याऽप्रतीतेः । न हि शब्दोच्चारणवेलायां जातिपरिमितो विशेषोऽसाधारण- २० रूपतयाऽनुभूयते प्रत्यक्षप्रतिभासाऽविशेषप्रसङ्गात् । प्रतिनियतरूपेण जातेरविनाभावाभावाच्च कुतस्तया तस्य लक्षणम्? नापि द्वितीयः; साधारणरूपतया प्रतिपन्नस्यापि विशेषस्यार्थक्रियाकारित्वाऽसामर्थ्येन प्रवृत्त्यहेतुत्वात्, प्रतिनियतस्यैव रूपस्य तत्र सामर्थ्योपलब्धेः । पुनरपि साधारणरूपतातो विशेष- २५ प्रतिपत्तावनवस्था स्यात् । साधारणरूपतया चातो विशेष-

---

१ तथाशब्दः स्वग्रन्थापेक्षया दूषणान्तरसमुच्चये । २ अनेकं सादृश्यं चेत्तत्किं नित्यमनित्यं वा? अनित्यं चेन्न संबन्धप्रतिपत्तिः । नित्यं चेत्तदेकेनैव सादृश्येनार्थप्रतिप्रतिपत्तेरनेकनिष्ठसादृश्यपरिकल्पनं व्यर्थम् । ३ परोक्तौ परिहारमाह । ४ अस्माभिर्जैनैः । ५ धूमादेः । ६ धूमादेः । ७ सादृश्यपरिणामः । ८ भिन्नाभिन्नस्वप्रकारेण । ९ भिन्नाभिन्नरूपा । १० परेण त्वया । ११ सामान्यस्यानुमेयरूपत्वे प्रवृत्तिर्न घटते यतः । १२ सामान्यस्य विशेषनिष्ठत्वात् । १३ सामान्यजनितप्रतिपत्त्या । १४ सामान्यस्य नित्यसर्वगतत्वात् । १५ पूर्वोक्तस्य समर्थनमेतत् । १६ कल्पयेति शेषः । १७ ज्ञानम् ।

प्रतिपत्तौ सामान्यात्सामान्यप्रतिपत्तौ सामान्यप्रतिपत्तिरेव स्यान्न विशेषप्रतिपत्तिः, साधारणरूपतायाः सामान्यस्वभावत्वात्।

किञ्च, यदि नाम शब्दाज्जातिः प्रतिपन्ना व्यक्तेः किमायातम्, येनासौ तां गमयति? तयोः सम्बन्धाच्चेत्; सम्बन्धस्तयोस्तदा ५ प्रतीयते, पूर्वं वा? न तावत्तदाः व्यक्तेरनधिगतेः 'जातिरेव हि केवला तदा प्रतिभासते' इत्यभ्युपगमात्, अन्यथा किं लक्षितलक्षणया? न च व्यक्त्यनधिगमे तत्सम्बन्धाधिगमः द्विष्ठत्वात्तस्य। अथ पूर्वमसौ प्रतीतः; तथापि तदेवासौ भवतु। न ह्येकदा तत्सम्बन्धेऽन्यदाप्यसौ भवत्यतिप्रसङ्गात्। न च जाते- १० र्विशेषनिष्ठतैव स्वरूपम्; व्यक्त्यन्तराले तत्स्वरूपाऽसत्त्वप्रसङ्गात्। तत्कथं व्यक्त्यऽविनाभावोऽस्याः?

किञ्च, सर्वदा जातिर्व्यक्तिनिष्ठेति प्रत्यक्षेण प्रतीयते, अनुमानेन वा? प्रत्यक्षेण चेत्किं युगपत्, क्रमेण वा? तत्राद्यपक्षोऽयुक्तः; सर्वव्यक्तीनां युगपदप्रतिभासनात्। न च तासामप्रति- १५ भासे तथा सम्बन्धावसायोऽतिप्रसङ्गात्। नापि द्वितीयः; क्रमेण निरवधेः सकलव्यक्तिपरम्परायाः परिच्छेत्तुमशक्तेः। कादाचित्के तु जातेर्व्यक्तिनिष्ठताधिगमे सर्वत्र सर्वदा न तन्निष्ठताधिगमः स्यात्। तन्न प्रत्यक्षेण जातेस्तन्निष्ठताधिगमः। नाप्यनुमानेन; अस्याऽध्यक्षपूर्वकत्वेनाभ्युपगमात्। तस्य चात्राऽ- २० प्रवृत्तावनुमानस्याप्यप्रवृत्तिः। तन्न लक्षितलक्षणया विशेषप्रतिपत्तिः सम्भवति, इति वाच्यवाचकयोः सामान्यविशिष्टविशेषरूपतोपगन्तव्या धूमादिवत्।

ननु धूमादेः सामान्यसद्भावात्तद्विशिष्टस्योक्तन्यायेन गमकत्वमस्तु, शब्दे तु तस्याभावात्कथं तद्विशिष्टस्य गमकत्वम्? तद- २५ भावश्च वर्णान्तरग्रहणे वर्णान्तरानुसन्धानाभावात्। यत्र हि सामान्यमस्ति तत्रैकग्रहणेऽपरस्यानुसन्धानं दृष्टं यथा शाबलेयग्रहणे बाहुलेयस्य। वर्णान्तरे च गादौ गृह्यमाणे न कादीनामनुसन्धानम्; तदसाम्प्रतम्; गादौ हि वर्णान्तरे गृह्यमाणे यदि 'अयमपि वर्णः' इत्यनुसन्धानाभावः सोऽसिद्धः, तथानुभू(तथाभू)-

१ व्यक्तिम्। २ शब्दाज्जातिप्रतिपत्तिकाले। ३ शब्दोच्चारणसमये व्यक्तिरपि प्रतिभासते चेत्तर्हि। ४ लक्षितेन ज्ञातेन सामान्येन लक्षणा=विशेषप्रतिपत्तिस्तया। ५ संबन्धस्य। ६ घटपटयोरेकदा संबन्धे सर्वदा संबन्धप्रसङ्गात्। ७ संबन्धो नास्ति यतः। ८ कदाचिदित्यप्यत्र द्रष्टव्यम्। ९ पिशाचाप्रतिभासे पिशाचेन कुटस्य संबन्धप्रत्यक्षप्रसङ्गात्। १० विशेषस्य। ११ अपेक्षापकरवत्। १२ अनुसंधानं=प्रत्यभिज्ञानम्। १३ व्यक्तिषु। १४ गत्वाभावात् कादिषु। १५ अनुसंधानाभावः।

तानुसन्धानस्यानुभूयमानत्वेनाऽभावासिद्धेः। अथ गादौ वर्णान्तरे गृह्यमाणे 'अयमपि कादिः' इत्यनुसन्धानाभावान्न सामान्यसद्भावः; तर्हि शाबलेयादावपि व्यक्त्यन्तरे गृह्यमाणे 'अयमपि बाहुलेयः' इत्यनुसन्धानाभावाद्गोत्वस्याप्यभावः। अथ 'गौर्गौः' इत्यनुगताकारप्रत्ययसद्भावान्न गोत्वाऽसत्त्वम्; तदन्यत्रापि समानम्– ५
तत्रापि हि 'वर्णो वर्णः' इत्यनुगताकारप्रत्ययोऽस्तु, तत्कथं वर्णेषु वर्णत्वस्य गादिषु गत्वादेः शब्दे शब्दत्वस्याभावः निमित्ताऽविशेषात्? तथाहि–समानासमानरूपासु व्यक्तिषु कचित् 'समानाः' इति प्रत्ययोऽन्वेत्यन्यत्र व्यावर्त्तते। यत्र च प्रत्ययानुवृत्तिस्तत्र सामान्यव्यवस्था, नान्यत्र। सा च प्रत्ययानुवृत्तिर्गादि- १०
ष्वपि समानेति कथं न तत्र सामान्यव्यवस्था? तथाप्यत्र सामान्यानभ्युपगमे शाबलेयादावपि मोऽस्तु। न हि तत्रापि तथाभूतप्रत्ययानुवृत्तिमन्तरेण सामान्याभ्युपगमेऽन्यन्निमित्तमुत्पश्यामः। यदि चात्राऽनुगताऽबाधिताऽक्षजप्रत्ययविषयत्वे सत्यपि गत्वादेरभावः; तर्हि गादेरपि व्यावृत्तप्रत्ययविषयस्या- १५
भावः स्यात्। तथा च कस्य दर्शनस्य परार्थत्वान्नित्यत्वं साध्येत?

यच्चोक्तम् 'सादृश्येन ततोऽर्थाप्रतिपत्तेः' इति; तत्सदृशपरिणामलक्षणसामान्यविशिष्टव्यक्तेरर्थप्रतिपादकत्वसमर्थनात्प्रत्युक्तम्।

यदप्यभिहितम् सादृश्यादर्थप्रतीतौ भ्रान्तः शाब्दः प्रत्ययः २०
स्यात्; तद्धूमादग्न्यादिप्रतिपत्तौ समानम्।

यदप्युक्तम्–'गत्वादीनां वाचकत्वं गादिव्यक्तीनां वा' इत्यादि; तत्सामान्यविशिष्टव्यक्तेर्वाचकत्वसमर्थनादेव प्रत्युक्तम्।

यच्चोक्तम्–'यो यो गृहीतः' इत्यादि; तदप्युक्तिमात्रम्; पक्षस्यानुमानबाधितत्वात्। तथाहि–अनेको गोशब्द एकेनैकदा २५
भिन्नदेशस्वभावतयोपलभ्यमानत्वाद् घटादिवत्। न चानेकप्रतिपत्तृभिर्भिन्नदेशतयोपलभ्यमानेनादित्यादिना, कालभेदेन भिन्नदेशादितयोपलभ्यमानेन देवदत्तेन वा व्यभिचारः; 'एकेनैकदा' इति विशेषणद्वयोपादानात्। एकेनैकदा दर्शनस्पर्शनाभ्यां भिन्नस्वभावतयोपलभ्यमानेन घटादिना वा; 'भिन्नदेशतया' इति ३०
विशेषणात्। जलपात्रसङ्क्रान्तादित्यादिप्रतिबिम्बैस्तद्व्यभिचारः;

१ गत्वलक्षणं सामान्यं नास्ति तथापि वर्णत्वलक्षणं सदृशसामान्यं कादिष्वस्त्येवेति जैनाभिप्रायः। २ अभावे सति। ३ गादेः। ४ उच्चारजस्य। ५ हेतोः। ६ न चेति पूर्वेण संबन्धोऽत्र ज्ञेयः।

तेषामग्रेऽनेकत्वप्रसाधनात्। तथाप्यत्र सर्वगतत्वादिधर्मसम्भवे घटादावपि सोऽस्तु-

'न चास्याऽवयवाः सन्ति येन वर्त्तेत भागशः।
घटो वर्त्तेत इत्येव तत्र सर्वात्मकश्च सः॥'

५ इत्यादेरत्राप्यभिधातुं शक्यत्वात्। यथा च—

क्वचिद्रक्तः क्वचित्पीतः क्वचित्कृष्णश्च गृह्यते।
प्रतिदेशं घटस्तेन विभिन्नो मम युक्तिमान्॥

तथा—

उदात्तः कुत्रचिच्छब्दोऽनुदात्तश्च तथा क्वचित्।
१० अकारो मि(कारमि)श्रितोऽन्यत्र विभिन्नः स्याद् घटादिवत्॥

ननु 'व्यञ्जकध्वनिधर्मा एवोदात्तादयो नाऽकारादिधर्माः, ते तु तत्रारोपात्तद्धर्मा इवावभासन्ते जपाकुसुमरक्ततेव स्फटिकादाविति। उक्तञ्च—

"बुद्धितीव्रत्वमन्दत्वे महत्त्वाल्पत्वकल्पना।
१५ सा च पट्वी भवत्येव महातेजःप्रकाशिते॥ १॥
मन्दप्रकाशिते मन्दा घटादावपि सर्वदा।
एवं दीर्घादयः सर्वे ध्वनिधर्मा इति स्थितम्॥ २॥"
[मी० श्लो० शब्दनि० श्लो० २१९-२२०]

तदप्यसारम्; यतो यद्युदात्तादिधर्मरहितोऽकारादिस्तत्स-
२० हितश्च ध्वनिः रक्तेतरस्वभावजपाकुसुमस्फटिकवत् क्वचिदुपलब्धः स्यात् तदा स्यादेतत् 'अन्यधर्मस्तदारोपात्तद्धर्मतयेवावभाति' इति। न चासौ स्वप्नेपि तथोपलभ्यते। शब्दधर्मतया चैते प्रतीयमाना यद्यन्यस्येष्यन्तेऽन्यत्र कः समाश्वासहेतुः? बाधकाभावश्चेत्सोऽत्रापि समानः। विपरीतदर्शनं हि बाधकम्,
२५ यथा द्विचन्द्रदर्शनस्यैकचन्द्रदर्शनम्। न चात्र तदस्ति-उदात्तादिधर्मात्मकस्यैवाकारादेः सर्वदा प्रतीतेः। तथापि तत्कल्पने रक्तादिधर्मरहितस्य घटादेर्दर्शनं तथैव कल्प्यताम्। तथाविधस्यानुपलम्भादसत्त्वम्; शब्देपि समानम्।

किञ्चेदं बुद्धेस्तीव्रत्वं नाम? किं महत्त्वरहितस्यार्थस्य महत्त्वेनो-
३० पलम्भः, यथाऽवस्थितस्याऽत्यन्तस्पष्टतया वा? प्रथमे विकल्पे भ्रान्तताऽस्याः स्यात्। 'सा च पट्वी भवत्येव महातेजःप्रकाशिते घटादौ सर्वदा' इति च निदर्शनमयुक्तम्; न हि महातेजःसामर्थ्यादल्पोपि घटो 'महान्' इत्यवभासते, किन्त्वत्यन्तस्पष्टतया। द्वितीयविकल्पे तु महत्त्वादिधर्मरहितस्यास्याऽत्यन्तस्पष्टतया
३५ ग्रहणं स्यात्। तथा च न व्यञ्जकध्वनिधर्मानुविधायित्वं स्यात्।

एतेन बुद्धिमन्दत्वेऽल्पता निरस्ता । न खलु मन्दतेजसः प्रकाशिते घटादौ महति बुद्धिमन्दत्वेनाल्पत्वप्रतीतिरस्ति । ततो 'महाताल्वादिव्यापारे महत्त्वादिधर्मोपेतोऽल्पे चाल्पत्वादिधर्मोपेतः शब्द एवोत्पद्यते' इत्यभ्युपगन्तव्यम् ।

यदि च ताल्वादयो ध्वनयो वास्य व्यञ्जकाः; तर्हि तद्व्यापारे ५ तद्धर्मोपेतस्यास्य नियमेनोपलब्धिर्न स्यात् । कारकव्यापारो ह्येषः– स्वसन्निधाने नियमेन कार्यसन्निधापनं नाम, न व्यञ्जकव्यापारः । न खलु यत्र यत्र व्यञ्जकः प्रदीपादिस्तत्र तत्र व्यङ्ग्यघटादिसन्निधापनमुपलब्धिर्वा नियमतोस्ति, अन्यथा तयोरविशेषप्रसङ्गात्, चक्रादिव्यापारवैयर्थ्यानुषङ्गाच्च । अथ घटादेरसर्वगतत्वान्न १० तद्व्यञ्जनसन्निधाने सर्वत्रोपलम्भः, शब्दस्य तु सम्भवति विपर्ययात्; इत्यप्यनिरूपिताभिधानम्; तस्य सर्वगतत्वाऽसिद्धेः । तथाहि–न सर्वगतः शब्दः सामान्यविशेषवत्त्वे सति बाह्यैकेन्द्रियप्रत्यक्षत्वात् घटादिवत् । ततो घटादिभ्यः शब्दस्य विशेषाभावादुभयोः कार्यत्वं व्यङ्ग्यत्वं वाऽभ्युपगन्तव्यम् । १५

किञ्च, एते ध्वनयः श्रोत्रग्राह्याः, न वा ? श्रोत्रग्राह्यत्वे अत एव शब्दाः तल्लक्षणत्वात्तेषाम् । तत्र च तात्त्विका एवोदात्तादयो धर्माः । तथा चापरशब्दकल्पनानर्थक्यम् । अथ न श्रोत्रग्राह्याः; कथं तर्हि तद्धर्मा उदात्तादयस्तद्ग्राह्याः ? न हि रूपादीनां धर्मा भासुरत्वादयो रूपादेरग्रहणे श्रोत्रेण गृह्यन्ते । २० अथ न भावतस्तेन ते गृह्यन्ते, किन्त्वारोपात् । ननु चाऽगृहीतस्यारोपोपि कथम् ? अन्यथा भासुरत्वादेरपि तत्रारोपः स्यात् । अथ व्यञ्जकत्वात् ध्वनीनां तद्धर्मा एव तत्रारोप्यन्ते, न रूपादीनां विपर्ययात्; ननु ज्ञानजनकत्वान्नापरं व्यञ्जकत्वम् । तथा सत्यल्पेन चक्षुषा व्यज्यमानः पर्वतो महानपि २५ तद्धर्मारोपात्स्वल्पपरिमाणतया प्रतीयेत सर्षपश्च बृहत्परिमाणतया, न चैवम् । तन्नैते ध्वनिधर्मा उदात्तादयोऽपि तु शब्दधर्माः । तथाप्यस्यैकव्यक्तिकत्वे घटादेरपि तदस्तु विशेषाभावात् ।

ननु चास्यैकत्वे नभोवत्कारणानायत्तत्वान्न तदुत्कर्षापकर्षाभ्यामुत्कर्षापकर्षौ स्याताम्; तच्छब्देपि समानम्–तस्यापि हि ३० प्रत्येकमेकव्यक्तिकत्वे ताल्वोत्कर्षाऽपकर्षाभ्यामुत्कर्षापकर्षयोगो न स्यात्, किन्तु सर्वत्र तुल्यप्रतीतिविषयता स्यात् । ननु चासिद्धं ताल्वादेर्महत्त्वादेः शब्दस्य महत्त्वादिकम्; तथाहि—

"कारणानुविधायित्वं यच्चाल्पत्वमहत्त्वयोः ।
तदसिद्धं न वर्णो हि वर्धते न पदं क्वचित् ॥ ३५

वर्णान्तरजनौ तावत्तत्पदत्वं विहन्यते ।
अपदं हि भवेदेतद्यदि वा स्यात्पदान्तरम् ॥
वर्णोऽनवयवत्वात्तु वृद्धिह्रासौ न गच्छति ।
व्योमादिवदतोऽसिद्धा वृद्धिरस्य स्वभावतः ॥"
५ [मी० श्लो० शब्दनि० श्लो० २१०-२१३]

अत्रोच्यते-किं कारणानुविधायित्वमल्पत्वमहत्त्वयोः स्वभावसिद्धत्वादसिद्धम्, आहोस्वित्कारणाल्पत्वमहत्त्वाभ्यां शब्दस्याल्पत्वमहत्त्वे एव न विद्येते स्वभावतस्तद्रहितत्वात् इति? तत्राद्यपक्षे स्वभाव एव वाम्याऽल्पत्वमहत्त्वे विद्येते, न तु ते १० तस्य कारणाल्पत्वमहत्त्वाभ्यां कृते इत्यायातम्, तथा च घटादेरपि तथा तत्सत्त्वप्रसङ्गः । निर्हेतुकत्वेन सर्वदा भावानुषङ्गश्चोभयत्र समानः । द्वितीयस्तु पक्षोऽसङ्गतः; तयोस्तत्र प्रतीयमानत्वेन स्वभावतस्तद्रहितत्वासिद्धेः । न खलु महति ताल्वादौ महानऽल्पे चाल्पः शब्दो न प्रतीयते, सर्वत्र तयोरनाश्वास- १५ प्रसङ्गात् ।

यदप्युक्तम्-'न हि वर्णा वर्द्धन्ते' इत्यादि; तत्र यदि तावत् 'अल्पताल्वादिजनितो वर्णादिरल्पो महतस्ताल्वादिव्यापाराश्च वर्द्धते' इत्युच्यते; तदा सिद्धसाधनम् । न हि घटोऽल्पान्मृत्पिण्डात्तथाविधो जातोऽन्यतः स एव वर्द्धते अघटत्वप्रसङ्गात्, २० घटान्तरमेव वा स्यात् । अथान्योपि वृद्धिमाञ्च जायते; तन्न; तथाविधस्य दृष्टत्वात् । दृष्टस्य चाऽपह्नवाऽयोगात् ।

एतेनैतन्निरस्तम्—

"अथ तद्रूप्यविज्ञानं हेतुरित्यभिधीयते ।
तथापि व्यभिचारित्वं शब्दत्वेपि हि तन्मतिः ॥ १ ॥
२५ व्यक्त्यल्पत्वमहत्त्वे हि तद्यथानुविधीयते ।
तथैवानुविधातायं ध्वन्यल्पत्वमहत्त्वयोः ॥ २ ॥"
[मी० श्लो० शब्दनि० श्लो० २१३-२१४] इति ।

सदृशपरिणामो हि सामान्यम् । तस्य च वर्णवदऽल्पत्वमहत्त्वसम्भवात् कथं तेनानेकान्तः? भवत्कल्पितं तु सामान्यमग्रे ३० निषिद्धत्वात्खरविषाणप्रख्यमिति कथं तेन व्यभिचारोद्भावनम्?

यदप्युच्यते—

व्यञ्जकानां चैतदस्तीति लोकेप्यैकान्तिकं न तत् ।
दर्पणाल्पमहत्त्वे हि दृश्यतेऽनुपतन्मुखम् ॥ १ ॥
न स्याद्व्यञ्जकता तस्मिंस्तत्क्रियाजन्यतापि वा ।
३५ न चास्योच्चारणादन्या विद्यते जनिका क्रिया ॥ २ ॥"
[मी० श्लो० शब्दनि० श्लो० २१५-२१७]

तदप्यचारु; भ्रान्तेनाऽभ्रान्तस्य व्यभिचाराऽयोगात् । शब्दे हि महत्त्वादिप्रत्ययोऽभ्रान्तो बाधवर्जितत्वादित्युक्तम् । मुखे तु भ्रान्तो विपर्ययात् । न चान्यस्य भ्रान्तत्वेऽन्यस्यापि तत्, अन्यथा सकलशून्यतानुषङ्गः-स्वप्नादिप्रत्ययवत्सकलप्रत्ययानां भ्रान्ततापत्तेः । न च खड्गे प्रतिबिम्बितदीर्घतया मुखमेवाऽऽ- ५
भाति दर्पणे तु वर्त्तुलतया गौरनीले काचे नीलतया; किन्तु तदाकारस्तत्र प्रतिबिम्बितस्तद्धर्मानुकारी प्रतिभाति । न च शब्दस्याप्याकारो ध्वनौ, ध्वनेर्वा शब्दे प्रतिबिम्बितस्तद्धर्मानुकारी भवतीत्यभिधानव्यम्; शब्दस्याऽमूर्त्तत्वेन मूर्त्ते ध्वनौ तत्प्रतिबिम्बनाऽसम्भवात् । मूर्त्तानामेव हि मुखादीनां मूर्त्ते दर्पणादौ तत्प्रति- १०
बिम्बनं दृष्टं नाऽमूर्तानामात्मादीनाम् । न चाऽश्रोत्रग्राह्यत्वे ध्वनेः प्रतिबिम्बितोऽप्याकारः श्रोत्रेण ग्रहीतुं शक्योऽतिप्रसङ्गात् । तद्ग्राह्यत्वे वा अपरशब्दकल्पना व्यर्थेत्युक्तम् ।

यच्चाप्युक्तम्—

"यथा महत्यां खातायां मृदि व्योम्नि महत्त्वधीः । १५
अल्पायामल्पधीरेवमत्यन्ताऽकृतके मतिः ॥
तेनात्रैवं परोपाधिः शब्दवृद्धौ मतिर्भ्रमः (मतिभ्रमः) ।
न च स्थूलत्वसूक्ष्मत्वे लक्ष्येते शब्दवर्त्तिनी ॥"

[मी० श्लो० शब्दनि० श्लो० २१७-२१९]

तदप्यसमीचीनम्; व्योम्नोऽतीन्द्रियत्वेन महत्त्वादिप्रत्ययवि- २०
षयत्वायोगात् । तद्योगे चाल्पया खातयाऽवच्छिन्नो व्योमप्रदेशोऽल्पो महत्या च महानिति नाऽनेनाऽनेकान्तः । निरवयवत्वे हि तस्याणुवद्व्यापित्वासम्भवः, अत्यन्ताकृतकत्वेन च क्रमयौगपद्याभ्यामर्थक्रियाविरोध इति वक्ष्यते । तथा शब्दस्यापि सावयवत्वाभ्युपगमे— २५

"पृथग् न चोपलभ्यन्ते वर्णस्यावयवाः क्वचित् ।
न च वर्णेष्वनुस्यूता दृश्यन्ते तन्तुवत्पटे ॥ १ ॥
तेषामनुपलब्धेश्च न ज्ञाता लिङ्गतो गतिः ।
नागमस्तत्परश्चास्मिन्नाऽऽदृश्ये चोपमा क्वचित् ॥ २ ॥
न चास्यानुपपत्तिः स्याद्वर्णस्यावयवैर्विना । ३०
यथान्यावयवानां हि विनाप्यवयवान्तरैः ॥ ३ ॥
प्रत्यक्षेणावबुद्धश्च वर्णोऽवयववर्जितः ।
किञ्च स्याद्योमवच्चात्र लिङ्गं तद्रहिता मतिः ॥ ४ ॥"

[मी० श्लो० स्फोटवा० श्लो० ११-१४]

इति वचो विरुध्येत । ३५

यत्पुनरुक्तम्-'व्यञ्जकध्वन्यधीनत्वात्तद्देशे स च गृह्यते' इत्यादि; तत्र कुतो ध्वनयः प्रतिपन्ना येन तदधीना शब्दश्रुतिः स्यात्? प्रत्यक्षेण, अनुमानेन, अर्थापत्त्या वा? प्रत्यक्षेण चेत्किं श्रोत्रेण, स्पर्शनेन वा? न तावच्छ्रोत्रेण;तथा प्रतीत्यभा-
५ वात्। न खलु शब्दवत्तत्र ध्वनयः प्रतिभासन्ते विप्रतिपत्त्यभावप्रसङ्गात्। तत्र ध्वनिप्रतिभासे चापरशब्दकल्पनावैयर्थ्यमित्युक्तम्। अथ स्पार्शनप्रत्यक्षेण ते प्रतीयन्ते-स्वकरपिहितवदनो हि वदन् स्वकरसंस्पर्शनेन तान्प्रतिपद्यते, वदतो मुखाग्रे स्थिततूलादेः प्रेरणोपलम्भादनुमानेनेति; तदप्यसाम्प्रतम्; वायुवत्ता-
१० ल्वादिव्यापारानन्तरं कफांशानामप्युपलम्भेन शब्दाभिव्यञ्जकत्वप्रसङ्गात्। वक्तृवक्त्रप्रदेश एवैषां प्रक्षयेण श्रोतृश्रोत्रप्रदेशे गमनाभावान्न तत्; इत्यन्यत्रापि समानम्। न हि वायवोपि तत्र गच्छन्तः समुपलभ्यन्ते। शब्दप्रतिपत्त्यन्यथानुपपत्त्या प्रतिपत्तिस्तूभयत्रसमाना। यथा च स्तिमितभाषिणो न कफांशोपलम्भ-
१५ स्तथा वायूपलम्भोपि नास्ति। स्तिमितस्य कल्पनमुभयत्र समानम्। तन्न प्रत्यक्षेणानुमानेन वा तत्प्रतिपत्तिः।

अथार्थापत्त्या तेषां प्रतिपत्तिः; तथाहि-शब्दस्तावन्नित्यत्वान्नोत्पद्यते संस्कृतिरेव तु क्रियते। सा च विशिष्टा नोपपद्येत यदि ध्वनयो न स्युः। तदुक्तम्—

२० "शब्दोत्पत्तेर्निषिद्धत्वादन्यथानुपपत्तितः।
विशिष्टसंस्कृतेर्जन्म ध्वनिभ्यो व्यवसीयते ॥ १ ॥
तद्भावभाविता चात्र शक्त्यस्तित्वावबोधिनी।
श्रोत्रशक्तिवदेवेष्टा बुद्धिस्तत्र हि संहता ॥ २ ॥
कुड्यादिप्रतिबन्धोपि युज्यते मातरिश्वनः।
२५ श्रोत्रादेरभिघातोपि युज्यते तीव्रवर्त्तिना ॥ ३ ॥"
[मी० श्लो० शब्दनि० श्लो० १२८-१२९]

इति; तत्र केयं विशिष्टा संस्कृतिर्नाम-शब्दसंस्कारः, श्रोत्रसंस्कारः, उभयसंस्कारो, वा? परेण हि त्रेधा संस्कारोऽभ्युपगम्यते। स च—

१ शब्दस्य अभिव्यक्तिः। २ निश्चीयते। ध्वनयः सन्ति शब्दसंस्कारान्यथानुपपत्तेरिति। ३ तद्भावभावित्वमसिद्धमित्युक्ते आह बुद्धिरिति। बुद्धिः=प्रत्यक्षबुद्धिः। ४ नियता। ५ शब्दस्यामूर्तत्वे कुड्यादिप्रतिबन्धो न स्याच्छ्रोत्राभिघातो वा न स्यादित्युक्ते आह। ६ शब्दव्यञ्जकवायोः। ७ शब्दव्यञ्जकवायुना। ८ ध्वनेः सकाशात्। ९ मीमांसकेन।

"स्याच्छब्दस्य हि संस्कारादिन्द्रियस्योभयस्य वा।"
[मी० श्लो० शब्दनि० श्लो० ५२]

"स्थिरत्वाच्यपनीत्या च संस्कारोऽस्य भवन्भवेत्।"
[मी० श्लो० शब्दनि० श्लो० ६२]

इत्यभिधानात्। ५

तत्राद्ये पक्षे कोऽयं शब्दसंस्कारः-शब्दस्योपलब्धिः, तस्यात्मभूतः कश्चिदतिशयः, अनतिशयव्यावृत्तिर्वा, स्वरूपपरिपोषो वा, व्यक्तिसमवायो वा, तद्ग्रहणापेक्षग्रहणता वा, व्यञ्जकसन्निधानमात्रं वा, आवरणविगमो वा स्यात्? यदि शब्दोपलब्धिः; कथमसौ ध्वनीनां गमिका शब्दे श्रोत्रमात्रभावित्वात्तस्याः? तथाप्यन्यनिमित्तकल्पने हेतूनामनवस्थितिः स्यात्। १०

तस्यात्मभूतः कश्चिदतिशयोऽनतिशयव्यावृत्तिर्वा इत्यत्रापि अतिशयो दृश्यस्वभाव एव, अनतिशयव्यावृत्तिस्त्वदृश्यस्वभावखण्डनमेव। ते चेत्ततोऽन्ये; तत्करणेऽपि शब्दस्य न किञ्चित्कृतमिति तदवस्थाऽस्याऽश्रुतिः। अथाऽनन्यः; तदा शब्दस्यापि कार्यतया अनित्यत्वानुषङ्गः। यो हि यस्मादसमर्थस्वभावपरित्यागेन समर्थस्वभावं लभते स चेन्न तस्य जन्यः; केदानीं जन्यताव्यवहारः? न च समर्थस्वभाव एव जन्यो न शब्दः इत्यभिधातव्यम्; तस्याऽतो विरुद्धधर्माध्यासतो भेदानुषङ्गात्। तत्र चोक्तो दोषः। १५

श्रोत्रप्रदेश एव चास्य संस्कारे तावन्मात्रक एव शब्दः, न सर्वगतः स्यात्। तस्यैवान्यत्र तद्विपर्ययेणावस्थाने दृश्याऽऽदृश्यत्वप्रसङ्गात् निरंशत्वव्याघातो विप्रतिपत्त्यभावश्चास्य परिणामित्वप्रसिद्धः। यदस्माभिः 'श्रावणस्वभावविनाशोत्पत्तिमत्पुद्गलद्रव्यम्' इत्यभिधीयते तद्युष्माभिः 'वर्णः' इत्याख्यायते। यौ च श्रावणस्वभावोत्पादविनाशौ शब्दोत्पादविनाशावस्माभिरिष्टौ तौ युष्माभिः शब्दाभिव्यक्तितिरोभावाविति नाम्नैव २० २५

१ शब्दस्य। २ नियमाभावः। ३ शब्दस्य। ४ तस्य-अतिशयस्य अनतिशयव्यावृत्तेर्वा। ५ शब्दस्य। ६ शब्दात्। ७ ध्वनेः। ८ असमर्थस्वभावः-पूर्वावस्था (शब्दाप्राकट्यम्)। ९ अपि तु न कापी [illegible]ः। १० शब्दस्य। ११ श्रोत्रप्रदेशादन्यत्र। १२ स्वभावस्य जन्यता शब्दस्य त्वजन्यतेति भेदे। १३ सर्वगतत्वे च शब्दस्य। १४ शब्दस्य। १५ जैनैः। १६ पुद्गले एव श्रावणस्वभावत्वोत्पद्यते नश्यति च। १७ तदेव शब्दः। १८ मीमांसकैः। १९ शब्दरूपः। २० जैनैः। २१ मीमांसकैः।

विवादो नार्थे । दृश्येतररूपता चैकस्य ब्रह्मवादं समर्थयते तद्वच्चेतनेतररूपतयाप्येकस्याऽवस्थित्यविरोधात् । घटादेरपि चैवं सर्वगतत्वानुषङ्गः-'सोपि हि दृष्टप्रदेशे दृश्योऽन्यत्र चादृश्यः' इति वदतो न वक्त्रं वक्रीभवेत् । सर्वत्र चास्य संस्कारे सर्व-
५ दोपलब्धिः स्यात्, न वा कचित्कदाचित् विशेषाभावात् ।

स्वरूपपरिपोषः संस्कारोस्य; इत्यप्यऽचर्चिताभिधानम्; नित्यस्य स्वभावान्यथाकरणाऽसम्भवात् । करणे वा स्वभावातिशयपक्षभावी दोषोनुषज्यते ।

नापि व्यक्तिसमवायः; वर्णस्य व्यक्त्यऽसम्भवात्, अन्यथा
१० सामान्यात्कोस्य विशेषः ? अत एव न तद्ग्रहणापेक्षग्रहणता ।

नापि व्यञ्जकसन्निधानमात्रम्; सर्वत्र सर्वदा सर्वप्रतिपत्तृभिः सर्ववर्णानां ग्रहणप्रसङ्गात् । ननु प्रतिनियतेन ध्वनिना प्रतिनियतो वर्णः संस्कृतः प्रतिनियतेनैव प्रतिपत्त्रा प्रतीयते तथैव सामर्थ्यात् । उक्तं च—

१५ "विषयस्यापि संस्कारे तेनैकस्यैव संस्कृतिः ।
नरैः सामर्थ्यभेदाच्च न सर्वैरवगम्यते ॥ १ ॥
यथैवोत्पद्यमानोयं न सर्वैरवगम्यते ।
दिग्देशाद्यविभागेन सर्वान्प्रति भवन्नपि ॥ २ ॥
तथैव यत्समीपस्थैर्नादैः स्याद्यस्य संस्कृतिः ।
२० तैरेव श्रूयते शब्दो न दूरस्थैः कथञ्चन ॥ ३ ॥"

[मी० श्लो० शब्दनि० श्लो० ८३-८६] इति ।

तदप्यपेशलम्; तेषां तदुपलम्भाऽसामर्थ्ये सर्वदाऽनुपलम्भप्रसङ्गाद्बधिरवत् । यदा तत्समीपस्थैर्व्यञ्जकैर्व्यज्यतेऽसौ तदा तैरेवोपलभ्यते इत्यप्यसुन्दरम्; यतस्तेषां व्यञ्जकैः किं क्रियते
२५ येन ते तैर्नियमेनापेक्षन्ते ऽकिञ्चित्करेऽपेक्षाऽसम्भवात् ? तद्ग्रहणे योग्यतेति चेत्; किमात्मनः, शब्दस्य, इन्द्रियस्य वा ? आद्यविकल्पद्वये सर्वदोपलम्भोऽनुपलम्भो वा स्यात् । इन्द्रियसंस्कारस्तु निराकरिष्यते ।

---

१ (एकस्यैव शब्दस्य दूरस्थत्वाद्दृश्यत्वरूपतास्वीकारादद्वैतं सिध्यतीत्यर्थः) । २ ब्रह्मवादसमर्थने हेतुमाह । ३ द्वितीयपक्षोयम् । ४ संस्कृतत्वेन । ५ ध्वनिभिः । ६ स स्वभावस्ततो भिन्नोऽभिन्नो वा ? भिन्नश्चेत्र तैर्ध्वनिभिः शब्दस्य करणम् इत्यादिः । ७ अन्यथा=शब्दस्य व्यक्तिसत्त्वे सामान्यतादिरूपताप्रसङ्गोपि स्यादित्यर्थः । ८ तस्य=शब्दसंस्कारस्य । ९ शब्दस्य ।

यदप्युक्तम्—यथैवोत्पद्यमानोऽयमित्यादि; तदप्यसङ्गतम्; न हि दिगाद्यपेक्षयाऽस्माभिस्तद्ग्रहणमिष्यतेऽपि तु श्रवणान्तर्गतत्वेन। अतो यस्यैव श्रवणान्तर्गतो यः शब्दः स तेनैव गृह्यते। सर्वगतवर्णपक्षे तु नायं परिहारो निखिलवर्णानां सकलप्रतिपत्तृश्रवणान्तर्गतत्वेन तथैवोपलम्भप्रसङ्गात्। ५

आवरणविगमः शब्दसंस्कारः; इत्यप्यसत्यम्; यतः प्रमाणान्तरेण शब्दसद्भावे सिद्धे तस्यावरणं सिद्ध्येत् स्पार्शनप्रत्यक्षप्रतिपन्ने घटेऽन्धकारादिवत्। न चासौ सिद्धः। तत्कथमस्यावरणम्? नित्यस्याऽस्याऽनाधेयाऽप्रहेयाऽतिशयात्मतयाऽस्याकिञ्चित्करत्वाच्च। न चाऽकिञ्चित्करः कस्यचिदावरणमतिप्रस- १० ङ्गात्। उपलब्धिप्रतिबन्धकारणात्त्वेत्; न; तज्जननैकस्वभावस्य तदयोगात्। न हि कारणाऽक्षये कार्यक्षयो युक्तस्तस्याऽतत्कार्यत्वप्रसङ्गात्। कथमेवं कुड्यादयो घटादीनामावारका इति चेत्; तज्जनकस्वभावखण्डनात्। कथमन्यस्योपलब्धिं जनयन्तीति चेत्? तं प्रति तत्स्वभावत्वात्। कथमेकस्योभयरूपता? इत्यप्य- १५ चोद्यम्; तथा दृष्टत्वात्। शब्दस्यापि स्वभावखण्डनेऽनित्यतेत्युक्तम्।

सर्वगतत्वे चास्याव्रियमाणत्वायोगः। आवार्या हि येनाव्रियते तदावारकम्, यथा पटो घटस्य। शब्दस्त्वावारकमध्ये तद्देशे तत्पार्श्वे च सर्वत्र विद्यमानत्वात्कथं केनचिदा- २० व्रियेत? प्रत्युत स एवावारकः स्यात्। तद्वत्तदावारकमपि सर्वगतमिति चेत्; न तर्ह्यावारकम्। न ह्याकाशमात्मादीनामावारकम्। मूर्त्तत्वात्तदिति चेत्; न तर्हि सर्वगतं घटादिवत्।

अथ यावद्व्योमव्यापिनो बहव एवास्यावारकाः ते; किं सान्तराः, निरन्तरा वा? यदि सान्तराः; न तर्हि तस्यावरणम्, तन्मध्ये २५ तद्देशे तत्पार्श्वे च विद्यमानत्वात्। अथ स्वमाहात्म्यात्तथापि स्वदेशे तदावारकाः; तर्ह्यन्तराले तदुपलम्भप्रसङ्गः। तथा च सान्तरा प्रतिपत्तिः प्रतिवर्णं खण्डशः प्रतिपत्तिश्च स्यात्। सर्वत्र सर्वदा सर्वात्मना विद्यमानत्वान्न दोषश्चेत्; नैवम्; प्रतिप्रदेशमकारादिबहुत्वस्य ध्वन्यादिवैफल्यस्य चानुषङ्गात्, तदभावेप्यन्तराले ३० उपलम्भसम्भवात्। अथान्तरालेऽसन्तोप्यावारकाः; तर्ह्येकमेवावारकं प्रदेशानियतं कल्पनीयं किं तद्बहुत्वेन? अन्यत्राविद्यमानं

---

१ आदिना देशकालादिर्ग्राह्यः। २ जैनैः। ३ अन्धकारादिर्यथाऽऽवरणं घटस्य। ४ आवारकेण। ५ मूलपुस्तके 'अन्यस्वा–' इति।

कथमावारकमिति चेत्? अन्तरालवदिति [1]ब्रूमः। तन्मते सान्तराः। निरन्तरत्वे चैषाम् तद्वच्छब्दस्यापि निरन्तरत्वादावार्यावारकभावः समान एवोभयत्र। अथ वस्तुस्वाभाव्यात् स्तिमिता वायव एव तदावारकाः; ननु दृष्टे वस्तुन्येतद्वक्तुं शक्यम्, यथा दृष्टेऽग्नौ दाहकत्वेन 'वस्तुस्वाभाव्यादग्निर्दहति न जलम्' इत्युच्यते। न च तथाविधा वायवो दृष्टाः। नापि सन् शब्दस्तैराव्रियमाणो येनैवं स्यात्। [2]अदृष्टकल्पनमुभयत्र समानम्। तन्न किञ्चित्तस्यावारकम्।

अस्तु वा तत्, तथाप्यस्य कुतो विगमः? ध्वनिभ्यश्चेत्; न; तत्सद्भावावेदकप्रमाणप्रतिषेधतस्तेषामसत्त्वात्। सत्त्वे वा कुतस्तेषामुत्पत्तिः? ताल्वादिव्यापाराच्चेत्; न; तद्वच्छब्दस्यापि तद्व्यापारे सत्युपलम्भतस्तत्कार्यतानुषङ्गात्। ननु खननाद्यनन्तरं व्योमोपलभ्यते, न च तत्कार्यमतोऽनैकान्तिकत्वम्। तदुक्तम्—

"अनैकान्तिकता तावद्धेतूनामिह कथ्यते।
प्रयत्नानन्तरं दृष्टिर्नित्येऽपि न विरुध्यते ॥ १ ॥"
[मी० श्लो० शब्दनि० श्लो० २९.]

"आकाशमपि नित्यं सद्यदा भूमिजलावृतम्।
व्यज्यते तदपोहेन खननोत्सेचनादिभिः ॥ २ ॥
प्रयत्नानन्तरं ज्ञानं तदा तत्रापि दृश्यते।
तेनानैकान्तिको हेतुर्यदुक्तं तत्र दर्शनम् ॥ ३ ॥
अथ स्थगितमप्येतदस्त्येवेत्यनुमीयते।
शब्दोऽपि प्रत्यभिज्ञानात्प्रागस्तीत्यवगम्यताम् ॥ ४ ॥"
[मी० श्लो० शब्दनि० श्लो० ३०-३२]

तदप्यसङ्गतम्; ध्वनीनामप्येवं ताल्वादिव्यापारकार्यत्वाभावप्रसङ्गात्। एकरूपता चाकाशस्याप्यसिद्धा; स्वविज्ञानजननैकस्वभावत्वे हि तस्य न खननाद्यनन्तरमेवोपलब्धिः किन्तु पूर्वमपि स्यात्। तदस्वभावत्वे वा न कदाचनाप्युपलब्धिः स्याद्विशेषाभावात्। विशेषे वा एकरूपताव्याघातः। प्रत्यभिज्ञानाच्छब्दे प्राक् सत्त्वसिद्धिश्च ध्वनावपि समाना 'य एव पूर्वमकारस्य व्यञ्जको ध्वनिः स एव पश्चादपि' इति प्रतीतेः। तथा च व्यञ्जनस्यापि सर्वत्र सर्वदा सद्भावे ताल्वादिव्यापारवैफल्यं सर्वत्र सर्वदा व्यङ्ग्यप्रतीतिश्च स्यात्। तन्न ताल्वादिव्यापारकार्यता ध्वनीनामेव। अतः कथं तेषां सत्त्वमुत्पादकाभावात्?

---

१ जैनाः। २ शब्दो वायोरावारकः कुतो न स्यादिति जैनेनोक्ते परः प्राह-अदृष्टकल्पना स्यादिति। तस्योपरि जैनेनोच्यते।

सन्तु वा ते, तथाप्यतः क्वचिदावरणविगमे विवक्षितवर्णवन्निखिलवर्णोपलब्धिप्रसङ्गः, व्यापकत्वेन सर्वेषां तत्र सद्भावात्, तथा च ध्वन्यन्तरस्य वैफल्यम्। ननु चावार्याणामिवावारकाणां तद्वच्च तदपनेतॄणां भेदस्तेनायमदोषः। उक्तञ्च—

"व्यञ्जकानां हि वायूनां भिन्नावयवदेशता। ५
जातिभेदश्च तेनैवं संस्कारो व्यवतिष्ठते ॥ १ ॥
अन्यार्थं प्रेरितो वायुर्यथान्यं न करोति वः।
तथान्यवर्णसंस्कारशक्तो नान्यं करिष्यति ॥ २ ॥
अन्यैस्तात्वादिसंयोगैर्वर्णो नान्यो यथैव हि।
तथा ध्वन्यन्तराक्षेपो न ध्वन्यन्तरसारिभिः ॥ ३ ॥ १०
तस्मादुत्पत्त्यभिव्यक्त्योः कार्यार्थापत्तितः समः।
सामर्थ्यभेदः सर्वत्र स्यात्प्रयत्नविवक्षयोः ॥ ४ ॥"

[मी० श्लो० शब्दनि० श्लो० ७९-८२]

तदप्यसमीक्षिताभिधानम्; अभिन्नदेशेऽभिन्नेन्द्रियग्राह्ये चावार्ये आवरणभेदस्याभिव्यञ्जकभेदस्य चाऽप्रतीतेः। न खलु १५ घटशरावोदञ्चनादीनां तथाविधानामावरणव्यञ्जकभेदो दृष्टः, काण्डपटादेरेकस्यैवावरणत्वस्य प्रदीपादेश्चैकस्यैवाभिव्यञ्जकत्वस्य प्रसिद्धेः। तथा च प्रयोगः-शब्दाः प्रतिनियतावरणावार्याः प्रतिनियतव्यञ्जकव्यङ्ग्या वा न भवन्ति, समानदेशैकेन्द्रियग्राह्यत्वात्, घटादिवत्। न चाऽऽवार्यवर्णानां देशभेदो युक्तः; व्यापक- २० त्वाभावप्रसङ्गात्। देशभेदो हि परस्परदेशपरिहारेणावस्थानात्प्रसिद्धो गोकुञ्जरवत्। तथा चावरणभेदस्याऽसत्तः कथं जातिभेदप्रकल्पनं तदपनेतृजातिभेदप्रकल्पनं च श्रेयो यतो 'जातिभेदश्च' इत्यादि शोभेत।

नन्वेकेन्द्रियग्राह्यस्यापि व्यङ्ग्यस्य व्यञ्जकभेदो दृष्टः, यथा २५ भूमिगन्धस्य जलसेकः न शरीरगन्धस्य। अस्यापि मरीचिचक्रसहायस्तैलाभ्यङ्गो न भूमिगन्धस्येति। सत्यं दृष्टः; स तु विषयसंस्कारकस्य व्यञ्जकस्य, न त्वावरणविगमहेतोः। नैव वा गन्धस्याभिव्यञ्जका जलसेकादयोऽपि तु कारकाः, तत्सहकारिणः पृथिव्यादेर्विशिष्टस्य गन्धस्योत्पत्तेः पूर्वं तत्र तत्सद्भावावेदक- ३० प्रमाणाभावात्। कारकाणां चैकेन्द्रियग्राह्ये समानदेशे च कार्ये नियमो दृष्टः। यथैकत्र स्थिता अपि यवबीजादयो न सर्वे शाल्यङ्कुरं यवाङ्कुरं चोत्पादयन्ति, किन्तु शालिबीजमेव शाल्यङ्कुरं यवबीजं च यवाङ्कुरम् इति।

एतेन 'अन्यैस्ताल्वादिसंयोगैः' इत्यादि निरस्तम्; कथम्? ध्वन्यन्तरसारिभिस्ताल्वादिभिर्यद्यपि ध्वन्यन्तराक्षेपो नास्ति तथापि य एव तैराक्षिप्यते तत एव सर्ववर्णश्रुतेर्ध्वन्यन्तराक्षेपपक्षदोषस्तदवस्थः। तन्न शब्दसंस्कारोभिव्यक्तिर्घटते।

५ अथेन्द्रियसंस्कारोसौ। तदुक्तम्—

"अथापीन्द्रियसंस्कारः सोप्यधिष्ठानदेशतः।
शब्दं न श्रोष्यति श्रोत्रं तेनाऽसंस्कृतशष्कुलि ॥ १ ॥
अप्राप्तकर्णदेशत्वाद्ध्वनेर्न श्रोत्रसंस्क्रिया।
अतोऽधिष्ठानभेदेन संस्कारनियमस्थितिः ॥ २ ॥"

१० [मी० श्लो० शब्दनि० श्लो० ६९-७०]

"यद्यपि व्यापि चैकं च तथापि ध्वनिसंस्कृतिः।
अधिष्ठानेषु सा यस्य तच्छब्दं प्रतिपत्स्यते ॥ १ ॥"

[मी० श्लो० शब्दनि० श्लो० ६८] इति।

अत्रापि सकृत्संस्कृतं श्रोत्रं युगपत्सर्ववर्णान् शृणुयात्।
१५ न ह्यञ्जनादिना संस्कृतं चक्षुः सन्निहितं नीलधवलादिकं कञ्चित्पश्यति कञ्चिन्नेति। यत्तैलादिना[1] संस्कृतं श्रोत्रं वा कांश्चिदेव गकारादीन् शृणोति कांश्चिन्नेति नियमो दृष्टो येनात्रापि तथा कल्पना स्यात्।

ततो निराकृतमेतत्—

२० "तथा(यथा)घटादेर्दीपादिरभिव्यञ्जक इष्यते।
चक्षुषोऽनुग्रहादेवं ध्वनिः स्याच्छ्रोत्रसंस्कृतेः ॥ १ ॥
न चा(च)पर्यनुयोगोत्र केनाकारेण संस्कृतिः।
उत्पत्तावपि तुल्यत्वाच्छक्तिस्तत्राप्यतीन्द्रिया ॥ २ ॥"

[मी० श्लो० शब्दनि० श्लो० ४२-४३] इति।

२५ प्रदीपादिनानुगृहीतचक्षुषा घटाद्यनेकार्थग्रहणवत् ध्वन्यनुगृहीतश्रोत्रेणाप्येकदानेकशब्दश्रवणप्रसङ्गात्। प्रयोगः-श्रोत्रमेकेन्द्रियग्राह्याभिन्नदेशावस्थितार्थग्रहणाय प्रतिनियतसंस्कारकसंस्कार्यं न भवति इन्द्रियत्वाच्चक्षुर्वत्। तन्न श्रोत्रसंस्कारोप्यभिव्यक्तिर्घटते।

३० अस्तु तर्ह्युभयसंस्कारः। न चात्रोक्तदोषानुषङ्गः। तदुक्तम्—

"द्वयसंस्कारपक्षे तु वृथा दोषद्वये वचः।
येनान्यतरवैकल्यात्सर्वैः सर्वो न गृह्यते ॥ १ ॥"

[मी० श्लो० शब्दनि० श्लो० ८६]

---

१ सर्वशब्दश्रवणोत्पादितैलविशेषोयम्।

तदप्ययुक्तम्; उक्तदोषादेव, तथाहि-यद्येकवर्णग्राहकत्वेन संस्कृतं श्रोत्रं संस्कृतं वर्णं प्रतिपद्यते तदा तत्रत्यसर्ववर्णान्प्रतिपद्येत संस्कृतं च वर्णं सर्वत्र सर्वदाऽवस्थितत्वेन, अन्यथा तत्प्रतीतिरेव न भवेत्तदात्मकत्वात्तस्य। अतो व्यङ्ग्यव्यञ्जकभावस्य विचार्यमाणस्याऽयोगान्न व्यञ्जकध्वन्यधीनो विभिन्नदेशकालस्वभावतया शब्दस्योपलम्भोऽपि तु तत्स्वभावभेदनिबन्धनः। ५

यच्चोक्तम्-'जलपात्रेषु च' इत्यादि; तदप्यसाम्प्रतम्; तत्रोपलभ्यमानस्यादित्यप्रतिबिम्बस्यानेकत्वात्। 'गगनतलावलम्बी हि सविता तत्रोपलभ्यते' इत्यत्र न प्रत्यक्षं प्रमाणं तत्स्वरूपाप्रतिभासनात्। तस्य हि स्वरूपं गगनतलावलम्बि चैकं च, तन्नावभासते। यच्चावभासि जलपात्रावलम्बि चानेकं च, तद्वृक्षच्छायादिवद्वस्त्वन्तरमेव। न चान्यप्रतिभासेऽन्यप्रतिभासो नामाऽतिप्रसङ्गात्। न च जलभानोर्गगनभानुना सादृश्यादेकत्वम्; कमनीयकामिनीनयनयोरपि तत्प्रसङ्गात्। नापि तद्विकारे जलभानुविकारादेकत्वम्; वृक्षच्छाययोरपि तत्प्रसङ्गात्। १० १५

ननु तत्र तत्प्रतिबिम्बानां वस्त्वन्तरत्वे कुतः प्रादुर्भावः स्यादिति चेत्? जलादित्यादिलक्षणस्वसामग्रीविशेषात्। तर्हि स्वच्छताविशेषसद्भावाज्जलादर्शादयो मुखादित्यादिप्रतिबिम्बाकारविकारधारिणः कस्मान्न सर्वदोपलभ्यन्ते इति चेत्? स्वसामग्र्यऽभावतोऽभावाच्छब्दमुखादिवत्। कश्चिद्धि विकारः सहकारिनिवृत्तावप्यनिवर्त्तमानो दृष्टो यथा घटादिः, कश्चित्तु निवर्त्तमानो यथा शब्दादिः, अचिन्त्यशक्तित्वाद्भावानाम्। ताल्वादिव्यापारसहकारिनिवृत्तौ हि पुद्गलस्य श्रावणस्वभावव्यावृत्तिः। स्रग्वनितानिवृत्तौ चाल्हादनाकारव्यावृत्तिरात्मनः सकलजनप्रसिद्धा, एवमादित्यादिसहकारिनिवृत्तौ जलादेस्तत्प्रतिबिम्बाकारनिवृत्तिरविरुद्धा। २० २५

ततो निराकृतमेतत्-'अत्र ब्रूमो यदा तावज्जले सौर्येण' इत्यादि; स्वप्रदेशस्थतया सवितुर्ग्रहणासिद्धेः। 'चाक्षुषं तेजः प्रतिस्रोतः प्रवर्त्तितम्' इति चातीवाऽसङ्गतम्; प्रमाणाभावात्। न हि चक्षुस्तेजांसि जलेनाभिसम्बन्ध्य पुनः सवितारं प्रति प्रवर्त्तितानि प्रत्यक्षादिप्रमाणतः प्रतीयन्ते। यथा च चक्षूरश्मीनां विषयं प्रति ३०

१ मुखादिप्रतिबिम्बाकारस्य। २ चक्रचीवरादि। ३ उपरेरुत्तरकाले। ४ आदिना मुखम्। ५ कथम्। ६ शब्दरूपस्य। ७ व्यावृत्तनम्। ८ यस्माद्वस्त्वन्तरत्वं सिद्धं प्रतिबिम्बानाम्। ९ पुनः। १० सौर्येण तेजसा। ११ घटादिपदार्थम्।

प्रवृत्तिर्नास्ति तथा चक्षुरप्राप्यकारित्वप्रघट्टके प्रतिपादितम् । इत्यलंमतिविस्तरेण ।

यच्चान्यदुक्तम्-'देशभेदेन भिन्नत्वम्' इत्यादि; तदप्यसारम्; यतो यदि प्रत्यक्षमेवानुमानस्य बाधकं नानुमानं प्रत्यक्षस्य; तर्हि
५ चन्द्रार्कादौ स्थैर्याध्यक्षं देशाद्देशान्तरप्राप्तिलिङ्गजनितगत्यनुमानेन बाध्यं न स्यात् । अथास्य प्रत्यक्षरूपतैव नास्ति बाधितविषयत्वात्; तत्प्रकृतेपि समानम्, लूनपुनर्जातनखकेशादिवत्सादृश्यप्रतीत्या तद्भानात्वप्रसाधकानुमानेन चाऽत्राप्येकत्वप्रतीतेर्बाधितविषयत्वाऽविशेषात् । अतोऽयुक्तमेतत्—

१० "स एवेति मतिर्नापि सादृश्यं न च तत्कंचित् ।
विनावयवसामान्यैर्वर्णेष्ववयवा न च ॥"
[मी० श्लो० स्फोटवा० श्लो० १८] इति ।

अवयवसामान्यस्याप्यत्रात एव प्रसिद्धेः । तेनायुक्तमुक्तम्-'पर्यायेण' इत्यादि; देवदत्ते हि 'स एवायम्' इति प्रत्ययः, अत्र
१५ तु 'तेनानेन चायं सदृशः' इति । न च सदृशप्रत्ययादेकत्वम्; गोगवययोरपि तत्प्रसङ्गात् । यच्चाप्युच्यते—

"जैनकापिलनिर्दिष्टं शब्दश्रोत्रादिसर्पणम् ।
साधीयोऽस्मात्तदप्यत्र युक्त्या नैवावतिष्ठते ॥ १ ॥"
[मी० श्लो० शब्दनि० श्लो० १०६]

२० जैनेन हि निर्दिष्टं श्रोतारं प्रति शब्दस्य सर्पणं कापिलेन तु वक्तारम् । श्रोत्रादेर्यत्तदेव साधीयोऽस्मादैयायिकोपकल्पितात् । वीचीतरङ्गन्यायेन शब्दस्यामूर्त्तस्यागमनात् । तदप्यत्र युक्त्या नैवावतिष्ठते । यस्मात्—

"शब्दस्यागमनं तावदृष्टं परिकल्पितम् ।
२५ मूर्त्तिस्पर्शादिमत्त्वं च तेषामभिभवः सताम् ॥ १ ॥

१ चक्षुरश्मीनां विषयं प्रति गमननिराकरणेन । २ बाधकम् । ३ प्राहि । ४ स्थैर्यलक्षणस्य । ५ गकारे । ६ कथम् । ७ गकार । ८ गकारे । ९ सादृश्यप्रतीत्यैकत्वप्रतीतेर्बाधितविषयत्वं यतः । १० स एवायं गकारादिः । ११ गकारादौ । १२ वर्णानां निरंशत्वात् । १३ अंशाः । १४ तेन सदृशोयं गकारः । १५ वर्णेन । १६ वर्णः । १७ अन्यथा । १८ मीमांसकेन । १९ सा[illegible] । २० श्रेयः । २१ अग्रे वक्ष्यमाणात् । २२ जगति वर्णेषु वा । २३ मीमांसकस्य । २४ गमनम् । २५ लहरी । २६ कुतः । २७ प्रत्यक्षादिप्रमाणेनाप्रातीतिकम् । २८ कुड्यादिना तिरोभावः ।

त्वगग्राह्यत्वमन्ये च भागाः सूक्ष्माः प्रकल्पिताः ।
तेषामदृश्यमानानां कथं च रचनाक्रमः ॥ २ ॥
कीदृशाद्रचनाभेदाद्वर्णभेदश्च जायताम् ।
द्रवित्वेन विना चैषां संक्लेषः(संश्लेषः)कल्प्यते कथम् ॥ ३ ॥
आगच्छतां च विश्लेषो न भवेद्वायुना कथम् ।
लघवोऽवयवा ह्येते निबद्धा न च केनचित् ॥ ४ ॥
वृक्षाद्यभिहतानां च विश्लेषो लोष्टवद्भवेत् ।
एकश्रोत्रप्रवेशे च नान्येषां स्यात्पुनः श्रुतिः ॥ ५ ॥
न चावान्तरवर्णानां नानात्वस्यास्ति कारणम् ।
न चैकस्यैव सर्वासु गमनं दिक्षु युज्यते ॥ ६ ॥"
[मी० श्लो० शब्दनि० श्लो० १०७-११२]

इत्यादि । तच्च व्यञ्जकवाय्वागमनेपि समानम् । शक्यते हि शब्दस्थाने वायुं पठित्वा 'वायोरागमनं तावददृष्टं परिकल्पितम्' इत्याद्यभिधातुम् ।

किञ्च, अदृष्टकल्पनागौरवदोषो भवत्पक्ष एवानुषज्यते; तथाहि-शब्दस्य पूर्वापरकोट्योः सर्वत्र च देशेऽनुपलभ्यमानस्य सत्त्वम्, तस्य चावारकाः स्तिमिता वायवः प्रमाणतोऽनुपलभ्यमानाः कल्पनीयाः, तदपनोदकाश्चान्ये, तेषां शक्तिनानात्वं कल्पनीयम्, नास्मत्पक्षे । पौद्गलिकत्वं च यथावसरं गुणनिषेधप्रक्रमे प्रसाधयिष्यामः । तत्सिद्धं घटस्य चक्रादिव्यापारकार्यत्ववच्छब्दस्य ताल्वादिव्यापारकार्यत्वमिति साधूक्तम्—'आप्तवचनम्' इत्यादि ।

ननु शब्दार्थयोः सम्बन्धासिद्धेः कथमाप्तप्रणीतोपि शब्दोऽर्थे ज्ञानं कुर्यात् येन आप्तवचननिबन्धनमित्यादि वचः शोभेतेत्याशङ्कापनोदार्थम् 'सहजयोग्यता' इत्याद्याह—

सहजयोग्यतासङ्केतवशाद्धि शब्दादयः वस्तुप्रतिपत्तिहेतवः ॥ १०० ॥

१ अवयवाः । २ अदृष्टाः । ३ रचना=बन्धः । ४ अदृष्टः । ५ भेदः । ६ वर्णोत्पत्तौ । ७ शब्दानां पुद्गलरूपाणाम् । ८ जैनानाम् । ९ शब्दानां वायूनां च । १० जैनोक्ताः । ११ सम्बद्धाः । १२ कारणेन । १३ वर्णवायूत्पत्तौ । १४ पुद्गलरूपाणां वर्णानाम् । १५ एकस्य नरस्य । १६ नृणाम् । १७ अव्यापकः शब्दो जैनमते यतः । १८ मध्योत्पन्नानाम् । १९ नैयायिकस्य । २० गस्य । २१ जैनस्य । २२ ताल्वादिजनितशब्दाभिव्यञ्जकध्वनेः । २३ मीमांसकपक्षे । २४ व्यञ्जकाः । २५ जैन । २६ सौगतः । २७ निराकरणार्थम् ।

सहजा स्वाभाविकी योग्यता शब्दार्थयोः प्रतिपाद्यप्रतिपादकशक्तिः ज्ञानज्ञेययोर्ज्ञाप्यज्ञापकशक्तिवत्। न हि तज्ज्ञाप्यतो योग्यतातोऽन्यः कार्यकारणभावादिः सम्बन्धोस्तीत्युक्तम्। तस्यां सत्यां संकेतः। तद्वशाद्धि स्फुटं शब्दादयो वस्तुप्रतिपत्तिहेतवः।

५ **यथा मेर्वादयः सन्ति ॥ १०१ ॥**

इति।

ननु चासौ सहजयोग्यताऽनित्या, नित्या वा? न तावदनित्या; अनवस्थाप्रसङ्गात्–येन हि प्रसिद्धसम्बन्धेन 'अयम्' इत्यादिना शब्देनाप्रसिद्धसम्बन्धस्य घटादेः शब्दस्य सम्बन्धः क्रियते
१० तस्याप्यन्येन प्रसिद्धसम्बन्धेन सम्बन्धस्तस्याप्यन्येनेति। नित्यत्वे चास्याः सिद्धं नित्यसम्बन्धाच्छब्दानां वस्तुप्रतिपत्तिहेतुत्वमिति मीमांसकाः; तेप्यतत्त्वज्ञाः; हस्तसंज्ञादिसम्बन्धवच्छब्दार्थसम्बन्धस्यानित्यत्वेप्यर्थप्रतिपत्तिहेतुत्वसम्भवात्। न स्मृतु हस्तसंज्ञादीनां स्वार्थेन सम्बन्धो नित्यः, तेषामनित्यत्वे तदाश्रितसम्बन्धस्य
१५ नित्यत्वविरोधात्। न हि भित्त्यपाये तदाश्रितं चित्रं न व्येतीत्यभिधातुं शक्यम्।

न चानित्यत्वेऽस्यार्थप्रतिपत्तिहेतुत्वं न दृष्टम्; प्रत्यक्षविरोधात्। एवं शब्दार्थसम्बन्धेप्यनेनाच्यम्। स हि न तावदनाश्रितः; नभोवदनाश्रितस्य सम्बन्धत्वाऽसम्भवात्। आश्रितश्चेत्कि
२० तदाश्रयो नित्यः, अनित्यो वा? नित्यश्चेत्; कोयं नित्यत्वेनाभिप्रेतस्तदाश्रयो नाम? जातिः, व्यक्तिर्वा? न तावज्जातिः; तस्याः शब्दार्थत्वे प्रवृत्त्याद्यभावप्रतिपादनात्, निराकरिष्य-

१ न स्वोपाधिकी। २ वाच्यवाचकसामर्थ्यम्। ३ अपरः। ४ पूर्वं प्रथमपरिच्छेदे। ५ अस्य शब्दस्यायमर्थः, अस्य गोशब्दस्य सास्नादिमानर्थ इति च। ६ प्रागुक्ताः। ७ आदिना हस्ताङ्गुलीसंज्ञाः। ८ उच्चारणे। ९ अन्यथा। १० कथम्? यथा हि। ११ अर्थेन सह। १२ इत्यादिना च। १३ यथा प्रसिद्धसम्बन्धेन घटशब्देन घट एव वाच्यस्तथाऽप्रसिद्धसम्बन्धेनापि घटशब्देन घट एव वाच्य इति। १४ शब्देन। १५ वदन्ति। १६ आदिना नयनाङ्गुल्यादिसंज्ञाः। १७ विनाशे। १८ विनश्यति। १९ वक्तुम्। २० अन्यथा। २१ प्रत्यक्षेण सिद्धा हस्तसंज्ञादयोऽनित्या यतः। २२ अनित्यहस्तसंज्ञादिसम्बन्धस्यार्थप्रतिपत्तिप्रतिपादकत्वप्रकारेण। २३ ताद्विः। २४ वक्ष्यमाणम्। २५ अन्यथा। २६ अमूर्तनभोवत्। २७ गगनस्य स्वर्थेन सम्बन्ध उपचारत एव, न तु साक्षात्तस्याऽमूर्तत्वात्। २८ दृष्टः। २९ सामान्यम्। ३० विशेषः। ३१ यदा सामान्यरूपौ शब्दार्थौ सम्बन्धस्य वाच्यवाचकरूपस्याधारभूतौ तदा तावेव विषयीकुर्यान्छब्द इति भावः। ३२ आदिना निवृत्तिः। ३३ पूर्वम्।

मानत्वाच्च । व्यक्तेस्तु तदाश्रयत्वे कथं नित्यत्वमनभ्युपगमात्तथाप्रतीत्यभावाच्च । अनित्यत्वे च तदाश्रयत्वस्य सिद्धं तद्व्यपाये सम्बन्धस्यानित्यत्वं भित्तिव्यपाये चित्रवत् । ततोऽयुक्तमुक्तम्—

"नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः ।
सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः ॥"
[वाक्यपदी० १।२३] इति;

सदृशपरिणामविशिष्टस्यार्थस्य शब्दस्य तदाश्रितसम्बन्धस्य चैकान्ततो नित्यत्वासम्भवात् । सर्वथा नित्यस्य वस्तुनः क्रमयौगपद्याभ्यामर्थक्रियासम्भवतोऽसत्त्वं चाऽश्वविषाणवत् । अनवस्थादूषणं चायुक्तमेव; 'अयम्' इत्यादेः शब्दस्यानादिपरम्परीतोऽर्थमात्रे प्रसिद्धसम्बन्धत्वात्, तेनावगतसम्बन्धस्य घटादिशब्दस्य सङ्केतकरणात् ।

नित्यसम्बन्धवादिनोऽपि चानवस्थादोषस्तुल्य एव-अनभिव्यक्तसम्बन्धस्य हि शब्दस्याभिव्यक्तसम्बन्धेन शब्देन सम्बन्धाभिव्यक्तिः कर्त्तव्या, तस्याप्यन्येनाभिव्यक्तसम्बन्धेनेति । यदि पुनः कस्यचित्स्वत एव सम्बन्धाभिव्यक्तिः; अपरस्यापि सा तथैवास्तीति सङ्केतक्रिया व्यर्था । शब्दविभागाभ्युपगमे चालं सम्बन्धस्य नित्यत्वकल्पनया । कल्पने चाऽगृहीतसङ्केतस्याप्यतोऽर्थप्रतिपत्तिः स्यात् । सङ्केतस्तस्य व्यञ्जकः; इत्यप्ययुक्तम्; नित्यस्य व्यङ्ग्यत्वायोगात् । नित्यं हि वस्तु यदि व्यक्तं व्यक्तमेव, अथाव्यक्तमव्यक्तमेव, अभिन्नस्वभावत्वात्तस्य । शब्दाभिव्यक्तिपक्षनिक्षिप्तदोषानुषङ्गश्चात्रापि तुल्य एव ।

१ चतुर्थपरिच्छेदे । २ नित्यजातेः । ३ सम्बन्धस्य । ४ परेण । ५ व्यक्तेर्नित्यत्वस्य । ६ व्यक्तिरूपस्य । ७ अनित्यः सम्बन्धो यतः । ८ सामान्य । ९ वाच्यवाचकलक्षणः । १० मीमांसायां ग्रन्थे । ११ अभ्युपगताः । १२ विषमपदव्याख्यानमनुतन्त्रं तेन सह वर्तन्ते इति । तेषां सूत्राणाम् । १३ सर्वथा । १४ प्रवाहतः । १५ पुरोवर्तिव्यक्तिनिर्द्धारणार्थे । १६ अर्थेन सह । १७ मीमांसकस्य । १८ कथम् । १९ अर्थेन सह । २० अनवस्थापरिहारार्थम् । २१ नापरेण । २२ हेतोः । २३ पुरुषेण क्रियमाणा । २४ अयमित्यादिशब्दस्य स्वत एव सम्बन्धः । घटादिशब्दस्य तु अयमित्यादिना शब्देनापरेण सम्बन्ध इति । २५ नित्यत्वस्य । २६ तुः । २७ सम्बन्धस्य नित्यत्वात् । २८ नित्यशब्दस्य । २९ सङ्केतेन । ३० एकस्वभावत्वात् । ३१ नित्यसम्बन्धाभिव्यक्तौ अष्टविकल्पप्रकारेण ।

किञ्च, सङ्केतः पुरुषाश्रयः, स चातीन्द्रियार्थज्ञानविकलतयाऽन्यथापि वेदे सङ्केतं कुर्यादिति कथं न मिथ्यात्वलक्षणमस्याप्रामाण्यम् ?

किञ्च, असौ नित्यसम्बन्धवशादेकार्थनियतः, अनेकार्थनियतो वा स्यात् ? एकार्थनियतश्चेत्किमेकदेशेन, सर्वात्मना वा ? सर्वात्मनैकार्थनियमे अर्थान्तरे वेदात्प्रतिपत्तिर्न स्यात्, ततश्चास्याज्ञानलक्षणमप्रामाण्यम् । एकदेशेन चेत्; स किमेकदेशोऽभिमतैकार्थनियतः, अनभिमतैकार्थनियतो वा ? अनभिमतैकार्थनियतश्चेत्; कथं न मिथ्यात्वलक्षणमप्रामाण्यम् ? अभिमतैकार्थनियतश्चेत्किं पुरुषात्, स्वभावाद्वा ? प्रथमपक्षे अपौरुषेयत्वसमर्थनप्रयासो व्यर्थः । पुरुषो हि रागाद्यन्धत्वात्प्रतिक्षिप्यते, तस्माच्चेद्वेदैकदेशोऽर्थनियमं प्रतिपद्यते, किमपौरुषेयत्वेन ? अनेकार्थनियमे च विरुद्धोप्यर्थः सम्भवेत्, तथा चास्य मिथ्यात्वम् ।

किञ्च, असौ सम्बन्ध ऐन्द्रियः, अतीन्द्रियः, अनुमानगम्यो वा स्यात् ? न तावदैन्द्रियः; स्वेन्द्रिये स्वेन रूपेणाप्रतिभासमानत्वात् । अतीन्द्रियश्चेत्; कथं प्रतिपत्त्यङ्गं ज्ञापकस्य निश्चयापेक्षणात् ? सन्निधिमात्रेण ज्ञापनेऽतिप्रसङ्गात् ।

अनुमानगम्यश्चेत्; न; लिङ्गाभावात् । तस्य हि लिङ्गं ज्ञानम्, अर्थः, शब्दो वा ? न तावज्ज्ञानम्; सम्बन्धासिद्धौ तत्कार्यत्वेनास्याऽनिश्चयात् । नाप्यर्थः; तस्य तेन सम्बन्धासिद्धेः । न हि सम्बन्धार्थयोस्तादात्म्यम्; सम्बन्धस्यानित्यत्वानुषङ्गात् । नापि तदुत्पत्तिः; अनभ्युपगमात् । असम्बद्धश्चार्थः कथं सम्बन्धं ज्ञापयत्यतिप्रसङ्गात् ? ज्ञापने वा शब्दा एव सम्बन्धविकलाः किमर्थं न ज्ञापयन्त्यलं सिद्धोपस्थायिना नित्यसम्बन्धेन ? तस्यार्थोपि

१ सर्वात्मरूपेण । २ पुरुषाणाम् । ३ वेदेनार्थान्तरप्रतिपत्त्यभावात् । ४ मीमांसकस्य । ५ मीमांसकैः । ६ वेदस्य । ७ द्वितीयपक्षे । ८ वेदस्य । ९ इन्द्रियविषयः । १० श्रोत्रलोचनलक्षणे । ११ असाधारणरूपेण । १२ वाच्यवाचकसामर्थ्यस्यातीन्द्रियत्वात् । १३ सम्बन्धस्य । १४ नाज्ञातं ज्ञापकं नाम । १५ शब्दार्थयोः सारूप्येण सम्बन्धस्यार्थज्ञापने । १६ सम्बन्धमात्रेण । १७ मीमांसकवत्सौगतानपि बोधयेदिति । १८ सम्बन्धेन सहाविनाभाविलिङ्गस्य । १९ सम्बन्धोऽस्ति ज्ञानात् । २० सम्बन्धासिद्धेरिति खपुस्तकीयः पाठः । २१ सम्बन्धोऽस्ति अर्थात् । २२ कथम् । २३ अन्यथा । २४ अर्थवत् । २५ सम्बन्धाद्गुणरूपादर्थोत्पत्तिः । २६ सम्बन्धेन सह । २७ तथा च खरविषाणं सम्बन्धं ज्ञापयतु । २८ असम्बद्धार्थेन । २९ सम्बन्धस्य ।

लिङ्गम् । नापि शब्दः; अर्थपक्षोक्तदोषानुषङ्गात् । ततो नित्यसम्बन्धस्य प्रमाणतोऽप्रसिद्धेर्न तद्वशाद्वेदोऽर्थप्रतिपादकः ।

अथ स्वभावादेवासौ तत्प्रतिपादकः; तन्न; 'अयमेवास्माकमर्थो नायम्' इति वेदेनानुक्तेः । तदुक्तम्—

"अयमर्थो नायमर्थ इति शब्दा वदन्ति न । ५
कल्प्योयमर्थः पुरुषैस्ते च रागादिविप्लुताः ॥ १ ॥"

[प्रमाणवा० ३।३१२]

इति । ततो लौकिको वैदिको वा शब्दः सहजयोग्यतासङ्केतवशादेवार्थप्रतिपादकोऽभ्युपगन्तव्यः प्रकारान्तरासम्भवात् ।

ननु चार्थप्रतिपादकत्वमेषामसम्भाव्यम्, य एव हि शब्दाः १० सत्यर्थे दृष्टास्त एवातीतानागतादौ तदभावेपि दृश्यन्ते । यदभावे च यद्दृश्यते न तत्तत्प्रतिबद्धम् यथाऽश्वाऽभावेपि दृश्यमानो गौर्न तत्प्रतिबद्धः, अर्थाभावेपि दृश्यन्ते च शब्दाः, तन्नैतेऽर्थप्रतिपादकाः, किन्त्वन्यापोहमात्राभिधायकाः । तदप्यविचारितरमणीयम्; अर्थवतः शब्दात्तद्रहितस्यास्यान्यत्वात् । न चान्यस्य व्यभि- १५ चारेऽन्यस्याप्यसौ युक्तः; अन्यथा गोपालघटिकादिधूमस्याग्निव्यभिचारोपलम्भात्पर्वतादिप्रदेशवर्त्तिनोपि स स्यात्, तथा च कार्यहेतवे दत्तो जलाञ्जलिः । सकलशून्यता च, स्वप्नादिप्रत्ययानां केषांचिद्विभ्रमोपलम्भतो निखिलप्रत्ययानां तत्प्रसङ्गात् । 'यत्नतः परीक्षितं कार्यं कारणं नातिवर्त्तते' इत्यन्यत्रापि समानम्—'यत्नतो २० हि शब्दोऽर्थवत्त्वेनरस्वभावतया परीक्षितोऽर्थं न व्यभिचरति' इति । तथा चान्यापोहमात्राभिधायित्वं शब्दानां श्रद्धामात्रगम्यम् ।

किञ्च, अन्यापोहमात्राभिधायित्वे प्रतीतिविरोधः-गवादिशब्देभ्यो विधिरूपावसायेन प्रत्ययप्रतीतेः । अन्यनिषेधमात्राभिधायित्वे च तत्रैव चरितार्थत्वात्सास्नादिमतोऽर्थस्यातोऽप्रतीतेः २५ तद्विषयाया गवादिबुद्धेर्जनकोऽन्यो ध्वनिरन्वेषणीयः । अथैकेनैव गोशब्देन बुद्धिद्वयस्योत्पादान्न परो ध्वनिर्मृग्यः; न; एकस्य विधिकारिणो निषेधकारिणो वा ध्वनेर्युगपद्विज्ञानद्वयलक्षणफला-

१ सौगतः । २ विद्यमाने । ३ काले । ४ भा । ५ अपोहाते व्यावर्त्यतेनेनाभावेनेति । ६ एव । ७ भिन्नत्वात् । ८ धूमात् । ९ परेण । १० कथम् । ११ अर्थे । १२ धूमादि । १३ अग्न्यादि । १४ शब्दे । १५ कथम् ? तथा हि । १६ व्यभिचाराभावे च । १७ कुतः । १८ अस्तित्वरूपनिश्चयेन । १९ सास्नादिमदर्थस्य । २० अगवादिव्यावृत्ति । २१ एव । २२ द्वितीयः । २३ शब्दः । २४ ध्वनेः । २५ गवाद्यस्तित्व । २६ अगवादिव्यावृत्ति ।

नुपलम्भात्। विधिनिषेधज्ञानयोश्चान्योन्यं विरोधात् कथमेकस्मात्सम्भवः?

यदि च गोशब्देनागोशब्दनिवृत्तिर्मुख्यतः प्रतिपद्यते; तर्हि गोशब्दश्रवणानन्तरं प्रथमतरम् 'अगोः' इत्येषा श्रोतुः प्रतिपत्तिर्भवेत्। न चैवम्, अतो गोबुद्ध्यनुत्पत्तिप्रसङ्गात्। तदुक्तम्—

"नन्वन्यापोहकृच्छब्दो युष्मत्पक्षेऽनुवर्णितः।
निषेधमात्रं नैवेह प्रतिभासेऽवगम्यते॥ १॥
किन्तु गौर्गवयो हस्ती वृक्ष इत्यादिशब्दतः।
विधिरूपावसायेन मतिः शाब्दी प्रवर्त्तते॥ २॥"
[तत्त्वसं० का० ९१०-११ पूर्वपक्षे]

"यदि गौरित्ययं शब्दः समर्थोऽन्यनिवर्त्तने।
जनको गवि गोबुद्धे(द्धे)र्मृग्यतामपरो ध्वनिः॥ ३॥
ननु ज्ञानफलाः शब्दा न चैकस्य फलद्वयम्।
अपवादविधिज्ञानं फलमेकस्य वः कथम्॥ ४॥
प्रागगौरिति विज्ञानं गोशब्दश्राविणो भवेत्।
येनाऽगोः प्रतिषेधाय प्रवृत्तो गौरिति ध्वनिः॥ ५॥"
[सामान्यदू० ३।१७–१९]

किञ्च, अपोहलक्षणं सामान्यं वाच्यत्वेनाभिधीयमानं पर्युदासलक्षणं वाभिधीयेत, प्रसज्यलक्षणं वा? प्रथमपक्षे सिद्धसाध्यता; यदेव ह्यगोनिवृत्तिलक्षणं सामान्यं गोशब्देनोच्यते भवता तदेवास्माभिर्गोत्वाख्यं भावलक्षणं सामान्यं गोशब्दवाच्यमित्यभिधीयेत, अभावस्य भावान्तरात्मकत्वेन व्यवस्थितत्वात्।

कश्चायं भवतामश्वादिनिवृत्तिस्वभावो भावोऽभिप्रेतः? न तावदसाधारणो गवादिस्वलक्षणात्मा; तस्य सकलविकल्पगोचराति-

१ परस्परमेकत्रावस्थानविरोधात्। २ यत्र विधिविज्ञानं तत्र निषेधविज्ञानं नास्ति। यत्र निषेधज्ञानं न तत्र विधिज्ञानमित्यर्थः। ३ बुद्धिद्वयस्य। ४ परेण भवता। ५ अगोः निवृत्तेः पूर्वम्। ६ यथा। ७ अश्वादिः। ८ अन्यथा। ९ गौरिति बुद्धिस्तस्याः अनुत्पत्तिः। १० नैव कस्यापि। ११ बौद्ध। १२ प्रतिपादितः। १३ गौरयमित्यस्मिन्। १४ नहि सर्वे प्रधानतः? १५ अर्थस्य। १६ अश्वादि। १७ नहि। १८ भवन्तु। १९ अगोनिषेधज्ञान। २० शब्दस्य। २१ विधिनिषेधलक्षणम्। २२ निषेध। २३ शब्दस्य। २४ बौद्धानाम्। २५ अगोनिवृत्तेः पूर्वम्। २६ अश्वः। २७ जनस्य। २८ कुतः। २९ गोशब्दस्यार्थत्वेन। ३० बौद्धमते। ३१ कथम्। ३२ सौगतेन। ३३ जैनैः। ३४ सत्ता। ३५ अगोनिवृत्तिलक्षणोऽभावो भावान्तरेण जैनैन व्यवतिष्ठते। ३६ क्षणिकनिरंशनिरन्वयरूपः।

कान्तत्वात्। नापि शावलेयादिव्यक्तिविशेषैः; असामान्यप्रसक्तः। यदि गोशब्दः शावलेयादिवाचकः स्यात्तर्हि तस्यानन्वयान्न स सामान्यविषयः स्यात्। तस्मात्सर्वेषु सजातीयेषु शावलेयादिपिण्डेषु यत्प्रत्येकं परिसमाप्तं तन्निबन्धना गोबुद्धिः, तच्च गोत्वाख्यमेव सामान्यम्। तस्याऽगोऽपोहशब्देनाभिधानान्नाममात्रं भिद्येत। उक्तञ्च—

"अगोनिवृत्तिः सामान्यं वाच्यं यैः परिकल्पितम्।
गोत्वं वस्त्वेव तैरुक्तमगोपोहगिरा स्फुटम् ॥ १ ॥
भावान्तरात्मकोऽभावो येन सर्वो व्यवस्थितः।
तत्राश्वादिनिवृत्त्यात्मा भावः क इति कथ्यताम् ॥ २ ॥
नेष्टोऽसाधारणस्तावद्विशेषो निर्विकल्पनात्।
तथा च शावलेयादिरसामान्यप्रसङ्गतः ॥ ३ ॥"

[मी० श्लो० अपोह० श्लो० १-३]

"तस्मात्सर्वेषु यद्रूपं प्रत्येकं परिनिष्ठितम्।
गोबुद्धिस्तन्निमित्ता स्याद्गोत्वादन्यच्च नास्ति तत् ॥"

[मी० श्लो० अपोह० श्लो० १०]

द्वितीयपक्षे तु न किञ्चिद्वस्तु वाच्यं शब्दानामिति अतोऽप्रवृत्तिनिवृत्तिप्रसङ्गः। तुच्छरूपाभावस्य चानभ्युपगमान्न प्रसज्यप्रतिषेधाभ्युपगमो युक्तः परमतप्रवेशानुषङ्गात्।

अपि च ये विभिन्नसामान्यशब्दा गवादयो ये च विशेषशब्दाः शावलेयादयस्ते भवदभिप्रायेण पर्यायाः प्राप्नुवन्त्यर्थभेदाभावाद्वृक्षपादपादिशब्दवत्। न खलु तुच्छरूपाभावस्य भेदो युक्तः;

१ अन्यथा। २ सामान्यरूपापोहस्याभावे ऽसामान्यत्वं तस्य प्रसङ्गात्। ३ विशेष। ४ शावलेयादिना। ५ गौः इति शब्दः स स शावलेयादिवाचक इति। ६ सास्नादिमत्त्वम्। ७ अगोव्यावृत्ति। ८ भाट्टैः। ९ गोशब्दस्य। १० सौगतैः। ११ गोत्वं वस्त्वेवाऽगोपोहगिरा उक्तम्। कुमारिलादि। १२ कारणेन। १३ पर्युदासपक्षे। १४ नेष्ट इति शेषः। १५ अन्यथा। १६ असाधारणशावलेयत्वं न घटते बलात्। १७ सकलगोव्यक्तिषु। १८ वर्तते। १९ सामान्यम्। २० प्रसज्यपक्षे। २१ प्रवृत्तिश्च निवृत्तिश्च प्रवृत्तिनिवृत्ती तयोरभावोऽप्रवृत्तिनिवृत्ती तयोः प्रसङ्गः। २२ सौगतैः। २३ अन्यथा युक्तं भवेत्। २४ नैयायिकादि। २५ सौगतस्य। २६ यतः। २७ अश्वशब्दगोशब्दादि। २८ सामान्यस्याभिधायकाः। २९ बौद्ध। ३० भवन्ति। ३१ सर्वेषां पदार्थानां तुच्छस्वरूपत्वं यतः। ३२ निःस्वभावस्य। ३३ अपोहस्य।

वस्तुन्येव संस्पृ(संसृ)ष्टत्वैकत्वनानात्वादिविकल्पानां प्रतीतेः। भेदाभ्युपगमे वा अभावस्य वस्तुरूपतापत्तिः; तथाहि–ये परस्परं भिद्यन्ते ते वस्तुरूपा यथा स्वलक्षणानि, परस्परं भिद्यन्ते चाऽपोहा इति।

न चापोह्यलक्षणसम्बन्धिभेदादपोहानां भेदः; प्रमेयाभिधेयादिशब्दानामप्रवृत्तिप्रसङ्गात्, तदभिधेयापोहानामपोह्यलक्षणसम्बन्धिभेदाभावतो भेदासम्भवात्। अत्र हि यत्किञ्चिद्व्यवच्छेद्यत्वेन कल्प्यते तत्सर्वं व्यवच्छेद्याकारेणालम्ब्यमानं प्रमेयादिस्वभावमेवावतिष्ठते। न ह्यविषयीकृतं व्यवच्छेत्तुं शक्यमतिप्रसङ्गात्। न च सम्बन्धिभेदो भेदकः, अन्यथा बहुषु शावलेयादिव्यक्तिष्वेकस्याऽगोपोहस्याऽभावप्रसङ्गः। यस्य चान्तरङ्गाः शावलेयादिव्यक्तिविशेषा न भेदकाः 'तस्याऽश्वादयो भेदकाः' इत्यतिसाहसम्! सम्बन्धिभेदाच्च वस्तुन्यपि भेदो नोपलभ्यते किमुताऽवस्तुनि; तथाहि–देवदत्तादिकमेकमेव वस्तु युगपत्क्रमेण वाऽनेकैराभरणादिभिरभिसम्बध्यमानमनासादितभेदमेवोपलभ्यते।

भवतु वा सम्बन्धिभेदाद्भेदः; तथापि–वस्तुभूतसामान्यानभ्युपगमे भवतां स एवापोहाश्रयः सम्बन्धी न सिद्धिमासादयति यस्य भेदात्तद्भेदः स्यात्। तथाहि–गवादीनां यदि वस्तुभूतं सारूप्यं प्रसिद्धं भवेत्तदाऽश्वाद्यपोहाश्रयत्वमविशेषेणैषां प्रसिद्ध्येन्नान्यथा। अतोऽपोहविषयत्वमेषामिच्छताऽवश्यं सारूप्यमङ्गीकर्त्तव्यम्। तदेव च सामान्यं वस्तुभूतं भविष्यतीत्यपोहकल्पना वृथैव।

१ न तुच्छरूपाभावे। २ अर्थे सम्बद्धस्य। ३ आदिना प्रमेयत्वादि। ४ भेदानाम्। ५ सौगतैः। ६ अपोहस्य। ७ तल्लक्षणत्वाद्वस्तुत्वस्य। ८ कथम्। ९ अश्वादिनिवृत्तयः। १० अपोह्या व्यावर्त्या अश्वादयः। ११ अभावानाम्। १२ अन्यथा। १३ अप्रमेयादि। १४ स्वरूप। १५ स्वरूपेण नास्ति यतः। १६ प्रमेयादिशब्देषु। १७ अप्रमेयादि। १८ व्यावर्त्यत्वेन। १९ व्यावर्त्याकारेण। २० विषयीक्रियमाणम्। २१ वर्त्तते। २२ व्यवच्छेद्यमप्रमेयादि। २३ परिच्छेत्तुम्। २४ गगनकुसुममपि परिच्छेत्तुं शक्यं स्यात्। २५ अपोहानाम्। २६ किन्तु प्रतिव्यक्ति भिन्न एव स्यात्। २७ अव्यभिचारि प्रतिनियतमन्तरङ्गम्। २८ अपोहे। २९ कटककुण्डलादिभिः। ३० सम्बन्धिभिः। ३१ अपोहस्य। ३२ परमार्थसत्य। ३३ गोत्वादि। ३४ विवक्षितः। ३५ सन्। ३६ सम्बन्धिनः। ३७ अपोहस्य। ३८ अर्थानाम्। ३९ सदृशरूपम्। ४० शावलेयादिषु। ४१ सामान्यम्। ४२ गोत्वादि। ४३ साधारणेन। ४४ सारूप्याभावे। ४५ सामान्यानभ्युपगमे विवक्षितोऽपोहाश्रयः सम्बन्धी न सिध्यति यतः। ४६ सौगतेन। ४७ नियमेन।

यदि वाऽसत्यपि सारूप्ये शावलेयादिष्वगोपोहकल्पना तदा गवाश्वयोरपि कस्मान्न कल्प्येताऽसौ विशेषाभावात्? तदुक्तम्—

"यथाऽसत्यपि सारूप्ये स्यादपोहस्य कल्पना।
गवाश्वयोरयं कस्मादगोपोहो न कल्प्यते॥ १॥
शावलेयाच्च भिन्नत्वं बाहुलेयाश्वयोः समम्। ५
सामान्यं नान्यदिष्टं चेत्क्वागोपोहः प्रवर्त्तताम्॥ २॥"
[मी० श्लो० अपोह० श्लो० ७६-७७]

यथा च स्वलक्षणादिषु समयासम्भवान्न शब्दार्थत्वं तथाऽपोहेपि। निश्चितार्थो हि समयकृत्समयं करोति। न चापोहः केनचिदिन्द्रियैर्व्यवसीयते; तस्यावस्तुत्वादिन्द्रियाणां च वस्तुविषयत्वात्। नाप्यनुमानेन; वस्तुभूतसामान्यमन्तरेणानुमानस्यैवाऽप्रवृत्तेः। १०

अस्तु वा समयः, तथापि-कथमश्वादीनां गोशब्दानभिधेयत्वम्? 'सम्बन्धानुभवक्षणेऽश्वादेस्तद्विषयत्वेनादृष्टेः' इत्यनुत्तरम्; यतो यदि यद्गोशब्दसङ्केतकाले दृष्टं ततोऽन्यत्र गोशब्दप्रवृत्तिर्नेष्यते, तदेकस्मात्सङ्केतेन विषयीकृताच्छावलेयादिगोपिण्डात् अन्यद्बाहुलेयादि गोशब्देनापोह्यं न भवेत्। १५

इतरेतराश्रयश्च-अगोव्यवच्छेदेन हि गोः प्रतिपत्तिः, स चाऽगौर्गोनिषेधात्मा, ततश्च अगौः इत्यत्रोत्तरपदार्थो वक्तव्यो यो 'न गौः' इत्यत्र नञा प्रतिषिध्येत। न ह्यनिर्ज्ञातस्वरूपस्य निषेधो २०

१ अश्वादिमात्र। २ एक। ३ [illegible]। ४ यदि। ५ शावलेयादौ। ६ एकगोः। ७ कारणात्। ८ गवाश्वयोर्भिन्नत्वाविशेषेऽपोहाश्रयत्वं नेत्युक्ते आह। ९ समानम्। १० परमार्थभूतम्। ११ भिन्नम्। १२ विशेषेषु क्षणिकनिरंशादिषु। १३ शावलेयादिषु। १४ सङ्केत। १५ यतो ह्यत्र शेषः। १६ अस्य शब्दस्यायमर्थ इति। १७ ना। १८ नरेण। १९ निश्चीयते। २० स्वलक्षण। २१ अपोह। २२ अपोहे समयसङ्केतोऽपि। २३ स्यात्। २४ अनुमानमप्यन्यापोहं नावबोधयति। २५ गोशब्देन [illegible] अनुमानस्य कार्यस्वभावसम्पाद्यत्वात्। अन्यापोहस्य निरुपाख्यत्वेनार्थक्रियाकारित्वेन न स्वभावकार्ययोरसम्भवात्। २६ काले। २७ ता। २८ दर्शनाभावात्। २९ दृष्टं वर्जयित्वा। ३० अश्वे। ३१ परेण। ३२ खण्डमुण्डादिनाम्ना। ३३ गोशब्दस्यायं वाच्य इति। ३४ सौगतेन। ३५ गोपिण्डम्। ३६ अश्वादि व्यावर्त्यम्। ३७ सङ्केतकाले सङ्केतेनाविषयीकृतत्वाद्बाहुलेयादेः। ३८ दूषणान्तरमाह। ३९ कथम्। ४० गोशब्दार्थः। ४१ परेण त्वया। ४२ समासारम्भे वाक्ये। ४३ पदार्थस्य।

नास्माकमनीलादिव्यावृत्त्या विशिष्टोऽनुत्पलादिव्यवच्छेदोऽभिमतो यतोयं दोषः स्यात्। किं तर्हि? अनीलानुत्पलाभ्यां व्यावृत्तं वस्त्वेव तथा व्यवस्थितम्। तथार्थान्तरव्यावृत्त्या विशिष्टं शब्देनोच्यते इत्यप्यपेशलम्; स्वलक्षणस्याऽवाच्यत्वात्। न च स्वलक्षणस्य व्यावृत्त्या विशिष्टत्वं सिध्यति; यतो न वस्त्व- ५
पोहोऽसाधारणं तु वस्तु, न च वस्त्वऽवस्तुनोः सम्बन्धो युक्तः, वस्तुद्वयाधारत्वात्तस्य।

अस्तु वा सम्बन्धः, तथापि विशेषणत्वमपोहस्याऽयुक्तम्, न हि सत्तामात्रेण किञ्चिद्विशेषणम्। किं तर्हि? ज्ञातं सत्स्वाकारानुरक्तया बुद्ध्या विशेष्यं रञ्जयति तद्विशेषणम्। न चापो- १०
हेऽयं प्रकारः सम्भवतीति। न ह्यश्वादिष्वपोहोऽध्यवसीयते। किं तर्हि? वस्त्वेव। अपोहज्ञानासम्भवश्चोक्तः प्राक्। न चाज्ञातोऽप्यपोहो विशेषणं भवति। "नागृहीतविशेषणा विशेष्ये बुद्धिः" [ ] इत्यभिधानात्।

अस्तु वाऽपोहज्ञानम्, (ज्ञानम्:) तथापि-अर्थे तदाकारानु- १५
रागाभावात्तस्याऽविशेषणत्वम्। स्वं हि विशेषणं स्वाकारानुरूपां विशेष्ये बुद्धिं जनयद्दृष्टम्, न त्वन्यादृशं विशेषणमन्यादृशीं बुद्धिं विशेष्ये जनयति। न खलु नीलमुत्पले 'रक्तम्' इति प्रत्ययमुत्पादयति, दण्डो वा 'कुण्डली' इति। न चाश्वादिष्वभावानुरक्ता शाब्दी बुद्धिरुपजायते। किन्तर्हि? भावाकाराध्यवसा- २०
यिनी। तथापि विशेषणत्वे स्वं सर्वस्य विशेषणं स्यात्। अनु-

१ [illegible] । ४ विशेषणेन।
५ अपवादि। ६ विशेषः। [illegible] । ९ इति जैनः।
१० अर्थः स्वलक्षणरूपः। [illegible] । १२ इति सौगतः। १३ कुतः।
१४ [illegible] । १६ [illegible]
[illegible] । १८ लोके। १९ उत्पलम्।
२० स्यात्। २१ [illegible] । २२ [illegible]
२३ स्वलक्षणके। २४ [illegible]
कारः। २५ [illegible] । २६ अभावरूपम्। २७ [illegible] । २८ कथम्।
२९ [illegible] । ३० स्वलक्षणरूपेषु। ३१ अपोहात्मका। ३२ शब्दजनिता
[illegible] स्वलक्षणस्य
[illegible] । ३३ [illegible] । ३४ स्वाकारानुरूपबुद्धिजनकत्वेपि।
३५ अपोहस्य। ३६ [illegible]

रागे वा अभावरूपेण वस्तुनः प्रतीतेर्वस्तुत्वमेव न स्यात्, भावाभावयोर्विरोधात्। शब्देनाऽगम्यमानत्वाच्चाऽसाधारणवस्तुनो न व्यावृत्त्या विशिष्टत्वं प्रत्येतुं शक्यम्। उक्तञ्च—

"न चासाधारणं वस्तु गम्यतेपोहवत्तया।
कथं वा परिकल्प्येत सम्बन्धो वस्त्ववस्तुनोः॥ १॥
स्वरूपसत्त्वमात्रेण न स्यात्किञ्चिद्विशेषणम्।
स्वबुद्ध्या रज्यते येन विशेष्यं तद्विशेषणम्॥ २॥
न चाप्यश्वादिशब्देभ्यो जायतेपोहभासनम्।
विशेष्ये बुद्धिरिष्टेह न चाज्ञातविशेषणा॥ ३॥
न चान्यरूपमन्यादृक् कुर्याज्ज्ञानं विशेषणम्।
कथं वाऽन्यादृशे ज्ञाने तदुच्येत विशेषणम्॥ ४॥
अथान्यथा विशेष्येपि स्याद्विशेषणकल्पना।
तथा सति हि यत्किञ्चित्प्रसज्येत विशेषणम्॥ ५॥
अभावगम्यरूपे च न विशेष्येस्ति वस्तुता।
विशेषितमपोहेन वस्तु वाच्यं न तेऽस्त्यतः॥ ६॥"
[मी० श्लो० अपोह० श्लो० ८६-९१]

"शब्देनागम्यमानं च विशेष्यमिति साहसम्।
तेन सामान्यमेष्टव्यं विषयो बुद्धिशब्दयोः॥"
[मी० श्लो० अपोह० श्लो० ९४]

इतश्च सामान्यं वस्तुभूतं शब्दविषयः यतो व्यक्तीनामसाधारणवस्तुरूपाणामशब्दवाच्यत्वाच्च व्यक्तीनामपोहेन, अनुक्तस्य

---

१ अश्वादिषु शब्दजबुद्धेरभावेन सङ्गानुरागे सति। २ यदा भावाकारो धृतस्तदाऽभावरूपमेव स्वलक्षणं निश्चिनुयादिति भावः। ३ स्वलक्षणस्य। ४ कुतः। ५ स्वलक्षणस्य। ६ अपोहेन। ७ अर्थान्तरव्यावृत्त्या विशिष्टं स्वलक्षणरूपं वस्तु शब्देनोच्यत इति वदन्तं वादिनं प्रति समर्थनमुक्तमिति ज्ञेयम्। ८ अपोहस्य। ९ कथं तर्हि विशेषणं स्यादित्युक्ते आह। १० स्वस्य=विशेषणस्य। ११ प्रतीतिः। १२ जगति। १३ अभावरूपम्। १४ भावरूपम्। १५ विशेष्ये। १६ जैनानामिदं दूषणं न जायते तेषां सर्वं वस्तु भावाभावात्मकं यतः। १७ भावरूपे। १८ अभावरूपे। १९ परेण। २० यदि। २१ भावरूपे। २२ अपोहस्य। २३ अनिर्वचनीयम्। २४ स्वलक्षणरूपे। २५ विशेषणेन। २६ स्वलक्षणरूपम्। २७ शब्देन। २८ सौगतस्य। २९ अपोहस्य विशेषणस्य। ३० स्वलक्षणम्। ३१ येन कारणेनापोहशब्दयोर्वाच्यवाचकभावो नास्ति तेन। ३२ शब्दजनितबुद्ध्या गम्यः शब्देन वाच्यश्च। ३३ गोत्वादि। ३४ स्वलक्षणस्यावाच्यत्वं कुतः? सङ्केताभावात्। ३५ शब्देनावाच्यस्य।

निराकर्तुमशक्यत्वात्, अपोह्येत सामान्यं तस्य वाच्यत्वात्। अपोह्यानां त्वभावरूपतयाऽपोह्यत्वासम्भवात्, अभावानामभावाभावात्, वस्तुविषयत्वात्प्रतिषेधस्य। अपोह्यत्वेऽपोह्यानां वस्तुत्वमेव स्यात्। तस्मादश्वादौ गवादेरपोह्यो भवन् सामान्यभूतस्यैव भवेदित्यपोह्यत्वाद्वस्तुत्वं सामान्यस्य। तदुक्तम्— ५

"यदा चाऽशब्दवाच्यत्वान्न व्यक्तीनामपोह्यता।
तदापोह्येत सामान्यं तस्यापोह्याच्च वस्तुता॥ १॥
नाऽपोह्यत्वमभावानामभावाऽभाववर्जनात्।
व्यक्तोऽपोह्यान्तरेऽपोहस्तस्मात्सामान्यवस्तुनः॥ २॥"

[मी० श्लो० अपोह० श्लो० ९५-९६] १०

किञ्च, अपोह्यानां परस्परतो वैलक्षण्यं वा स्यात्, अवैलक्षण्यं वा? तत्राद्यपक्षे [अ]भावस्यागोशब्दाभिधेयस्याभावो गोशब्दाभिधेयः, स चेत्पूर्वोक्तादभावाद्विलक्षणः तदा भाव एव भवेदभावनिवृत्तिरूपत्वाद्भावस्य। न चेद्विलक्षणः तदा गौरप्यगौः प्रसज्येत तदवैलक्षण्येण (तदवैलक्षण्येन) तादात्म्यप्रतिपत्तेः। तन्न १५ वाच्याभिमतापोह्यानां भेदसिद्धिः।

नापि वाचकाभिमतानाम्; तथाहि–शब्दानां भिन्नसामान्यवाचिनां विशेषवाचिनां च परस्परतोऽपोहभेदो वासनाभेदनिमित्तो वा स्यात्, वाच्यापोहभेदनिमित्तो वा? प्रथमपक्षोऽयुक्तः; अवस्तुनि वासनाया एवासम्भवात्। तदसम्भवश्च २०

१ अपोहितुम्। २ शब्देन। ३ अन्यव्यावृत्तीनाम् (सर्वेषां पदार्थानामपोहरूपत्वात्सर्वे भावा अपोह्याः)। ४ व्यावर्त्यत्व। ५ अत्र खरविषाणवद्दृष्टान्तः। ६ अपोह्यानाम् व्यावर्त्यानाम्। ७ व्यावर्त्यत्वे। ८ अङ्गीक्रियमाणे परेण। ९ अभावाभावानाम्। १० वर्तमानः। ११ हेतोः। १२ स्वलक्षणानाम्। १३ वस्तुविषयो निषेधो यतः। १४ निषेधस्य निषेधासम्भवात्। १५ अपोह्या(ह्या)न्तरेऽश्वादौ। १६ गोः। १७ व्यक्तीनामपोह्यानां चापोहता नास्ति यस्मात्। १८ एव। १९ ता। २० गोशब्दाश्वशब्दवाच्यानामन्यव्यावृत्तीनाम्। २१ विसदृशता। २२ अश्व। २३ वाच्यस्य। २४ गोशब्दाभिधेयोऽभावो यतः। २५ अगोशब्दाभिधेयात्। २६ द्वितीयपक्षे दूषणमुद्भावयन्ति। २७ एकस्वरूपः। २८ भवेत्। २९ भिन्नपदार्थे। ३० तस्मादगोशब्दवाच्यादपोह्यादवैलक्षण्यं गोशब्दवाच्यस्यापोहस्य। ३१ एकत्वात्। ३२ गोशब्दाऽगोशब्दवाच्यापोह्ययोः। ३३ अर्थे। ३४ शब्द। ३५ अपोह्यानाम्। ३६ गोलक्षणाश्वलक्षण। ३७ खण्डमुण्डादि। ३८ शब्दापोहभेदः। ३९ पूर्वविकल्पज्ञानं शब्दविषयं वासना। ४० एव। ४१ यतः। ४२ अर्थे। ४३ वाचकापोहे।

तद्धेतोर्निर्विषयप्रत्ययस्यायोगात्। नापि वाच्यापोहभेदनिमित्तः; तद्भेदस्य प्रागेव कृतोत्तरत्वात्।

ननु प्रत्यक्षेणैव शब्दानां कारणभेदाद्विरुद्धधर्माध्यासाच्च भेदः प्रसिद्ध एव; इत्यप्यसाम्प्रतम्; यतो वाचकं शब्दमङ्गीकृत्यै-
५ वमुच्यते। न च श्रोत्रज्ञानप्रतिभासिस्वलक्षणात्मा शब्दो वाचकः; सङ्केतकालानुभूतस्य व्यवहारकालेऽचिरनिरुद्धत्वात् इति न स्वलक्षणस्य वाचकत्वं भवदभिप्रायेण। तदुक्तम्—

"नार्थशब्दविशेषेण वाच्यवाचकतेष्यते।
तस्य पूर्वमदृष्टत्वात्सामान्यं तूपदिश्यते ॥ १ ॥" [ ]
१० "तत्र शब्दान्तरापोहे सामान्ये परिकल्पिते।
तथैवावस्तुरूपत्वाच्छब्दभेदो न कल्प्यते ॥ २ ॥"
[मी० श्लो० अपोह० श्लो० १०४]

ततो ये अवस्तुनी न तयोर्गम्यगमकभावो यथा खपुष्प-खरविषाणयोः। अवस्तुनी च वाच्यवाचकापोहौ भवतामिति। ननु
१५ मेघाभावाद्वृष्ट्यभावप्रतिपत्तेरनैकान्तिकता हेतोः; इत्यप्ययुक्तम्; तद्विविक्ताकाशालोकात्मकं हि वस्तु मत्पक्षेऽपि प्रयोगेऽस्त्येव, अभावस्य भावान्तरस्वभावत्वप्रतिपादनात्। भवत्पक्षे तु न केवलमपोहयोर्विवादास्पदीभूतयोर्गम्यगमकत्वाभावोऽपि तु वृष्टिमेघाद्यभावयोरपि।

२० किञ्च, अपोहो वाच्यः, अवाच्यो वा? वाच्यश्चेत्किं विधिरूपेण, अन्यव्यावृत्त्या वा? यदि विधिरूपेण; कथमपोहः सर्व-

१ वासनाकारणस्य। २ [illegible] सविकल्पकज्ञानस्य। ३ गवादीनाम्। ४ [illegible]। ५ भिन्न। ६ अस्माभिः प्रकृतम्। ७ पारमार्थिकार्थस्य। ८ परेण मीमांसकेन। ९ स्वलक्षणरूपशब्दस्य। १० विनष्टत्वात्। ११ हेतोः। १२ शब्दस्वभावस्य। १३ बौद्ध। १४ असाधारणरूपैः शब्दैः स्वलक्षणरूपार्थप्रतिपादने न [illegible] बौद्धमते इत्यभिप्रायः। १५ परेण। १६ सङ्केतकालात्। १७ अज्ञातत्वात्। १८ उत्तरकाले। १९ अर्थशब्दयोः। २० यदि सामान्याकारेण वाच्यवाचकतास्वीकाराशङ्कायामाह। सामान्यस्य वाच्यवाचकतयोपदेशे च। २१ गोशब्दादश्वशब्दः शब्दान्तरं तेन वाच्योऽपोहस्तस्य। २२ अवास्तवे। परिकल्पितप्रकारेण। २३ शब्दानाम्। २४ समर्थ्यते। २५ सौगतानाम्। २६ अभावरूपयोरपि गम्यगमकभावोऽस्तीति वक्ति बौद्धः। २७ गम्यगमकभावसद्भावात्। २८ अवस्तुत्वादिति। २९ मेघादिभिन्न। ३० जैन। ३१ सौगत। ३२ वाच्यवाचकयोः। ३३ तुच्छरूपत्वात्। ३४ अन्यत्र। ३५ शब्देन। ३६ अथवा। ३७ शब्देन। ३८ अस्तित्वसद्भावेन। ३९ एव।

तत्रानन्त्येन सङ्केतासम्भवाच्च । विकल्पबुद्धावध्याहृत्य तेषु सङ्के-
ताभ्युपगमे विकल्पसमारोपितार्थविषय एव शब्दसङ्केतः, न
परमार्थवस्तुविषयः स्यात् । स्थिरैकरूपत्वाद्धिमाचलादिभावानां
सङ्केतव्यवहारकालव्यापकत्वेन समयसम्भवोऽप्यसम्भाव्यः; तेषा-
मप्यनेकाणुप्रचयस्वभावानां प्रादुर्भावानन्तरमेवापवर्गितया तद- ५
सम्भवात् ।

किञ्च, एतेषु समयः क्रियमाणोऽनुत्पन्नेषु क्रियेत, उत्प-
न्नेषु वा ? न तावदनुत्पन्नेषु परमार्थतः समयो युक्तः; असतः
सर्वोपाख्यारहितस्याधारत्वानुपपत्तेः । नाप्युत्पन्नेषु; तस्यार्थानुभ-
वशब्दस्मरणपूर्वकत्वात्, शब्दस्मरणकाले चार्थस्य प्रध्वंसात् । १०
सर्वेषां स्वलक्षणक्षणानां सादृश्यमैक्येनाध्यारोप्य सङ्केतविधाने
सिद्धं स्वलक्षणस्याऽवाच्यत्वम् बुद्ध्यारोपितसादृश्यस्यैवाभिधाने-
नाभिधानात् । वाच्यत्वे वा शब्दबुद्धेः स्पष्टप्रतिभासप्रसङ्गः, न
चैवम् । न खलु यथेन्द्रियबुद्धिः स्पष्टप्रतिभासा प्रतिभासते तथा
शब्दबुद्धिः । प्रयोगश्च यो यत्कृते प्रत्यये न प्रतिभासते न स १५
तस्यार्थः यथा रूपशब्दप्रभवप्रत्यये रसाप्रतिभासने नासौ तदर्थः,
न प्रतिभासते च शाब्दप्रत्यये स्वलक्षणमिति । उक्तञ्च—

"अन्यथैवाग्निसम्बन्धाद्दाहं दग्धो हि मन्यते ।
अन्यथा दाहशब्देन दाहार्थः सम्प्रतीयते ॥ १ ॥"

[वाक्यप० २।४२५] २०

न चैकस्य वस्तुनो रूपद्वैयमस्ति, येनास्पष्टं वस्तुगतमेव रूपं
शब्दैरभिधीयेत एकस्य द्वित्वविरोधात् । तत्र स्वलक्षणे सङ्केतः ।

१ [illegible] गोशब्दः [illegible] इति । २ स्वार्थेषु । ३ गोशब्दस्य ।
४ सर्वव्यक्तयो गोशब्देन वाच्या इति आवेदित । ५ जैनादिना । ६ क्षणः ।
७ क्षणः । ८ पदार्थानाम् । ९ सङ्केत । १० जैनादिभिः । ११ शाबलेयादि-
विशेषेषु । १२ अजातेषु । १३ [illegible] अभावः । १४ समयस्य । १५ अयमस्य
शब्दस्य वाच्य इति । १६ त्रिकालविलोकिदर्शिनाम् । १७ सदृशापरापरोत्पत्त्या
[illegible] । १८ अभेदेन । १९ आरोपितमपि जैनादिना । २० शब्देन ।
२१ आरोपितसामान्यस्यैव वाच्यत्वं शब्देन यतः । २२ शब्दैः आगमाः ।
२३ स्वलक्षणस्य । २४ उपर्युक्तसमर्थनम् । २५ नेत्रादि । २६ स्वलक्षणरूपोऽर्थः ।
२७ स्पर्शनेन । २८ मनः । २९ स्पर्शनेन्द्रियेण । ३० साक्षात् । ३१ (नहि)
दाहशब्दश्रुतौ [illegible] । ३२ पुमान् । ३३ [illegible] । ३४ स्पष्टास्पष्टत्वे ।
३५ युक्तिसिद्धम् । ३६ स्पष्टास्पष्टस्वलक्षणम् । ३७ रूपस्य । ३८ परमार्थभूतः ।

नापि जातौ; तस्याः क्षणिकत्वे स्वलक्षणस्येवान्वयाभावान्न सङ्केतः फलवान्। अक्षणिकत्वे तु क्रमेण ज्ञानोत्पादकत्वाभावः। नित्यैकस्वभावस्य परापेक्षाप्यसम्भाव्या। प्रतिषिद्धा चेयं यथास्थानम् इत्यलमतिप्रसङ्गेन।

५ नापि तद्योगे सङ्केतः; तस्यापि समवायादिलक्षणस्य निराकृतत्वात्। जातितद्योगयोश्चासम्भवे तद्वतोप्यर्थस्यासम्भवात्कथं तत्रापि सङ्केतः? बुद्ध्याकारे वा; स हि बुद्धितादात्म्येन स्थितत्वान्न बुद्ध्यन्तरं प्रतिपाद्यमर्थं वानुगच्छति।

किञ्च, 'इतः शब्दादर्थक्रियार्थी पुरुषोऽर्थक्रियाक्षमानर्थान्वि-
१० ज्ञाय प्रवर्तिष्यते' इति मन्यमानैर्व्यवहर्तृभिरभिधायका नियुज्यन्ते न व्यसनितया। न चासौ विकल्पबुद्ध्याकारोऽर्थिनोऽभिप्रेतं शीतापनोदादिकार्यं सम्पादयितुं समर्थः।

किञ्च, बुद्ध्याकारे शब्दसङ्केताभ्युपगमेऽपोहवादिपक्ष एवाभ्युपगतो भवेत्; तथाहि-अपोहवादिनापि बुद्ध्याकारो बाह्यरूप-
१५ तयाध्यवसितः शब्दार्थोभीष्ट एव, अर्थविवक्षां च कार्यतया शब्दो गमयति यथा धूमोग्निमिति।

अत्र प्रतिविधीयते। कृतसमया एव ध्वनयोऽर्थाभिधायकाः। समयश्च सामान्यविशेषात्मकेर्थेऽभिधीयते न जात्यादिमात्रे।

१ कुतः। २ जातेः। ३ गोत्वादिसामान्ये। ४ भवेत्। ५ अनुस्यूतत्वे। ६ तस्या जातेः। ७ परं=निमित्तम्। ८ जातिः। ९ जातौ सङ्केतनिराकरणप्रसङ्गेन। १० पक्षान्तरम्। ११ तयोः स्वलक्षणजात्योः सम्बन्धे। १२ आदिना संयोगतादात्म्यादेश्च। १३ शब्देन। १४ अर्थस्य। १५ नान्वेति। १६ अतः केन सार्कं सङ्केतः स्यात्। १७ विवक्षितत्वात्। १८ जैनमताभिप्रायं वक्ति सौगतः। १९ अर्थः=प्रयोजनम्। २० शब्दाः। २१ कार्यं विना प्रवृत्तिर्व्यसनम्। २२ अर्थस्य। २३ पुरुषस्य। २४ अर्थप्रतिबिम्बरूपे। २५ जैनेन। २६ सौगत। २७ जैनस्य। २८ सौगतेन। २९ ज्ञानात्मा बुद्ध्याकार एव बाह्यार्थो नापरः कश्चिदित्यभिप्रायो बौद्धविशेषस्य। ३० आन्तरार्थस्य वक्तुमिच्छां ज्ञानस्वभावां शब्दस्य कारणभूताम्। ३१ कार्यरूपः। ३२ ज्ञापयति। ३३ ज्ञानस्वभावा विवक्षा एव बाह्यार्थः शब्दविषयो नापरः कश्चिदित्यपि बौद्धविशेषाभिप्रायः। अन्यापोहरूपो बुद्ध्याकाररूपो विवक्षारूप एवं त्रिविधः शब्दविषयो बौद्धमते इति ज्ञेयम्। ३४ कार्यम्। ३५ कारणम्। ३६ परकृतपक्षे। ३७ शब्दाः। ३८ वाचकाः। ३९ तादात्म्यस्वरूपे। ४० परार्थे। ४१ क्रियते। ४२ केवलायां जातौ केवले विशेषे वा नाभिधीयते।

तथाभूतश्चार्थो[1] वास्तवः सङ्केतव्यवहारकालव्यापकत्वेन प्रमाणसिद्धः 'सामान्यविशेषात्मा तदर्थः' [परीक्षामु० ४।१] इत्यत्र[2]ातिविस्तरेण वर्णयिष्यते[3] । सामान्यविशेषयोर्वस्तुभूतयोस्तत्सम्बन्धस्य चात्र प्रमाणतः[4] प्रसाधयिष्यमाणत्वात् । न चात्राप्यानन्त्याद्व्यक्तीनां परस्परानननुगमाच्च[5] सङ्केताऽसम्भवः[6]; समान[7]परिणामापेक्षया क्षयोपशमविशेषाविर्भूतोहाख्य[8]प्रमाणेन तासां प्रतिभासमानतया सङ्केतविषयतोपपत्तेः, कथमन्यथानुमानप्रवृत्तिः[9] तत्राप्यानन्त्याननु[10]गमरूपतया साध्यसाधनव्यक्तीनां सम्बन्धग्रहणासम्भवात्?

अन्य[11]व्यावृत्त्या[12] सम्बन्ध[13]ग्रहणम्; इत्यप्यसत्; तस्या एव स[14]दृशपरिणामसामान्यासम्भवे असम्भाव्यमा[15]नत्वात् । न चाऽसदृशे[16]ष्वप्यर्थेषु[17] सामान्यविकल्प[18]जनकेषु तद्द[19]र्शन[20]द्वारेण[21] सदृशव्यवहारे हेतुत्वम्; नीलादिविशेषाणामप्यभावानुषङ्गात् । य[22]था हि परमार्थतोऽसदृशा[23] अपि तथाभूतविकल्पोत्पादकदर्शनहेतवः[24] सदृशव्यवहारभा[25]जो भावाः तथा स्व[26]यमनीलादिस्व[27]भावा अपि नीलादिविक[28]ल्पोत्पादकदर्शननिमित्ततया नीलादिव्यवहारभाक्त्वं प्रतिपत्स्यन्ते । स[29]दृशपरिणामा[30]भावे च अ[31]र्थानां सजातीयेत[32]रव्यवस्थाऽसम्भावात्[33] कुतः कस्य व्यावृत्तिः? अन्यव्यावृत्त्या सम्बन्धा[34]वगमे[35]पि चैतत्[36]स[37]र्वं सम[38]ानम् त[39]त्रानन्त्याननुगमरूपत्वस्याऽविशेषात् । त[40]तो 'ये य[41]त्र भा[42]वतः कृतसमया न भवन्ति न ते तस्याभिधायकाः यथा

१ सङ्केतितार्थो नास्तीत्युक्ते आह । २ सूत्रे । ३ जैनाचार्यैः । ४ प्रत्यक्षादिना । ५ व्यवहारकाले । ६ अस्य शब्दस्यायमर्थ इत्येवंरीत्या । ७ सदृश । ८ ये ये त्रिकालत्रिलोकोदरवर्तिनः सास्नादिमन्तस्ते ते गोशब्देन वाच्या इत्येवम् । ९ कुतः । १० अनुमानव्यवहारकाले । ११ परस्पर । १२ असाध्यासाधनरूपेण । १३ अविनाभावलक्षण । १४ या गोव्यक्तयस्ता गोशब्देन वाच्या इति । १५ पूर्वं निराकृतत्वात् । १६ खण्डादिषु । १७ सामान्यरूपश्चासौ विकल्पश्च । १८ अयमनेन सदृश इति विकल्पोऽयं गौरयं गौरिति विकल्पः । १९ विसदृशार्थ । २० प्रतीति । २१ मुखेन । २२ कथम्? तथा हि । २३ खण्डमुण्डादयः पदार्थाः । २४ सन्तः । २५ स्युः । २६ स्वरूपेण । २७ नीललक्षणभावाः । २८ विकल्पः=ज्ञानम् । २९ सामान्य । ३० सास्नादिमत्त्वादिना । ३१ गोघटपटादीनाम् । ३२ विजातीय । ३३ कस्मात् । ३४ साध्यसाधनव्यक्तीनाम् । ३५ किञ्च । ३६ सङ्केतपक्षे यत्परेणोच्यते । ३७ अन्यव्यावृत्तिविषयकम् । ३८ अन्यव्यावृत्तयोऽनन्ता इत्येवम् । ३९ व्यावृत्तिग्रहणकाले । ४० साध्यसाधनव्यक्तीनां सम्बन्धावगमो यथा वस्तुनि शब्दस्य सङ्केतपरिज्ञानमपि तथा स्यायतः । ४१ वस्तुनि । ४२ परमार्थतः ।

साक्षादिमत्यर्थेऽकृतसमयोऽश्वशब्दः, न भवन्ति च भावतः कृतसमयाः सर्वस्मिन्वस्तुनि सर्वे ध्वनयः' इत्यत्र प्रयोगेऽसिद्धो हेतुः; उक्तप्रकारेणार्थे ध्वनीनां समयसम्भवात्।

यच्च हिमाचलादिभावानामप्यनेकपरमाणुप्रचयात्मनां क्षणिक-
५ त्वेन समयासम्भव इत्युक्तम्; तदप्युक्तिमात्रम्; सर्वथा क्षणिकत्वस्य बाह्याध्यात्मिकार्थे प्रतिपेत्स्यमानत्वात्। तथा चोत्पन्नेष्वप्यर्थेषु सङ्केतसम्भवात्, अयुक्तमुक्तम्-'उत्पन्नेष्वनुत्पन्नेषु वा सङ्केतासम्भवः' इत्यादि।

ननु शब्देनार्थस्याभिधेयत्वे साक्षादेवातोऽर्थप्रतिपत्तेरिन्द्रिय-
१० संहतेर्वैफल्यप्रसङ्गः; तन्न; अतोऽर्थस्याऽस्पष्टाकारतया प्रतिपत्तेः, स्पष्टाकारतया तत्प्रतिपत्त्यर्थमिन्द्रियसंहतिरप्युपपद्यते एवेति कथं तस्या वैफल्यम्? स्पष्टाऽस्पष्टाकारतयार्थप्रतिभासभेदश्च सामग्रीभेदान्न विरुध्यते, दूरासन्नार्थोपनिबद्धेन्द्रियप्रतिभासवत्।

अथाऽसत्यप्यर्थेऽतीतानागतादौ शब्दस्य प्रवृत्ति(त्ते)र्नास्यार्था-
१५ भिधायकत्वम्; तदसत्; तस्येदानीमभावेपि स्वकाले भावात्, अन्यथा प्रत्यक्षस्याप्यर्थविषयत्वाभावः स्यात् तद्विषयस्यापि तत्कालेऽभावात्। अविसंवादस्तु प्रमाणान्तरप्रवृत्तिलक्षणोऽध्यक्षवच्छाब्देप्यनुभूयत एव। 'आसीद्बह्निः' इत्याद्यतीतविषये वाक्ये विशिष्टभस्मादिकार्यदर्शनोद्भूतानुमानेन संवादोपलब्धेः, चन्द्रार्क-
२० ग्रहणाद्यनागतार्थविषये तु प्रत्यक्षप्रमाणेनैव। क्वचिद्विसंवादात्सर्वत्र शाब्दस्याऽप्रामाण्ये प्रत्यक्षस्यापि क्वचिद्विसंवादात्सर्वत्राप्रामाण्यप्रसङ्गः। ततो निराकृतमेतत्—

"अन्यदेवेन्द्रियग्राह्यमन्यच्छब्दस्य गोचरः।

१ साक्षादिमदर्थाभिधायको न भवति यतः। २ परकृते। ३ भावतोऽकृतसमयत्वादिति। ४ समानपरिणामापेक्षयेत्यादिना। ५ परेण। ६ घटादौ। ७ ज्ञानादौ। ८ परेण। ९ प्रतिपाद्यत्वे। १० अव्यवधानेन। ११ श्रूयमाणाच्छब्दात्। १२ चक्षुरादिसमूहस्य। १३ युक्तम्। १४ विवक्षिताच्छब्दात्। १५ घटादेः। १६ एकार्थे। १७ एकार्थस्य। १८ स्पष्टाऽस्पष्टतया। १९ एकार्थस्य। २० शब्दोच्चारणसमये। २१ अर्थस्यानभिधायकत्वे। २२ क्षणिकत्वात्। २३ प्रत्यक्षोत्पत्तिकाले इव। २४ ज्ञाने। २५ कथम्। २६ इह प्रदेशे। २७ किञ्चिदुष्णताकाष्ठाद्याकारधारित्वविशिष्ट। २८ भविष्यत्। २९ वाक्ये। ३० शब्दप्रतिपाद्ये। ३१ अर्थे। ३२ अङ्गीक्रियमाणे परेण। ३३ अभिन्नविषयत्वेपि शाब्दप्रत्यक्षयोः प्रतिभासभेदो दर्शितो यतः। ३४ स्वलक्षणम्। ३५ सामान्यम्।

शब्दात्प्रत्येति भिन्नाक्षो न तु प्रत्यक्षमीक्षते ॥ १ ॥" [ ]
"अन्यथैवाग्निसम्बन्धाद्दाहं दग्धोऽभिमन्यते ।
अन्यथा दाहशब्देन दाहार्थः सम्प्रतीयते ॥"
[वाक्यप० २।४।२५] इत्यादि ।

सामग्रीभेदाद्विशदेतरप्रतिभासभेदो न पुनर्विषयभेदात्, सामान्यविशेषात्मकोऽर्थविषयतया सकलप्रमाणानां तद्भेदाभावादित्यग्रे वक्ष्यमाणत्वात् । ततो 'यो यत्कृते प्रत्यये न प्रतिभासते' इत्यादिप्रयोगे हेतुरसिद्धः; सामान्यविशेषात्मार्थलक्षणस्वलक्षणस्य शाब्दप्रत्यये प्रतिभासनात् ।

प्रयोगः-यद्यत्र व्यवहृतिमुपजनयति तत्तद्विषयम् यथा सामान्यविशेषात्मके वस्तुनि व्यवहृतिमुपजनयत्प्रत्यक्षं तद्विषयम्, तत्र व्यवहृतिमुपजनयति च शब्द इति । न चासिद्धो हेतुः; बहिरन्तश्च शाब्दव्यवहारस्य तथाभूते वस्तुन्युपलम्भात् । भवत्कल्पितस्वलक्षणस्य तु प्रत्यक्षेऽन्यत्र वा स्वप्नेऽप्यप्रतिभासनात् ।

प्रतिज्ञापदयोश्च व्याघातः; तथाहि-'अन्यदेवेन्द्रियग्राह्यम्' इत्यनेन शब्देन कश्चिदर्थोऽभिधीयते वा, न वा? नाभिधीयते चेत्; कथमिन्द्रियग्राह्यस्यान्यत्वमतः प्रतीयते? अथाभिधीयतेऽर्थः; तर्हि तस्यैव तद्विषयत्वप्रसिद्धेः कथञ्च शब्दस्यार्थागोचरत्वप्रतिज्ञाऽतो व्याहन्येत? साक्षादिन्द्रियग्राह्यागोचरोऽसाविति चेत्; पारम्पर्येणासौ तद्गोचरो भवति, न वा? यदि न भवति; तर्हि 'साक्षात्' इति विशेषणं व्यर्थम् । अथ भवति; तर्हि तज्ज्ञा(तज्ज्ञा)

१ कुतः । २ अर्थम् । ३ जानाति । ४ उत्पादितदाहः अन्य इत्यर्थः । ५ क्रियाविशेषणमेतद् । ६ परोक्षं जानातीत्यर्थः । ७ अर्थम् । ८ स्पर्शनेन्द्रियग्राह्यतया । ९ स्पष्टत्वेन । १० जानाति । ११ अस्पष्टत्वेन । १२ आसन्नदूरत्वादि । १३ सामान्यविशेषात्मकार्थो विषयो भवतीति साध्यः, शब्दो धर्मी । १४ यतः । १५ विषय । १६ चतुर्थाध्याये । १७ शब्दप्रत्ययेऽर्थप्रतिभासः सिद्धो यतः । १८ अनुमाने । १९ शब्दकृते प्रत्ययेऽप्रतिभासमानत्वात्स्वलक्षणस्येति । २० कुतः । २१ यतः । २२ शब्दज्ञानजनितज्ञाने । २३ विकल्पज्ञानम् । २४ विकल्पम् । २५ नायनादि । २६ तत्र व्यवहृतिजनकत्वात् । २७ गवादौ । २८ आत्मादौ । २९ सौगत । ३० अनुमानादौ । ३१ खरविषाणवत् । ३२ व्याघातमेव दर्शयति । ३३ बौद्धमते शब्दः कञ्चिदप्यर्थं न वक्ति तर्हि । ३४ अर्थस्य । ३५ भिन्नत्वम् । ३६ अर्थोऽगोचरो यस्य । ३७ अव्यवधानेन । ३८ यतः । ३९ स्वलक्षणं प्रत्यक्षं गृह्णाति । प्रत्यक्षाच्च विकल्पः (नीलमिदं पीतमिदमिति)। विकल्पाच्च शब्द उत्पद्यते । विकल्पयोनयः शब्दः इत्यभिधानादिति । ४० स गोचरो यस्य शब्दस्य । ४१ पारम्पर्येणेन्द्रियग्राह्यार्थगोचरो भवति शब्दः ।

प्रतीतिः किमिन्द्रियजप्रतीतितुल्या, तद्विलक्षणा वा? यदि तत्तुल्या; तदा 'शब्दात्प्रत्येति भिन्नाक्षो न तु प्रत्यक्षमीक्षते' इत्यनेन विरोधः। तद्विलक्षणा चेत्; न तर्हि प्रतीतिवैलक्षण्यं विषयभेदसाधनम्, एकत्रापि विषये तदभ्युपगमात्।

५ दाहशब्देन चात्र कोर्थोभिप्रेतः-किमग्निः, उष्णस्पर्शः, रूपविशेषः, स्फोटः, तद्दुःखं वा? अस्तु यः कश्चित्, किमेभिर्विकल्पैर्भवतां सिद्धमिति चेत्? एतेषां मध्ये योर्थोभिप्रेतो भवतां तेनार्थेनार्थवत्त्वप्रसिद्धेः तस्यानर्थविषयत्वाभावः सिद्ध इति।

नन्वेवं दहनसम्बन्धाद्यथा स्फोटो दुःखं वा तथा दाहशब्दादपि
१० किन्न स्यादर्थप्रतीतेरविशेषात्? तन्न; अन्यकार्यत्वात्तस्य, न खलु दहनप्रतीतिकार्यं स्फोटादि। किं तर्हि? दहनदेहसम्बन्धविशेषकार्यम्, सुषुप्ताद्यवस्थायामप्रतीतावपि अग्नेस्तत्सम्बन्धविशेषात् स्फोटादेर्दर्शनात्, दूरस्थस्य चक्षुषा प्रतीतावप्यदर्शनात्, मन्त्रादिबलेन त्वगिन्द्रियेणापि प्रतीतावप्यदर्शनात्। तस्मादभिन्नेपि
१५ विषये सामग्रीभेदाद्विशदेतरप्रतिभासभेदोऽभ्युपगन्तव्यः।

तथा चेदमप्ययुक्तम्-'न चैकस्य वस्तुनो रूपद्वयमस्त्येकस्य द्वित्वविरोधात्' इति।

यदि चाभावोभिधीयते शब्दैर्भावो नाभिधीयते इति क्रियाप्रतिषेधाश्च किञ्चित्कृतं स्यात्। तथा च कथं नदीदेशद्वीपपर्वत-
२० स्वर्गापवर्गादिष्वाप्तप्रणीतवाक्यात्प्रतिपत्तिः श्रेयःसाधनानुष्ठाने प्रवृत्तिर्वा? अन्यथा सर्वस्मादपि वाक्यात्सर्वत्रार्थे प्रतिपत्तिप्रवृत्त्यादिप्रसङ्गः।

---

१ सामान्यार्थं जानाति। २ अन्धो ना। ३ क्रियाविशेषणम्। चक्षुःप्रत्यक्षेण यादृशमीक्षते न तादृशमिति भावः। ४ अर्थम्। ५ शब्दजेन्द्रियजप्रतीत्योः समानत्वात्। ६ दूरनिकटैकपादपादौ स्वलक्षणे। ७ परेण। ८ लोके। ९ सौगतस्य तव। १० जैनानाम्। ११ पदार्थानाम्। १२ सौगतानाम्। १३ शब्दस्य। १४ तेनाभिप्रेतेनार्थेनार्थवत्त्वसिद्धिप्रकारेण। १५ वह्निदहनसम्बन्धादर्थप्रतीतिविषये शब्दादप्यर्थप्रतीतिरिति। १६ दहनस्य। १७ स्फोटादिकस्य। १८ दूरपादपादौ। १९ दूरनिकटादि। २० परेण। अनेन कथनेन बौद्धस्य यथा स्वलक्षणस्य प्रत्यक्षेण स्पष्टतया प्रतिभासनं तथा शब्देनाप्यस्पष्टतया प्रतिभासनं जातमिति। २१ सामग्रीभेदात्प्रतिभासभेदे च। २२ वैशद्यावैशद्यरूपम्। २३ अपोहः। २४ भावस्य। २५ तर्हीति शेषः। २६ शब्दैः। २७ शब्दैर्न किञ्चित् वाच्यं स्यात्। २८ शब्देन कस्याप्यकरणेऽन्यथार्थप्रतीतिरनुष्ठाने प्रवृत्तिश्च यदि। २९ अकृतत्वाविशेषात्।

सत्येतरव्यवस्थाभावश्च तत्त्वेतरप्रतिपत्तेरभावात् । तथाच 'यत्सत्तत्सर्वमक्षणिकं क्षणिके क्रमयौगपद्याभ्यामर्थक्रियाविरोधात्' इत्यादेरिव 'यत्सत्तत्सर्वं क्षणिकं नित्ये क्रमयौगपद्याभ्यामर्थक्रियानुपपत्तेः' इत्यादेरप्यसत्त्वानुषङ्गः । विपर्ययप्रसङ्गो वा, सर्वथार्थासंस्पर्शित्वाविशेषात् । कस्यचिदनुमानवाक्यस्य कथ- ५ ञ्चिदर्थसंस्पर्शित्वे सर्वथार्थस्यानभिधेयत्वविरोधः । स्वपक्षविपक्षयोश्च सत्यासत्यत्वप्रदर्शनाय शास्त्रं प्रणयन् वस्तु सर्वथाऽनभिधेयं प्रतिजानाति इत्युपेक्षणीयप्रज्ञः, सर्वथाभिधेयरहितेन तेन तस्य प्रणेतुमशक्तेः ।

"शक्तस्य सूचकं हेतुवचोऽशक्तमपि स्वयम्" [प्रमाणवा० १० ४।१७] इत्यभिधानात् । तत्कृतां तत्त्वसिद्धिमुपजीवति, नार्थस्य तद्वाच्यतामिति किमपि महाद्भुतम् ! वस्तुदर्शनवंशप्रभवत्वाद्धेतुवचो वस्तुसूचकम्; इत्यक्षणिकवादिनोपि समानम् । मद्वचनमेवार्थदर्शनवंशप्रभवं न पुनः परवचनम्; इत्यन्यत्रापि समानम् । १५

सकलवचसां विवक्षामात्रविषयत्वाभ्युपगमाच्च, तावन्मात्रसूचकत्वेन च शब्दस्य प्रामाण्ये सर्वं शाब्दविज्ञानं प्रमाणं स्यात्, प्रत्यागमस्यापि प्रतिवाद्यभिप्रायप्रतिपादकत्वाविशेषात् ।

किञ्च, अर्थव्यभिचारवच्छब्दानां विवक्षाव्यभिचारस्यापि दर्शनात्कथं ते तामपि प्रतिपादयेयुः ? गोत्रस्खलनादौ ह्यन्यविवक्षाया- २० मप्यन्यशब्दप्रयोगो दृश्यत एव । 'सुविवेचितं कार्यं कारणं न व्यभिचरति' इति नियमोऽर्थविशेषप्रतिपादकत्वेप्यस्याऽस्तु ।

न चास्य विवक्षायास्तदधिरूढार्थस्य वा प्रतिपादकत्वं युक्तम्; ततो बहिरर्थे प्रतिपत्तिप्रवृत्तिप्राप्तिप्रतीतेः प्रत्यक्षवत् । यथैव हि

---

१ सत्येतरव्यवस्थाऽभावे च । २ पूर्वोक्तस्य सत्यत्वमुत्तरोक्तस्यासत्यत्वमित्यर्थः । ३ अविषयत्वं शब्दानां यतः । ४ सौगतोक्तस्य । ५ कथञ्चित्पारम्पर्येण । कथम् ? प्रथमतस्त्रिरूपधूमादिस्वलक्षणलिङ्गदर्शनं, तदनु सम्बन्धस्मरणं, तदनु शब्दप्रयोग इति । ६ सौगतेनाङ्गीक्रियमाणे । ७ दिग्नागादिः । ८ स्वलक्षणम् । ९ शब्देन । १० आकारान्तरेपि स्वलक्षणसूचकं वचोऽस्तीति वदति शक्तस्य समर्थस्य हेतोर्धूमादिस्वलक्षणस्य वाच्यस्य । ११ साध्येऽशक्तमपि । १२ स्वरूपेण । १३ सौगतेन । १४ वचनं । १५ अङ्गीकरोति । १६ त्रिरूपधूमादिस्वलक्षणलिङ्ग । १७ वंशः= अन्वयः । १८ जैनस्य । १९ ज्ञानस्य । २० परवचनस्य । २१ जैनादि । २२ गोत्रं= नाम । २३ देवदत्त । २४ जिनदत्त । २५ शब्दलक्षणम् । २६ विवक्षालक्षणम् । २७ बहिरर्थे ।

प्रत्यक्षात्प्रतिपत्तृप्रणिधानसामग्रीसापेक्षात्प्रत्यक्षार्थप्रतिपत्तिस्तथा सङ्केतसामग्रीसापेक्षादेव शब्दाच्छब्दार्थप्रतिपत्तिः सकलजनप्रसिद्धा, अन्यथाऽतो बहिरर्थे प्रतिपत्त्यादिविरोधः। न चार्थेऽर्थिनोऽर्थित्वादेव प्रवृत्तेः शब्दोऽप्रवर्त्तकः; अध्यक्षादेरप्येवमप्रवर्त्त-
५ कत्वप्रसङ्गात् तदर्थेऽप्यभिलाषादेव प्रवृत्तिप्रसिद्धेः। परम्परया प्रवर्त्तकत्वं शब्देऽप्यस्तु विशेषाभावात्।

का चेयं विवक्षा नाम–किं शब्दोच्चारणेच्छामात्रम्, 'अनेन शब्देनामुमर्थं प्रतिपादयामि' इत्यभिप्रायो वा? प्रथमपक्षे वक्तृश्रोत्रोः शास्त्रादौ प्रवृत्तिर्न स्यात्। न खलु कश्चिदनुन्मत्तः शब्द-
१० निमित्तेच्छामात्रप्रतिपत्त्यर्थं शास्त्रं वाक्यान्तरं वा प्रणेतुं श्रोतुं प्रवर्त्तते। दशदाडिमादिवाक्यैः सह सर्ववाक्यानामविशेषप्रसङ्गश्च, सर्वेषां स्वप्रभवेच्छामात्रानुमापकत्वाविशेषात्। अथ 'अनेन शब्देनामुमर्थं प्रतिपादयामि' इत्यभिप्रायो विवक्षा, तत्सूचकत्वेन शब्दानामनुमानत्वम्; तदप्ययुक्तम्; व्यभिचारात्।
१५ न हि शुकशारिकोन्मत्तादयस्तथाभिप्रायेण वाक्यमुच्चारयन्ति।

किञ्च, समयानपेक्षं वाक्यं तादृशमभिप्रायं गमयेत्, तत्सापेक्षं वा? आद्यविकल्पे सर्वेषामर्थप्रतिपत्तिप्रसङ्गाच्च कश्चिद्भाषानभिज्ञः स्यात्। समयापेक्षस्तु शब्दोऽर्थमेव किं न गमयति? न ह्ययमर्थाद्बिभेति येन तत्र साक्षान्न वर्त्तेत। गैव्यादावयसमयत्वादिकेर्थे
२० शब्दाप्रवृत्तौ न्यायः, सोऽभिप्रायेपि समान इत्यभिप्रायावगमोपि शब्दान्न स्यात्। तत्र स्वलक्षणस्याभिधानेनानिर्देश्यत्वम्।

किञ्च, तच्छब्देनाऽप्रतिपाद्याऽनिर्देश्यत्वमस्योच्येत, प्रतिपाद्य वा? न तावदप्रतिपाद्यः अतिप्रसङ्गात्। प्रतिपाद्य चेत्; न;

---

१ प्रणिधानमेव सामग्री। २ शब्दात्। ३ पुरुषस्य। ४ पुरुषस्य। ५ अर्थित्वादेव। ६ प्रत्यक्षमभिलाषमुत्पादयति, अभिलाषाच्चार्थे प्रवृत्तिरिति। ७ प्रत्यक्षस्य। ८ शब्दोप्यभिलाषमुत्पादयति, अभिलाषात्प्रवृत्तिरिति। ९ परम्परया प्रवर्त्तकत्वस्य। १० धीमान्। ११ शब्दस्य निमित्तं कारणं या सा, सा चासाविच्छा च सैवेच्छा एवंभूता यतः शब्दोच्चारः पुरुषस्य। १२ स्वेषां वाक्यानां प्रभव उत्पत्तिर्यस्याः इच्छायाः सा चासाविच्छा चेति। १३ विवक्षा धर्मिणी अस्यास्तीति साध्यं शब्दोच्चारणान्यथानुपपत्तेरिति। १४ अस्यैवंविधोभिप्रायोस्ति तदभिधायकशब्दोच्चारणादिति। १५ समयः=सङ्केतः। १६ सर्वतया। १७ अविशेषतः। १८ कश्चिद्ग्रावो। १९ सकलभाषात्मकशब्दश्रवणात्। २० द्वितीयविकल्पः। २१ अर्थानामानन्त्यात्। २२ अभिप्रायाणामानन्त्यात्। २३ शब्दश्रोतृणाम्। २४ असङ्केतसमयत्वाविशेषात्। २५ सामान्यविशेषात्मकस्यार्थस्य। २६ शब्देन। २७ स्वलक्षणेति शब्देन। २८ घटादेरप्यनिर्देश्यत्वप्रसङ्गात्।

स्ववचनविरोधात् । शब्देन हि स्वलक्षणं प्रतिपादयता निर्देश्यत्वमस्याभ्युपगतं स्यात्, पुनश्च तदेव प्रतिषिद्धमिति। कथं चानिर्देश्यशब्देनाप्यस्यानभिधाने अनिर्देश्यत्वसिद्धिः? भ्रान्तिमात्रात् ततस्तत्सिद्धौ न परमार्थतस्तदनिर्देश्यमसाधारणं वा सिद्ध्येत्। प्रत्यक्षात्तथाभूतस्यास्य प्रसिद्धिः; इत्यपि मनोरथमात्रम्; निर्देशयोग्यस्य साधारणासाधारणरूपस्य वस्तुनस्तेन साक्षात्करणात्। 'वस्तुव्यतिरेकेण नापरा निर्देश्यता साधारणता वा प्रतिभाति' इत्यसाधारणतायामपि समानम्। 'वस्तुस्वरूपमेव सा' इत्यन्यत्रापि समानम्।

किञ्च, विकल्पप्रतिभास्यऽन्यापोहगता वाच्यता वस्तुनि प्रतिषिध्येत, वस्तुगता वा? आद्यविकल्पे सिद्धसाध्यता। न ह्यन्यापोहवाच्यतैव वस्तुवाच्यता; तत्प्रतिषेधविरोधात्। द्वितीयपक्षे तु स्ववचनविरोध इत्युक्तम्। ततः प्रामाणिकत्वमात्मनोऽभ्युपगच्छता प्रतीतिसिद्धा वाच्यतार्थस्याभ्युपगन्तव्या।

सत्यम्; वाच्य एवार्थः। तद्वाचकस्तु पदादिस्फोट एव, न पुनर्वर्णाः। ते हि किं समस्ताः, व्यस्ता वा तद्वाचकाः? यदि व्यस्ताः; तदेकेनैव वर्णेन गवाद्यर्थप्रतिपत्तिरुत्पादितेति द्वितीयादिवर्णोच्चारणमनर्थकम्। अथ समुदिताः; तन्न; क्रमोत्पन्नानामनन्तरविनष्टत्वेन समुदायस्यैवासम्भवात्। न च युगपदुत्पन्नानां तेषां समुदायकल्पना; एकपुरुषापेक्षया युगपदुत्पत्त्यसम्भवात्, प्रतिनियतस्थानकरणप्रयत्नप्रभवत्वात्तेषाम्। न च भिन्नपुरुषप्रयुक्तगकारौकारविसर्जनीयानां समुदायेऽर्थप्रतिपादकं प्रतिपन्नम्; प्रतिनियतवर्णक्रमप्रतिपत्त्युत्तरकालभावित्वेन शाब्दप्रतिपत्तेः प्रतिभासनात्।

१ इति। २ इदं स्वलक्षणमनिर्देश्यमिति अकथने। ३ स्वलक्षणस्य। ४ निर्विकल्पकात्। ५ शब्देन। ६ स्वलक्षणव्यतिरेकेण साधारणतापि पृथक् नो भातीति। ७ निर्देश्यतायां साधारणतायां च। ८ वस्तुस्वरूपत्वम्। ९ बुद्धि। १० शब्देन। ११ स्वलक्षणे। १२ स्वलक्षणमनिर्देश्यमित्यनेनोल्लेखेन। १३ बुद्धिप्रतिबिम्बरूपस्यान्यापोहगतस्य (वाच्यत्वस्य) स्वलक्षणेऽस्माभिरपि प्रतिषेधाभ्युपगमात्। १४ वस्तुनि अन्यापोहवाच्यता विद्यते चेन्न तर्हि प्रतिषेधः। कथमिति विरोधः। १५ शब्देन हीत्यादि। १६ शब्देन। १७ लब्धावसरो मीमांसकोऽवतिष्ठते। १८ शब्दैः। १९ वर्णादिनाभिव्यज्यमानो नित्यो व्यापकः पदादीनामर्थः पदादिस्फोटः। २० तदेव भावयति। २१ गौरित्यत्र गकारौकारविसर्जनीयाः गकारादिना। २२ हेतोः। २३ औकारादि। २४ उत्पत्तेः। २५ ताल्वादि। २६ क्रिया।

न चान्त्यो वर्णः पूर्ववर्णानुगृहीतो वर्णानां क्रमोत्पादे सत्यर्थप्रतिपादकः; पूर्ववर्णानामन्त्यवर्णं प्रत्यनुग्राहकत्वायोगात्। तद्धि अन्त्यवर्णं प्रति जनकत्वं तेषां स्यात्, अर्थज्ञानोत्पत्तौ सहकारित्वं वा? न तावज्जनकत्वम्; वर्णाद्वर्णोत्पत्तेरभावात्, प्रतिनियतस्थानकरणादिप्रभवत्वात्तस्य, वर्णाभावेप्याद्यवर्णोत्पत्त्युपलम्भाच्च। नाप्यर्थज्ञानोत्पत्तौ सहकारित्वं तेषामन्त्यवर्णानुग्राहकत्वम्; अविद्यमानानां सहकारित्वस्यैवासम्भवात्। यथा चान्त्यवर्णं प्रति पूर्ववर्णाः सहकारित्वं न प्रतिपद्यन्ते तथा तज्जनितसंवेदनान्यपि, तत्प्रभवसंस्काराश्च।

किञ्च, संवेदनप्रभवसंस्काराः स्वोत्पादकविज्ञानविषयस्मृतिहेतवो नार्थान्तरे ज्ञानमुत्पादयितुं समर्थाः। न खलु घटज्ञानप्रभवः संस्कारः पटे स्मृतिं विदधद्दृष्टः। न च तत्संस्कारप्रभवस्मृतीनां तत्सहायता; तासां युगपदुत्पत्त्यभावात्। अयुगपदुत्पन्नानां चावस्थित्यसम्भवात्। न चाखिलसंस्कारप्रभवैका स्मृतिः सम्भवति; अन्योन्यविरुद्धानेकार्थानुभवप्रभवसंस्काराणामप्येकस्मृतिजनकत्वप्रसङ्गात्। न चान्यवर्णाऽनपेक्ष एव 'गौः' इत्यत्रान्त्यो वर्णोर्थे(र्थ)प्रतिपादकः; पूर्ववर्णोच्चारणवैयर्थ्यानुषङ्गात्। घटशब्दान्त्यव्यवस्थितस्यापि ककुदादिमदर्थप्रतिपादकत्वप्रसङ्गाच्च। तन्न वर्णाः समस्ता व्यस्ता वार्थप्रतिपादकाः सम्भवन्ति। अस्ति च गवादिशब्देभ्योऽर्थप्रतीतिः, तदन्यथानुपपत्त्या वर्णव्यतिरिक्तोऽर्थप्रतीतिहेतुः स्फोटोऽभ्युपगन्तव्यः।

श्रोत्रविज्ञाने चासौ निरवयवोऽक्रमः प्रतिभासते, श्रवणव्यापारानन्तरमभिन्नार्थावभासिन्याः संविदोऽनुभवात्। न चासौ वर्णविषया; वर्णानां परस्परव्यावृत्तरूपतयैकप्रतिभासजनकत्वविरोधात्। न चेयं सामान्यविषया; वर्णत्वव्यतिरेकेणापरसामा-

१ विसर्जनीयलक्षणः। २ गकारौकाराभ्याम्। ३ उत्पद्य विनष्टत्वात्पूर्ववर्णानाम्। ४ आद्यो गकारः। ५ असतां पूर्ववर्णानाम्। ६ उत्पत्त्यनन्तरं विनष्टत्वात्। ७ (पूर्ववर्णानां) धारणारूपाः। ८ अन्त्यवर्णश्रवणकाले प्राक्तनवर्णसंवेदनसंस्काराभावात्। ९ पूर्ववर्णानाम्। १० पूर्णवर्णज्ञान। ११ पूर्ववर्णलक्षण। १२ बहिरर्थे गवादौ। १३ पूर्ववर्णस्मृतीनाम्। १४ प्राक्तनप्राक्तनानां विनष्टत्वात्। १५ सर्वेषामेका स्मृतिर्भविष्यतीत्युक्ते आह। १६ अन्त्यवर्णसहाया। १७ घटपटकुटशकटादि। १८ अन्त्यवर्णापेक्षया अन्यवर्णौ=गकारौकारौ। १९ विसर्जनीयस्य। २० गोरूप। २१ मा भवन्त्वित्युक्ते आह। २२ स्फोटं विना। २३ निरंशः। २४ अभिन्नः-एकः। २५ अर्थः स्फोटः तेन। २६ एकत्वेनावभासिन्याः। २७ अभिन्नरूप। २८ एकज्ञानसूचक।

ण्वस्य गकारौकारविसर्जनीयेष्वसम्भवात्, वर्णत्वस्य च प्रतिनियतार्थप्रत्यायकत्वायोगात्। न चेयं भ्रान्ता; अबाध्यमानत्वात्। न चाबाध्यमानप्रत्ययगोचरस्यापि स्फोटस्यासत्त्वम्; अघयविद्व्यादेरप्यसत्त्वप्रसङ्गात्। नित्यश्चासौ स्फोटोऽभ्युपगन्तव्यः। अनित्यत्वे सङ्केतकालानुभूतस्य तदैव ध्वस्तत्वात्कालान्तरे देशान्तरे च गोशब्दश्रवणात्ककुदादिमदर्थप्रतीतिर्न स्यात्, असङ्केतिताच्छब्दादर्थप्रतिपत्तेरसम्भवात्। सम्भवे वा द्वीपान्तरादागतस्य गोशब्दादप्यर्थप्रतिपत्तिः स्यात्, सङ्केतकरणवैयर्थ्यं चासज्येत।

अत्र प्रतिविधीयते। प्रतीयमानात्पूर्ववर्णध्वंसविशिष्टादन्त्यवर्णादर्थप्रतीतेरभ्युपगमादुक्तदोषाभावः। न चाभावस्य सहकारित्वं विरुद्धम्; वृन्तफलसंयोगाभावस्य अप्रतिबद्धगुरुत्वफलप्रपातक्रियाजनने तद्दर्शनात्, दृष्टं चोत्तरसंयोगं कुर्वत्प्राक्तनसंयोगाभावविशिष्टं कर्म, परमाण्वग्निसंयोगश्च परमाणौ तद्गतपूर्वरूपप्रध्वंसविशिष्टो रक्ततामुत्पादयन्प्रतीतः।

यद्वा, पूर्ववर्णविज्ञानाभावविशिष्टः तज्ज्ञानजनितसंस्कारसव्यपेक्षो वाऽन्त्यो वर्णोऽर्थप्रतीत्युत्पादकः। ननु संस्कारस्य कथं विषयान्तरे विज्ञानजनकत्वम्; इत्यप्यचोद्यम्; तद्भावभावितयार्थप्रतीतेरुपलब्धेः।

पूर्ववर्णविज्ञानप्रभवसंस्कारश्च प्रणालिकयाऽन्त्यवर्णसहायतां प्रतिपद्यते; तथाहि-प्रथमवर्णे तावद्विज्ञानम्, तेन च संस्कारो जन्यते। ततो द्वितीयवर्णविज्ञानम्, तेन च पूर्वज्ञानाहितसंस्कारसहितेन विशिष्टः संस्कारो जन्यते। एवं तृतीयादावपि योजनीयं यावदन्त्यः संस्कारोऽर्थप्रतिपत्तिजनकान्त्यवर्णसहायः।

अथवा, शब्दार्थोपलब्धिनिमित्तक्षयोपशमप्रतिनियमादविनष्टा एव पूर्ववर्णसंविदस्तत्संस्कारो वाऽन्त्यवर्णसंस्कारं विदधति।

१ गवादेः। २ स्फोट एव प्रतिनियतार्थप्रत्यायको यतः। ३ अर्थः—गोलक्षणः, तस्य, ककुदादिमतोऽर्थस्य च। ४ (घटवाचकघटशब्दे) घकारादावपि वर्णत्वस्य सत्त्वात्। ५ श्रोत्रप्रत्यक्षज्ञानेन। ६ प्रत्यक्षज्ञानगोचरस्य घटादेः। ७ स्फोटस्य। ८ स्फोटात्। ९ गोरहितात्। १० तथा च। ११ श्रूयमाणात्। १२ वाक्यपक्षे वर्णस्थाने पदं ग्राह्यम्। १३ जैनैः। १४ पूर्ववर्णोच्चारणादिवैयर्थ्यलक्षण उक्तदोषः। १५ शाखादिना। १६ यसः। १७ तस्य कारणत्वस्य। १८ श्येनादेः। १९ गमनक्रिया। २० कृष्णादिरूप। २१ घटादौ। २२ पक्षेऽन्त्यपदम्। २३ पूर्ववर्णानाम्। २४ गोपिण्डे। २५ प्रवाहेण। २६ पक्षे प्रथमपदे। २७ समुत्पद्यते। २८ उभयविषयः, धारणाऽपरनामकः। २९ भवति। ३० द्रव्यस्वस्वरूपापेक्षया। ३१ ये अविनष्टाः।

तथाभूतसंस्कारप्रभवस्मृतिसव्यपेक्षो वान्त्यो वर्णः पदार्थप्रतिपत्तिहेतुः। वाक्यार्थप्रतिपत्तावप्ययमेव न्यायोऽङ्गीकर्त्तव्यः। वर्णाद्वर्णोत्पत्त्यभावप्रतिपादनं च सिद्धसाधनमेव। तदेवं यथोक्तसहकारिकारणसव्यपेक्षादन्त्यवर्णादर्थप्रतिपत्तेरन्वयव्यतिरेकाभ्यां
५ निश्चयात् स्फोटपरिकल्पनाऽसम्भव एव; तदभावेप्यर्थप्रतिपत्तेरुक्तप्रकारेण सम्भवेऽन्यथानुपपत्तेः प्रक्षयात्। न खलु दृष्टादेव कारणात्कार्योत्पत्तावदृष्टकारणान्तरपरिकल्पना युक्तिः स(क्तिस)ङ्गता अतिप्रसङ्गात्।

न चैवंवादिनो वर्णेभ्यः स्फोटाभिव्यक्तिर्घटते; तथाहि–न सम-
१० स्तास्ते स्फोटमभिव्यञ्जयन्ति; उक्तप्रकारेण तेषां सामस्त्यासम्भवात्। नापि प्रत्येकम; वर्णान्तरोच्चारणानर्थक्यप्रसङ्गात्, एकेनैव वर्णेन सर्वात्मनाऽस्याभिव्यक्तत्वात्। पदार्थान्तरप्रतिपत्तिव्यवच्छेदार्थं तदुच्चारणमिति चेत्; न; तदुच्चारणेपि तत्प्रतिपत्तेरेवानुषङ्गात्। यथाहि 'गौः' इति पदस्यार्थो गकारोच्चारणात्प्रतीयते तथौ-
१५ कारोच्चारणात् 'औशनसः' इति पदार्थोपि, तथा च 'गौः' इति पदादेव 'गौः, औशनसः' इत्यर्थद्वयं प्रतीयेत। संशयो वा स्यात्–'किमेकपदस्फोटाभिव्यक्तये गाद्यनेकवर्णोच्चारणं पदान्तरस्फोटव्यवच्छेदेन, किं वानेकपदस्फोटाभिव्यक्तयेऽनेकाद्यवर्णोच्चारणम्' इति।

२० न च पूर्ववर्णः स्फोटस्य संस्कारेऽन्त्यो वर्णस्तस्याभिव्यञ्जकः इति न वर्णान्तरोच्चारणवैयर्थ्यम; अभिव्यक्तिव्यतिरिक्तसंस्कारस्वरूपानवधारणात्। न खलु तत्र वेगाख्यः संस्कारो निर्वर्त्यते; तस्य मूर्त्तेष्वेव भावात्। नापि वासनारूपः; अचेतनत्वात्। स्फोटस्य तच्चैतन्याभ्युपगमे वा स्वशास्त्रविरोधः। नापि स्थित-

१ ततः संस्कारस्य सव्यपेक्षोऽन्त्यवर्णोऽर्थप्रतीतिजनक इति। २ परेण। ३ जैनानाम्। ४ उक्तप्रकारेण। ५ ताल्वादि। ६ अन्त्यवर्णसद्भावेऽर्थप्रतिपत्तिस्तदभावेऽर्थप्रतिपत्त्यभाव इत्येवम्। ७ स्फोटसद्भावेऽर्थप्रतिपत्तिः स्फोटाभावे च तदभाव इति स्फोटानुमापिकायाः। ८ दृष्टाग्निकारणाद्धूमो जलकार्यं स्यात्। ९ समस्तेभ्यो व्यस्तेभ्यो वा वर्णेभ्योऽर्थप्रतीतिर्नास्तीत्येवं वादिनः। १० गौरित्यत्र गाभिव्यक्तस्फोटप्रतिपन्नार्थाद्गोलक्षणादन्यपदाभिव्यक्तस्फोटप्रतिपन्नार्थोऽर्थान्तरम्, प्रकृतात्पदार्थादन्यः पदार्थः पदार्थान्तरम्। ११ घटादिपदस्फोट। १२ पदार्थप्रतिपत्तिं दर्शयन्त्याचार्याः। १३ एकस्य गकारस्य। १४ उशनसि शब्दे भव औशनसः शुक्र इत्यर्थः। १५ कृत्वा। १६ हेतोः। १७ उत्तरवर्णे। १८ कथम्? तथा हि। १९ वर्णैः। २० पदार्थेषु। २१ वासनायाश्चेतनत्वात्। २२ मीमांसक।

स्थापकः; अस्यापि मूर्त्तद्रव्यवृत्तित्वात्, स्फोटस्य चाऽमूर्त्तत्वाभ्युपगमात्।

किञ्च, असौ संस्कारः स्फोटस्वरूपः, तद्धर्मो वा? तत्राद्यविकल्पोऽयुक्तः; स्फोटस्य वर्णोत्पाद्यत्वानुषङ्गात्। द्वितीयविकल्पोऽसम्भाव्यः; व्यतिरिक्ताव्यतिरिक्तविकल्पानुपपत्तेः। स्फोटात्तस्याव्यतिरेके तत्करणे स्फोट एव कृतो भवेत्, तथा चास्याऽनित्यत्वानुषङ्गात् स्वाभ्युपगमविरोधः। ततस्तद्धर्मस्य व्यतिरेके सम्बन्धानुपपत्तिः तदनुपकारकत्वात्। तस्योपकाराभ्युपगमे व्यतिरिक्ताऽव्यतिरिक्तविकल्पानुषङ्गः, तत्रापि पूर्वोक्त एव दोषोऽनवस्थाकारी। न च व्यतिरिक्तधर्मसद्भावेपि स्फोटस्यानभिव्यक्तस्वरूपापरित्यागे पूर्ववदर्थप्रतिपत्तिहेतुत्वम्। तत्त्यागे चाऽनित्यत्वप्रसक्तिः।

किञ्च, पूर्ववर्णैः संस्कारः स्फोटस्य क्रियमाणः किमेकदेशेन क्रियते, सर्वात्मना वा? यद्येकदेशेन; तदा तद्देशानामप्यतोऽर्थान्तरानर्थान्तरपक्षयोः पूर्वोक्तदोषानुषङ्गः। सर्वात्मना तु संस्कारे सर्वत्र सर्वेषां ततोऽर्थप्रतिपत्तिः स्यात्।

किञ्च, स्फोटसंस्कारः स्फोटविषयसंवेदनोत्पादनम्, आवरणापनयनं वा? यद्यावरणापनयनम्; तदैकत्रैकदावरणापगमे सर्वदेशावस्थितैः सर्वदा व्यापिनित्यतयोपलभ्येत, नित्यव्यापित्वाभ्यामपगतावरणस्यास्य सर्वत्र सर्वदोपलभ्यस्वभावत्वात्। अनुपलभ्यस्वभावत्वे वा न क्वचित्कदाचित्केनचिदप्युपलभ्येत। अथैकदेशेनावरणापगमः क्रियते; नन्वेवमावृतानावृतत्वेन सावयवत्वमस्यानुषज्येत। अथाऽविनिर्भागत्वादेकत्रानावृतः सर्वत्रानावृतोऽभ्युपगम्यते; तर्हि तद्वस्थोऽशेषदेशावस्थितैरुपलब्धिप्रसङ्गः। यथा च निरवयवत्वादेकत्रानावृतः सर्वत्रानावृतः तथैकत्रावृतः सर्वत्राप्यावृत इति मनागपि नोपलभ्येत।

---

१ स्थितस्थापकरूपकस्य। २ मीमांसकेन। ३ तथा च स्फोटनित्यत्वव्याघातः। ४ स्फोटेन सह। ५ स्फोटधर्मलक्षणसंस्कारेण स्फोटस्योपकारः क्रियते। ६ परेण। ७ स्फोटात्। ८ धर्मोऽसंस्कारः। ९ संस्कारात्पूर्वं यथाऽकृतसंस्कारस्य स्फोटस्यार्थप्रतिपत्तिहेतुत्वं नास्ति। १० घटते। ११ अन्यथा। १२ स्फोटोऽनित्यः पूर्वाकारपरित्यागात् घटाकारपरिणतमृत्पिण्डवत्। १३ स्फोटस्य। १४ प्राणिनाम्। १५ व्यापकत्वनित्यत्वात्। १६ प्रतिपत्तॄणाम्। १७ एकस्यानेक। १८ स्फोटकाले। १९ नरेण। २० नित्यव्यापिनः सदैकस्वभावत्वात्। २१ न सर्वात्मना। २२ ततश्च निरंशत्वव्याघातः। स्फोटो न निरंशः आवृताऽनावृतदेशत्वात्। २३ निरंशत्वात्। २४ मीमांसकेन। २५ पूर्ववत्। २६ नृभिः। २७ ईषत्। २८ स्फोटः।

अथ[1] स्फोटविषयसंवेदनोत्पादस्तत्संस्कारः[2]; सोप्ययुक्तः[3]; वर्णानामर्थप्रतिपत्तिजननवत् स्फोटप्रतिपत्तिजननेपि सामर्थ्यासम्भवात्, न्यायस्य समानत्वात्।

अथ मतम्[4]-पूर्ववर्णश्रवणज्ञानाहित[5]संस्कारस्यात्मनो[6]ऽन्त्यवर्णश्रवणज्ञानानन्तरं पदादिस्फोटस्याभिव्यक्तेरयमदोषः; तदप्यसङ्गतम्; पदार्थप्रतिपत्तेरप्येवं प्रसिद्धेः[7] स्फोटपरिकल्पनानर्थक्यात्। चिदात्म[8]व्यतिरेकेण तत्त्वान्तरस्यास्यार्थप्रकाशनसामर्थ्यासम्भवाच्च[9]। स एव हि चिदात्मा विशिष्टशक्तिः स्फोटोऽस्तु। 'स्फुटति प्रकटीभवत्यर्थोऽस्मिन्' [10]इति स्फोटश्चिदात्मा। पदार्थज्ञानावरणवीर्यान्तरायक्षयोपशमविशिष्टः [11]पदस्फोटः[12]। [13]वाक्यार्थज्ञानावरणवीर्या[14]न्तरायक्षयोपशमविशिष्ट[15]स्तु वाक्यस्फोटः [16]इति। भावश्रुतज्ञानपरिणतस्यात्मनस्तथाभिधानाऽविरोधात्।

वायवः[17] स्फोटाभिव्यञ्जकाः; इत्यप्ययुक्तम्[18] शब्दाभिव्यक्तिवत्[19]स्फोटाभिव्यक्तेस्तेभ्योऽनुपपत्तेः। तेषां च व्यञ्जकत्वे[20] वर्णकल्पनावैफल्यम्, स्फोटाभिव्यक्तावर्थप्रतिपत्तौ चामीषामनुपयोगात्। स्थिते[21] च स्फोटस्य वर्णवायूत्पादात्पूर्वं सद्भावे वर्णानां वायूनां वा व्यञ्जकत्वं परिकल्प्येत। न चास्य सद्भावः कुतश्चित्प्रमाणात्प्रतिपन्नः। यच्चोक्तम्—

"[22]नादेनाऽहितबीजाया[23]मन्ये(न्त्ये)न [24]ध्वनिना सह।
[25]आवृत्तिपरि[26]पाकायां [27]बुद्धौ [28]शब्दोऽवभासते ॥"

[वाक्यप० १।८५] इति;

तदप्येतेना[29]पाकृतम्; नित्यत्व[30]मन्तरेणापि चार्थप्रतिपत्तिर्यथा भवति तथा प्रतिपादित[31]मेव।

---

१ प्रथमपक्षः। २ पुरुषं प्रति। ३ समस्ता व्यस्ता वा वर्णाः स्फोटप्रतिपत्तिं जनयन्तीत्यादिप्रकारेण। ४ मीमांसकस्य तव। ५ जनित। ६ पुरुषस्य। ७ तथा च। ८ ज्ञान। ९ कथम्? तथा हि। १० हेतोः। ११ आत्मा। १२ भवति। १३ कथमिदानीं द्वैविध्यमस्य स्यादित्याशङ्कायामाह। १४ वीर्यं शक्तिः। १५ आत्मा। १६ तथाभिधाने विरोधो भविष्यतीत्यत्राह। १७ वर्णा मा भवन्तु किन्तु। १८ कुतः। १९ स्फोटस्य। २० उपकाराभावात्। २१ सति। २२ पूर्ववर्णेन वायुना वा। २३ बीजः संस्कारः। २४ अन्त्यवर्णेन वायुना वा। २५ आवृत्तिः सामस्त्येनोच्चारणम्। २६ पूर्णायाम्। २७ ज्ञाने। २८ स्फोटः। २९ वायुभ्यः स्फोटाभिव्यक्तिनिराकरणेन। ३० अनित्येभ्यो वर्णेभ्यः कथं स्यादर्थप्रतिपत्तिरित्युक्ते सत्याह। ३१ पूर्वं वर्णविचारे।

यच्च श्रवणव्यापारानन्तरमित्याद्युक्तम्; तदप्यसारम्; घटादिशब्देषु परस्परव्यावृत्तकालप्रत्यासत्तिविशिष्टवर्णव्यतिरेकेण स्फोटात्मनोऽर्थप्रकाशकस्यैकस्याध्यक्षप्रतिपत्तिविषयत्वेनाप्रतिभासनात्। न चाभिन्नप्रतिभासमात्रादभिन्नार्थव्यवस्था, अन्यथा दूरादविरलानेकतरुषु एकप्रतिभासादेकत्वव्यवस्था स्यात्। न चास्य बाध्यमानत्वान्नैकत्वव्यवस्थापकत्वम्; स्फोटप्रतिभासेपि बाध्यमानत्वस्य प्रदर्शितत्वात्। न खलु निरवयवोऽक्रमो नित्यत्वादिधर्मोपेतोऽसौ क्वचिदपि प्रत्ययेऽवभासते।

कथं चैवं शब्दस्फोटवद्गन्धादिस्फोटोप्यर्थप्रतीतिनिमित्तं न स्यात्? यथैव हि शब्दः कृतसङ्केतस्य क्वचिदर्थे प्रतिपत्तिहेतुस्तथा गन्धादिरप्यविशेषात्। 'एवंविधमेकं गन्धं समाघ्राय स्पर्शं च संस्पृश्य रसं चास्वाद्य रूपं चालोक्य त्वयैवंविधोर्थः प्रतिपत्तव्यः' इति समयग्राहिणां पुनः क्वचित्तादृशगन्धाद्युपलम्भात् तथाविधार्थनिर्णयप्रसिद्धो गन्धादिविशेषाभिव्यङ्ग्यो गन्धादिस्फोटोऽस्तु [वर्ण]विशेषाभिव्यङ्ग्यपदादिस्फोटवत्।

एतेन हस्तपादकरणमात्रिकाङ्गहारादिस्फोटोप्यापादितो द्रष्टव्यः। पदादिस्फोट एव, न तु स्वावयवक्रियाविशेषाभिव्यङ्ग्यो हंसपक्ष्मादिर्हस्तस्फोटः, विकुट्टितादिलक्षणः पादस्फोटः, हस्तपादसमायोगलक्षणः करणस्फोटः, करणद्वयरूपो मात्रिकास्फोटः, मात्रिकासमूहलक्षणोऽङ्गहारस्फोटो वेति मनोरथमात्रम्; तस्यापि स्वस्वावयवाभिव्यङ्ग्यस्य स्वाभिनेयार्थप्रतिपत्तिहेतोरशक्यनिराकरणत्वात्। तन्निराकरणे वा शब्दस्फोटाभिनिवेशो दूरतः परि-

---

१ परेण। २ घकारात् टकारो व्यावृत्त इत्यादिप्रकारेण। ३ पूर्वक्षणे घकारोच्चारणमुत्तरक्षणे टकारोच्चारणमिति। ४ यद्यपि घटादिशब्देषु परस्परव्यावृत्तकालप्रत्यासत्तिविशिष्टवर्णव्यतिरेकेण स्फोटः प्रत्यक्षविषयत्वेन नावभासते तथापि अभिन्नप्रतिभासोस्ति। ननु ततः स्फोटव्यवस्था भविष्यतीत्याशङ्कायामाह। ५ शब्देषु स्फोटस्य। ६ समीपं गते सति। ७ अनेकतरुप्रतीत्या। ८ स्फोटः। ९ श्रवणेन्द्रियविषयभूते शब्दे शब्दस्यार्थप्रतिपादकत्वाभावादर्थप्रतिपत्त्यर्थं स्फोटकल्पने घ्राणेन्द्रियादिविषयेषु गन्धादिषु तदर्थं चत्वारः स्फोटाः कल्पनीयास्तेषामपि तदभावादिति भावः। १० गन्धादिस्फोटनिराकरणद्वारेण शब्दादिस्फोटं निराकुर्वन्तीति भावः। ११ अस्य शब्दस्यायमर्थ इति। १२ जातिकुसुमादीनामक्ष्यादीनामाम्रफलादीनां कामिन्यादीनां च प्रतिपत्तिहेतुः। १३ अर्थे कृतसंकेतस्य। १४ गन्धादिस्फोटस्य कथं सङ्केत इत्याशङ्कायामाह। १५ यथाविधः पूर्वं श्रुतः। १६ गन्धादिस्फोटापादनपरेण ग्रन्थेन। १७ नर्तनसमये नृत्यकारस्य। १८ अवयवाः=हस्तपादादयोङ्गुल्यादयश्च। १९ विकुट्टितं भ्रमणम्। २० युगपद्व्यापारः समायोगः। २१ अभिनेयः=अनुकरणम्।

त्याज्यः आक्षेप[1]समाधानानामुभयत्र[2] समानत्वात्। ततः शब्दस्फोटस्वरूपस्य विचार्यमाणस्यायोगान्नासौ पदार्थप्रतिपत्तिनिबन्धनं प्रेक्षादक्षैः प्रतिपत्तव्यम्। किन्तु पदं वाक्यं वा तन्निबन्धनत्वेन प्रतिपत्तव्यम्।

५ किं पुनः पदं वाक्यं वा यन्निबन्धनाऽर्थप्रतिपत्तिरित्य[3]भिधीयते[4]? वर्णानां परस्परापेक्षाणां निरपेक्षः[5] समुदायः पदम्। पदानां तु तदपेक्षाणां[6] निरपेक्षः[7] समुदायो वाक्यमिति। नन्वेवं[8] कथमिदं साधनवाक्यं[9] घटते-'यत्सत्तत्सर्वं[10] परिणामि यथा घटः, संश्च शब्दः' इति? 'तस्मात्परिणामी' इत्याकाङ्क्षणात्[11]साकाङ्क्षस्य[12] वाक्यत्वानिष्टेः[13];

१० इत्यप्यचोद्यम्; कस्यचित्[14]प्रतिपत्तुस्तदनाकाङ्क्षत्वोपपत्तेः। निराकाङ्क्षत्वं हि प्रतिपत्तृ[15]धर्मो वाक्येष्वध्यारोप्यते, न पुनः शब्दधर्मस्तस्या[16]चेतनत्वात्। स चेत्प्रतिपत्ता तावता[17]र्थं[18] प्रत्येति, किमित्य[19]परमाकाङ्क्षेत्? पक्षधर्मोपसंहारपर्यन्तसाधनवाक्यादर्थप्रतिपत्तावपि निगमनवचनापेक्षायाम् निगमनान्तपञ्चावयववाक्यादप्यर्थ[20]-

१५ प्रतिपत्तौ परापेक्षाप्रसङ्गान्न क्वचिन्निराकाङ्क्षत्वसिद्धिः। तथा[21] च वाक्याभावान्न वाक्यार्थप्रतिपत्तिः कस्यचित्[22]स्यात्। ततो[23] यस्य[24] प्रतिपत्तुर्यावत्सु परस्परापेक्षेषु पदेषु समुदितेषु निराकाङ्क्षत्वं तस्य तावत्सु वाक्यत्वसिद्धिरिति प्रतिपत्तव्यम्।

एतेन[25] प्रकरणादि[26]गम्य[27]पदान्तरसापेक्षश्रूयमाणसमुदायस्य नि-

---

१ (जैनमतापेक्षया) अवयविक्रियाभिनेयार्थव्यतिरेकेणान्यार्थस्य हस्तपादादिस्फोटलक्षणस्याप्रतिभासनलक्षण आक्षेपस्तर्हि वर्णार्थव्यतिरेकेणान्यस्य स्फोटलक्षणार्थस्याप्रतिभासनमिति समाधानम्। ननु वर्णानामनित्यत्वेनार्थप्रतिपादकत्वायोगात्स्फोट एवार्थप्रतिपत्तिहेतुरित्यभ्युपगन्तव्यम्। तन्न; क्रियाया अप्यनित्यत्वेनाभिनेयार्थप्रतिपादकत्वायोगाद्धस्तादिस्फोटोऽभ्युपगन्तव्यः (मीमांसकेन) इति। २ पदादिस्फोटहस्तादिस्फोटयोः। ३ प्रश्ने सति। ४ जैनैः। ५ पदान्तरगतवर्णनिरपेक्षः। ६ परस्पर। ७ वाक्यान्तरपदात्। ८ निरपेक्षस्य पदसमुदायस्य वाक्यत्वप्रकारेण। ९ साध्यसिद्धौ। १० जैनस्य तव। ११ सर्वं परिणामि सत्त्वादिति योज्यम्। १२ आकाङ्क्षणे वाक्यत्वं कुतो न स्यादित्युक्ते सत्याह साकाङ्क्षस्येति। १३ जैनस्य। १४ व्युत्पन्नस्य यस्य हि प्रतिपत्तुस्तस्मात्परिणामीत्यत्राकाङ्क्षाक्षयस्तदपेक्षया तद्वाक्यं भवत्युक्तवाक्यलक्षणसद्भावात्, नान्यापेक्षया। १५ चेतन। १६ शब्दोऽचेतन इति वचनात्। १७ साधनवाक्यमात्रेण। १८ साध्यार्थम्। १९ तर्हीति शेषः। २० वाक्ये। २१ निराकाङ्क्षत्वसिद्ध्यभावे च। २२ क्वचित्। २३ वाक्याभावाद्वाक्यार्थप्रतिपत्तिर्नास्ति यतः। २४ अर्थप्रतिपत्तिमिच्छतः पुरुषस्य। २५ वाक्यसिद्धिप्रकारेण। २६ आदिना सामर्थ्यम्। २७ तिष्ठति भवतीत्यादि।

राकाङ्क्ष[1]स्य सत्यभामादिपदे[2]वद्वाक्यत्वं प्रतिपादितं प्रतिपत्तव्यम्।

यच्चोच्यते[3]—

"आख्यात[4]शब्दः[5] सङ्घातो[6] जातिः[7] संघातवर्तिनी।
एकोऽनवयवः शब्दः[8] क्रमो[9] बुद्ध्यनु[10]संहृती ॥ १ ॥
पदमाद्यं पदं चान्त्यं पदं सापेक्षमित्यपि।   ५
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवेदिनाम् ॥ २ ॥"
[वाक्यप० २।१-२]

इति; तदप्युक्तिमात्रम्; यस्मादाख्यातशब्दः पदान्तरनिरपेक्षः, सापेक्षो वा वाक्यं स्यात्? न तावदाद्यः पक्षः; पदान्तरनिरपेक्षस्यास्य पदत्वात्। अन्य[11]था आख्यातपदाभावः स्यात्। द्वितीयपक्षेपि १० क्वचि[12]न्निरपेक्षोसौ, न वा? प्रथमपक्षेऽस्मि[13]न्मत[14]प्रसङ्गः। द्वितीयपक्षस्त्वयुक्तः; पदान्तरसापेक्षस्याप्यस्य क्वचि[16]न्निरपेक्षत्वाभावे प्रकृतार्थापरिसमाप्त्या वाक्यत्वाऽयोगाद्दे[17]वाक्यवत्।

संघातो वाक्यमित्य[18]त्रापि देशकृतः, कालकृतो वा वर्णा[19]नां संघातः स्यात्[20]? न तावदाद्यविकल्पो युक्तः; क्रमोत्पन्नप्रध्वंसिनां १५ तेषामेकस्मिन्देशेऽवस्थित्या संघा[21]तत्वासम्भवात्। द्वितीयविकल्पे तु पदरूपतामापन्नेभ्यो वर्णेभ्योऽसौ भिन्नः, अभिन्नो वा? न तावद्भिन्नोनंशैः[22]; तथाविधस्यास्याऽप्रतीतेः, संघातत्वविरोधाच्च वर्णान्तर[23]वत्। अथ तेभ्योऽभिन्नोसौ; किं सर्वथा, कथञ्चिद्वा? सर्वथा चेत्; कथम[24]सौ संघातः संघाति[25]स्वरूपवत्? अन्यथा[26] २० प्रतिवर्णं संघातप्रसङ्गः। न चैको[27] वर्णः संघातो नामा[28]तिप्रसङ्गात्। कथञ्चिच्चेत्; जैनमतप्रसङ्गः-परस्परापेक्षाऽनाकाङ्क्ष[29]पदरूपतापन्न-

१ प्रकरणादिगम्यपदान्तरादपरवाक्यान्तरपदस्य। २ पदसमुदायस्य प्रकरणादिगम्यतिष्ठतीत्यादिपदान्तरसापेक्षस्य वाक्यत्वं यथा तद्वदत्रापि विचारणीयम्। ३ वाक्यस्य लक्षणान्तरम्। ४ भवतिगच्छतीत्यादिः। ५ वाक्यम्। ६ वर्णानाम्। ७ वर्णत्वलक्षणा। ८ स्फोटः। ९ वर्णानाम्। १० अनुसंहृतिः=परामर्शः। ११ आख्यातशब्दस्य वाक्यत्वे। १२ वाक्यान्तरे। १३ जैन। १४ अस्मदुक्तस्यैव वाक्यलक्षणस्येच्छयाभ्युपगमात्। १५ निरपेक्षत्वात्। १६ पदान्तरे। १७ देवदत्त गामित्यादिवत्। १८ पक्षे। १९ पदानां वा। २० वाक्यम्। २१ सकृत्। २२ खपुस्तके 'नंश' इति पाठो नास्त्येव। पदेभ्यो भिन्न इत्यर्थः। २३ एकस्य वर्णस्य संघातत्वं विरुद्धं यथा। २४ वर्णः। २५ संघातः सर्वथा संघातिभ्यो वर्णेभ्योऽभिन्नोपि यदि स्यात्तर्हि। २६ अस्तु इत्युक्ते सत्याह। २७ एकार्थव्यक्तेरपि जातित्वप्रसङ्गात्। २८ एकस्मिन्वर्णे विवर्तमाने (वर्णसमुदायनष्टे सति) संघातो न निवर्तते इति भिन्नः। वर्णेभ्यो (पक्षे पदेभ्यः) भेदेनानुपलभ्यमानत्वादभिन्नः (संघातः) इति। २९ वाक्यान्तरपदेभ्यः।

वर्णानां कालप्रत्यासत्तिरूपसंघातस्य कथञ्चिद्वर्णेभ्योऽभिन्नस्य जैनोक्त[1]वाक्यलक्षणानतिक्रमात्। साकाङ्क्षान्योन्यानपेक्षा[2]णां तु तेषां वाक्यत्वे प्राक्प्रतिपादितदोषानुषङ्गः।

एतेन[3] जातिः[4] संघातवर्त्तिनी वाक्यम्; इत्यपि नोत्सृष्टम्; नि-
५ राकाङ्क्षान्योन्यापेक्षपदसंघातवर्त्तिन्याः सदृशपरिणामलक्षणायाः कथञ्चित्[5]ततो[6]ऽभिन्नाया जातेर्वाक्यत्वघटनात्, अन्यथा संघातपक्षोक्ताशेषदोषानुषङ्गः[7]।

एकोनवयवः[8] शब्दो[9] वाक्यम्; इत्येतत्तु मनोरथमात्रम्; तस्याप्रामाणिकत्वात्, स्फोटस्यार्थप्रतिपादकत्वेन प्रागेव प्रतिविहि-
१० तत्वात्।

क्रमो[10] वाक्यमित्येतत्तु संघातवाक्यपक्षान्नातिशेते इति तद्दोषेणैव तद्दुष्टं द्रष्टव्यम्।

बुद्धि[11]र्वाक्यमित्य[12]त्रापि भाववाक्यम्, द्रव्यवाक्यं वा सा स्यात्? प्रथमप्रकल्पनायां सिद्धसाध्यता, पूर्वपूर्ववर्णज्ञानाहितसंस्कारस्या-
१५ त्मनो वाक्यार्थग्रहणपरिणतस्यान्त्यवर्णश्रवणाऽनन्तरं वाक्यार्थावबोधहेतोर्बुद्ध्यात्मनो भाववाक्यस्याऽस्माभि[13]रभीष्ट[14]त्वात्। द्रव्यवाक्यरूपतां तु बुद्धेः कश्चेतनः श्रद्दधीत प्रतीतिविरोधात्?

एतेना[15]नुसंहति[16]र्वाक्यम्; इत्यपि चिन्तितम्; यथोक्तपदानुसंहतिरूपस्य चेतसि परिस्फुरतो[17] भाववाक्यस्य परामर्शात्मनोऽ-
२० भीष्टत्वात्।

'आद्यं[18] पदमन्त्य[19]मन्यद्वा पदान्तरापेक्षं वाक्यम्' इत्यपि नोक्तवा[20]क्याद्भिद्यते, परस्परापेक्षपदसमुदायस्य निराकाङ्क्षस्य वाक्यत्वप्रसिद्धेः, अन्यथा[21] पदासिद्धेरभावानुषङ्गः स्यात्[22]।

---

१ पदानां परस्परापेक्षाणां निरपेक्षः समुदायो वाक्यमिति। २ वाक्यान्तरपदेभ्यः। ३ संघातो वाक्यमित्येतन्निराकरणपरेण ग्रन्थेन। ४ सर्वेषु वर्णेषु वर्णत्वलक्षणा। ५ श्रोत्रग्राह्यत्वेन ताल्वादिव्यापारजनितत्वेन वा, न सर्वथा। ६ पदेभ्यो वर्णेभ्यश्च। ७ प्रतिवर्णं वाक्यत्वप्रसङ्गरूपः। ८ निरंशः। ९ स्फोटः। १० एको वर्णः समुत्पद्यते पश्चाद्द्वितीयः ततस्तृतीय इत्यादिप्रकारेण वर्णानां क्रमः। ११ वर्णानाम्। १२ पक्षे। १३ जैनैः। १४ अचेतनत्वाद्द्रव्यवाक्यानां चेतनत्वाद्बुद्धेश्च। १५ बुद्धिर्वाक्यमित्येतन्निराकरणपरेण ग्रन्थेन। १६ पदरूपतामापन्नानां वर्णानां परामर्शोऽनुसंहतिः। १७ प्रतिभासमानस्य। १८ 'देवदत्तः' इति। १९ 'गच्छति' इति। २० परस्परापेक्षादि इत्यस्मात्। २१ परस्परापेक्षारहितं पदं यदि वाक्यम्। २२ सर्वस्य पदस्य वाक्यत्वात्।

अन्ये मन्यन्ते-'पदान्येव पदार्थप्रतिपादनपूर्वकं वाक्यार्थावबोधं विदधानानि वाक्यव्यपदेशं प्रतिपद्यन्ते।

"पदार्थानां तु मूलत्वमिष्टं तद्भावनावतः।"
[मी० श्लो० वाक्या० श्लो० १११]

"पदार्थपूर्वकस्तस्माद्वाक्यार्थोयमवस्थितः।" ५
[मी० श्लो० वाक्या० श्लो० ३३६]

इत्यभिधानात्; तेप्यन्धसर्पबिलप्रवेशन्यायेनोक्तवाक्यलक्षणमेवानुसरन्ति; अन्योन्यापेक्षानाकाङ्क्षाक्षरपदसमुदायस्य वाक्यत्वेन तैरप्यभ्युपगमात्।

यदि च पदान्तरार्थैरन्वितानामेवार्थानां पदैरभिधानात्पदार्थ- १० प्रतिपत्तेर्वाक्यार्थप्रतिपत्तिः स्यात्; तदा देवदत्तपदेनैव देवदत्तार्थस्य गामभ्याजेत्यादिपदवाक्यार्थैरन्वितस्याभिधानाच्छेषपदोच्चारणवैयर्थ्यम्। प्रथमपदस्यैव च वाक्यरूपताप्रसङ्गः। यावन्ति वा पदानि तावतां वाक्यत्वं यावन्तश्च पदार्थास्तावतां वाक्यार्थत्वं स्यात्। अविवक्षितपदार्थव्यवच्छेदार्थत्वान्न 'गाम्' इत्यादि- १५ पदोच्चारणवैयर्थ्यम्; इत्यत्राप्यावृत्त्या वाक्यार्थप्रतिपत्तिः स्यात्-प्रथमपदेनाभिहितस्य द्वितीयादिपदाभिधेयैरन्वितस्यार्थस्य द्वितीयादिपदैः पुनः पुनः प्रतिपादनात्।

अथ द्वितीयादिपदैः स्वार्थस्य प्रधानभावेन पूर्वोत्तरपदाभिधेयार्थैरन्वितस्याभिधानं नाद्यपदेन अतोयमदोषः; तर्हि यावन्ति २० पदानि तावन्तस्तदर्थाः पदान्तराभिधेयार्थान्विताः प्राधान्येन प्रतिपत्तव्या इति तावत्यो वाक्यार्थप्रतिपत्तयः कथं न स्युः?

१ भट्टप्राभाकराः। २ अवयवार्थप्रतिपत्तिपूर्वकत्वाद्वाक्यार्थप्रतिपत्तेः। ३ कारणत्वं वाक्यार्थं प्रति। ४ वाक्यार्थस्य। ५ पिपीलिकाद्युपद्रवभयाद्बिलपरित्यागे भ्रमित्वा पुनरपि तत्रैव प्रवेशो यथा तथानिच्छया स्वीकारोन्धसर्पबिलप्रवेशन्यायः। ६ जैनोक्त। ७ वाक्यविचारानन्तरं वाक्यार्थं विचारयन्नाह। ८ गामित्यादिपदान्तरार्थैः। ९ सम्बद्धानाम्। १० देवदत्तलक्षणोर्थो गामित्यादिपदार्थैरन्वितो गामित्यादिपदार्थाश्च पूर्वोत्तरपदार्थैरन्विता भवन्ति। ११ सर्वथा। १२ केवलैर्देवदत्तादिकैः। १३ एकेन। १४ गामभ्याज शुक्लां दण्डेनेति। १५ पूर्वपदार्थस्योत्तरपदार्थैः सर्वथान्वितत्वात्। १६ तथा च। १७ देवदत्तेति। १८ विवक्षिताद् देवदत्त इत्युक्ते गामभ्याज शुक्लां दण्डेनेत्यादिपदार्थादविवक्षितो देवदत्तेत्युक्ते पठ गच्छ याहि पिबेत्यादि पदार्थः तस्य व्यवच्छेदार्थत्वात्। १९ पुनः पुनः प्रवृत्तिरावृत्तिः। २० एकस्यैवार्थस्य। २१ देवदत्तपदापेक्षया गामभ्याज शुक्लां दण्डेनेति पदैः। २२ द्वितीयादिपदार्थस्याभिधानं प्रधानभावेन। २३ न द्वितीयादिपदार्थस्याभिधानं प्रधानभावेन यतः।

न ह्यन्त्यपदोच्चारणात्तदर्थस्याशेषपूर्वपदाभिधेयैरन्वितस्य प्रतिपत्तेर्वाक्यार्थावबोधो भवति, न पुनः प्रथमपदोच्चारणात् तदर्थस्यावान्तरपदाभिधेयैरन्वितस्य, द्वितीयादिपदोच्चारणाच्चाऽशेषपदाभिधेयैरन्वितस्य तदर्थस्य प्रतिपत्तेरित्यत्र निमित्तमुत्पश्यामः।

अथ 'गम्यमानैस्तैस्तस्यान्वितत्वम् न पुनरभिधीयमानैः तेनायमदोषः; किमिदानीमभिधीयमान एव पदस्यार्थः? तथोपगमे कथमन्विताभिधानम्-विवक्षितपदस्य गम्यमानपदान्तराभिधेयार्थानामविषयत्वात्?

अथ पदानां द्वौ व्यापारौ—स्वार्थाभिधानव्यापारः, पदान्तरार्थगमकत्वव्यापारश्च। कथमेवं पदार्थप्रतिपत्तिरावृत्त्या न स्यात्? पदव्यापारात्प्रतीयमानस्येव गम्यमानस्यापि पदार्थत्वात्। न च पदव्यापारात्प्रतीयमानत्वाविशेषेपि कश्चिदभिधीयमानः कश्चिद्गम्यमान इति विभागो युक्तः।

ननु पदप्रयोगः प्रेक्षावता पदार्थप्रतिपत्त्यर्थः, वाक्यार्थप्रतिपत्त्यर्थो वाभिधीयेत? न तावत्पदार्थप्रतिपत्त्यर्थः; अस्य प्रवृत्त्यऽहेतुत्वात्। अथ वाक्यार्थप्रतिपत्त्यर्थः; तदा पदप्रयोगानन्तरं पदार्थे प्रतिपत्तिः साक्षाद्भवतीति तत्र पदस्याभिधानव्यापारः पदार्थान्तरे तु गमकत्वव्यापारः; तदप्यसाम्प्रतम्; 'वृक्षः' इति पदप्रयोगे शाखादिमदर्थस्यैव प्रतिपत्तेः। तदर्थाच्च प्रतिपन्नात् 'तिष्ठति' इत्यादिपदवाच्यस्य स्थानाद्यर्थस्य सामर्थ्यतः प्रतीतेः, तत्र पदस्य साक्षाद्व्यापाराऽभावतो गमकत्वायोगात् तदर्थस्यैव

---

१ उक्तमेव समर्थयन्ति। सर्वेभ्यः पदेभ्यो वाक्यार्थावबोधो, भवतीति परस्याभिप्रायं मनसि धृत्वा वक्ति जैनः। २ दण्डेनेति। ३ प्रकृतादुच्चार्यमाणात्पदादन्यत्पदं पदान्तरम्। ४ प्रतिपत्तेर्वाक्यार्थावबोधो, न पुनरिति। प्राक्तनं न पुनरिति पदमत्र सम्बन्धनीयम्। ५ वाक्यार्थावबोधो, न पुनरिति सम्बन्धः। ६ वयं जैनाः। ७ पदान्तराभिधेयार्थैरन्वितत्वे आवृत्त्या वाक्यार्थप्रतिपत्तिलक्षणदोषो जायते तन्निरासार्थं पदान्तरार्थानां गम्यमानाभिधेयमानौ द्वावर्थाविति परो वदति। ८ पदान्तरैर्ज्ञायमानैर्गोचरीकृतैरित्यर्थः। ९ उच्चार्यमाणपदार्थस्य। १० उच्यमानैर्द्वितीयादिपदार्थैः। ११ आक्षेपः। १२ एवं प्रतिपादनसमये। १३ ज्ञायमानो न भवति। १४ परेणाङ्गीकृते सति। १५ पूर्वपदार्थ उत्तरपदार्थैरन्वित इति। १६ देवदत्तादेः। १७ गामित्यादि। १८ द्वितीयादि। १९ सति। २० पुनः पुनः। २१ केवलं देवदत्तपदार्थस्य केवलमभ्याजेति पदार्थस्य चेति। २२ प्रयोजनार्थिनां पुंसां प्रवृत्तिहेतुर्न भवति। नहि गौरिति शब्दश्रवणात्प्रवृत्तिर्निवृत्तिर्वा घटते। २३ पदप्रयोगः। २४ गम्ये। २५ ततश्चान्वितत्वमेव शब्दार्थः। २६ वृक्ष इत्यादेः। २७ वृक्षपदार्थस्य।

तद्धर्मकत्वात्[1]। परम्परया[2] तत्रास्य[3] व्यापारे[4] लिङ्गवचनस्य[5] लिङ्गि[6]-प्रतिपत्तौ व्यापारोऽस्तु, तथा च शाब्दमेवानुमानज्ञानं[7] स्यात्। लिङ्गवाचकाच्छब्दाल्लिङ्गस्य प्रतिपत्तेः सैव[8] शाब्दी, न पुनस्तत्प्रतिपन्नलिङ्गाल्लिङ्गिप्रतिपत्तिरतिप्रसङ्गात्[9]; तर्हि वृक्षशब्दात्स्थानाद्यर्थ-प्रतिपत्तिर्भवन्ती शाब्दी[10] मा भूत्तत एव, अस्य स्वार्थ[11]प्रतिपत्तावेव पर्यवसितत्वाल्लिङ्ग[12]शब्दवत्।

किञ्च[13], विशेष्यपदं[14] विशेष्यं[15] विशेषणसामान्येनान्वितम्, विशेषणविशेषेण[16] वाऽभिधत्ते, तदुभयेन वा? प्रथमपक्षे विशिष्ट[17]-वाक्यार्थप्रतिपत्तिविरोधः। द्वितीयपक्षे तु निश्चयासम्भवः–प्रतिनियतविशेषणस्य शब्देनानिर्दिष्टस्य[18] स्वोक्त[19]विशेष्ये[20]ऽन्वयसंशीतेः[21], विशेषणान्तराणामपि[22] सम्भवात्[23]। वक्तुरभिप्रायात्प्रतिनियतविशेषणस्य तत्रान्वयश्चेत्; न; यं प्रति शब्दोच्चारणं तस्य वक्त्रभिप्रायाऽप्रत्यक्षतस्तदनिर्णयप्रसङ्गात्, आत्मानमेव प्रति वक्तुः शब्दोच्चारणानर्थक्यात्। तृतीयपक्षे तु उभयदोषानुषङ्गः।

एतेन क्रियासामान्येन क्रियाविशेषेण तदुभयेन वान्वितस्य साधनस्य[24], साधनसामान्येन साधनविशेषेण तदुभयेन वान्वितायाः[25] प्रतिपादनमाख्यातेन प्रत्याख्यातम्।

यदि च पदात्पदार्थे उत्पन्नं ज्ञानं वाक्यार्थाध्यवसायि स्यात्; तर्हि चक्षुरादिप्रभवं रूपादिज्ञानं गन्धाद्यध्यवसायि किन्न स्यात्? अथास्य गन्धादिसाक्षात्कारित्वाभावान्नायं दोषः; तर्हि पदोत्थ-पदार्थज्ञानस्यापि वाक्यार्थावभासित्वाभावात्कथं तदध्यवसायित्वं

१ सामर्थ्यात्। २ वृक्षशब्दात्शाखादिमदर्थप्रतिपत्तिस्तस्याः सकाशात्स्थानाद्यर्थ-प्रतिपत्तिरिति परम्परा। ३ वृक्षपदस्य। ४ परम्पराङ्गीकृते सति। ५ धूमवचनस्य। ६ लिङ्गी=अग्निः। ७ किन्तु न लिङ्गप्रभवम्। ८ शाब्दी। ९ प्रत्यक्षप्रतीतिरिन्द्रिया-दुत्पद्यमाना शाब्दी स्यात्। १० वृक्षशब्दस्य शाखादिमत्यर्थे साक्षाद्व्यापारः स्थानाद्यर्थे तु परम्परयेति। ११ शाखादिमदर्थे। १२ यथा लिङ्गवाचकः शब्दो धूमप्रतिपत्तौ पर्यवसितः सन्नग्निगमको न भवति, धूमस्यैव गमकस्तथा वृक्षशब्दः शाखादिमदर्थस्य वाचको भवति, न पदार्थान्तरगमकः। १३ अन्विताभिधानपक्षे दूषणमाह। १४ गामिति कर्तृ। १५ गोलक्षणम्। १६ शुक्लेति। १७ प्रतिनियतविशेषविशिष्ट। १८ शुक्लमिति शब्देन। १९ गामिति शब्देन। २० साक्षादिमदर्थे गोपिण्डे। २१ या गौः सा किं शुक्लेन विशिष्टा कृष्णेन वेति। २२ कृष्णादीनाम्। २३ शब्दे-नानिर्दिष्टत्वाविशेषात्। २४ गामित्यादिकारकपदस्य क्रियाकाङ्क्षित्वे विकल्पत्रयम्। २५ अभ्याजेत्यादिक्रियापदस्य कारकपदाकाङ्क्षित्वे विकल्पत्रयम्।

स्यात्? चक्षुरादेर्गन्धादाविव पदस्य वाक्यार्थसम्ब[1]न्धानवधारणतः सामर्थ्यानुपपत्तेः। तन्नान्विता[2]भिधानं श्रेयः।

ना[3]प्यभिहितान्वयः[4]; यतोऽभिहिताः पदै[5]रर्थाः शब्दान्तरा[6]दन्वीयन्ते[7], बुद्ध्या वा? न तावदाद्यः पक्षः; शब्दान्तरस्या[8]शेषपदार्थ-
५ विषयस्याभिहितान्वयनिबन्धनस्याभावात्। द्वितीयपक्षे तु बुद्धि[9]रेव वाक्यं ततो वाक्यार्थप्रतिपत्तेः, न पुनः पदान्येव[10]। ननु पदार्थेभ्यो[11]ऽपेक्षाबुद्धिसन्निधानात्परस्परमन्वितेभ्यो वाक्यार्थप्रतिपत्तेः परम्परया पदेभ्य एव भावान्नातो व्यतिरिक्तं वाक्यम्; तर्हि प्रकृत्या[12]दिव्यतिरिक्तं पदमपि मा भूत्, प्रकृत्यादीनामन्वितानाम[13]-
१० भिधाने अभिहितानां वान्वये[14] पदार्थप्रतिपत्तिप्रसिद्धेः।

ननु 'पदमेव लोके वेदे वार्थप्रतिपत्तये प्रयोगार्हम् न तु केवला प्रकृतिः प्रत्ययो वा, पदादपोद्धृत्य[15] तद्व्युत्पादनार्थं[16] यथाकथञ्चित्तदभिधानात्। तदुक्तम्-"अथ[17] गौरित्यत्र कः शब्दः[18]? गकारौकारविसर्जनीया इति भगवानुपवर्षः[19]" [शाबरभा० १।१।५]
१५ इति। यथैव हि वर्णो[21]ऽनंशः प्रकल्पितमात्रा[20]भेदस्तथा 'गौः' इति पदमप्यनंशमपोद्धृ[22]ताकारादिभेदं स्वार्थ[23]प्रतिपत्तिनिमित्तमवसीयते। इत्यप्यनालोचिताभिधानम्; वाक्यस्यैवं[24] तात्त्विकत्वप्रसिद्धेः, तद्व्युत्पादनार्थं ततोऽपोद्धृत्य पदानामुपदेशाद्वाक्यस्यैव लोके शास्त्रे वार्थप्रतिपत्तये प्रयोगार्हत्वात्[26]। तदुक्तम्—

२० "द्विधा[28] कैश्चित्पदं भिन्नं[29] चतुर्धा[30] पञ्चधा[31]पि वा।
अपोद्धृत्यैव[32] वाक्येभ्यः प्रकृतिप्रत्ययादि[33]वत्॥"
[ ] इति।

---

१ वाच्यवाचकलक्षण। २ पदार्थान्तरैरन्विता अर्था इति। ३ इति प्राभाकरमतं निरस्य भाट्टमतनिरासार्थमाह। ४ वाक्यार्थः। ५ देवदत्तादिकैः। ६ एकेन शब्दान्तरेण। ७ परस्परं सम्बध्यन्ते। ८ एकेन पदान्तरेण सर्वेषां पदार्थो ज्ञातो भवेत्तदा तेन कृत्वा सम्बन्धप्रतिपत्तिर्यतः। ९ पदपरिज्ञानम्। १० वाक्यम्। ११ यतः। १२ आदिपदेन प्रत्ययधात्वादिग्रहणम्। १३ परस्परं सम्बद्धानाम्। १४ क्रियाकारकरूपे विशेषणविशेष्यरूपे च। १५ पृथक्कृत्य। १६ पदनिष्पत्त्यर्थम्। १७ अहो। १८ पदसंज्ञकः। १९ (उपवर्षनामा ऋषिः) प्राह। २० मात्राः उदात्तादयः। २१ वसः। २२ कल्पित। २३ साक्षादिमदर्थ। २४ उक्तप्रकारेण। २५ पदानि। २६ अर्थःप्रवृत्तिनिवृत्तिलक्षणः। २७ न तु गामिति पदेन कस्यचित्प्रवृत्तिर्निवृत्तिर्वा घटते यतः। २८ सुबन्तं तिङन्तं पदमित्यादि। २९ पृथक्कृतम्। ३० नामाऽऽख्यातनिपातकर्मप्रवचनीयभेदेन। ३१ उपसर्गाधिकम्। ३२ पदानि। ३३ तद्यथा पदादपोद्ध्रियते तथा वाक्येभ्यः पदान्यपोद्ध्रियन्ते इति भावः।

ततः प्रकृत्याद्यवयवेभ्यः कथञ्चिद्भिन्नम्[1]भिन्नं[2] च पदं प्रातीतिकमभ्युपगन्तव्यम्, न तु सर्वथाऽनंशं वर्णवत्[3]तद्ग्राहकाभावात्। तद्वत्पदेभ्यः [4]कथञ्चिद्भिन्नम्[5]भिन्नं च वाक्यं द्रव्य[6]भाववाक्यभेदभिन्नं प्रोक्त[7]लक्षणलक्षितं प्रतीतिपदमारूढमभ्युपगन्तव्यम् अलं प्रतीत्यपलापेनेति।

[8]प्रामाण्यं सुधियो[9] धियो यदि मतं संवादतो निश्चितात्,
स्मृत्यादेरपि किन्न तन्[10]मतमिदं तस्या[11]ऽविशेषात्स्फुटम्।
तत्[12]संख्या परिकल्पितेयमधुना[13] सन्तिष्ठतेऽतः कथम्,
तस्माज्जैनमते मतिर्मतिमतां स्थेयाच्चिरं निर्मले ॥ १ ॥

इति श्रीप्रभाचन्द्रदेवविरचिते प्रमेयकमलमार्तण्डे परीक्षामुखालङ्कारे
तृतीयः परिच्छेदः ॥ श्रीः ॥

---

१ पदं प्रकृतिर्न भवति, पदं न प्रकृतिर्नेति व्यावृत्तिरूपेण। २ समुदायरूपेण। ३ निरंशस्य वर्णस्य यथा ग्राहकं प्रमाणं नास्ति तथाऽनंशपदस्य च। ४ पदं वाक्यं न भवति, वाक्यं च पदं न भवतीति व्यावृत्तिरूपेण। ५ समुदायरूपेण। ६ वचनात्मकं द्रव्यवाक्यं, बोधात्मकं तु भाववाक्यम्। ७ पदानां परस्परापेक्षाणां निरपेक्षः समुदायो वाक्यमिति। ८ सकलं परिच्छेदार्थमुपसंहरन्नाह। ९ पुंसः। १० प्रामाण्यम्। ११ संवादस्य। १२ तस्य=प्रमाणस्य। १३ स्मृत्यूहादीनां प्रामाण्यप्रतिपादनसमये।

श्रीः ।

अथ चतुर्थः परिच्छेदः ॥

अथोक्तप्रकारं[1] प्रमाणं किं निर्विषयम्, सविषयं वा? यदि निर्विषयम्; कथं प्रमाणं[2] केशोण्डुकादिज्ञानवत्? अथ सविषयम्; कोस्य विषयः? इत्याशङ्क्य विषयविप्रतिपत्तिनिराकरणार्थं 'सामान्यविशेषात्मा' इत्याद्याह—

५ **सामान्यविशेषात्मा तदर्थो विषयः ॥ १ ॥**

तस्य प्रतिपादितप्रकारप्रमाणस्यार्थो विषयः । किंविशिष्टः? [3]सामान्यविशेषात्मा । कुत एतत्[4]?

पूर्वोत्तराकारपरिहारावाप्तिस्थितिलक्षणपरिणामेन अर्थक्रियोपपत्तेश्च ॥ २ ॥

१० अनुवृत्तव्यावृत्तप्रत्ययगोचरत्वात्[5], यो हि यदाकारोल्लेखिप्रत्ययगोचरः स तदात्मको दृष्टः यथा नीलाकारोल्लेखिप्रत्ययगोचरो नीलस्वभावोर्थः, सामान्यविशेषाकारोल्लेख्यनुवृत्तव्यावृत्तप्रत्ययगोचरश्चाखिलो बाह्याध्यात्मिकप्रमेयोर्थः, तस्मात्सामान्यविशेषात्मेति । न केवलमतो हेतोः स तदात्मा, अपि तु पूर्वो-
१५ त्तराकारपरिहारावाप्तिस्थितिलक्षणपरिणामेनाऽर्थक्रियोपपत्तेश्च । 'सामान्यविशेषात्मा तदर्थः' इत्यभिसम्बन्धः ।

कतिप्रकारं सामान्यमित्याह—

सामान्यं द्वेधा ॥ ३ ॥

कथमिति चेत्—

२० **तिर्यगूर्द्धताभेदात् ॥ ४ ॥**

तत्र तिर्यक्सामान्यस्वरूपं व्यक्तिनिष्ठतया सोदाहरणं प्रदर्शयति—

---

१ स्वापूर्वेत्यादि । २ ज्ञानं धर्मि प्रमाणं न भवतीति साध्यो धर्मो निर्विषयत्वात्केशोण्डुकज्ञानवत् । ३ सामान्यं च विशेषश्च सामान्यविशेषौ तावात्मानौ यस्य स तथोक्तः । ४ सिद्धम् । ५ गौर्गौरित्यादिप्रत्ययः अनुवृत्तः । श्यामः शबलो न भवतीत्यादिप्रत्ययो व्यावृत्तरूपः । ६ उल्लेखः=प्रतिभासः । ७ पूर्वोत्तराकारौ पर्यायौ=विशेषः । ८ स्थितिलक्षणं द्रव्यमूर्द्धतासामान्यम् । ध्रौव्यमित्यर्थः । ९ विशेषो व्यक्तिः ।

सदृशपरिणामस्तिर्यक् खण्डमुण्डादिषु गोत्ववत् ॥ ५ ॥

ननु खण्डमुण्डादिव्यक्तिव्यतिरेकेणापरस्य भवत्कल्पितसामान्यस्याप्रतीतितो गगनाम्भोरुहवदसत्त्वादसाम्प्रतमेवेदं तल्लक्षणप्रणयनम्; इत्यप्यसमीचीनम्; 'गौर्गौः' इत्याद्यबाधितप्रत्ययविषयस्य सामान्यस्याऽभावासिद्धेः। तथाविधस्याप्यस्यासत्त्वे विशेषस्याप्यसत्त्वप्रसङ्गः, तथाभूतप्रत्ययत्वव्यतिरेकेणापरस्य तद्व्यवस्थानिबन्धनस्यात्राप्यसत्त्वात्। अबाधितप्रत्ययस्य च विषयव्यतिरेकेणापि सद्भावाभ्युपगमे ततो व्यवस्थाऽभावप्रसङ्गः। न चानुगताकारत्वं बुद्धेर्बाध्यते; सर्वत्र देशादावनुगतप्रतिभासस्याऽस्खलद्रूपस्य तथाभूतव्यवहारहेतोरुपलम्भात्। अतो व्यावृत्ताकारानुभवानधिगतमनुगताकारमवभासन्त्यऽबाधितरूपा बुद्धिः अनुभूयमानानुगताकारं वस्तुभूतं सामान्यं व्यवस्थापयति।

ननु विशेषव्यतिरेकेण नापरं सामान्यं बुद्धिभेदाभावात्। न च बुद्धिभेदमन्तरेण पदार्थभेदव्यवस्थाऽतिप्रसङ्गात्। तदुक्तम्—

"न भेदाद्भिन्नमस्त्यन्यत्सामान्यं बुद्ध्यभेदतः।
बुद्ध्याकारस्य भेदेन पदार्थस्य विभिन्नता॥"

[ ] इति;

तदप्यपेशलम्; सामान्यविशेषयोर्बुद्धिभेदस्य प्रतीतिसिद्धत्वात्। रूपरसादेस्तुल्यकालस्याभिन्नाश्रयवर्तिनोप्येवं एव भेदप्रसिद्धेः। एकेन्द्रियाध्यवसेयत्वाज्जातिव्यक्त्योरभेदे वातातपादावप्यभेदप्रसङ्गः। तत्रापि हि प्रतिभासभेदान्नान्यो भेदव्यवस्थाहेतुः। स च सामान्यविशेषयोरप्यस्ति। सामान्यप्रतिभासो ह्यनुगताकारः, विशेषप्रतिभासस्तु व्यावृत्ताकारोऽनुभूयते।

१ सास्नादिमत्त्वेन। २ सौगतः। ३ जैन। ४ परेणाङ्गीक्रियमाणे सति। ५ अबाधितप्रत्ययविषयत्वाविशेषादिति। ६ प्रमाणान्तरस्य। ७ विशिष्टस्थितिकारणं व्यवस्था। ८ विशेषसत्त्वेऽपि। ९ परेण। १० गौर्गौरिति। ११ विशेषणम्। १२ आदिना कालादौ। १३ अनुगताकारत्वं बुद्धेर्न बाध्यते यतः। १४ इदं सामान्यमयं विशेष इति। १५ विशेषात्। १६ स्वतन्त्रम्। १७ अभेदे हेतुरयम्। १८ यतः। १९ बीजपूरादि। २० अयं रस इदं रूपमिति बुद्धिभेदात्। २१ एकेन्द्रिया (स्पर्शनेन्द्रिय) ध्यवसायस्याविशेषात्। २२ अयं वातोऽयमातप इति। २३ गौर्गौरित्येवम्। २४ अयमस्माद्भिन्न इति।

दूरादूर्[1]ध्व[2]तासामान्यमेव च प्रतिभासते न स्थाणुपुरुषविशेषौ तत्र सन्देहात्। तत्परिहारेण प्रतिभासनमेव च सामान्यस्य ततो व्यतिरेकस्तल्लक्षणत्वाद्भेदस्य।

यदप्युक्तम्—

५ "ताभ्यां तद्व्यतिरेकश्च किन्नाऽदूरेऽव[3]भासनम्।
दूरेऽवभासमानस्य सन्निधानेऽतिभासनम्॥"
[प्रमाणवार्त्तिकालं०]

तदप्यसुन्दरम्; विशेषेपि समानत्वात्, सोपि हि यदि सामान्याद्व्यतिरिक्तः; तर्हि दूरे वस्तुनः स्वरूपे सामान्ये प्रतिभासमाने १० किन्नाव[4]भासते? न हीन्द्रधनुषि नीले रूपे[5] प्रतिभासमाने पीतादिरूपं दूरान्न प्रतिभासते। अथ निकटदेशसामग्री विशेषप्रतिभासस्य जनिका, दूरदेशवर्त्तिनां च प्रतिपत्तॄणां सा नास्तीति न विशेषप्रतिभासः; तर्हि सामान्यप्रतिभासस्य जनिका दूरदेशसामग्री निकटदेशवर्त्तिनां चासौ नास्तीति न निकटे तत्प्रति- १५ भासनमिति समः समाधिः। अस्ति च निकटे सामान्यस्य प्रतिभासनं स्पष्टं विशेषस्य प्रतिभासवत्, यादृशं तु दूरे तस्यास्पष्टं प्रतिभासनं तादृशं न निकटे स्वसामग्र्य[6]भावात् तद्वदेव।

न चानुगतप्रतिभासो[7] बहिःसाधारणनिमित्त[8]निरपेक्षो घटते; प्रतिनियतदेशकालाकारतया तस्य प्रतिभासाभावप्रसङ्गात्। न २० चाऽसाधारणा व्यक्तय एव तन्निमित्तम्; तासां भेदरूपतयाऽऽविष्टत्वात्[9]। तथापि तन्निमित्तत्वे[10] कर्कादिव्यक्तीनामपि[11] गौर्गौरिति बुद्धिनिमित्तत्वानुषङ्गः[12][13]।

न चाऽतत्[14]कार्य[15]कारणव्यावृत्तिः[16] एकप्रत्यवमर्शाद्य[17]र्थसाधन-

१ युक्त्यन्तरेण सामान्यं व्यवस्थापयति जैनः। २ ऊर्ध्वताकारसदृशसामान्यम्। ३ ऊर्ध्वताकारसामान्यस्य। ४ विशेषः। ५ इन्द्रधनुषि विद्यमानम्। ६ दूरदेशतादि। ७ समानाकारलक्षणसामान्यपदार्थे। ८ न बहिः साधारणनिमित्तं सामान्यं तन्निमित्तम्। ९ व्यापकत्वात्। १० परेणाङ्गीकृते। ११ कर्कः=श्वेताश्वः। १२ व्यक्तीनां तन्निमित्तत्वाविशेषात्। १३ या या व्यक्तयस्तास्ता भेदरूपाः। १४ कार्यं च कारणं च कार्यकारणे तस्य खण्डादेः कार्यकारणे न विद्येते ते अकार्यकारणे यस्याऽसावतत्कार्यकारणः कर्कादिस्तस्माद्व्यावृत्तिः। दृष्टान्ते समासयुक्तिं दर्शयति। दृष्टान्ते त्वेकेन्द्रियादिरूपे तच्छब्देन विवक्षितेन्द्रियादिरन्यत्र समुदितेतरगुडूच्यादिर्ग्राह्यः। बहुव्रीहिसमासकरणानन्तरं कर्कादिवदन्या विवक्षितेन्द्रियादिरन्या विवक्षितप्रयोगश्च ग्राह्यः। तस्माद्व्यावृत्तिरित्यवसातव्यः। १५ कर्कादीनामुत्तरक्षणाः कारणानि, तेभ्यो व्यावृत्तिः। १६ गौर्गौरित्यादि। १७ आदिशब्देनैकव्यवहारादिर्ग्राह्यः।

हेतुः अत्यन्तभेदे[2]पीन्द्रियादिवत्[3] समुदितेतरगुडूच्यादिवच्चेत्य[4]भिधातव्यम्; सर्वथा समानपरिणामानाधारे वस्तुन्यतत्कार्यकारणव्यावृत्तेरेवासम्भवात्। अनुगतप्रत्ययाद्वस्तुनि प्रवृत्त्यऽभावप्रसङ्गाच्च। गुडूच्यादिदृष्टान्तोपि साध्यविकलः; न खलु ज्वरोपशमनशक्तिसमानपरिणामाभावे 'गुडूच्यादयो ज्वरोपशमनहेतवः न पुनर्दधित्रपुसादयोपि'[5] इति शक्यव्यवस्थम्, 'चक्षुरादयो वा रूपज्ञानहेतवस्तज्जननशक्तिसमानपरिणामविरहिणोपि न पुना रसादयोपि' इति निर्निबन्धना व्यवस्थितिः।

किञ्च, अनुगतप्रत्ययस्य सामान्यमन्तरेणैव देशादिनियमेनोत्पत्तौ व्यावृत्तप्रत्ययस्यापि[6] विशेषमन्तरेणैवोत्पत्तिः स्यात्। शक्यं हि वक्तुम्–अभेदाविशेषेप्येकमेव ब्रह्मादिरूपं प्रतिनियतानेकनीलाद्याभासनिबन्धनं भविष्यतीति किमपररूपादिस्वलक्षणपरिकल्पनया। ततो रूपादिप्रतिभासस्येवानुगतप्रतिभासस्याप्यालम्बनं वस्तुभूतं परिकल्पनीयम् इत्यस्ति वस्तुभूतं सामान्यम्।

एककार्यतासादृश्येनैकत्वाध्यवसायो व्यक्तीनाम्; इत्यप्यचारु; कार्याणामभेदासिद्धेः, वाहदोहादिकार्यस्य प्रतिव्यक्ति भेदात्। तत्रापरैककार्यतासादृश्येनैकत्वाध्यवसायेऽनवस्था। ज्ञानलक्षणमपि कार्यं प्रतिव्यक्ति भिन्नमेव।

अनुभवानामेकपरामर्शप्रत्ययहेतुत्वादेकत्वम्, तद्धेतुत्वाच्च व्यक्तीनामित्युपचरितोपचारोपि श्रद्धामात्रगम्यः; अनुभवानामप्यत्यन्तवैलक्षण्येनैकपरामर्शप्रत्ययहेतुत्वायोगात्, अन्यथा कर्कादिव्यक्त्यनुभवेभ्योपि खण्डमुण्डादिव्यक्तौ एकपरामर्शप्रत्ययस्योत्पत्तिः स्यात्। अथ प्रत्यासत्तिविशेषात्खण्डमुण्डाद्यनुभवेभ्य एवास्योत्पत्तिर्नान्यतः। ननु प्रत्यासत्तिविशेषः कोन्योऽन्यत्र

१ खण्डादयो विशेषा धर्मिणः समानपरिणामरहिता एव एकप्रत्यवमर्शाद्येकार्थसाधनहेतवः अतत्कार्यकारणव्यावृत्तित्वादिन्द्रियादिवत्। २ व्यक्तीनाम्। ३ आदिना–अर्थालोकयोग्यतादिग्रहणम्। ४ समुदितेतरगुडूच्यादयो विशेषाः समानपरिणामरहिता एव एकप्रत्यवमर्शाद्येकार्थहेतवोऽतत्कार्यकारणाविवक्षितेन्द्रियादिव्यावृत्तित्वाद्यथा। ५ शुण्ठ्यादि। ६ खण्डादिव्यक्तौ। ७ अभावरूपाया व्यावृत्तेरसत्त्वादनुगतप्रत्ययस्य। ८ तथा हि। ९ कर्कटी। १० निर्विकल्पस्य। ११ बाह्यनीलादिस्वलक्षणम्। १२ बाह्यनीलादिविशेषमन्तरेणैव। १३ सौगतेन त्वया। १४ व्यक्तीनामेककार्यत्वसमर्थनार्थम्। १५ निर्विकल्पकप्रत्यक्षज्ञानानाम्। १६ गौर्गौरिति। १७ एकत्वम्। १८ विकल्पगतमेकत्वमनुभवेऽनुभवगतं चैकत्वं व्यक्तिष्विति। १९ निर्विकल्पकेभ्यः।

समानाकारानुभवात्, एकप्रत्यवमर्शहेतुत्वेनाभिमतानां निर्विकल्पकबुद्धीनामप्रसिद्धेश्च। अतोऽयुक्तमेतत्—

"एकप्रत्यवमर्शस्य हेतुत्वाद्धीर[3]भेदिनी[4]।
एकधीहेतुभावेन व्यक्तीनामप्यभिन्नता॥"
[प्रमाणवा० १।११०] इति।

५ ततोऽबाधबोधाधिरूढत्वात्सिद्धं सदृशपरिणामरूपं वस्तुभूतं सामान्यम्। तस्याऽ[5]नभ्युपगमे—

"नो[6] चेद्भ्रान्तिनिमित्तेन[7] संयोज्येत[8] गुणान्तरम्[9][10]।
शुक्तौ वा[11] रजताकारो[12] रूपसाधर्म्य[13]दर्शनात्॥"
[प्रमाणवा० १।४५] इत्यस्य[14],

१० "अर्थेन घटय[15]त्येनां[16] न हि मुक्त्वार्थ[17]रूपताम्।
तस्मात्प्रमेयो(या)ऽधिगतेः प्रमाणं मेय[18]रूपता[19]॥"
[प्रमाणवा० ३।३०५]

इत्यस्य च विरोधानुषङ्गः।

१५ तच्चाऽनित्यासर्वगतस्वभावमभ्युपगन्तव्यम्; नित्यसर्वगतस्वभाव[20]त्वेऽर्थक्रियाकारित्वायोगात्। न खलु गोत्वं वाहदोहादावुपयुज्यते, तत्र व्यक्तीनामेव व्यापाराभ्युपगमात्।

स्वविषयज्ञानजनक[22]त्वेपि व्यापारोस्य केवलस्य, व्यक्तिसहितस्य वा? केवलस्य[21] चेत्; व्यक्त्यन्तरालेऽप्युपलम्भप्रसङ्गः[23]। व्यक्तिसहि-
२० तस्य चेत्; किं प्रतिपन्नाखिलव्यक्तिसहितस्य, अप्रतिपन्नाखिलव्यक्तिसहितस्य वा? तत्राद्यपक्षोऽयुक्तः; असर्वविदोऽखिलव्यक्तिप्रतिपत्तेरसम्भवात्। द्वितीयपक्षे पुनः एकव्यक्तेरप्यग्रहणे

---

१ सौगतेन। २ उपचरितोपचारोपि श्रद्धामात्रगम्यो यतः। ३ निर्विकल्पका बुद्धिः। ४ एका। ५ परेण। ६ चेत्पक्षान्तरसूचकम्। इति हेतोः स्वलक्षणे भ्रान्तिनिमित्तनाक्षणिकत्वं नो संयोज्येत चेत्तर्हि स्वलक्षणस्य परमार्थभूतमक्षणिकत्वं स्यात् स्वलक्षणस्य क्षणिकत्वसिद्ध्यर्थं सर्वं क्षणिकं सत्त्वादित्यनुमानं च व्यर्थं स्यादिति भावः। ७ परमार्थभूतसदृशापरापरोत्पत्तिलक्षणेन। ८ पुरुषेण। ९ क्षणिके स्वलक्षणे वस्तुनि। १० अक्षणिकत्वलक्षणम्। ११ वायथार्थकः। १२ अपरमार्थभूतः। १३ परमार्थभूतरूपसादृश्यदर्शनात्। १४ ग्रन्थस्य। १५ विषयविषयिभावं न कारयतीत्यर्थः। १६ निर्विकल्पकबुद्धिम्। १७ अन्यत्संनिकर्षादि कर्तृ। १८ पदार्थसादृश्याकारधारित्वम्। १९ उभाभ्यां श्लोकाभ्यां परस्य सादृश्याङ्गीकारो विद्यत इति सूचितम्। २० सामान्यस्य। २१ व्यक्तिरहितं केवलम्। २२ पुरुषं प्रति। २३ सामान्यस्य। न च तथा।

सामान्यज्ञानानुषङ्गः[1]। प्रतिपन्नकतिपयव्यक्तिसहितस्य जनकत्वे तु तस्य ताभिरुपकारः क्रियते, न वा? प्रथमपक्षे सामान्यस्य व्यक्तिकार्यता, तदभिन्नोपकारकरणात्। ततो भिन्नस्यास्य करणे 'तस्य' इति[2]व्यपदेशासिद्धिः। तत्कृतोपकारेणाप्युपकारान्तर[3]करणेऽनवस्था। द्वितीयपक्षे तु व्यक्तिसहभाववैयर्थ्यम् सामान्यस्य, अकिञ्चित्करस्य सहकारित्वासम्भवात्। ५

सामान्येन सहैक[4]ज्ञानजनने व्यापाराद्व्यक्तीनां तत्सहकारित्वेपि किमालम्बनभावेन तत्र तासां व्यापारः, अधिपतित्वेन वा? प्राच्यकल्पनायाम् एक[5]मनेका[6]कारं सामान्यविशेषज्ञानं सर्वदा स्यात्, स्वालम्बनानुरूपत्वात्सकलविज्ञानानाम्। १०

द्वितीयविकल्पे तु व्यक्तीनामनधिगमेपि सामान्यज्ञानप्रसङ्गः। न[7] खलु रूपज्ञाने चक्षुषो[8]धिगतस्याधिपतित्वेन व्यापारो दृष्टः अदृष्टस्य वा, सर्वथा नित्य[9]वस्तुनः क्रमाऽक्रमाभ्यामर्थक्रियाविरोधाच्चास्य न कस्याञ्चिदर्थक्रियायां व्यापारः। व्यापारे वा सहकारिनिरपेक्षितया सदा कार्य[10]कारित्वानुषङ्गः, तदवस्था[11]भाविनः[12] १५ कार्यजननस्वभावस्य सदा सम्भवात्, अभावे च अनित्यत्वं स्वभावभेदलक्षणत्वात्तस्य। कार्याजननस्वभावत्वे वा अस्य सर्वदा कार्याजनकत्वप्रसङ्गः[13]। यो हि यदऽजनकस्वभावः सोन्य[14]सहितोपि न तज्जनयति यथा शालिबीजं क्षित्याद्यविकलसामग्रीयुक्तं कोद्रवाङ्कुरम्, अजनकस्वभावं च सामान्यं कार्यस्य, इत्यवस्तुत्वापत्ति- २० र्नित्यैकस्वभावसामान्यस्य, अर्थक्रियाकारित्व[15]लक्षणत्वाद्वस्तुनः।

तथा तत्सर्वसर्व[16]गतम्, स्व[17]व्यक्तिसर्वगतं वा? न तावत्सर्वसर्वगतम्; व्यक्त्यन्तरालेऽनुपलभ्यमानत्वाद्व्यक्तिस्वात्मवत्। तत्रानुपलम्भो हि तस्याऽव्यक्तत्वात्, व्यवहितत्वात्, दूरस्थित-

---

१ न विशेषज्ञानानुषङ्गः, न च तथा–विशेषमन्तरेण सामान्याप्रतीतेः। २ अयमुपकारः सामान्यस्येति। ३ सम्बन्धासिद्ध्यर्थम्। ४ गौर्गौरित्यादि। ५ सामान्यस्यैकत्वादेकं सामान्यज्ञानम्। ६ व्यक्तीनामनेकत्वादनेकाकारम्। ७ अपरिज्ञाता व्यक्तयः सामान्यज्ञानं कथं जनयन्तीत्युक्ते सत्याहाचार्यः। ८ चक्षुर्धर्मस्य। ९ सामान्यलक्षणस्य। १० स्वविषयज्ञानलक्षण। ११ तदवस्था=सहकारिरहितत्वम्। १२ कूटस्थनित्यसामान्यस्य। १३ सामान्यं कार्यजनकं न भवति तदजनकत्वादित्यध्याहृत्य। १४ सहकारिकारण। १५ अर्थो घटादिः तस्य क्रिया कार्यत्वं जन्यत्वमिति यावत्, तां करोति यः पदार्थो मृत्पिण्डलक्षणः सोर्थक्रियाकारी, तस्य भावस्तत्त्वम्, तस्मात्। १६ सर्वासु स्वसम्बन्धिखण्डमुण्डादिव्यक्तिषु। १७ स्वव्यक्तौ विवक्षितैकव्यक्तौ।

त्वात्, अदृश्यत्वात्, स्वाश्रयेन्द्रियसम्बन्धविरहात्, आश्रयसमवेतरूपाभावाद्वा व्यक्त्यन्तराऽभावात्? न तावदव्यक्तत्वात्; एकत्र[1] व्यक्तौ सर्वत्र[2] व्यक्तेरभिन्नत्वात्। अव्यक्तत्वाच्चान्तराले तस्यानुपलम्भे व्यक्तिस्वात्मनोप्यनुपलम्भोऽत एवास्तु। तत्रास्य सद्भावावेदकप्रमाणाभावादसत्त्वादेवाऽनुपलम्भे सामान्यस्यापि सोऽसत्त्वादेवास्तु विशेषाभावात्। न खलु प्रत्यक्षतस्तत्त्रोपलभ्यते विशेषरहितत्वात् खरविषाणवत्।

किञ्च, प्रथमव्यक्तिग्रहणवेलायां तदभिव्यक्तस्यास्य ग्रहणे अभेदात्तस्य सर्वत्र सर्वदोपलम्भप्रसङ्गः सर्वात्मनाभिव्यक्तत्वात्, अन्यथा व्यक्ताव्यक्तस्वभावभेदेनानेकत्वानुषङ्गादसामान्यरूपतापत्तिः। तस्मादुपलब्धिलक्षणप्राप्तस्यानुपलम्भाद्व्यक्त्यन्तराले सामान्यस्यासत्त्वं व्यक्तिस्वात्मवत्।

'व्यक्त्यन्तरालेऽस्ति सामान्यं युगपद्भिन्नदेशस्वाधारवृत्तित्वे सत्येकत्वाद्वंशादिवत्' इत्यनुमानात्तत्र तद्भावसिद्धिः इत्यप्यसङ्गतम्; हेतोः प्रतिवाद्यऽसिद्धत्वात्। न हि भिन्नदेशासु व्यक्तिषु सामान्यमेकं प्रत्यक्षतः स्थूणादौ वंशादिवत्प्रतीयते, यतो युगपद्भिन्नदेशस्वाधारवृत्तित्वे सत्येकत्वं तस्य सिध्यत्स्वाधारान्तरालेऽस्तित्वं साधयेत्। तन्नाव्यक्तत्वात्तत्राऽनुपलम्भः।

नापि व्यवहितत्वादभिन्नत्वादेव। नापि दूरस्थितत्वात्तत एव।

नाप्यदृश्यात्मत्वात्, स्वाश्रयेन्द्रियसम्बन्धविरहात्, आश्रयसमवेतरूपाभावाद्वा; अभेदादेव। तन्न सर्वसर्वगतं सामान्यम्।

नापि स्वव्यक्तिसर्वगतम्; प्रतिव्यक्ति परिसमाप्तत्वेनास्याऽनेकत्वानुषङ्गाद् व्यक्तिस्वरूपवत्। कार्त्स्न्यैकदेशाभ्यां वृत्त्यनुपपत्तेश्चाऽसत्त्वम्।

किञ्च, एकत्र व्यक्तौ सर्वात्मना वर्त्तमानस्यास्यान्यत्र वृत्तिर्न स्यात्। तत्र हि वृत्तिस्तद्देशे गमनात्, पिण्डेन सहोत्पादात्,

१ एकस्यां व्यक्तौ। २ प्राकट्ये सति। ३ व्यक्तिषु। ४ सामान्यस्याभिव्यक्तेः। ५ प्रकटरूपसामान्यस्यैकत्वात्। ६ व्यक्त्यन्तराले। ७ नाऽभावात्। ८ ततश्च सामान्यवद्व्यक्तेरपि व्यापकत्वान्नित्यत्वप्रसङ्गः। ९ सद्भावावेदकप्रमाणाभावस्य। १० व्यापकत्वनित्यत्वात्। ११ विशेषरूपताप्रतिपत्तिरिति भावस्तस्याऽनेकरूपत्वात्। १२ देवदत्तेन व्यभिचारपरिहारार्थं विशेषणद्वयम्। १३ स्तम्भादौ। १४ जैनादि। १५ व्यक्ताव्ऽभिव्यक्तस्य सामान्यस्य। १६ एकस्वभावत्वात् (व्यक्तया सह)। १७ व्यापित्वात्। १८ सामान्यस्याश्रयाः खण्डादयः। १९ इन्द्रियसम्बद्धत्वादिविशिष्टव्यक्तिरूपत्वात्। २० व्यक्तीनामानन्त्यात्। २१ अनेकत्वसांशत्वलक्षणं दूषणमुदेष्यतीति भावः।

तद्देशे सद्भावात्, अंशवत्तया वा स्यात्? न तावद्गमनादन्यत्र पिण्डे तस्य वृत्तिः; निष्क्रियत्वोपगमात्।

किञ्च, पूर्वपिण्डपरित्यागेन तत्तत्र गच्छेत्, अपरित्यागेन वा? न तावत्परित्यागेन; प्राक्तनपिण्डस्य गोत्वपरित्यक्तस्यागोरूपताप्रसङ्गात्। नाप्यपरित्यागेन; अपरित्यक्तप्राक्तनपिण्डस्यास्यानंशस्य ५ रूपादेरिव गमनासम्भवात्। न ह्यपरित्यक्तपूर्वाधाराणां रूपादीनामाधारान्तरसङ्क्रान्तिर्दृष्टा।

नापि पिण्डेन सहोत्पादात्; तस्याऽनित्यतानुषङ्गात्। नापि तद्देशे सत्त्वात्; पिण्डोत्पत्तेः प्राक् तत्र[3] निराधारस्यास्यावस्थानाभावात्। भावे वा स्वाश्रयमात्रवृत्तित्वविरोधः। १०

नाप्यंशवत्तया; निरंशत्वप्रतिज्ञानात्। ततो व्यक्त्यन्तरे सामान्यस्याभावानुषङ्गः। परेषां प्रयोगः 'ये यत्र नोत्पन्ना नापि प्रागवस्थायिनो नापि पश्चादन्यतो देशादागतिमन्तस्ते तत्राऽसन्तः यथा खरोत्तमाङ्गे तद्विषाणम्, तथा च सामान्यं तच्छून्यदेशोत्पादवति घटादिके वस्तुनि' इति। उक्तञ्च— १५

"न याति न च तत्रासीदस्ति पश्चान्न चांशवत्।
जहाति पूर्वमाधारमहो व्यसनसन्ततिः* ॥ १ ॥"
[प्रमाणवा० १।१५३]

ये तु व्यक्तिस्वभावं सामान्यमभ्युपगच्छन्ति
"तादात्म्यमस्य कस्माच्चेत्स्वभावादिति गम्यताम्।" [ ] २०

इत्यभिधानात्; तेषां व्यक्तिवत्तस्यासाधारणरूपत्वानुषङ्गाद् व्यक्त्युत्पादविनाशयोर्श्चास्यापि तद्योगित्वप्रसङ्गान्न सामान्यरूपता। अथाऽसाधारणरूपत्वमुत्पादविनाशयोगित्वं चास्य नाभ्युपगम्यते, तर्हि विरुद्धधर्माध्यासतो व्यक्तिभ्योऽस्य भेदः स्यात्।

---

१ सामान्यं निष्क्रियमिति वचनात्। २ परेण। ३ व्यक्तिदेशे। ४ जटिलानाम्। ५ सामान्यमसत् अनुत्पद्यमानादित्वादित्युपरिष्टाद्योज्यम्। ६ तच्छून्यौ च तद्देशोत्पादौ चेति। ७ व्यक्त्यन्तरम्। ८ व्यक्तिदेशे। ९ व्यक्तौ भग्नायां सत्याम्। १० सामान्यस्य विशेषणम्। ११ वृथा स्थितिः। * श्लोकोयं मुद्रितपुस्तके 'व्यक्तिभ्योऽस्य भेदः स्यात्' इत्यनन्तरं मुद्रितः। प्रकरणानुरोधात् स्थानभ्रष्टो भाति—सम्पा०। १२ मीमांसकाः। १३ व्यक्तिरेव स्वभावो यस्य तयोरभेदात्। १४ व्यक्त्या सह। १५ मीमांसकानाम्। १६ असाधारणरूपताया व्यक्तेरभिन्नत्वात्। १७ सामान्यस्य। १८ व्यक्तिसामान्ययोरभेदात्। १९ परेण। २० घटपटयोरिव।

"तादात्म्यं[1] चेन्मतं[2] जातेर्[3]व्यक्तिजन्मन्यजातता[4][5]।
नाशे[6]ऽनाशश्च[7] केनेष्टस्[8]तद्वच्चानन्वयो न किम्? ॥ २ ॥
व्यक्तिजन्मन्य[9]जाता चेदागता नाश्रयान्तरात्[10]।
प्रागासीन्न च तद्देशे सा तया सङ्गता कथम्? ॥ ३ ॥
५ व्यक्तिनाशे न चेन्नष्टा गता व्यक्त्यन्तरं न च।
तच्छून्ये न स्थिता देशे सा जातिः क्वेति कथ्यताम्? ॥ ४ ॥
व्यक्तेर्जात्या[11][12]दियोगेपि यदि जातेः स[13] नेष्यते[14]।
तादात्म्यं[15] कथमिष्टं स्यादनुपप्लुत[16]चेतसाम्? ॥ ५ ॥" [ ]

ततो यदुक्तं कुमारिलेन—

१० "विषयेण[17] हि बुद्धीनां[18] विना नोत्पत्तिरिष्यते[19]।
विशेषादन्यदिच्छन्ति[20] सामान्यं तेन तद्ध्रुवम्[21] ॥ १ ॥
ता[22] हि तेन विनोत्पन्ना मिथ्याः स्युर्विषयादृते[23]।
न त्वन्येन[24] विना वृत्तिः सामान्यस्येह दुष्यति[25] ॥ २ ॥"
[मी० श्लो० आकृति० श्लो० ३७-३८]

१५ इति; तन्निरस्तम्; नित्यसर्वगतसामान्यस्याश्रया[26]देकान्ततो भिन्नस्याभिन्नस्य वाऽनेकदोष[27]दुष्टत्वेन प्रतिपादितत्वात्। अनुगतप्रत्ययस्य च सदृश[28]परिणामनिबन्धनत्वप्रसिद्धेः। स चानित्योऽसर्वगतोऽनेकव्यक्त्यात्मकतयाऽनेकरूपश्च रूपादिवत्प्रत्यक्षत एव प्रसिद्धः। ततो भट्टेनायुक्तमुक्तम्—

"पिण्डभेदेषु[29] गोबुद्धिरेकगोत्वनिबन्धना।
२० गवाभासै[30]करूपाभ्यामेकगोपिण्डबुद्धिवत् ॥ १ ॥"
[मी० श्लो० वनवाद श्लो० ४४]

यच्चेदमुक्तम्—

"न शावलेयाद्गोबुद्धिस्[31]ततो[32]ऽन्यालम्बनापि वा[33]।

---

१ व्यक्त्या सह। २ तदा इति शेषः। ३ जातेः। ४ व्यक्तेः। ५ जातेः। ६ व्यक्तिवत्। ७ असाधारणता। ८ किन्तु स्यादेव। ९ सति। १० व्यक्त्यन्तरात्। ११ जातिः=जन्म। १२ आदिना विनाशग्रहणम्। १३ जात्यादियोगः। १४ तर्हीतिशेषः। १५ जातिव्यक्त्योः। १६ अभ्रान्तचेतसाम्। १७ सामान्येन। १८ अनुगताकाराणाम्। १९ यैर्वादिभिः। २० ते। २१ नित्यमचलम्। २२ विषयेण विनोत्पत्तिः कथमित्युक्ते आह। २३ यतः। २४ समवायेन। २५ तादात्म्येन स्वभावादृते इत्यर्थः। २६ व्यक्तेः सकाशात्। २७ एकस्यापरिस्यपदेशाभावाद्योनेके। २८ सास्नादिमत्त्वेनायमनेन सदृश इति। २९ गौर्गौरिति। ३० गवाभासश्चैकरूपं च ताभ्याम्। एक (गौर्गौरित्याध्यात्मिककारण) ज्ञानत्वादेकरूप- (गोरूपपिण्ड बाह्यकारण)त्वाच्चेत्यर्थः। ३१ सामान्यनिबन्धनेति। ३२ ततोन्यद्=खण्डादि। ३३ नेति संबन्धः।

तदभावेपि सद्भावाद् घटे पार्थिवबुद्धिवत् ॥"
[मी० श्लो० वनवाद श्लो० ४]

तत्सिद्धसाधनम्; व्यक्तिव्यतिरिक्तसदृशपरिणामालम्बनत्वात्तस्याः।

यच्च सामान्यस्य सर्वगतत्वसाधनमुक्तम्— ५

"प्रत्येकसमवेतार्थविषया वाथ गोमतिः।
प्रत्येकं कृत्स्नरूपत्वात्प्रत्येकं व्यक्तिबुद्धिवत् ॥ १ ॥"
[मी० श्लो० वनवाद श्लो० ४६]

प्रयोगः-येयं गोबुद्धिः सा प्रत्येकसमवेतार्थविषया प्रतिपिण्डं कृत्स्नरूपपदार्थाकारत्वात् प्रत्येकव्यक्तिविषयबुद्धिवत्। एकत्वमप्यस्य प्रसिद्धमेव; तथाहि-यद्यपि सामान्यं प्रत्येकं सर्वात्मना परिसमाप्तं तथापि तदेकमेवैकाकारबुद्धिग्राह्यत्वात्, यथा नञ्युक्तवाक्येषु ब्राह्मणादिनिवर्त्तनम्। न चेयं मिथ्या; कारणदोषबाधकप्रत्ययाभावात्। उक्तञ्च— १०

"प्रत्येकसमवेतापि जातिरेकैकबुद्धितः। १५
नञ्युक्तेष्विव वाक्येषु ब्राह्मणादिनिवर्त्तनम् ॥ १ ॥
नैकरूपा मतिर्गोत्वे मिथ्या वक्तुं च शक्यते।
नात्र कारणदोषोस्ति बाधकप्रत्ययोपि वा ॥ २ ॥"
[मी० श्लो० वनवाद श्लो० ४७-४९]

तदप्युक्तिमात्रम्; प्रतिपिण्डं कृत्स्नरूपपदार्थाकारत्वस्य सदृशपरिणामाविनाभावित्वेन साध्यविपरीतार्थं साधनस्य विरुद्धत्वात्। नित्यैकरूपप्रत्येकपरिसमाप्तसामान्यसाधने दृष्टान्तस्य साध्यविकलता। तथाभूतस्य चास्य सर्वात्मना बहुषु परिसमाप्तत्वे सर्वेषां व्यक्तिभेदानां परस्परमेकरूपतापत्तिः एकव्यक्तिपरिनिष्ठितस्वभावसामान्यपदार्थसंसृष्टत्वात् एकव्यक्तिस्वरूपवत्। सामान्यस्य २० २५

१ शाबलेयाभावेपि खण्डादिगोबुद्धिसद्भावात् तदभावेऽपि शाबलेयादेस्तत्सद्भावादित्यर्थः। २ गोबुद्धेः। ३ श्वेतपीतादिविशेषमन्तरेण यथा घटे पृथिवीत्वसामान्येन पार्थिवबुद्धिः। ४ न केवलमेकगोत्वनिबन्धना। ५ एकामेकां व्यक्तिं प्रति। ६ गोमतेः। ७ गौर्गौरिति प्रत्ययः। ८ अर्थो=गोत्वलक्षणसामान्यम्। ९ गोत्वादिसामान्य। १० अयं गौरयं गौरिति। ११ नायं ब्राह्मणो नायं ब्राह्मण इत्यादि। १२ एकमेव। १३ इन्द्रियादि। १४ गौर्गौरिति। १५ हेतोः। १६ सदृशपरिणामः—साध्यम्। १७ सर्वगतत्व। १८ असर्वगतत्वे। १९ व्यक्तीनां नित्यत्वमेकरूपत्वं च नास्ति यतः। २० एकत्वानुमाने दूषणमाह। २१ विशेषेषु। २२ अभिन्नत्वात्, तादात्म्यापन्नत्वात्।

वानेकत्वापत्तिः, युगपदनेकवस्तुपरिसमाप्ता[1]त्मरूपत्वात् दूरतरदे-
शा[2]वच्छिन्नानेकभाजनगतबिल्वादिफलवत्। ततोऽयुक्तमुक्तम्—
'नात्र बाधकप्रत्ययोस्ति' इति; प्राक्प्रतिपादितप्रकारेणानेकबाध-
कप्रत्ययोपनिपातात्। प्रत्येकसमवेतायां[3]च जातेरसिद्धत्वात्
५ 'एकबुद्धि[4]ग्राह्यत्वात्' इत्याश्रयासिद्धो हेतुः[5]। स्वरूपासिद्धश्च;
अबाध[6]सादृश्य[7]बोधाधिगम्य[8]त्वेनैकाकार[9]प्रत्ययग्राह्य[10]त्वस्यासिद्धेः।
ब्राह्मणादिनिवृत्तिश्च परमार्थतो नैक[11]रूपास्तीति [12]साध्यविकल-
मुदाहरणम्।

[13]एतेन यदुक्तमुद्द्योतकरेण-"गवादिष्वनुवृत्तिप्रत्ययः पिण्डा[14]-
१० दिव्यतिरिक्तान्निमित्ता[15]द्भवति विशेषक[16]त्वान्नीलादिप्रत्ययवत्।
तथा गोतोऽर्थान्तरं गोत्वं भिन्नप्रत्ययविषयत्वाद्रूपादिवत् तस्ये[17]ति
च व्यपदेशविषयत्वात्, यथा चैत्रस्याश्वश्चैत्राद्व्यपदि[18]श्यमानः"
[न्यायवा० पृ० ३३३] इति; तन्निरस्तम्; अनुवृत्तिप्रत्ययस्य हि
[19]सामान्येन पिण्डादिव्यतिरिक्तनिमित्तमात्रसाधने सिद्ध[20]साध्यता-
१५ नुषङ्गात्, सदृशपरिणामनिबन्धनतयाऽस्याभ्युपगमात्। नित्यै-
कानुगामिसामान्यनिबन्धनत्वसाधने दृष्टान्तस्य [21]साध्यविकलता।
न ह्येवम्भूतेन क्वचि[22]दन्वयः सिद्धः।

न चानुगतज्ञानोपलम्भादेव तथाभूतसामान्यसिद्धिः। यतः किं
यत्रानुगतज्ञानं तत्र सामान्यसम्भवः प्रतिपा[23]द्यते, यत्र वा सामान्य-
२० सम्भवस्तत्रानुगतज्ञानमिति? तत्राद्यः पक्षोऽयुक्तः; गोत्वादि-
सामान्येषु 'सामान्यं सामान्यम्[24]' इत्यनुगताकारप्रत्ययोपलम्भे-
ना[25]परसामान्यकल्पनाप्रसङ्गात्। न चात्रासौ प्रत्ययो गौणः;
अस्खलद्वृत्तित्वेन गौण[26]त्वासिद्धेः। तथा प्रागभावादिष्वप्यभावेषु

१ सम्पूर्ण। २ भिन्नभिन्न। ३ नित्याया एकरूपायाः प्रत्येकं परिसमाप्तायाश्च। ४ अयं गौरयं गौरिति। ५ आश्रयभूताया जातेरभावात्। ६ अयमनेन सदृश इति। ७ अनेकरूपसामान्य। ८ कृत्वा। ९ एकाकारप्रत्ययेन ग्राह्यं सामान्यं परमते। १० सामान्यस्य। ११ नायं क्षत्रियो ब्राह्मणो नायं वैश्यो ब्राह्मण इत्यादिना कृत्वाऽभावानामनेकत्वात्, अभावः अभाव इति प्रत्ययसंयुक्तप्रागभावादिवत्। १२ एकत्वेन साध्येन। १३ मीमांसकं प्रति नित्यसर्वगतजातिनिराकरणपरेण ग्रन्थेन। १४ शबलशावलेयादिविशेषगोपिण्डादि। १५ सर्वगनित्यत्वात्। १६ भेदकत्वात्। १७ गोरिदं गोत्वमिति। १८ भेदेनाभिधीयमानः। १९ साधारणेन कृत्वा। २० जैनानाम्। २१ पिण्डादिव्यतिरिक्तान्नित्यैकानुगामिसामान्यान्निमित्ताद्भवतीति साध्यम्। २२ यो यो भेदकप्रत्ययः स स नित्यैकानुगामिसामान्याद्भवतीति। २३ परेण। २४ गवादिव्यक्तिनिष्ठेषु गोत्वादिसामान्येषु घटत्वमपि सामान्यं पटत्वमपि सामान्यमित्यनुगताकारप्रत्ययः। २५ गोत्वादिभ्यः। २६ कल्पित।

'अभावोऽभावः' इत्यनुगतप्रत्ययप्रवृत्तिरस्ति, न च परैरभाव-सामान्यमभ्युपगतम्। न खलु तत्रानुगाम्येकं निमित्तमस्त्यन्यत्र सदृशपरिणामात्।

ननु चापरसामान्यस्य प्रागभावादिष्वभावेपि सत्ताख्यं महा-सामान्यमस्ति, तद्बलादेवाभावप्रत्ययोऽनुगतो भविष्यति। ५ उक्तञ्च—

"ननु च प्रागभावादौ सामान्यं वस्तु नेष्यते।
सत्तैव ह्यत्र सामान्यमनुत्पत्त्यादिरूपता" ॥ १ ॥
[मी० श्लो० अपोहवाद श्लो० ११]

अनुत्पत्त्यादिविशिष्टेत्यर्थः। तदयुक्तम्; अभिप्रेतपदार्थव्यतिरि- १० क्तानां मतान्तरीयार्थानाम् उत्पाद्यकथार्थानां वाऽभावप्रतीतिविष-यतोपलम्भेन सत्त्वप्रसङ्गात्। तत्राभावेष्वनुवृत्तप्रतीतेरनुगाम्ये-कसामान्यनिबन्धनत्वमस्तीत्यन्यत्राप्यस्यास्तन्निबन्धनत्वाभावः। प्रयोगः-ये क्षमित्वानुगामित्ववस्तुत्वोत्पत्तिमत्त्वसत्त्वादिधर्मापे-तास्ते परकल्पितनित्यैकसर्वगतसामान्यनिबन्धना न भवन्ति १५ यथाऽभावेष्वभावोऽभाव इति प्रत्ययाः, सामान्येषु सामान्यं सामान्यमिति प्रत्यया वा, तथा चामी प्रत्यया इति।

अथ यत्र सामान्यं तत्रैवानुगतज्ञानकल्पना; नः पाचकादिषु तदभावेप्यनुगतप्रत्ययप्रवृत्तेः। न खलु तत्रानुगाम्येकं सामान्य-मस्ति यत्प्रसादात्तत्प्रवृत्तिः स्यात्। निमित्तान्तरमस्तीति २० चेत्तत्किं कर्म, कर्मसामान्यं वा स्यात्, व्यक्तिः, शक्तिर्वा? न तावत्कर्म; तस्य प्रतिव्यक्ति विभिन्नत्वात्। 'विभिन्नं ह्यऽभिन्नस्य कारणं न भवति' इति सर्वोयमारम्भः। तच्चेद्भिन्नमपि तथाभूत-कार्यकारणं तदान्यत्र कः प्रद्वेषः?

किञ्च, तत्कर्म नित्यं वा स्यात्, अनित्यं वा? न तावन्नित्यम्; २५ तथानुपलब्धेरनभ्युपगमाच्च। अनित्यं तु न सर्वदा स्थितिमदिति विनष्टे तस्मिन्न तथाभूतो व्यपदेशो ज्ञानं वा स्यात्, अपचतः

१ अभावत्वस्य। २ परेण। ३ एका सर्वगता। ४ आदिना नित्यसर्वगतत्वादि-ग्रहणम्। ५ ततोऽभावप्रत्ययोऽनुगतो भविष्यति। ६ अभिप्रेतानि द्रव्यगुणकर्माणि। ७ अद्वैतप्रधानादीनाम्। ८ लोके विचित्रकथार्थानाम्। ९ पुरुषेषु। १० पाचकः पाचकः इत्यादि। ११ कथं सामान्यं नास्तीत्युक्ते आह। १२ पचनक्रियायाः पूर्वं नास्ति। १३ देवदत्तयज्ञदत्तचैत्रमैत्रेषु पचनक्रियालक्षणं कर्म भिन्नम्। १४ अनुगताकारस्य। १५ जैनमताभ्युपगते प्रतिव्यक्ति भिन्ने सदृशपरिणामे। १६ शब्दबुद्धिकर्मणां त्रिक्षणा-वस्थायित्वाभ्युपगमात्। १७ परेण। १८ पाचक इति। १९ पाचक इति।

क्रियाविरहात्। पचन्नेव हि तथा[1] व्यपदिश्येत नान्यदा। तन्न कर्मैतस्य प्रत्ययस्य निबन्धनम्।

नापि कर्मसामान्यम्; तद्धि कर्माश्रितम्[2], कर्माश्रयाश्रितं[3] वा? यदि कर्माश्रितम्; कथमन्यत्र[4] ज्ञानं जनयेत्? न ह्यन्यत्र[5] वृत्ति-
५ मदन्यत्र[6] ज्ञानकारणमतिप्रसङ्गात्।

किञ्च, कर्मसामान्यात् 'पाकः पाकः' इति प्रत्ययः स्यान्न पुनः 'पाचकः पाचकः' इति। अथ कर्माश्रयाश्रितम्; तन्न; कर्माश्रितत्वात्[7]। परम्परया[8] कर्माश्रयाश्रितं तत्; इत्यसारम्; अपचतः[9] कर्मविवेकात्। विविक्ते च कर्मणि न कर्मत्वं कर्मणि तदाश्रये वाऽऽ-
१० श्रितम्, अनाश्रितं च कथं तत्[10]तत्र[11] तथा[12]ज्ञानहेतुः स्यात्?

अथाऽपचतोऽतीतानागते कर्मणी तथा[13]व्यपदेशज्ञाननिबन्धनं न कर्मत्वम्; ननु सती, असती वा ते तन्निबन्धनं स्याताम्। न तावत्सती; अतीतस्य प्रच्युतत्वादनागतस्य चालब्धात्मस्वरूपत्वात्। असती च कथं कस्यापि निबन्धनमतिप्रसङ्गात्? तन्न
१५ कर्मत्वमपि तत्[14]प्रत्ययस्य निबन्धनम्।

नापि व्यक्तिः; अनिष्टेर्[15]विभिन्नत्वाच्च[16]।

नापि शक्तिः; सा हि पाचकादन्या, अनन्या वा स्यात्? अनन्यत्वे तयोरन्यतरदेव स्यात्। अन्यत्वे च अस्या एव कार्योपयोगित्वेन[17] कर्त्तुरकर्तृत्वानुषङ्गः। अथ पारम्पर्येणोपयोगः-कर्त्ता हि
२० शक्तावुपयुज्यते शक्तिश्च कार्ये। नन्वसौ शक्तावुपयुज्यते स्वरूपेण, शक्त्यन्तरेण वा? शक्त्यन्तरेणोपयोगेऽवस्था। स्वरूपेणोपयोगे कार्येऽप्यसौ तथा किन्नोपयुज्यते किं परम्परापरिश्रमेण? न[18] चान्यन्निमित्तमस्ति[19]।

पाचकत्वमस्तीति चेत्; तत्किं द्रव्योत्पत्तिकाले[20] व्यक्तम्,
२५ अव्यक्तं वा? व्यक्तं चेत्; तर्हि पाकक्रियायाः प्रागेव तथा[21] ज्ञानाभिधाने स्याताम्। अथाऽव्यक्तम्; तर्हि पश्चादपि न ते स्यातां

१ पाचक इति। २ कर्मवत्पुरुषाश्रितम्। ३ कर्माश्रये देवदत्ते। ४ कर्मणि। ५ देवदत्ते। ६ गृहे वृत्तिमान्प्रदीपो गुहायां ज्ञानकारणं स्यादित्यतिप्रसङ्गः। ७ कर्मत्वं कर्माश्रितं कर्म च देवदत्ताश्रितमिति। ८ पुरुषस्य। ९ नष्टे। १० सामान्यम्। ११ देवदत्ते। १२ पाचक इति। १३ पाचकः पाचक इति। १४ अनुगतप्रत्ययस्य। १५ परेणानभ्युपगमात्। १६ अनेकत्वात्। १७ पचनलक्षणं कार्यम्। १८ कर्मादिभ्योऽन्यन्निमित्तं भविष्यतीत्याह। १९ पाचकः पाचक इति ज्ञानव्यपदेशयोरनुगतप्रत्ययहेतुः। २० देवदत्तलक्षण। २१ पाचक इति।

विशेषाभावात्। तथाहि-तत्पूर्वं द्रव्यसमवायधर्मः स्याद्वा, न वा? सत्त्वे सत्त्ववत्पूर्वमेव व्यक्तिः, तथाव्यपदेशश्च स्यात्। अथ न; तदा पश्चादपि द्रव्यसमवायधर्मत्वं न स्यादेकरूपत्वात्तस्य। तन्न पश्चाद्व्यक्तिस्तस्य।

अस्तु वा; तथाप्यसौ द्रव्येण, क्रियया, उभाभ्यां वाभिधीयते? न तावद्द्रव्येण; अस्य प्रागपि विद्यमानत्वात्। नापि क्रियया; तस्या अनाधेयातिशयेऽकिञ्चित्करत्वात्। नाप्युभाभ्याम्; पृथगऽसामर्थ्ये सहितयोरप्यसामर्थ्यात्। तन्नानुगतः प्रत्ययोऽनुगाम्येकं सामान्यमालम्बते।

किञ्च, 'गोत्वं वर्त्तते' इत्यभ्युपेतं भवता, तत्र किं गोष्वेव गोत्वं वर्त्तते, किं वा गोषु गोत्वमेव, गोषु गोत्वं वर्त्तते एवेति वा? प्रथमपक्षेऽनन्वयित्वाविशेषाद्यावत्तेषु गोत्वं वर्त्तते तावदन्यत्रापि किन्न वर्त्तेत? द्वितीये पक्षे तु सत्त्वद्रव्यत्वादीनां व्यवच्छेदाद्व्यक्तेरप्यभावप्रसङ्गस्तद्रूपत्वात्तस्याः। अथ 'गोषु गोत्वं वर्त्तते' एवेति पक्षः; 'तत्र चान्यत्र गोत्वं वर्त्तत एव' इति गोव्यक्तिवत्कर्कादावपि 'गौर्गौः' इति ज्ञानं स्यात्तद्वृत्तेरविशेषात्। तन्न व्यक्त्यात्मकात् प्रतिव्यक्तिविभिन्नात्सदृशपरिणामात् अन्यद् व्यक्तिभ्यो भिन्नमेकं सामान्यं घटते।

विभिन्नं हि प्रतिव्यक्ति सदृशपरिणामलक्षणं सामान्यं विसदृशपरिणामलक्षणविशेषवत्। यथैव हि काचिद्व्यक्तिरुपलभ्यमाना व्यक्त्यन्तराद्विशिष्टा विसदृशपरिणामदर्शनादवतिष्ठते तथा सदृशपरिणामदर्शनात्किञ्चित्केनचित्समानमपि 'तेनायं समानः सोऽनेन समानः' इति प्रतीतेः। न च व्यक्तिस्वरूपादभिन्नत्वात्सामान्यरूपताव्याघातोऽस्य; रूपादेरप्यत एव रूपादिस्वभावताव्याघात-

१ भेदाभावान्नित्यत्वस्यैकस्वभावत्वात्। २ देवदत्तलक्षण। ३ धर्मः=स्वभावः। ४ देवदत्तस्य। ५ पाचकत्वस्य। ६ पाचकः पाचक इति। ७ द्रव्योत्पत्तिकालेपि। ८ पाचकत्वस्य। ९ पश्चाद्व्यक्तिः (प्रकटनम्)। १० द्रव्यक्रियाभ्याम्। ११ देवदत्तादिना। १२ पचनलक्षणया। १३ पाचकत्वसामान्ये। १४ न च जैनानामिदं दूषणं तेषां शक्तेरङ्गीकारात्, परेषां शक्तेरङ्गीकारो नास्ति यतः। १५ नैयायिकेन। १६ नान्यत्रेत्यर्थः। १७ न सत्त्वद्रव्यत्वादिकं गोषु वर्त्तते। इत्यन्ययावृत्तिः (?)। १८ अन्यत्रापि गोत्वं वर्त्तते इत्यर्थः। १९ गोषु गोत्वसम्बन्धाभावाविशेषात्। २० समवायादीनां प्रागेव प्रतिक्षिप्तत्वात्। २१ अनन्वयो=विभिन्नत्वमसम्बद्धत्वं वा। २२ अश्वादिषु। २३ कर्कादिषु। २४ एवकारयोगेनान्ययोगायोगाऽत्यन्ताऽयोगव्यवच्छेदादिति सिद्धम्। २५ अनेकम्। २६ व्यक्त्यात्मकादिति विशेषणं समर्थयति।

प्रसङ्गात्। प्रत्यक्षविरोधोऽन्यत्रापि समानः-सामान्यविशेषात्मकतयार्थस्याध्यक्षे प्रतिभासनात्।

ननु प्रथमव्यक्तिदर्शनवेलायां सामान्यप्रत्ययस्याभावात्सदृशपरिणामलक्षणस्यापि सामान्यस्यासम्भवः; तदप्यसाम्प्रतम्; तदा ५ सद्द्रव्यत्वादिप्रत्ययस्योपलम्भात्। प्रथममेकां गां पश्यन्नपि हि सदादिना सादृश्यं तत्रार्थान्तरेण व्यपदिशत्येव। अननुभूतव्यक्त्यन्तरस्यैकव्यक्तिदर्शने कस्मान्न समानप्रत्ययोत्पत्तिः तत्र सदृशपरिणामस्य भावादिति चेत्? तवापि विशिष्टप्रत्ययोत्पत्तिः कस्मान्न स्याद्वैसादृश्यस्यापि भावात्? परापेक्षत्वात्तस्याप्रसङ्गोऽ- १० न्यत्रापि समानः। समानप्रत्ययोपि हि परापेक्षस्तामन्तरेण क्वचित्कदाचिदप्यभावात् द्वित्वादिप्रत्ययवद्दूरत्वादिप्रत्ययवद्वा।

द्विविधो हि वस्तुधर्मः-परापेक्षः, परानपेक्षश्च, स्थौल्यादिवद्वर्णादिवच्च। अतो यथान्यापेक्षो विशेषः स्वामर्थक्रियां व्यावृत्तिज्ञानलक्षणां कुर्वन्नर्थक्रियाकारी, तथा सामान्यमप्यनुगतज्ञान- १५ लक्षणामर्थक्रियां कुर्वत्कथमर्थक्रियाकारि न स्यात्? तद्वाह्यां पुनर्वाहदोहाद्यर्थक्रियां यथा न केवलं सामान्यं कर्त्तुमुत्सहते तथा विशेषोपि, उभयात्मनो वस्तुनो गवादेस्तत्रोपयोगात्, इत्यर्थक्रियाकारित्वेनापि सामान्यविशेषाकारयोरभेदात्सिद्धं वास्तवत्वम्।

२० ततोऽपाकृतमेतत्—

"सर्वे भावाः स्वभावेन स्वस्वभावव्यवस्थितेः।
स्वभावपरभावाभ्यां यस्माद्व्यावृत्तिभागिनः॥ १॥
तस्माद्यतो यतोऽर्थानां व्यावृत्तिस्तन्निबन्धनाः।

---

१ व्यक्तिस्वरूपत्वादभिन्नत्वाविशेषात्। २ एकगवि। ३ सत्त्वादिनायं सदृश इत्यादि। ४ पुरुषस्य। ५ विशिष्टः=विसदृशः। ६ परो=महिषादिः। ७ परापेक्षाम्। ८ समानप्रत्ययस्य। ९ यथा द्वित्वमेकत्वापेक्षं दूरत्वं चासन्नत्वापेक्षम्। १० श्वेतपीतादिवत्। ११ सदृशपरिणामलक्षणम्। १२ अनुगतज्ञानलक्षणार्थक्रिया यतः। १३ विशेषनिरपेक्षम्। १४ केवलतया। १५ सामान्यविशेषात्मनः। १६ न केवलमबाधितप्रत्ययविषयत्वेन। १७ सामान्यविशेषावेव चाकारौ तयोरभेदाद्विशेषाभावादित्यर्थः। १८ सामान्यविशेषाकारौ सिद्धौ यतः। १९ प्रतिक्षणं ध्वंसिनः परस्परमसंसृष्टाः परमाणुरूपा गवादिस्वलक्षणाः। २० वर्त्तन्ते इति शेषः। २१ स्वेषां भावानां स्वरूपेण व्यवस्थितेः। २२ सजातीयविजातीयपरमाणुरूपार्थतः। २३ विजातीयादर्थात्। २४ स्वलक्षणानाम्। २५ व्यावृत्तिनिबन्धनं येषां ते।

जातिभेदाः प्रकल्प्यन्ते तद्विशेषावगाहिनः ॥ २ ॥”
[प्रमाणवा० १।४१-४२] इति ।

ननु सादृश्ये सामान्ये ‘स एवायं गौः’ इति प्रत्ययः कथं शबलं दृष्ट्वा धवलं पश्यतो घटेतेति चेत्? ‘एकत्वोपचारात्’ इति ब्रूमः। द्विविधं ह्येकत्वम्-मुख्यम्, उपचरितं च । मुख्यमात्मादिद्रव्ये । ५ सादृश्ये तूपचरितम् । नित्यसर्वगतस्वभावत्वे सामान्यस्यानेकदोषदुष्टत्वप्रतिपादनात् ।

‘तेन समानोयम्’ इति प्रत्ययश्च कथं स्यात्? तयोरेकसामान्ययोगाच्चेत्; न; ‘सामान्यवन्तावेतौ’ इति प्रत्ययप्रसङ्गात् । तयोरभेदोपचारे तु ‘सामान्यम्’ इति प्रत्ययः स्यात्, न पुनः ‘तेन १० समानोयम्’ इति । यष्टिपुरुषयोरभेदोपचाराद्यष्टिसहचरितः पुरुषो ‘यष्टिः’ इति यथा ।

ननु ‘व्यक्तिर्वत्समानपरिणामेष्वपि समानप्रत्ययस्यापरसमानपरिणामहेतुकत्वप्रसङ्गादनवस्था स्यात् । तमन्तरेणाप्यत्र समानप्रत्ययोत्पत्तौ पर्याप्तं खण्डादिव्यक्तौ समानपरिणामकल्पनया’ १५ इत्यन्यत्रापि समानम्- विसदृशपरिणामेष्वपि हि विसदृशप्रत्ययो यदि तदन्तरहेतुकोऽनवस्था । स्वभावतश्चेत्; सर्वत्र विसदृशपरिणामकल्पनानर्थक्यम् ।

न च सदृशपरिणामानामर्थवत्स्वात्मन्यपि समानप्रत्ययहेतुत्वे अर्थानामपि तत्प्रसङ्गः; प्रतिनियतशक्तित्वाद्भावानाम्, अन्यथा २० घटादेः प्रदीपात्स्वरूपप्रकाशोपलम्भात्प्रदीपेपि तत्प्रकाशः प्रदीपान्तरादेव स्यात् । स्वकारणकलापादुत्पन्नाः सर्वेऽर्था विसदृशप्रत्ययविषयाः स्वभावत एवेत्यभ्युपगमे समानप्रत्ययविषयास्ते तथा किं नाभ्युपगम्यन्ते अलं प्रतीत्यपलापेन ?

१ सामान्यभेदाः । २ नाममात्राः । ३ ते खण्डादिकर्कादयश्च विशेषाश्च तानवगाहन्ते इत्येवंशीलाः । ४ विशेषा एव सन्ति न सामान्यमिति भावः । ५ जैनेनाङ्गीक्रियमाणे सादृश्ये सामान्ये सति । ६ स एवायमात्मादिः पदार्थ इति । ७ आत्मादिमत्त्वेन । ८ भवतां मीमांसकानाम् । ९ खण्डमुण्डयोः शबलधवलयोर्वा । १० सामान्यवद्वतोः । ११ परेणाङ्गीक्रियमाणे । १२ इदं (व्यक्तिः) सामान्यमस्ति । १३ कुन्ताः प्रविशन्ति अश्वा आगच्छन्तीत्यादि[illegible] । १४ व्यक्तिर्यथा सादृश्यपरिणामास्तेन मुण्डेन सदृशः खण्ड इत्यादि । १५ समान इति परिणामेषु । १६ विसदृशपरिणामपक्षेपि । १७ अपरविसदृश । १८ तर्हीति शेषः । १९ विशेषरूपाणाम् । २० स्वात्मनि समानप्रत्ययहेतुत्वप्रसङ्गः । २१ प्रतिनियतशक्तित्वाभावात् । २२ सौगतेन ।

एतेन नित्यं निखिलब्राह्मणव्यक्तिव्यापकं ब्राह्मण्यमपि प्रत्याख्यातम्। न हि तत्तथाभूतं प्रत्यक्षादिप्रमाणतः प्रतीयते। ननु च[1] 'ब्राह्मणोयं ब्राह्मणोयम्' इति प्रत्यक्षत एवास्य प्रतिपत्तिः। न चेदं विपर्ययज्ञानम्; बाधकाभावात्। नापि संशयज्ञानम्; उभयांशा-
५ नवलम्बित्वात्। पित्रादिब्राह्मण्यज्ञानपूर्वकोपदेशसहाया[3] चास्य व्यक्तिर्व्यञ्जिका, तत्रापि तत्सहायेति। न चात्राऽनवस्था; बीजाङ्कुरादिवदनादित्वात्तत्तद्रूपोपदेशपरम्परायाः।

तथानुमानतोपि; तथाहि-ब्राह्मणपदं[5] व्यक्तिव्यतिरिक्तैकनिमित्ताभिधेयसम्बद्धं पदत्वात्पटादिपदवत्। न चायमसिद्धो हेतुः;
१० धर्मिणि विद्यमानत्वात्। नापि विरुद्धः; विपक्षे एवाभावात्। नाप्यनैकान्तिकः; पक्षविपक्षयोरवृत्तेः। नापि दृष्टान्तस्य साध्यवैकल्यम्; पटादौ व्यक्तिव्यतिरिक्तैकनिमित्ताभिधेयसम्बद्धत्वाभावे व्यक्तीनामानन्त्येनाऽनन्तेनापि कालेन सम्बन्धग्रहणाघटनात्। तथा[10], 'वर्णविशेषाध्ययनाचारयज्ञोपवीतादिव्यतिरिक्तनिमित्तनि-
१५ बन्धनं 'ब्राह्मणः इति ज्ञानम्, तन्निमित्तबुद्धिविलक्षणत्वात्, गवाश्वादिज्ञानवत्' इत्यतोपि तत्सिद्धिः। तथा 'ब्राह्मणेन यष्टव्यं ब्राह्मणो भोजयितव्यः' इत्याद्यागमाच्चेति।

अत्रोच्यते। यत्तावदुक्तम्-प्रत्यक्षत एवास्य प्रतिपत्तिः; तत्र किं निर्विकल्पकात्, विकल्पकाद्वा ततस्तत्प्रतिपत्तिः स्यात्? न
२० तावन्निर्विकल्पकात्; तत्र जात्यादिपरामर्शाभावात्, भावे वा सविकल्पकानुषङ्गः। अन्यथा—

"अस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकम्।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्॥ १॥
ततः परं पुनर्वस्तुधर्मैर्जात्यादिभिर्यया।
२५ बुद्ध्यावसीयते सापि प्रत्यक्षत्वेन सम्मता॥ २॥"
[मी० श्लो० प्रत्यक्षसू० ११२,१२०] इति वचो विरुद्ध्येत।

१ विस्फारिताक्षस्य पुरुषस्य पुरो व्यवस्थितेषु क्षत्रियादिपिण्डेषु। २ इति अनुगतैकाकारप्रत्ययतया। ३ पित्रादिब्राह्मण्यज्ञानादस्य पुत्रस्य ब्राह्मण्यमित्युपदेशः। ४ कठकलापादिः। ५ ब्राह्मणोयं ब्राह्मणोयमिति सामान्यस्य वाचकत्वात् ब्राह्मण इति सामान्यपदम्। ६ ब्राह्मण्यं तदेवाभिधेयं तेन सम्बद्धम्। ७ पदत्वस्य। ८ नापि दृष्टान्तस्य साधनवैकल्यं पटादिपदे पदत्वस्य विद्यमानत्वात्। ९ पटत्व। १० द्वितीयमनुमानम्। ११ गौरत्वादि। १२ ब्राह्मण इति ज्ञानस्य। १३ अपुरुषकृतात्। १४ जात्यादिपरामर्शकत्वेपि निर्विकल्पकत्वे। १५ इन्द्रिय। १६ अक्षिविस्फालनानन्तरम्। १७ तज्ज्ञानं वक्तुं न शक्यते यतः; विशेषणविशेष्यरहितं शुद्धं भेदरहितसन्मात्रलक्षणवस्तुतो जातम्। १८ भेदसहितं समन्वितमिति यावत्।

नापि सविकल्पकात्, कठ[1]कलापादिव्यक्तीनां[2] मनुष्यत्वविशिष्टै[3]तयेव ब्राह्मण्यविशिष्टतयापि प्रतिपत्त्यसम्भवात्। पित्रादिब्राह्मण्यज्ञानपूर्वकोपदेशसहाया व्यक्तिर्व्यञ्जिकास्य; इत्यप्यसारम्; यतः पित्रादिब्राह्मण्यज्ञानं प्रमाणम्, अप्रमाणं वा? अप्रमाणं चेत्; कथमतोऽर्थसिद्धिरतिप्रसङ्गात्[4]? प्रमाणं चेत्; किं प्रत्यक्षम्, अनुमानं वा? प्रत्यक्षं चेत्; न; अस्य तद्ग्राहकत्वेन[5] प्रागेव[6] प्रतिषेधात्।

किञ्च, 'ब्राह्मण्यजातेः प्रत्यक्षतासिद्धौ यथोक्तोपदेशस्य प्रत्यक्षहेतुतासिद्धिः, तत्सिद्धौ च तत्प्रत्यक्षतासिद्धिः' इत्यन्योन्याश्रयः। यथा च ब्राह्मण्यजातेः प्रत्यक्षत्वमुपदेशेन व्यवस्थाप्यते[7] तथा ब्रह्माद्यद्वैतप्रत्यक्षत्वमपि, तत्कथमप्रतिपक्षा पक्षसिद्धिर्भवतः[8] स्यात्? अथाद्वैताद्युपदेशस्याध्यक्षबाधितत्वान्न प्रत्यक्षाङ्गत्वम्[9]; तदन्यत्रापि समानम्। ब्राह्मण्यविविक्तपिण्डग्राहिणाध्यक्षेणैव हि तदुपदेशो बाध्यते। अथाऽदृश्या ब्राह्मण्यजातिस्तेनायमदोषः; कथं तर्हि सा 'प्रत्यक्षा' इत्युक्तं शोभते?

किञ्च, औपाधिकोऽयं ब्राह्मणशब्दः[10], तस्य च निमित्तं[11] वाच्यम्। तच्च किं पित्रोरविप्लुतत्वम्[12], ब्रह्मप्रभवत्वं वा? न तावदविप्लुतत्वम्[13]; अनादौ काले तस्याध्यक्षेण ग्रहीतुमशक्यत्वात्, प्रायेण प्रमदानां कामातुरतयेह जन्मन्यपि व्यभिचारोपलम्भाच्च कुतो योनिनिबन्धनो ब्राह्मण्यनिश्चयः? न च विप्लुतेतरपित्रऽपत्येषु वैलक्षण्यं लक्ष्यते। न खलु वडवायां गर्दभाश्वप्रभवापत्येष्विव ब्राह्मण्यां ब्राह्मणशूद्रप्रभवापत्येष्वपि वैलक्षण्यं लक्ष्यते।

क्रियाविलोपात्[14] शूद्रान्नादेश्च जातिलोपः[15][16] स्वयमेवाभ्युपगतः[17]—

"शूद्रान्नाच्छूद्रसम्पर्काच्छूद्रेण सह भाषणात्।
इह जन्मनि शूद्रत्वं मृतः श्वा चाभिजायते॥"

[ ] इत्यभिधानात्।

---

१ कठः स्मरे ऋचां भेदः। २ ब्राह्मणव्यक्तीनाम्। ३ वैधर्म्यदृष्टान्तोयम्। यत्र दृष्टान्तदार्ष्टान्तिकयोरुभयोरस्तित्वं तत्रान्वयदृष्टान्तः। यत्रैकस्यास्तित्वमेकस्य नास्तित्वं तत्र व्यतिरेकदृष्टान्तः। ४ संशयादपि स्वाभिमतार्थसिद्धिप्रसङ्गात्। ५ ब्राह्मण्यजाति। ६ अनन्तरमेव। ७ व्यवस्थाप्यतां शास्त्रोपदेशेन। ८ परपक्षस्यानिराकरणात्। ९ अङ्ग=कारणम्। १० विशेष्यवाच्यस्य विशेषणं (तस्य वाचकत्वात्) वचः (तद्वाचकं) इत्यभिधानात्। ११ प्रवृत्तेरिति शेषः। १२ अभ्रान्तत्वम्। १३ पित्रोः। १४ ब्राह्मण्यस्य। १५ जातेः ब्राह्मण्यस्य। १६ ततो नित्यत्वव्याघातः। १७ मीमांसकेन।

कथं [1]चैवं वादिनो ब्रह्मव्यासविश्वामित्रप्रभृतीनां ब्राह्मण्यसिद्धिस्तेषां त[2]ज्जन्यत्वासंभवात्। तन्न पित्रोरविप्लुतत्वं त[3]न्निमित्तम्।

नापि ब्रह्मप्रभवत्वम्; सर्वेषां तत्प्रभवत्वेन ब्राह्मणशब्दाभिधेयतानुषङ्गात्। 'तन्मुखाज्जातो ब्राह्मणो नान्यः' इत्यपि भेदो
५ ब्रह्मप्रभवत्वे प्रजानां दुर्लभः। न खल्वेकवृक्षप्रभवं फलं मूले मध्ये शाखायां च भिद्यते। ननु नागवल्लीपत्राणां मूलमध्यादिदेशोत्पत्तेः [4]कण्ठभ्रामर्यादिभेदो दृष्ट एवमत्रापि प्रजाभेदः स्यात्; इत्यप्यसत्; यतस्तत्पत्राणां जघन्योत्कृष्टप्रदेशोत्पादात्तत्पत्राणां तद्भेदो युक्तो ब्रह्मणस्तु तद्देशाभावान्न तद्भेदः। तद्देशभावे चास्य जघन्योत्कृष्ट-
१० तादिप्रसङ्गः स्यात्।

किञ्च, ब्रह्मणो ब्राह्मण्यमस्ति वा, न वा? नास्ति चेत्; कथमतो ब्राह्मणोत्पत्तिः? न ह्यमनुष्यादिभ्यो मनुष्याद्युत्पत्तिर्घटते। अस्ति चेत्किं सर्वत्र, मुखप्रदेश एव वा? सर्वत्र इति चेत्; स एव प्रजानां भेदाभावोनुषज्यते। मुखप्रदेश एव चेत्; अन्यत्र प्रदेशे
१५ तस्य शूद्रत्वानुषङ्गः, तथा च न पादादयोस्य वन्द्या वृषलादिवत्, मुखमेव हि विप्रोत्पत्तिस्थानं वन्द्यं स्यात्।

किञ्च, ब्राह्मण एव तन्मुखाज्जायते, तन्मुखादेवासौ जायेत? विकल्पद्वयेप्यन्योन्याश्रयः-सिद्धे हि ब्राह्मणत्वे तस्यैव तन्मुखादेव जन्मसिद्धिः, तत्सिद्धेश्च ब्राह्मणत्वसिद्धिरिति। अथ जात्या
२० ब्राह्मण्यस्य सिद्धिस्तन्मुखादेव तज्जन्मनश्चायमदोषः; न; अस्याः प्रत्यक्षतोऽप्रतीतेः। न खलु खण्डमुण्डादिषु सादृश्यलक्षणगोत्ववद्देवदत्तादौ ब्राह्मण्यजातिः प्रत्यक्षतः प्रतीयते, अन्यथा 'किमयं ब्राह्मणोऽन्यो वा' इति संशयो न स्यात्। तथा च तन्निरासाय गोत्राद्युपदेशो व्यर्थः। न हि 'गौरयं मनुष्यो वा'
२५ इति निश्चयो गोत्राद्युपदेशमपेक्षते।

ननु यथा सुवर्णादिकं परोपदेशसहायात्प्रत्यक्षात्प्रतीयते तथा सापि; इत्यप्ययुक्तम्; यतो न पीततामात्रं सुवर्णमतिप्रसङ्गात्, किन्तु तद्विशेषः, स च नाध्यक्षो दाहच्छेदादिवैयर्थ्यप्रसङ्गात्। तस्यापि सहार्यत्वे तज्ज्ञातौ किञ्चित्तथाविधं सहायं वाच्यम्-तथा-

१ पित्रोरविप्लुतत्वं ब्राह्मणशब्दप्रवृत्तिनिवृत्तिनिमित्तमित्येवं वादिनः। २ अविप्लुतपितृ। ३ ब्राह्मणशब्दप्रवृत्तिनिमित्तम्। ४ मूले उत्पन्नानि पत्राणि कण्ठस्य भ्रमं कुर्वन्ति, मध्ये उत्पन्नानि कण्ठस्य सुस्वरत्वं कुर्वन्तीति भेदः। ५ तत्र ब्राह्मण्याभावात्। ६ सिद्धिरिति सम्बन्धः। ७ रीतिकादेः सुवर्णत्वप्रसङ्गात्। ८ सुवर्णादिज्ञाने। ९ ब्राह्मण्य।

कारविशेषो वा स्यात्, अध्ययनादिकं वा? न तावदाकारविशेषः; तस्याब्राह्मणेपि सम्भवात्। अत एवाध्ययनं क्रियाविशेषो वा तत्सहायतां न प्रतिपद्यते। दृश्यते हि शूद्रोपि स्वजातिविलोपाद्देशान्तरे ब्राह्मणो भूत्वा वेदाध्ययनं तत्प्रणीतां च क्रियां कुर्वाणः। ततो ब्राह्मण्यजातेः प्रत्यक्षतोऽप्रतिभासनात्कथं व्रतबन्धवेदाध्ययनादि विशिष्टव्यक्तावेव सिद्ध्येत्? ५

यदप्युक्तम्-'ब्राह्मणपदम्' इत्याद्यनुमानम्; तत्र व्यक्तिव्यतिरिक्तैकनिमित्ताभिधेयसम्बद्धत्वं तत्पदस्याध्यक्षबाधितम्, कठकलापादिव्यक्तीनां ब्राह्मण्यविविक्तानां प्रत्यक्षतो निश्चयात्, अश्रावणत्वविविक्तशब्दवत्। अप्रसिद्धविशेषणश्च पक्षः; न खलु १० व्यक्तिव्यतिरिक्तैकनिमित्ताभिधेयाभिसम्बद्धत्वं मीमांसकस्यास्माकं वा किंचित्प्रसिद्धम्, व्यक्तिभ्यो व्यतिरिक्ताव्यतिरिक्तस्य सामान्यस्याभ्युपगमात्।

हेतुश्चानैकान्तिकः सत्ताकाशकालपदे अर्हतादिपदे वा व्यक्तिव्यतिरिक्तैकनिमित्ताभिधेयसम्बद्धत्वाभावेपि पदत्वस्य भावात्। १५ तत्रापि तत्सम्बद्धत्वकल्पनायाम् सामान्यवत्त्वेनार्हताश्वविषाणादेर्वस्तुभूतत्वानुपङ्गात् कुतोऽप्रतिपक्षा पक्षसिद्धिः स्यात्? सत्तायाश्च सामान्यवत्त्वप्रसङ्गः, गगनादीनां चैकव्यक्तिकत्वात्कथं सामान्यसम्भवः? दृष्टान्तश्च साध्यविकलः; पटादिपदे व्यक्तिव्यतिरिक्तैकनिमित्तत्वासिद्धेः। २०

एतेन वर्णविशेषेत्याद्यनुमानं प्रत्युक्तम्। नगरादौ च व्यक्तिव्यतिरिक्तैकनिमित्तनिबन्धनाभावेपि तथाभूतज्ञानस्योपलम्भादनेकान्तः। न खलु नगरादिज्ञाने व्यतिरिक्तमनुवृत्तप्रत्ययनिबन्धनं किञ्चिदस्ति, काष्ठादीनामेव प्रत्यासत्तिविशिष्टत्वेन प्रासा-

१ ब्राह्मणे। २ ब्राह्मण्य। ३ साध्यधर्मः। ४ अश्रावणत्वविविक्तशब्दस्याध्यक्षतो निश्चयात्तथाऽश्रावणः शब्द इति पक्षः प्रत्यक्षबाधितस्तथेत्यर्थः। ५ दृष्टान्ते। ६ निश्चयज्ञानजनकत्वे भिन्नं व्यक्तिभ्यः, पृथक्कर्तुमशक्यत्वादभिन्नं सामान्यमिति। ७ मीमांसकैर्जैनैश्च। ८ पदत्वादिति। ९ आदिना अश्वविषाणादिपदे। १० साध्याभावे। ११ हेतोः। १२ इदमेव विवृणोति। १३ घटादिवत्। १४ अर्थस्य। १५ परमते। १६ एषां भेदा उपचरिता इत्यर्थः। १७ नैकव्यक्तिकं सामान्यमिति वचनात्। १८ गगनत्वादि। १९ इति साध्याभावो दर्शितः। २० पटादिपदवदिति। २१ नित्यसर्वगतादिरूपसामान्य। २२ पदत्वानुमाननिराकरणेन। २३ पदे। २४ साध्याभावे। २५ वर्णविशेषादिनिमित्तबुद्धिवैलक्षण्यस्योपलम्भात्। २६ नगरमिति ज्ञानोपलम्भात्। २७ व्यक्तेः सकाशात्।

दादिव्यवहारनिबन्धनानां नगरादिव्यवहारनिबन्धनत्वोपपत्तेः, अन्यथा 'षण्णगरी' इत्यादिष्वपि वस्त्वन्तर[1]कल्पनानुषङ्गः।

'ब्राह्मणेन यष्टव्यम्' इत्याद्यागमोपि नात्र[2] प्रमाणम्; प्रत्यक्षबाधितार्था[3]भिधायित्वात् तृणाग्रे हस्तियूथशतमास्ते इत्यागमवत्।

५ ननु ब्राह्मण्यादिजातिविलोपे कथं वर्णाश्रमव्यवस्था[4] तन्निबन्धनो वा तपोदानादिव्यवहारो जैनानां घटेत? इत्यप्यसमीचीनम्; क्रियाविशेषयज्ञोपवीतादिचिन्होपलक्षिते व्यक्तिविशेषे[6] तद्व्यवस्थायास्तद्व्यवहारस्य चोपपत्तेः। कथमन्यथा परशुरामेण निःक्षत्रीकृत्य ब्राह्मणदत्तायां पृथिव्यां क्षत्रियसम्भवः[7]? यथा चानेन निःक्ष-

१० त्रीकृतासौ तथा केनचिन्निर्ब्राह्मणीकृतापि सम्भाव्येत[8]। ततः क्रियाविशेषादिनिबन्धन[10] एवायं ब्राह्मणादिव्यवहारः।

एतेना[11]विगान[12]तस्त्रैवर्णिकोपदेशोऽत्र[13] वस्तुनि[14] प्रमाणमिति प्रत्युक्तम्; तस्याप्यव्यभिचारित्वाभावात्। दृश्यन्ते हि बहवस्त्रैवर्णि[15]कैरविगानेन ब्राह्मणत्वेन व्यवह्रियमाणा विपर्यय[16]भाजः। न च

१५ परपरिकल्पितायां जातौ प्रमाणमस्ति यतोऽस्याः सद्भावः स्यात्।

सद्भावे वा वेश्यापाट[17]कादिप्रविष्टानां ब्राह्मणीनां ब्राह्मण्याभावो निन्दा च न स्यात् जातिर्यतः पवित्रताहेतुः, सा च भवन्मते तदवस्थैव, अन्यथा गोत्वादपि ब्राह्मण्यं निकृष्टं स्यात्। गवादीनां हि चाण्डालादिगृहे चिरोषितानामपीष्टं शिष्टैरादानम्, न तु

२० ब्राह्मण्यादीनाम्। अथ क्रियाभ्रंशात्तत्र ब्राह्मण्यादीनां निन्द्यता; न; तज्जात्युपलम्भे तद्विशिष्टवस्तुव्यवसाये च पूर्ववत्[21]क्रियाभ्रंशस्याप्यऽसम्भवात्। ब्राह्मणत्वजातिविशिष्टव्यक्तिव्यवसायो ह्यप्रवृत्ताया अपि क्रियायाः प्रवृत्तिनिमित्तम्, स च तदवस्थ एव[22]

१ नगरपङ्क्तिव्यतिरिक्तं षण्णगरीशब्दवाच्यवस्त्वन्तरम्। २ ब्राह्मण्ये। ३ ब्राह्मण्य। ४ ब्रह्मचारी गृहीत्यादिः। ५ वर्णाश्रमाणां तदधीनत्वात् न तु शूद्रजात्यधीनत्वम्। ६ ब्राह्मणादौ। ७ अतो ज्ञायते क्रियाविशेषादिकं चिह्नं दृष्ट्वैव पुरुषेषु क्षत्रियव्यवहारः कृतः। ८ रावणेन। ९ पुनर्ब्राह्मणीति व्यवहारः क्रियादिविशेषचिह्नं दृष्ट्वैव कृतोस्तीति ज्ञायते। १० क्षत्रियब्राह्मणयोर्निराकरणे पुनर्व्यवस्थापने च क्रियादिविशेष एव निबन्धनमित्यर्थः। ११ आगमनिराकरणपरेण। १२ अविवादतः। १३ यत्र ब्राह्मण्यजातिस्तत्र त्रैवर्णिकोपदेश इति। १४ ब्राह्मण्ये। १५ त्रैवर्णिकशास्त्रोपदेशैः। १६ शूद्राः। १७ गृहप्रासादशालादिस्थानभेदे पाटकशब्दः। १८ इयं ब्राह्मणीति। १९ वेश्यागृहादिप्रवेशात्पूर्ववत्। २० वेश्यादिगृहे। २१ नमस्कारादेः। २२ वेश्यादिगृहादौ।

भवदभ्युपगमेन । क्रियाभ्रंशे तज्जातिनिवृत्तौ च व्रात्येऽन्यस्या निवृत्तिः स्यात्तद्भ्रंशाविशेषात् ।

किञ्च, क्रियानिवृत्तौ तज्जातेर्निवृत्तिः स्याद् यदि क्रिया तस्याः कारणं व्यापिका वा स्यात्, नान्यथातिप्रसङ्गात् । न चास्याः कारणं व्यापकं वा किञ्चिदिष्टम् । न च क्रियाभ्रंशे जातेर्विकारोस्ति; [1] "भिन्नेष्वभिन्ना नित्या निरवयवा च जातिः ।" [ ] इत्यभिधानात् । न चाविकृताया निवृत्तिः सम्भवत्यतिप्रसङ्गात् ।

किञ्चेदं ब्राह्मणत्वं जीवस्य, शरीरस्य, उभयस्य वा स्यात्, संस्कारस्य वा, वेदाध्ययनस्य वा गत्यन्तरासम्भवात्? न तावज्जीवस्य; क्षत्रियविट्शूद्रादीनामपि ब्राह्मण्यस्य प्रसङ्गात्, तेषामपि जीवस्य विद्यमानत्वात् ।

नापि शरीरस्य; अस्य पञ्चभूतात्मकस्यापि घटादिवद् ब्राह्मण्यासम्भवात् । न खलु भूतानां व्यस्तानां समस्तानां वा तत्सम्भवति । व्यस्तानां तत्सम्भवे क्षितिजलपवनहुताशनाकाशानामपि प्रत्येकं ब्राह्मण्यप्रसङ्गः । समस्तानां च तेषां तत्सम्भवे घटादीनामपि तत्सम्भवः स्यात्, तत्र तेषां सामस्त्यसम्भवात् । नाप्युभयस्य; उभयदोषानुषङ्गात् ।

नापि संस्कारस्य; अस्य शूद्रबालके कर्तुं शक्तितस्तत्रापि तत्प्रसङ्गात् ।

किञ्च, संस्कारात्प्राग्ब्राह्मणबालस्य तदस्ति वा, न वा? यद्यस्ति; संस्कारकरणं वृथा । अथ नास्ति; तथापि तद्वृथा । अब्राह्मणस्याप्यतो ब्राह्मण्यसम्भवे शूद्रबालकस्यापि तत्सम्भवः केन वार्येत?

नापि वेदाध्ययनस्य; शूद्रेपि तत्सम्भवात् । शूद्रोपि हि कश्चिद्देशान्तरं गत्वा वेदं पठति पाठयति वा । न तावतास्य ब्राह्मणत्वं भवद्भिरभ्युपगम्यत इति । ततः सदृशक्रियापरिणामादिनिबन्धनैवेयं ब्राह्मणक्षत्रियादिव्यवस्था इति सिद्धं सर्वत्र सदृशपरिणामलक्षणं समानप्रत्ययहेतुस्तिर्यक्सामान्यमिति ।

किं पुनरूर्ध्वतासामान्यमित्याह—

१ नित्यत्वादिरूपाया जातेः ततो नास्ति क्रियाभ्रंश इत्यर्थः । २ कदाचिन्नमस्कारहीनेपि । ३ अग्निनिवृत्तौ धूमनिवृत्तिरतोऽग्निः कारणं धूमस्य तद्वत् । ४ वृक्षनिवृत्तौ शिंशपात्वनिवृत्तिरतो वृक्षः शिंशपाया व्यापकस्तद्वत् । ५ घटनिवृत्तौ पटनिवृत्तिः स्यात् । ६ क्रिया—सन्ध्यावन्दनादिः । ७ नाशरूपः । ८ आत्माकाशादेरपि निवृत्तिः स्यादिति । ९ वेदाध्ययनमात्रेण ।

परापरविवर्त्तव्यापिद्रव्यमूर्द्धता मृदिव स्थासादिषु ॥ ६ ॥

सामान्यमित्यभिसम्बन्धः । तदेवोदाहरणद्वारेण स्पष्टयति- मृदिव स्थासादिषु ।

५ ननु पूर्वोत्तरविवर्त्तव्यतिरेकेणापरस्य तद्व्यापिनो द्रव्यस्याप्रतीतितोऽसत्त्वात्कथं तल्लक्षणमूर्द्धतासामान्यं सत्; इत्यप्यसमीचीनम्; प्रत्यक्षत एवार्थानामन्वयिरूपप्रतीतेः प्रतिक्षणविशरारुतया स्वप्नेपि तत्र तेषां प्रतीत्यभावात् । यथैव पूर्वोत्तरविवर्त्तयोर्व्यावृत्तप्रत्ययादन्योन्यमभावः प्रतीतेस्तथा मृदाद्यनुवृत्तप्रत्ययात्स्थि- १० तिरपि ।

ननु कालत्रयानुयायित्वमेकस्य स्थितिः, तस्याश्चाऽक्रमेण प्रतीतौ युगपन्मरणावधि ग्रहणम्, क्रमेण प्रतीतौ न क्षणिका बुद्धिस्तथा तां प्रत्येतुं समर्था क्षणिकत्वात्; इत्यप्ययुक्तम्; बुद्धेः क्षणिकत्वेपि प्रतिपत्तुरक्षणिकत्वात् । प्रत्यक्षादिसहायो ह्यात्मैवोत्पादव्ययध्रौ- १५ व्यात्मकत्वं भावानां प्रतिपद्यते । यथैव हि घटकपालयोर्विनाशोत्पादौ प्रत्यक्षसहायोसौ प्रतिपद्यते तथा मृदादिरूपतया स्थितिमपि । न खलु घटादिसुखादीनां भेद एवावभासते न त्वेकत्वमित्यभिधातुं युक्तम्; क्षणक्षयानुमानोपन्यासस्यानर्थक्यप्रसङ्गात् । स ह्येकत्वप्रतीतिनिरासार्थो न क्षणक्षयप्रतिपत्त्यर्थः, तस्य प्रत्यक्षे- २० णैव प्रतीत्यभ्युपगमात् ।

---

१ पूर्वापरकालवर्त्ति त्रिकालानुयायीत्यर्थः । २ पर्यायरूपविशेषव्यापित्वाद्द्रव्यस्तिनिष्ठत्वमूर्द्धतासामान्यं सिद्धम् । ३ विवर्त्तेषु । ४ तदेव जैनैरुपादानकारणं प्रोक्तं नैयायिकादिभिश्च समवायिकारणमुक्तमित्यर्थः । ५ सौगतः । ६ विद्यमानम् । ७ सर्वविवर्त्तानुगामी=अन्वयी । ८ न केवलं जाग्रदवस्थायाम् । ९ पूर्वविवर्त्तादुत्तरविवर्त्तो व्यावृत्तः । १० भेदः । ११ बौद्धेनो । १२ इदं मृद्द्रव्यमिदं मृद्द्रव्यमिति । १३ द्रव्यरूपपदार्थस्य । १४ सत्याम् । १५ यथा भवति तथा । १६ ज्ञान स्याद्वात्मद्रव्यादेः । १७ आत्मनः । १८ अक्षणिक आत्मा स चेत्तदैव कथं न जानातीत्युक्ते आह । १९ आदिपदेन प्रत्यभिज्ञानादि । २० मृदादिपदार्थानाम् । २१ बाह्यपदार्थे । २२ आभ्यन्तरीयपदार्थे । २३ आदिना आत्मादीनाम् । २४ घटात्कपालं भिन्नं कपालाद्घटो भिन्न इति भेदः परस्परं तथा सुखदुःखादेरात्मा भिन्नस्तस्मात्सुखादि भिन्नमिति भेदः परस्परम् । २५ अभिधीयते सौगतेन । २६ सर्वथा नास्तिरूपस्य निषेधो न घटते गगनकुसुमवत् । २७ सौगतेन ।

न[1] चानन्तरातीतानागत[2]क्षणयोः प्रत्यक्षस्य प्रवृत्तौ स्मरण-प्रत्यभिज्ञानुमानानां वैफल्यम्; तत्र तेषां साफल्यानभ्युपगमात्[3], अतिव्यवहिते तदङ्गी[4]करणात्। न चाक्षणिकस्यात्मनोऽर्थग्राहक[5]त्वे स्वगतबालवृद्धाद्यवस्था[6]नामतीतानागतजन्मपरम्परायाः सकल-भावपर्यायाणां चै[7]कदैवोपलम्भ[8]प्रसङ्गः; ज्ञानसहायस्यैवार्थग्राह-कत्वाभ्युपगमात्, तस्य[9] च प्रतिबन्ध[10]कक्षयोपशमाऽनतिक्रमेण प्रादुर्भावान्नोक्त[11]दोषानुषङ्गः।

न च द्रव्यग्रहणेऽतीताद्यवस्थानां ततोऽभिन्नत्वाद्ग्रहणप्रसङ्गः; अभिन्नत्वस्य[12] ग्रहणं[13] प्रत्यनङ्गत्वात्[14], अन्यथा ज्ञानादिक्षणानुभवे[15] सच्चेतनादिवत् क्षणक्षयस्वर्गप्रापणशक्त्याद्यनुभवानुषङ्गः[16]। तस्मा-द्यत्रैवास्य ज्ञानपर्यायप्रतिबन्धापायस्तत्रैव ग्राहकत्वनियमो नान्य-त्रेत्यनवद्यम्—'आत्मा प्रत्यक्षसहायोऽनन्तरातीतानागत[17]पर्याययोरे-कत्वं[18] प्रतिपद्यते' इति, स्मरणप्रत्यभिज्ञानसहायश्चातिव्यवहित-पर्यायेष्वपि[19]। तयोश्च[20] प्रामाण्यं प्रागेव प्रसाधितम्।

ननु स्मरणप्रत्यभिज्ञानयोः पूर्वोप[21]लब्धार्थविषयत्वे[22] तद्दर्शनकाल[23] एवोत्पत्तिप्रसङ्गः, तद्दर्शनवत्तद्विषयत्वेनानयोरप्यविकलकारण-त्वात्, न चैवम्, तस्मान्न ते तद्विषये[24]। प्रयोगः—यस्मिन्नविकलेपि यन्न भवति न तत्तद्विषयम् यथा रूपेऽविकले तत्राभवच्छ्रोत्र-विज्ञानम्, न भवतोऽविकलेपि च पूर्वोपलब्धार्थे स्मृतिप्रत्यभि-ज्ञाने इति; तदप्यपेशलम्; तद्दर्शनकाले तयोः कारणाभावे-नाऽप्रादुर्भावात्[25]। न ह्यर्थस्तयोः कारणम्; ज्ञानं प्रति कारणत्व-स्यार्थे[26] प्रागेव प्रतिषेधात्। स्मरणं[27] हि संस्कारप्रबोधकारणम्,

१ प्रत्यक्षादिसहाय इत्यत्रादिग्रहणं निरर्थकमित्युक्ते आह। २ घटकपाललक्षणयोः। ३ जैनेन। ४ नित्य आत्मातीतानागतपर्यायानेकदैव ग्रहीष्यतीत्युक्ते आह। ५ अङ्गी-क्रियमाणे जैनैः। ६ स्वतोऽभिन्नानां पर्यायाणाम्। ७ जैनैः। ८ ज्ञानेन युगपद्ग्रही-ष्यतीत्युक्ते आह। ९ ज्ञानस्य। १० प्रतिबन्धकं कर्म। ११ युगपन्मरणावधि-ग्रहणलक्षण। १२ ज्ञानम्। १३ अकारणत्वात्। १४ संसारिणः। १५ पदार्थ। १६ तव सौगतस्य। ज्ञानादिलक्षणादभिन्नसद्भावात्। १७ घटकपाललक्षणयोः। १८ एकत्वं प्रतिपद्यते। १९ स्मृतिप्रत्यभिज्ञानयोः प्रामाण्यं न विद्यते, तत्सहाय आत्मातिव्यवहितपर्यायेषु कथमेकत्वं जानीयादित्युक्ते सत्याह। २० तृतीयाध्याये। २१ प्रत्यक्षेण। २२ स उपलब्धोर्थो विषयो ययोस्ते तत्त्वे। २३ प्रत्यक्ष। २४ स उपलब्धार्थो विषयो ययोस्ते। २५ अनुत्पाद्यमानत्वात्। २६ नार्थालोकौ कारणं परिच्छेद्यत्वात्तमोवदित्यत्र द्वितीयपरिच्छेदे। २७ तर्हि स्मरणप्रत्यभिज्ञानयोः कारणं किमित्युक्ते आह।

संस्कारश्च कालान्तराविस्मरणकारणलक्षणधारणारूपः, तद्दर्शनकाले नास्तीति कथं तदैवास्योत्पत्तिः प्रत्यभिज्ञानस्य वा? तदुत्पत्तौ हि दर्शनं पूर्वदर्शनाहितसंस्कारप्रबोधप्रभवस्मृतिसहायं प्रवर्त्तते, तच्च प्राङ्नास्तीति कथं तदैव तदुत्पत्तिः?

५ अथ मतम्-आत्मनः केवलस्यैवातीताद्यर्थग्रहणसामर्थ्ये स्मरणाद्यपेक्षावैयर्थ्यम्, तदसामर्थ्ये वा नितरां तद्वैयर्थ्यम्, न खलु केवलं चक्षुर्विज्ञानं गन्धग्रहणेऽसमर्थं सत्तत्स्मृतिसहायं समर्थं दृष्टमिति; तदप्यसङ्गतम्; यतः स्मरणादिरूपतया परिणतिरेवात्मनोऽतीताद्यर्थग्रहणसामर्थ्यम्, तत्कथं तदपेक्षावैयर्थ्यम्? चक्षु-
१० र्विज्ञानस्य तु गन्धग्रहणपरिणामस्यैवाभावान्न तत्स्मृतिसहायस्यापि गन्धग्रहणे सामर्थ्यमिति युक्तमुत्पश्यामः।

ततो निराकृतमेतत्-'पूर्वोत्तरक्षणयोरग्रहणे कथं तत्र स्थास्नुताप्रतीतिः' इति; आत्मना तयोर्ग्रहणसम्भवात्। भवतां तु तयोरप्रतीतौ कथं मध्यक्षणस्य तत्राऽस्थास्नुताप्रतीतिरिति चिन्त्यताम्?
१५ पूर्वदर्शनाहितसंस्कारस्य मध्यक्षणदर्शनात्तत्क्षणस्मृतिस्तस्याश्च 'स इह नास्ति' इत्यस्थास्नुतावगमे स्थास्नुतावगमोप्येवं किन्न स्यात्?

ननु चास्थास्नुता पूर्वोत्तरयोर्मध्येऽभावः तस्य वा तत्र, स च तदात्मकत्वात्तद्ग्रहणेनैव गृह्यते; तदप्यसारम्; तदप्रतीतौ तत्रास्य
२० अत्र वा तयोर्निषेधस्याप्यसम्भवात्। न ह्यप्रतिपन्नघटस्य 'अत्र घटो नास्ति' इति प्रतीतिरस्ति। कथं चैवं स्थास्नुता न प्रतीयेत? सापि हि पूर्वोत्तरयोर्मध्ये कथञ्चित्सद्भावस्तस्य वा तत्र, स च तदात्मकत्वात्तद्ग्रहणेनैव गृह्यत।

ननु स्थास्नुतार्थानां नित्यतोच्यते, सा च त्रिकालापेक्षा, तद-
२५ प्रतिपत्तौ च कथं तदपेक्षनित्यताप्रतिपत्तिः? तदसाम्प्रतम्; वस्तुस्वभावभूतत्वेनान्यानपेक्षत्वान्नित्यतायाः, तथाभूतायाश्चास्याः प्रत्यक्षादिप्रमाणप्रसिद्धत्वेन प्रतीतेः प्रतिपादनात्। न खलु स्वयं नित्यतारहितस्य त्रिकालेनास्मा क्रियतेऽनित्यतावत्। न हि वर्त-

१ कारणम्। २ द्वितीयत। ३ तस्य प्रत्यक्षादिसहायरहितस्य। ४ क्षणिकबुद्ध्या। ५ अक्षणिकेन। ६ अयं मध्यक्षणस्तत्र नाभून्न भविष्यतीति प्रतीतिः। ७ परेण। ८ क्षण। ९ दर्शनम्=अनुभवः। १० सकाशात्। ११ पूर्वदर्शनाहितसंस्कारस्य मध्यक्षणदर्शनात्तत्क्षणस्मृतिः, तस्याश्च स इह द्रव्यरूपेणास्तीति। १२ क्षणयोः। १३ क्षणे। १४ अभावः। १५ पूर्वोत्तरक्षणयोरभावात्मकत्वान्मध्यक्षणस्य। १६ द्रव्यरूपेण। १७ द्रव्यरूपेण। १८ द्रव्यरूपेण मध्यक्षणस्य। १९ अग्रे। २० पदार्थस्य।

मानकालेनानित्यता क्रियते तस्या[1]ऽसत्त्वात्, सत्त्वे वा तदनित्यत्वस्या[2]प्यपरेण[3] करणेऽनवस्थाप्रसङ्गः। ततो यथा स्वभावतः पूर्वोत्तरकोटिविच्छिन्नः क्षणो जातः क्षणिको विधीयते कालनिरपेक्षश्च प्रतीयते तथाऽक्षणिकत्व[4]मपि।

ननु चाक्षणिकत्वम् अर्थानामतीतानागतकालसम्बन्धित्वेनातीतानागतत्वम्। न च कालस्यातीतानागतत्वं सिद्धम्; तद्धि किमपरातीतादिकालसम्बन्धात्, तथाभूतपदार्थक्रियासम्बन्धाद्वा स्यात्, स्वतो वा? प्रथमपक्षे[5]ऽनवस्था। ५

द्वितीयपक्षेऽपि पदार्थक्रियाणां कुतोऽतीतानागतत्वम्? अपरातीतानागतपदार्थक्रियासम्बन्धाच्चेत्; अनवस्था। अतीतानागतकालसम्बन्धाच्चेत्; अन्योन्याश्रयः[6]। स्वतः कालस्यातीतानागतत्वे अर्थानामपि स्वत एवातीतानागतत्वमस्तु किमतीतानागतकालसम्बन्धित्वकल्पनया? इत्यप्यसमीक्षिताभिधानम्; स्वरूपत एवातीतादिसमयस्यातीतादित्वप्रसिद्धेः। अनुभूतवर्त्तमानत्वो[7] हि समयोऽतीतः, अनुभविष्यद्वर्त्तमानत्वश्चानागतः, तत्सम्बन्धित्वाच्चार्थानामतीतानागतत्वम्। न च कालवदर्थानामपि स्वरूपेणैवातीतानागतत्वं युक्तम्; न ह्येकस्य धर्मोऽन्यत्राप्यास[11]ञ्जयितुं युक्तः, अन्यथा निम्बादेस्तिक्तताादिधर्मो गुडादेरपि स्यात्, ज्ञानधर्मो वा स्वपरप्रकाशकत्वं घटादेरपि स्यात्, तद्धर्मो वा जडता ज्ञानस्यापि स्यात्। १० १५ २०

ननु चानुवृत्ताकारप्रत्ययोपलम्भादक्षणिकत्वधर्मोऽर्थानां साध्यते, स च बाध्यमानत्वादसत्यः; तदप्यसमीक्षितम्; यतोऽस्य बाधको विशेषप्रतिभास एव, स चानुपपन्नः। तथाहि-अनुवृत्ताकारे प्रतिपन्ने, अप्रतिपन्ने वासौ तद्बाधको भवेत्? यदि प्रतिपन्ने; तदा किमनुवृत्तप्रतिभासात्मको विशेषप्रतिभासः, तद्व्यतिरिक्तो वा? प्रथमपक्षेऽनुवृत्तप्रतिभासस्य मिथ्यात्वे विशेषप्रतिभासस्यापि तदात्मकत्वात्तत्प्रसक्तेः कथमसौ[12][13] तद्बाधकः? द्वितीयपक्षे[14]ऽप्यनुवृत्ताकारप्रतिभासमन्तरेण स्थासकोशादिप्रतिभासस्य तद्व्यतिरिक्तस्यासंवेदनात्तद्बाधकत्वायोगात्। अनुवृत्ताकाराप्रतिपत्तौ च विशेषप्रतिभासस्यैवासम्भवात्कथं तद्बाधकता? २५ ३०

१ सौगताभ्युपगमरीत्या। २ कालस्य। ३ कालेन। ४ कालान्तरपेक्षम्। ५ अपरस्यापरस्मात्सिद्धावन्योन्याश्रयप्रसङ्गात्। ६ कालस्यातीताऽनागतत्वे सिद्धे सति पदार्थक्रियाणामतीतानागतत्वसिद्धिस्तत्सिद्धौ च तत्सिद्धिरिति। ७ द्रव्यरूपेण पुरुषेण। ८ भण्यते। ९ समयः। १० अतीतानागतकाल। ११ संयोजयितुम्। १२ बाधकत्वेनेति शेषः। १३ मिथ्यारूपः। १४ द्वितीयविकल्पोऽयम्।

किञ्च, विपरीतार्थव्यवस्थापकं प्रमाणं बाधकमुच्यते। प्रतिक्षणविनाशिपदार्थव्यवस्थापकत्वेन च प्रत्यक्षम्, अनुमानं वा प्रवर्त्ततान्यस्य प्रमाणत्वेन सौगतैरनभ्युपगमात्? तत्र न तावत्प्रत्यक्षं तद्व्यवस्थापकम्; तत्र तथार्थानामप्रतिभासनात्। न हि ५ प्रतिक्षणं त्रुट्यद्रूपतां बिभ्राणास्तत्रार्थाः प्रतिभासन्ते, स्थिरस्थूलसाधारणरूपतयैव तत्र तेषां प्रतिभासनात्। न चान्यादृग्भूतः प्रतिभासोऽन्यादृग्भूतार्थव्यवस्थापकोऽतिप्रसङ्गात्।

न च तत्र तथा तेषां प्रतिभासेपि सदृशापरापरोत्पत्तिविप्रलम्भाद्यथानुभवं व्यवसायानुपपत्तेः स्थिरस्थूलादिरूपतया व्यव- १० सायः; इत्यभिधातव्यम्; अनुपहतेन्द्रियस्यान्यादृग्भूतार्थनिश्चयोत्पत्तिकल्पनायां प्रतिनियतार्थव्यवस्थित्यभावानुषङ्गात्। नीलानुभवेपि पीतादिनिश्चयोत्पत्तिकल्पनाप्रसङ्गात्। तथा च "यत्रैव जनयेदेनां तत्रैवास्य प्रमाणता" [ ] इत्यस्य विरोधः। ततो यथाविधार्थाध्यवसायी विकल्पस्तथाविधार्थस्यैवानुभवो १५ ग्राहकोभ्युपगन्तव्यः। न चार्थस्य प्रति[क्षण]विनाशित्वात्तत्सामर्थ्यबलोद्भूतेनाध्यक्षेणापि तद्रूपमेवानुकरणीयमिति वाच्यम्; इतरेतराश्रयानुषङ्गात्-सिद्धे हि क्षणक्षयित्वेऽर्थानां तत्सामर्थ्याविनाभाविनोध्यक्षस्य तद्रूपानुकरणं सिद्ध्यति, तत्सिद्धौ च क्षणक्षयित्वं तेषां सिध्यतीति।

२० नाप्यनुमानं तद्ग्राहकम्; तत्र प्रत्यक्षाप्रवृत्तावनुमानस्याप्रवृत्तेः। तथा हि-अध्यक्षाधिगतमविनाभावमाश्रित्य पक्षधर्मतावगमबलादनुमानमुदयमासादयति। प्रत्यक्षाविषये तु स्वर्गादाविवानुमानस्याप्रवृत्तिरेव।

किञ्च, अत्र स्वभावहेतोः, कार्यहेतोर्वा व्यापारः स्यात्? न २५ तावत्स्वभावहेतोः; क्षणिकस्वभावतया कस्यचिदर्थस्वभावस्यानिश्चयात्, क्षणिकत्वस्याध्यक्षागोचरत्वात्। अध्यक्षगोचरे एव ह्यर्थे स्वभावहेतोर्व्यवहृतिप्रवर्तनफलत्वम्, यथा विशददर्शनावभासिनि तरौ वृक्षत्वव्यवहारप्रवर्त्तनफलत्वं शिंशपायाः।

---

१ आगमादेः। २ विनश्यद्रूपताम्। ३ पटज्ञानं घटव्यवस्थापकं स्यात्। ४ क्षणिकोयं क्षणिकोयमिति। ५ जायते। ६ निर्विकल्पकप्रत्यक्षं कर्तृ। ७ सविकल्पकां बुद्धिम्। ८ निर्विकल्पकस्य। ९ अतिप्रसङ्गो यतः। १० तस्य विनाश्यर्थस्य। ११ तस्य प्रतिक्षणं विनाश्यर्थस्य। १२ तथा च सति तथाविधार्थस्यैवानुभवो ग्राहको भविष्यतीत्यर्थः। १३ क्षणिकेर्थे। १४ दृष्टान्तधर्मिणि। १५ विनाशिपदार्थेन सह। १६ सत्त्वादिति। १७ दृष्टम्। १८ अयं वृक्षः शिंशपात्वादिति।

अथोच्यते[1]-'यो यद्भावं प्रत्यन्यानपेक्षः स तत्स्वभावनियतः यथाऽन्त्या कारणसामग्री स्वकार्योत्पादने, विनाशं प्रत्यन्यानपेक्षाश्च भावाः' इति; तदप्युक्तिमात्रम्; हेतोरसिद्धेः। न खलु मुद्गराद्यनपेक्षा घटादयो भावाः प्रमाणतो विनाशमनुभवन्तोनुभूयन्ते प्रतीतिविरोधात्।

किञ्च, अत्रान्यानपेक्षत्वमात्रं हेतुः, तत्स्वभावत्वे सत्यन्यानपेक्षत्वं वा? प्रथमपक्षे यवबीजादिभिरनेकान्तो[2] हेतोः, शाल्यङ्कुरोत्पादनसामग्रीसन्निधानावस्थायां तदुत्पादनेऽन्यानपेक्षाणामप्येषां तद्भावनियमाभावात्। द्वितीयपक्षे तु विशेष्यासिद्धो हेतुः[3]; तत्स्वभावत्वे सत्यप्यन्यानपेक्षत्वासिद्धेः। न ह्यन्त्या कारणसामग्री स्वकार्योत्पादनस्वभावापि द्वितीयक्षणानपेक्षा तदुत्पादयति, दहनस्वभावो वा वह्निः करतलादिसंयोगानपेक्षो दाहं विदधाति। भागे विशेषणासिद्धं च तत्स्वभावत्वे सत्यन्यानपेक्षत्वम्; शृङ्गोत्थशरादीनां क्षणिकस्वभावाभावात्।

किञ्च, यदि नामाऽहेतुको विनाशस्तथापि यदैव मुद्गरादिव्यापारानन्तरमुपलभ्यते तदैवासावभ्युपगमनीयो नोदयानन्तरम्, कस्यचित्तदा तदुपलम्भाभावात्। न च मुद्गरादिव्यापारानन्तरमस्योपलम्भात्प्रागपि सद्भावः कल्पनीयः; प्रथमक्षणे तस्यानुपलम्भान्मुद्गरादिव्यापारानन्तरमप्यभावानुषङ्गात्। न चान्ते क्षयोपलम्भादादावप्यसावभ्युपगन्तव्यः; सन्तानेनानेकान्तात्।

किञ्च, उदयानन्तरध्वंसित्वं भावानाम् भिन्नाभिन्नविकल्पाभ्यामन्येन ध्वंसस्यासम्भवादवमीयते, प्रमाणान्तराद्वा? तत्रोत्तरविकल्पोऽयुक्तः; प्रत्यक्षादेरुदयानन्तरध्वंसित्वेनार्थग्राहकत्वाप्रतीतेः। प्रथमविकल्पे तु भिन्नाभिन्नविकल्पाभ्यां मुद्गराद्यनपेक्षत्वमेवास्य

---

१ 'भावा धर्मिणः, विनाशस्वभावनियता इति साध्यधर्मः, विनाशं प्रत्यन्यानपेक्षत्वादिति हेतुः' इत्युपरितः। २ साध्याभावे प्रवर्त्तमानत्वात्। ३ विनाशहेतुः। ४ बौद्धमतेऽपि एकस्मिन्क्षणे कारणं कार्यं न करोति यतः। ५ सर्वे भावा विनाशस्वभावनियता इति पक्षस्यैकदेशे भागासिद्धो हेतुरित्यर्थः। ६ महिषमृगादिशृङ्गेऽन्यनिरपेक्षतयोत्थशरीरादीनाम्। ७ एकस्मिन्क्षणे पदार्थ उत्पन्नः द्वितीयक्षणे मुद्गरादिव्यापारमन्तरेण विनश्यतीति नाभ्युपगमनीयं त्वया सौगतेन। ८ तस्य विनाशस्य। ९ मुद्गरादिव्यापारानन्तरं विनाशोस्ति मुद्गरादिव्यापारात्पूर्वं (उत्पत्तिक्षणाद् द्वितीयक्षणे) मपि विनाशोस्तीत्युक्ते आह। १० विनाशस्य। ११ मुद्गरादिव्यापारात्पूर्वक्षणे। १२ मुद्गरादिव्यापारस्यान्ते। १३ मुद्गरादिव्यापारात्पूर्वम्। १४ निर्वाणस्यान्ते उत्तरक्षणोत्पत्तेः क्षयोस्ति, नादौ। १५ यद्यदन्ते क्षयि तत्तदादौ क्षयीति। १६ मुद्गरादिना। १७ स्थितिपक्षे उत्पादपक्षे चाग्रे यदुक्तमस्ति तत्सर्वमत्र द्रष्टव्यम्।

स्यात् न तू[1]दयानन्तरं[2] भावः। न खलु निर्हेतुकस्याश्वविषाणादेः [3]पदार्थोदयानन्तरमेव भावितोपलब्धा।

अथाहेतुकत्वेन ध्वंसस्य सदा सम्भवात्कालाद्यनपेक्षातः[4] पदार्थोदयानन्तरमेव भावः; नन्वेवमहेतुकत्वेन सर्वदा भावात्प्रथमक्षणे एवास्य भावानुषङ्गो नोदयानन्तरमेव[5]। न ह्यनपेक्षत्वादहेतुकः क्वचित्कदाचिच्च[6] भवति, [7]तथाभावस्य सापेक्ष[8]त्वेनाहेतुकत्वविरोधिना सहेतुकत्वेन व्याप्तत्वात्, तथा सौगतैरप्यभ्युपगमात्।

ननु प्रथमक्षणे एव तेषां ध्वंसे सत्त्वस्यैवासम्भवात्कुतस्तत्प्रच्युतिलक्षणो ध्वंसः स्यात्? ततः स्व[9]हेतोरेवार्था ध्वंसस्वभावाः प्रादुर्भवन्ति; इत्यप्यविचारितरमणीयम्; यतो यदि भावहेतोरेव तत्प्रच्युतिः; तदा किमेकक्षणस्थायिभावहेतोस्तत्प्रच्युतिः, कालान्तरस्थायिभावहेतोर्वा? प्रथमपक्षोऽयुक्तः; एव(क)क्षणस्थायिभावहेतुत्वस्याऽद्याप्यसिद्धेः तत्कृतत्वं तत्प्रच्युतेरसिद्धमेव। द्वितीयपक्षे तु क्षणिकताऽभावानुषङ्गः।

किञ्च, भावहेतोरेव[10] तत्प्रच्युतिहेतुत्वे किमसौ[11] भावजननात्प्राक्तत्प्रच्युतिं जनयति, उत्तरकालम्, समकालं वा? प्रथमपक्षे प्रागभावः प्र[12]च्युतिः स्यान्न प्रध्वंसाभावः। द्वितीयपक्षे तु भावोत्पत्तिवेलायां त[13]त्प्रच्युतेरुत्पत्त्यभावान्न भा[14]वहेतुस्तद्धेतुः। तथा[15] चोत्तरोत्तरकालभाविभावपरिणतिमपेक्ष्योत्पद्यमाना तत्प्रच्युतिः कथं भावोदयानन्तरं भाविनी स्यात्? तृतीयपक्षेपि भावोदयसमसमयभाविन्या तत्प्रच्युत्या सह भावस्यावस्थानाविरोधान्न कदाचिद्भावेन नष्टव्यम्। कथं चासौ मुद्गरादिव्यापारानन्तरमेवोपलभ्यमाना तदभावे चानुपलभ्यमाना तज्जन्या न स्यात्? अन्य[16]त्रापि हेतुफलभावस्यान्वय[17]व्यतिरेकानुविधानलक्षणत्वात्।

न च मुद्गरादीनां कपालसन्तत्युत्पाद एव[18] व्यापार इत्यभिधातव्यम्; घटादेः स्वरूपेणाविकृतस्यावस्थाने पूर्ववदुपलब्ध्यादि[19]प्रसङ्गात्। न चास्य तदा[20] स्वयमेवाभावान्नोपलब्ध्यादिप्रसङ्गः;

---

१ अर्थस्य। २ नाशस्य। निर्हेतुकत्वात्। ३ अश्वलक्षण। ४ कालाद्यनपेक्षत्वाविशेषात्। ५ किंतु सर्वदैव भवतीत्यर्थः। ६ क्वचित्कदाचिद्भवतः पदार्थस्य। ७ कालादिना। ८ अनुत्पन्नत्वात्। ९ अर्थोत्पत्तिकारणात्। १० मृच्चक्रादेः। ११ भावस्य घटादेः। १२ घटादिभावस्य। १३ घटप्रध्वंसस्य। १४ भावोत्पत्तिवेलायां येन कारणेन भावोत्पत्तिर्जाता तस्मिन्नेव समये तेनैव कारणेन घटप्रध्वंसो जायते तदा उभयोः कारणमेकं स्यादिति भावः। १५ भावहेतोर्विनाशहेतुत्वाभावे च। १६ कपालोत्पत्तौ। १७ मुद्गरादिना सह। १८ न घटप्रच्युतौ। १९ आदिना जलाहरणादिग्रहणम्। २० मुद्गरादिसन्निधानकाले।

तद्भावस्यापि तदैवोपलभ्यमानतयाऽन्यदा चानुपलभ्यमानतया कपालादिवत्तत्कार्यतानुषङ्गात्।

अथ घट एव मुद्गरादिकं विनाशकारणत्वेन प्रसिद्धमपेक्ष्य समानक्षणान्तरोत्पादनेऽसमर्थं क्षणान्तरमुत्पादयति, तदप्यपेक्ष्य अपरमसमर्थतरम्, तदप्युत्तरमसमर्थतमम्, यावद्घटसन्ततेर्निवृत्तिरित्युच्यते; ननु चात्रापि घटक्षणस्यासमर्थक्षणान्तरोत्पादकत्वेनाभ्युपगतस्य मुद्गरादिना कश्चित्सामर्थ्यविघातो विधीयते वा, न वा? प्रथमविकल्पे कथमभावस्याहेतुकत्वम्? द्वितीयविकल्पे तु मुद्गरादिसन्निपाते तज्जनकस्वभावाऽव्याहतौ समर्थक्षणान्तरोत्पादप्रसङ्गः, समर्थक्षणान्तरजननस्वभावस्य भावात्प्राक्तनक्षणवत्।

किञ्च, भावोत्पत्तेः प्रागभावस्याभावनिश्चये तदुत्पादककारणोपादानं कुर्वन्तः प्रतीयन्ते प्रेक्षापूर्वकारिणः तदुत्पत्तौ च निवृत्तव्यापाराः, विनाशकहेतुव्यापारानन्तरं च शत्रुमित्रध्वंसे सुखदुःखभाजोऽनुभूयन्ते। न चानयोः सद्भावः सुखदुःखहेतुः, ततस्तद्व्यतिरिक्तोऽभावस्तद्धेतुरभ्युपगन्तव्यः।

किञ्च, अभावस्यार्थान्तरत्वानभ्युपगमे किं घट एव प्रध्वंसोऽभिधीयते, कपालानि, तदपरं पदार्थान्तरं वा? प्रथमपक्षे घटस्वरूपेऽपरं नामान्तरं कृतम्। तत्स्वरूपस्य त्वविचलितत्वान्नित्यत्वानुषङ्गः। अथैकक्षणस्थायि घटस्वरूपं प्रध्वंसः; न; एकक्षणस्थायितया तद्रूपस्याद्याप्यप्रसिद्धेः। द्वितीयपक्षेऽपि प्राक्कपालोत्पत्तेः घटस्यावस्थितेः कालान्तरावस्थायितैवास्य, न क्षणिकता।

किञ्च, कपालकाले 'सः, न' इति शब्दयोः किं भिन्नार्थत्वम्, अभिन्नार्थत्वं वा? भिन्नार्थत्वे कथं न नञ्शब्दवाच्यः पदार्थान्तरमभावः? अभिन्नार्थत्वे तु प्रागपि नञ्प्रयोगप्रसक्तिः। न चानुपलम्भे सति नञ्प्रयोग इत्यभिधातव्यम्; व्यवधानाद्यभावे

१ घटाभावः कार्यं भवति मुद्गराद्यन्वयव्यतिरेकानुविधायित्वात्। २ सहायमात्रम्। ३ घटस्य घट एव। ४ घटभङ्गलक्षणम्। ५ मुद्गरादिकं कर्मत्वेन। ६ भवदुक्तपक्षे। ७ घटस्य। ८ मुद्गरादिकारणजन्यत्वात्। ९ समानक्षणान्तरोत्पादने। १० घटस्य। ११ उत्पादात्। १२ मृच्चक्रादि। १३ स्वीकरणम्। १४ कस्यचित्पुरुषस्य घटं दृष्ट्वा स्नेहो जायते कस्यचित्तु द्वेषो जायते इति स्वभावद्वययुक्तत्वाद्घट एव शत्रुमित्ररूपः, तस्य प्रध्वंसे। १५ अनेन वाक्येन सहेतुको विनाशोऽस्तीति दर्शितम्। १६ स मुद्गरादिर्हेतुर्यस्य सः। १७ घटादिकमित्यर्थः। १८ प्रध्वंस इति। १९ गगनादिवत्। २० बहुतरकालम्। २१ यावत् कपालानि। २२ घटे सत्यपि घटो नास्तीति। २३ घटस्य। २४ कर्तव्यः। २५ देशकालादिना।

स्वरूपादप्रच्युतार्थस्या[1]नुपलम्भानुपपत्तेः । स्वरूपात्प्रच्युतौ वा कथं न कपालकाले मुद्गरादिहेतुकं भा[3]वान्तरं प्रच्युतिर्भवेत् ?

अ[4]थ घटकपालव्यतिरिक्तं भावान्तरं घटप्रध्वंसः; नन्वत्रापि तेन सह घटस्य युगपदवस्थानाविरोधात् कथं तत्तत्प्रध्वंसः ? अन्य-
५ थोत्पत्तिकालेपि तत्प्रध्वंस[5]प्रसङ्गाद्धटस्योत्पत्तिरेव न स्यात् ।

अन्यानपेक्षतया चाग्नेरुष्णत्ववत्स्वभावतोऽभावस्य भावे स्थिते-रपि स्वभावतो भावः किन्न स्यात् ? शक्यते हि तत्राप्येवं वक्तुं कालान्तरस्थायी स्वहेतोरेवोत्पन्नो भावो न तद्भावे भावान्तर-मपेक्षते अग्निरिवोष्णत्वे । भिन्नाभिन्नविकल्पस्य चा[6]भाववत्
१० स्थितावपि समानत्वात् तत्राप्यन्यानपेक्षया निर्हेतुकत्वानुषङ्गः । तथाहि-न वस्तुनो व्यतिरिक्ता स्थितिस्तद्धेतुना क्रियते; तस्या-ऽस्थास्नुतापत्तेः । स्थितिसम्बन्धात्स्थास्नुता; इत्यप्ययुक्तम्; स्थिति-तद्वतोर्व्यतिरेकपक्षाभ्युपगमे तावत्तादात्म्यसम्बन्धोऽसङ्गतः । कार्यकारणभावोप्यनयोः सहभावादयुक्तः । असहभावे वा स्थितेः
१५ पूर्वं तत्कारणस्यास्थितिप्रसङ्गः । स्थितेरपि स्वकारणादुत्तरकाल-मनाश्रयतानुषङ्गः[12] । अ[11]व्यतिरिक्तस्थितिकरणे च हेतुवैयर्थ्यम् । ततः[13] स्थितिस्वभावनियतार्थस्त[14]द्भावं प्रत्यन्यानपेक्षत्वादिति स्थितम् ।

अहेतुकविनाशाभ्युपगमे च उत्पादस्याप्यऽहेतुकत्वानुषङ्गो विनाशहेतुपक्षनिक्षिप्तविकल्पाना[15]मत्राप्यविशेषात्; तथा हि-
२० उत्पादहेतुः स्वभावत एवोत्पित्सुं भावमुत्पादयति, अनुत्पित्सुं वा ? आद्यविकल्पे तद्धेतुवैफ[16]ल्यम् । द्वितीयविकल्पेपि अनुत्पि-त्सोरु[17]त्पादे गगनाम्भोजादेरुत्पादप्रसङ्गः । स्वहेतुसन्निधेरेवोत्पि-त्सोरुत्पादाभ्युपगमे विनाशहेतुसन्निधानाद्विनश्वरस्य विनाशो-प्यभ्युपगमनीयो न्यायस्य समानत्वात् ।

---

१ पृथुबुध्नोदरादेः । २ घटलक्षणस्य । ३ घटात् । ४ तृतीयविकल्पः । ५ पदार्था-न्तरस्य सदैव सद्भावात् । ६ भिन्नाभिन्नविकल्पाभ्यां यथाऽभावः कारणान्तरनिरपेक्ष (बौद्धमते) स्तथा ताभ्यां स्थितिरपि कारणनिरपेक्षे (जैनमते) ति भावः । ७ घट-पटयोरिव । ८ सव्येतरगोविषाणवत् । ९ घटस्य । १० स्वकारणस्य क्षणभङ्गुरत्वेन नष्टत्वादिति भावः । ११ घटात् । १२ अव्यतिरिक्तस्थितिकरणे च स्थितिमद्वस्त्वेव कृतं स्यात्, तस्य च स्वहेतुनैव कृतत्वात्स्थितेर्हेतुना करणमनुपपन्नमित्यस्य वैयर्थ्यम् । १३ स्थितावन्यानपेक्षतया निर्हेतुकत्वं सिद्धं यतः । १४ स्थितिस्वभावम् । १५ भिन्नाऽभिन्नवक्ष्यमाणानाम् । १६ स्वभावत एव भावस्योत्पत्तिसम्भवात् । १७ कारणेन ।

ततः कार्यकारणयोरुत्पादविनाशौ न सहेतुकाऽहेतुकौ कारणानन्तरं सह[1]भावाद्रूपादिव[2]त् । न चानयोः सहभावोऽसिद्धः;
"नाशोत्पादौ समं यद्वन्नामोन्नामौ तुलान्तयोः ॥" [　　　]

इत्यभिधानात् । न चाहेतुकेन पर्यायसहभाविना द्रव्येणानेकान्तः; 'कारणानन्तरम्' इति विशेषणात् । न चैवमसिद्धत्वम्; मुद्गरादिव्यापारानन्तरं कार्योत्पादवत्कारणविनाशस्यापि प्रतीतेः, 'विनष्टो घटः, उत्पन्नानि कपालानि' इति व्यवहारद्वयदर्शनात् । न च साध्यविकलमुदाहरणम्; न हि कारणभूतो रूपादिकलापः कार्यभूतस्य रूपस्यैव हेतु[3]र्न तु र[4]सादेरिति प्रतीतिः । नाप्यसहभावो रू[5]पादीनां येन साधनविकलं स्यात् । तन्नोक्त[6]हेतोरर्था[7]नां क्षणक्षयावसायः ।

नापि सत्त्वात्; प्रतिबन्धासिद्धेः । न च विद्युदादौ सत्त्वक्षणिकत्वयोः प्रत्यक्षत एव प्रतिबन्धसिद्धे[8]र्घटादौ सत्त्वमुपलभ्यमानं क्षणिकत्वं गमयति इत्यभिधातव्यम्; तत्राप्यनयोः प्रतिबन्धासिद्धेः । विद्युदादौ हि मध्ये स्थितिदर्शनं पूर्वोत्तरपरिणामौ प्रसाधयति । न हि विद्युदादेरनुपादानोत्पत्तिर्युक्तिमती; प्रथमचैतन्यस्याप्यनुपादानोत्पत्तिप्रसङ्गतः परलोकाभावानुषङ्गात्, विद्युदादिवत्तत्रापि प्रागुपादानाऽदर्शनात् । न चानुमीयमानमत्रोपादानम्; विद्युदादावपि तथात्वानुषङ्गात् ।

नाप्यस्य निरन्वया सन्तानोच्छित्तिः; चरमक्षणस्याकिञ्चित्करत्वेनावस्तुत्वापत्तितः[11] पूर्वपूर्वक्षणानामप्य[12]वस्तुत्वापत्तेः[13] सकलसन्तानाभावप्रसङ्गः[14] । विद्युदादेः सजातीयकार्याकरणेपि योगिज्ञानस्य[15] करणाद्नावस्तुत्वमिति चेत्; न; आस्वाद्यमानरससमानकालरूपो[16]पादानस्य रू[17]पाकरणेपि रससहकारित्वप्रसङ्गात् । ततो

१ ययोः सहभावस्तयोः सहेतुकासहेतुकत्वभावेन न जननमिति । २ रूपरसादीनां यथा । ३ उपादानरूपः । ४ सहकारिलक्षणः । ५ इत्युदाहरणस्य । ६ उदाहरणम् । ७ तत्स्वभावत्वे सत्यन्यानपेक्षत्वादिति । ८ सन्दिग्धानैकान्तिकत्वे सत्याह । ९ प्रथमचैतन्यं जन्मान्तरचैतन्यपूर्वकं चिद्विवर्तत्वान्मध्यचिद्विवर्तवदिति । १० विद्युदुत्तरपरिणामाविनाभाविनी न भविष्यतीत्युक्ते आह । ११ उत्तराकारपरिणमनविषये । १२ अकिञ्चित्करत्वाविशेषात् । १३ अन्त्यचित्क्षणस्यार्थक्रियाशून्यत्वेनासत्त्वप्रसङ्गात् तस्यासत्त्वे तत्पूर्वक्षणस्याप्यर्थक्रियारहितत्वेनासत्त्वम्, तत एव तत्पूर्वक्षणानामप्यसत्त्वेन सर्वशून्यतापत्तिरेव स्यात् । १४ पूर्वोत्तरक्षणानां समूहः सन्तानः, तन्मध्ये एकैकक्षणः सन्तानी । १५ विजातीयस्य । १६ पूर्वरूपस्य । १७ उत्तररूपाकरणे ।

रसाद्रूपानुमानं न स्यात्। 'तथा दृष्टत्वान्न दोषः' इत्यन्यत्रापि समानम्, विद्युच्छब्दादेरपि विद्युच्छब्दाद्यन्तरोपलम्भात्।

न चैकत्र सत्त्वक्षणिकत्वयोः सहभावोपलम्भात्सर्वत्र ततस्तदनुमानं युक्तम्; अन्यथा सुवर्णे सत्त्वादेव शुक्लतानुमितिप्रसङ्गः, ५ शुक्ले शङ्खे शुक्लतया तत्सहभावोपलम्भात्। अथ सुवर्णाकारनिर्भासिप्रत्यक्षेण शुक्लतानुमानस्य बाधितत्वान्न तत्र शुक्लतासिद्धिः; तर्हि घटादौ क्षणिकतानुमानस्य 'स एवायम्' इत्येकत्वप्रतिभासेन बाधितत्वात्प्रतिक्षणविनाशितासिद्धिर्न स्यात्।

अथैकत्वप्रत्यभिज्ञा भिन्नेष्वपि लूनपुनर्जातनखकेशादिष्वभेद- १० मुल्लिखन्ती प्रतीयत इत्येकत्वे नाऽसौ प्रमाणम्; नन्वेवं कामलोपहताक्षाणां धवलिमामाविभ्राणेष्वपि पदार्थेषु पीताकारनिर्भासिप्रत्यक्षमुदेतीति सत्यपीताकारेपि न तत्प्रमाणम्। भ्रान्ताद्भ्रान्तस्य विशेषोन्यत्रापि समानः। प्रसाधितं च प्रत्यभिज्ञानस्याभ्रान्तत्वं प्रागित्यलमतिप्रसङ्गेन।

१५ अथ विपक्षे बाधकप्रमाणबलात्सत्त्वक्षणिकत्वयोरविनाभावोवगम्यते। ननु तत्र सत्त्वस्य बाधकं प्रत्यक्षम्, अनुमानं वा स्यात्? न तावत्प्रत्यक्षम्; तत्र क्षणिकत्वस्याप्रतिभासनात्। न चाप्रतिभासमानक्षणक्षयस्वरूपं प्रत्यक्षं विपक्षाद्व्यावर्त्य सत्त्वं क्षणिकत्वनियतमादर्शयितुं समर्थम्। अथानुमानेन तत्ततो व्यावर्त्य क्षणि- २० कनियततया साध्येत; ननु तदनुमानेप्यविनाभावस्यानुमानबलात्प्रसिद्धिः, तथा चानवस्था। न च तद्बाधकमनुमानमस्ति।

ननु 'यत्र क्रमयौगपद्याभ्यामर्थक्रियाविरोधो न तत्सत् यथा गगनाम्भोरुहम्, अस्ति च नित्ये सः' इत्यतोनुमानात्ततो व्यावर्त्तमानं सत्त्वमनित्ये एवावतिष्ठत इत्यवसीयते; तन्न; सत्त्वाऽ- २५ क्षणिकत्वयोर्विरोधाऽसिद्धेः। विरोधो हि सहानवस्थानलक्षणः, परस्परपरिहारस्थितिलक्षणो वा स्यात्? न तावदाद्यः; स हि पदार्थस्य पूर्वमुपलम्भे पश्चात्पदार्थान्तरसद्भावादभावावगतौ निश्चीयते शीतोष्णवत्। न च नित्यत्वस्योपलम्भोस्ति सत्त्वप्रसङ्गात्। नापि द्वितीयो विरोधस्तयोः सम्भवति; नित्यत्वपरि- ३० हारेण सत्त्वस्य तत्परिहारेण वा नित्यत्वस्यानवस्थानात्।

---

१ अस्त्यत्र मातुलिङ्गे रूपं रसादिति। २ उपादानकारणाद्रूपात् सजातीयरूपकरणप्रकारेण। ३ तृतीयपरिच्छेदे। ४ प्रत्यभिज्ञानस्याभ्रान्तत्वसमर्थनेन। ५ अक्षणिकत्वे। ६ सत्त्वस्य। ७ वसः। ८ सत्त्वं क्षणिकत्वनियतं तदन्वयव्यतिरेकानुविधानादिति। ९ नित्यं सन्न भवति क्रमयौगपद्याभ्यामर्थक्रियाविरोधात्। १० तमःप्रकाशयोरिव वा।

'क्षणिकतापरिहारेण ह्यक्षणिकता व्यवस्थिता तत्परिहारेण च क्षणिकता' इत्यनयोः परस्परपरिहारस्थितिलक्षणो विरोधः[2]। न चार्थक्रियालक्षणसत्त्वस्य क्षणिकतया व्याप्तत्वान्नित्येन विरोधः; अन्योन्याश्रयानुषङ्गात्-अर्थक्रियालक्षणं सत्त्वं क्षणिकतया व्याप्तं नित्यताविरोधात्सिध्यति, सोऽप्यस्य क्षणिकतया व्याप्तेरिति।

ननु च अर्थक्रियायाः क्रमयौगपद्याभ्यां व्याप्तत्वात्तयोश्चाक्षणिकेऽसम्भवात्कुतः क्रमवत्यर्थक्रिया नित्ये सम्भविनी? न च सहकारिक्रमान्नित्ये क्रमवत्यप्यसौ सम्भवति; अस्योपकारकानुपकारकपक्षयोः सहकार्यऽपेक्षाया एवासम्भवात्। नापि यौगपद्येनासौ नित्ये सम्भवति; पूर्वोत्तरकार्ययोरेकक्षण एवोत्पत्तेर्द्वितीयक्षणे तस्यानर्थक्रियाकारित्वेनावस्तुत्वप्रसङ्गात्; इत्यप्यसारम्; एकान्तनित्यवदऽनित्येपि क्रमाक्रमाभ्यामर्थक्रियाऽसम्भवात्, तस्याः कथञ्चिन्नित्ये[3] एव सम्भवात्, तत्र क्रमाक्रमवृत्त्यनेकस्वभावत्वप्रसिद्धेः, अन्यत्र[4] तु तत्स्वभावत्वाप्रसिद्धेः पूर्वापरस्वभावत्यागोपादानान्वितरूपाभावात्, सकृदनेकशक्त्यात्मकत्वाभावाच्च। न खलु कूटस्थेर्थे पूर्वोत्तरस्वभावत्यागोपादाने स्तः, क्षणिके चान्वितं रूपमस्ति, यतः क्रमः[5] कालकृतो देशकृतो वा। नापि युगपदनेकस्वभावत्वं यतो यौगपद्यं[6] स्यात्, कौटस्थ्यविरोधान्निरन्वयविनाशित्वव्याघाताच्च[7]।

किञ्च, क्षणिकं[8] वस्तु विनष्टं सत्कार्यमुत्पादयति, अविनष्टम्, उभयरूपम्, अनुभयरूपं वा? न तावद्विनष्टम्; चिरतरनष्टस्येवानन्तरनष्टस्याप्यसत्त्वेन जनकत्वविरोधात्। नाप्यविनष्टम्; क्षणभङ्गभङ्गप्रसङ्गात्[9] सकलशून्यतानुषङ्गाद्वा, सकलकार्याणामेकदैवोत्पद्य विनाशात्[10]। नाप्युभयरूपम्; निरंशैकस्वभावस्य विरुद्धोभयरूपासम्भवात्। नाप्यनुभयरूपम्; अन्योन्यव्यवच्छेदरूपाणामेकनिषेधस्यापरविधाननान्तरीयकत्वेनानुभयरूपत्वायोगात्[11]।

कथं च निरन्वयनाशित्वे कारणस्योपादानसहकारित्वस्य व्यवस्था[12] तत्स्वरूपापरिज्ञानात्? उपादानकारणस्य[13] हि स्वरूपं[14] किं

१ न तु सत्त्वाक्षणिकत्वयोः। २ प्रथमभेदे बाध्यबाधकभावेन विरोधः। द्वितीयभेदे तु स्वभावेनैव—यत्र क्षणिकत्वं तत्र न सत्त्वमिति विरोधः। ३ द्रव्यत्वेन। ४ सर्वथा क्षणिके। ५ अवस्थितस्य पदार्थस्यैकस्य हि नानादेशकालकलाव्यापित्वं देशक्रमः कालक्रमश्च। ६ नित्यक्षणिकाभ्यां कृतानां कार्याणाम्। ७ एकानेकात्मकत्वप्रसक्तेः। ८ क्षणिकत्व। ९ युगपदनेकस्वभावत्ववत् क्रमेणापि तथा प्राप्तेः। १० द्वितीयक्षणे कार्याजनकत्वात्। ११ अविनाभूतत्वेन। १२ एकं कार्यं प्रत्युपादानत्वमपरं प्रति सहकारित्वमिति। १३ जैनो बौद्धं प्रति वक्ति। १४ बौद्धमते।

स्वसन्ततिनिवृत्तौ कार्यजनकत्वम्, यथा मृत्पिण्डः स्वयं निवर्तमानो घटमुत्पादयति, आहोस्विदने[1]कस्मादुत्पद्यमाने [2]कार्ये स्वगतविशेषाधायकत्वम्, समनन्तरप्रत्ययत्वमात्रं वा स्यात्, नियमवदन्वयव्यतिरेकानुविधानं वा? प्रथमपक्षे कथञ्चित्[3]सन्ताननिवृत्तिः, [4]सर्वथा वा? कथञ्चिच्चेत्; [5]परमतप्रसङ्गः। सर्वथा चेत्; परलोकाभावानुषङ्गो [6]ज्ञानसन्तानस्य सर्वथा निवृत्तेः।

द्वितीयपक्षेपि किं स्वगतकतिपयविशेषाधायकत्वम्, सकलविशेषाधायकत्वं वा? तत्राद्यविकल्पे सर्वज्ञज्ञाने [7]स्वाकारार्पकस्यास्मदादि[8]ज्ञानस्य [9]तत्प्रत्युपादानभावः, तथा च सन्तानसङ्करः। [10]रूपस्य वा [11]रूपज्ञानं प्रत्युपादानभावोनुषज्येत [12]स्वगतकतिपयविशेषाधायकत्वाविशेषात्। [13]रूपोपादानत्वे च परलोकाय दत्तो [14]जलाञ्जलिः। [15]कतिपयविशेषाधायकत्वेनोपादानत्वे च एकस्यैव [16]ज्ञानादिक्षणस्यानुवृत्तव्यावृत्ताऽनेक[17]विरुद्धधर्माध्यासप्रसङ्गात् स एव [18]परमतप्रसङ्गः। द्वितीयविकल्पे तु कथं [19]निर्विकल्पकाद्विकल्पोत्पत्तिः रूपाकारात्समनन्तर[20]प्रत्ययाद्रसाकारप्रत्ययोत्पत्तिर्वा, स्वगतसकलविशेषाधायकत्वाभावात्? सन्तानबहुत्वोपगमात्[21]सर्वस्य स्वसदृशादेवो[22]त्पत्तिरित्यभ्युपगमे तु एकस्मिन्नपि पुरुषे प्रमातृ[23]बहुत्वापत्तिः। तथा च गवाश्वादिदर्शनयोर्भिन्नसन्तानत्वादेकेन[24] दृष्टेऽर्थे [25]परस्यानुसन्[26]धानं न स्याद्देवदत्तेन दृष्टे यज्ञदत्तवत्।

---

१ (ज्ञानं प्रति) इन्द्रियार्थालोकादिकारणकलापात्। (घटं प्रति) मृदादिकारणकलापात्। २ ज्ञानलक्षणे घटादौ वा। ३ पर्यायरूपेण। ४ द्रव्यरूपेणापि। ५ तथैव जैनानामपीष्टत्वात्। ६ एकजन्मनि वर्त्तमानस्य, उत्तरोत्तरज्ञानसन्तान एवात्मेति वचनात्। ७ किञ्चिज्ज्ञत्वं वर्जयित्वाऽन्यान् चेतनत्वादिज्ञानगतविशेषान् समर्पयतीति भावः। ८ सहकारिकारणभूतस्य। ९ अस्मदादिज्ञानं यदा सर्वज्ञो विषयीकरोति तदा तत्स्वाकारं कतिपयं समर्पयति यतः। १० सहकारिकारणभूतस्य। ११ कार्यभूतम्। १२ कतिपयविशेषाः=रूपगतजडत्वं वर्जयित्वा स्वगतश्वेतपीताद्याकारविशेषाः। १३ रूपज्ञानस्य। १४ अचेतनरूपादुपादानाच्चैतन्योत्पत्तिर्यतः। १५ रूपं रूपज्ञाने रूपं समर्पयति न तु जडत्वम्। १६ आदिना अर्थादि। १७ अर्पितानर्पितादिविशेषापेक्षयाऽनुवृत्तव्यावृत्तरूप। १८ अनेकान्तात्मकत्वाज्ज्ञानस्य। १९ उत्तरनिर्विकल्पकज्ञानस्योपादानात्सविकल्पकस्य सहकारिकारणात्। २० रूपज्ञानादुत्तररूपज्ञानस्योपादानादुत्तररसज्ञानस्य सहकारिकारणात्। २१ एकस्मिन्पुरुषे। २२ निर्विकल्पकस्य निर्विकल्पकमुपादानं सविकल्पकस्य सविकल्पकमुपादानमिति भावः। २३ ज्ञानसन्तानस्य बहुत्वात्। २४ गोदर्शनेन। २५ अश्वादिदर्शनस्य। २६ य एवाहं पूर्वं गामद्राक्षं स एवाहमिदानीमश्वं पश्यामीति क्रमेण, युगपदश्वगावौ पश्याम्यक्रमेण च।

किञ्च[1], सकलस्वगतविशेषाधायकत्वे सर्वात्मनोपादेय[2]क्षणे एवास्यो[3]पयोगात् तत्रानुपयुक्तस्वभावान्तराभावाच्च एकसामग्र्य[4]न्तर्गतं प्रति सहकारित्वा[5]भावः, तत्कथं रूपादेः रसतो गतिः[6]? स्वभावान्तरोपगमे त्रैलोक्यान्तर्गतान्यजन्यकार्यान्तरापेक्षया तस्याजनकत्वमपि स्वभावान्तरमभ्युपगन्तव्यम्, इत्यायातमेकस्यै[7]वोपादानसहकार्य[8]ऽजनकत्वा[9]द्यनेकविरुद्धधर्माध्यासितत्वम्। न चैते धर्माः काल्पनिका[10]ः; तत्कार्याणामपि तथात्वप्रसङ्गात्।

स[11]मनन्तरप्रत्यय[12]त्वमप्युपादानलक्षणमनुपपन्नम्; कार्ये स[13]मत्वं कारणस्य सर्वात्मना, एकदेशेन वा? सर्वात्मना चेत्; यथा कारणस्य प्राग्भावित्वं तथा कार्यस्यापि स्या[14]त्, तथा च सव्येतरगोविषाणवदेककालत्वात्तयोः कार्यकारणभावो न स्यात्। तथा कारणाभिमतस्यापि स्वकारणकाल[15]ता, तस्यापि सेति स[16]कलशून्यं जगदापद्येत। कथञ्चित्[17]समत्वे योगिज्ञानस्याप्यस्मदादिज्ञानाव-ल[18]म्बनस्य तदाकारत्वेनैकसन्तानत्वप्रसङ्गः स्या[19]त्।

अनन्तरत्वं च देशकृतम्, कालकृतं वा स्यात्? न तावद्देशकृतं तत्तत्रोपयोगि; व्यवहितदेशस्यापि इह जन्ममरणचित्तस्य भाविजन्मचित्तोपादानत्वोप[20]गमात्। नापि कालानन्तर्यं तत्; व्यवहितकाल[21]स्यापि जाग्रच्चित्तस्य प्रबुद्धचित्तोत्पत्तावुपादानत्वाभ्युपगमात्। अव्य[22]वधानेन प्रा[23]ग्भावमात्रमनन्तरत्वम्; इत्यप्ययुक्तम्; क्षणिकैकान्तवादिनां विवक्षितक्षणानन्तरं निखिलजगत्क्षणानामुत्पत्तेः सर्वे[24]षामेकसन्तानत्वप्रसङ्गात्।

निय[25]मवदन्वयव्यतिरेकानुविधानं तल्लक्षणम्; इत्यप्यसमीचीनम्; बु[26]द्धेतर[27]चित्ता[28]नामप्युपादानोपादेयभावानुषङ्गात्, तेषामव्यभिचा[29]रेण कार्यकारणभूतत्वाविशेषात्। निरा[30]स्रवचित्तोत्पादात्पूर्वं

१ स्वगतसकलविशेषाधायकत्वे दूषणान्तरमाह। २ कार्यजन्ये। ३ रूपाद्युपादानस्य। ४ पूर्वरूपरसौ एकसामग्री। ५ उत्तररसम्। ६ पूर्वरूपस्य। ७ ज्ञानम्। ८ रूपाद्युपादानस्य। ९ आदिपदेन पूर्वकालनाशित्वमुत्तरकालनाशित्वम्। १० अयथार्थाः। ११ तृतीयविकल्पः। १२ प्रत्ययः=कारणम्। १३ समकालत्वमित्यर्थः। १४ सर्वात्मना समानत्वात्। १५ पूर्वरूपक्षणे कार्ये पूर्वतररूपक्षणस्य कारणभूतस्य समत्वम्। १६ कार्यकारणयोरभावात्। १७ ज्ञाततेन। १८ बहुव्रीहिः। १९ कथञ्चित्समत्वेन सद्भावात्। २० सौगतेन। २१ निद्रायाम्। २२ अन्येन वस्तुना तिरोधायकेन। २३ पूर्वरूपस्य कारणस्य। २४ चेतनाऽचेतनानां कार्याणाम्। २५ चतुर्थविकल्पः। २६ सुगत। २७ किञ्चिज्ज्ञ। २८ चित्तं ज्ञानम्। २९ अस्मदादिज्ञानसद्भावे सुगतस्यास्मदादिज्ञानविषयकज्ञानोत्पत्तिस्तदभावे नोत्पत्तिरित्यन्वयव्यतिरेकाभ्याम्। ३० आस्रवरहितचित्त।

बुद्धचित्तं प्रति सन्तानान्तरचित्तस्याकारणत्वान्न तेषामव्यभिचारी कार्यकारणभावः इति चेत्; यतः प्रभृति तेषां कार्यकारणभावस्तत्प्रभृतितस्तस्याव्यभिचारात्, अन्यथाऽस्याऽसर्वज्ञत्वं स्यात्। "नाकारणं विषयः" [ ] इत्यभ्युपगमात्।

५ अव्यभिचारेण कार्यकारणभूतत्वाविशेषेपि प्रत्यासत्तिविशेषवशात्केषाञ्चिदेवोपादानोपादेयभावो न सर्वेषामिति चेत्; स कोन्योन्यत्रैकद्रव्यतादात्म्यात्? देशप्रत्यासत्तेः रूपरसादिभिर्वातातपादिभिर्वा व्यभिचारात्। कालप्रत्यासत्तेः एकसमयवर्तिभिरशेषार्थैरनेकान्तात्। भावप्रत्यासत्तेश्च एकार्थोद्भूतानेकपुरुष-
१० विज्ञानैरनेकान्तात्।

न चात्रान्वयव्यतिरेकानुविधानं घटते। न खलु समर्थे कारणे सत्यभवतः स्वयमेव पश्चाद्भवतस्तदन्वयव्यतिरेकानुविधानं नाम नित्यवत्। 'स्वदेशवत्स्वकाले सति समर्थे कारणे कार्यं जायते नासति' इत्येतावता क्षणिकपक्षेऽन्वयव्यति-
१५ रेकानुविधाने नित्येपि तत्स्यात्, स्वकालेऽनाद्यनन्ते सति समर्थे नित्ये स्वसमये कार्यस्योत्पत्तेरसत्यऽनुत्पत्तेश्च प्रतीयमानत्वात्। सर्वदा नित्ये समर्थे सति स्वकाले एव कार्यं भवत्कथं तदन्वयव्यतिरेकानुविधायीति चेत्? तर्हि कारणक्षणात्पूर्वं पश्चाच्चानाद्यनन्ते तदभावेऽविशिष्टे क्वचिदेव तदभावसमये भवत्कार्यं कथं
२० तदनुविधायीति समानम्?

नित्यस्य प्रतिक्षणमनेककार्यकारित्वे क्रमशोनेकस्वभावत्वसिद्धेः कथमेकत्वं स्यादिति चेत्? क्षणिकस्य कथमिति समः पर्यनुयोगः? स हि क्षणस्थितिरेकोपि भावोऽनेकस्वभावो विचित्रकार्यत्वान्नानार्थक्षणवत्। न हि कारणशक्तिभेदमन्तरेण कार्य-
२५ नानात्वं युक्तं रूपादिज्ञानवत्। यथैव हि कर्कटिकादौ रूपादिज्ञानानि रूपादिस्वभावभेदनिबन्धनानि तथा क्षणस्थितेरेकस्या-

---

१ सास्रवम्। २ निरास्रवच्चित्तोत्पत्तेः। ३ यदेव घटस्तदेव मृत्पिण्ड इति। ४ बुद्धस्य। ५ यत्सुगतज्ञानोत्पत्तौ कारणं तदेव विषयः। ६ सुगतच्चित्तानां परस्परम्। ७ अत्रात्मैव एकद्रव्यम्। ८ प्रत्यासत्तिरैक्यम् यत्र यत्र देशप्रत्यासत्तिस्तत्र तत्रोपादानोपादेयभाव इत्युच्यमाने। ९ भावः=स्वरूपम्। १० क्षणिके। ११ पूर्वक्षणे जाग्रद्दशान्त्यच्चित्ते। १२ उत्तरक्षणस्य प्रबुद्धचित्तस्य। १३ कारणं विना। १४ सौगतेनाङ्गीक्रियमाणे। १५ कारणे। १६ अव्यापकत्वेनाभिमते। १७ क्षणिकस्यानेकस्वभावत्वं नास्त्यतः कथं समः पर्यनुयोग इत्याह। १८ विचित्रकार्यत्वमस्तु न त्वनेकस्वभावत्वमिति सन्दिग्धानैकान्तिकत्वे सतीदम्।

त्प्रदीपादिक्षणाद् वर्तिकादाहतैलशोषादिविचित्रकार्याणि शक्तिभेदनिमित्तकानि व्यवतिष्ठन्ते, अन्यथा रूपादेरपि नानात्वं न स्यात्।

ननु च शक्तिमतो[3]ऽर्थान्तरानर्थान्तरपक्षयोः शक्तीनामघटनात्तासां परमार्थसत्त्वाभावः; तर्हि रूपादीनामपि प्रतीतिसिद्धद्रव्यादर्थान्तरानर्थान्तरविकल्पयोरसम्भवात्परमार्थसत्त्वाभावः स्यात्। प्रत्यक्षबुद्धौ प्रतिभासमानत्वाद्रूपादयः परमार्थसन्तो न पुनस्तच्छक्तयस्तासामनुमानबुद्धौ प्रतिभासमानत्वात्; इत्यप्ययुक्तम्; क्षणक्षयस्वर्गप्रापणशक्त्यादीनामपरमार्थसत्त्वप्रसङ्गात्। ततो यथा क्षणिकस्य युगपदनेककार्यकारित्वेप्येकत्वाविरोधः, तथाऽक्षणिकस्य क्रमशोनेककार्यकारित्वेपीत्यनवद्यम्।

यच्चार्थक्रियालक्षणं[5] सत्त्वमित्युक्तम्; तत्र लक्षणशब्दः[6] कारणार्थः, स्वरूपार्थः, ज्ञापकार्थो वा स्यात्? प्रथमपक्षे किमर्थक्रिया लक्षणं कारणं सत्त्वस्य, तद्वार्थक्रियायाः? तत्रार्थक्रियातः सत्त्वस्योत्पत्तौ[7] प्राक् पदार्थानां सत्त्वमन्तरेणाप्यस्याः प्रादुर्भावान्निर्हेतुकत्वं निराधारकत्वं वानुपज्येत। अथ सत्त्वादर्थक्रियोत्पद्यते; तदार्थक्रियातः प्रागपि सत्त्वसिद्धेर्भावानां स्वरूपसत्त्वमायातम्।

अथ स्वरूपार्थोसौ; तत्रापि तद्धेतोरसत्त्वप्रसङ्गः, न ह्यर्थक्रियाकाले तद्धेतुर्विद्यते[11]। न चान्यकालस्यास्यान्यकाला सा स्वरूपम[12]तिप्रसङ्गात्।

नापि ज्ञापकार्थोसौ: अर्थक्रियाकालेर्थस्यासत्त्वादेव। असतश्चास्याऽतः कथं सत्ताज्ञप्तिरतिप्रसङ्गात्? न चार्थक्रियोदयात्प्राक् कारणमासीदिति व्यवस्थापयितुं शक्यम्। यतो यदि स्वरूपेण पूर्वं हेतुरवगतो भवेत्तदनन्तरं चार्थक्रिया, तदार्थक्रिया प्रतिपन्नसम्बन्धोपलभ्यमाना प्राग्धेतुसत्तां व्यवस्थापयतीति

१ आदिना स्वपरप्रकाशनादिग्रहणम्। २ अर्थात्मकाशात्। ३ भिन्नाश्चेत्तस्येति सम्बन्धाभावः। सम्बन्धसिद्ध्यर्थमुपकारकल्पनेऽनवस्था। अभिन्नाश्चेच्छक्तय एव शक्तिमन्त एव वा स्युः। ४ तस्य प्रदीपस्य। ५ साधनं विचार्यते। ६ लक्ष्यते जन्यते कार्यमनेनेति लक्षणं कारणमित्यर्थः—अनेकार्थत्वाद्धातूनाम्। ७ सत्त्वस्य। ८ सत्त्वस्य। ९ द्वयोः पक्षयोर्मध्ये। १० कारणभूतात्। ११ सर्वथा क्षणिकत्वात्। १२ न हि स्वरूपिस्वरूपयोः कालभेदो यतः। १३ गगनकुसुमादेरपि ज्ञापकत्वप्रसङ्गात्। १४ अर्थक्रिया=स्नानपानादिः। १५ जलादिलक्षणः अर्थक्रियायाः। १६ कारणेन सह।

स्यात्। न चार्थक्रियामन्तरेण हेतुः स्वरूपेण कदाचिदप्युपलब्धः परैः[2] स्वरूपसत्त्वप्रसङ्गात्।

अर्थक्रियायाश्चापरार्थक्रिया यदि सत्त्वव्यवस्थापिका; तदानवस्था। न चार्थक्रियाऽनधिगतसत्त्वस्वरूपापि हेतुसत्त्वव्यवस्था-
५ पिका; अश्वविषाणादेरपि तत्सत्त्वव्यवस्थापकत्वानुषङ्गात्। न च हेतुजन्यत्वादर्थक्रिया सती नार्थक्रियान्तरोदयात्, इत्यभिधातव्यम्; इतरेतराश्रयानुषङ्गात्-हेतुसत्त्वाद्ध्यऽर्थक्रिया सती, तत्सत्त्वाच्च हेतोः सत्त्वमिति।

अस्तु वार्थक्रियालक्षणं सत्त्वम्। तथाप्यतोर्थानां क्षणस्थायिता
१० क्षणिकत्वं साध्येत, क्षणादूर्ध्वमभावो वा? प्रथमपक्षे सिद्धसाध्यता, नित्यस्याप्यर्थस्य क्षणावस्थित्यभ्युपगमात्। कथमन्यथास्य सदावस्थितिः क्षणावस्थितिनिबन्धनत्वात् क्षणान्तराद्यवस्थितेः? अथ क्षणादूर्ध्वमभावः साध्यते; तन्न; अभावेन सहास्य प्रतिबन्धासिद्धेः। न चाप्रतिबन्धविषयोऽश्वविषाणादिवद-
१५ नुमेयः। तन्न सत्त्वादप्यर्थानां क्षणिकत्वावगतिः।

नापि कृतकत्वात्; उक्तप्रकारेण क्षणिके कार्यकारणभावप्रतिषेधतः कृतकस्याऽसिद्धस्वरूपत्वेन तदवगतिं प्रत्यनङ्गत्वात्। ततः[3] प्रतीत्यनुरोधेन स्थिरः स्थूलः साधारणस्वभावश्च भावोऽभ्युपगन्तव्यः।

२० ननु चाणूनामयःशलाकाकल्पत्वेनान्योन्यं[4] सम्बन्धाभावतः स्थूलादिप्रतीतेर्भ्रान्तत्वात्कथं तद्वशात्तत्स्वभावो भावः स्यात्? तथाहि-सम्बन्धोर्थानां पारतन्त्र्यलक्षणो वा स्यात्, रूपश्लेषलक्षणो वा स्यात्? प्रथमपक्षे किमसौ[5] निष्पन्नयोः सम्बन्धिनोः स्यात्, अनिष्पन्नयोर्वा? न तावदनिष्पन्नयोः; स्वरूपस्यैवाऽसत्त्वात्
२५ शशाश्वविषाणवत्। निष्पन्नयोश्च पारतन्त्र्याभावादसम्बन्ध एव। उक्तञ्च-

"पारतन्त्र्यं हि सम्बन्धः सिद्धे का परतन्त्रता।
तस्मात्सर्वस्य भावस्य सम्बन्धो नास्ति तत्त्वतः॥ १॥"

[सम्बन्धपरी०]

३० नापि रूपश्लेषलक्षणोसौ[7]; सम्बन्धिनोर्द्वित्वे रूपश्लेषविरो-

१ अर्थक्रियाकारणम्। २ सौगतैः। ३ अनुमानत्रयेण क्षणिकत्वं पदार्थानां न सिध्यति यतः। ४ रूपरसगन्धस्पर्शपरमाणूनां सजातीयविजातीयव्यावृत्तानां परस्परमसम्बद्धानाम्। ५ सम्बन्धिनि। ६ सह्यविन्ध्ययोरिव। ७ अन्योन्यस्वभावानुप्रवेशलक्षणः।

धात्। तयोरैक्ये वा सुतरां सम्बन्धाभावः, सम्बन्धिनोरभावे सम्बन्धायोगात् द्विष्ठत्वात्तस्य। अथ नैरन्तर्यं तयो रूपश्लेषः; न; अस्यान्तरालाभावरूपत्वेनाऽतात्त्विकत्वात् सम्बन्धरूपत्वायोगः। निरन्तरतायाश्च सम्बन्धरूपत्वे सान्तरतापि कथं सम्बन्धो न स्यात्? ५

किञ्च, असौ रूपश्लेषः सर्वात्मना, एकदेशेन वा स्यात्? सर्वात्मना रूपश्लेषे अणूनां पिण्डः अणुमात्रः स्यात्। एकदेशेन तच्छ्लेषे किमेकदेशास्तस्यात्मभूताः, परभूताः वा? आत्मभूताश्चेत्; न एकदेशेन रूपश्लेषस्तदभावात्। परभूताश्चेत्; तैरप्यणूनां सर्वात्मनैकदेशेन वा रूपश्लेषे स एव पर्यनुयोगोऽनवस्था च स्यात्। तदुक्तम्— १०

"रूपश्लेषो हि सम्बन्धो द्वित्वे स च कथं भवेत्।
तस्मात्प्रकृतिभिन्नानां सम्बन्धो नास्ति तत्त्वतः॥ २॥"
[सम्बन्धपरी०]

किञ्च, परोपेक्षैव सम्बन्धः, तस्य द्विष्ठत्वात्। तं चापेक्षते भावः स्वयं सन्, असन्वा? न तावदसन्; अपेक्षाधर्माश्रयत्वविरोधात् खरशृङ्गवत्। नापि सन्; सर्वनिराशंसत्वात्, अन्यथा सत्त्वविरोधात्। तन्न परापेक्षा नाम यद्रूपः सम्बन्धः सिद्ध्येत्। उक्तञ्च— १५

"परापेक्षा हि सम्बन्धः सोऽसन् कथमपेक्षते।
संश्च सर्वनिराशंसो भावः कथमपेक्षते॥ ३॥" २०
[सम्बन्धपरी०]

किञ्च, असौ सम्बन्धः सम्बन्धिभ्यां भिन्नः, अभिन्नो वा? यद्यभिन्नः; तदा सम्बन्धिनावेव न सम्बन्धः कश्चित्, स एव वा न ताविति। भिन्नश्चेत्; सम्बन्धिनौ केवलौ कथं सम्बधौ(द्धौ) स्याताम्? २५

भवतु वा सम्बन्धोऽर्थान्तरम्; तथापि तेनैकेन सम्बन्धेन सह द्वयोः सम्बन्धिनोः कः सम्बन्धः? यथा सम्बन्धिनोर्यथोक्तदोषान्न कश्चित्सम्बन्धस्तथात्रापि। तेनानयोः सम्बन्धा-

१ इति चेदित्युपरितः। २ अन्तरालाभावो नैरन्तर्यमिति। ३ तुच्छभावरूपत्वादभावस्य। ४ निरन्तरतावत्पदार्थद्वयापेक्षत्वाविशेषात्। ५ अंशाः। ६ निरंशत्वादणोः। ७ सम्बन्धिनोः। ८ प्रकृत्या=स्वभावेन। ९ अणूनाम्। १० सम्बन्धलक्षणः। ११ सर्वेषु निराकांक्षत्वात्। १२ परमपेक्षते चेत्। १३ परम्। १४ सम्बन्धरहितौ। १५ सम्बन्धिभ्याम्।

न्तराभ्युपगमे चानवस्था स्यात्तत्रापि सम्बन्धान्तरानुषङ्गात्। तन्न सम्बन्धिनोः सम्बन्धबुद्धिर्वास्तवी तद्व्यतिरेकेणान्यस्य सम्बन्धस्यासम्भवात्। तदुक्तम्—

"द्वयोरेकाभिसम्बन्धात्सम्बन्धो यदि तद्द्वयोः।
के[2]ः सम्बन्धो[3]नवस्था च न सम्बन्धमतिस्तथा॥ ४॥

ततः—

तौ च भावौ तदन्य[4]श्च सर्वे ते स्वात्मनि स्थिताः।
इत्यमिश्राः स्वयं भावास्तान् मिश्रयति कल्पना[5]॥ ५॥"

[सम्बन्धपरी०]

तौ च भावौ सम्बन्धिनौ ताभ्यामन्यश्च सम्बन्धः सर्वे ते स्वात्मनि स्वस्वरूपे स्थिताः। तेनामिश्रा व्यावृत्तस्वरूपाः स्वयं भावास्तथापि तान्मिश्रयति योजयति [6]कल्पना। अत ए[7]व तद्वास्तवसम्बन्धाभावेपि तामेव कल्पनामनुरुन्धानैर्व्यवहर्तृभिर्भावानां [8]भेदोऽन्यापोह[9]स्तस्य प्रत्यायनाय क्रियाकारकादिवाचिनः शब्दाः प्रयोज्यन्ते-'देवदत्त गामभ्याज शुक्लां दण्डेन' इत्यादयः। न खलु कारकाणां क्रियया सम्बन्धोस्ति; क्षणिकत्वेन क्रियाकाले कारकाणामसम्भवात्। उक्तञ्च—

"ता[10]मेव चानुरुन्धानैः क्रियाकारकवाचिनः।
भावभेदप्रतीत्यर्थं संयोज्यन्तेभिधायकाः॥ ६॥"

[सम्बन्धपरी०]

[11]कार्यकारणभावस्तर्हि सम्बन्धो भविष्यति; इत्यप्यसमीचीनम्; कार्यकारणयोरसहभाव[12]तस्तस्यापि द्विष्ठस्यासम्भवात्। न खलु कारणकाले कार्यं तत्काले वा कारणमस्ति, तुल्यकालं कार्यकारणभावानुपपत्तेः सव्येतरगोविषाणवत्। तन्न स[13]म्बन्धिनौ सहभाविनौ विद्येते येनानयोर्वर्तमानोसौ सम्बन्धः स्यात्। अद्विष्ठे च भा[14]वे सम्बन्धतानुपपन्नैव।

कार्ये कारणे वा क्रमेणासौ सम्बन्धो वर्त्तते; इत्यप्यसाम्प्रतम्; यतः क्रमेणापि भावः सम्बन्धाख्य एकत्र कारणे कार्ये

---

१ स च सम्बन्धिनौ च। २ सम्बन्धसम्बन्धिनोः। ३ अन्यथेति शेषः। ४ सम्बन्धः। ५ वासनारूपा कर्त्री। ६ अवास्तवी। ७ कल्पनैव मिश्रयति यतः। ८ स्थिरस्थूलसाधारणाकाररूपः। ९ अगोव्यावृत्तिर्गौः, अघटव्यावृत्तिर्घट इत्यादि। १० कल्पनामवास्तवीं बुद्धिम्। ११ सामान्यसम्बन्धं संदूष्य सम्बन्धविशेषं दूषयन्नाह। १२ क्षणिकत्वात्। १३ कार्यकारणलक्षणौ। १४ कार्यकारणलक्षणे।

वा वर्त्तमानोऽन्यनिस्पृहः=कार्य[1]कारणयोरन्यतरानपेक्षो नैकवृ-त्तिमान् सम्बन्धो युक्तः, तदभावेपि=कार्य[2]कारणयोरभावे[3]पि तद्भावात्। यदि पुनः कार्यकारणयोरेकं कार्यं[4] कारणं[5] वापेक्ष्या-न्यत्र कार्ये कारणे वासौ सम्बन्धः क्रमेण वर्त्तत इति सस्पृह-त्वेन द्विष्ठ एवेष्यते; तदानेनापेक्ष्यमाणे[6]नोपकारिणा[7] भवितव्यं ५ यस्मादुपकार्यऽपेक्ष्यः स्यान्नान्यः। कथं चोपकरोत्यऽसन्? यदा कारणकाले कार्याख्यो भावोऽसन् तत्काले वा कारणाख्यस्तदा नैवोपकुर्यादसामर्थ्यात्[10]।

किञ्च, यद्येकार्था[11]भिसम्बन्धात्कार्यकारणता तयोः कार्यकार-णभावत्वेनाभिमतयोः; तर्हि द्वित्वसंख्यापर[12]त्वापरत्वविभागादि- १० सम्बन्धात्[13]प्राप्ता सा सव्येतरगोविषाण[14]योरपि। न येन केनचिदेकेन सम्बन्धात्सेष्यते; किं तर्हि? सम्बन्धलक्षणे[15]नैवेति चेत्; तन्न; द्विष्ठो हि कश्चित्पदार्थः सम्बन्धः, नातोर्थद्वयाभिसम्बन्धाद-न्यत्तस्य लक्षणम्, येनास्य संख्यादेर्विशेषो व्यवस्थाप्येत।

कस्य[16]चिद्भावे भावो[17]ऽभावे चाभावः तौ[18]उपाधी विशेषणं यस्य १५ योगस्य=सम्बन्धस्य स कार्यकारणता यदि न सर्वसम्बन्धः; तदा तावेव योगोपाधी[19] भावाभावौ कार्यकारणता[20]ऽस्तु किमसत्स-म्बन्धकल्पनया? मैवं[21] चेत् 'भावे हि भावो[22]ऽभावे चाभावः' इति[23] बहवोभिधेयाः[24] कथं कार्यकारणतेत्येकार्थाभिधायिना शब्दे-नोच्यन्ते? नन्वयं शब्दो[25] नियोक्तारं समाश्रितः। नियोक्ता हि यं २० शब्दं यथा[26] प्रयुङ्क्ते तथा प्राह[27], इत्यनेकत्राप्येका[28] श्रुतिर्न विरुध्यते इति तावेव कार्यकारणता।

यस्मात् पश्यन्नेकं कारणाभिमतमुपलब्धिलक्षणप्राप्तस्याऽदृष्टस्य[29] कार्याख्यस्य दर्शने सति तददर्शने च सत्यऽपश्यत्कार्यमन्वेति

---

१ 'अन्यनिस्पृहस्य' प्रत्यर्थः। २ प्रत्यर्थः। ३ अन्यतरस्य। ४ अस्य कार्यस्येदं कारणमिति। ५ हेतोः। ६ कार्येण कारणेन वा। ७ सम्बन्धेन। ८ लोके। ९ कार्ये कारणमपेक्ष्य कारणे कार्यमपेक्ष्य यो वर्त्तते सम्बन्धस्तम्। १० खरविषाणादिवत्। ११ सम्बन्धलक्षण। १२ द्वन्द्वः। १३ आदिना पृथक्त्वादि। १४ द्वित्वसंख्यालक्षणै-कार्थाभिसम्बन्धस्याविशेषात्। १५ एकेन सह। १६ कार्यस्य कारणस्य वा। १७ कार्य-कारणतायाः स्यात्। १८ भावाभावौ। १९ उपाधिः=विशेषणम्। २० सम्बन्धः। २१ जैनानाशङ्क्याह बौद्धः। २२ भावाभावाभ्यां कार्यकारणभावसम्बन्धस्य। २३ सम्ब-न्धस्य। २४ चत्वारोऽर्थाः। २५ कार्यकारणसम्बन्धप्रतिपादकः कार्यकारणलक्षणः। २६ एकार्थमभिप्रेत्यानेकार्थं वाभिप्रेत्य। २७ एकार्थाननेकार्थान्वा। २८ यथोदधिशब्दः उदकानि अस्मिन्धीयन्ते स उदधिरित्यादिः। २९ कारणाभिमतपदार्थदर्शनात्पूर्वम्।

'इदमतो[1] भवति' इति प्रतिपद्यते[2] जनः[6] 'अत[4] इदं[5] जातम्' इत्याख्यातृभिर्[3]विनापि। तस्माद्दर्शनादर्शने[7]-विषयिणि विषयोपचारात्-भावाभावौ मुक्त्वा कार्यबुद्धेरसम्भवात्[8] कार्यादिश्रुतिर[9]प्यत्र[10] 'भावाभावयोर्मा लोकः प्रतिपद्दमियतीं[11] शब्दमालामभिदध्यात्'
५ इति व्यवहारलाघवार्थं निवेशिता[12]इति[13]।

अन्वयव्यतिरेकाभ्यां[14] कार्यकारणता नान्या चेत् कथं भावाभावाभ्यां सा प्रसाध्यते[15]? तदभावाभावात्[16] लिङ्गात्तत्कार्यतागतिर्याप्यनुवर्ण्यते 'अस्येदं कार्यं कारणं च'[17] इति; सङ्केतविषयाख्या सा। यथा 'गौरयं सास्नादिमत्त्वात्' इत्यनेन[18] गोव्यवहारस्य
१० विषयः प्रदर्श्यते। यतश्च[19] 'भावे[20] भाविनि=भवनधर्मिणि तद्भावः=कारणाभिमतस्य भाव एव कारणत्वम्, भावे एव कारणाभिमतस्य भाविता कार्याभिमतस्य कार्यत्वम्' इति प्रसिद्धे प्रत्यक्षानुपलम्भतो हेतुफलते। ततो भावाभावावेव कार्यकारणता नान्या। तेनैतावन्मात्रं=भावाभावौ तावेव तत्त्वं[21] यस्यार्थस्या[22]सावे
१५ तावन्मात्रतत्त्वः, सोऽर्थो[23] येषां विकल्पानां[24] ते एतावन्मात्रतत्त्वार्थाः=एतावन्मात्रबीजाः[25] कार्यकारणगोचराः[26], दर्शयन्ति घटितानिव=सम्बद्धानिवा[27]ऽसम्बद्धानप्यर्थान्। एवं घटनाच्च मिथ्यार्था[28]ः।

किञ्च, असौ कार्यकारणभूतोऽर्थो भिन्नः[29], अभिन्नो[30] वा स्यात्? यदि भिन्नः; तर्हि भिन्ने का घटना स्वस्वभावव्यवस्थितेः[31]? अथाऽ-
२० भिन्नः; तदाऽभिन्ने कार्यकारणतापि का? नैव स्यात्।

स्यादेतत्, न भिन्नस्याभिन्नस्य[32] वा सम्बन्धः। किं तर्हि? सम्बन्धाख्येनैकेन सम्बन्धात्; इत्यत्रापि भावे सत्तायाम[33]न्यस्य[34]

---

१ कथम्? तथा हि। २ स्वयम्। ३ शब्दोल्लेखमन्तरेण उपदेशकैः पुरुषैः। ४ कारणस्य। ५ कार्यस्य। ६ कार्यकारणाभिमतयोः पदार्थयोः कार्यकारणता भवत्विति। ७ दर्शनादर्शनलक्षणे ज्ञाने। ८ भावाभावावेव कार्यं, नान्यदित्यर्थः। ९ श्रुतिः=शब्दः। १० न केवलं कार्यकारणश्रुतिः किंतु। ११ भावे भावः अभावे चाऽभाव इत्येतावतीम्। १२ समर्थिता। १३ इति=सम्बन्धवादी ब्रूते। १४ भावाभावाभ्यामनुमीयमाना यदि कार्यकारणता ताभ्यामन्या तदा दूषणम्। १५ सम्बन्धकादिना। १६ तस्य=कारणस्य। १७ अस्य कारणस्येदं कार्यमस्य च कार्यस्येदं कारणमिति। १८ अनुमानेन। १९ प्रकारान्तरेण तावेव कार्यकारणतेति निरूपयति। २० कार्यलक्षणे। २१ स्वरूपम्। २२ कार्यकारणस्य। २३ अर्थः=विषयः। २४ भ्रान्तज्ञानानाम्। २५ वसः। २६ विकल्पाः। २७ प्रत्यर्थः। २८ विकल्पाः। २९ परस्परम्। ३० सम्बन्धः। ३१ कार्यकारणयोः। ३२ कार्यस्य कारणस्य वा। ३३ प्रत्यर्थोऽयम्। ३४ भिन्नस्य।

सम्बन्धस्य विश्लिष्टौ कार्यकारणाभिमतौ श्लिष्टौ स्याताम् कथं च तौ संयोगिसमवायिनौ ? आदिग्रहणात्स्वस्वाम्यादि[3]कम्, सर्वमेतेनानन्तरोक्तेन सामान्यसम्बन्धप्रतिषेधेन चिन्तितम्[4]।

संयोग्यादीनामन्योन्यमनुपकाराच्चाऽजन्यजनकभावाच्च न स[5]म्बन्धी च तादृशोनुपकार्योपकारकभूतः ।

अथास्ति कश्चित्[6]समवायी योऽवयविरूपं कार्यं[7] जनयति अतो नानुपकारादसम्बन्धितेति; तन्न; यतो जननेपि कार्यस्य केनचित्समवायिनाभ्युपगम्य[8]माने समवायी[9] नासौ तदा जननकाले कार्यस्यानिष्पत्तेः[10] । न च ततो जननात्समवायित्वं[11] सिद्ध्यति; कुम्भकारादेरपि घटे समवायित्वप्रसङ्गात् । तयोः[12] समवायिनोः परस्परमनुपकारेपि ताभ्यां वा समवायस्य नित्यतया समवायेन वा तयोः परत्र[13] वा क्वचिदनुपकारेपि सम्बन्धो यदीष्यते; तदा विश्वं परस्परासम्बद्धं समवायि परस्परं स्यात्[14] । यदि च संयोगस्य[15] कार्यत्वात्तस्य ताभ्यां[16] जननात्संयोगिता तयोः[17] तदा संयोगजननेपीष्टौ, ततः संयोगजननान्न तौ संयोगिनौ, कर्मणोपि[18] संयोगितापत्तेः[19][20] । संयोगो ह्यन्यतर[21]कर्मजः उभय[22]कर्मजश्चेष्यते । आदिग्रहणा[23]त्संयोगस्यापि[24] संयोगिता स्यात्[25] । न संयोगजननात्संयोगिता । किन्तर्हि ? स्थापनादिति[26] चेत्; न स्थितिश्च[27] प्रतिवर्णिता[28]= ग्रन्थान्तरे प्रतिक्षिप्ता[29], स्थाप्यस्थापकयोर्जन्यजनकत्वाभावान्नान्या स्थितिरिति[30] ।

"कार्यकारणभावोपि तयोरसहभावतः ।
प्रसिद्ध्यति कथं श्लिष्टोऽश्लिष्टे सम्बन्धता कथम् ॥ ७ ॥

---

१ स्वरूपेण । २ कारिकायाम् । ३ स्वामिभृत्यभावसम्बन्धादिकम् । ४ निराकृतम् । ५ अर्थः । ६ उपकारकः । ७ तन्त्वादिः । ८ सम्बन्धवादिना । ९ कार्येण समम् । १० समवायिना कारणेन कार्यस्य निष्पादनसमये कार्यस्यानिष्पन्नत्वात्कुतः कार्येण समत्वं कारणस्य ? तत्करणे सति तस्य विनष्टत्वात् । ११ तन्तूनाम् । १२ तन्तुपटयोः । १३ असमवायिनि कारणे कार्ये वा । १४ उपकारकत्वाभावाविशेषात् । १५ सम्बन्धस्य । १६ समवायिभ्याम् । १७ संयोगिनोः । १८ क्रियायाः । १९ कर्मणः सकाशात्संयोगजननात् । २० तथा च द्रव्ययोरेव हि संयोगो, न कर्मणोरेवेति मतं विघटेत । २१ शैलश्येनयोः । २२ मल्लयोः । २३ कारिकायाम् । २४ गुणरूपस्य । २५ हस्तपुस्तकसंयोगात्कायपुस्तकसंयोगस्योत्पत्तेः । २६ संयोगिभ्यां स्थाप्यपदार्थस्य संयोगलक्षणस्य स्थितिनिष्पादनात् । २७ संयोगिनोः संयोगस्य च । २८ निराकृता । २९ प्रत्यर्थः । ३० जन्यजनकभावस्तु प्रावप्रतिक्षिप्त इत्यर्थः ।

क्रमेण भाव एक[1]त्र वर्त्तमानोन्यनिस्पृहः।
तद[2]भावेपि तद्[3]भावात्सम्बन्धौ नैकवृत्तिमान् ॥ ८ ॥
यद्यपेक्ष्य तयोरेकमन्यत्रासौ प्रवर्त्तते।
उपकारी ह्यपेक्ष्यः स्यात्कथं चोपकरोत्यसन् ॥ ९ ॥
५ यद्येकार्थाभिसम्बन्धात्कार्यकारणता तयोः।
प्राप्ता द्वित्वादिसम्बन्धात्सव्येतरविषाणयोः ॥ १० ॥
द्विष्ठो हि कश्चित्सम्बन्धो नातोन्यत्तस्य लक्षणम्।
भावाभावोपधिर्योगः कार्यकारणता यदि ॥ ११ ॥
योगोपाधी न तावेव कार्यकारणतात्र किम्।
१० भेदाच्चेन्नन्वयं शब्दो नियोक्तारं[4] समाश्रितः ॥ १२ ॥
पश्यन्नेकम[5]दृष्टस्य[6] दर्शने तद[7]दर्शने।
अपश्यत्कार्यमन्वेति विना व्याख्यातृभिर्जनः ॥ १३ ॥
दर्शनादर्शने मुक्त्वा कार्यबुद्धेरसम्भवात्।
कार्यादिश्रुतिरप्यत्र लाघवार्थं निवेशिता ॥ १४ ॥
१५ तद्[9]भावाभावात्[10]तत्कार्यगतिर्याप्यनुवर्ण्यते।
सङ्केतविषयाख्या सा सा[11]स्नादेर्गोगतिर्यथा ॥ १५ ॥
भावे भाविनि तद्भावो भाव एव च भाविता[12]।
प्रसिद्धे हेतुफलते प्रत्यक्षानुपलम्भतः[13] ॥ १६ ॥
एतावन्मात्रतत्त्वार्थाः कार्यकारणगोचराः।
२० विकल्पा दर्शयन्त्यर्थान् मिथ्यार्था घटितानिव ॥ १७ ॥
भिन्ने का घ[14]टनाऽभिन्ने कार्यकारणतापि का।
भावे ह्य[15]न्यस्य विश्लिष्टौ श्लिष्टौ स्यातां कथं च तौ ॥ १८ ॥
संयोगिसमवाय्यादि सर्वमेतेन चिन्तितम्।
अन्योन्यानुपकाराच्च न सम्बन्धी च तादृशः ॥ १९ ॥
२५ जननेपि हि कार्यस्य केनचित्समवायिना।
समवायी तदा नासौ न ततोतिप्रसङ्गतः ॥ २० ॥
त[16]योरनुपकारेपि समवाये परत्र वा।
सम्बन्धो य[17]दि विश्वं स्यात्समवायि परस्परम् ॥ २१ ॥
संयोगजननेपीष्टौ ततः संयोगिनौ न तौ[18]।

---

१ कार्ये कारणे वा। २ तयोः कार्यकारणयोः। ३ तस्य=सम्बन्धस्य। ४ सम्बन्धः। ५ नरम्। ६ कारणम्। ७ कार्यस्य। ८ तस्य=कारणस्य। ९ तस्य=कारणस्य। १० तस्य=कारणस्य। ११ साधनात्। १२ कार्यता। १३ अन्वय-व्यतिरेकतः। १४ सम्बन्धः। १५ सम्बन्धस्य। १६ समवायिनोः। १७ तर्हीति शेषः। १८ कुतः? यतः।

कर्मादियोगितापत्तेः स्थितिश्च प्रतिवर्णिता ॥ २२ ॥”

[सम्बन्धपरी०] इति ।

अस्तु वा कार्यकारणभावलक्षणः सम्बन्धः, तथाप्यस्य प्रतिपन्नस्य, अप्रतिपन्नस्य वा सत्त्वं सिद्ध्येत्? न तावदप्रतिपन्नस्य; अतिप्रसङ्गात्[1]। प्रतिपन्नस्य चेत्; कुतोस्य प्रतिपत्तिः-प्रत्यक्षेण, प्रत्यक्षानुपलम्भाभ्यां[2] वा, अनुमानेन वा प्रकारान्तराऽसम्भवात्[3]? प्रत्यक्षेण चेत्; अग्निस्वरूपग्राहिणा, धूमस्वरूपग्राहिणा, उभयस्वरूपग्राहिणा वा? न तावदग्निस्वरूपग्राहिणा; तद्धि तत्सद्भावमात्रमेव प्रतिपद्यते न धूमस्वरूपम्, तदप्रतिपत्तौ च न तदपेक्षयाग्नेः कारणत्वाव[4]गमः। न हि प्रतियोगि[5]स्वरूपाप्रतिपत्तौ तं[6] प्रति कस्यचित्[7]कारणत्वमन्यद्वा धर्मान्तरं[8] प्रत्येतुं शक्यमतिप्रसङ्गात्[9]। नापि धूमस्वरूपग्राहिणा प्रत्यक्षेण कार्यकारणभावावगमः; अत एव, उभयस्वरूपग्रहणे खलु तन्निष्ठसम्बन्धावगमो युक्तो नान्यथा। नाप्युभयस्वरूपग्राहिणा; तत्रापि हि तयोः[10] स्वरूपमात्रमेवं[11] प्रतिभासते न त्वग्नेधूमं प्रति कारणत्वं तस्यैव[12] तं प्रति कार्यत्वम्। न हि स्वस्वरूपनिष्ठपदार्थद्वयस्यैकज्ञानप्रतिभासमात्रेण[13] कार्यकारणभावप्रतिभासः, घटपटादेरपि तत्[14]प्रसङ्गात्[15]। यत्प्रतिभासानन्तरमेकत्र ज्ञाने यस्य[16] प्रतिभासस्तयोस्तदवगमः; इत्यपि तादृग्[17]; घटप्रतिभासानन्तरं पटस्यापि प्रतिभासनात्। न[18] च 'क्रमभाविपदार्थद्वयप्रतिभाससमन्वय्[19]येकं ज्ञानम्' इति वक्तुं शक्यम्; सर्वत्र[20] प्रतिभासभेदस्य भेदनिबन्धनत्वात्[21]।

अथाग्निधूमस्वरूपद्वयग्राहिज्ञानद्वयानन्तरभाविस्मरणसहकारीन्द्रियजनितविकल्प[22]ज्ञाने तद्द्वयस्य पूर्वापरकालभाविनः प्रतिभासात्कार्यकारणभावनिश्चयो भविष्यतीत्युच्यते[23]; तदप्युक्तिमात्रम्; चक्षुरादीनां तज्ज्ञानजननासामर्थ्ये[24] स्मरणसव्यपेक्षाणामपि ज्ञान[25]-

१ गगनाब्जादेरपि सत्त्वप्रसङ्गोऽप्रतिपन्नत्वाविशेषात्। २ अन्वयव्यतिरेकज्ञानाभ्याम्। ३ उक्तप्रकारेभ्यः प्रमाणान्तरस्य परेणानभ्युपगमात्। ४ अयमग्निर्धूमस्य कारणमिति। ५ प्रतियोगी=धूमः। ६ धूमम्। ७अग्न्यादेर्वस्तुनः। ८ सादृश्यादिकम्। ९ खकुसुमादिकं प्रत्यपि कस्यचित्कारणत्वप्रसङ्गात्। १० अग्निधूमयोः। ११ न त्वयमग्निर्धूमस्य कारणं धूमोऽग्नेः कार्यमिति प्रतिभासः। १२ एव। १३ युक्तः। १४ तस्य=कार्यकारणभावस्य। १५ एकज्ञानप्रतिभासमानत्वस्याविशेषात्। १६ अर्थस्य। १७ कुतः। १८ एकं ज्ञानं परिहरति परः पदार्थद्वयप्रतिभासे। १९ अनुयायि। २० ज्ञाने ज्ञेये च। २१ घटपटयोरिव। २२ तौ अग्निधूमाविति मीमांसकाभ्युपगते प्रत्यभिज्ञाप्रत्यक्षे। २३ सम्बन्धवादिना। २४ अग्निधूमद्वयकार्यकारणभावज्ञानोत्पादनासामर्थ्ये। २५ ज्ञानस्य।

कत्वविरोधात्। न हि परिमलस्मरणसव्यपेक्षं लोचनं[1] 'सुरभि चन्दनम्' इति प्रत्ययम्[2]उत्पादयति[3]। तत्सव्यपेक्षलोचनव्यापारानन्तर[4]मेते कार्यकारणभूता इत्यवभासनात्तद्भावः सविकल्पकप्रत्यक्षप्रसिद्धः; इत्यप्यसमीचीनम्; गन्धस्यापि लोचनज्ञानविषयत्वप्रसङ्गात्[5], गन्धस्मरणसहकारिलोचनव्यापारानन्तरं 'सुरभि चन्दनम्' इति प्रत्ययप्रतीतेः। तन्न प्रत्यक्षेणासौ प्रतीयते।

नापि प्रत्यक्षानुपलम्भाभ्याम्; प्रत्यक्षस्येवानुपलम्भस्यापि प्रतिषेध्य[6]विविक्तवस्तु[7]मात्रविषयत्वेनात्राऽसामर्थ्यात्। अथाग्निसद्भाव एव धूमस्य भावस्तदभावे चाभावः कार्यकारणभावः, स चैताभ्यां प्रतीयते इत्युच्यते; तर्हि वक्तृत्वस्यासर्वज्ञत्वादिना व्याप्तिः[8] स्यात्। तद्धि रागादिमत्त्वाऽसर्वज्ञत्वसद्भावे स्वात्मन्येव दृष्टम्, तदभावे चोपलशकलादौ न दृष्टम्। तथा च सर्वज्ञवीतरागाय[9] दत्तो जलाञ्जलिः[10]।

वक्तृत्व[11]स्य[12] वक्तुकामताहेतुक[13]त्वान्नायं[14] दोषः; रागादि[15]सद्भावेपि वक्तुकामताभावे तस्यासत्त्वात्। नन्वेवं[16] व्यभिचारे[17] विवक्षाप्यस्य निमित्तं न स्यात्, अन्य[18]विवक्षायामप्यन्य[19]शब्दोपलम्भात्, अन्यथा गोत्र[20]स्खलनादेरभावप्रसङ्गात्। अथार्थविवक्षाव्यभिचारेपि शब्दविवक्षायामप्यव्यभिचारः[21]; न; स्वप्नावस्थायामन्यत्र[22] गतचित्तस्य वा शब्दविवक्षाभावेपि वक्तृत्वसंवेदनात्। न[23] च व्यवहिता सा तन्निमित्तमिति वक्तव्यम्; प्रतिनियतकार्यकारणभावाभावप्रसङ्गात्, सर्वस्य[24] तत्प्राप्तेः[25]। अथ 'असर्वज्ञत्वाद्य[26]भावे सर्वत्र[27] वक्तृत्वं न सम्भवति' इत्यत्र प्रमाणाभावान्न तस्य तेन कार्यकारणभावलक्षणः प्रतिबन्धः[28] सिद्ध्यति; तद्[29]अग्निधूमादावपि समानम्।

---

२ कर्तृपदम्। २ कर्मपदम्। ३ परिमलस्मरणसव्यपेक्षत्वेपि लोचने सति चन्दनं सुरभीति ज्ञानं घ्राणेन्द्रियादेव जायत इत्यर्थः। ४ अग्निधूमादयः। ५ तदपि कुत इत्याह। ६ अग्निधूमादि। ७ महाह्रदादि। ८ असर्वज्ञत्वादिसद्भावे वक्तृत्वस्य सद्भावस्तदभावे चाभाव इति। ९ सर्वज्ञो वीतरागश्च नास्तीति भावः। १० सर्वज्ञास्तित्ववादिना जैनादिना। ११ सर्वज्ञास्तित्वं सूचयन्नाह। १२ साधनस्य। १३ न तु रागादिहेतुकत्वात्। १४ असर्वज्ञत्वलक्षणः। १५ आदिना द्वेषादि। १६ उक्तप्रकारेण। १७ वक्तृत्वसाधनस्य। १८ अग्निदत्त। १९ जिनदत्तादि। २० नाम। २१ वक्तृत्वस्य। २२ कार्यान्तरे। २३ शब्दविवक्षा यदासीत्तदा वक्तृत्वस्य निमित्तं स्यात्कार्यान्तरेणाव्यवहिता। अतोऽव्यवहिता या शब्दविवक्षा पश्चात्तन्निमित्तं भवतीत्युक्ते आह। २४ व्यवहितस्य कार्यस्य। २५ तस्य=व्यवहितकारणत्वस्य। २६ आदिना रागादिमत्त्वादि। २७ नृषु। २८ अविनाभावः। २९ यतो युक्तिमन्तरेण बौद्धेनोक्तमिति भावः।

अथ 'अग्न्यभावे धूमस्य भावे तद्धेतुकताविरहात्[1] सकृदप्यहेतो-रग्नेस्तस्य भावो न स्यात्, दृश्यते च महानसादावग्नितः[2], ततो नानग्नेर्धूमसद्भावः' इति[3] प्रतिबन्धसिद्धिरित्यभिधीयते[4]; तदप्यभिधानमात्रम्; यथैव हीन्धनादेरेकदा समुद्भूतोप्यग्निः अन्यदारणिनिर्मथनात् मण्यादेर्वा भवन्नुपलभ्यते, धूमो वाग्नितो ५ जायमानोपि गोपालघटिकादौ पावकोद्भूतधूमादप्युपजायते, तथा 'अग्न्यभावेपि कदाचिद्धूमो भविष्यति' इति कुतः प्रतिबन्धसिद्धिः? अथ 'यादृशोग्निरिन्धनादिसामग्रीतो जायमानो दृष्टो न तादृशोऽरणितो मण्यादेर्वा । धूमोपि यादृशोग्नितो न तादृशो गोपाल-घटिकादौ वह्निप्रभवधूमात्, अन्यादृशात्तादृशभावेतिप्रसङ्गात्' १० इति नाग्निजन्यधूमस्य तत्सदृशस्य चानग्नेर्भावः । भावे वा तादृशधूमजनकस्याग्निस्वभावतैव इति न व्यभिचारः । तदुक्तम्—

"अग्निस्वभावः शक्रस्य मूर्धा यद्यग्निरेव सः ।
अथानग्निस्वभावोसौ धूमस्तत्र कथं भवेत् ॥"

[प्रमाणवा० ३।३५] इत्यादि । १५

तदेतद्वक्तृत्वेपि समानम्-'तद्धि सर्वज्ञे वीतरागे वा यदि स्यात्, असर्वज्ञाद्रागादिमतो वा कदाचिदपि न स्यादहेतोः सकृदप्यसम्भवात्, भवति च तत्तः, अतो न सर्वज्ञे तस्य तत्सदृशस्य वा सम्भवः' इति प्रतिबन्धसिद्धिः ।

किञ्च, कार्यकारणभावः सकलदेशकालावस्थिताखिलाग्निधूम- २० व्यक्तिक्रोडीकरणेनावगतोऽनुमाननिमित्तम्, नान्यथा । न च निर्विकल्पकसविकल्पकप्रत्यक्षस्येयति वस्तुनि व्यापारः, प्रत्यक्षानुपलम्भयोर्वा ।

किञ्च, कार्योत्पादनशक्तिविशिष्टत्वं कारणत्वम् । न चासौ शक्तिः प्रत्यक्षावसेया किन्तु कार्यदर्शनगम्या, २५

"शक्तयः सर्वभावानां कार्यार्थापत्तिगोचराः"
[मी० श्लो० शून्यवाद श्लो० २५४] इत्यभिधानात् ।

---

१ धूमोग्नेः कार्यं न भवतीति भावः । २ तस्य भावः । ३ अनेन प्रकारेण । ४ कार्यकारणयोरविनाभावसिद्धिः । ५ जैनादिना भवता । ६ सूर्यकान्तादेः । ७ धूमाग्निलक्षणकार्यकारणयोः । ८ मतम् । ९ न दृष्ट इति संबन्धः । १० वह्निप्रभवधूम । ११ जलादग्निसद्भावप्रसङ्गात् । १२ अर्थस्य । १३ धूमाग्निलक्षणकार्यकारणयोः । १४ तर्हि । १५ कुतः ? । १६ वक्तृत्वस्य । १७ वक्तृत्वस्यासर्वज्ञत्वादिना । १८ आवृत्तत्वेन पक्वत्वेन च ।

तत्र कार्या[1]त्कार[2]णत्वावगमेऽनुमानाच्छक्त्यवगमः स्यात्। तत्रापि शक्तिकार्ययोः प्रतिबन्ध[3]प्रतीतिर्न प्रत्यक्षादेः; उक्तदोषानुषङ्गात्। अनुमानात्तदवगमेऽनवस्थेतरेतराश्रयानुषङ्गो वा स्यात्। एतेन [4]तृतीयोपि पक्षश्चिन्तित इति।

तदेतत्[5]सर्वमसमीचीनम्; सम्बन्धस्याध्यक्षेणैवार्थानां प्रतिभासनात्; [6]तथाहि-पटस्तन्तुसम्बद्ध एवावभासते, रूपादयश्च पटादिसम्ब[7]द्धाः। सम्बन्धाभावे तु तेषां विश्लिष्टः[8] प्रतिभासः स्यात्, [9]तमन्तरेणान्यस्य संश्लिष्टप्रतिभासहेतोरभावात्। कथं च सम्बन्धे प्रतीयमा[10]नेऽप्रतीयमानस्याप्यसम्ब[11]न्धस्य कल्पना [12]प्रतीतिविरोधात्? अर्थक्रियाविरोधश्च, अणू[13]नामन्योन्यमसम्बन्धतो जलधारणाहरणाद्यर्थक्रियाकारित्वानुपपत्तेः। रज्जुवंशदण्डादीनामेकदेशाकर्षणे तदन्या[14]कर्षणं चासम्बन्धवा[15]दिनो न स्या[16]त्। [17]अस्ति चैतत्सर्वम्। अतस्तदन्यथानुपप[18]त्तेश्चासौ सिद्धः।

यच्च-'पारतन्त्र्यं हि' इत्याद्युक्तम्; तदप्ययुक्तम्; एक[19]त्वपरिणतिलक्षणपारतन्त्र्यस्यार्था[20]नां प्रतीतितः सुप्रसिद्धत्वात्, अन्यथोक्तदोषानुषङ्गः[21]। न चार्थानां सम्बन्धः सर्वात्मनैकदेशेन वाभ्युपगम्य[22]ते येनोक्त[23]दो[24]षः स्यात् [25]प्रकारान्तरेणैवास्याभ्युपग[26]मात्। सर्वात्मैकदेशाभ्यां हि तस्यासम्भवात् प्रकारा[27]न्तरस्य वा भावात्, तत्प्रतीत्यन्यथानुपपत्तेश्च ताभ्यां जात्यन्तरत[28]या श्लेषः स्निग्धरूक्षतानिबन्धनो बन्धोऽभ्युपगन्त[29]व्योऽसौ सक्तुतोयादिवत्। विश्लिष्टरूपतापरित्यागेन हि संश्लिष्टरूप[30]तया [31]कथञ्चिदन्य[32]थात्वलक्षणैकत्वपरिणतिः सम्बन्धोऽर्थानां चित्रसंवेदने नीलाद्याकारवत्। न हि चित्रसंविदो[33] जात्यन्तररूप[34]तयोत्पा[35]दा-

---

१ धूमादेः। २ अग्न्यादेः। ३ कार्यकारणभावरूपेण। ४ अनुमानेन वासौ कार्यकारणभावः प्रतीयते इति। ५ बौद्धोक्तम्। ६ कथमर्थानां सम्बन्धस्याध्यक्षेण प्रतिभासनमित्युक्ते सत्याह। ७ अवभासन्ते। ८ पटादेः सकाशाद्भिन्नः। ९ अन्यः कश्चित्संश्लिष्टप्रतिभासहेतुर्भविष्यतीत्युक्ते सत्याह। १० प्रत्यक्षेण। ११ अर्थानाम्। १२ अन्यथेति शेषः। १३ असम्बन्धपक्षे। १४ अन्यस्य=शेषसकलभागस्य। १५ सौगतस्य। १६ परस्परमसम्बद्धत्वात्। १७ मा भवत्वित्युक्ते सत्याह। १८ अनुमानतः। १९ स्कन्धरूपेण। २० बाह्याध्यात्मिकानाम्। २१ तव सौगतस्य स्यात्। २२ जैनैः। २३ सौगतोक्त। २४ पिण्डोणुमात्रः स्यादित्यादिः। २५ कथं तर्हि सम्बन्ध इत्युक्ते सत्याह। २६ जैनैः। २७ अपरप्रकारस्य। २८ प्रकारान्तरत्वेन। २९ परेण। ३० एकलोलीभावात्मलक्षणया। ३१ पर्यायरूपेण। ३२ आदौ दधिगुडौ पृथक् तिष्ठतः पश्चात्संयोगेन कृत्वाऽन्यथास्वभावं पर्यायरूपं पानकं जातमिति। ३३ ज्ञानस्य। ३४ कथञ्चिन्नीलाकारेभ्योऽशक्यविवेचनत्वेन। ३५ उत्पत्तेः।

द[1]न्यो नीलाद्यनेकाकारैः सम्बन्धः, सर्वात्मनैकदेशेन वा तैस्तस्याः सम्बन्धे[2] प्रो[3]क्ताशेषदोषा[4]नुषङ्गाविशेषात्।

स चैवंविधः सम्बन्धोर्थानां [6]क्वचिन्निखिलप्रदेशानामन्योन्य-प्रदेशानुप्रवेश[5]तः-यथा सक्तुतोयादीनाम्, क्वचित्तु प्रदेशसंश्लि[7]ष्ट-तामात्रेण-यथाङ्गुल्यादीनाम्। न चान्तर्बहिर्वा सांशवस्तुवा[9]दिनः सांशत्वानुषङ्गो दोषाय; इष्टत्वात्। न चैवमनवस्था; त[10]द्गतस्तत्प्रदे-शानाम[11]त्यन्तभेदाभावात्। तद्भेदे हि ते[12]षामपि तद्गता प्रदेशान्तरैः सम्बन्ध इत्यनवस्था स्यात् नान्यथा, अनेकान्ता[13]त्मकवस्तुनोऽ-त्यन्तभेदाभे[14]दाभ्यां जात्यन्तरत्वाच्चित्रसंवेदनवदेव।

[15]नन्वेवं परमाणूनामप्यंशवत्त्वप्रसङ्गः स्यात्; इत्यप्यनुत्तरम्; यतोऽत्रांशशब्दः स्वभावार्थः, अवयवार्थो वा स्यात्? यदि स्वभा-[16]वार्थः; न कश्चिद्दोषस्तेषां विभिन्नदिग्विभागव्यवस्थितानेकाणुभिः सम्बन्धा[17]न्यथानुपपत्त्या तावद्धा स्वभावभेदोपपत्तेः। अवयवार्थस्तु तत्रासौ नोपपद्यते; तेषामभेद्यत्वेनावयवासम्भवात्। न [18]चैवं तेषामविभागित्वं विरुध्यते, यतोऽविभागित्वं भेदयितुमशक्यत्वं न पुनर्निःस्वभावत्वम्।

यत्तूक्तम्-'निष्पन्नयोरनिष्पन्नयोर्वा पारतन्त्र्यलक्षणः सम्बन्धः स्यात्' इत्यादि; तदप्यसारम्; कथञ्चिन्निष्पन्नयोस्तदभ्युपगमात्। [19]पटो हि तन्तुद्रव्यरूपतया निष्पन्न एव अन्वयि[20]नो द्रव्यस्य पटपरि-णामोत्पत्तेः प्रागपि सत्त्वात्, [21]स्वरूपेण त्वऽनिष्प[22]न्नः, तन्तुद्रव्यमपि स्वरूपेण निष्पन्नं पटपरिणामरूपतयाऽनिष्पन्नम्। तथाङ्गुल्यादि-द्रव्यं स्वरूपेण निष्पन्नम् संयोगपरिणामात्मकत्वेनानिष्पन्नमिति।

किञ्च, पारत[23]न्त्र्यस्याऽभावाद्भावानां सम्बन्धाभावे तेन व्याप्तः क्वचि[24]त्सम्बन्धः [25]प्रसिद्धः, न वा? प्रसिद्धश्चेत्; कथं सर्वत्र सर्वदा सम्बन्धाभावः विरो[26]धात्? नो चे[27]त्; कथमव्या[28]पकाभावादव्या[29]प्य-व्याभावसिद्धि[30]रतिप्रस[31]ङ्गात्?

१ भिन्नः। २ सांगतेन। ३ पिण्डोणुमात्रः स्यादित्यादि। ४ सांशत्वादि। ५ इति प्रतिबन्धविधानम्। ६ सम्बन्धिनि पदार्थे। ७ भवति। ८ सम्बन्धमात्रेण। ९ जैनस्य। १० पदार्थात्। ११ सर्वथा। १२ कथञ्चिद्भेदे। १३ अन्तो=धर्मः, कथञ्चिद्भेदाभेदरूपस्य। १४ सर्वथानेकत्वैकत्वाभ्याम्। १५ सांशवस्तुप्रकारेण। १६ तर्हि। १७ स्वभावभेदाऽभावे। १८ स्वभावभेदसम्भवे। १९ कथम्। २० तन्त्वादेः। २१ पटरूपेण। २२ पटः। २३ भावानां सम्बधो नास्ति पारतन्त्र्या-भावात्। २४ दृष्टान्ते। २५ ज्ञातः। २६ ज्ञातत्वस्य। २७ अथ न प्रसिद्धस्तर्हि। २८ असाध्य। २९ असाधनस्य। ३० अन्यथा। ३१ घटाभावे पटाभावप्रसङ्गात्।

'रूपश्लेषो हि' इत्याद्यप्येकान्तवादिनामेव[1] दूषणं नास्माकम्; कथञ्चित्सम्बन्धिनोरेकत्वापत्ति[2]स्वभावस्य रूपश्लेषलक्षणसम्बन्धस्याभ्युपगमात्। अशक्यविवेचनत्वं[3] हि सम्बन्धिनो रूपश्लेषः, असाधारणस्वरूपता[4] च तदऽश्लेषः[5]। स चानयोर्द्वित्वं न विरुन्ध्यात् तथा प्रतीतेश्चित्राकारैकसंवेदनवत्[6]। न चापेक्षिकत्वात्सम्बन्धस्वभावो मिथ्याऽर्थानां सूक्ष्मत्वादिवदित्यभिधातव्यम्[7]; असम्बन्धस्वभावस्यापि[8] तथाभावानुषङ्गात्[9]। सोपि ह्यापेक्षिक एव कञ्चिदर्थमपेक्ष्य कस्यचित्तद्व्यवस्थित्यन्यथानुपपत्तेः[10] स्थूलतादिवत्। 'प्रत्यक्षबुद्धौ[11] प्रतिभासमानः सोनापेक्षिक[12] एव तत्पृष्ठभाविविकल्पेनाध्यवसीयमानो यथापेक्षिकस्तथाऽवास्तवोपि' इत्यन्यत्रापि समानम्। न खलु सम्बन्धोऽध्यक्षेण न प्रतिभासते यतोऽनापेक्षिको न स्यात्[13]।

एतेन[14] 'परापेक्षा हि' इत्याद्यपि[15] प्रत्युक्तम्; असम्बन्धेपि समानत्वात्[16]।

'द्वयोरेकाभिसम्बन्धात्' इत्याद्यप्यविज्ञातपराभिप्रायस्य[17][18] विजृम्भितम्; यतो नास्माभिः सम्बन्धिनोस्तथापरिणति[19]व्यतिरेकेणान्यः सम्बन्धोभ्युपगम्यते, येनानवस्था स्यात्।

तथा[20] च 'तामेव चानुरुन्धानैः' इत्याद्यप्ययुक्तम्; क्रियाकारकादीनां[21] सम्बन्धिनां तत्सम्बन्धस्य च प्रतीत्यर्थं तदभिधायकानां[22] प्रयोगप्रसिद्धेः। अन्यापोहस्य च प्रागेवापास्तस्वरूपत्वाच्छब्दार्थत्वमनुपपन्नमेव। चित्रज्ञान[23]वच्चा[24]नेकसम्बन्धि[25]तादात्म्येप्येकत्वं[26] सम्बन्धस्याविरुद्धमेव।

यदप्युक्तम्–'कार्यकारणभावोपि' इत्यादि; तदप्यविचारितरमणीयम्; यतो नास्माभिः[27] सहभावित्वं क्रमभावित्वं वा कार्य-

---

१ अनेकान्तवादिनां जैनानाम्। २ एकलोलीभाव। ३ इदं तोयमिमे सक्तव इति विभागस्य कर्त्तुमशक्यत्वात्। ४ सक्तुतोययोर्भिन्नस्वरूपता। ५ पृथक्त्वम्। ६ इदं चित्रज्ञानमिमे चित्राकारा इति। ७ परेण। ८ अर्थानाम्। ९ आपेक्षिकत्वाविशेषात्। १० आपेक्षिकत्वाभावे। ११ निर्विकल्पकबुद्धौ। १२ साधनमसिद्धमुद्भावयति। १३ स्यादेव। १४ भवदुक्त्या सम्बन्धस्य परानपेक्षित्वसमर्थनेन। १५ दूषणम्। १६ सौगतोक्तन्यायस्य। १७ जैन। १८ सौगतस्य। १९ विश्लिष्टरूपतापरित्यागेन संश्लिष्टरूपतया एकलोलीभावलक्षणपरिणतिः। २० सम्बन्धसिद्धौ। २१ देवदत्त गामभ्याजेत्यादीनाम्। २२ शब्दानाम्। २३ सम्बन्धिनामनेकत्वे सम्बन्धस्याप्यनेकत्वं स्यादित्युक्ते सत्याह। २४ चित्रैकज्ञानवत्। २५ तन्तुलक्षणैः पक्षे नीलाकारादिभिः। २६ पटस्य। २७ जैनैः।

कारणभावनिबन्धनमिष्यते। किन्तु यद्भावे नियता यस्योत्पत्तिस्तत्तस्य कार्यम्, इतरच्च कारणम्। तच्च किञ्चित्[1]सह[2]भावि, यथा घटस्य मृद्द्रव्यं दण्डादि वा। किञ्चित्तु क्रमभावि, यथा प्राक्तनः [3]पर्या[4]यः। तत्प्रतिपत्तिश्च प्रत्यक्षा[5]नुप[6]लम्भसहायेनात्मना नियते[7] व्यक्ति[8]विशेषे, तर्क[9]सहायेन[10] वाऽनियते प्रसिद्धा। [11]एकमेव[12] च ५ प्रत्यक्षं प्रत्यक्षानुपलम्भशब्दाभिधेयम्। तद्धि कार्यकारणभावाभि[13]मतार्थ[14]विषयं प्रत्यक्षम्, तद्विविक्ता[15]न्यवस्तुविषयमनुपलम्भ[16]शब्दाभिधेय[17]म्। [18]तथाहि-[19]एतावद्भिः प्रकारैर्धूमोऽग्निजन्यो न स्यात्-[20]यदि अग्निसन्निधानात्प्रागपि तत्र देशे स्यात्, अन्यतो वाऽऽगच्छेत्, तदन्यहेतुको वा भवेत्। [21]एतच्च सर्वमनुपलम्भपुरस्सरेण प्रत्य- १० क्षेण प्रत्याख्यातम्।

[22]एतेन प्रागनुपलब्धस्य रासभस्य कुम्भकारसन्निधानानन्तरमुपलभ्यमानस्य तस्य तत्कार्यता स्यादिति प्रति[23]व्यूढम्; यदि हि तस्य [24]तत्र [25]प्रागसत्त्वमन्यदेशादनागमन्[26]याहेतुकत्वं च निश्चेतुं शक्येत [27]स्यादेव कुम्भकार[28]कार्यता। तत्तु निश्चेतुमशक्यम्। १५

न च भि[29]न्नार्थग्राहि प्रत्यक्षद्वयं द्वितीया[30]ग्रह[31]णे [32]तदपेक्षं कारणत्वं कार्यत्वं वा ग्रहीतुमसमर्थमित्यभिधा[33]तव्यम्; क्षयोप[34]शमविशेष[35]वतां धूममात्रोपलम्भेऽप्यभ्यासवशाद्वह्निजन्य[36]त्वावगमप्रतीतेः, अन्यथा[37] बाष्पादिवैलक्षण्येनास्याऽनवधारणा[38]त्ततोऽप्यनुमाभावे सकलव्यवहारोच्छेदप्रसङ्गः। ततः कारणाभिमतपदार्थग्रहणपरिणामापरि- २० त्यागवतात्मना [39]कार्यस्वरूपप्रतीतिरभ्युपगन्त[40]व्या नीलाद्याकारव्याप्येकज्ञाने तत्स्वरूपवत्।

१ सहभवतीत्येवंशीलम्। २ यद् घटोत्पत्तिकाले भवति। ३ कुशूलादिः। ४ उत्तरपर्यायस्य कारणम्। ५ महानसे। ६ महाह्रदे। ७ परिमिते। ८ धूमाग्न्योः। ९ यावान् कश्चित्कार्यलक्षणपदार्थः स कारणे सति भवति, नान्यथेति। १० आत्मना। ११ अनुपलम्भशब्देन किमुच्यते इत्याह। १२ नानुमानादिकम्। १३ अग्निधूम। १४ वस्तुः। १५ महाह्रदादि। १६ 'अनुपलम्भ' इति। १७ प्रत्यक्षम्। १८ तथाहीत्यादिना प्राक् प्रतिपादितार्थं व्यतिरेकद्वारेण समर्थयते। १९ प्राक् प्रतिपादितैः प्रत्यक्षानुपलम्भादिभिः। २० तान्प्रकारानाह। २१ एवमस्तु इत्युक्ते सत्याह। २२ प्रत्यक्षानुपलम्भादिभिः कार्यकारणभावसिद्धिसमर्थनेन। २३ निराकृतम्। २४ कुम्भकारावस्थितप्रदेशे। २५ कुम्भकारसन्निधानात्। २६ कुम्भकारापेक्षया। २७ तर्हि। २८ रासभस्य। २९ अग्निधूम। ३० अग्निधूमयोर्मध्येऽन्यतरस्य। ३१ एकेन। ३२ अगृहीतकार्यकारणान्यतरापेक्षम्। ३३ परेण। ३४ कार्यकारणभावज्ञानाच्छादककर्मणः। ३५ नृणाम्। ३६ धूमस्य। ३७ पूर्वोक्तात्कारणाद्धूमस्य वन्हिजन्यत्वावगमाभावे। ३८ दूरतः। ३९ धूमोऽग्नेः कार्यमिति। ४० परेण।

ननु नालिकेरद्वीपादिवासिनामकस्माद्धूमस्याग्नेश्चोपलम्भेपि कार्यकारणभावस्यानिश्चयान्नासौ वास्तवः; तदप्यपेशलम्; बाह्यान्तःकारणप्रभवत्वात्तन्निश्चयस्य। क्षयोपशमविशेषो हि तस्यान्तःकारणम्, तद्भावभावित्वाभ्यासस्तु बाह्यम्, अकार्यकारणभावा-
५ वगमस्य त्वऽतद्भावभावित्वाभ्यासः। तदभावान्न कचित्तेषां कार्यकारणभावस्याऽकार्यकारणभावस्य वा निश्चय इति।

धूमादिज्ञानजननसामर्थ्यमात्रात्तत्कार्यत्वादिनिश्चयानुत्पत्तेर्न कार्यत्वादि धूमादेः स्वरूपमिति चेत्; तर्हि क्षणिकत्वादिरपि तत्स्वरूपं मा भूत्तत एव। क्षणिकत्वाभावेऽवस्तुत्वम् अन्यत्रापि
१० समानम्, सर्वथाप्यकार्यकारणस्य वस्तुत्वानुपपत्तेः खरशृङ्गवत्।

न च कार्यस्यानुत्पन्नस्यैव कार्यत्वं धर्मः; असत्त्वात्। नाप्युत्पन्नस्यात्यन्तं भिन्नं तत्; तद्धर्मत्वात्। तत एव कारणस्यापि कारणत्वं धर्मो नैकान्ततो भिन्नम्। तच्च ततोऽभिन्नत्वात्तद्ग्राहिप्रत्यक्षेणैव प्रतीयते तद्व्यक्तिस्वरूपवत्। दृश्यते हि पिपासाद्याक्रान्तचेत-
१५ सामितरार्थव्यवच्छेदेनाबालं तदपनोदसमर्थे जलादौ प्रत्यक्षात्प्रवृत्तिः। तच्छक्तिप्रधानतायां तु कार्यदर्शनात्तन्निर्णीयते तद्व्यतिरेकेणास्यासम्भवात्। न च स्वरूपेणाकार्यकारणयोस्तद्भावः सम्भवति। नाप्युत्तरकालं भिन्नेन तेनानयोः कार्यकारणताऽभिन्ना कर्तुं शक्या; विरोधात्। नापि भिन्ना; तयोः स्वरूपेण कार्यकारणता-
२० प्रसङ्गात्। न च स्वरूपेण कार्यकारणयोरर्थान्तरभूततत्सम्बन्धकल्पने किञ्चित्प्रयोजनं कार्यकारणतायाः स्वतः सिद्धत्वात्?

ननु कार्याप्रतिपत्तौ कथं कारणस्य कारणताप्रतिपत्तिस्तदपेक्षत्वात्तस्याः? कथमेवं पूर्वापरभागाप्रतिपत्तौ मध्यभागस्यातो व्यावृत्तिप्रतिपत्तिरपेक्षाकृतत्वाविशेषात्? ततः "पश्यन्नयं क्षणि-

१ कारण। २ कार्यस्य। ३ पुनः पुनर्दर्शनम्। ४ कारणम्। ५ बाह्यान्तः-कारणयोः। ६ अग्निधूमयोरुपलम्भेपि येषां बाह्यान्तःकारणे स्तस्तेषामेव तयोः कार्यकारणभावपरिच्छित्तिर्नान्येषामिति भावः। ७ नेत्रादि। ८ वह्नि। ९ आदिना कारणत्वादि। १० आदिनाग्न्यादेः। ११ धूमादिज्ञानसामर्थ्यमात्रात् क्षणिकत्वानिश्चयादेव। १२ धूमादिकं धर्म्यऽवस्तु भवतीति साध्यमकार्यकारणत्वात्खरविषाणवत्। १३ धर्मधर्मिणोरत्यन्तभेदाभावात्। १४ सन्दिग्धानैकान्तिकत्वेयं परिहारः। १५ कारणभूते। १६ कारणत्वम्। १७ कार्यस्य। १८ घटपटयोरिव। १९ कारणात्। २० सम्बन्धेन। २१ अभिन्ना चेत्कथं भिन्नेन सम्बन्धेन विधीयते? विधीयते चेत्कथमभिन्नेति विरोधः। २२ अग्न्यादेः। २३ क्षणविशेषणम्। २४ वर्तमानक्षणस्य। २५ पूर्वापरभागाद्व्यावृत्तिर्मध्यक्षणस्येति प्रतिपत्तिः कथं घटते। २६ मध्यभागस्यातो व्यावृत्तिप्रतिपत्त्यभावतः। २७ योगी।

कमेव पश्यति" इति [ ] वचो विरुध्येत। मध्यक्षणस्वभावत्वोत्तद्व्यावृत्तेः तद्ग्राहिज्ञानेन प्रतिपत्तिश्चेत्; तर्हि कार्योत्पादनशक्तेः कारणस्वभावत्वात्तद्ग्राहिणैव ज्ञानेन प्रतिपत्तिरिष्यतां विशेषाभावात्। उक्ता च कार्यप्रतिपत्तिः प्रत्यक्षादिसहायेनात्मनेत्युपरम्यते।

किञ्च, कार्यानिश्चये शक्तेरप्यनिश्चये नीलादिनिश्चयोपि मा भूत्। यदेव हि तस्याः कार्यं तदेव नीलादेरपि, अनयोरभेदात्। वक्तृत्वस्य चासर्वज्ञत्वादिना व्याप्त्यसम्भवः सर्वज्ञसिद्धिप्रघट्टके प्रतिपादितः।

न चेन्धनादिप्रभवपावकस्य मण्यादिप्रभवपावकादभेदो येन नियतः कार्यकारणभावो न स्यात्। अन्यादृशाकारो हीन्धनप्रभवः पावकोऽन्यादृशाकारश्च मण्यादिप्रभवः। तद्विचारे च प्रतिपत्त्रा निपुणेन भाव्यम्। यत्नतः परीक्षितं हि कार्यं कारणं नातिवर्त्तते। कथमन्यथा वीतरागेतरव्यवस्था तच्चेष्टायाः साङ्कर्योपलम्भात्?

कथं चैवंवादिनो मृतेतरव्यवस्था स्यात्? व्यापारव्याहाराकारविशेषस्य हि कैश्चिच्चैतन्यकार्यतयोपलम्भे सत्यस्त्यत्र जीवच्छरीरे चैतन्यं व्यापारादिकार्यविशेषोपलम्भात्, मृतशरीरे तु नास्ति तदनुपलम्भादिति कार्यविशेषस्योपलम्भानुपलम्भाभ्यां कारणविशेषस्य भावाभावप्रसिद्धेस्तद्व्यवस्था युज्येत।

अकार्यकारणभावेपि चैतत्सर्वं समानम्-सोपि हि द्विष्ठः कथमसहभाविनोः कार्यकारणत्वाभ्यां निषेध्ययोर्वर्तेत? न चाद्विष्ठोसौ सम्बन्धाभावविरोधात्। पूर्वत्र भावे वर्त्तित्वा परत्र क्रमेणासौ वर्त्तमानोऽन्यनिस्पृहत्वेनैकवृत्तिमत्त्वात्कथं सम्बन्धाभावरूपतां प्रतिपद्येत? अथाकार्यकारणयोरेकमपेक्ष्यान्यत्रासौ क्रमेण वर्त्तत इति सस्पृहत्वेनास्य द्विष्ठत्वात्तदभावरूपते-

१ वचः। २ एव। ३ कारस्य। ४ मध्यक्षणस्वभावत्वाद्व्यावृत्तेस्तद्ग्राहिज्ञानेन प्रतिपत्तिघटते, कार्योत्पादनशक्तेः कारणभावत्वात्तद्ग्राहिज्ञानेन प्रतिपत्तिर्नेत्यत्र। ५ कारणसम्बन्धिन्याः कार्योत्पादनलक्षणायाः। ६ तव सौगतस्य। ७ कुतः। ८ शक्तिनीलाद्योः। ९ निरंशवस्तुवादिमते। १० जैनैः। ११ किंतु भेद एव। १२ सर्वज्ञेन। १३ अग्न्यादिलक्षणम्। १४ इन्धनमण्यादिकम्। १५ जपतपोध्यानादेः। १६ दृष्टान्तभूते। १७ कथम्। १८ गोमहिषयोः। १९ अकार्यकारणयोः। २० अनयोः सम्बन्धाभावो यतः। २१ अकार्यकारणभावतः सम्बन्धाभावरूपो न भवत्यद्विष्ठत्वाद्घटसत्त्ववत्। २२ अभावात्। २३ अकारणे। २४ अकार्ये। २५ यथास्माकं सम्बन्धो न घटते तथा तवापीत्यर्थः। २६ असम्बन्धस्य।

ष्यते[1]; तदा तेना[2]पेक्ष्यमाणेनो[3]पकारिणा भवितव्यम्। 'कथं चोपकरो[4]त्यसन्' इत्यादि सर्वमत्रापि योजनीयम्।

अकार्यकारणभावस्या[5]प्यर्था[6]नामनभ्युपगमे[7] तु कार्यकारणभावो वास्तवः स्यात्। उभयाभावस्तु न युक्तः विरोधात्, क्वचिन्नीलेतरत्वाभाववत्[8]। ततो[9] यथा कुतश्चित्प्रमाणादकार्यकारणभावो[10] गवाश्वादीनामतद्भावभावित्वप्रतीतेः[11] परस्परं परमार्थतो व्यवतिष्ठते, तथाग्निधूमादीनां तद्भावभावित्वप्रतीतेः[11] कार्यकारणभावो[12]पि बाधकाभावात्[13]। तत्र प्रमाणतः प्रतीयमानः सम्बन्धः[14] स्वा[15]भिप्रेततत्त्व[16]वन्निह्नवनीयो येन स्थूलादिप्रतीतेर्भ्रान्तत्वात्तत्स्वभावतार्थस्य न स्यात्[17]। चित्रज्ञानवद्युगपदेकस्या[18]नेकाकारसम्बन्धित्ववत्क्रमेणापि तत्तस्या[19]विरुद्धम्। इति सिद्धं परापरविवर्त्तव्याप्येकद्रव्यलक्षणमूर्ध्वतासामान्यम्।

यथा च द्वेधा सामान्यं तथा—

विशेषश्च ॥ ७ ॥

चकारोऽपिशब्दार्थे। कथं तद्द्वैविध्यमित्याह—

पर्यायव्यतिरेकभेदात् ॥ ८ ॥

तत्र पर्यायस्वरूपं निरूपयति—

एकस्मिन्द्रव्ये क्रमभाविनः परिणामाः पर्यायाः[20] आत्मनि हर्षविषादादिवत् ॥ ९ ॥

अत्रोदाहरणमाह आत्मनि हर्षविषादादिवत्।

ननु हर्षादिविशेष[21]व्यतिरेके[22]णात्मनोऽसत्त्वादयुक्तमिदमुदाहरणमित्यन्यैः[23]; सोप्यप्रेक्षापूर्वकारी; चित्रसंवेदनवदनेकाकारव्यापित्वेनात्मनः स्वसंवेदनप्रत्यक्षप्रसिद्धत्वात्। 'यद्यथा प्रतिभासते तत्त-

---

१ सौगतेन मया। २ असम्दन्वेन। ३ अकारणेनाऽकार्येण वा। ४ अकार्यनकारणं वा। ५ असम्बन्धे। ६ न केवलं कार्यकारणभावस्य। ७ परेण। ८ उक्तप्रकारेण सम्बन्धो निराकर्तुं न शक्यते यतः। ९ असम्बन्धः। १० नराश्ववत्। ११ चैतन्यव्याहारादिकार्यवत्। १२ परस्परं परमार्थतो व्यवतिष्ठते। १३ उभयत्र। १४ कार्यकारणाविनाभावः। १५ सौगत। १६ असम्बन्धादिवत्। १७ किंतु स्यादेव। १८ ज्ञानस्य। १९ जीवादिपदार्थस्य। २० ज्ञानसुखवीर्यदर्शनादय आत्मनः सहभावित्वाद्गुणाः स्युः। क्रमभावित्वाच्च पर्यायाश्च भवन्ति—कुतो वस्तुनोऽनेकधर्मात्मकत्वात्। २१ भेद। २२ अपरस्य। २३ सौगतः।

थैव व्यवहर्तव्यम्, यथा वेद्या[1]द्याकारात्मसंवेदनरूपतया प्रतिभासमानं संवेदनम्, सुखा[2]द्यनेकाकारैकात्मतया प्रतिभासमानश्चात्मा' इत्यनुमानप्रसिद्धत्वाच्च।

सु[3]खदुःखादिपर्यायाणामन्योन्यमेका[4]न्ततो भेदे[5] च 'प्रागहं सुख्यासं सम्प्रति दुःखी वर्ते' इत्यनु[6]सन्धानप्रत्ययो न स्यात्। तथाविधवासनाप्रबोधादनुसन्धानप्रत्ययोत्पत्तिः; इत्यप्यसत्यम्; अनुसन्धानवासना हि यद्यनुसन्धी[7]यमानसुखादिभ्यो भिन्ना[8]; तर्हि सन्तानान्तरसुखादिवत्स्वसन्तानेऽप्यनु[9]सन्धानप्रत्ययं नोत्पादयेद्विशेषात्[10]। तदभिन्ना चेत्[11]; तावद्धा[12] भिद्येत। न खलु भिन्नादभिन्नम[13]भिन्नं नाम[14]ऽतिप्रसङ्गा[15]त्। तथा[16] तत्[17]प्रबोधात्कथं सुखादिष्वेकम[18]नुसन्धानज्ञानमुत्पद्येत[19]? तेभ्यस्तस्याः कथञ्चिद्भेदे नाम[20]मात्रं भिद्येत—अहमहमिकया स्वसंवेदन[21]प्रत्यक्षप्रसिद्धस्यात्मनः सहक्रमभाविनो गु[22]णपर्यायानात्मसात्कुर्वतो 'वासना' इति नामान्तरकरणात्।

क्रमवृत्तिसुखा[23]दीनामेकसन्ततिपतितत्वेनानुसन्धाननिबन्धनत्वम्; इत्यपि तादृगेव; आत्मनः सन्ततिशब्देनाभिधानात्। तेषां क[24]थञ्चिदेकत्वाभावे नैकपुरुषसुखादिवदेकसन्ततिपतितत्वस्याप्ययोगात्।

आत्मनोऽनभ्युपगमे च कृतनाशाकृताभ्यागमदोषानुषङ्ग[25]ः। क[26]र्तुर्निरन्वयनाशे हि कृतस्य कर्मणो नाशः क[27]र्तुः फ[28]लानभिसम्बन्धात्, अकृताभ्यागमश्च अकर्त्तु[29]रेव फलाभिसम्बधात्। ततस्तद्दोषपरिहारमि[30]च्छतात्मानुगमोऽभ्युपगन्तव्यः। न चाप्रमाणकोयम्; तत्सद्भावावेदकयोः स्वसंवेदनानुमानयोः प्रतिपादनात्।

'अहमेव ज्ञात[31]वानहमेव वे[32]द्मि' इत्यादेरेकप्रमातृविषयप्रत्यभिज्ञानस्य च सद्भावात्। तथा चोक्तं भट्टेन—

---

१ आदिना वेदकसंविसिग्रहः। २ हर्षविषादादिग्रहः। ३ साधनमसिद्धमित्युक्ते सत्याह। ४ सर्वथा। ५ आत्मनः सकाशात्। ६ प्रत्यभिज्ञान। ७ गम्यमान। ८ सर्वथा। ९ सुखादिस्वरूपेण। १० उभयत्र भिन्नत्वस्य। ११ तर्हि। १२ सुखादयो यावन्तः। १३ एकम्। १४ अन्यथा। १५ घटपटादिभ्योऽभिन्नानां तत्स्वरूपाणां भिन्नत्वप्रसङ्गात्। १६ वासनाया अचेतनत्वे च। १७ अनेकवासना। १८ अनेकसुखानुसन्धानज्ञानमुत्पद्येतेत्यर्थः। १९ कारणबहुत्वे कार्यबहुत्वमिति वचनात्। २० आत्मा वासनेति च। २१ अहं सुख्यहं दुःखीति। २२ स्वधर्मान्। २३ हर्षविषादादीनां च। २४ आत्मद्रव्यापेक्षया। २५ कथम्?। २६ कर्मणः। २७ पुरुषस्य। २८ कर्मणः। २९ कर्मफलकाले तदभावात्। ३० सौगतेन। ३१ पूर्वम्। ३२ इदानीम्।

"तस्मादुभय[1]हानेन[2] व्या[3]वृत्त्यनुग[4]मात्म[5]कः ।
पुरुषोऽभ्युपगन्तव्यः कुण्डलादिषु[6] सर्प[7]वत् ॥"
[मी० श्लो० आत्मवाद श्लो० २८] इति ।

"तस्मात्तत्प्रत्यभिज्ञानात्सर्वलोकावधारितात् ।
५ नैरा[8]त्म्यवादबाधः स्यादिति सिद्धं समीहितम् ॥"
[मी० श्लो० आत्मवाद श्लो० १३६] इति च ।

अथ कथमतः प्रत्यभिज्ञानादात्मसिद्धिरिति चेत्? उच्यते-'प्रमातृविषयं तत्' इत्यत्र तावदावयो[9]रविवाद एव । स च प्रमाता भवन्नात्मा भवेत्, ज्ञानं वा? न तावदुत्तरः पक्षः; 'अहं ज्ञातवानहमेव
१० च साम्प्रतं जानामि' इत्येकप्रमातृपरामर्शेन[10] ह्यहंबुद्धेरुपजायमानाया ज्ञानक्षणो विषयत्वेन कल्प्यमानो[11]ऽतीतो वा कल्प्येत, वर्तमानो वा, उभौ[12] वा, सन्तानो वा प्रकारान्तरासम्भवात्? तत्राद्यविकल्पे 'ज्ञातवान्' इत्ययमेवाकारावसायो[13] युज्यते[14] पूर्वं तेन ज्ञातत्वात्, 'सम्प्रति जानामि' इत्येतत्तु न युक्तम्[15], न[16] ह्यसावतीतो ज्ञानक्षणो
१५ वर्त्तमानकाले वेत्ति पूर्वमेवास्य निरुद्धत्वात्[17] । द्वितीयपक्षे तु 'सम्प्रति जानामि' इत्येतद्युक्तं तस्येदानीं वेदकत्वात्, 'ज्ञातवान्' इत्याकारग्रहणं तु न युक्तं प्रागस्यासम्भवात् । अत[18] एव न तृतीयोपि पक्षो युक्तः; न खलु वर्तमानातीतावुभौ ज्ञानक्षणौ ज्ञान[19](त)वन्तौ, नापि जानीतः[20] । किं तर्हि? एको ज्ञातवान् अन्यस्तु
२० जानातीति[21] । चतुर्थपक्षोप्ययुक्तः; अतीतवर्त्तमानज्ञानक्षणव्यतिरेकेणान्यस्य सन्तानस्यासम्भवात् । कल्पितस्य सम्भवेपि न ज्ञातृत्वम् । न ह्यऽसौ ज्ञान(त)वान्पूर्वं नाप्यधुना जानाति, कल्पितत्वेनास्याऽवस्तुत्वात् । न चावस्तुनो ज्ञातृत्वं सम्भवति वस्तुधर्मत्वात्तस्य इति अतोऽन्यस्य[22] प्रमातृत्वासम्भवादात्मैव
२५ प्रमाता सिद्ध्यति[23] । इति सिद्धोऽतः प्रत्यभिज्ञानादात्मेति ।

ननु चात्मासुखादिपर्यायैः सम्बद्ध्यमानः परित्यक्तपूर्वरूपो वा

१ सुखादिपर्यायाणां सर्वथात्मनः सकाशाद्भेदाभेदौ, तयोः । २ परिहारेण । ३ सुखादिस्वरूपतया । ४ चिद्रूपतया । ५ भेदाभेदात्मकः । ६ आकारेषु । ७ स्वर्णवदिति पाठान्तरम् । ८ ज्ञानसन्ततिरेवात्मा नान्यः कश्चिदिति हेतोर्नैरात्म्यम् । ९ जैनबौद्धयोः । १० प्रत्यभिज्ञानेन । ११ सौगतेन । १२ अतीतवर्त्तमानलक्षणौ । १३ निश्चयः । १४ अतीतज्ञानक्षणस्य । १५ अतीतज्ञानक्षणस्य । २६ कथम्? । १७ विनष्टत्वात् । १८ एकस्य ज्ञातवत्त्वज्ञातृत्वासम्भवादेव । १९ इत्युल्लेखः । २० इत्युल्लेखः । २१ इत्युल्लेखो युक्तः । २२ अतीतज्ञानक्षणादेः । २३ अवशिष्यमाणत्वात् ।

सम्बद्ध्येत, अपरित्यक्तपूर्वरूपो वा? प्रथमपक्षे निरन्वयनाश-प्रसङ्गः, अवस्थातुः कस्यचिदभावात्। द्वितीयपक्षे तु पूर्वोत्तरा-वस्थयोरात्मनोऽविशेषादपरिणामित्वानुषङ्गः। प्रयोगः यत्पू-र्वोत्तरावस्थासु न विशिष्यते न तत्परिणामि यथाकाशम्, न विशिष्यते पूर्वोत्तरावस्थास्वात्मेति; तदपरीक्षिताभिधानम्; आत्मनो भेदेन प्रसिद्धसत्ताकैः सुखादिपर्यायैः स्वस्य सम्बन्धाना-भ्युपगमात्। आत्मैव हि तत्पर्यायतया परिणमते नीलाद्याका-रतया चित्रज्ञानवत्, स्वपरग्रहणशक्तिद्वयात्मकतयैकविज्ञानवद्वा। न खलु ययैव शक्त्यात्मानं प्रतिपद्यते विज्ञानं तयैवार्थम्, तयोर-भेदप्रसङ्गात्। अन्यथात्मनो येन रूपेण सुखपरिणामस्तेनैव दुःख-परिणामेपि अनयोरभेदो न स्यात्। न च तच्छक्तिभेदे तदात्मनो ज्ञानस्यापि भेदः; अन्यथैकस्य स्वपरग्राहकत्वं न स्यात्। नापि चित्रज्ञानस्य नीलाद्यनेकाकारतया परिणामेपि एकाकारताव्या-घातः। तद्वत्सुखाद्यनेकाकारतया परिणामेपि आत्मनो नैकत्व-व्याघातो विशेषाभावात्। न चैकत्र युगपत्, अन्यत्र तु कालभेदेन परिणामाद्विशेषः; प्रतीतेर्नियामकत्वात्। यत्र हि प्रतीतिर्देश-कालभिन्नं तदभिन्नं वा वस्तुन्येकत्वं प्रतिपद्यते तत्रैकत्वं प्रति-पत्तव्यम्, यत्र तु नानात्वं प्रतिपद्यते तत्र तु नानात्वमिति।

ततो यदुक्तम्–सर्वात्मनैवाभेदे भेदस्तद्विपरीतः कथं भवेत्? न ह्येकदा विधिप्रतिषेधौ परस्परविरुद्धौ युक्तौ। प्रयोगः–यत्रा-भेदस्तत्र तद्विपरीतो न भेदः यथा तेषामेव पर्यायाणां द्रव्यस्य च यत्प्रतिनियतमसाधारणमात्मस्वरूपं तस्य न स्वभावाद्भेदः, अभेदश्च द्रव्यपर्याययोरिति। किञ्च, पर्यायेभ्यो द्रव्यस्याभेदः, द्रव्यात्पर्यायाणां वा? प्रथमपक्षे पर्यायवद्द्रव्यस्याप्यऽनेकत्वानुषङ्गः।

१ पूर्वाकारापरित्यागात्। २ 'आत्मा धर्मी' परिणामी न भवतीति साध्यम् पूर्वोत्तरावस्थास्वविशिष्टत्वात्' इत्युपरिष्टात्संयोज्यम्। ३ भिद्यते। ४ का (पञ्चमी)। ५ जैनैः। ६ कथम्? तथा हि। ७ ज्ञानस्य शक्तिद्वयं न विद्यते इत्याशङ्कायामाह। ८ स्वस्य स्वरूपम्। ९ एकयैव शक्त्या स्वरूपार्थयोः प्रतिपत्तौ। १० आत्मनि। ११ आत्मनि। १२ ('प्रतीतेः' इति खपुस्तके पाठः)। १३ सुखादिपर्यायैः। १४ परेण। १५ नीलाद्यनेकाकारैः। १६ परेण। १७ सति। १८ द्रव्यपर्याययो-र्भेदः। १९ भेदाभेदौ। २० द्रव्यपर्यायौ धर्मिणौ भिन्नौ न भवतस्तयोरभेदादिति अनुमानं सौगतप्रयुक्तमुपरितोऽत्र योज्यम्। २१ पक्षे नीलाद्याकाराणाम्। २२ प्रथ-मपक्षे आत्मनः, द्वितीयपक्षे चित्रज्ञानस्य। २३ अन्योन्यम्। २४ पक्षे नीलाद्या-कारचित्रज्ञानयोः। २५ पक्षे नीलाद्याकारेभ्यः। २६ पक्षे चित्रज्ञानस्य।

तथा हि-यद्व्यावृत्तिस्वरूपाऽभिन्नस्वभावं तद्व्यावृत्तिमत् यथा पर्यायाणां स्वरूपम्, व्यावृत्तिमद्रूपाव्यतिरिक्तं च द्रव्यमिति। द्वितीयपक्षे तु पर्यायाणामप्येकत्वानुषङ्गः। तथाहि—यदनुगतस्वरूपाऽव्यतिरिक्तं तदनुगतात्मकमेव यथा द्रव्यस्वरूपम्, अनु-
५ गतात्मस्वरूपाऽभिन्नस्वभावाश्च सुखादयः पर्यायाः इत्यादि;

तन्निरस्तम्; प्रमाणप्रतिपन्ने वस्तुरूपे कुचोद्याऽनवकाशात्। न खलु मदोन्मत्तो हस्ती सन्निहितम् व्यवहितं वा परं मारयति, सन्निहितस्य मारणे मेण्ठस्यापि मारणप्रसङ्गः। व्यवहितस्य च मारणेऽतिप्रसङ्गः, इत्यनर्थानल्पकल्पनाभयात् स्वकार्यकरणादुप-
१० रमेते। चित्रज्ञानादावपि चैतत्सर्वं समानम्। प्रतिक्षिप्तं च प्रतिक्षणं क्षणिकत्वं प्रागित्यलमतिप्रसङ्गेन।

अथेदानीं व्यतिरेकलक्षणं विशेषं व्याचिख्यासुरर्थान्तरेत्याह—

अर्थान्तरगतो विसदृशपरिणामो व्यतिरेकः गोमहिषादिवत् ॥ १० ॥

१५ एकस्मादर्थात्सजातीयो विजातीयो वार्थोऽर्थान्तरम्, तद्गतो विसदृशपरिणामो व्यतिरेको गोमहिषादिवत्। यथा गोषु खण्ड-मुण्डादिलक्षणो विसदृशपरिणामः, महिषेषु विशालविसङ्कटत्व-लक्षणः, गोमहिषेषु चान्योन्यमसाधारणस्वरूपलक्षण इति। तावेवंप्रकारौ सामान्यविशेषावात्मा यस्यार्थस्याऽसौ तथोक्तः। स
२० प्रमाणस्य विषयः न तु केवलं सामान्यं विशेषो वा, तस्य द्वितीय-परिच्छेदे 'विषयभेदात्प्रमाणभेदः' इति सौगतमतं प्रतिक्षिपता प्रतिक्षिप्तत्वात्। नाप्युभयं स्वतन्त्रम्; तथाभूतस्यास्याप्यप्रतिभासनात्।

ननु चार्थस्य सामान्यविशेषात्मकत्वमयुक्तम्; तदात्मकत्वे-
२५ नास्य ग्राहकप्रमाणाभावात्। सामान्यविशेषाकारयोश्चान्योन्यं प्रतिभासभेदेनात्यन्तं भेदात्। प्रयोगः-सामान्याकारविशेषाकारौ

---

१ व्यावृत्तयः=पर्यायाः। २ भेदवत्। ३ तस्मादनेकमिति। ४ अनुगतस्वरूपं=द्रव्यम्। ५ द्रव्यपर्यायात्मके। ६ कुप्रश्न। ७ मदोन्मत्तो हस्ती मारयत्येवेति प्रमाणप्रतिपन्नः। ८ हस्तिपकस्य। ९ मारणात्। १० हस्ती। ११ सर्वात्मनेत्यादि सौगतमते। १२ चित्रज्ञानाकारौ भिन्नौ न भवतः तयोरभेदादित्येवम्। १३ खण्डलक्षणाद्गोः सजातीयो मुण्डलक्षणो गौः, विजातीयो महिषः, खण्डापेक्षया मुण्डो विसदृशाकारो महिषापेक्षया च विसदृशाकार इत्यर्थः। १४ वैशेषिकः। १५ सर्वथा।

परस्परतोऽत्यन्तं भिन्नौ भिन्नप्रमाणग्राह्यत्वाद्घटपटवत् । पटादौ हि भिन्नप्रमाणग्राह्यत्वमत्यन्तभेदे सत्येवोपलब्धम्, तत् सामान्यविशेषाकारयोरुपलभ्यमानं कथं नात्यन्तभेदं प्रसाधयेत्? अन्यत्राप्यस्य तदप्रसाधकत्वप्रसङ्गात् । न खलु प्रतिभासभेदाद्विरुद्धधर्माध्यासाच्चा[3]न्यत् पटादीनामप्यन्योन्यं भेदनिबन्धनमस्ति। ५ स चावयवावयविनोर्गुणगुणिनोः क्रियातद्वतोः सामान्यविशेषयोश्चास्त्येव । पटप्रतिभासो हि तन्तुप्रतिभासवैलक्षण्येनानुभूयते, तन्तुप्रतिभासश्च पटप्रतिभासवैलक्षण्येन। एवं पटप्रतिभासाद्रूपादिप्रतिभासवैलक्षण्यमप्यवगन्तव्यम् ।

विरुद्धधर्माध्यासोऽप्यनुभूयत एव, पटो हि पटत्वजातिसम्बन्धी विलक्षणार्थक्रियासम्पादकोतिशयेन महत्त्वयुक्तः, तन्तवस्तु तन्तुत्वजातिसम्बन्धिनोल्पपरिमाणाश्च, इति कथं न भिद्यन्ते? तादात्म्यं चैकत्वमुच्यते, तस्मिंश्च सति प्रतिभासभेदो विरुद्धधर्माध्यासश्च न स्यात्, विभिन्नविषयत्वात्ततस्तयोः। यदि च तन्तुभ्यो नार्थान्तरं पटः; तर्हि तन्तवोपि नांशुभ्योऽर्थान्तरम्, १५ तेपि स्वावयवेभ्यः इत्येवं तावच्चिन्त्यं यावन्निरंशाः परमाणवः, तेभ्यश्चाभेदे सर्वस्य कार्यस्यानुपलम्भः स्यात्[11]। तस्मादर्थान्तरमेव पटात्तन्तवो रूपादयश्च प्रतिपत्तव्याः[12]।

तथा[13] विभिन्नैककर्तृकत्वात्तन्तुभ्यो भिन्नः पटो घटादिवत् । विभिन्नशक्तिकत्वाद्वा विषाऽगदवत्[15] । पूर्वोत्तरकालभावित्वाद्वा २० पितापुत्रवत्। विभिन्नपरिमाणत्वाद्वा बदरामलकवत्।

तथा तन्तुपटादीनां तादात्म्ये 'पटः तन्तवः' इति वचनभेदः[16], 'पटस्य भावः पटत्वम्' इति षष्ठी, तद्धितोत्पत्तिश्च न प्राप्नोतीति[17]।

किञ्च, 'तादात्म्यम्' इत्यत्र किं स पट आत्मा येषां तन्तूनां तेषां २५ भावस्तादात्म्यमिति विग्रहः कर्तव्यः, ते वा तन्तवः आत्मा यस्य

१ सन्दिग्धानैकान्तिकत्वे प्रतिपादिते सत्याह । २ साधनमिदम् । ३ स्वरूपम् । ४ कथम्? तथा हि । ५ आदिपदेन क्रियादिग्रहः । ६ शीतापनोदादि । ७ अवयवावयव्यादयः । ८ प्रतिभासभेदे विरुद्धधर्माध्यासे च सत्यपि तादात्म्यं भविष्यतीत्युक्ते सत्याह । ९ तन्त्ववयवेभ्यः । १० द्व्यणुकादिलक्षणस्य । ११ परमाणुद्वयेन द्व्यणुकमारभ्यते, द्व्यणुकत्रितयेन त्र्यणुकमारभ्यते, तच्च प्रत्यक्षमेव तत उपरितननियमाभावः । १२ जैनेन । १३ प्रतिभासभेदविरुद्धधर्माध्यासप्रकारेण । १४ योषित्कुविन्द । १५ अगदः=औषधम् । १६ एकवचनबहुवचनत्वेन । १७ भेदाभावे सति । भेदे षष्ठीति वचनात् ।

पटस्य, स च ते आत्मा य[1]स्ये[2]ति वा? प्रथमपक्षे पटस्यैकत्वात्तन्तूनामप्ये[3]कत्वप्रसङ्गः, तन्तूनां वाऽनेकत्वात्पटस्याप्यनेकत्वानुषङ्गः। अन्यथा तत्तादात्म्यं न स्यात्। द्वितीयविकल्पेप्ययमेव दोषः। तृतीयपक्षश्चाविचारितरमणीयः; तद्व्यतिरिक्तस्य वस्तुनोऽसम्भवात्। न हि तन्तुपटव्यतिरिक्तं वस्त्वन्तरमस्ति यस्य तन्तुपटस्व[4]भावतोच्येत।

न च तन्तुपटादीनां[5] कथञ्चिद्भेदा[6]भेदात्मकत्वमभ्युपगन्तव्यम्; संशयादिदोषोपनिपातानुषङ्गात्। 'के[7]न खलु स्वरूपेण तेषां भेदः केन चाभेदः' इति सं[8]शयः। तथा 'यत्राभेदस्तत्र भेदस्य विरोधो यत्र च भेदस्तत्राभेदस्य शीतोष्णस्पर्शवत्' इति विरोधः। तथा—'अभेदस्यैकत्वस्वभावस्यान्यदधिकरणं भेदस्य चानेकस्वभावस्यान्यत्' इति वै[9]यधिकरण्यम्। तथा 'एकान्तेनैकात्मकत्वे यो दोषोऽनेकस्वभावत्वाभावलक्षणोऽनेकात्मकत्वे चैकस्वभावत्वाभावलक्षणः सोऽत्राप्यनुषज्यते' इत्युभयदोषः। तथा 'येन स्वभावेनार्थस्यैकस्वभावता तेनानेकस्वभावत्वस्यापि प्रसङ्गः, येन चानेकस्वभावता तेनैकस्वभावत्वस्यापि' इति सङ्करप्रसङ्गः। "सर्वेषां[10] युगपत्प्राप्तिः सङ्करः" [ ] इत्यभिधानात्। तथा 'येन स्वभावेनानेकत्वं तेनैकत्वं प्राप्नोति येन चैकत्वं तेनानेकत्वम्' इति व्यतिकरः। "परस्परविषयगमनं व्यतिकरः" [ ] इति प्रसिद्धेः। तथा 'येन रूपेण भेदस्तेन कथञ्चिद्भेदो येन चाभेदस्तेनापि कथञ्चिदभेदः' इत्यनवस्था। अतो[11]ऽप्रतिपत्तितो[12]ऽभावस्तत्त्वस्यानुषज्येतानेकान्तवादिनाम्। एवं सत्त्वा[13]द्यनेकान्ताभ्युपगमेप्येतेऽष्टौ दोषा द्रष्टव्याः। तन्न तदात्मा[14]र्थः प्रमाणप्रमेयः[15]।

किन्तु परस्परतोऽत्यन्तविभिन्ना[16] द्रव्यगुणकर्मसामान्यविशेषसमवायाख्याः षडेव पदार्थाः[17]। तत्र पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव द्रव्याणि। पृथिव्यप्तेजोवायुरित्येतच्चतुःसंख्यं

---

१ वस्तुनः। २ स तदात्मा, तस्य भावस्तादात्म्यम्। ३ एकरूपपटादभिन्नास्तन्तव एकरूपमापन्ना इति। ४ तन्तुपटौ स्वभावौ यस्य। ५ आदिपदेन गुणगुण्यादीनाम्। ६ कथम्? तथा हि। ७ भेदाभेदात्मकत्वे वस्तुनोऽसाधारणाकारेण निश्चेतुमशक्तेः संशयः। ८ भेदाभेदात्मकत्वे। ९ अयमपि वैयधिकरण्येऽन्तर्भवति। १० स्वभावानाम्। ११ संशयादिदोषतः। १२ अनुपलम्भः। १३ आदिना=असत्त्वादि। १४ सामान्यविशेषात्मा। १५ ग्राह्यः। १६ विभिन्नप्रत्ययविषयत्वाद्भिन्नलक्षणलक्षितत्वाद्भिन्नकारणप्रभवत्वाद्भिन्नार्थक्रियाकारित्वाच्च घटपटवत्। १७ प्रमाणग्राह्याः।

द्रव्यं नित्यानित्यविकल्पाद्द्विभेदम् । तत्र परमाणुरूपं नित्यं सद्[1]-कारणवत्त्वात् । तदारब्धं तु द्व्यणुकादि कार्य[2]द्रव्यमनित्यम्[3] । आकाशादिकं तु नित्यमेवानु[4]त्पत्तिमत्त्वात् । एषां[5] च द्रव्यत्वाभिसम्बन्धाद्द्रव्यरूपता[6] ।

एतच्चेतर[7]व्यवच्छेदकमेषां लक्षणम्[8]; तथाहि-पृथिव्यादीनि मनःपर्यन्तानीतरेभ्यो भिद्यन्ते, 'द्रव्याणि' इति व्यवहर्त्तव्यानि, द्रव्यत्वाभिसम्बन्धात्, यानि नैवं न तानि द्रव्यत्वाभिसम्बन्धवन्ति यथा गुणादीनीति[9] । पृथिव्यादीनामप्यवान्तरभेदवतां पृथिवीत्वाद्यभिसम्बन्धो लक्षणम् इतरेभ्यो भेदे व्यवहारे तच्छब्दवाच्यत्वे वा साध्ये केवलव्यतिरेकिरूपं द्रष्टव्यम् । अभेदवतां त्वाकाशकालदिग्द्रव्याणामनादिसिद्धा तच्छब्दवाच्यता द्रष्टव्या ।

एवं रूपादयश्चतुर्विंशतिगुणाः । उत्क्षेपणादीनि पञ्च कर्माणि । परापरभेदभिन्नं द्विविधं सामान्यम् अनुगतज्ञानकारणम् । नित्यद्रव्यव्यावृ(व्यवृ)त्तयोऽन्त्या विशेषा अत्यन्तव्यावृत्तिबुद्धिहेतवः । अयुतसिद्धानामाधार्याधारभूतानामिहेदमितिप्रत्ययहेतुर्यः सम्बन्धः स समवायः ।

अत्र पदार्थपक्षे द्रव्यवद्गुणा अपि केचिन्नित्या एव केचित्त्वनित्या एव । कर्माऽनित्यमेव । सामान्यविशेषसमवायास्तु नित्या एवेति ।

---

१ खकुसुमादिना व्यभिचारपरिहारार्थं सदिति, तेनाप्यापिघटादिना व्यभिचारस्तन्निरासार्थमकारणवत्त्वादिति । २ अवयविरूपम् । ३ उत्पत्तिमत्त्वात् । ४ सत्त्वे सतीति योज्यम् । ५ नवसंख्योपेतपृथिव्यादीनाम् । ६ प्रतिपत्तव्या । ७ इतरे= गुणादयः । ८ असाधारणस्वरूपम् । ९ अत्रापि साध्याभावे साधनाभावोस्ति । १० द्रव्याणां गुणादिभ्यो भेदादिकं प्रसाध्येदानीं नवद्रव्याणां तद्भेदानां च परस्परं भेदादिकं साधयति वैशेषिकः । ११ ननु यद्यपि नवानां पृथिव्यादीनां गुणादिभ्यो भेदस्तथा व्यवहारस्तच्छब्दवाच्यत्वं च समर्थितं तथापि तेषां तद्भेदानां च परस्परं भेदस्तथा व्यवहारस्तच्छब्दवाच्यत्वमिति च साध्येषु किं साधनमित्युक्ते आह । १२ घटपटादिगृष्टजलादिप्रतिपादिशीतवातादि इत्यादयोऽवान्तरभेदाश्च तेष्वेव सम्भवन्ति, आकाशादीनां नित्यनिरंशत्वाभ्यामवान्तरभेदासम्भवात् । १३ अबादिभ्यः । १४ साधनम् । १५ पृथिवी धर्मिणीतरेभ्यो भिद्यते पृथिवीति वा व्यवहर्तव्या पृथिवीत्वाभिसम्बन्धादबादिवत्, एवमबादिष्वपि द्रष्टव्यम् । १६ पृथिव्यादिप्रकारेण । १७ सत्ताख्य । १८ द्रव्यत्वादि । १९ इदं सदिदं सत्, इदं द्रव्यमिदं द्रव्यमित्येवम् । २० अपृथक्सिद्धानाम् । २१ गुणगुण्यादीनाम् । २२ नित्यद्रव्याश्रिताः । २३ यथाकाशादौ परममहत्त्वादि । २४ अनित्यद्रव्याश्रिताः । २५ स्वामिदासादयः ।

अत्र प्रतिविधीयते। अनेकधर्मात्मकत्वेनार्थस्य ग्राहकप्रमाणाभावोऽसिद्धः; तथाहि—वास्तवानेकधर्मात्मकोर्थः, परस्परविलक्षणानेकार्थक्रियाकारित्वात्, पितृपुत्रपौत्रभ्रातृभागिनेयाद्यनेकार्थक्रियाकारिदेवदत्तवत्। न चायमसिद्धो हेतुः; आत्मनो ५ मनोज्ञाङ्गनानिरीक्षणस्पर्शनमधुरध्वनिश्रवणताम्बूलादिरसास्वादनकर्पूरादिगन्धाघ्राणमनोज्ञवचनोच्चारणचङ्क्रमणावस्थानहर्षविषादानुवृत्तव्यावृत्तज्ञानाद्यन्योन्यविलक्षणानेकार्थक्रियाकारित्वेन अध्यक्षतोनुभवात्। घटादेश्च[1] स्वान्यव्यक्ति[2]प्रदेशाद्य[3]पेक्षयानुवृत्तव्यावृत्तसदसत्प्रत्यय[4]स्थानगमन[5]जलधारणादिपरस्परविलक्षणानेकार्थ- १० क्रियाकारित्वेन प्रत्यक्षतः प्रतीतेरिति। दृष्टान्तोपि न साध्यसाधनविकलः; वास्तवानेकधर्मात्मकत्वाऽन्योन्यविलक्षणानेकार्थक्रियाकारित्वयोस्तत्र सद्भावात्।

ननु भिन्नप्रमाणग्राह्यत्वेन धर्मधर्मिणोरत्यन्तभेदप्रसिद्धेः सिद्धेपि धर्मिणि वास्तवानेकधर्माणां सद्भावे ता[7]दात्म्याप्रसिद्धिः; इत्यप्य- १५ समीचीनम्; अने[6]कान्तिकत्वाद्धेतोः, [8]प्रत्यक्षानुमानाभ्यां हि भिन्नप्रमाणग्राह्यत्वेप्यात्मादिवस्तुनो भेदाभावः, दूरेतरदे[10]शवर्त्तिनाम[11] स्पष्टेतरप्रत्ययग्राह्यत्वेपि वा पादपस्याऽभेदः। ननु चात्र प्रत्ययभेदाद्विषयभेदोऽस्त्येव[13], प्रथमसमयवर्त्ति हि विज्ञानमूर्द्धताविषयमुत्तरं च शा[15]खादिविशेषविषयम्; इत्यप्यसाम्प्रतम्; एवंविषय- २० भेदाभ्युपगमे 'यमहमद्राक्षं दूरस्थितः पादपमेतर्हि तमेव पश्यामि' इत्येकत्वाध्यवसायो न स्यात्, स्पष्टेतरप्रतिभासानां सामान्यविशेषविषयत्वेन घटादिप्रतिभासवद्भिन्नविषयत्वात्। अथ पादपापेक्षया पूर्वोत्तरप्रत्ययानामेकविषयत्वं सामान्यविशेषापेक्षया तु विषयभेदः; कथमेवमेकान्ताभ्युपगमो न विशीर्येत? गुण-

१ बाह्यार्थस्य। २ स्वश्चान्यश्च तौ व्यक्तिश्च प्रदेशादयश्च ते स्वान्ययोर्व्यक्तिप्रदेशादयः तेषामपेक्षा तया, ततश्चायमर्थः स्वव्यक्त्यपेक्षया स्वप्रदेशाद्यपेक्षयान्यव्यक्त्यपेक्षयाऽन्यप्रदेशाद्यपेक्षया यथाक्रममनुवृत्तव्यावृत्तप्रत्ययः सदसत्प्रत्ययलक्षणार्थक्रियाकारित्वादि। ३ आदिना कालभावग्रहणम्। ४ घटस्तिष्ठति। ५ घटो जले गच्छति पत्रमाकाशे गच्छतीत्यादि। ६ सत्प्रतिपक्षत्वं हेतोः सद्भावयति परः। ७ धर्मैः सह धर्मिणो धर्मिणा वा धर्माणाम्। ८ सर्वथा भेदाभावे। ९ भिन्नप्रमाणग्राह्यत्वादित्यस्य। १० अहं सुख्यहं दुःखीत्यादिस्वसंवेदनेन आत्मास्ति व्याहारादिकार्यदर्शनादित्याद्यनुमानेन च। ११ पुरुषाणाम्। १२ यथा। १३ कुतस्तथा हि। १४ दूरतः। १५ समीपे शाखादिमानति। १६ नरः। १७ तव परस्य। १८ ययोर्भिन्नप्रमाणग्राह्यत्वं तयोः सर्वथा भेद इति।

गुण्यादिष्वप्यंतस्तद्वत्कथञ्चिद्भेदाभेदप्रसिद्धेर्भिन्नप्रमाणग्राह्यत्वस्य[1] विरुद्धत्वम्[2]।

एकान्ततोऽवयवावयव्यादीनां भिन्नप्रमाणग्राह्यत्वं[3] चासिद्धम्; 'पटोयम्' इत्याद्युल्लेखेनाभिन्नप्रमाणग्राह्यत्वस्यापि सम्भवात्। ननु[4] 'पटोयम्' इत्याद्युल्लेखेनावयव्येव प्रतिभासते नावयवास्तत्कथमभिन्नप्रमाणग्राह्यत्वम्; इत्यप्यपेशलम्; तद्भेदाप्रसिद्धेः। तन्तव एव ह्यातानवितानीभूता अवस्थाविशेषविशिष्टाः 'पटोयम्' इत्याद्युल्लेखेन प्रतिभासन्ते नान्यस्ततोर्थान्तरं पटः। प्रमाणं हि यथाविधं वस्तुस्वरूपं गृह्णाति तथाविधमेवाभ्युपगन्तव्यम्, यत्रात्यन्तभेदग्राहकं तत्रात्यन्तभेदो यथा घटपटादौ, यत्र पुनः कथञ्चिद्भेदग्राहकं तत्र कथञ्चिद्भेदो यथा तन्तुपटादाविति।

अतः कालात्ययापदिष्टं चेदं साधनं यथानुष्णोग्निर्द्रव्यत्वाज्जलवत्। न च घटादौ तथाविधभेदेनास्य व्याप्त्युपलम्भात्सर्वत्रात्यन्तभेदकल्पना युक्ता; क्वचित्तार्णत्वादिविशेषाधारेणाग्निना धूमस्य व्याप्त्युपलम्भेन सर्वत्राप्यतस्तथाविधविशेषसिद्धिप्रसङ्गात्। अथ तार्णत्वादिविशेषं परित्यज्य सकलविशेषसाधारणमग्निमात्रं धूमात्प्रसाध्यते। नन्वेवमत्यन्तभेदं परित्यज्यावयवावयव्यादिष्वपि भिन्नप्रमाणग्राह्यत्वाद्भेदमात्रं किं न प्रसाध्यते विशेषाभावात्?

दृष्टान्तश्च साध्यविकलत्वान्न साधनाङ्गम्; अत्यन्तभेदस्यात्राप्यसिद्धेः। तदसिद्धिश्च सद्रूपतया घटादीनामभेदात्। साधनविकलश्च; स्फारिताक्षस्यैकस्मिन्नप्यध्यक्षे घटादीनां प्रतिभाससम्भवात्। न च प्रतिविषयं विज्ञानभेदोभ्युपगन्तव्यः; मेचकज्ञानाभावप्रसङ्गात्। घटादिवस्तुनोप्येकविज्ञानविषयत्वाभावानुषङ्गाच्च; अत्राप्यूर्द्धाधोमध्यभागेषु तद्भेदस्य कल्पयितुं शक्यत्वात्। तथा चावयविप्रसिद्धये दत्तो जलाञ्जलिः। प्रतीतिविरोधोन्यत्रापि न काकैर्भक्षितः।

१ भिन्नप्रमाणग्राह्यत्वात्। २ साध्यविपर्ययव्याप्तो विरुद्धः। ३ साधनम्। ४ असिद्धत्वं परिहरति परः। ५ पटः। ६ पर्यायतया। ७ अभ्युपगन्तव्यः। ८ प्रमाणेन सर्वथा भेदस्य साधनात्। ९ न केवलमसिद्धम्। १० भिन्नप्रमाणग्राह्यत्वादिति। ११ घटपटयोः। १२ सर्वथा। १३ तन्तुपटादौ। १४ यथाग्निमात्रे साधिते सति खादिराग्निस्तथा पार्णाग्निरपि लभ्यते एवं भेदमात्रे साधिते भेदो लभ्यतेऽभेदोपि (-ते कथञ्चिद्भेदोऽपि) लभ्यते इति भावार्थः। १५ परेण त्वया। १६ विशेषपरित्यागस्य। १७ घटपटवदिति। १८ अत्यन्तभेदः साध्यः। १९ युगपत्। २० सेनावनादिज्ञानवत्। २१ सर्वथा। २२ तस्य ज्ञानस्य। २३ घटादिवस्तुनो भेदे च। २४ ज्ञानभेदेनैव सिद्धेः। २५ एकोयं घट इति। २६ अवयवावयव्यादेः सर्वथा भेदे साध्ये।

विरुद्धधर्माध्यासोपि[1] धूमादिना[2]नैकान्तिकत्वा[3]न्नावयवावयवि-
नोरात्यन्तिकं भेदं प्रसाधयति । न[4] खलु स्वसाध्येतरयोर्गम-
कत्वागमकत्वलक्षणविरुद्धधर्माध्यासेपि धूमो भिद्यते । नन्वत्रापि
सामग्रीभेदोस्त्येव-धूमस्य हि पक्षधर्मत्वादिकारणोपचितस्य
५ स्वसाध्यं प्रति गमकत्वम्[5], तद्विपरीतकारणोपचितस्य सामग्र्य-
न्तरत्वात्साध्यान्तरे[6]ऽगमकत्वम्, न त्वेकस्यैव गमकत्वागम-
कत्वं सम्भवति; इत्यप्यन्धसर्पबिलप्रवेशन्यायेनानेकान्तावल-
म्बनम्; धूमस्याभिन्नत्वात् । य एव हि धूमोऽविनाभावसम्ब-
न्धस्मरणादि[7]कारणोपचितो वन्हिं प्रति गमकः स एव साध्या-
१० न्तरेऽगमक इति । अथान्यः स्वसाध्यं प्रति गमकोऽन्यश्चान्यत्रागम-
कः; तर्हि यो गमको धूमस्तस्य स्वसाध्यवत्साध्यान्तरेपि
सामर्थ्यादेकस्मादेव धूमान्निखिलसाध्यसिद्धिप्रसङ्गाद्धेत्वन्तरोप-
न्यासो व्यर्थः स्यात् ।

किञ्च, अतो[8]ऽप्राप्तपटावस्थेभ्यः प्राक्तनावस्थाविशिष्टेभ्यस्त-
१५ न्तुभ्यः पटस्य भेदः साध्येत, पटावस्थाभाविभ्यो वा? प्रथमपक्षे
सिद्धसाध्यता, पूर्वोत्तरावस्थयोः सकलभावानां भेदाभ्युपगमात्[9] ।
न खलु यैवार्थस्य पूर्वावस्था सैवोत्तरावस्था पूर्वाकारपरित्यागेनै-
वोत्तराकारोत्पत्तिप्रतीतेः । द्वितीयपक्षे तु हेतूनामसिद्धिः; न
खलु पटावस्थाभावितन्तुभ्यः पटस्य भेदाप्रसिद्धौ विरुद्धधर्मा-
२० ध्यासविभिन्नकर्तृकत्वादयो धर्माः सिद्धिमासादयन्ति[10] । काला-
त्ययापदिष्टत्वं चैतेषाम्; आतानवितानीभूततन्तुव्यतिरेकेणार्था-
न्तरभूतस्य पटस्याध्यक्षेणानुपलब्धेस्तेन भेदपक्षस्य बाधितत्वात् ।

'तन्तवः[11] पटः' इति संज्ञाभेदोप्यवस्थाभेदनिबन्धनो न पुनर्द्र-
व्यान्तरनिमित्तः । योषिदादिकरव्यापारोत्पन्ना हि तन्तवः कुवि-
२५ न्दादिव्यापारात्पूर्वं शीतापनोदाद्यर्थासमर्थास्तन्तुव्यपदेशं लभन्ते,
तद्व्यापारात्तूत्तरकाले विशिष्टावस्थाप्राप्तास्तत्समर्थाः पटव्यपदेश-
मिति ।

विभिन्नशक्तिकत्वाद्य[12]प्यवस्थाभेदमेव तन्तूनां प्रसाधयति न
त्ववयवावयवित्वेनात्यन्तिकं भेदम् ।

---

१ हेतुः । २ चक्षुरादिना च । ३ ययोर्विरुद्धधर्माध्यासस्तयोरात्यन्तिको भेद इत्यनुमाने । ४ उक्तमेव समर्थयन्ति । ५ महानसादौ । ६ जलादौ । ७ आदिना पक्षधर्मत्वादिग्रहणम् । ८ विरुद्धधर्माध्यासात् । ९ जैनैः । १० स्वात्मोपलब्धिम् । ११ विरुद्धधर्माध्यासादयो यदि भेदप्रसाधका न भवेयुस्तदा कथं संज्ञाभेदो भविष्यतीत्याह । १२ साधनम् ।

यच्चोक्तम्–'पटस्य भावः' इत्यभेदे[1] षष्ठी न प्राप्नोतीति; तदप्ययुक्तम्; 'षण्णां पदार्थानामस्तित्वम्, षण्णां पदार्थानां वर्गः[2]' इत्यादौ भेदाभावेपि षष्ठ्याद्युत्पत्तिप्रतीतेः। न हि भवता षट्पदार्थव्यतिरिक्तमस्तित्वादीष्यते। ननु सतो[3] ज्ञापकप्रमाणविषयस्य भावः सत्त्वम्[4]–सदुपलम्भकप्रमाणविषयत्वं नाम धर्मान्तरं[5] षण्णामस्तित्वमिष्यते, अतो[6] नानेनानेकान्तः[7]; तदसत्; षट्पदार्थसंख्याव्याघातानुषङ्गात्[8], तस्य तेभ्योन्यत्वात्। ननु धर्मिरूपा एव ये भावास्ते षट्पदार्थाः प्रोक्ताः, धर्मरूपास्तु[9] तद्व्यतिरिक्ता इष्टा[10] एव। तथा[11] च पदार्थप्रवेशकग्रन्थे[12]–"एवं धर्मैर्विना धर्मिणामेव निर्देशः कृतः" [प्रशस्तपादभा० पृ० १५] इति। १०

अस्त्वेवं तथाप्यस्तित्वादेर्धर्मस्य षट्पदार्थैः सार्धं कः सम्बन्धो येन तत्तेषां धर्मः स्यात्–संयोगः, समवायो वा? न तावत्संयोगः; अस्य गुणत्वेन द्रव्याश्रयत्वात्। नापि समवायः; तस्यैकत्वेनेष्टत्वात्[13]। समवायेन[14] चास्य समवायसम्बन्धे समवायानेकत्व[15]प्रसङ्गः। सम्बन्धमन्तरेण धर्मधर्मिभावाभ्युपगमे चातिप्रसङ्गः[16]। १५

किञ्च[17], अस्तित्वादे[18]रपरास्तित्वाभावात्कथं तत्र[19] व्यतिरेकनिबन्धना विभक्तिर्भवेत्? अथ तत्राप्यपरमस्तित्वमङ्गीक्रियेत[20] तदानवस्था[21] स्यात्। उत्तरोत्तर[22]धर्मसमावेशेन च सत्त्वादे[23]र्धर्मिरूपत्वानुषङ्गात् 'षडेव धर्मिणः' इत्यस्य व्याघातः। 'ये धर्मिरूपा एव ते षड्भेनावधारिताः' इत्यप्यसारम्; एवं हि गुणकर्मसामान्यविशेषसमवायानामनिर्देशः स्यात्[24]। न ह्येषां धर्मिरूपत्वमेव; द्रव्याश्रितत्वेन धर्मरूपत्वस्यापि सम्भवात्। २०

---

१ सामान्यविशेषयोः। तन्तुपटादीनाम्। २ षट् पदार्था एव समूहः। ३ वस्तुनः। ४ तदेव। ५ षट्पदार्थेभ्यो भिन्नम्। ६ धर्मिधर्मरूपयोः षट्पदार्थास्तित्वयोः सर्वथा भेदाभेदसद्भावात्। ७ यत्र षष्ठीतद्धितोत्पत्तिस्तत्रात्यन्तिको भेद इत्यस्य। ८ सप्तमपदार्थापत्तेः। ९ अस्तित्वादयः। १० मम वैशेषिकस्य। ११ धर्मिभ्यो धर्माणां व्यतिरिक्तान्वेषणप्रकारेण। १२ श्रूयते। १३ परेण। १४ अन्यथेति शेषः। १५ समवायपदार्थेऽस्तित्वेन भाव्यं तत्तु तत्रापरसमवायपदार्थेन कृत्वा वर्त्तते। एवं तस्यानेकत्वापत्तिर्भवेत्। १६ गगनकुसुमाद्यस्तित्वाद्योर्धर्मिधर्मभावः स्यादित्यतिप्रसङ्गः। १७ यत्र षष्ठी विभक्तिस्तत्रात्यन्तभेद इत्यस्मिन्पक्षेऽनैकान्तिकं दूषणमुद्भावयति जैनः। १८ सामान्यस्य। १९ सत्ताया अस्तित्वं गोत्वादेरस्तित्वमित्यत्र। २० अनेकान्तदोषपरिहाराय परेण। २१ अपरापरास्तित्वसद्भावात्। २२ दूषणान्तरम्। २३ पूर्वस्य पूर्वस्य। २४ अर्थात्–एकस्यैव द्रव्यस्य निर्देशः स्यात्।

तथा 'खस्य भावः खत्वम्' इत्यत्राभेदेपि तद्धितोत्पत्तेरुपलम्भान्न सापि भेदपक्षमेवावलम्बते।

यच्चोक्तम्-'तादात्म्यमित्यत्र कीदृशो विग्रहः कर्तव्यः' इत्यादि; तत्रेत्थं विग्रहो द्रष्टव्यः-तस्य वस्तुन आत्मानौ द्रव्यपर्यायौ[1] सत्त्वासत्त्वादिधर्मौ[2] वा तदात्मानौ, तच्छब्देन वस्तुनः परामर्शात्, तयोर्भावस्तादात्म्यम्-भेदाभेदात्मकत्वम्। वस्तुनो हि भेदः पर्यायरूपतैव, अभेदस्तु द्रव्यरूपत्वमेव, भेदाभेदौ तु द्रव्यपर्यायस्वभावावेव। न खलु द्रव्यमात्रं पर्यायमात्रं वा वस्तु; उभयात्मनः समुदायस्य वस्तुत्वात्। द्रव्यपर्यायोस्तु न वस्तुत्वं नाप्यवस्तुता; किन्तु वस्त्वेकदेशता। यथा समुद्रांशो न समुद्रो नाप्यसमुद्रः, किन्तु समुद्रैकदेश इति।

'स पट आत्मा येषाम्[4]' इत्यपि विग्रहे न दोषः[5]; अवस्थाविशेषापेक्षया तन्तूनामेकत्वस्याभीष्टत्वात्।

'ते तन्तव आत्मा यस्य इति विग्रहे तन्तूनामनेकत्वे पटस्याप्यनेकत्वं स्यादिति चेत्; किमिदं तस्यानेकत्वं नाम-किमनेकावयवात्मकत्वम्, प्रतितन्तु तत्प्रसङ्गो वा? प्रथमपक्षे सिद्धसाध्यता; आतानवितानीभूतानेकतन्त्वाद्यवयवात्मकत्वात्तस्य। द्वितीयपक्षस्त्वयुक्तः; प्रत्येकं तेषां तत्परिणामाभावात्। सुमुदितानामेव ह्यातानवितानीभूतः परिणामोऽमीषां प्रतीयते, तथाभूताश्च ते पटस्यात्मेत्युच्यते।

वस्तुनो भेदाभेदात्मकत्वे संशयादिदोषानुषङ्गोऽयुक्तः; भेदाभेदाऽप्रतीतौ हि संशयो युक्तः, क्वचित्स्थाणुपुरुषत्वाप्रतीतौ तत्संशयवत्। तत्प्रतीतौ तु कथमसौ स्थाणुपुरुषप्रतीतौ तत्संशयवदेव? चलिता च प्रतीतिः संशयः, न चेयं तथेति।

न चानयोर्विरोधः; कथञ्चिदर्पितयोः[10] सत्त्वासत्त्वयोरिव[11] भेदाभेदयोर्विरोधासिद्धेः[12], तथाप्रतीतेश्च[13]। प्रतीयमानयोश्च कथं विरोधो नामास्यानुपलम्भसाध्यत्वात्? न च स्वरूपादिना वस्तुनः सत्त्वे तदैव पररूपादिभिरसत्त्वस्यानुपलम्भोस्ति। न खलु वस्तुनः

---

१ एतेनोर्द्ध्वतासामान्यपर्यायलक्षणविशेषात्मकवस्तु गृहीतम्। २ एतेन तिर्यक्सामान्यव्यतिरेकविशेषात्मकं वस्तु सङ्गृहीतम्। ३ प्रत्येकम्। ४ तन्तूनाम्। ५ पटस्यैकत्वे तन्तूनामेकत्वानुषङ्गलक्षणः। ६ अवस्था=पटरूपा। ७ आदिना अंशुग्रहणम्। ८ अस्माभिर्जैनैः। ९ द्रव्यपर्यायापेक्षया। १० विवक्षितयोः (मुख्ययोः)। ११ स्वपरद्रव्यादिचतुष्टयापेक्षया। १२ पर्यायापेक्षया भेदः। द्रव्यापेक्षया चाभेदः। १३ भेदाभेदप्रकारेण।

सर्वथा भाव[1] एव स्वरूपम्; स्वरूपेणेव पररूपेणापि भाव-प्रसङ्गात्। नाप्यभाव एव; पररूपेणेव स्वरूपेणाप्यभावप्रसङ्गात्।

न च स्वरूपेण भाव एव पररूपेणाभावः, परात्मना चाभाव एव स्वरूपेण भावः; तद[2]पेक्षणीयनिमित्तभेदात्, [3]स्वद्रव्यादिकं हि निमित्तमपेक्ष्य भावप्रत्ययं जनयत्यर्थः परद्रव्यादिकं त्वपेक्ष्याऽभावप्रत्ययम् इति एकत्व[4]द्वित्वादिसंख्यावदेव वस्तुनि भावाभावयोर्भेदः[5]। न ह्येकत्र द्रव्ये द्रव्यान्तरमपेक्ष्य द्वित्वादिसंख्या प्रकाशमाना स्वात्ममात्रापेक्षैकत्वसंख्यातो नान्या प्रतीयते। नापि सोभयी तद्वतो भिन्नैव; अस्याऽसंख्येयत्वप्रसङ्गात्। संख्यासमवायात्तत्त्वम्[6]; इत्यप्यसुन्दरम्; कथञ्चित्तादात्म्यव्यतिरिक्तस्य समवायस्यासत्त्वप्रतिपादनात्। ततिसद्धोऽपेक्षणीयभेदात्संख्यावत्सत्त्वासत्त्वयोर्भेदः[7]। तथाभूतयोश्चानयोरे[8]कवस्तुनि प्रतीयमानत्वात्कथं विरोधः द्रव्यपर्यायरूपत्वादिना भेदाभेदयोर्वा[9]? मिथ्येयं प्रतीतिः; इत्यप्यसङ्गतम्; बाधकाभावात्। विरोधो बाधकः; इत्यप्ययुक्तम्; इतरेतराश्रयानुषङ्गात्-सति हि विरोधे तेनास्याबाध्यमानत्वान्मिथ्यात्वसिद्धिः, ततश्च तद्विरोधसिद्धिरिति।

विरोधश्च अविकलकारणस्यै[10]कस्य भवतो[11] द्वितीय[12]सन्निधानेऽभावादवसीयते। न च भेदसन्निधानेऽभेदस्याऽभेदसन्निधाने वा भेदस्याभावोऽनुभूयते।

किञ्च, अत्र विरोधः सहानवस्थानलक्षणः, परस्परपरिहारस्थितिस्वभावो वा, वध्यघातकरूपो वा स्यात्? न तावत्सहानवस्थानलक्षणः; अन्योन्याव्यवच्छेदेनैकस्मिन्नाधारे भेदाभेदयोर्धर्मयोः सत्त्वासत्त्वयोर्वा प्रतिभासमानत्वात्[13]। परस्परपरिहारस्थितिलक्षणस्तु विरोधः सहैकत्राम्रफलादौ रूपरसयोरिवानयोः सम्भवतोरे[14]व स्यान्न[15] त्वसम्भवतोः[16] सम्भवदसम्भवतोर्वा[17]।

किञ्च, अयं विरोधो धर्मयोः, [धर्म] धर्मिणोर्वा? प्रथमपक्षे सिद्धसाधनम्; एतल्लक्षणत्वाद् धर्माणाम्। ऐकाधिकरण्यं तु

---

१ भावः=अस्तित्वम्। २ तयोः=भावाभावयोः। ३ कथम्? तथा हि। ४ स्वापेक्षया एकत्वं यथा तथा परापेक्षया द्वित्वं च। ५ विशेषः। ६ संख्येयत्वम्। ७ अग्रे। ८ भिन्नयोः। ९ सत्त्वासत्त्वयोः। १० शीतस्य। ११ जायमानस्य। १२ उष्ण। १३ ययोस्तथा प्रतिभासमानत्वं न तयोस्तथा विरोधो यथा रूपरसयोः, तथा प्रतिभासमानत्वं च भेदाभेदयोरिति। १४ विद्यमानयोः। १५ अस्मिन्विरोधे सति दोषो नास्तीत्यर्थः। १६ शशाश्वविषाणयोरिव। १७ बन्ध्याऽबन्ध्यास्तनन्धययोरिव।

तेषां न विरुध्यते मातुलिङ्गद्रव्ये रूपादिवत्। धर्मधर्मिणोस्तु विरोधे धर्मिणि धर्माणां प्रतीतिरेव न स्यात्, न चैवम्, अबाधबोधाधिरूढप्रतिभासत्वात्तत्र तेषाम्। वध्यघातकभावोपि विरोधः फणिनकुलयोरिव बलवदबलवतोः प्रतीतः सत्त्वासत्त्वयोर्भेदाभेदयोर्वा नाशङ्कनीयः; तयोः समानबलत्वात्।

अस्तु वा कश्चिद्विरोधः; तथाप्यसौ सर्वथा, कथञ्चिद्वा स्यात्? न तावत्सर्वथा; शीतोष्णस्पर्शादीनामपि सत्त्वादिना विरोधासिद्धेः। एकाधारतया चैकस्मिन्नपि हि धूपदहनादिभाजने क्वचित्प्रदेशे शीतस्पर्शः क्वचिच्चोष्णस्पर्शः प्रतीयत एव। अथानयोः प्रदेशयोर्भेद एवेष्यते; अस्तु नामानयोर्भेदः, धूपदहनाद्यवयविनस्तु न भेदः। न चास्य शीतोष्णस्पर्शाधारता नास्तीत्यभिधातव्यम्; प्रत्यक्षविरोधात्। तन्न सर्वथा विरोधः। कथञ्चिद्विरोधस्तु सर्वत्र समानः।

किञ्च, भावेभ्योऽभिन्नः, भिन्नो वा विरोधः स्यात्? न तावत्तेभ्योऽभिन्नो विरोधो विरोधको युक्तः; स्वात्मभूतत्वात्तत्स्वरूपवत्, विपर्ययानुषङ्गो वा। अथ भिन्नः; तथापि न विरोधकः; अनात्मभूतत्वादर्थान्तरवत्। अथार्थान्तरभूतोपि विरोधो विरोधको भावानां विशेषणभूतत्वात्, न पुनर्भावान्तरं तस्य तद्विशेषणत्वाभावात्; तदप्यसमीचीनम्; विरोधो हि तुच्छरूपोऽभावः, स यदि शीतोष्णद्रव्ययोर्विशेषणं तर्हि तयोरदर्शनापत्तिस्तत्सम्बद्धरूपत्वात्। असम्बद्धस्य च विशेषणत्वेऽतिप्रसङ्गात्।

अन्यतरविशेषणत्वेप्येतदेव दूषणम्। तदेव च विरोधि स्याद-

---

१ जैनमते। २ प्रदीपादौ। ३ स्वपरप्रकाशादीनाम्। ४ सत्त्वादिरूपाव्यवच्छेदतः। ५ शीतस्पर्शः सन्नुष्णस्पर्शः सन्नित्यादिना धर्मेण। ६ शीतोष्णस्पर्शादयो न विरुद्धा एकाधारतया प्रतीयमानत्वात्, यत्तथा प्रतीयते न तत्सर्वथा विरुद्धं यथा रूपरसादि, एकतुलायां नामोन्नामादिर्वा, एकाधारतया प्रतीयन्ते च धूपदहनादौ शीतोष्णस्पर्शादय इति। ७ परेण। ८ भावानामसाधारणस्वरूपप्रकारेण। ९ घटाकारस्य पटेऽभावात्। १० घटपटादौ घटपटरूपादौ वा। ११ भावा अपि विरोधस्य विरोधकाः कुतो न भवेयुर्विरोधादभिन्नत्वाविशेषात्?। १२ भावा विशेष्या विरोधो विशेषणमनयोर्भावयोर्विरोध इति। १३ घटपटादिरूपः। १४ विवादापन्ने शीतोष्णद्रव्ये धर्मिणी न दृश्येते इति साध्यो धर्मः, अभावसम्बद्धरूपत्वात् क्वचित्प्रदेशे घटवत्। १५ शीतोष्णद्रव्ययोर्मध्ये शीतद्रव्यस्योष्णद्रव्यस्य वा। १६ शीतोष्णद्रव्ययोर्मध्ये। १७ विरोधस्य। १८ अदर्शनापत्तिलक्षणम्। १९ द्वितीयम्।

स्यासौ[1] विशेषणं नान्यत्[2]। न चैकत्र[3] विरोधो नामास्य द्विष्ठत्वात्, अन्यथा सर्वत्र सर्वदा तत्प्रसङ्गः[4]।

अथ विरुध्य[5]मानत्वविरोधक[6]त्वापेक्षया[7] कर्मकर्तृस्थो विरोधः, विरोधसामान्यापेक्षयो[8]भयविशेषणत्वाद्द्विष्ठोभिधीयते । नन्वेवं[9] रूपादेरपि द्विष्ठत्वापत्तिः[10] किन्न स्यात् तत्सामान्यस्यापि द्विष्ठत्वा-विशेषात्? विरोधस्याभावरूपत्वे सामान्यविशेषत्वाभावानुपप-त्तिश्च[11]। गुणरूपत्वे[12] गुणविशेषणत्वाभावानुषङ्गः[13]।

अथ षट्पदार्थव्यतिरिक्तत्वात् पदार्थविशेषो विरोधोऽनेकस्थो विरोध्यविरोधकप्रत्ययविशेषप्रसिद्धः समाश्रीयते; तदाप्यस्या-सम्बद्धस्य द्रव्यादौ विशेषणत्वम्, सम्बद्धस्य वा? न तावदसम्ब-द्धस्य; अतिप्रसङ्गात्[13], दण्डादौ तथा[14]ऽप्रतीतेश्च। न खलु पुरुषेणा-सम्बद्धो दण्डस्तस्य विशेषणं प्रतीतो येनात्रापि तथाभावः। अथ सम्बद्धः; किं संयोगेन, समवायेन, विशेषणभावेन वा? न ताव त्संयोगेन; अस्याद्रव्यत्वेन संयोगानाश्रयत्वात्। नापि समवायेन; अस्य द्रव्यगुणकर्मसामान्यविशेषव्यतिरिक्तत्वेनासमवायित्वात्[16]। नापि विशेषणभावेन; सम्बन्धान्तरेणासम्बद्धे वस्तुनि विशेषण-भावस्याप्यसम्भवात्, अन्यथा दण्डपुरुषादौ संयोगादिसम्बन्धा-भावेपि स स्यात् इत्यलं संयोगादिसम्बन्धकल्पनाप्रयासेन। 'विरोध्यविरोधकप्रत्यय[17]विशेषस्तु विशिष्टं वस्तुधर्ममेवालम्बते[18]' इति वक्ष्यते समवायसम्बन्धनिराकरणप्रक्रमे । ततो विरोधस्य विचार्यमाणस्यायोगान्नानयो[19]रसौ घटते।

नापि वैयधिकरण्यम्; निर्बाधबोधे भेदाभेदयोः सत्त्वासत्त्व-योर्वा एकाधारतया प्रतीयमानत्वात्।

---

१ शीतद्रव्यस्योष्णद्रव्यस्य वा। २ उष्णद्रव्यं शीतद्रव्यं वा। ३ उष्णद्रव्ये शीतद्रव्ये वा। ४ तथा च घटस्य सद्रूपतावत् (सत्तासम्बन्धात्सद्रूपाणीति भावो वैशेषिकमते) रूपादिस्वभावतापि न स्यात्, न चैतद्युक्तं प्रतीतिविरोधात्। ५ विरुध्यमानः=शीतः। ६ विरोधकः=उष्णः। ७ विरोध्यविरोधकभावसम्बन्धापेक्षया। ८ ननु विशेषापेक्षया यतः कर्तृस्थो विरोधो हि कर्मणि नास्ति कर्मस्थः कर्तरि नास्तीत्यद्विष्ठो विशेषापेक्षयेति भावः। ९ विरोधप्रकारेण। १० भावानां विरोधकत्वापत्तिः। ११ विरोधस्याभावरूपत्वं मा भूद्गुणरूपत्वं स्यादित्युक्ते आहाचार्यः। १२ गुणा निर्गुणा इति वचनाच्छीतोष्णस्पर्शयोर्गुणरूपयोर्विरोधो गुणरूप इति विशेषणत्वमस्य न घटतेऽन्यथा। १३ सह्यो विन्ध्यं प्रति विशेषणं स्यादसम्बद्धत्वाविशेषात्। १४ असम्बद्धविशेषणत्व-प्रकारेण। १५ असम्बद्धत्वप्रकारेण। १६ पञ्चसु पदार्थेषु समवायोस्ति यतः। १७ प्रत्ययो=ज्ञानम्। १८ वस्तुनोऽव्यतिरिक्तमभावरूपं विरोधमवलम्बते न तु व्यतिरिक्तम्। १९ भेदाभेदयोः सत्त्वासत्त्वयोर्वा।

नाप्युभयदोषः; चौर[पार]दारिकाभ्यामचौरपारदारिकवत् जैनाभ्युपगतवस्तुनो[1] जात्यन्तरत्वात्। न खलु भेदाभेदयोः सत्त्वासत्त्वयोर्वाऽन्योन्यनिरपेक्षयोरेकत्वं जैनैरभ्युपगम्यते येनायं दोषः, तत्सापेक्षयोरेव[2] तदभ्युपगमात्, तथाप्रतीतेश्च[3]।

नापि सङ्करव्यतिकरौ[4]; स्वरूपेणैवार्थे तयोः प्रतीतेः।

नाप्यनवस्था[5]; 'धर्मिणो ह्यनेकरूपत्वं न धर्माणां कथञ्चन' इति, वस्तुनो ह्यभेदो धर्म्यैव, भेदस्तु धर्मा एव, तत्कथमनवस्था?

अभावदोषस्तु दूरोत्सारित एव; अशेषप्राणिनामनेकान्तात्मकार्थस्यानुभवसम्भवात्[6]।

ननु शरीरेन्द्रियबुद्धिव्यतिरिक्तात्मद्रव्यस्येच्छादिगुणाश्रयस्य[7] नित्यैकरूपत्वात्कथं सर्वस्यानेकान्तात्मकत्वम्? न च नित्यैकरूपत्वे कर्तृत्वभोक्तृत्वजन्ममरणजीवनहिंसकत्वादिव्यपदेशाभावः; ज्ञानचिकीर्षाप्रयत्नानां समवायो[8] हि कर्तृत्वम्, सुखादि[9]संवित्समवायस्तु भोक्तृत्वम्, अपूर्वैः शरीरेन्द्रियबुद्ध्यादिभिश्चाभिसम्बन्धो जन्म, प्राणात्तैस्तैस्तु[10] वियोगो मरणम्, जीवनं तु सदेहस्यात्मनो धर्माधर्मापेक्षो मनसा सम्बन्धः, हिंसकत्वं च शरीरचक्षुरादीनां वधान्न[11] पुनरात्मनो विनाशात्। तथा च सूत्रम्-"कार्याश्रयकर्तृवधाद्धिंसा" [न्यायसू० ३।१।६] इति। कार्याश्रयः शरीरं सुखादेः कार्याश्रयत्वात्। कर्तॄणीन्द्रियाणि विषयोपलब्धेः कर्तृत्वादिति।

तदप्यसमीक्षिताभिधानम्; सर्वथाऽपरित्यक्तपूर्वरूपत्वेनास्या[12]काशकुशेशयवत् ज्ञानादिसमवायस्यैवासम्भवात् कथं तदपेक्षया कर्तृत्वादिस्वरूपसम्भवः? पूर्वरूपपरित्यागे वा कथं नानेकान्तात्मकत्वम्[13]; व्यावृत्त्यनुगमात्मकस्यात्मनः[14][15] स्वसंवेदनप्रत्यक्षतः प्रसिद्धेः। व्यावृत्तिः खलु सुखदुःखादिस्वरूपापेक्षया आत्मनः अनुगमश्च चैतन्यद्रव्यत्वसत्त्वादिस्वरूपापेक्षया[16]। तदात्मकत्वं चाध्यक्षत एव प्रसिद्धम्।

---

१ आत्मादिवस्तुनः। २ द्रव्यं पर्यायमपेक्ष्य वर्त्तते पर्यायो द्रव्यमपेक्ष्य वर्त्तते। ३ परस्परापेक्षया। ४ मेचकरत्नादौ। ५ धर्माणामपरधर्माऽसम्भवात्। ६ प्रत्यक्षादिप्रमाणतः। ७ येषां वादिनां शरीरमेवात्मा इन्द्रियाण्येवात्मा बुद्धिरेवात्मा वा तेषां मतनिरासार्थमिदं विशेषणम्। ८ आत्मना सह। ९ आदिना चिकीर्षाप्रयत्नादि। १० घटते। ११ आत्मनः। १२ व्यापित्वाव्यापित्वरूपे। १३ घटपटादौ। १४ पर्यायापेक्षाया व्यावृत्त्यात्मकस्य चैतन्यापेक्षयानुगमात्मकस्य। १५ आकारवैलक्षण्याविशेषात्। १६ आत्मसुखादिवत्।

ननु चानुवृत्तव्यावृत्तस्वरूपयोः परस्परं विरोधात्कथं तदात्मकत्वमात्मनो युक्तम्? इत्यप्यसत्; प्रमाणप्रतिपन्ने वस्तुस्वरूपे विरोधानवकाशात्। न खलु सर्पस्य कुण्डलेतरावस्थापेक्षया अङ्गुल्यादेर्वा सङ्कोचितेतरस्वभावापेक्षया व्यावृत्त्यनुगमात्मकत्वं प्रत्यक्षप्रतिपन्नं विरोधमध्यास्ते।

ननु सुखाद्यवस्थानामात्मनोऽत्यन्तभेदात्तद्व्यावृत्तावप्यात्मनः किमायातं येनास्यापि व्यावृत्त्यात्मकत्वं स्यात्? इत्यप्यपेशलम्; सुखाद्यात्मनोरत्यन्तभेदस्य प्रथमपरिच्छेदे प्रतिविहितत्वात्। ननु चाकारवैलक्षण्येप्यात्मसुखादीनामनानात्वे अन्यत्राप्यन्यतोऽन्यस्यान्यत्वं न स्यात्; तदप्यविचारितरमणीयम्; तद्वत्तादात्म्येनान्यत्रान्यस्य प्रमाणतोऽप्रतीतेः। प्रतीतौ तु भवत्येवाकारनानात्वेप्यनानात्वम् प्रत्यभिज्ञाज्ञानवत्, सामान्यविशेषवत्, संशयज्ञानवत्, मेचकज्ञानवद्वेति।

यच्चोक्तम्-'द्रव्यादयः षडेव पदार्थाः प्रमाणप्रमेयाः' इत्यादि; तदप्युक्तिमात्रम्; द्रव्यादिपदार्थषट्कस्य विचारासहत्वात्; तथाहि-यत्तावच्चतुःसंख्यं पृथिव्यादिनित्यानित्यविकल्पाद्विभेदमित्युक्तम्; तदयुक्तम्; एकान्तनित्ये क्रमयौगपद्याभ्यामर्थक्रियाविरोधात्। तल्लक्षणसत्त्वस्यातो व्यावृत्त्याऽसत्त्वप्रसङ्गात्। यदि हि परमाणवो द्व्यणुकादिकार्यद्रव्यजननैकस्वभावाः; तर्हि तत्प्रभवकार्याणां सकृदेवोत्पत्तिप्रसङ्गोऽविकलकारणत्वात्। प्रयोगः-येऽविकलकारणास्ते सकृदेवोत्पद्यन्ते यथा समानसमयोत्पादा बहवोऽङ्कुराः, अविकलकारणाश्चाणुकार्यत्वेनाभिमता भावा इति। तथाभूतानामप्यनुत्पत्तौ सर्वदानुत्पत्तिप्रसक्तिर्विशेषाभावात्।

[11]ननु समवाय्यसमवायिनिमित्तभेदात्त्रिविधं कारणम्। यत्र हि कार्यं समवैति[12] तत्समवायिकारणम्, यथा द्व्यणुकस्याणुद्वयम्। यच्च कार्यैकार्थसमवेतं[13] कार्यकारणैकार्थसमवेतं[14] वा कार्यमुत्पादयति तदसमवायिकारणम्, यथा पटारम्भे तन्तुसंयोगः, पट-

१ घटे। २ पटस्य। ३ तादात्म्ये। ४ पूर्वोत्तरपर्यायज्ञानद्वयाकारवत्। ५ घटादौ। ६ पटादेः। ७ यथा गोत्वं सामान्यमश्वत्वसामान्यापेक्षाया विशेषः। ८ एकान्तनित्यस्य। ९ एकान्तनित्याः। १० अविकलकारणत्वस्य। ११ साधनमसिद्धमिति परः सम्भावयति। १२ पृथग्रूपत्वेनोत्पद्यते। १३ कार्य=पटः तेनैकार्थे तन्तुलक्षणे समवेतं पटम्। १४ कार्यकारणं पटगतरूपादि (देः कार्यस्य कारणं पटः) तेन सह एकार्थसमवेतं तन्तुगतरूपम्।

समवेतरूपाद्यारम्भे पटोत्पादकतन्तुरूपादि[1] च। शेषं तूत्पादकं निमित्तकारणम्, यथाऽदृष्टाकाशादिकम्। तत्र[2] संयोगस्या[3]ऽपेक्षणीयस्याभावादविकलकारणत्वमसिद्धम्; तदप्यसाम्प्रतम्; संयोगादिना[4]ऽनाधेयातिशयत्वेनाऽणूनां तदपेक्षाया अयोगात्।

५ अथ संयोग[5] एवामीषामतिशयः; स किं नित्यः, अनित्यो वा? नित्यश्चेत्; सर्वदा कार्योत्पत्तिः स्यात्[6]। अनित्यश्चेत्; तदुत्पत्तौ कोऽतिशयः[7] स्यात्संयोगः[8], क्रिया[10] वा? संयोगश्चेत्किं स एव, संयोगान्तरं वा? न तावत्स एव; अस्याद्याप्यसिद्धेः, स्वोत्पत्तौ स्वस्यैव व्यापारविरोधाच्च[11]। नापि संयोगान्तरम्; तस्यानभ्युपगमात्[12]। अभ्युपगमे वा तदुत्पत्तावप्यपरसंयोगातिशयकल्पनायाम-

१० नवस्था। नापि क्रियातिशयः; तदुत्पत्तावपि पूर्वोक्तदोषानुषङ्गात्।

किञ्च, अदृष्टापेक्षादा[13]त्माणुसंयोगात्परमाणुषु क्रियो[14]त्पद्यते इत्यभ्युपगमा[15]त् आत्मपरमाणुसंयोगोत्पत्तावप्यपरोतिशयो वाच्यस्तत्र च तदेव[16] दूषणम्।

१५ किञ्च, असौ[17] संयोगो द्व्यणुकादिनिर्वर्त्तकः किं परमाण्वाद्याश्रितः, तदन्या[18]श्रितः, अनाश्रितो वा? प्रथमपक्षे तदुत्प[19]त्तौ[20]वाश्रयं उत्पद्यते, न वा? यद्युत्पद्यते; तदाणूनामपि कार्यतानुषङ्गः[21]। अथ नोत्पद्यते; तर्हि संयोगस्तदा[22]श्रितो न स्यात्, समवायप्रतिषेधा[23]त्[24], तेषां[25] च तं प्रत्यकारकत्वात्। तदकारकत्वं चाऽनतिशयत्वा[26]त्। अनतिशयानामपि कार्यजनकत्वे

२० सर्वदा कार्यजनकत्वप्रसङ्गोऽविशेषा[27]त्। अतिशयान्तरकल्पने च अनवस्था-तदुत्पत्तावप्यपरातिशयान्तरपरिकल्पनात्। तत[28]-

१ आदिना कुविन्दादि। २ कारणत्रयमध्ये। ३ द्व्यणुकादिकार्योत्पादने। ४ परमाणुभिः। ५ परमाणूनां परमाणुभिः सह संयोगः। ६ नित्यत्वात्। ७ सर्वदा नित्यसंयोगलक्षणातिशयसद्भावात्। ८ कारणम्। ९ परमाण्वोः। १० परमाण्वोः। ११ स्वयमनुत्पन्नस्य स्वात्मनि व्यापारः कथमिति विरोधः। १२ परेण। १३ द्व्यणुकादीनि कार्याण्यात्मनोऽदृष्टवशाज्जायन्ते आत्मनो व्यापकत्वादिति हेतोः। १४ द्व्यणुकादिकार्योत्पादकलक्षणा। १५ परेण। १६ अनवस्थालक्षणम्। १७ ततोऽन्यत्=अदृष्टाकाशादि निमित्तकारणम्। १८ तस्य संयोगस्य। १९ द्व्यणुकोत्पादकः संयोगः परमाण्वाश्रितः, त्र्यणुकोत्पादकसंयोगो द्व्यणुकाश्रितः, स्कन्धोत्पादकः संयोगस्त्र्यणुकाश्रित इति। २० परमाण्वादिः। २१ उत्पद्यमानत्वाद्घटवत्। २२ तस्य परमाणोः। २३ समवायाद्भविष्यतीत्युक्ते सत्याह। २४ अग्रे। २५ कार्यकारणभावसम्बन्धेन तदाश्रितो भविष्यतीत्युक्ते सत्याहाचार्यः। २६ संयोगजनकस्वभावातिशयाभावात्। २७ अनतिशयत्वस्य। २८ संयोगाश्रयस्यानुत्पद्यमानत्वेन संयोगस्तदाश्रितो न स्याद्यतः।

स्तेषामसंयोगरूपतापरित्यागेन संयोगरूपतया परिणतिरभ्युपगन्तव्या इति सिद्धं तेषां कथञ्चिदनित्यत्वम् । अन्याश्रितत्वेपि पूर्वोक्तदोषप्रसङ्गः । अनाश्रितत्वे तु निर्हेतुकोत्पत्तिप्रसक्तेः सदा सत्त्वप्रसङ्गतः कार्यस्यापि[3] सर्वदा भावानुषङ्गः । [4]कथं चासौ गुणः स्यादनाश्रितत्वादाकाशादिवत् ?   ५

किञ्च, असौ संयोगः सर्वात्मना, एकदेशेन वा तेषां स्यात् ? सर्वात्मना चेत्; पिण्डोणुमात्रः स्यात् । एकदेशेन चेत्; सांशत्वप्रसङ्गोऽमीषाम् । तदेवं संयोगस्य विचार्यमाणस्यायोगात्कथमसौ तेषामतिशयः स्यात् ? निरतिशयानां च कार्यजनकत्वे तु सकृन्निखिलकार्याणामुत्पादः स्यात् । न चैवम् । ततोमीषां प्राक्- १० नाजनकस्वभावपरित्यागेन विशिष्ट[6]संयोगपरिणामपरिणतानां जनकस्वभावसम्भवात्सिद्धं कथञ्चिदनित्यत्वम् । प्रयोगः—ये क्रमवत्कार्यहेतवस्तेऽनित्या यथा क्रमवदङ्कुरादिनिर्वर्तका बीजादयः[7], तथा च परमाणव इति ।

ततोऽयुक्तमुक्तम्-'नित्याः परमाणवः सदकारणवत्त्वादाका- १५ शवत् । न चेदमसिद्धमावयोः[10] परमाणुसत्त्वेऽविवादात् । [11]अकारणवत्त्वं चातोऽल्पपरिमाणकारणाभावात्तेषां सिद्धम् । कारणं हि कार्यादल्पपरिमाणोपेतमेव; तथाहि-द्व्यणुकाद्यवयविद्रव्यं स्वपरिमाणादल्पपरिमाणोपेतकारणारब्धं कार्यत्वात्पटवत्[12],' इति; अकारणवत्त्वाऽसिद्धिः(द्धेः); [13]परमाणवो हि स्कन्धावयविद्रव्य- २० विनाशकारणकाः तद्भावभावित्वाद् घटविनाशपूर्वककपालवत् । न चेदमसिद्धं साधनम्; द्व्यणुकाद्यवयविद्रव्यविनाशे सत्येव परमाणुसद्भावप्रतीतेः । सर्वदा स्वतन्त्र[14]परमाणूनां तद्विनाशमन्तरेणाप्यत्र[15] सम्भवाद् भागासिद्धो हेतुः इत्यप्यसुन्दरम्; तेषामसिद्धेः । तथाहि-विवादापन्नाः[16] परमाणवः स्कन्धभेद[17]पूर्वका एव तत्त्वाद् २५ द्व्यणुकादिभेदपूर्वकपरमाणुवत् ।

[18]ननु पटोत्तरकालभावितन्तूनां[19] पटभेदपूर्वकत्वेपि पटपूर्वकालभाविनां तेषामतत्पूर्वकत्ववत् परमाणूनामप्यस्कन्धभेदपूर्व-

---

१ पूर्वरूप । २ सतो हेतुरहितस्य सर्वदा व्यवस्थितेः । ३ द्व्यणुकादेः । ४ अनाश्रितपक्षे दूषणान्तरमाहाचार्यः । ५ अवयविनिषेधश्च भवेत् । ६ कथञ्चिदेकत्वलक्षण । ७ आदिना क्षितिजलवातातपादयः । ८ परमाणूनां कथञ्चिदनित्यत्वं यतः । ९ आश्रयासिद्धं स्वरूपासिद्धं वा । १० जैनवैशेषिकयोः । ११ द्वितीयविशेषणम् । १२ दृष्टान्ते तन्तवः । १३ कथम् ? तथा हि । १४ अवयविद्रव्यभावं पूर्वमप्राप्तानामित्यर्थः । १५ जगति । १६ स्वतन्त्रत्वेन । १७ भेदो=विनाशः । १८ साधनस्यानैकान्तिकत्वमुद्भावयति परः । १९ निष्पन्नपटासिष्कासितानाम् ।

कत्वं केषाञ्चित्स्यात्; इत्यप्यनुपपन्नम्; तेषामपिप्रवेणीभेदपूर्वकत्वेन प्रतीत्या स्कन्धभेदपूर्वकत्वसिद्धेः[1]। ‘बलवत्पुरुषप्रेरित-[2] मुद्गराद्यभिघातादवयवक्रियोत्पत्तेः अवयवविभागात्संयोगविनाशाद्विनाशोऽर्थानाम्’ इत्यादि[3] विनाशोत्पादप्रक्रियोद्घोषणं तु प्रागेव कृतोत्तरम्। ततो[4] नित्यैकत्वस्वभावाणूनां जनकत्वासम्भवात्तदारब्धं तु द्व्यणुकाद्यवयविद्रव्यमनित्यमित्यप्ययुक्तमुक्तम्।

तन्त्वाद्यवयवेभ्यो[5] भिन्नस्य[6] च पटाद्यवयविद्रव्यस्योपलब्धिलक्षणप्राप्तस्यानुपलम्भेनासत्त्वात्[7]। न चास्योपलब्धिलक्षणप्राप्तत्वमसिद्धम्; “महत्यनेकद्रव्यत्वाद्रूपविशेषाच्च[8][9][10] रूपोपलब्धिः” [वैशे० सू० ४।१।६] इत्यभ्युपगमात्। न च समानदेशत्वादवयविनोऽवयवेभ्यो[11][12][13] भेदेनानुपलब्धिः[14]; वातातपादिभी रूपरसादिभिश्चानेकान्तात्, तेषां समानदेशत्वेपि भेदेनोपलम्भसम्भवात्।

किञ्च, अवयवावयविनोः शास्त्रीयदेशापेक्षया समानदेशत्वम्, लौकिकदेशापेक्षया वा? प्रथमपक्षेऽसिद्धो हेतुः; पटावयविनो[15] ह्यन्ये एवारम्भकास्तन्त्वादयो देशास्तेषां[16] चान्ये भवद्भिर[17]भ्युपगम्यन्ते। द्वितीयपक्षेप्यनेकान्तः; लोके हि समानदेशत्वमेकभाजनवृत्तिलक्षणं भेदेनार्थानामुपलम्भेप्युपलब्धम्, यथा कुण्डे बदरादीनाम्।

किञ्च, कतिपयावयवप्रतिभासे सत्यऽवयविनः प्रतिभासः, निखिलावयवप्रतिभासे वा? तत्राद्यविकल्पोऽयुक्तः; जलनिमग्नमहाकायगजादेरुपरितनकतिपयावयवप्रतिभासेप्यखिलावयवव्यापिनो गजाद्यवयविनोऽप्रतिभासनात्[18]। नापि द्वितीयविकल्पो युक्तः; मध्यपरभागवर्त्तिसकलावयवप्रतिभासासम्भवेनावयविनोऽप्रतिभासप्रसङ्गात्। भूयो[19]ऽवयवग्रहणे सत्यवयविनो ग्रहणमित्यप्ययुक्तम्; यतोऽर्वाग्भागभाव्यवयवग्राहिणा प्रत्यक्षेण परभागभाव्यवयवाग्रहणान्न तेन तद्व्याप्तिरवयविनो ग्रहीतुं शक्या,

१ स्कन्धभेदपूर्वकत्वेऽस्कन्धभेदपूर्वकत्वे च तत्त्वादिति हेतोर्वर्त्तनात्। २ घटविनाशपूर्वककपालवदिति दृष्टान्ते साध्यसाधनविकलं दर्शयन्नाह परः। ३ एवं प्रवेणीरूपस्यार्थस्य विनाशो ज्ञेयः, तन्तवस्तु स्वारम्भकावयवेभ्यः समुत्पद्यन्ते, ततः प्रवेणीभेदपूर्वकत्वं पटपूर्वकालभाविनामपि तन्तूनां नास्तीति भावः। ४ उक्तन्यायात्। ५ यौगपरिकल्पितं स्थूलावयविद्रव्यं निराकुर्वन्नाह जैनः। ६ सर्वथा। ७ भेदेन। ८ विशेषणम्। ९ परमाणुनाऽव्यभिचारार्थमेतत्। १० आकाशेन व्यभिचारपरिहारार्थं रूपविशेष इति। ११ भेदे सत्यपि। १२ अम्भःक्षीरवत्। १३ पटस्य। १४ अन्यथा समानदेशत्वाद्भेदेनानुपलब्धिर्यदि तर्हि। १५ कथम्? तथा हि। १६ प्रवेणिकासम्बन्धिनोंशाः। १७ वैशेषिकैः। १८ सर्वथा तयोर्भेदात्। १९ बहु।

व्याप्याग्रहणे तद्व्यापकस्यापि ग्रहीतुमशक्तेः[1]। प्रयोगः-यद्येन रूपेण प्रतिभासते तत्तथैव तद्व्यवहारविषयः यथा नीलं नीलरूपतया प्रतिभासमानं तद्रूपतयैव तद्व्यवहारविषयः, अर्वाग्भागभाव्य[2]वयवसम्बन्धितया प्रतिभासते चावयवीति । न[3] च परभागभाविव्यवहितावयवाप्रतिभासनेऽप्यव्यवहितोऽवयवी प्रतिभातीत्यभिधातव्यम्; तदप्रतिभासने तद्गतत्वेनास्या[4]ऽप्रतिभासनात् । ५
तथाहि-यस्मिन्प्रतिभासमाने यद्रूपं न प्रतिभाति तत्ततो भिन्नम्[5] यथा घटे प्रतिभासमानेऽप्रतिभासमानं पटस्वरूपम्, न प्रतिभासते चार्वाग्भागभाव्यवयवसम्बन्ध्यवयविस्वरूपे प्रतिभासमाने परभागभाव्यवयवसम्बन्ध्यवयविस्[6]वरूपम्[7], इति कथं निरंशैका[8]व- १०
यविसिद्धिः[10]? अर्वाग्भागपरभागभाव्यवयवसम्बन्धित्वलक्षणविरु[11]द्धधर्माध्यासेऽप्यस्याभेदे सर्वत्र[12] भेदोपरतिप्रसङ्गः, अन्यस्य[13] भेदनिबन्धनस्यासम्भवात् । प्रतिभासभेदो भेदनिबन्धनमित्यप्यपेशलम्; विरुद्धधर्माध्यासं भेदकमन्तरेण प्रतिभासस्यापि भेदकत्वासम्भवात् । १५

नापि परभागभाव्यवयवावयविग्राहिणा प्रत्यक्षेणार्वाग्भागभाव्यवयवसम्बन्धित्वं तस्य[14] ग्रहीतुं शक्यम्; उक्त[15]दोषानुषङ्गात् । नापि स्मरणेनार्वाक्परभागभाव्यवयवसम्बन्ध्यवयविस्वरूपग्रहः; प्रत्यक्षानुसारेणास्य प्रवृत्तेः, प्रत्यक्षस्य च तद्ग्राहकत्वप्रतिषेधात् । नाप्यात्मा अर्वाक्परभागावयवव्यापित्वमवयविनो ग्रहीतुं समर्थः; २०
जडतया[16] तस्य तद्ग्राहकत्वानुपपत्तेः, अन्यथा स्वापमदमूर्च्छाद्यवस्थास्वपि तद्ग्राहित्वानुषङ्गः । प्रत्यक्षादिसंहाय[17]स्याप्यात्मनोवयविस्वरूपग्राहित्वायोगः; अवयविनो निखिलावयवव्याप्तिग्राहित्वेनाध्यक्षादेः प्रतिषेधात् ।

---

१ दण्डाग्रहणे तत्सम्बन्धवान्दण्डी पुमान् ग्रहीतुं न शक्यते यथा । २ अवयवी धर्मी अर्वाग्भागभाव्यवयवसम्बन्धितया तद्व्यवहारविषयस्तथैव प्रतिभासमानत्वादित्युपरिष्टाद्योज्यम् । ३ परभागभाविव्यवहितावयवाप्रतिभासमानेपि अव्यवहितोऽवयवी भाति, ततस्तथैव प्रतिभासमानत्वमसिद्धमित्युक्ते सत्याह । ४ अवयवी परभागभाव्यऽवयवगतत्वेन न प्रतिभासतेऽगृहीताधारत्वान्मेरुमूर्ध्नि मोदकराशिवत् । ५ भिन्नम् । ६ तस्मिन्प्रतिभासमानेऽप्रतिभासमानत्वादिति हेतोः । ७ तस्माद्भिन्नमेव । ८ भागद्वये सति । ९ तन्तुलक्षणैरंशैः कृत्वा पटोंऽशी प्रतिपाद्यते तस्मात्सर्वथा भिन्ना अतो निरंशावयवी ते तस्मात्सर्वथा भिन्ना अतस्तेषां विनाशेपि अस्य विनाशो नातो नित्यत्वमिति भावः । १० तव परस्य । ११ व्यवहिताऽव्यवहितलक्षण । १२ घटपटादौ । १३ विरुद्धधर्माध्यासादपरस्य । १४ अवयविनः । १५ व्याप्याग्रहणे तद्व्यापकस्यापि ग्रहीतुमशक्तेरित्यादि । १६ परमते जड आत्मा । १७ आदिना स्मरणग्रहणम् ।

ननु चार्वाग्भागदर्शने सत्युत्तरकालं परभागदर्शनानन्तरस्मरण[1]-सहकारीन्द्रियजनितं 'स एवायम्' इति प्रत्यभिज्ञाज्ञानमध्यक्षमवयविनः पूर्वापरावयवव्याप्तिग्राहकम्; तदप्यसाम्प्रतम्; प्रत्यभिज्ञाज्ञानेऽध्यक्षरूपत्वस्यैवासिद्धेः । अक्षाश्रितं विशदस्वभावं हि प्रत्यक्षम्, न चास्यैतल्लक्षणमस्तीति । अक्षाश्रितत्वे चास्याखिलावयवव्याप्यवयविस्वरूपग्राहकत्वासम्भवः; अक्षाणां सकलावयवग्रहणे व्यापारासम्भवात्[2] । न च स्मरणसहायस्यापीन्द्रियस्याविषये व्यापारः सम्भवति । यद्यस्याविषयो न तत्तत्र स्मरणसहायमपि प्रवर्त्तते यथा परिमलस्मरणसहायमपि लोचनं गन्धे, अविषयश्च व्यवहितोऽक्षाणां परभागभाव्यवयवसम्बन्धित्वलक्षणोऽवयविनः स्वभाव इति ।

न[3] चानेकावयवव्यापित्वमेकस्वभावस्यावयविनो घटते; तथा हि-यन्निरंशैकस्वभावं द्रव्यं तन्न सकृदनेकद्रव्याश्रितम् यथा परमाणु, निरंशैकस्वभावं चावयविद्रव्यमिति । यद्वा, यदनेकं द्रव्यं तन्न सकृन्निरंशैकद्रव्यान्वितम् यथा कुटकुड्यादि, अनेकद्रव्याणि चावयवा इति ।

अस्तु वानेकत्रावयविनो वृत्तिः; तथाप्यस्यासौ सर्वात्मना, एकदेशेन वा स्यात्? यदि सर्वात्मना प्रत्येकमवयवेष्ववयवी वर्तेत; तदा यावन्तोऽवयवास्तावन्त एवावयविनः स्युः, तथा चानेककुण्डादिव्यवस्थितबिल्वादिवदनेकावयव्युपलम्भानुषङ्गः ।

अथैकदेशेन; अत्राप्यस्यानेकत्र वृत्तिः किमेकावयवक्रोडीकृतेन स्वभावेन, स्वभावान्तरेण वा स्यात्? तत्राद्यविकल्पोऽयुक्तः; तस्य तेनैवावयवेन क्रोडीकृतत्वेनान्यत्र[5] वृत्त्ययोगात् । प्रयोगः-यदेकक्रोडीकृतं वस्तुस्वरूपं न तदेवान्यत्र वर्त्तते यथैकभाजनक्रोडीकृतमाम्रादि न तदेव भाजनान्तरमध्यमध्यास्ते, एकावयवक्रोडीकृतं चावयविस्वरूपमिति । वृत्तौ वान्यत्र अत्रावयवे[6] वृत्त्यनुपपत्तिरपरस्वभावाभावात् । एकावयवसम्बद्धस्वभावस्याऽतद्देशावयवान्तरसम्बन्धाभ्युपगमे च तदवयवानामेकदेशतापत्तिः, एकदेशतायां चैकात्म्यमविभक्तरूपत्वात् । विभक्तरूपावस्थितौ चैकदेशत्वं

१ स्मरणं हि पूर्वभागस्य । २ तदविषयत्वात् । ३ परपरिकल्पितमवयविनः स्वरूपमऽवयवप्रधानतया निराकुर्वन्नाह । ४ एकस्वभावत्वं च नित्यनिरंशैकस्वभावत्वात् । ५ अवयवान्तरे । ६ विवक्षितावयवे । ७ तेषां=विवक्षिताविवक्षितानाम् । ८ विवादापन्ना अवयवा एकदेशत्वभाजो भवन्त्येकस्वभावेनावयविना व्याप्यत्वादेकावयववत् । ९ अवयवानाम् । १० अविभक्तरूपत्वमसिद्धमित्युक्ते सत्याह ।

न स्यात् । अथ स्वभावान्तरेणासाववयवान्तरे वर्त्तते; तदास्य निरंशताव्याघातः[1], कथञ्चिदनेकत्वप्रसङ्गश्च, स्वभावभेदात्मकत्वाद्वस्तुभेदस्य । ते च स्वभावा यद्यतोऽर्थान्तरभूताः; तदा तेष्वप्यसौ स्वभावान्तरेण वर्तेतेत्यनवस्था । अथानर्थान्तरभूताः[2]; तर्ह्यवयवैः[3] किमपराद्धं येनैते तथा नेष्यन्ते? तदिष्टौ वावयविनोऽनेकैत्वमनित्यत्वं[4] च स्वशिरस्ताडं पूत्कुर्वतोप्यायातम्[5] ।

यदि चावयव्यविभागः स्यात्तदैकदेशस्यावरणे रागे च अखिलस्यावरणं रागश्चानुषज्यते, रक्तारक्तयोरावृतानावृतयोश्चावयविरूपयोरेकत्वेनाभ्युपगमात् । न चैवं प्रतीतिः, प्रत्यक्षविरोधात् । न चान्योन्यं विरुद्धधर्माध्यासेप्येकं[6] युक्तम्, अत एव, अनुमानविरोधाच्च । तथाहि-यद्विरुद्धधर्माध्यासितं तन्नैकम् यथा कुटकुड्याद्युपलभ्यानुपलभ्यस्वभावम्, आवृतानावृतादिस्वरूपेण विरुद्धधर्माध्यासितं चावयविस्वरूपमिति[7] । तथाप्येकत्वे विश्वस्यैकद्रव्यत्वानुषङ्गः ।

ननु वस्त्रादे[8] रागः कुङ्कुमादिद्रव्येण संयोगः, स चाव्याप्यवृत्ति[9]स्तत्कथमेकत्र[10] रागे सर्वत्र[11] राग एकदेशावरणे सर्वस्यावरणम्[12]? तदप्यसाम्प्रतम्; यतो यदि पटादि निरंशमेकं द्रव्यम्, तदा कुङ्कुमादिना किं तत्राव्याप्तं येनाऽव्याप्यवृत्तिः संयोगो भवेत्? अव्याप्तौ वा भेदप्रसङ्गो व्याप्ताव्याप्तस्वरूपयोर्विरुद्धधर्माध्यासेनैकत्वायोगात् ।

किञ्च, अस्याव्याप्यवृत्तित्वं सर्वद्रव्याव्यापकत्वम्, एकदेशवृत्तित्वं वा? न तावत्प्रथमः पक्षः; द्रव्यस्यैकस्य सर्वशब्दविषयत्वानभ्युपगमात्[13] । अनेकत्र हि सर्वशब्दप्रवृत्तिरिष्टा । नापि द्वितीयः; तस्यैकदेशासम्भवात्, अन्यथा सावयवत्वप्रसङ्गात्[14] । ततो नास्त्यवयवी वृत्तिविकल्पाद्यनुपपत्तेरिति[15] ।

ननु चावयविनो निरासे यत्साधनं तत्किं स्वतन्त्रम्[16], प्रसङ्गसा-

१ किंतु सांशत्वप्रसङ्गः । २ अवयविनः सकाशादभिन्नाः । ३ तन्तुलक्षणैः । ४ अवयवी धर्म्यऽनेको भवतीति साध्यो धर्मोऽवयवेभ्योऽनर्थान्तरत्वात्तत्स्वरूपवत् । अवयवी धर्म्यऽनित्यो भवति अवयवेभ्योऽनर्थान्तरत्वात्तत्स्वरूपवत् । अवयवानां बहुत्वादनित्यत्वाच्चेति उभयत्र हेतुः । ५ वैशेषिकस्य । ६ निरंशम् । ७ तस्मान्नैकम् । ८ एकदेशे । ९ अव्याप्यवृत्तिर्गुणः संयोगलक्षण इति वचनात् । १० एकदेशे । ११ देशे । १२ देशस्य । १३ परेण । १४ तथा च निरंशत्वव्याघातः स्यात् । १५ शशविषाणवत् । १६ पक्षहेतुदृष्टान्तादयो यत्र विद्यन्ते तत्स्वतन्त्रम् ।

धनं वा? स्वतन्त्रं[1] चेत्; धर्मि[2]साध्यपदयोर्व्याघातः[3], यथा–'इदं च नास्ति च' इति। हेतोराश्रयासिद्धत्वञ्च; अवयविनो[4]ऽप्रसिद्धेः। न च वृत्त्या[5] सत्त्वं व्याप्तम्; समवायवृत्त्यनभ्युपगमेऽपि भवता[6] रूपादेः सत्त्वाभ्युपगमात्[7]। एकदेशेन[8] सर्वात्मना वावयविनो
५ वृत्तिप्रतिषेधे विशेषप्रतिषेधस्य शेषाभ्यनुज्ञा[9]विषयत्वात् प्रकारान्तरेण[10] वृत्तिरभ्युपगता स्यात्, अन्यथा[11] 'न वर्तते' इत्येवाभिधातव्यम्[12]। वृत्तिश्च[13] समवायः, तस्य सर्वत्रै[14]कत्वान्निरवयवत्वाच्च कार्त्स्न्यैकदेशशब्दाविषयत्वम्[15]। अथ प्रसङ्गसाधनं परस्ये[16]ष्ट्या[17]ऽनिष्टापादनात्। ननु परेष्टिः[18] प्रमाणम्, अप्रमाणं वा? यदि प्रमाणम्;
१० तर्हि तयैव बाध्यमानत्वादनुत्थानं विपरीतानुमानस्य[19]। न चानेनैवास्या बाधा; तामन्तरेणास्या[20]ऽपक्षधर्मत्वात्[21]। अथाप्रमाणम्; तर्हि प्रमाणं विना प्रमेयस्या[22]सिद्धिरित्यभिधातव्यम्[23], किमनुमानोपन्यासेनास्याऽपक्षधर्मतयाऽप्रमाणत्वात्?

इत्यप्यपरीक्षिताभिधानम्; यतः प्रसङ्गसाधनमेवेदम्[24]। तच्च
१५ 'साध्यसाधनयोर्व्याप्यव्यापकभाव[25]सिद्धौ व्याप्याभ्युपगमो व्यापकाभ्युपगमनान्तरीयकः[26], व्यापकाभावो वा व्याप्याभावाविनाभावी' इत्येतत्प्रदर्शन[27][28]फलम्। [व्याप्य]व्यापकभावसिद्धि[29]श्चात्र लोकप्रसिद्धैव। लोको हि कस्यचित्क्वचित्सर्वात्मना वृत्तिमभ्युपगच्छति यथा बिल्वादेः कुण्डादौ, कस्यचित्त्वेकदेशेन यथानेक-
२० पीठादिशयितस्य चैत्रादेः। यत्र[30] च प्रकारद्वयं व्यावृत्तं तत्र वृत्ति[31]-

---

१ परेष्ट्यानिष्टापादनं यत्र तत्प्रसङ्गसाधनम्। २ अवयवी धर्मी, नास्तीति साध्यपदम्। ३ स्वमतापेक्षया वक्ति वैशेषिकः। लोकप्रसिद्धोऽस्ति नास्तीति प्रतिपाद्यते जैनैरिति विरोध इति भावः। परस्परं विरोध इत्यर्थः। ४ वादिनो जैनस्यापेक्षयाऽवयविनो धर्मिणः। ५ समवायवृत्त्यावयवेष्ववयवी वर्तते यतः। ६ जैनेन। ७ तादात्म्येन, न तु समवायेनेति भावः। ८ किञ्च। ९ शेषाभ्यनुज्ञा=सामान्याभ्युपगमः। १० समवायेन। ११ विशेषप्रतिषेधस्य शेषाभ्यनुज्ञाविषयत्वाभावे। १२ न तु सर्वात्मनैकदेशेनेत्यभिधातव्यम्। १३ अवयवेष्ववयविनः। १४ अवयवेषु। १५ अवयवेष्ववयविनः समवायः कार्त्स्न्येनैकदेशेन वेति शब्दः। १६ प्रतिवादिनो वैशेषिकस्य। १७ पराभ्युपगमेन परस्यैवानिष्टापादनात्। १८ अवयवेभ्यो भिन्नोऽवयवी सर्वथा विद्यते इति परेष्टिः। १९ अवयवी नास्ति वृत्तिविकल्पाद्यनुपपत्तेरिति। २० अवयवी नास्ति वृत्तिविकल्पाद्यनुपपत्तेरित्यस्य। २१ विपरीतानुमानेन परेष्टेः पराभ्युपगमस्य यदा बाधा स्यात्तदा परेष्टिविषयस्यावयविनोऽसत्त्वात्तद्धर्मत्वं हेतोर्नास्तीति भावः। २२ अवयविरूपस्य। २३ जैनेन। २४ एवकारः स्वतन्त्रसाधननिरासार्थः। २५ क्वचिद्दृष्टान्ते। २६ अविनाभूतः। २७ धर्मिणि। २८ प्रसङ्गसाधनं भवति। २९ कार्त्स्न्यैकदेशवृत्तित्वयोः। ३० अवयवेषु। ३१ अवयवेष्ववयविनः सर्वात्मनैकदेशेन वा वृत्तेः।

रभाव एव इति[1] कथं न व्याप्तिर्यतोत्र[2] प्रसङ्गसाधनस्यावकाशो न स्यात्? निरस्ता चानेकस्मिन्नेकस्य वृत्तिः प्रागेव।

यच्चोक्तम्-'परेष्टिः प्रमाणमप्रमाणं वा' इत्यादि; तदप्ययुक्तम्; यतः प्रमाणाप्रमाणचिन्ता संवादविसंवादाधीना। परेष्टिमात्रेण च प्रतिपन्नवयविनि संवादकप्रमाणाभावादप्रामाण्यं स्वयमेव भविष्यति। ननु च 'इहेदम्' इति प्रत्ययप्रतीतेः प्रत्यक्षेणैवावयविनो वृत्तिसिद्धेः कथं संवादकप्रमाणाभावो यतोस्याः प्रामाण्यं न स्यात्? इत्यप्यसङ्गतम्; तन्त्वाद्यवयवेषु व्यतिरिक्तस्य पटाद्यवयविनः समवायवृत्तेः[3] स्वप्नेप्यप्रतीतेः। न च भेदेनाप्रतिभासमानस्य 'इहेदं वर्त्तते' इति प्रतीतिर्युक्ता। न हि भेदेनाप्रतिभासमाने कुण्डे 'इह कुण्डे बदराणि' इति प्रत्ययो दृष्टः।

यद्य(द)प्युक्तम् वृत्तिश्च समवायस्तस्य सर्वत्रैकत्वान्निरवयवत्वाच्च कार्त्स्न्यैकदेशशब्दाविषयत्वमिति; तदपि स्वमनोरथमात्रम्; समवायस्याग्रे प्रबन्धेन प्रतिषेधात्। ननु तथाप्येकस्मिन्नवयविनि कार्त्स्न्यैकदेशशब्दाप्रवृत्तेरयुक्तोयं प्रश्नः-'किमेकदेशेन प्रवर्त्तते कार्त्स्न्येन वा' इति। कृत्स्नमिति ह्येकस्याशेषाभिधानम्, 'एकदेशः' इति चानेकत्वे सति कस्यचिदभिधानम्। ताविमौ कार्त्स्न्यैकदेशशब्दावेकस्मिन्नवयविन्यनुपपन्नौ; इत्यप्यसमीचीनम्; एकत्रैकत्वेनावयविनोऽप्रतिभासमानात् प्रकारान्तरेण च वृत्तेरसम्भवात्। न खलु कुण्डादौ बदरादेः स्तम्भादौ वा वंशादेः कार्त्स्न्यैकदेशं परित्यज्य प्रकारान्तरेण वृत्तिः प्रतीयते। ततोऽवयवेभ्यो भिन्नस्यावयविनो विचार्यमाणस्यायोगान्नासौ तथाभूतोभ्युपगन्तव्यः। किं तर्हि? तन्त्वाद्यवयवानामेवावस्थाविशेषैः स्वात्मभूतैः शीतापनोदाद्यर्थक्रियाकारी प्रमाणतः प्रतीयमानः पटाद्यवयवीति प्रेक्षादक्षैः प्रतिपत्तव्यम्।

ननु रूपादिव्यतिरेकेणापरस्यावस्थातुः शीताद्यपनोदसमर्थस्याप्रतीतितोऽसत्त्वात् कस्यावयवित्वं भवतापि प्रसाध्यते? चेन्नः-

---

१ एकदेशेन सर्वात्मना वेति प्रकारद्वयेन वृत्तिर्व्याप्ता, तया वाऽवयविसत्त्वं व्याप्तमिति हेतोः। २ एकस्यावयविनोऽनेकेष्ववयवेषु वृत्तिर्भविष्यति नन्वित्याशङ्कायामाहाचार्यः। ३ सकाशात्। ४ बदरेभ्यः। ५ विस्तरेण। ६ अशेषाणां स्वभावानाम्। ७ देशानाम्। ८ देशस्य। ९ सर्वथा। १० अवयवेषु। ११ परमतापेक्षया। १२ वर्त्तनस्य। १३ सर्वथा। १४ आतानवितानीभूतपरिणामविशेषः। १५ अवयवेभ्यः कथञ्चिदभिन्नः। १६ रूपिप्रतिषेधकः सौगतः। १७ आदिना रसगन्धवर्णशब्दाः। १८ अवयविरूपपदार्थस्य। १९ हेतोरसिद्धत्वं परिहरति परः।

प्रभवप्रत्यये हि रूपमेवावभासते नापरस्तद्वान्, एवं रसनादिप्रत्ययेपि वाच्यम्; इत्यविचारितरमणीयम्; यतः किमेकस्य रूपादिमतोऽसम्भवो विरुद्धधर्माध्यासेनैकत्रैकत्वानेकत्वयोस्तादात्म्यविरोधात्, तद्ग्रहणोपायासम्भवाद्वा? प्रथमपक्षे तत्र तयोः कथ-
५ञ्चित्तादात्म्यं विरुद्धयते, सर्वथा वा? सर्वथा चेत्; सिद्धसाध्यता। कथञ्चिदेकत्वं तु रूपादिभिर्विरुद्धधर्माध्यासेप्येकस्याऽविरुद्धम् चित्रज्ञानस्येव नीलाद्याकारैर्विकल्पज्ञानस्येव वा विकल्पेतराकारैरिति। यथा च रूपादिरहितं प्रत्यक्षे न प्रतिभासते तथा तद्रहिता रूपादयोपि। न खलु मातुलिङ्गद्रव्यरहितास्तद्रूपादयः
१० स्वप्नेप्युपलभ्यन्ते। वस्तुनश्चेदमेवाध्यक्षत्वं यदनात्मस्वरूपपरिहारेण बुद्धौ स्वरूपसमर्पणं नाम। इमे तु रूपादयो द्रव्यरहितास्तत्र स्वरूपं न समर्पयन्ति प्रत्यक्षतां च स्वीकर्त्तुमिच्छन्तीत्यमूल्यदानक्रयिणः।

किञ्च, इदं स्तम्भादिव्यपदेशार्हं रूपम्-किमेकं प्रत्येकम्,
१५ अनेकानंशपरमाणुसञ्चयमात्रं वा? प्रथमपक्षे अधोमध्योर्द्धात्मकैकरूपवत् रसाद्यात्मकैकस्तम्भद्रव्यप्रसङ्गः। द्वितीयपक्षे तु किमेकमनेकपरमाण्वाकारं ज्ञानं तद्ग्राहकम्, एकैकपरमाण्वाकारमनेकं वा? प्रथमविकल्पे चित्रैकज्ञानवद्रूपाद्यात्मकैकद्रव्यप्रसिद्धिरनिषेध्या स्यात्। द्वितीयविकल्पे तु परस्परविविक्तज्ञानपरमाणुप्रति-
२० भासस्यासंवेदनात्सकलशून्यतानुषङ्गः।

अथ तद्ग्रहणोपायासम्भवाद्रूपादिमतो द्रव्यस्याभावः; तन्न; 'यमहमद्राक्षं तमेतर्हि स्पृशामि' इत्यनुसन्धानप्रत्ययस्य तद्ग्राहिणः सद्भावात्। न च द्वाभ्यामिन्द्रियाभ्यां रूपस्पर्शाधारैकार्थग्रहणं विना प्रतिसन्धानं न्याय्यम्। रूपस्पर्शयोश्च प्रतिनियतेन्द्रियग्राह्य-
२५ त्वादेतन्न सम्भवति। चेतनत्वाच्चात्मनः स्मरणादिपर्यायसहायस्य

---

१ एकस्मिन्वस्तुनि। २ अवयविनः। ३ रूपादीनाम्। ४ द्रव्यरूपतया। ५ साहित्ये। ६ अवयविनः। ७ इतरो=निर्विकल्पकः पूर्वसविकल्पकादुपादानभूतान्निर्विकल्पकात्सहकारिभूतात्सविकल्पकमुत्पद्यते तदा तदुभयोराकारं बिभ्रति। ८ इदमेव सम्भावयति। ९ तर्हि रूपादयो द्रव्यरहिता बुद्धौ स्वरूपसमर्पका भविष्यन्तीत्याह। १० द्रव्यरहितत्वादिति प्रथमान्तोपि हेतुर्ज्ञेयः। ११ मूल्यं स्वरूपसमर्पणलक्षणमदत्त्वा क्रयिण इति भावः। १२ सौगतमते चित्रैकज्ञानं स्वीकृतम्। १३ एकस्मिन्वस्तुनि। १४ लोके। १५ ज्ञेयग्राहकज्ञानाभावात् ज्ञेयस्याप्यभावात्। १६ अनुसन्धानं=प्रत्यभिज्ञानम्। १७ चक्षुःस्पर्शनाभ्याम्। १८ अनेन प्रत्यक्षमपि तद्ग्राहकमुक्तम्, ततश्चात्मसिद्धिरिति। १९ वैशेषिकमतनिरासार्थम्। २० बौद्धमतनिरासार्थम्।

अर्वाक्परभागावयवं[1]व्यापित्वग्रहणमप्यवयविद्रव्यस्योपपन्नम् । प्रसाधितं चानुसन्धानस्य सविपर्यं[2]त्वमित्यलमतिप्रसङ्गेन[3] । तत्र परेषां[4] चतुःसंख्यं द्रव्यं यथोप[5]वर्णितस्वरूपं घटते, सर्वथा नित्यस्वभावाणूनामनर्थक्रियाकारित्वेनासम्भवतः तदारब्धद्व्यणुकाद्यवयविद्रव्यस्याप्यसम्भवात् । न हि कारणाभावे कार्यं प्रभवत्यतिप्रसङ्गात् । स्वावयवेभ्योर्थान्तरस्यावयविनो ग्राहकप्रमाणाभावाच्चासत्त्वम् ।

जातिभेदेन[6] पृथिव्यादिद्रव्याणां भेदोपवर्णनं चानुपपन्नम्; स्वरूपासिद्धौ शशशृङ्गवद्भेदोपवर्णनासम्भवात् । जातिभेदेनात्यन्तं तेषां भेदे चान्योन्यमुपादानोपादेयभावो न स्यात् । येषां हि जातिभेदेनात्यन्तिको भेदो न तेषां तद्भावः यथात्मपृथिव्यादीनाम्, तथा तद्भेदश्च पृथिव्यादिद्रव्याणामिति । तन्तुपटाद्युपादानोपादेयभावेन व्यभिचारपरिहारार्थम् आत्यन्तिकविशेषणम् । न हि तत्रात्यन्तिकस्तद्भेदः, पृथिवीत्वादिसामान्यस्याभिन्नस्याप्तेः । नन्वेवं द्रव्यत्वादिना पृथिव्यादीनामप्यभेदात्तद्भावोस्तु; तन्न; आत्मपृथिव्यादीनामप्येवं तद्भेदाभावादुपादानोपादेयभावः स्यात्, तथा चात्माद्वैतप्रसङ्गात्कुतः पृथिव्यादिभेदः स्यात्? तन्नात्यन्तिकभेदे पृथिव्यादीनां तद्भावो घटते । अस्ति चासौ-चन्द्रकान्ताज्जलस्य, जलान्मुक्ताफलादेः, काष्ठादनलस्य, व्यजनादेश्चानिलस्योत्पत्तिप्रतीतेः । चन्द्रकान्ताद्यन्तर्भूताज्जलादेरेव द्रव्याज्जलाद्युत्पत्तिः; इत्यप्यनुपपन्नम्; तत्र तत्सद्भावावेदकप्रमाणाभावात् । तथापि चन्द्रकान्तादौ जलाद्यभ्युपगमे मृत्पिण्डादौ घटाद्यभ्युपगमोपि कर्तव्य इति सांख्यदर्शनमेव स्यात् । ततो मृत्पिण्डादौ घटादिवच्चन्द्रकान्तादौ जलादेरप्यप्रतीतितोऽभावात्, आत्यन्तिकभेदे चोपादानोपादेयभावासम्भवात्, 'पर्यायभेदेनान्योन्यं पृथिव्यादीनां भेदो रूपरसगन्धस्पर्शात्मकपुद्गलद्रव्यरूपतया चाभेदः' इत्यनवद्यम् । रूपादिसमन्वयश्च गुणपदार्थ-

---

१ रूपस्पर्शे । २ प्रत्यभिज्ञानसमर्थनसमये । ३ अनुसन्धानसमर्थनेन । ४ वैशेषिकाणाम् । ५ सर्वथा नित्यानित्यतया । ६ पृथिवीत्वादिना । ७ ययोर्जातिभेदेन भेदो न तयोरुपादानोपादेयभावोस्तीत्युक्ते ततस्तन्तुपटादौ व्यभिचारो भवति । ८ तन्तुत्वपटत्वजातिभेदे सत्यपि । ९ तन्तुपटादिषु । १० अयमात्मेमे पृथिव्यादय इति । ११ मा भवत्वित्युक्ते सत्याह । १२ पृथिवीरूपात् । १३ सर्वं सर्वत्र विद्यते इति वचनात् । १४ पृथिव्यामेव गन्धोऽप्स्वेव रस इति वचनात्कथं चतुर्णामविशेषेण रूपाद्यात्मकत्वमित्याह । १५ समन्वयः सम्बन्धः ।

परीक्षायां चतुर्णामपि समर्थयिष्यते । तन्न नित्यादिस्वभावमात्यन्तिकभेदभिन्नं च पृथिव्यादिद्रव्यं घटते ।

नाप्याकाशादि; सर्वथा नित्यनिरंशत्वादिधर्मोपेतस्यास्याप्रतीतेः । ननु चाकाशस्य तद्धर्मोपेतत्वं शब्दादेव लिङ्गात्प्रतीयते; तथाहि-ये विनाशित्वोत्पत्तिमत्त्वादिधर्माध्यासितास्ते क्वचिदाश्रिता यथा घटादयः, तथा च शब्दा इति । गुणत्वाच्च ते क्वचिदाश्रिता यथा रूपादयः । न च गुणत्वमसिद्धम्; तथाहि-शब्दो गुणः प्रतिषिध्यमानद्रव्यकर्मभावत्वे सति सत्तासम्बन्धित्वाद्रूपादिवत् । न चेदं साधनमसिद्धम्; तथाहि-शब्दो द्रव्यं न भवत्येकद्रव्यत्वाद्रूपादिवत् । न चेदमप्यसिद्धम्; तथाहि एकद्रव्यः शब्दः सामान्यविशेषवत्त्वे सति बाह्यैकेन्द्रियप्रत्यक्षत्वात्तद्वदेव । 'सामान्यविशेषवत्त्वात्' इत्युच्यमाने हि परमाणुभिर्व्यभिचारः, तन्निवृत्त्यर्थम् 'इन्द्रियप्रत्यक्षत्वात्' इत्युक्तम् । तथापि घटादिना व्यभिचारः, तन्निरासार्थमेकविशेषणम् । 'एकेन्द्रियप्रत्यक्षत्वात्' इत्युच्यमाने आत्मना व्यभिचारः, तन्निवृत्त्यर्थं बाह्यविशेषणम् । रूपत्वादिना व्यभिचारपरिहारार्थं च 'सामान्यविशेषवत्त्वे सति' इति विशेषणम् ।

तथा, कर्मापि न भवत्यसौ संयोगविभागाकारणत्वाद्रूपादिवदेवेति । तस्मात्सिद्धं प्रतिषिध्यमानद्रव्यकर्मभावत्वं शब्दस्य । 'सत्तासम्बन्धित्वात्' इत्युच्यमाने च द्रव्यकर्मभ्यामनेकान्तः, तन्निवृत्त्यर्थं 'प्रतिषिध्यमानद्रव्यकर्मभावत्वे सति' इति विशेषणम् । 'प्रतिषिध्यमानद्रव्यकर्मभावत्वात्' इत्युच्यमानेपि सामान्यादिना व्यभिचारः, तन्निवृत्त्यर्थं 'सत्तासम्बन्धित्वात्' इत्यभिधानम् । तत्सिद्धं गुणत्वेन क्वचिदाश्रितत्वं शब्दानाम् ।

---

१ जैनैः । २ गगने । ३ स्वावयवेषु । ४ तस्मात्क्वचिदाश्रिता भवन्त्येव । ५ आकाशविशेषगुणः शब्द इति वचनात् । ६ रूपिद्रव्ये । ७ शब्दो द्रव्यं न भवति कर्म च नेति । ८ त्रयः पदार्थाः स्वरूपेणासन्तः सत्तासम्बन्धात्सन्त इति वचनात् । ९ गगनलक्षणमेकं द्रव्यं यस्य स एकद्रव्यस्तस्य भावः, दृष्टान्तपक्षे घटाद्येकद्रव्यं यस्य रूपादेः । १० सामान्यशब्देनात्रापरसामान्यं गृह्यते । ११ एकद्रव्यत्वाभावात् । १२ घटादीनामेकद्रव्यत्वाभावात् । १३ घटस्य स्पर्शनचक्षुरिन्द्रियाभ्यां ग्राह्यत्वात् । १४ यतो मनोलक्षणेन्द्रियप्रत्यक्ष आत्मा । १५ अनेकद्रव्याश्रितत्वात् । १६ विशेषणम् । १७ इदानीं विशेष्यं विचारयति । १८ सत्तासम्बन्धित्वे द्रव्यकर्मणोर्गुणत्वाभावात् । १९ आदिना विशेषसमवाययोर्ग्रहणम् । २० गुणत्वाभावात् । २१ सामान्यविशेषसमवायाः स्वरूपेण सन्तो न तु सत्तासम्बन्धादित्यभिधानात् ।

यश्चैषामाश्रयस्तत्पारिशेष्यादाकाशम्; तथाहि-न तावत्स्पर्श[1]वतां परमाणूनां विशेषगुणः शब्दोऽस्मदादि[2]प्रत्यक्ष[3]त्वात्कार्यद्रव्यरूपादिवत्। नापि कार्यद्रव्याणां पृथिव्यादीनां विशेषगुणोऽसौ; कार्य[4]द्रव्यान्तराप्रादुर्भावेऽप्युपजायमानत्वात्सुखादिवत्, अकारण[5]गुणपूर्वकत्वादिच्छादि[6]वत्, अयाव[7]द्द्रव्यभावित्वा[8]त्, अस्मदादिपुरु- ५
षान्तरप्रत्यक्षत्वे सति पुरुषा[9]न्तराप्रत्यक्षत्वाच्च तद्वत्, आश्रयाद्रव्यादेरन्यत्रोपलब्धेश्च। स्प[10]र्शवतां हि पृथिव्यादीनां यथोक्तविपरीता[11] गुणाः प्रतीयन्ते। नाप्यात्मविशेषगुणः; अहङ्कारेण विभ[12]क्तग्रहणात्, बाह्येन्द्रियप्रत्यक्षत्वात्, आत्मान्तरग्राह्यत्वाच्च। बु[13]द्ध्यादीनां चात्मगुणानां त[14]द्वैपरीत्योपलब्धेः। नापि मनोगुणः; अस्मदा- १०
दिप्रत्यक्षत्वाद्रूपादिवत्। नापि दिक्कालविशेषगुणः; तयोः पूर्वापरादिप्रत्ययहेतु[15]त्वात्। अतः पारिशेष्याद्गुणो भूत्वाकाशस्यैव लिङ्गम्।

तच्च शब्दलिङ्गाविशेषा[16]द्विशेषलिङ्गाभावाच्चैकम्। विभु च सर्वत्रोपलभ्यमानगुणत्वात्, नित्य[17]त्वे सत्यस्मदाद्यु[18]पलभ्यमानगुणा[19]धिष्ठानत्वाच्चात्मादिवत्। नि[20]त्यं शब्दाधिकरणं द्रव्यं सामान्य- १५
विशेष[21]वत्त्वे सत्यनाश्रि[22]तत्वादात्मादिवत्। अ[23]नाश्रितं शब्दाधिकरणं द्रव्यं गु[24]णवत्त्वे सत्यस्पर्शवत्त्वात्तद्वत्। असम[25]वायवत्त्वे सत्यऽनाश्रितत्वाच्चास्य द्रव्यत्वमिति।

---

१ पृथिव्यादिचतुर्णाम्। २ योगिप्रत्यक्षेण व्यभिचारपरिहारार्थम्। ३ तेषामतीन्द्रियत्वात्तद्गुणोऽप्यतीन्द्रिय एवेति भावः। ४ कार्य=द्व्यणुकादि। ५ कारणस्य गगनस्य गुणः कारणगुणः न विद्यते कारणगुणः पूर्वं यस्य शब्दस्यासावकारणगुणपूर्वकस्तस्य भावस्तस्मात्, पृथिव्यादिविशेषगुणे परमाणुरूपस्य कारणस्य गुणपूर्वकत्वमस्तीति। ६ दृष्टान्तपक्षे आत्मा कारणम्। ७ गगने सर्वत्र न विद्यते यतः। ८ इच्छादिवदेव। ९ योतिशयेन दूरान्तरितः। १० सर्वत्र सन्दिग्धानैकान्तिकत्वे सत्याह। ११ कार्यद्रव्यान्तरप्रादुर्भावे समुपजायमानलक्षणाः। १२ अहं सुख्यहं दुःखीत्यादिवदहंशब्दवान् इत्यहंकारेण विभक्तस्य रहितस्य शब्दस्य ग्रहणात्। १३ सन्दिग्धानैकान्तिकत्वे सत्याह। १४ हेतोरसिद्धत्वपरिहारार्थमिदम्। १५ दिगाकाशकालादि सर्वगतं परमते शब्दस्य दिक्कालविशेषगुणत्वे शब्द एव तयोस्सद्भावे लिङ्गं स्यादिति भावः। १६ अविशेषः एकत्वम्। १७ पटेन व्यभिचारपरिहारार्थम्। १८ परमाणुभिर्व्यभिचारपरिहारार्थम्। १९ स गुणः शब्दः। २० नित्यत्वमसिद्धमित्युक्ते सत्याह। २१ अभावेन वा व्यभिचारपरिहारार्थम्। २२ घटेन व्यभिचारपरिहारार्थम। २३ असिद्धत्वे सत्याह। २४ गुणेन व्यभिचारपरिहारार्थं गुणवत्त्वमिति विशेषणं गुणानां निर्गुणत्वात्। २५ समवायेनाभावेन वा व्यभिचारपरिहारार्थम्।

अत्र प्रतिविधीयते । शब्दानां सामान्येनाश्रितत्वं किमतः साध्यते, नित्यैकामूर्त्तविभुद्रव्याश्रितत्वं वा? प्रथमपक्षे सिद्धसाध्यता; तेषां पुद्गलकार्यतया तदाश्रितत्वाभ्युपगमात्। द्वितीयपक्षे तु सन्दिग्धविपक्षव्यावृत्तिकत्वेनानैकान्तिको हेतुः; तथाभूतसा-
५ ध्यान्वितत्वेनास्य क्वचिद्दृष्टान्तेऽप्रसिद्धेः । प्रतिषिध्यमानकर्मभावत्वे सत्यपि च प्रतिषिध्यमानद्रव्यभावत्वमसिद्धम्; द्रव्यत्वाच्छब्दस्य । तथा हि-द्रव्यं शब्दः, स्पर्शाल्पत्वमहत्त्वपरिमाणसंख्यासंयोगगुणाश्रयत्वात्, यद्यदेवंविधं तत्तद्द्रव्यम् यथा वदरामलकबिल्वादि, तथा चायं शब्दः, तस्माद्द्रव्यम् ।

१० तत्र न तावत्स्पर्शाश्रयत्वमस्यासिद्धम्; तथाहि-स्पर्शवाञ्छब्दः स्वसम्बद्धार्थान्तराभिघातहेतुत्वात् मुद्गरादिवत् । सुप्रतीतो हि कंसपात्र्यादिध्वानाभिसम्बन्धेन श्रोत्राद्यभिघातस्तत्कार्यस्य बाधिर्यादेः प्रतीतेः । स चास्याऽस्पर्शवत्त्वे न स्यात्। न ह्यस्पर्शवता कालादिनाभिसम्बन्धेऽसौ दृष्टः। न च शब्दसहचरितेन वायुना
१५ तदभिघातः इत्यभिधातव्यम्; शब्दाभिसम्बन्धान्वयव्यतिरेकानुविधायित्वात्तस्य, तथाभूतेपि तदभिघातेऽन्यस्यैव हेतुकल्पने तत्रापि कः समाश्वासः? शक्यं हि वक्तुम्-न वाय्वाद्यभिसम्बन्धात्तदभिघातः किन्त्वन्येन, इत्यनवस्थानं हेतूनाम्। गुणत्वेनास्य निर्गुणत्वात्स्पर्शाभावात्तदभिघाताहेतुत्वे चक्रकप्रसङ्गः—गुणत्वं
२० ह्यद्रव्यत्वे, तदप्यस्पर्शवत्त्वे, तदपि गुणत्वे इति । स्पर्शवतार्थेनाभिहन्यमानत्वाच्च स्पर्शवानसौ । न चानेनाभिहन्यमानत्वमस्यासिद्धम्; प्रतिवातभित्त्यादिभिः शब्दस्याभिहन्यमानतया सकलजनसाक्षिकत्वात् मूर्तेन चामूर्त्तस्याविरोधेनाऽप्रतिघाताद्गगनभित्त्यादिवत्। तन्नास्य स्पर्शाश्रयत्वमसिद्धम् ।

२५ नाप्यल्पमहत्त्वपरिमाणाश्रयत्वम्; अल्पमहत्त्वप्रतीतिविषयत्वाद्बदरादिवत्। ननु च 'अल्पः शब्दो मन्दः' इत्यादिप्रतीत्या मन्द-

१ गुणत्वादिति हेतोः । २ इति विशेषणम् । ३ अतोनुमानान्नभसो द्रव्यसिद्धिराश्रयमात्रस्यैव सिद्धिप्रसङ्गात् । ४ जैनानाम् । ५ विपक्षः अनित्यानेकमूर्त्ताऽविभुद्रव्याश्रितम् । ६ रूपादयो दृष्टान्तभूता अनित्यादिविशिष्टपक्षे वर्त्तन्तेऽतोऽयमपि हेतुस्तादृशे पक्षे वर्त्तते अन्यादृशे वेति सन्दिग्धः । ७ गुणत्वात् । ८ नित्यैकव्याप्याश्रयाश्रितत्वे साध्यविकलो दृष्टान्तो रूपादीनां तद्विपरीताश्रयाश्रितत्वात् । ९ ते च ते गुणाश्च । १० अनिर्वचनीयेन । ११ आदौ यत्प्रतिपादितं तदेवान्ते स्यादिति चक्रकदोष इति भावः । १२ सन्दिग्धानैकान्तिकत्वे इदम् । १३ स्पर्शवद्भिः । १४ असिद्धमिति संबन्धः । १५ शब्दस्य । १६ अल्पत्वमहत्त्वपरिमाणम् ।

त्वमेव धर्मो गृह्यते, 'महान् पटुस्तीव्रः' इत्यादिप्रतीत्या च तीव्रत्वम्, न पुनः परिमाणमियत्तानवधारणात्। नहि 'अयं महाञ्छब्दः' इति व्यवस्यन् 'इयान्' इत्यवधारयति, यथा द्रव्याणि बदरामलकबिल्वादीनि[1]। मन्दतीव्रता[2] चावान्तरो जातिविशेषो गुणवृत्तित्वाच्छब्दत्ववत्[3]; तदप्यपेशलम्; यतः कथं शब्दस्य गुणत्वं सिद्धं यतस्तद्वृत्तित्वान्मन्दत्वादेर्जातिविशेषत्वं सिद्ध्येत्? अद्रव्यत्वाच्चेत्; तदपि कथम्? अल्पमहत्त्वपरिमाणानधिकरणत्वाच्चेत्; तदपि कुतः? गुणत्वात्; चक्रकप्रसङ्गः।

द्रव्यान्तरवदियत्तानवधारणाच्चेत्[4]; न; वायुनानेकान्तात्[5]। न खलु बिल्वबदरादेरिव वायोरियत्तावधार्यते। वायोरप्रत्यक्षत्वा[6]दियत्ता सत्यपि नावधार्यते, न शब्दस्य विपर्ययात्[7]; इत्यप्ययुक्तम्; गुणगुणिनोः[8] कथञ्चिदेकत्वे[9] गुणप्रतिभासे गुणिनोपि प्रतिभाससम्भवात्[10]। वायुगतस्पर्शविशेषस्यैवाध्यक्षत्वाभ्युपगमे च 'स्पर्शोत्र शीतः खरो वा' इति प्रतीतिः स्यान्न वायुरिति[11]। न खलु रूपावभासिनि प्रत्यये[12] सोवभासते[13]। स्पर्शविशेषपरिणामस्यैव[14] च वायुत्वात्कथं नास्य प्रत्यक्षत्वम्[15]?

इयत्ता[16] चेयं यदि परिमाणादन्या[17]; कथमन्यस्यानवधारणे[18]ऽन्यस्या[19]भावः? न खलु घटानवधारणे पटाभावो युक्तः[20]। परिमाणं चेत्; तर्हि 'इयत्तानवधारणात्परिमाणं नास्ति' इत्यत्र[21] 'परिमाणं नास्ति परिमाणानवधारणात्' इत्येतावदेवोक्तं स्यात्। अल्पत्वमहत्त्वप्रत्ययतस्तत्परिमाणावधारणे च कथं तदनवधारणं नामामलकादावपि तत्प्रसङ्गात्? मन्दतीव्रताभिसम्बन्धात्तत्प्रत्ययसम्भवे[22] च मन्दवाहिनि नर्मदानीरे 'अल्पमेतत्[23]' तीव्रवाहिनि च कुल्याजले[24]

---

१ इयन्ति अवधारयति जनः। २ तीव्रत्वं मन्दत्वं च परिमाणविशेषोऽस्त्वित्युक्ते सत्याह। ३ शब्दे। ४ चक्रकपरिहारार्थं गुणत्वादिति हेतुस्थले इयत्तानवधारणादिति हेतुं योजयति परः। ५ अल्पत्वमहत्त्वपरिमाणाधिकरणत्वेपि वायोरियत्ता नावधार्यते इति भावः। ६ अनैकान्तिकत्वं हेतोः परिहरन्नाह। ७ प्रत्यक्षत्वात्। ८ इयत्तावाय्वोः। ९ प्रदेशभेदाभावात्। १० ततश्च वायुगतस्य स्पर्शस्य प्रत्यक्षत्वाद्वायोरपि प्रत्यक्षत्वं स्यात्, तथा च वायोरप्रत्यक्षत्वं वक्तुमशक्यं तव परस्य। ११ न वायुः शीतः खरो वेति प्रतीतिः। १२ रूपी वायुः। १३ तथा च वायोरभावः स्यात्। १४ कथञ्चिदेकत्वेन। १५ त्वगिन्द्रियग्राह्यत्वम्। १६ इयत्ताया अनवधारणे शब्दस्याल्पत्वमहत्त्वपरिमाणस्याभावः इत्यास्मिन्पक्षे दूषणान्तरम्। १७ इयत्ता परिमाणाद्भिन्नाभिन्ना वेति विकल्पद्वयम्। १८ इयत्तालक्षणस्य। १९ परिमाणलक्षणस्य। २० अन्येति विकल्पे। २१ द्वितीयपक्षे। २२ परेणाङ्गीक्रियमाणे। २३ जलम्। २४ अल्पा सरित् कुल्या।

'महदेतत्' इति प्रत्ययः स्यात् । न चैवम् । तस्मान्न मन्दतीव्रता-निबन्धनोयं प्रत्ययः, अपि त्वल्पमहत्त्वपरिमाणनिबन्धनः, अन्यथा बदरामलकादावपि तन्निबन्धनोसौ न स्यात् । बदरादीनां द्रव्य-त्वेन तत्परिमाणसम्भवात्तस्य तन्निबन्धनत्वे शब्देप्यत एवासौ ५ तन्निबन्धनोस्तु विशेषाभावात् । कारणगतस्य चाल्पमहत्त्वपरि-माणस्य शब्दे उपचारात्तथा प्रत्यये बदरादावप्यसौ तथानुष-ज्येत । तन्नाल्पमहत्त्वपरिमाणाश्रयत्वमप्यस्यासिद्धम् ।

नापि सङ्ख्याश्रयत्वम्; 'एकः शब्दो द्वौ शब्दौ बहवः शब्दाः' इति संख्यावत्त्वप्रतीतेर्घटादिवत् । अथोपचाराच्छब्दे संख्याव-१० त्त्वप्रतीतिः; ननु किं कारणगता, विषयगता वा शब्दे संख्योप-चर्येत? कारणगता चेत्; किं समवायिकारणगता, कारणमात्र-गता वा? आद्यपक्षे 'एकः शब्दः' इति सर्वदा व्यपदेशप्रसङ्गस्त-स्यैकत्वात् । द्वितीयपक्षे तु 'बहवः शब्दाः' इति व्यपदेशः स्यात्तस्य बहुत्वात् । विषयसंख्योपचारे तु गगनाकाशव्योमादिशब्दा बहु-१५ व्यपदेशभाजो न स्युर्गगनलक्षणविषयस्यैकत्वात् । पश्वादीनां च बहुत्वात् 'एको गोशब्दः' इति स्वप्नेपि दुर्लभम् । यथाऽविरोधं संख्योपचारः; इत्यप्ययुक्तम्; स्वयं संख्यावत्त्वमन्तरेणाविरोधाऽसम्भवात् ।

किञ्च, विपरीतोपलम्भस्य बाधकस्य सद्भावे सत्युपचारकल्पना २० स्यात्, न चाग्नित्वरहितपुरुषस्यैवैकत्वादिसंख्यारहितस्य शब्द-स्योपलम्भोस्तीति कथमुपचारकल्पना? तथापि तत्कल्पने अनुप-चरितमेव न किञ्चित्स्यात् । तन्न संख्याश्रयत्वमप्यसिद्धम् ।

नापि संयोगाश्रयत्वम्; वाय्वादिनाभिहन्यमानत्वात्, पांश्वादि-वत् । संयुक्ता एव हि पांश्वादयो वायुनान्येन वाऽभिहन्यमाना २५ दृष्टाः । तेन तदभिघातश्च देवदत्तं प्रत्यागच्छतः प्रतिवातेन प्रति-

---

१ जलम् । २ भवतित्युक्ते सत्याहाचार्यः । ३ अल्पत्वमहत्त्वलक्षणः । ४ बद-रादिष्वल्पत्वमहत्त्वप्रत्ययस्य । ५ अल्पत्वमहत्त्वप्रत्ययः । ६ द्रव्यत्वेनाल्पत्वमहत्त्वपरि-माणससम्भवस्य । ७ शब्दस्य कारणमाकाशम् । ८ द्रव्यस्य । ९ कार्यरूपे । १० ताल्वादिभिर्यादिकारणमात्रस्य । ११ विषयः=शब्दस्य वाच्यः । १२ वाग्दिग्भू-रश्मिवारिबाणाख्यस्वर्गाणां ग्रहणमादिशब्देन । १३ किन्तु गोशब्दा बहवो भवेयुरिति भावः, न तु गोशब्दो बहुप्रकारः । १४ एकस्मिन्घटे एकः शब्द इत्यादिवद् । १५ पदार्थानाम् । १६ शब्दलक्षणार्थानाम् । १७ असंख्यावत्त्वस्य । १८ एकत्वादि-संख्यारहितस्योपलम्भाभावेपि । १९ संयोगो गुणः । २० शब्दस्य । २१ सन्दिग्धत्वे सत्याह । २२ साधनमसिद्धमित्युक्ते सत्याह । २३ शब्दस्य ।

निवर्त्तनात्पांश्वादिवदेवावसीयते[1], तदे[2]प्यन्यदिगवस्थितेने[3] श्रवणात्। ननु[4] गन्धादयो देवदत्तं प्रत्यागच्छन्तस्तेन निवर्त्यन्ते, न च तेषां तेन संयोगो निर्गुणत्वाद्गुणानाम्[5]; तन्न[6]; तद्वतो द्रव्यस्यैवानेन प्रतिनिवर्त्तनात्, केवलानां तेषां निष्क्रियत्वेनागमननिवर्त्तनायोगात्। ततः[7] सिद्धं गुणवत्त्वाद्द्रव्यत्वं शब्दस्य।　५

क्रियावत्त्वाच्च बाणादिवत्। निष्क्रियत्वे तस्य श्रोत्रेणाऽग्रहणमनभिसम्बन्धात्। तथापि ग्रहणे श्रोत्रस्याप्राप्यकारित्वं स्यात्। तथा च, 'प्राप्यकारि चक्षुर्बाह्येन्द्रियत्वात्त्वगिन्द्रियवत्' इत्यस्यानैकान्तिकत्वम्। सम्बन्धकल्पने श्रोत्रं वा शब्दोत्पत्तिप्रदेशं[8] गत्वा शब्देनाभिसम्बध्येत, शब्दो वा स्वोत्पत्तिदेशादागत्य श्रोत्रेणाभिसम्बध्येत? न तावद्धर्माधर्माभ्यां संस्कृतकर्णशष्कुल्यवरुद्धनभोदेशलक्षणश्रोत्रस्य शब्दोत्पत्तिदेशे गतिः; तथा प्रतीत्यभावात्, निष्क्रियत्वाच्च[9]। गतौ वा विवक्षितशब्दान्तरालवर्त्तिनाम[10]ल्पशब्दानामपि[11] ग्रहणप्रसङ्गः; सम्बन्धा[12]विशेषात्। अनुवातप्रतिवाततिर्यग्वातेषु[13] प्रतिपत्त्यप्रतिपत्तीषत्प्रतिपत्तिभेदाभावश्च, श्रोत्रस्य गच्छतस्तत्कृतोपकारा[14]द्ययोगात्[15]। नापि शब्दस्य श्रोत्रप्रदेशागमनम्; निष्क्रियत्वोपगमात्[16]। आगमने वा सक्रियत्वम्[17]।　१० / १५

ननु नाद्य एवाकाशतच्छङ्खमुखसंयोगेश्वरादेः[19] समवाय्यसमवायिनिमित्तकारणाज्जातः शब्दः श्रोत्रेणागत्य सम्बध्यते येनायं दोषः, अपि तु वीचीतरङ्गन्यायेनापरापर एवाकाशशब्दादि[18]लक्षणात् समवाय्यसमवायिनिमित्तकारणाज्जातः[20] तेनाभिसम्बध्यते; तदप्यसमीचीनम्; सर्वत्र क्रियोच्छेदानुषङ्गात्। 'बाणादयोपि हि पूर्वपूर्वसमानजातीयलक्षणप्रभवा लक्ष्यप्रदेशव्यापिनो न पुनस्ते[21] एव' इति कल्पयितुं शक्यत्वात्। तत्र प्रत्यभिज्ञानान्नित्यत्वासिद्धेर्नैवं　२०

१ निश्चीयते। २ न चेदमसिद्धम्। ३ पुरुषेणावसीयते। ४ अनैकान्तिकहेतुमुद्भावयति परः। ५ द्रव्यरहितानाम्। ६ व्यभिचारो नास्ति प्रतिनिवर्त्तनादित्यस्य हेतोर्यतः। ७ शब्दस्य। ८ ताल्वादिकम्। ९ निष्क्रियत्वमसिद्धमित्याह। १० अन्तरालं भेर्यादिशब्दे। ११ अविवक्षितानां नरादिशब्दानाम्। १२ श्रोत्रेण। १३ सत्सु। १४ शब्दोत्पत्तिदेशं प्रति। १५ आदिना अनुपकारेषदुपकारग्रहणम्। १६ परेण। १७ तथा च द्रव्यं शब्द इत्यायातम् शब्दः क्रियावान्पूर्वदेशत्यागेन देशान्तरे समुपलभ्यमानत्वात्, यदित्थं तदित्थं यथा बाणादि, न चेदमसिद्धं वक्तृमुखप्रदेशत्यागेन श्रोत्रप्रदेशे समुपलभ्यमानत्वात्। १८ आदिनानुकूलवातादिग्रहः। १९ आदिना ईश्वरादिग्रहः। २० अन्त्यः शब्दः। २१ प्रथममुक्ताः।

कल्पना चेत्; नन्विदं प्रत्य[3]भिज्ञानं शब्देपि समानम् 'उपाध्यायोक्तं [2]श्रृणोमि शिष्योक्तं वा श्रृणोमि' इति प्रतीतेः।

ननु प्रत्यभिज्ञानस्य[4] भवद्दर्शने[5] दर्शनस्मरणकारणकत्वादत्र च तदभावात्कथं तदुत्पत्तिः ? न खलूपाध्यायोक्ते शब्दे दर्शनवत्[6] स्मरणं भवति; अस्य पूर्वदर्शनाद्याहितसंस्कारप्रबोधनिबन्धनत्वात्। न च कारणाभावे कार्यं भवत्यतिप्रसङ्गात्; इत्यप्यनुपपन्नम्; सम्बन्धिता[7]प्रतिपत्तिद्वारेणा[8]त्रैकत्वस्य प्रतीतेः। सम्बन्धितायां च दर्शनस्मरणयोः सद्भावसम्भवात्प्रत्यभिज्ञानस्योत्पत्तिरविरुद्धा। तथाहि-प्रत्यक्षानुपलम्भतो[9]ऽनुमानतो वा तत्कार्यतया तत्संबन्धिनं[10] शब्दं प्रतिपद्येदानीं [11]तत्स्मृत्युपलम्भोद्भूतं प्रत्यभिज्ञानं तत्सम्बन्धितया तं प्रतिपद्यमानमेकत्वविशिष्टमेव प्रतिपद्यते[12], अन्यथा 'उपाध्यायोक्तं श्रृणोमि' इति प्रतीतिर्न स्यात्, किन्तु 'तदुक्तोद्भूतं[13] तत्सदृशं[14] शब्दान्तरं श्रृणोमि' इति प्रतीतिः स्यात्[15]। वीचीतरङ्गन्यायेन तदुत्पत्तिश्चात्रैव निषेत्स्यते।

यदि पुनर्लूनपुनर्जातनखकेशादिवत्सदृशापरापरोत्पत्तिनिबन्धनमेतत्प्रत्यभिज्ञानं न कालान्तरस्थायित्वनिबन्धनम्; तद्वाणादावपि समानम्[16]। न समानमत्र[17] बाधकसद्भावात् तथा[18] कल्पना, नान्यत्र विपर्ययात्[19]। नन्वत्र[20] प्रत्यक्षम्, अनुमानं वा बाधकं कल्प्येत ? प्रत्यक्षं चेत्; किमेकत्वविषयम्, क्षणिकत्वविषयं वा ? न तावदेकत्वविषयम्; समविषयत्वेन[21] तदनुकूलत्वात्[22]। नापि क्षणिकत्वविषयम्; शब्देऽन्यत्र वा तस्य[23] विवादगोचरापन्नत्वात्[24]। नाप्यनुमानम्; प्रत्यभिज्ञानं हि मानसप्रत्यक्षं भवन्मते[25] तस्य कथमनुमानं बाधकम् ? प्रत्यक्षमेव हि बाधकम् आमताग्राह्ये[26]कशाखाप्रभवत्वानुमानस्य, न पुनस्तदनुमानं प्रत्यक्षस्य। अथाध्यक्षा-

---

१ पूर्वक्षणे। २ उत्तरक्षणे। ३ अहं गुरुः। ४ एकत्वग्राहिणः। ५ जैनमते। ६ श्रोत्रेन्द्रियज्ञानवत्। ७ अयमुपाध्यायोक्तः शब्द इति। ८ मया यः शब्दः श्रूयते स उपाध्यायेनोक्त इति। ९ अन्वयव्यतिरेकतः। १० श्रूयमाणम्। ११ उपाध्यायसम्बन्धित्वेन तस्य शब्दस्य। १२ दर्शनस्मृतिप्रभवम्। १३ तेन उपाध्यायोक्तेन शब्देन। १४ व्यजनानिलवत्। १५ न चैवम्। १६ तथा चाशेषार्थानां क्षणिकत्वप्रसङ्गात्सौगतमतसिद्धिः स्यात्। १७ शब्दे। १८ क्षणिकत्वेन। १९ नेमे ते बाणादय इत्यत्र बाधकाभावात्। २० शब्दाक्षणिकत्वप्रत्यभिज्ञाने। २१ प्रत्यभिज्ञानस्यैकविषयत्वं प्रत्यक्षस्याप्येकविषयत्वम्। २२ तेन=प्रत्यभिज्ञानेन। २३ क्षणिकत्वविषयस्य प्रत्यक्षस्य। २४ असिद्धत्वादिति भावः। २५ वैशेषिकमते। २६ पक्वान्येतानि फलानि एकशाखाप्रभवत्वादित्यनुमानस्याऽऽमताग्राहि प्रत्यक्षं बाधकम्।

भासत्वादस्यानुमानं बाधकम्, यथा स्थिरचन्द्रार्कादिविज्ञानस्य देशान्तरप्राप्तिलिङ्गजनितं गत्यनुमानम्; कथं पुनरस्याध्यक्षाभासत्वम्? अनुमानेन बाधनाच्चेत्; अनेनानुमानस्य बाधनादनुमानाभासता किन्न स्यात्? अथानुमानबाधितविषयत्वान्नेदमनुमानस्य बाधकम्; अनुमानमप्येतद्बाधितविषयत्वान्नास्य बाधकं स्यात्। न च तदनुमानमस्ति।

नन्विदमस्ति-क्षणिकः शब्दोऽस्मदादिप्रत्यक्षत्वे सति विभुद्रव्यविशेषगुणत्वात् सुखादिवत्। सत्यमस्ति, किन्त्वेकशाखाप्रभवत्ववदेतत्साधनं प्रत्यभिज्ञाप्रत्यक्षबाधितकर्मनिर्देशानन्तरं प्रयुक्तत्वान्न साध्यसिद्धिनिबन्धनम्। विभुद्रव्यविशेषगुणत्वं चासिद्धम्; शब्दस्य द्रव्यत्वप्रसाधनात्। धर्मादिना व्यभिचारश्च; अस्य विभुद्रव्यविशेषगुणत्वेपि क्षणिकत्वाभावात्। तस्यापि पक्षीकरणाद्व्यभिचारे न कश्चिद्धेतुर्व्यभिचारी, सर्वत्र व्यभिचारविषयस्य पक्षीकरणात्। 'अस्मदादिप्रत्यक्षत्वे सति' इति च विशेषणमनर्थकम्; व्यवच्छेद्याभावात्। धर्मादेश्च क्षणिकत्वे स्वोत्पत्तिसमयानन्तरमेव विनष्टत्वात्ततो जन्मान्तरे फलं न स्यात्।

शब्दाच्छब्दोत्पत्तिवद्धर्मादेर्धर्माद्युत्पत्तिः; इत्यप्ययुक्तम्; तथाभ्युपगमाभावात्, तद्वदपरापरतत्कार्योत्पत्तिप्रसङ्गाच्च। 'परस्यानुकूलेष्वनुकूलाभिमानजनितोभिलाषः अभिलषितुरर्थाभिमुखक्रियाकारणमात्मविशेषगुणमारभ्नोति अनुकूलेष्वनुकूलाभिमानजनि-

१ शब्दैकत्वविषयस्याध्यक्षस्य। २ शब्दस्य क्षणिकत्वसाधकेन। ३ एतेन=मानसप्रत्यक्षेण। ४ शब्दक्षणिकत्वानुमानम्। ५ परममहापरिमाणेन व्यभिचारपरिहारार्थमिदं विशेषणम्। ६ विभु आकाशमात्मा च। ७ घटादिगतरूपादिना व्यभिचारनिरासार्थं विशेषेति। ८ उपहासे। ९ कर्म=प्रतिज्ञा। १० प्रत्यभिज्ञाप्रत्यक्षेण पूर्वं शब्दस्याक्षणिकत्वं साधितं यतः। ११ विभुद्रव्यविशेषगुणत्वादित्येवोच्यमाने। १२ क्षणिकत्वं=साध्यम्। १३ अनेकान्तपरिहाराय, पक्षान्तःपातित्वाद्धर्मादेः क्षणिकत्वमायातमिति भावः। १४ व्यवच्छेद्यफलं हि विशेषणमिति वचनात्। १५ अस्मदादिप्रत्यक्षत्वे सतीति विशेषणेन किलास्मदाद्यप्रत्यक्षो धर्मादिर्व्यवच्छेद्यः, तस्यापि पक्षीकरणे व्यवच्छेद्यमस्य विशेषणस्य नास्तीति भावः, सर्वेषां पक्षीकरणाद्विशेषणेन परिहरणीयस्याभावात्। १६ परेण। १७ धर्माधर्मयोः क्षणिकत्वे। १८ अस्तु, न चैवम्, न खलु धर्माद्युत्पत्तिवदपरापरवनिताद्यङ्गाद्युत्पत्तिः प्रतीयते। १९ प्रकृतसाध्ये हेत्वन्तरमिदम्। २० अनुष्ठातुर्वैशेषिकस्य। २१ इज्यायागादिपूजादिषु धर्मोत्पादनकारणभूतेषु। २२ धर्मजनकत्वेन। २३ इमान्यनुकूलानीत्यभिमानस्तेन जनितः। २४ अर्थ=स्रक्चन्दनादिकं प्रति। २५ क्रिया=कार्यम्। २६ उत्तरजन्मनि। २७ धर्मलक्षणं दृष्टान्तपक्षे प्रयत्नलक्षणं च। २८ उत्पादयति, साधयति।

ताभिलाषत्वात्[1] 'आत्मनो[2]ऽनु[3]कूलेष्वनुकूलाभिमानजनिताभिलाष-वत्' इत्यस्य[4] च विरोधः[5], यस्माद्यो[6]ऽसौ परस्यानुकूलेष्वनुकूला-भिमानजनिताभिलाषजनित आत्मविशेषगुणो नासावभिलषितु-[7]र्थाभिमुखक्रियाकारणम्, तत्समानस्य[8] तत्कारणत्वात्, यश्च[9]
५ तत्क्रियाकारणं नासौ यथोक्ताभिलाषजनित इति ।

'इच्छाद्वेषनिमित्तौ[10] प्रवर्त्तकनिवर्त्तकौ धर्माधर्मौ, अव्यवधानेन हिताहितविषय[11]प्राप्तिपरिहारहेतोः कर्मणः कारणत्वे[12] सत्यात्म-विशेषगुणत्वात्[13], प्रवर्त्तकनिवर्त्तकप्रयत्नवत्[14]' इत्यत्र[15] हेतोर्व्यभिचा-[16]रश्च-जन्मान्तरफलोदययोर्धर्माधर्मयोः[17] अव्यवधानेन हिताहित-
१० विषयप्राप्तिपरिहारहेतोः कर्मणः कारणत्वे सत्यात्मविशेषगुणत्वे-पीच्छाद्वेषजनितत्वाभावात् । ततः शब्दाच्छब्दोत्पत्तिवद्धर्मादे-र्धर्माद्युत्पत्त्यभावात् । क्षणिकत्वे[18] चातो जन्मान्तरे फलासम्भ-वादक्षणिकत्वं तस्याभ्युपगन्तव्यमित्यनेनानैकान्तिको[19] हेतुः[20] ।

अथा[21]स्मदादिप्रत्यक्षत्वविशेषणविशिष्टस्य विभुद्रव्यविशेषगुण-
१५ त्वस्या[22]त्रा[23]सम्भवान्न व्यभिचारः[24] । ननु मा भूद्व्यभिचारः; तथापि साकल्येन हेतोर्विपक्षा[25]द्व्यावृत्त्यसिद्धिः । विपक्ष[26]विरुद्धं[27] हि विशेषणं ततो हेतुं निवर्त्तयति । यथा[28] सहेतुकत्व[29]महेतुकत्व[30]विरुद्धं ततः

१ सामान्यं हेतुं ब्रुवतां दोषाभावात् । २ जीवस्य स्वस्य वा । ३ वस्त्रादिषु स्रक्-चन्दनादिषु च । ४ अनुमानस्य । ५ धर्मादेर्धर्माद्युत्पत्तौ सत्याम् । ६ धर्मलक्षणः । ७ अनुष्ठातुर्वैशेषिकस्य । ८ परापरोत्पत्त्या तस्मादन्यत्वात् । ९ अन्त्यो धर्मः । १० इच्छाद्वेषौ निमित्तं कारणं ययोर्धर्माधर्मयोरिति भावः । ११ कार्यस्य निष्पादका-निष्पादकौ । १२ कारणत्वादित्युच्यमाने चक्षुरादिना व्यभिचारस्तन्निवृत्त्यर्थमात्म-विशेषगुणत्वादित्युक्तम्, तावदुक्ते सुखादिनानेकान्तस्तत्परिहारार्थं कर्मणः कारणत्वे सतीति विशेषणम्, तावदुक्ते बुद्ध्यादिनानेकान्तस्तन्निरासार्थं हिताहितविषयप्राप्ति-परिहारहेतोरित्युपात्तम्, तावदुक्ते इच्छाद्वेषाभ्यामनेकान्तस्तन्निरासार्थमव्यवधानेनेति विशेषणमुपादीयते । १३ धर्माद्धितविषयप्राप्त्यहितविषयपरिहारौ भवतः, अधर्मादहित-विषयप्राप्तिहितविषयपरिहारौ स्त इति सम्बन्धः । १४ धर्माधर्मयोः । १५ अनुमाने । १६ धर्मादेः क्षणिकत्वे । १७ पूर्वधर्माधर्मसदृशयोः । १८ धर्मादेः क्षणिकत्वे साध्ये । १९ धर्मादेः क्षणिकत्वाभावात् । २० अस्मदादिप्रत्यक्षत्वे सतीति विशेषणं त्यक्त्वा विभुद्रव्यविशेषगुणत्वादित्ययं हेतुः । २१ व्यभिचारपरिहारार्थम् । २२ साधनस्य । २३ धर्मादौ । २४ शब्दे यथा सम्भवस्तथा धर्मादौ नास्ति यतः । २५ अक्षणिकात् । २६ कथम्? तथा हि । २७ हेतोर्विपक्षे वृत्तिं वारयति यत्तदेव हेतुविशेषणम् । २८ अनित्यः शब्दः कादाचित्कत्वाद् घटवदित्युक्ते खननोत्सेचनादिना कादाचित्केन नभसानैकान्तिकत्वम्, तद्व्यवच्छेदार्थं सहेतुकत्वे सति कादाचित्कत्वादिति साधनं प्रयोक्तव्यम् । २९ विशेषणम् । ३० अहेतुकम्—आकाशादि ।

कादाचित्कत्वम्[1] । न चास्मदादिप्रत्यक्षत्वमक्षणिकत्वविरुद्धम्; अक्षणिकेष्वपि सामान्यादिषु भावात्[2] । ततो यथास्मदादिप्रत्यक्षा अपि केचित्प्रदीपादयो भावाः[3] क्षणिकाः सामान्यादयस्त्वक्षणिकास्तथास्मदादिप्रत्यक्षा अपि विभुद्रव्यविशेषगुणाः 'केचित्क्षणिकाः[4] केचिदक्षणिका[5] भविष्यन्ति' इति सन्दिग्धो व्यतिरेकः[6] । ५
अथाक्षणिके क्वचिद्[7]स्मदादिप्रत्यक्षत्वविशेषणविशिष्टस्य विभुद्रव्यविशेषगुणत्वस्यादर्शनात्[8]ततो व्यावृत्तिसिद्धिः; न; भवदीयादर्शनस्य साकल्येन भावाभावाप्रसाधकत्वात्, अन्यथा परलोकादे[9]रप्यभावानुषङ्गः[10] । सर्वस्या[11]दर्शनं चासिद्धम्; सतो[11]ऽपि निश्चेतुमशक्य[12]त्वात् । १०

विपक्षे[13]ऽदर्शनमात्राद्[14]व्यावृत्ति[15]सिद्धौ—

"यद्वेदाध्ययनं किञ्चित्तदध्ययनपूर्वकम् ।
वेदाध्ययनवाच्यत्वादधुनाध्ययनं यथा ॥"

[मी० श्लो० पृ० ९४९]

इत्यस्या[16]पि गमकत्वप्रसङ्गः[17] । न खलु वेदाध्ययनमतदध्ययन- १५
पूर्वकं दृष्टम् । तथा चास्यानादित्वसिद्धेरीश्वर[18]पूर्वकत्वेन प्रामाण्यं न स्यात्[19] । न च कृतकत्वादा[20]वप्ययं दोषः समानः; तत्र विपक्षे[21] हेतोः सद्भावबाधकप्रमाणसम्भवात् ।

धर्मादेश्चास्मदाद्यप्रत्यक्षत्वे 'देवदत्तं प्रत्युपसर्पन्तः पश्वादयो देवदत्तगुणाकृष्टास्तं प्रत्युपसर्पणवत्त्वाद्ग्रासादिवत्' इत्यनुमानं न २०
स्यात्; व्याप्तेरग्रहणात्[22] । मानसप्रत्यक्षेण व्याप्तिग्रहणे सिद्धं धर्मादेरस्मदादिप्रत्यक्ष[23]त्वम् । अथ 'बाह्येन्द्रियेणास्मदादिप्रत्यक्ष[24]त्वे सति'

---

१ हेतुं निवर्तयति । २ अस्मदादिप्रत्यक्षत्वविशेषणस्य । ३ पदार्थाः । ४ सुखादयः । ५ धर्मादयः । ६ हेतोर्विपक्षाद्व्यावृत्तिः । ७ धर्मादौ । ८ आदिना परमाण्वादेश्च । ९ भवदीयादर्शनस्य परलोकादौ सद्भावाविशेषात्, तथा च चार्वाकमतप्रसङ्गः । १० नरस्य । ११ सर्वेषां हेतोर्विपक्षेऽदर्शनं विद्यते तथापि तस्य । १२ सर्वेषां प्राणिनां ग्रहणाभावात्, अन्यथाऽशेषज्ञत्वप्रसङ्गः । १३ अक्षणिके । १४ अदर्शनसामान्यात् । १५ विपक्षात् । १६ अपौरुषेयत्वलक्षणसाध्यस्य । १७ अवेदाध्ययनपूर्वके लोकवचने विपक्षे हेतोरदर्शनमात्राद्धेतोर्विपक्षाद्व्यावृत्तिसिद्धेः सद्भावात् । १८ ईश्वरकर्तृकत्वेन । १९ भवन्मते । २० हेतौ । २१ नित्ये गगनादौ, यत्कृतकं न भवति तदनित्यं न भवति यथा गगनमिति । २२ यद्यत्प्रत्युपसर्पणवत्तत्तद्देवदत्तगुणाकृष्टमिति प्रत्यक्षेण धर्मादेरप्रत्यक्षत्वात् । २३ ततश्च धर्मादिना व्यभिचारः पूर्ववदयस्य एव । २४ इति विशेषणेन ।

इति हेतुर्विशेष्यते[1] तदा साधनवैकल्यं[2] दृष्टान्तस्य, सुखादेस्तथा प्रत्यक्षत्वाभावात्।

यदि च वीचीतरङ्गन्यायेन शब्दोत्पत्तिरिष्यते[3] तदा प्रथमतो वक्तृव्यापारादेकः शब्दः प्रादुर्भवति, अनेको वा? यद्येकः; कथं नानादिक्कानेकशब्दोत्पत्तिः सकृदिति चिन्त्यम्। सर्वदिक्क[4]ताल्वादिव्यापारजनितवाय्वाकाशसंयोगानामसमवायिकारणानां समवायिकारणस्य[5] चाकाशस्य सर्वगतस्य भावात् सकृत्सर्वदिक्कनानाशब्दोत्पत्त्यविरोधे[6] शब्दस्यारम्भकत्वायोगः[7]। यथैवाद्यः शब्दो न शब्देनारब्धस्ताल्वाद्याकाशसंयोगादेवासमवायिकारणादुत्पत्तेः, तथा सर्वदिक्कशब्दान्तराण्यपि[8] ताल्वादिव्यापारजनितवाय्वाकाशसंयोगेभ्य एवासमवायिकारणेभ्यस्तदुत्पत्तिसम्भवात्। तथा[9] च "संयोगाद्विभागाच्छब्दाच्च शब्दोत्पत्तिः"[10][11][12] [वैशे० सू० २।२।३१] इति सिद्धान्तव्याघातः[13]।

अथ शब्दान्तराणां प्रथमः शब्दोऽसमवायिकारणं तत्सदृशत्वात्, अन्यथा तद्विसदृशशब्दान्तरोत्पत्तिप्रसङ्गो नियामकाभावात्। नन्वेवं प्रथमस्यापि शब्दस्य शब्दान्तरसदृशस्यान्यशब्दादसमवायिकारणादुत्पत्तिः स्यात् तस्याप्यपरपूर्वशब्दादित्यनादित्वापत्तिः शब्दसन्तानस्य स्यात्। यदि पुनः प्रथमः शब्दः प्रतिनियतः[14] प्रतिनियताद्वक्तृव्यापारादेवोत्पन्नः स्वसदृशानि शब्दान्तराण्यारभेत; तर्हि किमाद्येन शब्देनासमवायिकारणेन[15]? प्रतिनियतवक्तृव्यापारात्तज्जनितप्रतिनियतवाय्वाकाशसंयोगेभ्यश्च सदृशापरापरशब्दोत्पत्तिसम्भवात्। तन्नैकः शब्दः शब्दान्तरारम्भकः।

नाप्यनेकः; तस्यैकस्मात्ताल्वाद्याकाशसंयोगादुत्पत्त्यसम्भवात्। न चानेकस्ताल्वाद्याकाशसंयोगः सकृदेकस्य वक्तुः सम्भवति, प्रयत्नस्यैकत्वात्। न[16] च प्रयत्नमन्तरेण ताल्वादिक्रियापूर्वकोऽन्यतर[17]कर्मजस्ताल्वाद्याकाशसंयोगः प्रसूते यतोऽनेकशब्दः स्यात्।

अस्तु वा कुतश्चिदाद्यः शब्दोऽनेकः; तथाप्यसौ स्वदेशे[18] शब्दान्तराण्यारभते, देशान्तरे[19] वा? न तावत्स्वदेशे; देशान्तरे शब्दो-

---

१ विभुद्रव्यविशेषगुणत्वादित्ययम्। २ बाह्येन्द्रियेण सुखादिवदिति दृष्टान्तः प्रत्यक्षो न भवतीति भावः। ३ शब्दादेव। ४ सर्वदिक्कः=सर्वगतः। ५ उपादानस्येत्यर्थः। ६ भवन्मते। ७ प्रथमस्य। ८ शब्दान्तरं प्रति। ९ शब्दान्तरेणारब्धानि। १० शब्दस्यारम्भकत्वायोगे च। ११ भेरीदण्डयोः। १२ वंशादिविभागात्। १३ वैशेषिकस्य तव। १४ प्रतिनियतस्वरूपः विशिष्टः। १५ कल्पितेन। १६ न चेदमसिद्धम्। १७ ताल्वादिषु। १८ स्वोत्पत्तिदेशे ताल्वादौ। १९ स्वोत्पत्तिदेशादन्यदेशेषु।

पलम्भाभावप्रसङ्गात् । अथ देशान्तरे; तत्रापि किं तद्देशे गत्वा, स्वदेशस्थ एव वा देशान्तरे तान्यसौ जनयेत्? यदि स्वदेशस्थ एव; तर्हि लोकान्तेपि तज्जनकत्वप्रसङ्गः । अदृष्टमपि च शरीरदेशस्थमेव देशान्तरवर्त्तिमणिमुक्ताफलाद्याकर्षणं कुर्यात् । तथा च "धर्माधर्मौ स्वाश्रयसंयुक्ते आश्रयान्तरे कर्मारभेते" [ ] इत्यादिविरोधः । न च वीचीतरङ्गादावप्यप्राप्तकार्यदेशत्वे सत्यारम्भकत्वं दृष्टं येनात्रापि तथा तत्कल्प्येताध्यक्षविरोधात् । अथ तद्देशे गत्वा; तर्हि सिद्धं शब्दस्य क्रियावत्त्वं द्रव्यत्वप्रसाधकम् ।

किञ्च, आकाशगुणत्वे शब्दस्यास्मदादिप्रत्यक्षता न स्यादाकाशस्यात्यन्तपरोक्षत्वात्; तथाहि-येऽत्यन्तपरोक्षगुणिगुणा न तेऽस्मदादिप्रत्यक्षाः यथा परमाणुरूपादयः, तथा च परेणाभ्युपगतः शब्द इति । न च वायुस्पर्शेन व्यभिचारः; तस्य प्रत्यक्षत्वप्रसाधनात् ।

किञ्च, आकाशगुणत्वेऽस्मदादिप्रत्यक्षत्वे चास्यात्यन्तपरोक्षाकाशविशेषगुणत्वायोगः । प्रयोगः-यदस्मदादिप्रत्यक्षं तन्नात्यन्तपरोक्षगुणिगुणः यथा घटरूपादयः, तथा च शब्द इति ।

यच्चोक्तम्-'सत्तासम्बन्धित्वात्' इतिः तत्र किं स्वरूपभूतया सत्तया सम्बन्धित्वं विवक्षितम्, अर्थान्तरभूतया वा? प्रथमपक्षे सामान्यादिभिर्व्यभिचारः; तेषां प्रतिषिध्यमानद्रव्यकर्मभावत्वे सति तथाभूतया सत्तया सम्बन्धित्वेपि गुणत्वासिद्धेः । द्वितीयपक्षस्त्वयुक्तः; न हि शब्दादयः स्वयमसन्त एवार्थान्तरभूतया सत्तया सम्बध्यमानाः सन्तो नामाश्वविषाणादेरपि तथाभावानुषङ्गात् । प्रतिपेत्स्यते चार्थान्तरभूतसत्तासम्बन्धेनार्थानां सत्त्वमित्यलमतिप्रसङ्गेन ।

यच्चोक्तम्-शब्दो द्रव्यं न भवत्येकद्रव्यत्वात्; तत्रैकद्रव्यत्वं साधनमसिद्धम्; यतो गुणत्वे, गगने एवैकद्रव्ये समवायेन वर्तने च सिद्धे, तत्सिद्ध्येत्, तच्चोक्तया रीत्याऽपास्तमिति कथं तत्सिद्धिः?

---

१ मात्रोऽनेकः शब्दः । २ स्वाश्रयः आत्मा आत्मनो व्यापकत्वात् । ३ मणिमुक्ताफलादौ, शरीरापेक्षया । ४ आकर्षणादिलक्षणम् । ५ कार्यम्=उत्तरवीचीलक्षणम् । ६ उत्तरतरङ्गाणाम् । ७ वायुस्पर्शो ह्यत्यन्तपरोक्षगुणिगुणो भवत्यस्मदादिप्रत्यक्षो न भवतीति न । ८ आकाशगुणः शब्दः । ९ सामान्यविशेषसमवायवत् (सामान्यविशेषसमवायाः स्वतः सन्त इति वचनात्) । १० शब्दस्य । ११ द्रव्यगुणकर्मवत् । १२ उभयथा सत्तासम्बन्धित्वस्य दृष्टत्वात्प्रकारान्तरासम्भवात् । १३ आदिना विशेषसमवाययोर्ग्रहणम् । १४ रूपादिवत् । १५ शब्दस्य ।

यदप्येकद्रव्यत्वे साधनमुक्तम्-'एकद्रव्यः शब्दः सामान्यविशेषवत्त्वे सति बाह्यैकेन्द्रियप्रत्यक्षत्वात्' इति; तदपि प्रत्यनुमानबाधितम्; तथाहि-अनेकद्रव्यः[1] शब्दोऽसदादिप्रत्यक्षत्वे[2] सत्यपि स्पर्शवत्त्वाद्[3] घटादिवत्[4]। वायुनानेकान्तश्च; स हि बाह्यैके-
५ न्द्रियप्रत्यक्षोपि नैकद्रव्यः[5], चक्षुषैकेनाऽसदादिभिः प्रतीयमानैश्च-न्द्रार्कादिभिश्च[6]। असदादिविलक्षणैर्बाह्येन्द्रियान्तरेण[7][8] तत्प्रतीतौ शब्देपि तथा प्रतीतिः किन्न स्यात्? अत्र तथानुपलम्भोऽन्यत्रापि समानः[9]।

एतेनेदमपि[10] प्रत्युक्तम्-'गुणः शब्दः सामान्यविशेषवत्त्वे सति
१० बाह्यैकेन्द्रियप्रत्यक्षत्वाद्रूपादिवत्' इति; वाय्वादिभिर्व्यभिचारात्[11], ते हि सामान्यविशेषवत्त्वे सति बाह्यैकेन्द्रियप्रत्यक्षा न च गुणाः, अन्यथा द्रव्यसंख्याव्याघातः स्यात्[12]। ततः शब्दानां गुणत्वासिद्धेरयुक्तमुक्तम्-'यश्चैषामाश्रयस्तत्पारिशेष्यादाकाशम्' इति।

यच्चोक्तम्-'न तावत्स्पर्शवतां परमाणूनाम्[13]' इत्यादि; तत्सिद्ध-
१५ साधनम्; तद्गुणत्वस्य तत्रानभ्युपगमात्[14]। यथा चासदादिप्रत्यक्षत्वे[15] शब्दस्य परमाणुविशेषगुणत्वस्य विरोधस्तथाकाशविशेष-[16]गुणत्वस्यापि[17]। तथा हि-शब्दोऽत्यन्तपरोक्षाकाशविशेषगुणो न भवत्यसदादिप्रत्यक्षत्वात्कार्यद्रव्यरूपादिवत्। न ह्यसदादिप्रत्यक्षत्वं परमाणुविशेषगुणत्वमेव निराकरोति शब्दस्य नाकाश-
२० विशेषगुणत्वम् उभयत्राविशेषात्[18]। यथैव हि परमाणुगुणो रूपादिरसदाद्यप्रत्यक्षस्तथाकाशगुणो महत्त्वादिरपि।

यच्चाप्युक्तम्-'नापि कार्यद्रव्याणाम्[19]' इत्यादि; तदप्ययुक्तम्; शब्दस्याकाशगुणत्वनिषेधे[20] कार्यद्रव्यान्तराप्रादुर्भावेप्युत्पत्त्यभ्युपगमे[21] शब्दो निराधारो गुणः स्यात्। तथा च 'बुद्ध्यादयः क्वचिद्व-

---

१ अनेकानि द्रव्याणि यस्य परमाणुद्वयाद्यपेक्षया। २ योगिप्रत्यक्षेण परमाणुना व्यभिचारपरिहारार्थम्। ३ एकेन वायुपरमाणुना व्यभिचारपरिहारार्थम्। ४ परमाण्वपेक्षया। ५ परमाण्वपेक्षया। ६ अनेकान्त इति संबन्धः एकद्रव्यलक्षणसाध्याभावात्। ७ योगिभिः। ८ चक्षुषोपेक्षयान्येन स्पर्शनलक्षणेन। ९ तथा चानैकान्तिक एव हेतुः स्यादिति भावः। १० एकद्रव्यः शब्द इत्यादिनिराकरणेन। ११ आदिना पृथिव्यप्तेजसां ग्रहः। १२ नवद्रव्याणां पञ्चद्रव्यत्वप्रसङ्ग इत्यर्थः। १३ शब्दो विशेषगुणो न भवत्यसदादिप्रत्यक्षत्वात्कार्यद्रव्यरूपादिवत्। १४ जैनैः। १५ विशेषणे। १६ भवन्मते। १७ अस्मन्मते। १८ असदादिप्रत्यक्षत्वस्य। १९ पृथिव्यादीनाम्। २० जैनैः। २१ परेण।

र्तन्ते गुणत्वात्' इत्यस्य व्यभिचारः[1]। ततः कार्यद्रव्यान्तरोत्पत्ति[2]स्तत्राभ्युपगन्तव्येत्यसिद्धो हेतुः।

अकारण[3]गुणपूर्वकत्वं चासिद्धम्; तथा हि-नाकारणगुणपूर्वकः[4] शब्दोऽस्मदादिबाह्येन्द्रियग्राह्यत्वे सति गुणत्वात्पटरूपादिवत्[5]। न चाणुरूपादिना सुखादिना वा हेतोर्व्यभिचारः; 'बाह्येन्द्रियग्राह्यत्वे सति' इति विशेषणात्। नापि योगिबाह्येन्द्रियग्राह्येणाणुरूपादिना; अस्मदादिग्रहणात्। नापि सामान्यादिना; गुणग्रहणात्।

अयावद्द्रव्यभावित्वं च विरुद्धम्; साध्यविपरीतार्थप्रसाधनत्वात्[6]। तथाहि-स्पर्शवद्द्रव्यगुणः शब्दोऽस्मदादिबाह्येन्द्रियप्रत्यक्षत्वे सत्ययावद्द्रव्यभावित्वात्पटरूपादिवत्। 'अस्मदादिपुरुषान्तर-प्रत्यक्षत्वे सति पुरुषान्तराप्रत्यक्षत्वात्' इति चास्वाद्यमानेन रसादिनानैकान्तिकः[10]। 'आश्रयाद्[11]र्यावेरन्यत्रोपलब्धेः' इति चासङ्गतम्; भेर्यादेः शब्दाश्रयत्वासिद्धेस्तस्य तन्निमित्तकारणत्वात्। आत्मादि[12]गुणत्वा(त्व)प्रतिषेधस्तु सिद्धसाधनान्न समाधानमर्हति।

यच्च 'शब्दलिङ्गाविशेषात्[13]' इत्याद्युक्तम्; तद्वन्ध्यासुतसौभाग्य-व्यावर्णनप्र[14]ख्यम्; कार्यद्रव्यस्य व्यापित्वादिधर्मासम्भवात्।

[15]एतेनेदमपि निरस्तम्-'दिवि भुव्यऽन्तरिक्षे च शब्दाः[16] श्रूयमाणे-नैकार्थ[17]समवायिनः[18] शब्दत्वात् श्रूयमाणाद्यशब्दवत्[19]। श्रूयमाणः शब्दः समानजातीयासमवायिकारणः सामान्यविशेषवत्त्वे[20] सति नियमेनास्मदादिबाह्यैकेन्द्रियप्रत्यक्षत्वात्[21] कार्यद्रव्यरूपादिवत्[22]'

१ शब्दस्य गुणरूपस्य क्वचिद्दर्शनाभावात्। २ कार्यद्रव्यान्तरात्परमाणुरूपाच्छब्दजनकात्। ३ अकारणं=गगनम्, तस्य गुणो महत्त्वादिः। ४ किंतु स्पर्शरसगन्धवर्णवत्पुद्गलद्रव्यहेतुक इति भावः। ५ पटगतरूपगुणो यथा तन्तुगतरूपगुणपूर्वकः। ६ प्रसङ्गसाधनमेतत्। ७ आत्मनः स्वभावत्वात्। ८ वीचीतरङ्गन्यायेन शब्दाच्छब्दोत्पत्तेर्निषिद्धत्वात्। ९ प्रसङ्गसाधनमेतत्। १० विशेषगुणो न भवतीति साध्याभावात्। ११ शब्दस्यान्तर्जल्परूपस्य। १२ आदिना मनोदिक्काला गृह्यन्ते। १३ भेदाभावादेकमित्यर्थः। १४ सदृशम्। १५ शब्दस्य आकाशविशेषगुणत्वनिराकरणेन कार्यद्रव्यविशेषगुणत्वसाधनेन वा। १६ शब्देन। १७ एकार्थः=आकाशलक्षणार्थः। १८ गगनसमवायिकारणकाः। १९ वीचीतरङ्गन्यायागतेन श्रूयमाणेन घटशब्देन आद्या घटशब्दाः श्रूयमाणा घटशब्दस्यासमवायिकारणत्वेनाभिमता एकार्थसमवायिनो यथा। २० सामान्यादिना व्यभिचारपरिहारार्थम्। २१ न चाकाशेन व्यभिचार इन्द्रियग्रहणात्, नापि घटादिना एकपदोपादानात्, नापि सुखादिना बाह्यपदोपादानात्, नापि योगिबाह्यैकेन्द्रियप्रत्यक्षेण परमाणुना तद्रूपादिना वाऽस्मदादिपदग्रहणात्, नापि पिशाचादिना नियमेनेति पदोपानात्। २२ पटसमवेतरूपाद्यारम्भे पटोत्पादकतन्तुरूपादिवत्।

इति; प्रतिशब्दं पुद्गलद्रव्यस्य तत्समवायिकारणस्य भेदात्। शब्दस्य क्षणिकत्वनिषेधाच्च कथं समानजातीयासमवायिकारणत्वम्?

यदि चाकाशमनवयवं शब्दस्य समवायिकारणं स्यात्; तर्हि शब्दस्य नित्यत्वं सर्वगतत्वं च स्यादाकाशगुणत्वात्तन्महत्त्ववत्। ५ क्षणिकैकदेशवृत्तिविशेषगुणत्वस्य शब्दे प्रमाणतः प्रतिषेधाच्च। तत्त्वे वा कथं न शब्दाधारस्याकाशस्य सावयवत्वम्? न हि निरवयवत्वे 'तस्यैकदेशे एव शब्दो वर्त्तते न सर्वत्र' इति विभागो घटते।

किञ्च, सावयवमाकाशं हिमवद्विन्ध्यावरुद्धविभिन्नदेशत्वाद्भू- १० मिवत्। अन्यथा तयो रूपरसयोरिवैकदेशाकाशावस्थितिप्रसक्तिः। न चैतद् दृष्टमिष्टं वा।

कथं वा तदाधेयस्य शब्दस्य विनाशः? स हि न तावदाश्रयविनाशाद्घटते; तस्य नित्यत्वाभ्युपगमात्। नापि विरोधिगुणसद्भावात्; तन्महत्त्वादेरेकार्थसमवेतत्वेन रूपरसयोरिव विरोधित्वा- १५ सिद्धेः। सिद्धौ वा श्रवणसमयेपि तदभावप्रसङ्गः; तदा तन्महत्त्वस्य भावात्। नापि संयोगादिर्विरोधिगुणः; तस्य तत्कारणत्वात्। नापि संस्कारः; तस्याकाशेऽसम्भवात्। सम्भवे वा तस्याभावे आकाशस्याप्यभावानुषङ्गस्तस्य तदव्यतिरेकात्। व्यतिरेके वा 'तस्य' इति सम्बन्धो न स्यात्। नापि शब्दोपलब्धिप्राप- २० कादृष्टाभावात्तदभावः; तुच्छाभावस्यासामर्थ्यतो विनाशाहेतुत्वात् खरविषाणवत्। तन्न शब्दस्याकाशप्रभवत्वमभ्युपगन्तव्यम्।

ननु चाऽस्य पौद्गलिकत्वेऽस्मदाद्यनुपलभ्यमानरूपाद्याश्रयत्वं न स्यात्पटादिवत्; तन्न; द्व्यणुकादिना हेतोर्व्यभिचारात्। नायनरश्मिषु जलसंयुक्तानले चानुद्भूतरूपस्पर्शवत् शब्दाश्रयद्रव्ये- २५ ऽस्मदाद्यनुपलभ्यमानानामप्यनुद्भूततया रूपादीनां वृत्त्यविरोधः। यथा च घ्राणेन्द्रियेणोपलभ्यमाने गन्धद्रव्येऽनुद्भूतानां रूपादीनां वृत्तिस्तथात्रापि। यथा च तैजसत्वात्पार्थिवत्वाच्चात्रानुपलम्भेपि

१ अनेकान्त। २ पर्यायरूपेण वस्तुनो विनाशात्। ३ जैनेन। ४ तन्महत्त्ववत्। ५ तथा च हिमवद्विन्ध्ययोः सहचरभाव इति भावः। ६ परेण। ७ विरोधिगुणरूपस्य। ८ शब्दं प्रति। ९ संयोगादिः शब्दकारणमिति वचनात्। १० कार्यरूपेण। ११ यत्पौद्गलिकं तदस्मदाद्युपलभ्यमानरूपाद्याश्रयमित्युक्ते द्व्यणुकादिना पौद्गलिकेन व्यभिचारोऽस्मदाद्युपलभ्यमानरूपाश्रयत्वलक्षणसाध्याभावात्। १२ उष्णस्पर्शे। १३ अत्र रूपं भासुरम्। १४ परमते। १५ परमते। १६ नायनरश्म्यादिषु (जलसंयुक्तानले गन्धद्रव्ये) त्रिषु।

रूपादीनामनुद्भूततयास्तित्वसम्भावना तथा शब्देपि पौद्गलिकत्वात्। न च पौद्गलिकत्वमसिद्धम्; तथाहि-पौद्गलिकः शब्दोऽस्मदादिप्रत्यक्षत्वेऽचेतनत्वे च सति क्रियावत्त्वाद्बाणादिवत्। न च मनसा व्यभिचारः[2]; 'अस्मदादिप्रत्यक्षत्वे सति' इति विशेषणत्वात्। नाप्यात्मना; 'अचेतनत्वे सति' इति विशेषणात्। ५ नापि सामान्येन; अस्य क्रियावत्त्वाभावात्। ये च 'अस्मदादिप्रत्यक्षत्वे सति स्पर्शवत्त्वात्' इत्यादयो हेतवः प्रागुपन्यस्तास्ते[3] सर्वे पौद्गलिकत्वप्रसाधका द्रष्टव्याः। ततः शब्दस्याकाशगुणत्वासिद्धेर्नासौ तल्लिङ्गम्।

कुतस्तर्हि तत्सिद्धिरिति चेद्? 'युगपन्निखिलद्रव्यावगाह- १० कार्यात्' इति ब्रूमः[4]; तथाहि-युगपन्निखिलद्रव्यावगाहः साधारणकारणापेक्षः तथावगाहत्वान्यथाऽनुपपत्तेः। ननु सर्पिषो मधुन्यवगाहो भस्मनि जलस्य जलेऽश्वादेर्यथा तथैवालोकतमसोरशेषार्थावगाहघटनान्नाकाशप्रसिद्धिः; तन्न; अनयोरप्याकाशाभावेऽवगाहानुपपत्तेः। १५

ननु निखिलार्थानां यथाकाशेवगाहः तथाकाशस्याप्यन्यस्मिन्नधिकरणेऽवगाहेन भवितव्यमित्यनवस्था, तस्य स्वरूपेवगाहे सर्वार्थानां स्वात्मन्येवावगाहप्रसङ्गात्कथमाकाशस्यातः प्रसिद्धिः? इत्यप्यपेशलम्; आकाशस्य व्यापित्वेन स्वावगाहित्वोपपत्तितोऽनवस्थाऽसम्भवात्, अन्येषामव्यापित्वेन स्वावगाहित्वायोगाच्च। २० न हि किञ्चिदल्पपरिमाणं वस्तु स्वाधिकरणं दृष्टम्; अश्वादेर्जलाद्यधिकरणोपलब्धेः। कथमेवं दिक्कालात्मनामाकाशेवगाहो व्यापित्वात्; इत्यप्यसाम्प्रतम्; हेतोरसिद्धेः। तदसिद्धिश्च दिग्द्रव्यस्यासत्त्वात्, कालात्मनोश्चासर्वगतद्रव्यत्वेनाग्रे समर्थनात्प्रसिद्धेति। ननु तथाप्यमूर्त्तत्वेन कालात्मनोः पाताभावात्कथं तदाधेयता? २५ इत्यप्ययुक्तम्; अमूर्त्तस्यापि ज्ञानसुखादेरात्मन्याधेयत्वप्रसिद्धेः।

एतेनामूर्त्तत्वान्नाकाशं कस्यचिदधिकरणमित्यपि प्रत्युक्तम्; अमूर्त्तस्याप्यात्मनो ज्ञानाद्यधिकरणत्वप्रतीतेः। समानसमयवर्त्तित्वान्निखिलार्थानां नाधाराधेयभावः, अन्यथाकाशादुत्तरकालं भावस्तेषां स्यात्; इत्यप्यसमीचीनम्; समसमयवर्तिनामप्यात्मा- ३० मूर्त्तत्वादीनां तद्भावप्रतीतेः। न खलु परेणाप्यत्र पौर्वापरीभावोऽ-

---

१ परस्य तव। २ पौद्गलिकत्वाभावाद्भावमनसः। ३ जैनैः। ४ वयं जैनाः। ५ सकलद्रव्याणां साधारणमाश्रयकारणमाकाशम्। ६ साधारणकारणमन्तरेण। आकाशाभावे। ७ बुडनमित्यर्थः। ८ जैनापेक्षया। ९ आत्मादीनाम्। १० वैशेषिकेण।

शीतो नित्यत्वविरोधानुषङ्गात्। क्षणविशरारुतया निखिलार्थानां नाधाराधेयभावः; इत्यपि मनोरथमात्रम्; क्षणविशरारुत्वस्यार्थानां प्रागेव प्रतिषेधात्। 'खे पतत्री' इत्याद्यऽबाधितप्रत्ययाच्च तद्भावप्रसिद्धेः। ततः परेषां निरवद्यलिङ्गाऽभावान्नाकाशद्रव्यस्य
५ प्रसिद्धिः।

नापि कालद्रव्यस्य। यच्चोच्यते—कालद्रव्यं च परापरादिप्रत्ययादेव लिङ्गात्प्रसिद्धम्। कालद्रव्यस्य च इतरस्माद्भेदे 'कालः' इति व्यवहारे वा साध्ये स एव लिङ्गम्। तथा हि–काल इतरस्माद्भिद्यते 'काल' इति वा व्यवहर्त्तव्यः, परापरव्यतिकरयौगपद्यायौगपद्यचि-
१० रक्षिप्रप्रत्ययलिङ्गत्वात्, यस्तु नेतरस्माद्भिद्यते 'काल' इति वा न व्यवह्रियते नासावुक्तलिङ्गः यथा क्षित्यादिः, तथा च कालः, तस्मात्तथेति। विशिष्टकार्यतया चैते प्रत्ययाः काले एव प्रतिबद्धाः। यद्विशिष्टकार्यं तद्विशिष्टकारणादुत्पद्यते यथा घट इति प्रत्ययाः, विशिष्टकार्यं च परापरव्यतिकरयौगपद्यायौगपद्यचिरक्षिप्रप्रत्यया
१५ इति। परापरयोः खलु दिग्देशकृतयोः व्यतिकरो विपर्ययः–यत्रैव हि दिग्विभागे पितर्युत्पन्नं परत्वं तत्रैव स्थिते पुत्रेऽपरत्वम्, यत्र चापरत्वं तत्रैव स्थिते पितरि परत्वमुत्पद्यमानं दृष्टमिति दिग्देशाभ्यामन्यन्निमित्तान्तरं सिद्धम्; निमित्तान्तरमन्तरेण व्यतिकरासम्भवात्। न च परापरादिप्रत्ययस्य आदित्यादिक्रिया द्रव्यं वलि-
२० पलितादिकं वा निमित्तम्; तत्प्रत्ययविलक्षणत्वात्पटादिप्रत्ययवत्। तथा च सूत्रम् "अपरस्मिन्परं युगपद्युगपच्चिरं क्षिप्रमिति काललिङ्गानि" [वैशे० सू० २।२।६] आकाशवच्चास्यापि विभुत्वनित्यैकत्वादयो धर्माः प्रतिपत्तव्या इति।

अत्रोच्यते—परापरादिप्रत्ययलिङ्गानुमेयः कालः किमेकद्र-
२५ व्यम्, अनेकद्रव्यं वा? न तावदेकद्रव्यम्; मुख्येतरकालभेदेनास्य द्वैविध्यात्। न हि समयावलिकादिर्व्यवहारकालो मुख्यकालद्रव्यमन्तरेणोपपद्यते यथा मुख्यसत्त्वमन्तरेण क्वचिदुपचरितं सत्त्वम्।

---

१ आत्मनः। २ सौगतमतमालम्ब्य। ३ आदिपदेन यौगपद्यायौगपद्यचिरक्षिप्रादिग्रहः। ४ बलः। ५ तर्ह्येते प्रत्यया अविशिष्टनिमित्तका भविष्यन्तीत्युक्ते सत्याह। ६ घटे सत्येव प्रसिद्धाः। ७ कथम्? तथा हि। ८ प्रत्यर्थः। ९ सन्निहितदिग्देशे। १० कालापेक्षया दूरत्वम्। ११ कालापेक्षया सन्निहितत्वम्। १२ कालद्रव्यम्। १३ कालद्रव्यम् विनाऽन्यन्निमित्तं परापरादिप्रत्ययस्य भविष्यतीत्याशङ्कायामाह। १४ प्रत्ययः=प्रतीतिः। १५ जैनादिभिः। १६ जैनैः। १७ व्यवहार। १८ आदिना लवनिमेषघटिकामुहूर्तप्रहरादिग्रहणम्। १९ अग्न्यादेरस्तित्वम्। २० माणवके। २१ अग्नेः।

स च मुख्यः कालोऽनेकद्रव्यम्, प्रत्याकाशप्रदेशं व्यवहारकालभेदान्यथानुपपत्तेः । प्रत्याकाशप्रदेशं विभिन्नो हि व्यवहारकालः कुरुक्षेत्रलङ्काकाशदेशयोर्दिवसादिभेदान्यथानुपपत्तेः । ततः प्रतिलोकाकाशप्रदेशं कालस्याणुरूपतया भेदसिद्धिः ।

तदुक्तम्—

"लोयायासपएसे एक्केक्के जे ठिया हु एक्केका ।
रयणाणं रासीविव ते कालाणू मुणेयव्वा ॥ १ ॥"

[द्रव्यसं० गा० २२ (?)]

यौगपद्यादिप्रत्ययाविशेषात्तस्यैकत्वम्; इत्यप्यसत्; तत्प्रत्ययाविशेषासिद्धेः । तेषां परस्परं विशिष्टत्वात्कालस्याप्यतो विशिष्टत्वसिद्धिः । सहकारिणामेव विशिष्टत्वं न कालस्य; इत्यप्यनुत्तरम्; स्वरूपमभेदयतां सहकारित्वप्रतिक्षेपात् ।

यदि चास्य निरवयवैकद्रव्यरूपताभ्युपगम्यते कथं तर्ह्यतीतादिकालव्यवहारः? स हि किमतीताद्यर्थक्रियासम्बन्धात्, स्वतो वा स्यात्? अतीताद्यर्थक्रियासम्बन्धाच्चेत्; कुतस्तासामतीतादित्वम्? अपरातीताद्यर्थक्रियासम्बन्धाच्चेत्; अनवस्था । अतीतादिकालसम्बन्धाच्चेत्; अन्योन्याश्रयः । स्वतस्तस्यातीतादिरूपता चायुक्ता, निरंशत्वभेदरूपत्वयोर्विरोधात् ।

यौगपद्यादिप्रत्ययाभावश्चैवंवादिनः स्यात्; तथाहि-यत्कार्यजातमेकस्मिन्काले कृतं तद्युगपत्कृतमित्युच्यते । कालैकत्वे चाखिलकार्याणामेककालोत्पाद्यत्वेनैकदैवोत्पत्तिप्रसङ्गान्न किञ्चिदयुगपत्कृतं स्यात् ।

चिरक्षिप्रव्यवहाराभावश्चैवंवादिनः । यत्खलु बहुना कालेन कृतं तच्चिरेण कृतम् । यच्च स्वल्पेन कृतं तत्क्षिप्रं कृतमित्युच्यते । तच्चैतदुभयं कालैकत्वे दुर्घटम् ।

---

१ कालपरमाणुलक्षणम् । २ मुख्यकालद्रव्यानेकत्वाभावे । ३ हेतुरसिद्ध इत्युक्ते सत्याह । ४ चन्द्रार्कादिदक्षिणायनोत्तरायणयोः सतोः । ५ लोकाकाशप्रदेशे एकैके ये स्थिताः खलु एकैके । रत्नानां राशिरिव ते कालाणवो ज्ञातव्याः । ६ सिद्धे हि क्रियाणामतीतादित्वे तत्सम्बन्धात्कालस्यातीतादित्वसिद्धिस्तत्सिद्धौ च तत्सम्बन्धात्तासां तत्सिद्धिरिति । ७ निरंशस्य कालस्यातीतत्ववर्तमानत्वभविष्यत्त्वलक्षणधर्माणां सद्भावो न घटते इति भावः । ८ कार्यसमूहः । ९ कालस्य नित्यैकत्वादिरूपत्वे । १० अयौगपद्याभावे तदपेक्षया जायमानस्य यौगपद्यस्याप्यभाव इति भावः ।

ननु चैकत्वेपि कालस्योपाधिभेदाद्भेदोपपत्तेर्न यौगपद्यादिप्रत्ययाभावः। तदुक्तम्–"मणिवत्पाचकवद्वोपाधिभेदात्कालभेदः" [ ] इति; तदप्ययुक्तम्; यतोऽत्रोपाधिभेदः कार्यभेद एव। स च 'युगपत्कृतम्' इत्यत्राप्यस्त्येवेति किमित्ययुगपत्प्रत्ययो न स्यात्? अथ क्रमभावी कार्यभेदः कालभेदव्यवहारहेतुः। ननु कोस्य क्रमभावः? युगपदनुत्पादश्चेत्; 'युगपदनुत्पादः' इत्यस्य भाषितस्य कोर्थः? एकस्मिन्कालेऽनुत्पादः; सोयमितरेतराश्रयः–यावद्धि कालस्य भेदो न सिद्ध्यति न तावत्कार्याणां भिन्नकालोत्पादलक्षणः क्रमः सिध्यति, यावच्च कार्याणां क्रमभावो न सिध्यति न तावत्कालस्योपाधिभेदाद्भेदः सिध्यतीति। ततः प्रतिक्षणं क्षणपर्यायैः कालो भिन्नस्तत्समुदायात्मको लवनिमेषादिकालश्च। तथा चैककालमिदं चिरोत्पन्नमनन्तरोत्पन्नमित्येवमादिव्यवहारः स्यादुपपन्नो नान्यथा।

एतेन परापरव्यतिकरः कालैकत्वे प्रत्युक्तः; तथाहि–भूम्यवयवैरालोकावयवैर्वा बहुभिरन्तरितं वस्तु विप्रकृष्टं परमिति चोच्यते स्वल्पैस्त्वन्तरितं सन्निकृष्टमपरमिति च। तथा बहुभिः क्षणैरहोरात्रादिभिर्वान्तरितं विप्रकृष्टं परमिति चोच्यते स्वल्पैस्त्वन्तरितं सन्निकृष्टमपरमिति च। बह्वल्पभावश्च गुरुत्वपरिमाणादिवदपेक्षानिबन्धनः कालैकत्वे दुर्घट इति।

यौगपद्यादिप्रत्ययाविशेषात् कालस्यैकत्वे च गुरुत्वपरिमाणादेरप्येकत्वप्रसङ्गस्तुल्याक्षेपसमाधानत्वात्। ततो गुरुत्वपरिमाणादेरनेकगुणरूपतावत्कालस्यानेकद्रव्यरूपताभ्युपगन्तव्या।

ये तु वास्तवं कालद्रव्यं नाभ्युपगच्छन्ति तेषां परापरयौगपद्या-

१ यथा स्फटिकमणौ पावके च यथाक्रमं जपाकुसुमादिव्यादिरादिलक्षणोपाधिभेदाद्भेदस्तथा कार्यलक्षणोपाधिभेदाद्भेदः कालस्यापीत्यर्थः, ततश्च व्यतिकरो न स्यादिति भावः। २ कालक्रमेणोत्पाद इत्यर्थः। ३ कालस्यैकत्वे यौगपद्याभावो यतः। ४ बसः। ५ विपर्ययः। ६ कालस्य। ७ असादयं गुरुरस्माल्लघुरिति व्यवहारो वस्तुन एकत्वे दुर्घटो यथा। ८ स्वपरापेक्षा। ९ गुरुत्वादिप्रत्ययाविशेषात्। १० अल्पपरिमाणस्यापि। ११ गुरुत्वपरिमाणमल्पत्वपरिमाणं च प्रतिपदार्थं भिद्येत इत्याक्षेपः, समाधानं–तर्हि यौगपद्यादिप्रत्ययोपि प्रतिपदार्थं भिद्यते इति समानम्। १२ नित्यनिरंशैकद्रव्यरूपत्वे चार्थानां भूतभविष्यद्वर्तमानत्वं दुर्घटमतीतानागतवर्तमानकालभेदाभावात्, सिद्धे हि तद्भेदे तत्सम्बन्धादर्थानां तथा व्यपदेशः स्यान्नान्यथातिप्रसङ्गात्। न चास्य तत्सिद्धिर्घटते नित्यनिरंशैकरूपत्वात्। यदेवंविधं न तत्रातीतादिस्वरूपभेदाः। यथा परमाणौ। नित्यनिरंशैकरूपश्च भवद्भिः परिकल्पितः कालः। १३ मीमांसकसौगतद्राविडाः।

यौगपद्यचिरक्षिप्रप्रत्ययानामभावः स्यात्। न खलु ते निर्निमित्ताः; कादाचित्कत्वाद्घटादिवत्। नाप्यविशिष्टनिमित्ताः; विशिष्टप्रत्ययत्वात्। न च दिग्गुणजातिनिमित्तास्ते; तज्ज्ञानप्रत्ययवैलक्षण्येनोपपत्तेः। तथा हि-अपरदिग्व्यवस्थितेऽप्रशस्तेऽधमजातीये स्थविरपिण्डे 'परोयम्' इति प्रत्ययो दृश्यते। परदिग्व्यवस्थिते चोत्तमजातीये प्रशस्ते यूनि पिण्डे 'अपरोयम्' इति प्रत्ययो दृश्यते।

अथादित्यादिक्रिया तन्निमित्तम्; जन्मतो हि प्रभृत्येकस्य प्राणिन आदित्यवर्तनानि भूयांसीति परत्वमन्यस्य चाल्पीयांसीत्यपरत्वम्। नन्वेवं कथं यौगपद्यादिप्रत्ययप्रादुर्भावः एकस्मिन्नेवादित्यपरिवर्त्तने सर्वेषामुत्पादात्? तथाव्यपदेशाभावाच्च; 'युगपत्कालः' इति हि व्यपदेशो न पुनः 'युगपदादित्यपरिवर्त्तनम्' इति।

न च क्रियैव कालः; अस्याः क्रियारूपतयाऽविशेषतो युगपदादिप्रत्ययाभावानुषङ्गात्। तस्य चोक्तकार्यनिर्वर्त्तकस्य कालस्य 'क्रिया' इति नामान्तरकरणे नाममात्रं भिद्येत।

न च कर्तृकर्मणी एव यौगपद्यादिप्रत्ययस्य निमित्तम्; यतो यौगपद्यं बहूनां कर्तृणां कार्ये व्यापारो 'युगपदेते कुर्वन्ति' इति प्रत्ययसमधिगम्यः। बहूनां च कार्याणामात्मलाभो 'युगपदेतानि कृतानि' इति प्रत्ययसमधिगम्यः। न चात्र कर्तृमात्रं कार्यमात्रं वालम्बनमतिप्रसङ्गात्। यत्र हि क्रमेण कार्यं तत्रापि कर्तृकर्मणोः सद्भावात्स्यादेतद्विज्ञानम्, न चैवम्। यथाऽ(तथाऽ)यौगपद्यप्रत्ययोऽप्ययुगपदेते कुर्वन्तीति, अयुगपदेतत्कृतमिति नाविशिष्टं कर्तृ-

१ किंतु काललक्षणकारणोत्पाद्या इत्यर्थः। २ अविशिष्ट=साधारणम्। ३ परप्रत्ययः, अपरप्रत्यय इत्यादिरूपेण। ४ परापरादिप्रत्ययानाम्। ५ निकटदिक्। ६ गुणापेक्षया। ७ मातङ्गादौ। ८ अतद्गुणसंविज्ञानोयं बसः, यौगपद्यमादिर्येषामयौगपद्यादीनां ते यौगपद्यादय इति, तेनायौगपद्यादिप्रत्ययप्रादुर्भावः कथमित्यर्थः संपन्नः। ९ युगपदादित्यपरिवर्तनमिति। १० अमुना हेतुना यौगपद्यस्याभावः कुतः। ११ कालव्यतिरिक्तस्य निमित्तस्य यौगपद्यादिप्रत्यये विचार्यमाणस्यानुपपद्यमानत्वात्तदादित्यपरिवर्तनं स्यात्क्रियाविशेषो वा? न तावदादित्यपरिवर्तनमेकस्मिन्नप्यादित्यपरिवर्तने सर्वेषामुत्पादादिति, अस्य परिवर्तनं मेरुप्रादक्षिण्येन परिभ्रमणमहोरात्रमभिधीयते, तस्मिन्नेकस्मिन्नपि यौगपद्यादिप्रतीतिविषयभूतार्थानामुत्पादः प्रतीयते एव तथा व्यपदेशाभावाच्चेति। १२ क्रिया कालो भविष्यतीत्याह। १३ कालरूपतया यौगपद्यादिप्रत्ययो, न पुनः क्रियारूपतया। १४ भेदाभावतः। १५ तर्हि कर्तृकर्मणी यौगपद्यादिप्रत्ययस्य निमित्तं भविष्यतीत्युक्ते सत्याह। १६ यौगपद्यम्। १७ यौगपद्यप्रत्यये। १८ विषयः, कारणमित्यर्थः।

कर्ममात्रमालम्बतेऽतिप्रसङ्गादेव । अतस्तद्विशेषणं कालोऽभ्युपगन्तव्यः । कथमन्यथा चिरक्षिप्रव्यवहारोपि स्यात्? एक एव हि कर्त्ता किञ्चित्कार्यं चिरेण करोति व्यासङ्गादनर्थित्वाद्वा, किञ्चित्तु क्षिप्रमर्थितया । तत्र 'चिरेण कृतं क्षिप्रं कृतम्' इति ५ प्रत्ययौ विशिष्टत्वाद्विशिष्टं निमित्तमाक्षिपत इति कालसिद्धिः ।

लोकव्यवहाराच्चः प्रतीयन्ते हि प्रतिनियत एव काले प्रतिनियता वनस्पतयः पुष्यन्तीत्यादिव्यवहारं कुर्वन्तो व्यवहारिणः । यथा वसन्तसमये एव पाटलादिकुसुमानामुद्भवो न कालान्तरे । इत्येवं कार्यान्तरेष्वप्यभ्यूह्यम् 'प्रसवनकालमपेक्षते' इति व्यव-१० हारात् । समयमुहूर्त्तयामाहोरात्रार्द्धमासर्त्वयनसंवत्सरादिव्यवहाराच्च तत्सिद्धिः । तन्न परपरिकल्पितं कालद्रव्यमपि घटते ।

नापि दिग्द्रव्यम्; तत्सद्भावे प्रमाणाभावात् । यच्च दिशः सद्भावे प्रमाणमुक्तम्-"मूर्तेष्वेव द्रव्येषु मूर्त्तद्रव्यमवधिं कृत्वेदमतः पूर्वेण दक्षिणेन पश्चिमेनोत्तरेण पूर्वदक्षिणेन दक्षिणापरे-१५ णाऽपरोत्तरेणोत्तरपूर्वेणाधस्तादुपरिष्टादित्यमी दश प्रत्यया यतो भवन्ति सा दिग्" [प्रश० भा० पृ० ६६] इति । तथा च सूत्रम्-"अत इदमिति यतस्तद्दिशो लिङ्गम्" [वैशे० सू० २।२।१०] तथा च दिग्द्रव्यमितरेभ्यो भिद्यते दिगिति व्यवहर्त्तव्यम्, पूर्वादिप्रत्ययलिङ्गत्वात्, यत्तु न तथा न तत्पूर्वादि-२० प्रत्ययलिङ्गम् यथा क्षित्यादि, तथा चेदम्, तस्मात्तथेति । न चैते प्रत्यया निर्निमित्ताः; कादाचित्कत्वात् । नाप्यविशिष्टनिमित्ताः; विशिष्टप्रत्ययत्वाद्दण्डीतिप्रत्ययवत् । न चान्योन्यापेक्षमूर्तद्रव्यनिमित्ताः; परस्पराश्रयत्वेनोभयप्रत्ययाभावानुषङ्गात् । ततोऽन्यनिमित्तोत्पाद्यत्वासम्भवादेते दिश एवानुमापकाः । प्रयोगः-२५ यदेतत्पूर्वापरादिज्ञानं तन्मूर्त्तद्रव्यव्यतिरिक्तपदार्थनिबन्धनं तत्प्रत्ययविलक्षणत्वात्सुखादिप्रत्ययवत् । विभुत्वैकत्वनित्यत्वादयश्चास्या धर्माः कालवदवगन्तव्याः । तस्याश्चैकत्वेपि प्राच्यादिभेदव्यवहारो भगवतः सवितुर्मेरुं प्रदक्षिणमावर्त्तमानस्य लोकपालगृहीतदिक्प्रदेशैः संयोगाद्घटते ।

१ युगपदेते कुर्वन्ति युगपदेतानि कृतानीति तयोः कर्तृकर्मणोः । २ पुरुषाः । ३ पुत्रोत्पत्त्यादिलक्षणेषु । ४ ज्ञानं भवतीति शेषः । ५ लिङ्गसिद्धौ । ६ वसः । ७ पटादिवत् । ८ साधारणाऽऽकाशादिकारणका न भवन्तीति भावः । ९ एकस्य वस्तुनः पूर्वत्वसिद्धौ सत्यां तदपेक्षया इतरस्यापरत्वसिद्धिरितरस्यापरत्वसिद्धौ सत्यां च तदपेक्षयाऽपरत्वसिद्धि(प्रथमस्य पूर्वत्वसिद्धि)रिति । १० नान्यस्याकाशादेः । ११ इन्द्रादि ।

तदप्यसमीचीनम्; प्रोक्तप्रत्ययानामाकाशहेतुकत्वेनाकाशादि-शोऽर्थान्तरत्वासिद्धेः। तत्प्रदेशश्रेणिष्वेव ह्यादित्योदयादिवशात्प्राच्यादिदिग्व्यवहारोपपत्तेर्न तेषां निर्हेतुकत्वं नाप्यविशिष्टपदार्थहेतुकत्वम्। तथाभूतप्राच्यादिदिक्संबन्धाच्च मूर्त्तद्रव्येषु पूर्वापरादिप्रत्ययविशेषस्योत्पत्तेर्न परस्परापेक्षया मूर्त्तद्रव्याण्येव तद्धेतवो येनैकतरस्य पूर्वत्वासिद्धावन्यतरस्यापरत्वासिद्धिः, तदसिद्धौ चैकतरस्य पूर्वत्वायोगादितरेतराश्रयत्वेनोभयाभावः स्यात्।

नन्वेवमाकाशप्रदेशश्रेणिष्वपि कुतस्तत्सिद्धिः? स्वरूपत एव तत्सिद्धौ तस्य परावृत्त्यभावप्रसङ्गः, अन्योन्यापेक्षया तत्सिद्धौ अन्योन्याश्रयणादुभयाभावः; तदेतद्दिक्प्रदेशेष्वपि पूर्वापरादिप्रत्ययोत्पत्तौ समानम्। यथैव हि मूर्त्तद्रव्यमवधिं कृत्वा मूर्त्तेष्वेव 'इदमतः पूर्वेण' इत्यादिप्रत्यया दिग्द्रव्यहेतुकास्तथा दिग्भेदमवधिं कृत्वा दिग्भेदेष्वेव 'इयमतः पूर्वा' इत्यादिप्रत्यया द्रव्यान्तरहेतुकाः सन्तु विशिष्टप्रत्ययत्वाविशेषात्, तथा चानवस्था। परस्परापेक्षया तत्सिद्धावितरेतराश्रयणादुभयाभावः। स्वरूपतस्तत्प्रत्ययप्रसिद्धौ तेनैवानेकान्तात् कुतो दिग्द्रव्यसिद्धिस्तत्प्रत्ययपरावृत्त्यभावश्चानुषज्यः।

सवितुर्मेरुं प्रदक्षिणमावर्त्तमानस्येत्यादिन्यायेन दिग्द्रव्ये प्राच्यादिव्यवहारोपपत्तौ तत्प्रदेशपङ्क्तिष्वप्यत एव तद्व्यवहारोपपत्तेरलं दिग्द्रव्यकल्पनया, देशद्रव्यस्यापि कल्पनाप्रसङ्गात्-'अयमतः पूर्वो देशः' इत्यादिप्रत्ययस्य देशद्रव्यमन्तरेणानुपपत्तेः। पृथिव्यादिरेव देशद्रव्यम्; इत्यसत्; तत्र पृथिव्यादिप्रत्ययोत्पत्तेः। पूर्वादि-

---

१ आकाशस्यकत्वाद्दिग्व्यवहारः कथं स्यादित्याह। २ आकाशप्रदेशलक्षण। ३ पूर्वादेः। ४ पश्चिमादेः। ५ मूर्त्तद्रव्येषु पूर्वापरादिप्रत्ययविशेषोत्पत्तिप्रकारेण। ६ तस्य=पूर्वापरत्वस्य। ७ पूर्वापरादेः। ८ परावृत्तिः=निवृत्तिः। ९ न च तथा पूर्वादिदिशामपि कस्यचिद्देशस्यापेक्षया पश्चिमादिव्यपदेशोऽस्ति। १० पूर्वापेक्षयाऽपरः, अपरापेक्षयापूर्व इति। ११ चोद्यम्। १२ भवन्मते। १३ दिक्। १४ दिशः सकाशात्। १५ जैनमते। १६ अन्यदिग्द्रव्यापेक्षयाऽनवस्था तत्रापि तत्प्रत्ययहेतुत्वस्यापरदिग्द्रव्यहेतुत्वप्रसङ्गात्। १७ दिग्भेदेषु दिग्द्रव्यव्यतिरिक्तद्रव्यान्तराभावेपि पूर्वापरादिप्रत्ययस्य स्वतो जायमानत्वात्। १८ पूर्वापरेति। १९ पूर्वापरादिप्रत्ययेन। २० तत्प्रत्ययविलक्षणत्वादित्यस्य हेतोः। २१ दिग्द्रव्यं पूर्वापरादिप्रत्ययस्य कारणं न भवतीति भावः। २२ पूर्वापर। २३ तस्य=आकाशस्य। २४ प्राच्यादि। २५ तथा च नव द्रव्याणीति द्रव्यसंख्याव्याघातः स्यात्। २६ तस्य पृथिव्यादिप्रत्ययहेतुत्वेनायमतः पूर्वो देश इति प्रत्ययहेतुत्वाऽनुपपत्तेः।

दिक्कृतः पृथिव्यादिषु पूर्वदेशादिप्रत्ययश्चेत्; तर्हि पूर्वाद्याकाशकृतस्तत्रैव पूर्वादिदिक्प्रत्ययोस्त्वऽलं दिक्कल्पनाप्रयासेन।

नन्वेवमादित्योदयादिवशादेवाकाशप्रदेशपङ्क्तिष्विव पृथिव्यादिष्वपि पूर्वापरादिप्रत्ययसिद्धेराकाशप्रदेशश्रेणिकल्पनाप्यनर्थिका ५भवत्विति चेत्; न; 'पूर्वस्यां दिशि पृथिव्यादयः' इत्याद्याधाराधेयव्यवहारोपलम्भात् पृथिव्याद्यधिकरणभूतायास्तत्प्रदेशपङ्क्तेः परिकल्पनस्य सार्थकत्वात्। आकाशस्य च प्रमाणान्तरतः प्रसाधितत्वात्। तन्न परपरिकल्पितं दिग्द्रव्यमप्युपपद्यते।

नाप्यात्मद्रव्यम्। तद्धि सर्वगतत्वादिधर्मोपेतं परैरभ्युपेयते। १०न चास्य तदुपेतत्वमुपपद्यते; प्रत्यक्षविरोधात्। प्रत्यक्षेण ह्यात्मा 'सुख्यहं दुःख्यहं घटादिकमहं वेद्मि' इत्यहमहमिकया स्वदेह एव सुखादिस्वभावतया प्रतीयते, न देहान्तरे परसम्बन्धिनि, नाप्यन्तराले। इतरथा सर्वस्य सर्वत्र तथा प्रतीतिरिति सर्वदर्शित्वं भोजनादिव्यवहारसङ्करश्च स्यात्।

१५ अनुमानविरोधाच्चास्य तद्धर्मोपेतत्वायोगः; तथाहि-नात्मा परममहापरिमाणाधिकरणो द्रव्यान्तराऽसाधारणसामान्यवत्त्वे सत्यनेकत्वाद्घटादिवत्। 'अनेकत्वात्' इत्युच्यमाने हि सामान्येनानेकान्तः, तत्परिहारार्थं 'सामान्यवत्त्वे सति' इति विशेषणम्। तथाकाशादिना व्यभिचारः, तत्परिहारार्थं 'द्रव्यान्तरासाधारणसामान्यवत्त्वे सति' इत्युच्यते। एकस्माद्धि द्रव्यादन्यद्द्रव्यं २०द्रव्यान्तरम्, तदसाधारणसामान्यवत्त्वे सत्यनेकत्वमाकाशादौ नास्तीति। अत एव परममहापरिमाणलक्षणगुणेनापि नानेकान्तः।

तथा, नात्मा तत्परिमाणाधिकरणो दिक्कालाकाशान्यत्वे सति द्रव्यत्वाद्घटादिवत्। न सामान्येन परममहापरिमाणेन वाने-२५कान्तः, तयोरद्रव्यत्वात्। नापि दिगादिना, 'तदन्यत्वे सति' इति विशेषणात्।

तथा, नात्मा तत्परिमाणाधिकरणः क्रियावत्त्वाद्बाणादिवत्। न चेदमसिद्धम्; 'योजनमहमागतः क्रोशं वा' इत्यादिप्रतीतितस्तत्सिद्धेः। न च मनः शरीरं वागतमित्यभिधातव्यम्; तस्याहं-

---

१ व्योम। २ निखिलद्रव्यावगाहान्यथानुपपत्तेः। ३ आत्मनः सर्वैरात्मभिः सम्बन्धात्। ४ गोत्वाश्वत्वमहिषत्वादिना। ५ सामान्यवत्त्वादित्युच्यमाने। ६ यतो द्रव्यत्वं सत्त्वं वा सामान्यमाकाशादिषु। ७ आत्मलक्षणात्। ८ आकाशम्। ९ गुणत्वसामान्यसद्भावादनेकत्वाभावाच्च। १० तत्-परममहत्।

प्रत्ययाऽवेद्यत्वात्, अन्यथा चार्वाकमतप्रसङ्गः स्यात् । प्रसाधयिष्यते चाग्रे[1] विस्तरतोस्य क्रियावत्त्वमित्यलमतिप्रसङ्गेन ।

तथा, आत्माऽणुपरममहत्त्वपरिमाणानधिकरणः, चेतनत्वात्, ये तु तत्परिमाणाधिकरणा न ते चेतनाः यथाकाशपरमाण्वादयः, चेतनश्चात्मा, तस्मान्न तत्परिमाणाधिकरण इति ।

ननु चात्मा परममहापरिमाणाधिकरणो न भवतीति प्रतिज्ञाऽनुमानबाधिता[2] । तच्चानुमानम्-आत्मा व्यापकोऽणुपरिमाणा[3]नधिकरणत्वे सति नित्यद्रव्यत्वादाकाशवत् । अणु[4]परिमाणानधिकरणोसौ असदादि[5]प्रत्यक्ष[6]विशेषगुणाधिकरणत्वाद्घटादिवत् । तथा[7] नित्यद्रव्यमात्माऽस्पर्शवद्द्रव्य[8]त्वादाकाशवदेवेति ।

अत्रोच्यते[9]-अणुपरिमाणप्रतिषेधोत्र पर्युदासः, प्रसज्यो वाभिप्रेतः? यदि पर्युदासः; तदासौ भावान्तरस्वीकारेण प्रवर्त्तते । भावान्तरं च किं परममहापरिमाणम्, अवान्तरपरिमाणं वा स्यात्? प्रथमपक्षे साध्याविशिष्ट[10]त्वं हेतुविशेषणस्य । यथा 'अनित्यः शब्दोऽनित्यत्वे सति बाह्येन्द्रियप्रत्यक्षत्वात्' इति । द्वितीयपक्षे तु विरुद्धत्वम्, यथा 'नित्यः शब्दोऽनित्यत्वे सति बाह्येन्द्रियप्रत्यक्षत्वात्' इति ।

प्रसज्यपक्षेप्यसिद्धत्वम्; तुच्छस्वभावाभावस्य प्रमाणाविषयत्वेन प्रतिपादनात् । सिद्धो वा किमसौ साध्यस्य[11] स्वभावः, कार्यं वा? यदि स्वभावः; तर्हि साध्यस्यापि तद्वत्तुच्छरूपतानुषङ्गः । अथ कार्यम्; तन्न; तुच्छस्वभावाभावस्य कार्यत्वायोगात् । कार्यत्वं हि किं स्वकारणसत्तासमवायः, कृतमिति बुद्धिविषयत्वं वा? न तावदाद्यः पक्षः; अभावस्य स्वकारणसत्तासमवायानभ्युपगमात्, अन्यथा भावरूपतैवास्य स्यात् । नापि द्वितीयः; तुच्छस्वभावाभावस्य तद्विषयत्वासम्भवात् । तस्य हि प्रमाणागोचरत्वे कथं कृतबुद्धिविषयत्वं सम्भवेत्? अनैकान्तिकं चैतत्; खननोत्सेचनानन्तरमकार्येप्याकाशे कृतबुद्धिविषयत्वसम्भवात् ।

---

१ अत्रैवात्मसर्वगतत्वादिनिराकरणे । २ कालात्ययापदिष्टेन हेतुना । ३ परमाणुभिरनेकान्तपरिहारार्थमेतत्, परमाणुषु नित्यत्वमस्ति व्यापकत्वं च नास्तीति भावः । ४ हेतोर्विशेषणसमर्थनार्थमेतत् । ५ योगिप्रत्यक्षविशेषगुणाधिकरणैः परमाणुभिर्व्यभिचारस्तत्परिहारार्थमस्मदादिपदम् । ६ प्रत्यक्षाश्च ते विशेषगुणाश्च तेषामधिकरणम् । ७ हेतोर्विशेष्यदलसमर्थनार्थम् । ८ क्रिययाऽनेकान्तपरिहारार्थं द्रव्येति । ९ हेतोर्विशेषणं निरस्यति जैनः । १० साध्यसमत्वम्, महापरिमाणस्यार्थो हि व्यापकत्वम्, एवं सति आत्मा व्यापकः व्यापकत्वादित्यायातं महापरिमाणव्यापकत्वयोः समानार्थत्वात् । ११ व्यापकत्वविशिष्टस्यात्मनः ।

नित्यद्रव्यत्वं च किं कथञ्चित्, सर्वथा वा विवक्षितम्? कथञ्चिच्चेत्; घटादिनानेकान्तः, तस्याणुपरिमाणानधिकरणत्वे कथञ्चिन्नित्यद्रव्यत्वे च सत्यपि व्यापित्वाभावात्। सर्वथा चेत्; असिद्धत्वम्, सर्वथा नित्यस्य वस्तुनोऽर्थक्रियाकारित्वेनाश्वविषाणप्रख्यत्वप्रतिपादनात्। अस्मदादिप्रत्यक्षविशेषगुणाधिकरणत्वाच्चाणुपरिमाणप्रतिषेधमात्रमेव स्याद् घटादिवत्, तस्य चेष्टत्वात्सिद्धसाध्यता। अस्पर्शवद्द्रव्यत्वाच्चात्मनो यदि कथञ्चिन्नित्यत्वं साध्यते; तदा सिद्धसाध्यता। अथ सर्वथा; तर्हि हेतोरनन्वयत्वमाकाशादीनामपि सर्वथा नित्यत्वस्य प्रतिषिद्धत्वात्।

ननु 'देहान्तरे परसम्बन्धिन्यन्तराले चात्मा न प्रतीयते' इत्ययुक्तमुक्तम्; अनुमानात्तत्रास्य सद्भावप्रतीतेः; तथाहि-देवदत्ताङ्गनाद्यङ्गं देवदत्तगुणपूर्वकं कार्यत्वे तदुपकारकत्वाद्ग्रासादिवत्। कार्यदेशे च सन्निहितं कारणं तज्जन्मनि व्याप्रियते नान्यथा, अतस्तदङ्गादिकार्यप्रादुर्भावदेशे तत्कारणवत्तद्गुणसिद्धिः। यत्र च गुणाः प्रतीयन्ते तत्र तद्गुण्यप्यनुमीयते एव, तमन्तरेण तेषामसम्भवात्; इत्यप्यसाम्प्रतम्; यतो देवदत्ताङ्गनाद्यङ्गादिकार्यस्य कारणत्वेनाभिप्रेता ज्ञानदर्शनादयो देवदत्तात्मगुणाः, धर्माधर्मौ वा? न तावज्ज्ञानदर्शनसुखादयः स्वसंवेदनस्वभावास्तज्जन्मनि व्याप्रियमाणाः प्रतीयन्ते। वीर्यं तु शक्तिः, सापि तद्देह एवानुमीयते, तत्रैव तल्लिङ्गभूतक्रियायाः प्रतीतेः। तज्ज्ञानादेस्तद्देह एव तत्कार्यकारणविमुखस्याध्यक्षादिना प्रतीतेः तद्बाधितकर्मनिर्देशानन्तरप्रयुक्तत्वेन कालात्ययापदिष्टः 'कार्यत्वे सति तदुपकारकत्वात्' इति हेतुः।

अथ धर्माधर्मौ; तदङ्गादिकार्यं तन्निमित्तमस्माभिरपीष्यते एव। तदात्मगुणत्वं तु तयोरसिद्धम्; तथाहि-न धर्माधर्मौ आत्मगुणौ अचेतनत्वाच्छब्दादिवत्। न सुखादिना व्यभिचारः; अत्र हेतोरवर्त्तनात्, तद्विरुद्धेन स्वसंवेदनलक्षणचैतन्येनास्याऽव्याप्तत्वासाधनात्। नाप्यसिद्धता; अचेतनौ तौ स्वग्रहणविधुरत्वात्पटादिवत्। न च बुद्ध्यास्य व्यभिचारः; अस्याः स्वग्रहणात्मकत्वप्रसाधनात्। प्रसाधितं च पौद्गलिकत्वं कर्मणां सर्वज्ञसिद्धि-

१ हेतोर्विशेष्यं निरस्यति। २ न तु परममहापरिमाणमवान्तरपरिमाणं वा सिध्येत्। ३ तथाविधसाध्येन व्याप्तस्य हेतोर्दृष्टान्ते सत्त्वं नास्तीति भावः। ४ महेश्वरेणानेकान्तपरिहारार्थमेतत्। ५ व्याघ्रादिना व्यभिचारपरिहारार्थं तदुपकारकेति। ६ लिङ्गं-ज्ञापकम्। ७ भारवाहादिकायाः। ८ देवदत्ताङ्गनाद्यङ्गादि। ९ वीर्यानुमान। १० पक्ष। ११ वसः। १२ धर्माधर्मरूपाणाम्।

प्रस्तावे तदलमतिप्रसङ्गेन । तदेवं धर्माधर्मयोस्तदात्मगुणत्वनिषेधात् तन्निषेधानुमानबाधितमेतत्-'देवदत्ताङ्गनाद्यङ्गं देवदत्तगुणपूर्वकम्' इति ।

अस्तु वा तयोर्गुणत्वम्; तथापि न तदङ्गनाङ्गादिप्रादुर्भावदेशे तत्सद्भावसिद्धिः । न खलु सर्वं कारणं कार्यदेशे सदेव तज्जन्मनि व्याप्रियते, अञ्जनतिलकमन्त्राऽयस्कान्तादेराकृष्यमाणाङ्गनादिदेशेऽसतोप्याकर्षणादिकार्यकर्तृत्वोपलम्भात् । 'कार्यत्वे सति' इति च विशेषणमनर्थकम्; यदि हि तद्गुणपूर्वकत्वाभावेपि तदुपकारकत्वं दृष्टं स्यात् तदा 'कार्यत्वे सति' इति विशेषणं युज्येत, 'सति सम्भवे व्यभिचारे च विशेषणमुपादीयमानमर्थवद्भवति' इति न्यायात् । कालेश्वरादौ दृष्टमिति चेत्; तर्हि कालेश्वरादिकमतद्गुणपूर्वकमपि यदि तदुपकारकम् कार्यमपि किञ्चिदन्यपूर्वकमपि तदुपकारकं भविष्यतीति सन्दिग्धविपक्षव्यावृत्तिकत्वादनैकान्तिको हेतुः, क्वचित्सर्वज्ञत्वाभावे साध्ये वागादिवत् । न च नित्यैकस्वभावात्कालेश्वरादेः कस्यचिदुपकारः सम्भवतीत्युक्तम् ।

न च(ननु च) नकुलशरीरप्रध्वंसाभावोऽहेरुपकारकोस्ति तस्मिन्सति सुखावासभ्रमणादिभावादतः सोपि तद्गुणपूर्वकः स्यात्, तथा च कार्यत्वासम्भवेन सविशेषणस्य हेतोरवर्त्तमानाद्भागासिद्धो हेतुः । प्रत्युक्तं चाभावस्यानन्तरमेव कार्यत्वम् । अथाऽतद्गुणपूर्वकः; अन्यदप्यतद्गुणपूर्वकमपि तदुपकारकं किन्न स्यात्?

साध्यविकलं चेदं निदर्शनं ग्रासादिवदिति । तत्र ह्यात्मनः को गुणो धर्मादिः, प्रयत्नो वा स्यात्? धर्मादिश्चेत्; साध्यवत्प्रसङ्गः । प्रयत्नश्चेत्; कोयं प्रयत्नो नाम? आत्मनः तदवयवानां वा हस्ताद्यवयवप्रविष्टानां परिस्पन्दः; स तर्हि चलनलक्षणा क्रिया, कथं गुणः? अन्यथा गमनादेरपि गुणत्वानुषङ्गात्क्रियावार्त्तोच्छेदः । तथा चायुक्तम्-क्रियावत्त्वं द्रव्यलक्षणम् ।

यदप्युक्तम्-'अदृष्टं स्वाश्रयसंयुक्ते आश्रयान्तरे कर्मारभते

१ ततश्चाचेतनत्वं कर्मणाम् । २ कर्मणां पौद्गलिकत्वसमर्थनस्य । ३ आदिना लोहादिदेशे । ४ हेतोर्विपक्षे वृत्तिनिवृत्त्यर्थं हेतौ विशेषणं योजयन्त्याचार्या इति वचनात् । ५ विपक्षे । ६ कुत्रचिन्निदर्शने । ७ विशेष्यस्य । ८ हेतोः । ९ अकार्यरूपे । १० अकार्यत्वे सति तदुपकारकत्वम् । ११ तस्य=देवदत्तादेः । १२ अभावस्य कार्यत्वासम्भवेन । १३ अणुपरिमाणानधिकरणत्वस्य प्रसज्यपक्षे । १४ देवदत्ताङ्गनाद्यङ्गमपि । १५ साध्यमसिद्धं यथा तथा धर्मादिगुणत्वमप्यसिद्धम् । १६ स्वाश्रयः=आत्मा । १७ द्वीपान्तरवर्तिपदार्थे ।

एकद्रव्यत्वे सति क्रियाहेतुगुणत्वात्प्रयत्नवत्। न चास्य क्रियाहेतुत्वमसिद्धम्; तथाहि-अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनमणुमनसोश्चाद्यं कर्म देवदत्तविशेषगुणकारितं कार्यत्वे सति तदुपकारकत्वात् पाण्यादिपरिस्पन्दवत्। नाप्येकद्रव्यत्वम्; तथाहि-एकद्रव्यमदृष्टं विशेषगुणत्वाच्छब्दवत्। 'एकद्रव्यगुणत्वात्' इत्युच्यमाने रूपादिभिर्व्यभिचारः, तन्निवृत्त्यर्थं 'क्रियाहेतुगुणत्वात्' इति विशेषणम्। 'क्रियाहेतुगुणत्वात्' इत्युच्यमाने हस्तमुसलसंयोगेन स्वाश्रयासंयुक्तस्तम्भादिक्रियाहेतुनानेकान्तः, तन्निवृत्त्यर्थम् 'एकद्रव्यत्वे सति' इति। 'एकद्रव्यत्वे सति क्रियाहेतुत्वात्' इत्युच्यमाने स्वाश्रयासंयुक्तलोहादिक्रियाहेतुनाऽयस्कान्तेनानेकान्तः, तत्परिहारार्थं 'गुणत्वात्' इत्युक्तम्।'

तदेतदप्यविचारितरमणीयम्; अदृष्टस्य गुणत्वप्रतिषेधात्, अतो विशेष्यासिद्धो हेतुः। विशेषणासिद्धश्च; एकद्रव्यत्वाप्रसिद्धेः। तद्धि किमेकस्मिन्द्रव्ये संयुक्तत्वात्, समवायेन वर्त्तमानात्, अन्यतो वा स्यात्? न तावत्संयुक्तत्वात्; संयोगस्य गुणत्वेन द्रव्याश्रयत्वात्, अदृष्टस्य चाद्रव्यत्वात्। अन्यथा गुणवत्त्वेनास्य द्रव्यत्वानुषङ्गात् 'क्रियाहेतुगुणत्वात्' इत्येतद्विघटते। समवायेन वर्त्तनं च समवाये सिद्धे सिद्ध्येत्, स चासिद्धः, अग्रे निषेधात्। तृतीयपक्षस्त्वनभ्युपगमादेव न युक्तः।

क्रियाहेतुत्वं चास्याऽनुपपन्नम्। तथा हि-देवदत्तशरीरसंयुक्तात्मप्रदेशे वर्त्तमानमदृष्टं द्वीपान्तरवर्त्तिषु मणिमुक्ताफलप्रवालादिषु देवदत्तं प्रत्युपसर्पणवत्सु क्रियाहेतुः, उत द्वीपान्तरवर्त्तिद्रव्यसंयुक्तात्मप्रदेशे, किं वा सर्वत्र? तत्राद्यपक्षस्यानभ्युपगम एव श्रेयान्, अतिव्यवहितत्वेन द्वीपान्तरवर्त्तिद्रव्यैस्तस्यानभिसम्बन्धेन तत्र क्रियाहेतुत्वायोगात्। ननु स्वाश्रयसंयोगसम्बन्धसम्भवात्तेषामनभिसम्बन्धोऽसिद्धः, अमुमेव ह्यात्मानमाश्रित्यादृष्टं वर्त्तते, तेन संयुक्तानि सर्वाण्यप्याकृष्यमाणद्रव्याणि; इत्यप्ययुक्तम्; तस्य

१ एकद्रव्यमात्मा, यतः। २ यतः। ३ आत्ममनसोः सर्वथा भेदात्। ४ अणुमनसोः शरीरोत्पत्तिदेशं प्रति गमनक्रिया। ५ असिद्धमिति संबन्धः। ६ पुद्गललक्षणैकद्रव्यं रूपं यतः। ७ क्रिया=हननलक्षणा। ८ हस्तमुसलद्रव्यद्वयसद्भावात्। उलूखले धान्यादिके खण्ड्यमाने सति दूरतोऽसंयुक्तस्तम्भादिः पततीति भावः। ९ स्वाश्रयो=भूम्यादिः। १० क्रिया=आकर्षणम्। ११ भूम्यादौ स्थितोऽयस्कान्त ऊर्ध्वस्थितमसंयुक्तं लोहादिकमाकर्षतीति भावः। १२ परस्य तव। १३ तस्यादृष्टस्याश्रय आत्मा तेन संयोगः। १४ अदृष्टस्य। १५ द्रव्याणाम्। १६ अदृष्टेन सह। १७ कथम्? तथा हि।

सर्वत्राविशेषेण[2] सर्वस्याकर्षणानुषङ्गात्। अथ यददृष्टेन यज्जन्यते तददृष्टेन तदेवाकृष्यते न सर्वम्; तर्हि देवदत्तशरीरारम्भकाणां परमाणूनां नित्यत्वेन तददृष्टाजन्यत्वात् कथं तददृष्टेनाकर्षणम्? तथाप्याकर्षणेऽतिप्रसङ्गः[3]। तन्नाद्यः पक्षो युक्तः।

नापि द्वितीयः; तथाहि–यथा वायुः स्वयं देवदत्तं प्रत्युपसर्पणवानन्येषां तृणादीनां तं प्रत्युपसर्पणहेतुस्तथाऽदृष्टमपि तं प्रत्युपसर्पत्स्वयमन्येषां तं प्रत्युपसर्पतां हेतुः, द्वीपान्तरवर्त्तिद्रव्यसंयुक्तात्मप्रदेशस्थमेव वा? प्रथमपक्षे स्वयमेवादृष्टं तं प्रत्युपसर्पति, अदृष्टान्तराद्वा? स्वयमेवास्य तं प्रत्युपसर्पणे द्वीपान्तरवर्त्तिद्रव्याणामपि तथैव तत् इत्यदृष्टपरिकल्पनमनर्थकम्। 'यद्देवदत्तं प्रत्युपसर्पति तद्देवदत्तगुणाकृष्टं तं प्रत्युपसर्पणात्' इति हेतुश्चानैकान्तिकः स्यात्। वायुवच्चादृष्टस्य सक्रियत्वम् गुणत्वं बाधेत। शब्दवच्चापरापरस्योत्पत्तौ अपरमदृष्टं निमित्तकारणं वाच्यम्, तत्राप्यपरमित्यनवस्था। अन्यथा शब्देऽप्यदृष्टस्य निमित्तत्वकल्पना न स्यात्। अदृष्टान्तरात्तस्य तं प्रत्युपसर्पणे तदप्यदृष्टान्तरं तं प्रत्युपसर्पत्यदृष्टान्तरात्तदपि तदन्तरादिति तदवस्थमनवस्थानम्।

अथ द्वीपान्तरवर्त्तिद्रव्यसंयुक्तात्मप्रदेशस्थमेव तत्तेषां तं प्रत्युपसर्पणहेतुः; न; अन्यत्र प्रयत्नादावात्मगुणे तथानभ्युपगमात्। न खलु प्रयत्नो ग्रासादिसंयुक्तात्मप्रदेशस्थ एव हस्तादिसञ्चलनहेतुर्ग्रासादिकं देवदत्तमुखं प्रापयति, अन्तरालप्रयत्नवैफल्यप्रसङ्गात्।

ननु प्रयत्नस्य विचित्रतोपलभ्यते, कश्चिद्धि प्रयत्नः स्वयमपरापरदेशवानन्यत्र क्रियाहेतुर्यथानन्तरोदितः। अन्यश्चान्यथा यथा शरासनाध्यासपदसंयुक्तात्मप्रदेशस्थ एव शरीरा(शरा)दीनां लक्ष्यप्रदेशप्राप्तिक्रियाहेतुरिति। सेयं चित्रता एकद्रव्याणां क्रियाहेतुगुणानां स्वाश्रयसंयुक्तासंयुक्तद्रव्यक्रियाहेतुत्वेन किन्नेष्यते विचित्रशक्तित्वाद्भावानाम्? दृश्यते हि भ्रामकाख्यस्यायस्कान्तस्य स्पर्शो गुण एकद्रव्यः स्वाश्रयसंयुक्तलोहद्रव्यक्रियाहेतुः, आकर्षकाख्यस्य तु स्वाश्रयासंयुक्तलोहद्रव्यक्रियाहेतुरिति।

---

१ अनाकृष्यमाणेष्वपि। २ संयोगस्य। ३ सर्वस्याप्याकर्षणप्रसङ्गः। ४ स्वयमुपसर्पताऽदृष्टेन। ५ शब्दवदपरापरादृष्टस्योत्पत्तेः कथं सक्रियत्वमित्याशङ्कायामाह। ६ 'इति चेत्' इत्युपरिष्टाद्योज्यम्। ७ हस्तादिगतात्मप्रदेशस्थः। ८ येन प्रयत्नेन ग्रासो गृह्यते स प्रथमः प्रयत्नः, अन्तरालप्रयत्नस्तु येन ग्रासादिकमूर्ध्वं कृत्वा मुखं प्रति नीयते स इति। ९ यः प्रयत्नो भिन्नं भिन्नं प्रदेशं गृह्णातीत्यर्थः। १० ग्रासादौ। ११ शरासनस्य धनुषोऽध्यासः स्थितिस्तस्य पदं स्थानं हस्तरूपं तत्र संयुक्तश्चासावात्मप्रदेशश्च तत्र तिष्ठतीति विग्रहवाक्यम्। १२ अदृष्टलक्षणानाम्।

अथात्र द्रव्यं क्रियाहेतुर्न स्पर्शादिगुणः; कुत एतत्? द्रव्यरहितस्यास्य तद्धेतुत्वादर्शनाच्चेत्; तर्हि वेगस्य क्रियाहेतुत्वं क्रियायाश्च संयोगहेतुत्वं संयोगस्य च द्रव्यहेतुत्वं न स्यात्, किन्तु द्रव्यमेवात्रापि तत्कारणम्। ननु द्रव्यस्य तत्कारणत्वे वेगादिरहितस्यापि ५ तत्स्यात्; तर्हि स्पर्शस्य तदकारणत्वे तद्रहितस्यैवायस्कान्तादेस्तद्धेतुत्वं किन्न स्यात्? तथाविधस्यास्यादर्शनान्नेति चेत्; तर्हि लोहद्रव्यक्रियोत्पत्तावुभयं दृश्यते उभयं कारणमस्तु विशेषाभावात्। तथाच 'एकद्रव्यत्वे सति क्रियाहेतुगुणत्वात्' इत्यस्यानेकान्तः।

सर्वत्र चादृष्टस्य वृत्तौ सर्वद्रव्यक्रियाहेतुत्वं स्यात्। 'यददृष्टं १० यद्द्रव्यमुत्पादयति तददृष्टं तत्रैव क्रियां करोति' इत्यत्रापि शरीरारम्भकाणुषु क्रिया न स्यादित्युक्तम्। अदृष्टस्य चाश्रय आत्मा, स च हर्षविषादादिविवर्तात्मको द्वीपान्तरवर्त्तिद्रव्यैर्वियुक्तमेवात्मानं स्वसंवेदनप्रत्यक्षतः प्रतिपद्यते इति प्रत्यक्षबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वेन कालात्ययापदिष्टो हेतुः। तद्वियुक्तत्वेनाऽतस्तत्प्रती-१५ तावप्यात्मनस्तद्द्रव्यैः संयोगाभ्युपगमे पटादीनां मेर्वादिभिस्तेषां वा पटादिभिः संयोगः किन्नेष्यते यतः साङ्ख्यदर्शनं न स्यात्? प्रमाणबाधनमुभयत्र समानम्।

किञ्च, धर्माधर्मयोर्द्रव्यान्तरसंयोगस्य चात्मैक आश्रयः, स च भवन्मते निरंशः। तथा च धर्माधर्माभ्यां सर्वात्मनास्यालिङ्गितत-२० नुत्वान्न तत्संयोगस्य तत्रावकाशस्तेन वा न तयोरिति। अथ धर्माधर्मालिङ्गिततत्स्वरूपपरिहारेण तत्संयोगस्तत्स्वरूपान्तरे वर्त्तते; तर्हि घटादिवदात्मनः सावयवत्वं स्वारम्भकावयवारभ्यत्वमनित्यत्वं च स्यात्।

एतेनैतन्निरस्तम्-'देवदत्तं प्रत्युपसर्पन्तः पश्वादयो देवदत्त-२५ गुणाकृष्टास्तं प्रत्युपसर्पणवत्त्वाद्ग्रासादिवत्' इति। यथैव हि तद्विशेषगुणेन प्रयत्नाख्येन समाकृष्टास्तं प्रत्युपसर्पन्तः समुपलभ्यन्ते ग्रासादयः, तथा नयनाञ्जनादिना द्रव्यविशेषेणाप्याकृष्टाः रूयादयस्तं प्रत्युपसर्पन्तः समुपलभ्यन्ते एव, अतः 'किं प्रयत्नसधर्मणा

१ अवयवाश्रितस्य। २ अवयवेष्वेव। ३ अवयवलक्षणतन्त्वाश्रितस्य संयोगस्य। ४ अवयविलक्षणपटस्य। ५ अवयविद्रव्यम्। ६ क्रियासंयोगद्रव्येष्वेव। ७ तस्य=क्रियायाः संयोगस्य द्रव्यस्य च। ८ स्पर्शायस्कान्तौ। ९ स्पर्शेन। १० 'किं वा सर्वत्र' इति तृतीयो विकल्पोयम्। ११ पूर्वम्। १२ सर्वं सर्वत्र विद्यते इति वचनात्। १३ अस्मदुक्ते भवदुक्ते च। १४ द्रव्यस्यापि क्रियाहेतुत्वसमर्थनपरेण ग्रन्थेन एकद्रव्यत्वे सति क्रियाहेतुगुणत्वानुमाननिराकरणेन वा। १५ प्रयत्नसदृशेनेत्यर्थः।

केनचित्[1]आकृष्टाः पश्वादयः किं वाऽञ्जनादि[2]सधर्मणा' इति सन्देहः। शक्यं हि परेणा[3]प्येवं वक्तुम्-विवादापन्नाः[4] पश्वादयोऽञ्जनादिसधर्मणा समाकृष्टास्तं प्रत्युपसर्पणवत्त्वात् स्त्र्यादिवत्। अथ तदभा[5]वेपि प्रयत्नादपि तद्दृष्टे[6]रनेकान्तः; तर्हि प्रयत्नसधर्मणो गुणस्याभावेप्यञ्जनादेरपि तद्दृष्टे[7]र्भवदीयहेतोरप्यनैकान्तिकत्वं स्यात्। अत्रानुमीयमानस्य प्रयत्नसधर्मणो हेतु[8]त्वादव्यभिचारे अन्यत्राप्यञ्जनादिसधर्मणो[9]नुमीयमानस्य हेतु[10]त्वादव्यभिचारः स्यात्। तत्र[11] प्रयत्नस्यैव सामर्थ्याद[12]स्य वैफल्ये अत्रा[13]प्यञ्जनादेरेव सामर्थ्यात्तद्वैफल्यं किं न स्यात्? अथाञ्जनादेरेव तद्धेतुत्वे सर्वस्य[14] तद्वतः स्त्र्याद्याकर्षणं स्यात्, न चाञ्जनादौ सत्यप्यविशिष्टे तद्वतः सर्वान्प्रति स्त्र्याद्याकर्षणम्, ततोऽवसीयते तदविशेषेपि यद्वै[15]कल्यात्तन्न स्यात्तदपि तत्कारणं नाञ्जनादिमात्रम्; इत्यप्यपेशलम्; प्रयत्न[16]कारणेपि समानत्वात्। न खलु सर्वं प्रयत्नवन्तं प्रति ग्रासादयः समुपसर्पन्ति तदपहारादिदर्शनात्। ततोऽत्राप्यन्यत्कारणमनुमीयताम्, अन्यथा न प्रकृतेप्यविशेषात्।

अञ्जनादेश्च स्त्र्याद्याकर्षणं प्रत्यकारणत्वे घटादिवत्तदर्थिनां तदुपादानं न स्यात्। उपादाने वा सिकतासमूहात्तैलवन्न कदाचित्ततस्तत्स्यात्। न च दृष्टसामर्थ्यस्याञ्जनादेः कारणत्वपरिहारेणात्रान्यकारणत्वकल्पने भवतो[17]ऽनवस्था[18]तो[19] मुक्तिः स्यात्। अथाञ्जनादिकमदृष्टसहकारि तत्कारणं न केवलम्; हन्तैवं सिद्धमदृष्टवदञ्जनादेरपि तत्कारणत्वम्। ततः सन्देह एव-'किं ग्रासादिवत्प्रयत्नसधर्मणाकृष्टाः पश्वादयः किं वा स्त्र्यादिवदञ्जनादिसधर्मणा तत्संयुक्तेन[20] द्रव्येण[21]' इति। परिस्पन्दमानात्मप्रदेशव्यतिरेकेण ग्रासाद्याकर्षणहेतोः प्रयत्नस्यापि तद्विशेषगुणस्य परं प्रत्यसिद्धेः साध्यविकलता दृष्टान्तस्य।

यच्चोक्तम्-'देवदत्तं प्रत्युपसर्पन्तः' इति; तत्र देवदत्तशब्दवाच्यः कोर्थः-शरीरम्, आत्मा, तत्संयोगो वा, आत्मसंयोगविशिष्टं शरीरं[22] वा, शरीरसंयोगविशिष्ट आत्मा वा, शरीरसंयुक्त

१ गुणेन। २ अदृष्टलक्षणेन द्रव्यविशेषेण। ३ जैनेनापि। ४ गुणेन समाकृष्टा द्रव्येण वेति। ५ अञ्जनादिसधर्मद्रव्यविशेषाभावेपि। ६ तस्य=ग्रासाद्याकर्षणस्य। ७ तस्य=स्त्र्याद्याकर्षणस्य। ८ उपसर्पणकारणत्वात्। ९ अदृष्टलक्षणद्रव्यविशेषस्य। १० स्त्र्याद्याकर्षणे। ११ ग्रासाद्याकर्षणे। १२ द्रव्यस्य। १३ स्त्र्याद्याकर्षणेपि। १४ प्राणिनः। १५ अदृष्ट। १६ यस्तः। १७ वैशेषिकस्य। १८ दृष्टसामर्थ्यस्यान्यकारणस्य परिहारेणेत्यादिप्रकारेण। १९ कारणानां पूर्वपूर्वकारणपरित्यागेनाऽपरापरकारणपरिकल्पनात्। २० अदृष्ट। २१ आत्मना। २२ द्रव्यमिदम्।

आत्मप्रदेशो वा ? यदि शरीरम्; तर्हि शरीरं प्रत्युपसर्पणाच्छरीरगुणाकृष्टाः पश्वादय इत्यात्मविशेषगुणाकृष्टत्वे साध्ये शरीरगुणाकृष्टत्वसाधनाद्विरुद्धो हेतुः।

अथात्मा; तस्य समाकृष्यमाणार्थदेशकालाभ्यां सदाभिसम्बन्धान्न तं प्रति किञ्चिदुपसर्पेत्। न ह्यत्यन्ताश्लिष्टकण्ठकामिनी कामुकमुपसर्पति। अन्यदेशो ह्यर्थोऽन्यदेशं प्रत्युपसर्पति, यथा लक्ष्यदेशार्थं प्रति बाणादिः। अन्यकालं वा प्रत्यन्यकालः, यथाङ्कुरं प्रत्यपरापरशक्तिपरिणामलाभेन बीजादिः। न चैतदुभयं नित्यव्यापित्वाभ्यामात्मनि सर्वत्र सर्वदा सन्निहिते सम्भवति, अतो 'देवदत्तं प्रत्युपसर्पन्तः' इति धर्मिविशेषणं 'देवदत्तगुणाकृष्टाः' इति साध्यधर्मः 'तं प्रत्युपसर्पणवत्त्वात्' इति साधनधर्मः परस्य स्वरुचिविरचित एव स्यात्।

अथ शरीरात्मसंयोगो देवदत्तशब्दवाच्यः; न; अस्य तच्छब्दवाच्यत्वे तं प्रति चैषामुपसर्पणे 'तद्गुणाकृष्टास्ते' इत्यायातम्। न च गुणेषु गुणाः सन्ति, निर्गुणत्वात्तेषाम्।

'आत्मसंयोगविशिष्टं शरीरं तच्छब्दवाच्यम्' इत्यत्रापि पूर्ववद्विरुद्धत्वं द्रष्टव्यम्।

'शरीरसंयोगविशिष्ट आत्मा तच्छब्दवाच्यः' इत्यत्रापि प्राक्तन एव दोषः नित्यव्यापित्वेनास्य सर्वत्र सर्वदा सन्निधानानिवारणात्। न खलु घटसंयुक्तमाकाशं मेर्वादौ न सन्निहितम्।

अथ शरीरसंयुक्त आत्मप्रदेशस्तच्छब्देनोच्यते; स काल्पनिकः, पारमार्थिको वा ? काल्पनिकत्वे काल्पनिकात्मप्रदेशगुणाकृष्टाः पश्वादयस्तथाभूतात्मप्रदेशं प्रत्युपसर्पणवत्त्वादिति तद्गुणानामपि काल्पनिकत्वं साधयेत्। तथा च सौगतस्येव तद्गुणकृतः प्रत्यभावोपि न पारमार्थिकः स्यात्। न हि कल्पितस्य पावकस्य रूपादयस्तत्कार्यं वा दाहादिकं पारमार्थिकं दृष्टम्।

पारमार्थिकाश्चेदात्मप्रदेशाः; ते ततोऽभिन्नाः, भिन्ना वा ? यद्यभिन्नाः; तदात्मैव ते, इति नोक्तदोषपरिहारः। भिन्नाश्चेत्; तद्विशेषगुणाकृष्टाः पश्वादय इत्येतत्तेषामेवात्मत्वं प्रसाधयतीत्यन्यात्मकल्पनानर्थक्यम्। कल्पने वा सावयवत्वेन कार्यत्वमनित्यत्वं चास्य स्यादित्युक्तम्।

---

१ नित्यसर्वगतत्वादात्मनः। २ देशकालकृतोपसर्पणम्। ३ वैशेषिकस्य। ४ इति चेदिति योज्यम्। ५ पश्वादीनाम्। ६ अग्निर्माणवक इत्यादौ। ७ आत्मनः समाकृष्यमाणार्थदेशकालाभ्यामित्यादिना। ८ तस्य=आत्मनः। ९ आत्मप्रदेशानाम्। १० घटवत्।

यच्चान्यदुक्तम्–'सर्वगत आत्मा सर्वत्रोपलभ्यमानगुणत्वादाकाशवत्' इति; तत्र किं स्वशरीर एव सर्वत्रोपलभ्यमानगुणत्वं हेतुः, उत स्वशरीरवत्परशरीरेऽन्यत्र च? तत्र प्रथमपक्षे विरुद्धो हेतुः, तत्रैव ततस्तस्य सर्वगतत्वसिद्धेः। द्वितीयपक्षे त्वसिद्धः, तथोपलम्भाभावात्। न खलु बुद्ध्यादयस्तद्गुणाः सर्वत्रोपलभ्यन्ते, ५ अन्यथा प्रतिप्राणि सर्वज्ञत्वादिप्रसङ्गः।

अथ मन्याखेटवत्खेटान्तरे मनुष्यजन्मवज्जन्मान्तरे चोपलभ्यमानगुणत्वं विवक्षितम्; तत्किं युगपत्, क्रमेण वा? युगपच्चेत्; असिद्धो हेतुः। क्रमेण चेत्; सर्वे सर्वगताः स्युः, घटादीनामपि तथा सर्वत्रोपलभ्यमानगुणत्वसम्भवात्। तेषां देशान्तरगमना- १० त्तत्सम्भवे आत्मनोपि ततस्तत्सम्भवोस्तु तद्वत्तस्यापि सक्रियत्वात्। प्रत्यक्षेण हि सर्वो देशाद्देशान्तरमायातमात्मानं प्रतिपद्यते, तथा च वदत्यहमद्य योजनमेकमागतः। मनः शरीरं वागतमिति चेत्; किं पुनस्तदहम्प्रत्ययवेद्यम्? तथा चेत्; चार्वाकमतानुषङ्गः।

ननु चास्य सक्रियत्वे लोष्टादिवन्मूर्त्तिभिः सम्बन्धः स्यात्। १५ तत्र केयं मूर्तिर्नाम–असर्वगतद्रव्यपरिमाणम्, रूपादिमत्त्वं वा स्यात्? तत्राद्यपक्षो न दोषावहः; अभीष्टत्वात्। न ह्यष्टमेव दोषाय जायते। रूपादिमती मूर्त्तिः स्यादिति चेत्; न; व्याप्त्यभावात्। रूपादिमन्मूर्त्तिमानात्मा सक्रियत्वाद्बाणादिवत्; इत्यप्यसुन्दरम्; मनसाऽनैकान्तिकत्वात्। न चास्य पक्षीकरणम्; 'रूपादिविशेषगुणा- २० नधिकरणं सन्मनोऽर्थं प्रकाशयति शरीरादर्थान्तरत्वे सति सर्वत्र ज्ञानकारणत्वादात्मवत्' इत्यनुमानविरोधानुषङ्गात्।

ननु सक्रियत्वे सत्यात्मनोऽनित्यत्वं स्याद्घटादिवत्; इत्यपि वार्त्तम्; परमाणुभिर्मनसा चानेकान्तात्।

किञ्च, अस्यातः कथञ्चिदनित्यत्वं साध्येत, सर्वथा वा? कथ- २५ ञ्चिच्चेत्; सिद्धसाधनम्। सर्वथा चानित्यत्वस्य घटादावप्यसिद्धत्वात्साध्यविकलता दृष्टान्तस्य।

---

१ अन्तराले। २ परशरीरादौ। ३ आदिना दुःखित्वादिग्रहः। ४ द्वितीयपक्षे दूषणान्तरप्ररूपणार्थं परमाशङ्क्याह। ५ अयं शब्दो ग्रामभेदे। ६ तथा प्रतीतेरभावात्। ७ तत आत्मना मूर्तिमता भाव्यमिति भावः। ८ शरीरमसर्वगतद्रव्यमत्र। ९ यद्यत्सक्रियं तत्तद्रूपादिमन्मूर्तिमदिति। १० मनसः सक्रियत्वेपि रूपादिमन्मूर्तिमत्त्वाभावात्। ११ एवं निरूपणे घटेन व्यभिचारः। १२ इष्टानिष्टार्थेषु। १३ ज्ञानकारणत्वादित्युच्यमाने चक्षुषा व्यभिचारस्तन्निवृत्त्यर्थं सर्वत्रेति विशेषणम्, तथापि शरीरेण व्यभिचारपरिहारार्थं शरीरादित्यादि। १४ कारणमत्र सहकारि।

किञ्च, आत्मनो निष्क्रियत्वे संसाराभावो भवेत्। संसारो हि शरीरस्य, मनसः, आत्मनो वा स्यात्? न तावच्छरीरस्य; मनुष्यलोके भस्मीभूतस्यामरपुराऽगमनात्।

नापि मनसः; निष्क्रियस्यास्यापि तद्विरहात्। सक्रियत्वेपि तत्क्रियायास्ततो[1]ऽभेदे तद्वत्तदनित्यत्वप्रसङ्गान्नास्य क्वचित्क्षणमात्रमवस्थानं स्यात्। भेदे सम्बन्धासिद्धिः,[2] समवायनिषेधात्।

अचे[3]तनं च तदनिष्टनरकादिपरिहारेणेष्टे स्वर्गादौ कथं प्रवर्त्तेत-स्वभावतः, ईश्वरात्, तदा[4]त्मनः, अदृष्टाद्वा? प्रथमपक्षे दत्तः सर्वत्र[5] ज्ञानाय जलाञ्जलिः[6]। अथेश्वरप्रेरणात्; न; तन्निषेधात्। को[7] वायमीश्वरस्याग्रहो यतस्तत्प्रेरयति, न तदात्मानम्? अस्य प्रेरणे चेदमनुगृहीतं[8] भवति[9]—

"अज्ञो जन्तुरनीशोयमात्मनः सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा॥"
[महाभा० वनपर्व० ३०।२८] इति।

'तदात्मप्रेरणात्' इत्यत्रापि ज्ञातम्, अज्ञातं वा तेने[10][11]न प्रेर्येत? न तावदाद्यो विकल्पः; जन्तुमात्रस्य तत्[12]परिज्ञानाभावात्। नापि द्वितीयः; अज्ञातस्य वाणादिवत्प्रेरणासम्भवात्। ननु[13] स्वप्ने स्वहस्तादयोऽज्ञाता एव प्रेर्यन्ते;[14] न; अहितपरिहारेण हिते प्रेरणा(ऽ)सम्भवात्, ज्वलज्ज्वलनज्वालाजालेपि तत्प्रेरणोपलम्भात्।

अ[15]दृष्टप्रेरणात्[16]; इत्यप्यसारम्; अचेतनस्यापि(स्यास्यापि) तत्प्रेरकत्वायोगात्। तत्प्रेरितस्यात्मन[17] एव वरं प्रवृत्तिरस्तु[18] चेतनत्वा[19]त्तस्य। दृश्यते हि वशीकरणौषधसंयुक्तस्य चेतनस्यानिष्टगृहगमनपरिहारेण विशिष्टगृहगमनम्। तन्न मनसोपि संसारः।

---

१ पर्यायापेक्षया। २ क्रियामनसोः समवायेन सम्बन्धो भविष्यतीत्युक्ते सत्याह्वाचार्यः। ३ परमतेऽचेतनं मनः। ४ मनःसम्बन्धिजीवात्। ५ इष्टानिष्टवस्तुषु। ६ ज्ञानाभावेप्यचेतनस्य मनस इष्टानिष्टवस्तुषु प्रवृत्तिनिवृत्तिदर्शनात्। ७ मन एव प्रेरयति नात्मानमयमेवाग्रह इत्याशङ्क्याह। ८ अग्रे वक्ष्यमाणं भवच्छास्त्रोक्तम्। ९ भवता स्वीकृतम्। १० मनसः प्रेरणे चेदमनुगृहीतं न भवतीति भावः। ११ तदात्मना। १२ अणुरूपमचेतनमतीन्द्रियं मनस्तस्य। १३ अनैकान्तिकत्वं भावयति। १४ 'इति चेत्' इत्युपरितः। १५ तुर्यो विकल्पः। १६ मन एव। १७ न मनसः। १८ अनिष्टनरकादिपरिहारेणेष्टस्वर्गादौ। १९ चेतनत्वादात्मनः प्रवृत्तिरसिद्धेत्युक्ते सत्याहाचार्यः।

आत्मनस्तु स्यात् यद्येकदेहपरित्यागेन देहान्तरमसौ व्रजेत्, तथा च घ[1]टादिवत्तस्य स[2]र्वत्रोपलभ्यमानगुणत्वमित्यु[3]भयोः सर्वगतत्वं न वा क[4]स्यचिद[5]विशेषात्।

यच्चाकाशवदित्युक्तम्; तत्राकाशस्य को गुणः सर्वत्रोपलभ्यते-शब्दः, महत्त्वं वा? न तावच्छब्दः; अस्याकाशगुणत्वनिषे[6]धात्। नापि महत्त्वम्; अस्यातीन्द्रियत्वेनोपलम्भासम्भवात्।

ए[7]तेन 'बुद्ध्यधिकरणं द्रव्यं विभु नित्यत्वे सत्य[8]स्मदाद्युपलभ्यमानगुणा[9]धिष्ठानत्वादाकाशवत्' इत्यपि प्रत्युक्तम्; साधनविकलत्वाद्दृष्टान्तस्य। हेतोश्चानैकान्तिकत्वम्, परमाणूनां नित्यत्वे सत्यस्मदाद्युपलभ्यमानपाकजगुणाधिष्ठानत्वेपि विभुत्वाभावात्। तत्पाकजगुणानामस्मदाद्यप्रत्यक्षत्वे हि 'विवादाध्यासितं क्षित्यादिकमुपलब्धिमत्कारणं कार्यत्वाद्घटादिवत्' इत्यत्र प्र[10]योगे व्या[11]प्तिर्न स्यात्। अथ 'नित्यत्वे सत्यस्मदादिबाह्येन्द्रियोपलभ्यमानगुणत्वात्' इत्यु[12]च्यते; तर्हि बाह्येन्द्रियोपलभ्यमानत्वस्य बु[13]द्धावसिद्धेर्विशेषणासिद्धो हेतुः।

नित्यत्वं च सर्वथा, क[14]थञ्चिद्वा विवक्षितम्? सर्वथा चेत्; पुनरपि विशेषणासिद्धत्वम्। कथञ्चिच्चेत्; घटादिनानेकान्तः, तस्य कथञ्चिन्नित्यत्वे सत्यस्मदाद्युपलभ्यमानगुणाधिष्ठानत्वेपि विभुत्वाभावात्।

यदप्युक्तम्-सर्वगत आत्मा द्रव्यत्वे सत्यमू[15]र्त्तत्वादाकाशवत्। 'द्रव्यात्' (द्रव्यत्वात्) इत्युच्यमाने हि घटादिना व्यभिचारः, तत्परिहारार्थम् 'अमूर्त्तत्वात्' इत्युक्तम्। 'अमूर्त्तत्वात्' इत्युच्यमाने च रूपादिगुणेन गमनादिकर्मणा वानेकान्तः, तन्निवृत्त्यर्थं 'द्रव्यत्वे सति' इत्युक्तम्।

---

१ घटपक्षे देशान्तरपरित्यागेन देशान्तरमसौ व्रजेत्। २ लोकत्रये। ३ आत्मघटयोः। ४ आत्मनोपीत्यर्थः। ५ उभयोर्गमनस्य। ६ अतः साधनविकलो दृष्टान्तः। ७ सर्वत्रोपलभ्यमानगुणत्वादित्यस्य निराकरणपरेण ग्रन्थेन। ८ परमाणुभिर्व्यभिचारपरिहारार्थम्। ९ घटादिना व्यभिचारनिराकरणार्थम्। १० परेणाङ्गीक्रियमाणे। ११ ईश्वरस्य। १२ तत्पाकजगुणानामस्मदाद्यप्रत्यक्षत्वे यद्यत्कार्यं तत्तद्धीमद्धेतुकमिति मानसप्रत्यक्षेण साकल्येन व्याप्तिग्रहणं न स्यादिति भावः। कार्याप्रत्यक्षत्वे कार्यकारणयोर्व्याप्त्यसम्भवात्। १३ गुणरूपायाम्। १४ द्रव्यापेक्षया। १५ असर्वगतद्रव्यपरिमाणलक्षणमूर्त्तत्वस्य रूपादिष्वभावाद्रूपादीनाममूर्तत्वम्, रूपादीनां तत्परिमाणाभावः कुतः? निर्गुणा गुणा इत्यभिधानात्।

तदप्यसमीचीनम्; यतोऽमूर्त्तत्वं मूर्त्तत्वाभावः, तत्र किमिदं मूर्त्तत्वं नाम यत्प्रतिषेधोऽमूर्त्तत्वं स्यात्? रूपादिमत्त्वम्, असर्वगतद्रव्यपरिमाणं वा? प्रथमपक्षे मनसानेकान्तः; तस्य द्रव्यत्वे सत्यमूर्त्तत्वेपि सर्वगतत्वाभावात्। द्वितीयपक्षे तु किमसर्वगत-५द्रव्यं भवतां प्रसिद्धं यत्परिमाणं मूर्त्तिर्वर्ण्यते? घटादिकमिति चेत्; कुतस्तत्तथा? तथोपलम्भाच्चेत्; किं पुनरसौ भवतः प्रमाणम्? तथा चेत्; तद्वदात्मनोपि स एवासर्वगतत्वं प्रसाधयतीति मूर्त्तत्वम्, अतः 'अमूर्त्तत्वात्' इत्यसिद्धो हेतुः। तदसाधने न प्रमाणम्-"लक्षणयुक्ते बाधासम्भवे तल्लक्षणमेव दूषितं स्यात्" १०[प्रमाणवार्तिकाल०] इति न्यायात्। तथा चातो घटादावप्यसर्वगतत्वमतिदुर्लभम्। शक्यं हि वक्तुम्-'घटादयः सर्वगता द्रव्यत्वे सत्यमूर्त्तत्वादाकाशवत्' इति। पक्षस्य प्रत्यक्षबाधनं हेतोश्चासिद्धिः उभयत्र समाना।

ननु चात्मनः सर्वगतत्वात्तत्रास्त्यमूर्त्तत्वमसर्वगतद्रव्यपरिमाण-१५सम्बन्धाभावलक्षणं न घटादौ विपर्ययात्। ननु चास्य कुतः सर्वगतत्वं सिद्धम्-साधनान्तरात्, अत एव वा? साधनान्तराच्चेत्; तदेव (तत एव) समीहितसिद्धेः 'द्रव्यत्वे सत्यमूर्त्तत्वात्' इत्यस्य वैयर्थ्यम्। अत एव चेदन्योन्याश्रयः-सिद्धे हि तस्य सर्वगतत्वेऽसर्वगतद्रव्या(व्य)परिमाणसम्बन्धरूपमूर्त्तत्वाभावोऽमूर्त्तत्वं २०सिध्यति, अतश्च तत्सर्वगतत्वमिति।

किञ्च 'अमूर्त्तत्वात्' इति किमयं प्रसज्यप्रतिषेधो मूर्त्तत्वाभावमात्रममूर्त्तत्वम्, पर्युदासो वा मूर्त्तत्वादन्यद्भावान्तरमिति? तत्राद्यविकल्पोऽयुक्तः; तुच्छाभावस्य प्राक्प्रबन्धेन प्रतिषेधात्। सतोपि चास्य ग्रहणोपायाभावादज्ञातासिद्धो हेतुः। न हि प्रत्यक्ष-२५स्तद्ग्रहणोपायः; तस्येन्द्रियार्थसन्निकर्षजत्वात्, तुच्छाभावेन सह मनसोऽन्यस्य चेन्द्रियस्य सन्निकर्षाभावात्।

ननु मन आत्मना सम्बद्धमात्मविशेषणं च तदभावः, ततः सम्बद्धविशेषणीभावस्तेन मनस इति। युक्तमिदं यद्यसावात्मनो विशेषणं भवेत्। न चास्यैतदुपपन्नम्। विशेष्ये हि विशिष्टप्रत्यय-

१ वैशेषिकाणाम्। २ असर्वगतत्वेन। ३ उपलम्भः। ४ असर्वगतद्रव्यपरिमाणोपलम्भः प्रमाणस्य लक्षणम्। ५ प्रमाणे। ६ प्रमाणस्यात्मन्यसर्वगतत्वासाधनलक्षणे बाधासम्भवे। ७ तस्य=प्रमाणस्य। ८ आत्मन्यसर्वगतत्वोपलम्भस्याप्रमाणत्वे च। ९ आत्मनि घटादौ च। १० असर्वगतत्वात्। ११ अमूर्त्तत्वम्। १२ अभावनिराकरणावसरे। १३ तुच्छाभावेन सह मनसः सन्निकर्षं दर्शयति परः। १४ अमूर्त्तत्वाभावः। १५ सम्बन्धः। १६ परेणोक्तं यत्। १७ मूर्त्तत्वाभावलक्षणं विशेषणम्।

हेतुर्विशेषणं यथा दण्डः पुरुषे[1]। न च तुच्छाभावस्तत्प्रत्ययहेतुर्घटते; सकलशक्तिविरहलक्षणत्वादस्य, अन्यथा भाव एव स्यादर्थक्रियाकारित्वलक्षणत्वात् परमार्थसतो लक्षणान्तराभावात्। सत्तासम्बन्धस्य तल्लक्षणस्य कृतोत्तरत्वात्।

किञ्च, गृहीतं[2] विशेषणं भवति, "नाऽगृहीतविशेषणा विशेष्ये बुद्धिः" [ ] इत्यभिधानात्। ग्रहणे चेतरेतराश्रयः। तथाहि-आत्मसम्बद्धेनेन्द्रियेणा[3]सौ[4] गृहीतः सिद्धः सन्नात्मनो विशेषणं सिध्यति, तत आत्मसम्बद्धेनेन्द्रियेण ग्रहणमिति। यदि चात्मा स्वयमसर्वगतद्रव्य[5]परिमाणसम्बन्धविकलः[6] सिद्धस्तर्हि तावतैव समीहितार्थसिद्धेः किमपरेण तदभावेनेति कथं विशेषणम्? अथ विपरीतः[7]; कथं तदभावो[8] यतो विशेषणम्?

किञ्च, आत्मतदभावाभ्यां सह विशेषणीभावः सम्बद्धः, असम्बद्धो वा? सम्बद्धश्चेत्; तर्हि यथात्मनि विशिष्टविज्ञानविधानादात्मनस्तदभावो विशेषणम्, तथा विशेषणीभावोपि 'आत्मा विशेष्यस्तदभावो विशेषणम्' इति विशिष्टप्रत्ययजननात् विशेषणं समवाय[9]वत्प्रसक्तम्, तथा[10] च तत्राप्यपरेण तत्सम्बन्धेन भवितव्यमित्यनवस्था। अथासम्बद्धः; कथं विशेषणविशेष्याभिमतयोः स भवेत् यतस्तत्र विशिष्टप्रत्ययप्रादुर्भावः सम्बन्धो[11] वा? विशिष्टप्रत्ययहेतुत्वाच्चेत्; ईश्वरादौ[12] प्रसङ्गः। तथापि[13] स 'तयोः' इति कल्पने भावस्याभावः समवायिनोऽस(नोः स)मवायस्तथैव स्यादित्यलं तत्र विशेषणीभावसम्बन्धकल्पनया। तन्न प्रत्यक्षं तद्ग्रहणोपायः।

नाप्यनुमानम्; परस्य प्रत्यक्षाभावे तदभावात्, तन्मूलत्वात्तस्य। नन्विदमस्ति-आत्माऽमूर्त इति बुद्धिर्भिन्नाभावनिमित्ता[15], अभावविशेषणभावविषयबुद्धित्वात्[16], अघटं भूतलमित्यादिबुद्धिवत्; इत्यप्यसारम्; तथाविधाभावस्य[17] विशेषणत्वासिद्धिप्रतिपादनात्। अभावविचारे चानयोर्हेतूदाहरणयोः प्रतिहतत्वान्न साध्यसाधकत्वम्।

---

१ दण्डीति विशिष्टप्रत्ययहेतुः। २ ज्ञातम्। ३ मनसा। ४ मूर्तत्वाभावः। ५ असर्वगतद्रव्यं=शरीरम्। ६ असर्वगतद्रव्यपरिमाणसंबन्धरहितः। ७ आत्मा अमूर्त इति। ८ मूर्तत्वाभावः। ९ गुणगुणिनोः समवाय इति। १० विशेषणीभावस्य विशेषणत्वे च। ११ स्वयं संबन्धरूपोपि नैव। १२ ईश्वरकालाकाशादयोपि विशिष्टप्रत्ययोत्पत्तौ निमित्तकारणकास्तेषामपि विशेषणीभावः सम्बन्धो भवतीति शेषः। १३ संबन्धस्य। १४ सम्बन्धाभावेपि। १५ अभावो विशेषणमस्य, स चासौ भावश्च स विषयो यस्यास्तस्या भाव इति वाक्यम्। १६ द्रव्यत्वे सत्यमूर्तत्वादित्येतन्निरासेन। १७ तुच्छरूपस्य।

पर्युदासपक्षेऽप्यसर्वगतद्रव्यपरिमाणसम्बन्धभावान्मूर्त्तत्वादन्यदमूर्त्तत्वं सर्वगतद्रव्यपरिमाणेन परममहत्त्वेन सम्बन्धा(न्ध)भावः, स च न कुतश्चित्प्रमाणात्प्रसिद्ध इति हेतोरसिद्धिः।

यच्चान्यदुक्तम्-आत्मा व्यापको मनोन्यत्वे सत्यस्पर्शवद्द्रव्यत्वादाकाशवदिति; तदप्येतेनैव प्रत्युक्तम्; स्पर्शवद्द्रव्यप्रतिषेधेऽत्रापि प्रागुक्ताशेषदोषानुषङ्गात्। सन्दिग्धानैकान्तिकश्चायं हेतुः; तथाहि-अस्पर्शवद्द्रव्यत्वमाकाशादौ व्यापित्वे सत्युपलब्धं मनसि चाऽव्यापित्वे, तदिदानीमात्मन्युपलभ्यमानं किं 'व्यापित्वं प्रसाधयत्वव्यापित्वं वा' इति सन्देहः। ननु मनोद्रव्यत्व(मनोऽन्यत्व)विशिष्टस्यास्पर्शवद्द्रव्यत्वस्य मनस्यनुपलम्भात्कथं सन्देहोऽत्रेति चेत्? अत एव। यदि हि तद्विशिष्टं तत्त्रोपलभ्येत तदा निश्चितानैकान्तिकत्वमेवास्य स्यान्न तु सन्दिग्धानैकान्तिकत्वमिति। तन्नात्मनः कुतश्चित्प्रमाणात्सर्वगतत्वसिद्धिरित्यसर्वगत एवासौ यथाप्रतीत्यभ्युपगन्तव्यः।

ननु चात्मनोऽसर्वगतत्वे दिग्देशान्तरवर्त्तिभिः परमाणुभिर्युगपत्संयोगाभावोऽतश्चाद्यकर्माभावः, तदभावादन्त्यसंयोगस्य तन्निमित्तशरीरस्य तेन तत्सम्बन्धस्य चाभावादनुपायसिद्धः सर्वदात्मनो मोक्षः स्यात्; स्यादेवं यदि 'यद्येन संयुक्तं तं प्रति तदेवोपसर्पति' इत्ययं नियमः स्यात्। न चास्ति-अयस्कान्तं प्रत्ययसस्तेनाऽसंयुक्तस्याप्युपसर्पणोपलम्भात्।

यस्य चात्मा सर्वगतः तस्यारब्धकार्यैरन्यैश्च परमाणुभिर्युगपत्संयोगात्तथैव तच्छरीरारम्भं प्रत्येकमभिमुखीभूतानां तेषामुपसर्पणमिति न जाने कियत्परिमाणं तच्छरीरं स्यात्।

ननु ये तत्संयोगास्तददृष्टापेक्षास्त एव स्वसंयोगिनां परमाणूनामाद्यं कर्म रचयन्तीति चेत्; अथ केयं तददृष्टापेक्षा नाम-एकार्थसमवायः, उपकारो वा, सहाद्यकर्मजननं वा? तत्राद्यः पक्षोऽयुक्तः; सर्वपरमाणुसंयोगानां तददृष्टैकार्थसमवायसद्भा-

---

१ अस्पर्शवद्द्रव्यत्वादित्यत्र नञ् पर्युदासः, प्रसज्यो वेत्यादि। २ विपक्षे बाधकं प्रमाणं चेदस्ति तदा सन्देहो निवर्त्ततेऽनुपलम्भमात्रेण तु परचेतोवृत्तिविशेषवत् सन्देहो भवेदेवेति भावः। ३ शरीरारम्भकाणूनां शरीरोत्पत्तिदेशं प्रति गमनमाद्यं कर्म। ४ शरीरनिष्पत्त्यवसानकालभावस्य। ५ शरीरारम्भकाणूनां शरीरोत्पत्तिदेशं प्रति गमनम्। ६ अत एव महच्छरीरं न स्यात्। ७ परमाणुसंयोगानाम्। ८ एकस्मिन्नात्मलक्षणेऽर्थे समवायोऽदृष्टस्य। ९ तस्यात्मनोऽदृष्टं तेन सहैकस्मिन्नर्थे आत्मलक्षणे समवायस्य सद्भावात्।

वात् । उपकारः; इत्यप्ययुक्तम्; अपेक्ष्यादपेक्षकस्यासम्बन्धानवस्थानुषङ्गेणोपकारस्यैवासम्भवात् । सहाद्यकर्मजननम्; इत्यप्यसत्; तयोरन्यतरस्यापि केवलस्य तज्जननसामर्थ्ये परापेक्षायोगात्[4] । यदि पुनः स्वहेतोरेवादृष्टसंयोगयोः[6] सहितयोरेव कार्यजननसामर्थ्यमिष्यते; तर्हि तत एवादृष्टस्यैव तत्संयोगनिरपेक्षस्य तत्सामर्थ्यमस्तु । दृश्यते हि हस्ताश्रयेणायस्कान्तादिना स्वाश्रयासंयुक्तस्य भूभागस्थितस्य लोहादेराकर्षणमित्यलमतिप्रसङ्गेन[10] ।

यदप्युक्तम्-सावयवं शरीरं प्रत्यवयवमनुप्रविशंस्तदात्मा सावयवः स्यात्, तथा च घटादिवत्समान[11]जातीयावयवारभ्यत्वम्[12], समानजातीयत्वं चावयवानामात्मत्वाभिसम्बन्धादित्येकत्रात्मन्यनन्तात्मसिद्धिः, यथा चावयवक्रियातो विभागात्संयोगविनाशाद्घटविनाशः तथात्मविनाशोपि स्यात्; इत्यप्यपरीक्षिताभिधानम्; सावयवत्वेन भिन्नावयवारब्धत्वस्य घटादावप्यसद्धेः । न खलु घटादिः सावयवोपि प्राक्प्रसिद्धसमानजातीयकपालसंयोगपूर्वको दृष्टः, मृत्पिण्डात्[13] प्रथममेव स्वावयवरूपाद्यात्मनोस्य प्रादुर्भावप्रतीतेः । न चैकत्र पटादौ स्वावयवतन्तुसंयोगपूर्वकत्वोपलम्भात्सर्वत्र[14] तद्भावो[15] युक्तः, अन्यथा काष्ठे लोहलेख्यत्वोपलम्भाद्वज्रेपि तथाभावः स्यात् । प्रमाणबाधनमुभयत्र[16] समानम् ।

किञ्च, अस्य तथाभूतावयवारब्धत्वम्-आदौ, मध्यावस्थायां वा साध्येत ? न तावदादौ; स्तनादौ प्रवृत्त्यभावानुषङ्गात्, तद्धत्वभिलाषप्रत्यभिज्ञानस्मरणदर्शनादेरभावात् । तदारम्भकावयवानां प्राक् सतां विषयदर्शनादिसम्भवे तेषामेवाहर्जातवेलायां सत्त्वान्तराणामिव प्रवृत्तिः स्यात् । मध्यावस्थायां तु तत्साधने प्रत्यक्ष-

१ व्यापित्वादात्मनः । २ अपेक्ष्येणादृष्टेनापेक्षकस्याणुसंयोगस्य क्रियमाण उपकारस्तस्मादभिन्नो भिन्नो वा स्यात् ? अभेदे सोपि तज्जन्यः स्यात् । भेदे संबन्धासिद्धिः । अथापकारमुपकारं कृत्वा तत्सम्बन्धीत्यादिपरिकल्पने चानवस्था । अयं संयोगस्योपकार इति न घटते अन्यथातिप्रसङ्गः । यथा संयोगस्य तथान्यस्यापि । तथा चात्मपरमाणुसंयोगस्य नित्यत्वव्याघातः स्यात् । ३ अदृष्टाणुसंयोगयोर्मध्येऽदृष्टस्य परमाणुसंयोगस्य वा । ४ अविशेषतः सर्वत्र तज्जननस्यापि प्रसङ्गात् । ५ आत्मनः । ६ अदृष्टात्माणुसंयोगयोः । ७ परेण । ८ ततश्चाणुसंयोगपरिकल्पनेन किम् । ९ यतः । १० ततश्च स्वाश्रयासंयुक्तमेव परमाण्वादिकमाकृष्यते आत्मना । ततश्च सर्वगतत्वपरिकल्पनेनालमात्मनः । ११ आत्मत्वेन । १२ आत्मनः । १३ उपादानकारणात् । १४ आत्मादिषु । १५ स्वावयवसंयोगपूर्वकत्वम् । १६ वज्रे आत्मनि च । १७ समानजातीयभिन्नावयव । १८ गर्भावस्थायाम् । १९ संस्कारस्य । २० तस्य आत्मनः ।

विरोधः[1]। अन्त्यावस्थायां चास्यात्यन्तविनाशे स्मरणाद्यभावात्स्त-
नादौ प्रवृत्त्यभाव एव स्यात्। न चेयं विनाशोत्पादप्रक्रिया[2] क्वचिद्
दृश्यते। न खलु कटकस्य केयूरीभावे कुतश्चिद्[3] भागेषु क्रिया
विभागः संयोगविनाशो द्रव्यविनाशः पुनस्तदवयवाः केवलास्तद-
५ नन्तरं तेषु[4] कर्म[5]संयोगक्रमेण केयूरीभाव इति, केवलं सुवर्णकार-
का(कारकरा)दिव्यापारे कटकस्य केयूरीभावं[6] पश्यामः[7]। अन्यथा
कल्पने च प्रत्यक्षविरोधः।

न च सावयवशरीरव्यापित्वे सत्यात्मनस्तच्छेदे छेदप्रसङ्गो
दोषाय; कथञ्चित्[8] तच्छेदस्येष्टत्वात्[9]। शरीरसम्बद्धात्मप्रदेशेभ्यो
१० हि तत्प्रदेशानां छिन्नशरीरप्रदेशेऽवस्थानमात्मनश्छेदः, स चात्रा[10]-
स्त्येव, अन्यथा शरीरात्पृथग्भूतावयवस्य कम्पोपलब्धिर्न स्यात्।
न च छिन्नावयवप्रतिष्ठस्यात्मप्रदेशस्य पृथगात्मत्वानुषङ्गः; तत्रै[11]-
वानुप्रवेशात्। कथमन्यथा छिन्ने हस्तादौ कम्पादितल्लिङ्गो[12]पलम्भा-
भावः स्यात्?

१५ ननु कथं छिन्ना[13]च्छिन्नयोः संघटनं पश्चात्? न; एकान्तेन
छेदानभ्युपगमात्, पद्मनालतन्तुवदविच्छेदस्याप्यभ्युपगमात्।
तथाभूतादृष्टवशाच्च[14] तदविरुद्धमेव। ततो यद्यथा निर्बाधबोधे
प्रतिभाति तत्तथैव सद्व्यवहारमवतरति यथा स्वारम्भकतन्तुषु
प्रतिनियतदेशकालाकारतया प्रतिभासमानः पटः, शरीरे एव
२० प्रतिनियतदेशकालाकारतया निर्बाधबोधे प्रतिभासते चात्मेति।
न चायमसिद्धो हेतुः[15]; शरीराद्बहिस्तत्प्रतिभासाभावस्य प्रतिपादि-
तत्वात्। उक्तप्रकारेण चानवद्यस्य बाधकप्रमाणस्य कस्यचिद-
सम्भवान्न विशेषणासिद्धत्वमिति। तन्न परेषां यथाभ्युपगत-
स्वभावमात्मद्रव्यमपि घटते।

२५ नापि मनोद्रव्यम्; तस्य प्रागेव स्वसंवेदनसिद्धिप्रस्तावे निरा-
कृतत्वात्। ततः पृथिव्यादेर्द्रव्यस्य यथोप[16]वर्णितस्वरूपस्य प्रमाण-
तोऽप्रसिद्धेः 'पृथिव्यादीनि द्रव्याणीतरेभ्यो भिद्यन्ते द्रव्यत्वाभि-
सम्बन्धात्' इत्यादिहेतूपन्यासोऽविचारितरमणीयः, तत्स्वरूपा-
सिद्धौ हेतोराश्रयासिद्धत्वात्। स्वरूपासिद्धत्वाच्च; द्रव्यत्वाभिस-

---

१ समानजातीयभिन्नावयवारब्धत्वं प्रत्यक्षेण न ज्ञायते यतः। २ अग्रे वक्ष्यमाणा। ३ कारणात्। ४ अवयवेषु। ५ क्रिया। ६ केयूरोत्पादः। ७ वयं जैनाः। ८ अवयवापेक्षया। ९ जैनस्य। १० आत्मनि। ११ आत्मन्येव। १२ तस्य=आत्मनः। १३ प्रदेशयोः। १४ सङ्घटनकारिकर्मवशात्। १५ शरीरे एव प्रतिनियतदेशकालाकारतया निर्बाधबोधे प्रतिभासमानत्वादिति। १६ वैशेषिकद्वारा।

म्बन्धो हि समवायलक्षणो भवता[1]भ्युपगम्यते, न चासौ प्रमाणतः प्रसिद्ध इति। विशेषणासिद्धत्वं च; द्रव्यत्वसामान्यस्य यथाभ्युपगतस्वभावस्यासम्भवात्। तन्न परपरिकल्पितो द्रव्यपदार्थो घटते।

नापि गुणपदार्थः। स हि चतुर्विंशतिप्रकारः परैरिष्टः[2]। तथाहि—"रूपरसगन्धस्पर्शाः संख्या परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नश्च तु गुणाः" [वैशे० सू० १।१।६] इति सूत्रसङ्गृहीताः सप्तदश, चशब्द[3]समुच्चिताः गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाश्च सप्तेति। तत्र रूपं चक्षुर्ग्राह्यं पृथिव्युदकज्वलनवृत्ति। रसो रसनेन्द्रियग्राह्यः पृथिव्युदकवृत्तिः। गन्धो घ्राणग्राह्यः पृथिवीवृत्तिः। स्पर्शस्त्वगिन्द्रियग्राह्यः पृथिव्युदकज्वलनपवनवृत्तिः।

संख्या त्वेकादिव्यवहारहेतुरेकत्वादिलक्षणा, एकद्रव्या चानेकद्रव्या च। तत्रैकसंख्या एकद्रव्या। अनेकद्रव्या तु द्वित्वादिसंख्या। सा च प्रत्यक्षत एव सिद्धा, विशेषबुद्धेश्च निमित्तान्तरापेक्ष[6]त्वादनुमानतो[7]पि।

परिमाणव्यवहारकारणं परिमाणम्, महदणु दीर्घं ह्रस्वमिति चतुर्विधम्। तत्र महद्द्विविधं नित्यमनित्यं च। नित्यमाकाशकालदिगात्मसु परममहत्त्वम्। अनित्यं द्व्यणुकादिद्रव्येषु। अण्वपि नित्यानित्यभेदाद्द्विविधम्। परमाणुमनस्सु पारिमाण्डल्यलक्षणं नित्यम्। अनित्यं द्व्यणुके एव। बदरामलकबिल्वादिषु तु महत्स्वपि तत्प्रकर्षाभावमपेक्ष्य भाक्तोऽणुव्यवहारः।

ननु महद्दीर्घत्वयोस्त्र्यणुकादिषु प्रवर्त्तमानयो[12]र्द्व्यणुके चाणुत्वह्रस्वत्वयोः को विशेषः? 'महत्सु[13] दीर्घमानीयतां दीर्घेषु[14] महदानीयताम्' इति व्यवहारभेदप्रतीतेरस्त्यनयोः परस्परतो भेदः। अणुत्वह्रस्वत्वयोस्तु विशेषो योगिनां तद्दर्शिनां प्रत्यक्ष एव। महदादि[15]

१ वैशेषिकेण। २ नित्यनिरंशत्वेन। ३ च इति कपुस्तके नास्ति। ख, ग, घपुस्तकेभ्यः संयोजितः। ४ एव। ५ विशेषः=भेदः। ६ एकादिप्रत्यया विशेष[ण] ग्रहणापेक्षा विशिष्टप्रत्ययत्वाद्दण्डीत्यादिप्रत्ययवदिति। ७ तत्रैकत्वसंख्या नित्यद्रव्येषु नित्या कार्यद्रव्येष्वनित्या। द्वित्वादिसंख्या तु परार्द्धान्ता अपेक्षाबुद्धिजन्या सर्वत्रानित्या। ८ वर्तुलाकारमित्यर्थः। ९ नन्वणु द्व्यणुके एव यदि वर्त्तते तर्हि बदरामलकादिष्वणुपरिमाणव्यवहारः कथमित्याशङ्कायामाह। १० तस्य=अतिशयस्य। ११ उपचरितः। १२ परिमाणयोः। १३ वस्तुषु। १४ वस्तु। १५ महदादिपरिमाणस्य रूपादिभ्योऽभेदो भविष्यतीत्युक्ते सत्याह।

च परिमाणं रूपादिभ्योऽर्थान्तरं तत्प्रत्ययविलक्षणबुद्धिग्राह्यत्वात्सुखादिवत्।

संयु[1]क्तमपि द्रव्यं यद्वशात् 'अत्रेदं पृथक्' इत्यपोद्ध्रि[2]यते तदपोद्धारव्यवहारकारणं पृथक्त्वं घ[3]टादिभ्योऽर्थान्तरं तत्प्रत्ययविलक्षणज्ञानग्राह्यत्वात्सुखादिवत्।

अप्राप्तिपूर्विका प्राप्तिः संयोगः। प्राप्तिपूर्विका चाप्राप्तिर्विभागः। तौ च द्रव्येषु यथाक्रमं संयुक्तविभक्तप्रत्ययहेतू[4]।

'इदं परमिदमपरम्' इति यतोऽभिधानप्रत्ययौ भवतस्तद्यथाक्रमं प[5]रत्वमपर[6]त्वं च। बुद्ध्यादयः प्रयत्नान्ताश्च गुणाः सुप्रसिद्धा ए[7]व।

[8]गुरुत्वं च पृथिव्युदकवृत्ति पतनक्रियानिबन्धनम्। द्रवत्वं तु पृथिव्युदकज्वलनवृत्तिः स्प(स्य)न्दनहेतुः। पृथि[9]व्यनलयोर्नै[10]मित्तिकम्[11]। अपां सांसिद्धिकम्[12]। स्नेहस्त्वम्भस्येव स्निग्धप्रत्ययहेतुः।

संस्कारस्तु त्रिविधो वेगो भावना स्थितस्थापकश्चेति। तत्र वेगाख्यः पृथिव्यप्तेजोवायुमनस्सु मूर्त्त[13]द्रव्येषु प्रयत्नाभिघातविशेषापेक्षात्कर्मणः समुत्पद्यते। नियतदिक्क्रियाप्रतिब(प्रब)न्धहेतुः स्पर्शवद्द्रव्यसंयोगविरोधी[14] च[15]। भावनाख्यः पुनरात्मगुणो ज्ञानजो ज्ञानहेतुश्च, दृष्टानुभूतश्रुतेष्वप्यर्थेषु स्मृतिप्रत्यभिज्ञाकार्योन्नीयमानसद्भावः। मूर्त्तिमद्द्रव्यगुणः स्थितस्थापकः, घनावयवसन्निवेशविशिष्टं स्वमाश्रयं कालान्तरस्थायिनमन्यथाव्यवस्थितमपि प्रयत्नतः पूर्ववद्यथावस्थितं स्थापयतीति कृत्वा, दृश्यते च तालपत्रादेः प्रभूततरकालसंवेष्टितस्य प्रसार्यमुक्तस्य पुनस्तथैवावस्थानं संस्कारवशात्। एवं धनुःशाखाशृङ्गदन्तादिषु भग्ना[16]पवर्तितेषु वस्त्रादौ चास्य कार्यं परिस्फुटमुपलभ्यत एव। धर्माद[17]यस्तु सुप्रसिद्धा एवेति।

---

१ विभागात्पृथक्त्वस्य भेदाभावात्पृथक्त्वप्रतिपादनं किमर्थमित्युक्ते सत्याह। २ पृथक् क्रियते। ३ अस्तु विभागात्पृथक्त्वस्य भेदस्तथापि घटादिभ्योऽभेदो भविष्यतीत्युक्ते वक्ति। ४ अनित्यावेव। ५ अनित्यमेव। ६ अनित्यमेव। ७ अनित्या एव। ८ तच्च पार्थिवाप्याणुषु नित्यं द्व्यणुकादिष्वनित्यम्। ९ लाक्षालोहादिषु। १० सर्पिःसुवर्णयोः। ११ अनित्यमित्यर्थः। १२ नित्यमित्यर्थः। आप्याणुषु नित्यमाप्यद्व्यणुकादिषु त्वनित्यम्। १३ असर्वगतद्रव्यपरिमाणवत्स्वित्यर्थः। १४ कर्मधारयः। १५ वृक्षादिकेन स्पर्शवता द्रव्येण सह वेगाख्यस्य बाणादेः संयोगे सति वेगाख्यः संस्कारः स्वयं विनश्यतीत्यर्थः। १६ आकृष्टमुक्तेषु। १७ स त्रिविधोऽप्ययं संस्कारो अनित्य एव, धर्माधर्मावात्मविशेषगुणावनित्यावेव, शब्दस्त्वाकाशविशेषगुणोऽनित्य एव।

तदेतत्स्वगृह्यमान्यं परेषाम्; रूपादिगुणानां यथोपवर्णितस्वरूपेणावस्थानासम्भवात् । न खलु रूपं पृथिव्युदकज्वलनवृत्त्येव, वायोरपि तद्वत्तासम्भवात् । तथाहि-रूपादिमान्वायुः पौद्गलिकत्वात् स्पर्शवत्त्वाद्वा पृथिव्यादिवत् । एवं जलानलयोरपि गन्धरसादिमत्ता प्रतिपत्तव्या । रूपरसगन्धस्पर्शमन्तो हि पुद्गलास्तत्कथं ५ तद्वि[1]काराणां प्रतिनियमः[2]? रू[3]पाद्याविर्भावतिरोभावमात्रं तु तत्राविरुद्धम्, जै[4]लकनका[5]दिसंप्रयुक्तानले भासुररूपोष्णस्पर्शयोस्तिरोभावाविर्भाववत् ।

संख्यापि संख्येयार्थव्यतिरेकेणोपलब्धिलक्षणप्राप्ता नोपलभ्यते ह्यसती खरविषाणवत् । न च विशेषणमसिद्धम्; तस्या १० दृश्य[6]त्वेनेष्टेः । तथा च सूत्रम्-"संख्या परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च रूपिसमवायाच्चाक्षुषाणि" [वैशे० सू० ४।१।११] इति ।

'एकादिप्रत्यया विशेष[ण]ग्रहणापेक्षा विशिष्टप्रत्ययत्वाद्दण्डी- १५ त्या[7]दिप्रत्ययवत्' इत्यनुमानतोपि न संख्यासिद्धिः; यतो यथा 'एको गुणोपि(णः) बहवो गुणाः' इत्यादौ संख्यामन्तरेणाप्येकादिबुद्धिस्तथा घटादिष्वप्य[8]सहायादिस्वभावेष्वेकादिबुद्धिर्भविष्यतीत्यलमर्थान्तरभूतयै[9]कादिसंख्यया । न च गुणेषु संख्या सम्भवति; अद्रव्यत्वात्तेषां तस्याश्च गुणत्वेन द्रव्याश्रितत्वात् । न च २० गुणेषूपचरितमेकत्वादिज्ञानम्, अ[10]स्खलद्वृत्तित्वात् । यदि चाश्रयगता संख्यै[11]कार्थसमवायाद्गुणेषूपचर्येत; तर्हि 'एकस्मिन्द्रव्ये रूपादयो बहवो गुणाः' इति प्रत्ययोत्पत्तिर्न स्यात्, तदाश्रयद्रव्ये बहुत्वसंख्याया अभावात् । 'षट् पदार्थाः' इत्यादिव्यपदेशे च किं निमित्तमित्यभिधातव्यम्? न ह्यत्रैकार्थ[12]समवायिनी संख्या २५ सम्भवति; तया सह षट्पदार्थानां क्व[13]चित्समवायाभावात् । अस्तु वा संख्या, तथाप्यस्याः कथं गुणत्वसिद्धिः सत्त्वादिवत् षट्स्वपि पदार्थेषु प्रवृत्तेः?

---

१ पृथिव्यादीनाम् । २ पृथिव्यामेव गन्ध इत्यादिः । ३ तर्हि सर्वत्र तेषामाविर्भावः कुतो न स्यादित्युक्ते सत्याह । ४ उष्ण । ५ अग्नेरपत्यं प्रथमं सुवर्णमित्यागमतः प्रसिद्धतैजसत्वं कनकादीनां ततः कथमुक्तं कनकादिसंयुक्तानल इत्यारेकायामाह कनकेपि पृथिव्यंशोस्तीति । ६ परस्य । ७ अत्र दण्डपुरुषयोः संयोगो विशेषः । ८ निर्गुणा [गुणा] इति वचनात् । ९ संख्यारहितेष्वित्यर्थः । १० अबाधित । ११ आश्रयगतद्रव्यस्यैकत्वात् । १२ केवलद्रव्यसमवेता । १३ द्रव्यलक्षणेऽर्थे ।

ननु यदि संख्या गुणो न स्यात्तर्ह्यनित्यत्वमसमवायिकारणत्वं चास्या न स्यात्। अस्ति च तदुभयम्। तथा चोक्तम्-"एकादिव्यवहारहेतुः संख्याः। सा पुनरेकद्रव्या चानेकद्रव्या च। तत्रैकद्रव्यायाः सलिलादि[2]परमाणुरूपादी[3]नामिव नित्यानित्यत्वनिष्पत्तयः। ५ सलिला[4]दयश्चादिपरमा[5]णवश्चेति विग्रहः। अनेकद्रव्या तु द्वित्वादिका परार्द्धान्ता। तस्याः खल्वेकत्वे[6]भ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिः, अ[7]पेक्षाबुद्धिनाशाच्च विनाशः क्वचिदाश्र[8]यविनाशादु[9]भयविनाशाच्चेति चार्थः। असमवायिकारणत्वं च द्वित्वबहुत्वसंख्यायाः द्व्यणुकादि[10]परिमाणं प्रति[11]" [प्रश० भा० पृ० १११-११३]

१० इति; एतदपि मनोरथमात्रम्; भेदवदस्याः कारणत्वा[12]भावात्। यथैव हि कार्यभिन्नतायां कारणभिन्नताया असमवायिकारणत्वं भवता नेष्यते तथैकत्वस्यापि तन्नै[13]ष्टव्यं तस्याऽभेदपर्यायत्वात्। अ[14]भेद[15]भेदौ च स्वात्मपरात्मापेक्षौ रू[16]पादि[17]ष्व[18]पि भ[19]वतः। यथा चैकमभिन्नमिति पर्यायस्तथानेकं भिन्नमित्यपि। तथा च द्वित्वा-

१५ दिरप्यनेकत्वपर्यायः, तस्योत्पत्त्यादि[20]कल्पना न कार्या।

नन्वे[21]वं स[22]र्वत्र 'द्वे त्रीणि' इत्यादिप्रतिभासप्रसङ्गा[23]त् प्रतिभासप्रवि-

१ उत्तरसंख्योत्पत्तौ प्राक्तनसंख्याऽसमवायिकारणं, द्रव्यं समवायिकारणमपेक्षाबुद्धिर्निमित्तकारणमिति। २ आदिशब्दोत्र लुप्तो द्रष्टव्यः। ३ सलिलादि (कार्यलक्षण) रूपादीनामनित्यत्वनिष्पत्तिर्यथा तथाऽनित्यैकद्रव्यगतायाः एकसंख्यायाः नित्यत्वनिष्पत्तिः, यथा च जलादिपरमाणुरूपादीनां (कारणरूपाणाम्) तथा नित्यैकद्रव्यगतायाः एकसंख्यायाः नित्यत्वमिति भावः। ४ कार्यरूपाः। ५ कारणरूपपरमाणवः। ६ द्वित्वादिसंख्यां प्रत्यपेक्षाबुद्धेः कारणत्वमेकत्वसंख्यायास्त्वसमवायिकारणत्वमिति भावः। ७ इमौ द्वाविमौ बहवः। ८ संख्येय आश्रयः। ९ संख्येयस्य च। १० संख्याम्। ११ उत्तरगुणं प्रति प्राक्तनगुणस्यासमवायिकारणत्वाभ्युपगमात्। १२ द्वित्वादिसंख्यां प्रति। १३ द्वित्वादिसंख्यां प्रति। १४ अभेदपर्यायत्वेप्यसमवायिकारणत्वं कुतो न भवतीत्युक्ते सत्याह। १५ एकनानात्वम्। १६ रूपस्य स्वरूपापेक्षयाऽभेदः, परापेक्षया भेदः, एवं रसादिषु वाच्यम्। १७ अभेदोऽसमवायिकारणं न भवति द्रव्यादन्यत्र वृत्तिमत्त्वाद्भेदवत्सत्त्वादिवद्वेति। १८ अपिशब्देन द्रव्यं ग्राह्यं तत्रापि स्वपररूपापेक्षयाऽभेदभेदौ। १९ आदिशब्देन नाशस्थितिसंग्रहः। २० द्वित्वादेरनेकपर्यायत्वे वस्तुस्वरूपमेवायातम्, तस्य च स्वकारणकलापादुत्पत्तेरनेकविषयबुद्धिसहितेभ्यो निष्पत्तिरित्यादि निरर्थकमिति भावः। २१ द्वित्वादेरनेकत्वपर्यायत्वप्रकारेण। २२ त्रिचतुःपञ्चषडादिवस्तुषु। २३ द्वित्वादेरनेकपर्यायत्वात्।

भागो न स्यादऽनेकत्वस्याविशिष्टत्वात्; तन्न; अपेक्षाबुद्धिविशेषवत्तत्सिद्धेरप्रतिबन्धात्। यथैव ह्यनेकविषयत्वाविशेषेपि काचिदपेक्षाबुद्धिः द्वित्वस्योत्पादिका काचित्त्रित्वस्य। न ह्यपेक्षाबुद्धेः पूर्वं द्वित्वादिगुणोस्ति; अनवस्थाप्रसङ्गात्, अपेक्षाबुद्धिजनितस्य वा द्वित्वादेरानर्थक्यानुषङ्गात्। तथा द्वित्वादिप्रत्ययविभागोपि भविष्यति। यत एव चाभिन्नभिन्नत्वलक्षणाद्विशेषादपेक्षाबुद्धिविशेषस्तत एवैकत्वादिव्यवहारभेदोपि भविष्यति इत्यलमन्तर्गड्डुनैकत्वादिगुणेन।

एवं च गुणेष्वप्येकत्वादिव्यवहारोऽकष्टकल्पनः स्यात्। गणितव्यवहारश्च 'षट्पञ्चविंशतिभिः सार्धं शतम्' इत्यादिः सुगमः। तस्मादभिन्नं तावदेकमित्युच्यते, तदपरेणाभिन्नेन सह द्वे इति, ते त्वपरेणाभिन्नेन सह त्रीणीत्येवमादिः समयो लोके प्रसिद्धो गणितप्रसिद्धश्चैकत्वादिव्यवहारहेतुर्द्रष्टव्य इति।

अथ द्वित्वबहुत्वसंख्याया द्व्यणुकादिपरिमाणं प्रत्यसमवायिकारणत्वोपपत्तेः सद्भावसिद्धिः; तन्न; अस्यास्तदसमवायिकारणत्वे प्रमाणाभावात्। परिशेषोस्तीति चेत्; न; कारणपरिमाणस्यैवासमवायिकारणत्वसम्भवाद्रूपादिवत्।

ननु परमाणुपरिमाणजन्यत्वे द्व्यणुकेपि परमाणुत्वप्रसङ्गः स्यात्; तन्न; कार्यकारणयोस्तुल्यपरिमाणत्वे दृष्टान्ताभावात्। सर्वत्र हि कारणपरिमाणादधिकमेव कार्यपरिमाणं दृश्यते। परिमाणवच्च कर्मण्यप्यसमवायिकारणत्वमस्याः स्यात्। दृश्यते हि द्वाभ्यां बहुभिर्वा पाषाणाद्युत्थापनम्। न चात्र संख्यायाः कारणत्वं भवद्भिरिष्टम्। अथास्यास्तत्रापि निमित्तत्वमिष्यते; को वै निमित्तत्वे विप्रतिपद्यते? सामान्यादीनामपि तदभ्युपगमात्। असमवायिकारणत्वं तु तस्याः परिमाणवदुत्थापनादिकर्मण्यभ्युपगन्तव्यम्, न चान्यत्रापीत्यलमतिप्रसङ्गेन।

१ उत्तरमिदम्–द्वित्वादिसंख्यां प्रति कारणत्वेनाभिमतायाः अपेक्षाबुद्धेरनेकत्वाविशेषेपि भेदो यथा तथा द्वित्वादिप्रत्ययविभागोपीति। २ अपेक्षाबुद्धेः पूर्वमेव द्वित्वादिगुणोस्तीत्युक्ते सत्याह। ३ द्वित्वादिगुणस्यापि द्वित्वादिकमपरस्माद्द्वित्वादिगुणात्तस्याप्यपरस्मादिति। ४ भिन्नाभिन्नत्वलक्षणाद्विशेषादेकत्वादिभवनप्रकारेण। ५ संख्येयात्। ६ एकेन। ७ अपरसंख्येयात्। ८ सङ्केतः। ९ द्व्यणुकादिपरिमाणमसमवायिकारणकं सद्रूपकार्यत्वाद्घटवदित्यनुमानम्। १० कारणरूपादेर्यथा कार्यरूपादिकं प्रत्यसमवायिकारणत्वम्। ११ द्व्यणुकादिपरिमाणस्य। १२ परमाणुपरिमाणस्वरूपवत्। १३ पाषाणाद्युत्थापनलक्षणे। १४ नराभ्याम्। १५ परैः। १६ विवादं करोति। १७ पुरुषत्वादीनाम्। १८ अभ्युपगन्तव्यं नेति सम्बन्धः। १९ परिमाणे। २० संख्यायाः परिमाणं प्रत्यसमवायिकारणत्वनिराकरणेन।

यदप्युक्तम्-महदादिपरिमाणं रूपादिभ्योर्थान्तरं तत्प्रत्ययविलक्षणबुद्धिग्राह्यत्वात्सुखादिवत्; तदप्ययुक्तम्; हेतोरसिद्धेः, घटाद्यर्थव्यतिरेकेण महदादिपरिमाणस्याध्यक्षप्रत्ययग्राह्यत्वेनासंवेदनात्।

५ असत्यपि महदादौ[1] प्रासादमालादिषु[2] महदादिप्रत्ययप्रादुर्भावप्रतीतेरनैकान्तिकश्चायम्। न च यत्रैव प्रासादादौ समवेतो मालाख्यो गुणस्तत्रैव महत्त्वादिकमपि इत्येकार्थसमवायवशात् 'महती प्रासादमाला' इतिप्रत्ययोत्पत्तेर्नानैकान्तिकत्वम्; स्वसमयविरोधात्। न खलु प्रासादो भवद्भिरवयविद्रव्यमभ्युपगम्यते

१० विजातीयानां द्रव्यानारम्भकत्वात्। किं तर्हि? संयोगात्मको गुणः। न च गुणः परिमाणवान्, "निर्गुणा गुणाः" [ ] इत्यभिधानात्। ततो मालाख्यस्य गुणस्य प्रासादादिष्वभावात् 'प्रासादमाला' इत्ययमेव प्रत्ययस्तावदयुक्तः, दूरत एव सा 'महती ह्रस्वा वा' इति प्रत्ययः, मालायाः संख्यात्वेन प्रासादानां

१५ संयोगत्वेन महदादेश्च परिमाणत्वेन परैरभ्युपगमात्।

अथ माला द्रव्यस्वभावेष्यते; तथापि द्रव्यस्य द्रव्याश्रयत्वान्नास्याः संयोगस्वरूपप्रासादाश्रयत्वं युक्तम्। अथासौ जातिस्वभावेष्यते; तर्हि प्रत्याश्रयं जातेः समवेतत्वादेकस्मिन्नपि प्रासादे 'माला' इति प्रत्ययोत्पत्तिः स्यात्। 'एका प्रासादमाला महती

२० दीर्घा ह्रस्वा वा' इत्यादिप्रत्ययानुपपत्तिश्च तदवस्थैव; मालायां तदाश्रये च प्रासादादावेकत्वादेर्गुणस्याऽसम्भवात्। बह्वीषु च प्रासादमालासु 'माला माला' इत्यनुगतप्रत्ययोत्पत्तिर्न स्यात्, जातावऽपरापरजातेरनुपपत्तेः। न चौपचारिकोयं प्रत्ययोऽस्खलद्वृत्तित्वात्। न हि मुख्यप्रत्ययाविशिष्टस्यौपचारिकत्वं युक्तमति-

२५ प्रसङ्गात्। अत एव मालादिषु महत्त्वादिप्रत्ययोपि नौपचारिकः। ततो यथा स्वकारणकलापात्प्रासादादयो महदादिरूपतयोत्पन्ना-

---

१ गुणरूपे। २ आदिना पर्वतमालादिषु। ३ अन्यथा। ४ गुणे गुणसद्भावाभ्युपगमात्। ५ वैशेषिकैः। ६ काष्ठादीनाम्. ७ प्रासादलक्षणावयविद्रव्यम्। तस्य। ८ तन्त्वादिना सजातीया ये तन्त्वादयस्त एव पटाद्यवयविद्रव्यारम्भका इति भावः। ९ बहुत्वलक्षणेन। १० काष्ठादिभिः। ११ वैशेषिकैः। १२ बसः। १३ एकस्मिन्नपि प्रासादे मालायाः सद्भावात्। १४ महत्त्वगुणयुक्ता। १५ द्वित्वबहुत्वादेः। १६ जातिरूपासु। १७ निस्सामान्यानि सामान्यानीति वचनात्। १८ मुख्यश्चासौ प्रत्ययश्च खण्डमुण्डादिषु गौगौरित्यादिरूपस्तेनाविशिष्टोऽनुगतत्वेन समानस्तस्य। १९ मुख्यस्याप्यौपचारिकत्वप्रसङ्गात्।

स्तत्प्रत्ययगोचरास्तथा घटादयोपीत्यलमर्थान्तरभूतपरिमाणपरिकल्पनया।

यदप्युक्तम्-'बदरामलकादिषु भाक्तोऽणुव्यवहारः' इत्यादि; तदप्युक्तिमात्रम्; मुख्यगौणप्रविभागस्यात्र[1]प्रमाणत्वात्। न खलु यथा सिंहमाणवकादिषु मुख्यगौणविवेकप्रतिपत्तिः सर्वेषामविगाने[2]नास्ति तथा 'द्व्यणुके एवाणुत्वह्रस्वत्वे मुख्येऽन्यत्र भाक्त' इति कस्यचित्प्रतिपत्तिः। प्रक्रियामात्रस्य[3] च सर्वशास्त्रेषु सुलभत्वान्नातो विवादनिवृत्तिः।

आपेक्षिकत्वा[4]च्च परिमाणस्यागुणत्वम्। न हि रूपादेः सुखादेर्वा गुणस्यापेक्षिकी[5] सिद्धिः। योपि नीलनीलतरादेः सुखसुखतरादेर्वाऽऽपेक्षिको व्यवहारः सोऽपि तत्प्रकर्षापकर्षनिबन्धनो न पुनर्गुणस्वरूपनिबन्धनः। ततो[6] ह्रस्वदीर्घत्वा[7]देः संस्थानविशेषाद्व्यतिरेका[8]भावात्कथं गुणरूपता? तद्विशेषस्यापि कथञ्चिद्भेदाभिधाने त्र्यस्रचतुरस्रादेरपि भेदेनाभिधानानुषङ्गात्कथं तच्चतुर्विधत्वोपवर्णनं संशोभेतेति?

यच्चोक्तम्-पृथक्त्वं घटादिभ्योर्थान्तरं तत्प्रत्ययविलक्षणज्ञान[10]ग्राह्यत्वात्सुखादिवत्; तदप्युक्तिमात्रम्; हेतोरसिद्धत्वात्। न खलु स्वहेतोरुत्पन्नाऽन्योन्यव्यावृत्ता[11]र्थव्यतिरेकेणार्थान्तरभूतस्य पृथक्त्वस्याध्यक्षे प्रतिभासोस्ति, अत[12] एवोपलब्धिलक्षणप्राप्तस्यास्यानुपलम्भादसत्त्वम्[13]।

रूपादिगुणेषु च 'पृथक्' इतिप्रत्ययप्रतीतेरनेकान्तः। न हि तत्र पृथक्त्वमस्ति गुणेषु गुणासम्भवात्। न च गुणेषु 'पृथक्' इति प्रत्ययो भाक्तः; मुख्यप्रत्ययाविशिष्टत्वात्। न च स्वरूपेणा(ण) व्यावृत्तानामर्थानां[14] पृथक्त्वादि[15]वशात्पृथग्रूपता घटते; भिन्नाभिन्नपृथग्रूपताकरणेऽकिञ्चित्करत्वात्। भेदप[16]क्षे हि सम्बन्धासिद्धिः। अभेदपक्षे तु पृथग्रूपस्यार्थस्यैवोत्पत्तेरर्थान्तरभूतपृथक्त्वगुणकल्पनावैयर्थ्यम्। प्रयोगः-ये परस्परव्यावृ-

१ परिमाणे। २ अविप्रतिपत्त्या। ३ द्व्यणुके एवाणुत्वह्रस्वत्वे मुख्येऽन्यत्रान्यथेति प्रक्रियातो मुख्यगौणविवेकप्रतिपत्तिर्भविष्यतीत्युक्ते सत्याह। ४ अपेक्षाजनितत्वात्। ५ आशङ्कनीया। ६ आपेक्षिकत्वात्परिमाणस्य गुणत्वं नास्ति यतः। ७ परिमाणस्य। ८ व्यतिरेको भेदः। ९ तस्य=परिमाणस्य। १० पृथक्त्वमिति। ११ घटात्पटो व्यावृत्त इति। १२ तद्व्यतिरेकेणार्थान्तरभूतस्य पृथक्त्वस्याध्यक्षे प्रतिभासो नास्ति यतः। १३ गगनकमलवत्। १४ घटपटादीनाम्। १५ आदिशब्देन विभागपरिग्रहः। १६ कथम्? तथा हि।

त्तात्मानस्ते स्वव्यतिरिक्तपृथक्त्वानाधाराः यथा रूपादयः, परस्परव्यावृत्तात्मानश्च घटादयोर्था इति।

ततो विभिन्नस्वभावतयोत्पन्नार्थस्यैव 'पृथक्' इतिप्रत्ययविषयत्वप्रसिद्धेरलं पृथक्त्वगुणकल्पनया। पृथक्प्रत्ययस्याप्यसाधारण-
५ धर्मादेवोपपत्तेः, यदा ह्येकं वस्त्वितरेभ्यो भिन्नं पश्यति प्रतिपत्ता तदा 'एकं पृथक्' इति प्रतिपद्यते। यदा तु द्वे वस्तुनीतरेभ्यो विलक्षणैकधर्मयोगाद्विभिन्ने पश्यति तदा 'द्वे पृथक्' इति मन्यते। यदा त्वेकदेशत्वादिना धर्मेणेतरेभ्यो बहूनि भिन्नानि पश्यति तदा 'एतान्येतेभ्यः पृथक्' इति प्रतिपद्यते, यथा रूपादयो द्रव्या-
१० त्पृथगिति।

संयोगस्तु समवायनिराकरणप्रघट्टके प्रतिषेत्स्यते। तदभावात् 'प्राप्तिपूर्विका अप्राप्तिर्विभागः' इत्यपि निरस्तम्। न हि प्राग्भाविसान्तररूपतापरित्यागेन निरन्तररूपतयोत्पन्नवस्तुव्यतिरेकेणान्यः संयोगः संयुक्तप्रत्ययविषयोनुभूयते। अविच्छिन्नोत्पत्ति-
१५ कमेव हि वस्तु निरन्तरप्रत्ययविषयः निरन्तरोपरचितदेवदत्तयज्ञदत्तगृहवत्। न खलु गृहयोः परेणापि संयोगगुणाश्रयत्वमिष्टम्, निर्गुणत्वाद्गुणानाम्, तयोश्च संयोगात्मकत्वेन गुणत्वात्। नापि विच्छिन्नोत्पन्नवस्तुव्यतिरेकेणान्यो विभागो विभक्तप्रत्ययविषयो हिमवद्विन्ध्यवत्। न हि तयोर्विभागाश्रयत्वं प्राप्तिपूर्वि-
२० काया अप्राप्तेर्विभागलक्षणायास्तयोरभावात्।

प्रयोगः–या संयुक्ताकारा बुद्धिः सा भवत्परिकल्पितसंयोगानास्पदवस्तुविशेषमात्रप्रभवा यथा 'संयुक्तौ प्रासादौ' इति बुद्धिः, संयुक्ताकारा च 'चैत्रः कुण्डली' इत्यादिबुद्धिरिति। यद्वा, याऽनेकवस्तुसन्निपाते सति समुत्पद्यते सा भवत्परिक-
२५ ल्पितसंयोगविकलानेकवस्तुविशेषमात्रभाविनी यथाऽविरलाऽवस्थिताऽनेकतन्तुविषया बुद्धिः, तथा च विमत्यधिकरणभावापन्ना संयुक्तबुद्धिरिति।

तथा मेषादिषु विभक्तबुद्धिर्विभागरहितपदार्थमात्रनिबन्धना

---

१ स्वव्यतिरिक्तपृथक्त्वानाधारा घटादयो यतः। २ वस्तुव्यतिरिक्तपृथक्त्वासम्भवात्कथं पृथक्त्वप्रत्ययोत्पत्तिरित्युक्ते सत्याह। ३ असाधारणः=तन्मात्रवृत्तिः। ४ आदिना कालत्वस्वरूपत्वग्रहः। ५ भिन्नरूपतेत्यर्थः। ६ अभिन्नरूपतयेत्यर्थः। ७ अपृथक्। ८ न केवलमस्माभिः। ९ गृहस्य गुणत्वमसिद्धमित्याह। १० इन्द्रियाणामनेकवस्तुभिः सह सन्निपाते सन्निकर्षः समुत्पद्यते इत्यर्थः। ११ अयमस्मान्मेषाद्भिन्नो मेष इत्यादिप्रकारेण।

विभक्तत्वादनेकपदार्थसन्निधाना[1]यत्तोदयत्वाद्वा देवदत्तयज्ञदत्त-गृहविभागबुद्धिवद् हिमवद्विन्ध्यविभागबुद्धिवद्वा।

सत्यपि वा संयोगे विभागस्य तदभावलक्षणत्वान्न गुणरूपता। कथमन्यथा पुत्रादौ चिरनिवृत्तेपि संयोगे विभक्तप्रत्ययः स्यात्? न खलु तत्र विभागः संभवति, अ[2]स्य कियत्कालस्थायिगुणत्वेना-भ्युपगमात्। कथं वा हिमवद्विन्ध्यादौ संयोगेऽनुत्पन्नेपि विभक्त-प्रत्ययः स्यात् संयोगाभा[3]वात्? व्यतिरि[4]क्तविभागस्वरूपस्य क्वचिद्-प्यनुपलम्भान्नोपचारकल्पनापि सा[5]ध्वी।

विभागाभावे कुतः संयोगनिवृत्तिरिति चेत्? 'क[6]र्मण एव'[7] इति भ्र[8]मः। 'कर्ममात्रादपि तन्नि[9]वृत्तिः स्यात्' इत्यप्यदो[10]षः; संयोगमात्रनिवृत्तेरिष्टत्वात्। संयोगविशेषनिवृत्तिस्तु क[11]र्मविशे-षात्, त्वन्म[12]ते ततो विभागविशेषोत्पत्तिवत्। कर्मणः संयो-गोत्पादकत्वात्कथं तन्निवर्तकत्वमिति चेत्? तर्हि हस्तबाणादि-संयोगस्य क[13]र्मोत्पादकत्वोपलम्भात् कथं वृक्षादौ बाणादिसंयो-गस्य तन्नि[14]वर्तकत्वं स्यात्? अन्यस्य तन्निवर्तकत्वमन्यत्रापि समानम्। न खलु येनैव कर्मणा यः संयोगो जनितः स तेनैव निवर्त्यते इति।

ए[15]तेन विभागजविभागोपि चिन्तितः। तस्यापि संयोगाभावरू-पस्य क्रियात एवोत्पत्तिप्रसिद्धेः। ननु यदि विभागजविभागो न स्यात्तर्हि हस्तकुड्यसंयोगविनाशेपि शरीरकुड्यसंयोगविनाशो न प्राप्नोति; तन्न; हस्तकुड्यसंयोगव्यतिरेकेण शरीरकुड्यसंयोगस्यै-वासंभवात्। हस्तकुड्यसंयोगादेवासौ कल्प्यते इति चेत्; तर्हि हस्तकर्मदर्शनाच्छरीरेपि कर्म कस्मान्न कल्प्यते तुल्याक्षेपसमा-धानत्वात्?

---

१ अनेकपदार्थैः सह सन्निकर्ष इन्द्रियाणाम्, तस्यायत्त उदयो यस्या इति वाक्यम्। २ विभागस्य। ३ यतो यत्र संयोगपूर्वको विभक्तप्रत्ययस्तत्रैव विभागव्यवहारो युज्यते, न चानयोः प्राक् संयोगः पश्चाद्विभाग इति। ४ व्यति-रिक्तस्य=वस्तुनः सकाशाद्भिन्नरूपस्य। ५ क्वचिन्मुख्यत्वेनाप्रसिद्धस्योपचाराभावात्, सति संभवेन्यत्र निमित्तप्रयोजनवशादुपचारः प्रकल्प्यते यतः। ६ क्रियातः। ७ जैनाः। ८ कस्माच्चिदेव कर्मण इत्यर्थः। ९ तस्य=संयोगस्य। १० जैना-नाम्। ११ यथा द्रव्यारम्भक (परमाणु) संयोगविशेषनिवृत्तिर्भिद्यमानवंशाद्यवयवि-द्रव्यस्यावयवक्रियात इति संबन्धः। १२ तव=वैशेषिकस्य। १३ अत्र देशाद्देशान्तर-प्राप्तिलक्षणमेव कर्म गृह्यते। १४ वृक्षादौ संयुज्य बाणादिः पुनर्न ततोग्रदेशं यातीत्यर्थः। १५ संयोगनिवृत्तेः कर्मजत्वप्रतिपादनेन।

यच्चोच्यते तत्प्रसिद्धयेऽनुमानम्—विवक्षिता[1]वयवक्रियाऽऽकाशादिदेशेभ्यो विभागं न करोति[2], द्रव्या[3]रम्भक[4]संयोगविरोधिविभागोत्पादकत्वात्, या पुनराकाशादिदेशविभागकर्त्री सा संयोगविशेषनिवर्त्तकविभागजनिकापि न भवति यथाङ्गुलि५क्रि[5]येति । य[6]दि भिद्यमानवंशाद्यवयविद्रव्यस्यावयवक्रिया आकाशादिदेशेभ्यो विभागं कुर्यात् तर्हि वंशादिद्रव्यारम्भकसंयोगविरोधिविभागोत्पादकमेवास्या न स्यादङ्गुल्याद्यवयविद्रव्यक्रियावत् । ततोऽवयविद्रव्यस्याकाशादिदेशविभागोत्पादकोऽवि[7]भागोऽभ्युपगन्तव्यः; इत्यप्यसाम्प्रतम्; वश्यं विभागोत्पा१०दकत्वस्यासिद्धत्वात् । क्रि[8]यात एव संयोगनिवृत्तेरुक्तत्वात् । अथ 'अवयविनस्तत्क्रियाऽऽकाशादिदेशसंयोगं न निवर्त्तयति द्रव्यारम्भकसंयोगनिवर्त्तकत्वात्' इतीदमत्र विवक्षितम्; तथा[10]प्यसाधारणो हेतुः सपक्षेप्याकाशादिदेशसंयोगानिवर्त्तके रूपादौ वृत्तेरभावात् । न चावयवसंयोगादवयविनः संयोगोन्यः; तद्भेदै[11]१५कान्तस्य प्रागेव प्रतिक्षेपात्, विनाशोत्पादप्रक्रियायाश्च कृतो[12]त्तरत्वात् । त[13]न्न विभागो घटते ।

नापि परत्वापरत्वे; परापरप्रत्ययाभिधानयोस्तदन्तरेणापि रूपादौ सम्भवात् । तथाहि—क्रमोत्पन्ननीलादिगुणेषु 'परं नीलमपरं च' इति प्रत्ययोत्पत्तिः असत्यपि परत्वापरत्वलक्षणे गुणे दृष्टा २०गुणानां निर्गु[14]णतयोपगमात्, तथा घटादिष्वपि स्यात् । अथात्र दिक्कालकृतः परापरप्रत्य[15]यः; ननु घटादिष्वप्यसौ तत्कृतोस्तु विशेषाभावात् । तथा च प्रयोगः-योयं परापरादिप्रत्ययः स परपरिकल्पितगु[16]णरहि[17]तार्थमात्रकृतक्रमोत्पादव्यवस्थानिबन्धनः, परापरप्रत्ययत्वात्, रूपा[17]दिषु परापरप्रत्ययवत् । 'विप्रकृष्टं परं संनि२५कृष्टमपरम्' इति चा[18]नयोरेकार्थत्वान्न भेदं पश्यामः । ततश्चायुक्त-

१ भिद्यमानवंशाद्यवयविद्रव्यस्य । २ भिद्यमानवंशाद्यवयविन इति शेषः । ३ द्रव्यं वंशादि । ४ परमाणु । ५ प्रसारणसङ्कोचनरूपा । ६ द्रव्यारम्भकसंयोगविरोधिविभागोत्पादकत्वं च स्यादाकाशादिदेशेभ्यो विभागं च कुर्यादिति सन्दिग्धानैकान्तिकत्वे सत्याह । ७ विभागाद्विभागो जात इत्यर्थः । ८ जैनादिना । ९ तर्हि विभागाभावे संयोगनिवृत्तिः कथमिति शङ्कायामाह । १० अनैकान्तिकः । ११ तयोः अवयवावयविनोः । १२ अवयवेषु क्रिया क्रियातः संयोगः संयोगादवयविन उत्पत्तिरिति प्रक्रियातस्तयोर्भेद इत्युक्ते सत्याह । १३ द्रव्यारम्भकसंयोगविरोधिविभागोत्पादकत्वसाधनमसिद्धं यतः । १४ न तु स्वाभाविकः । १५ गुणौ परत्वापरत्वलक्षणौ । १६ अर्थो दिक्काललक्षणः । १७ गुणरूपेषु । १८ परविप्रकृष्टयोरपरसन्निकृष्टयोश्च ।

मुक्तम्–'विप्रकृष्टसन्निकृष्टबुद्धिभ्यां परत्वापरत्वयोरुत्पत्तिः' इति। न हि घटबुद्धिमपेक्ष्य कुम्भ उत्पद्यते इति युक्तम्। नापि पर्यायशब्दभेदादर्थो भिद्यते इति।

किञ्च, सामान्येषु महापरिमाणाल्पपरिमाणगुणेषु च महदल्पाधारत्वबुद्ध्यपेक्षयोः परत्वापरत्वयोरुत्पत्तिः कल्प्यतामविशेषात्। ५

किञ्च, परत्वापरत्वयोर्गुणत्वमभ्युपगच्छता मध्यत्वं च गुणोऽभ्युपगन्तव्यः, कालदिक्कृतमध्यव्यवहारस्याप्यत्र समानत्वात्।

सुखदुःखेच्छादीनां चाबुद्धिरूपत्वे रूपादिवन्नात्मगुणता युक्ता, बुद्धिरूपत्वे चातो भेदेनाभिधानमयुक्तम्। कंचिद्विशेषमादाय बुद्ध्यात्म[illegible]नामप्यतो भेदेनाभिधाने अभिधाना(धादी)दीनामपि १० भेदेनाभिधानं कार्यम्। इत्यलमतिप्रसङ्गेन।

गुरुत्वादीनां तु पुद्गलगुणत्वं युक्तमेव। 'अतीन्द्रियं गुरुत्वं पातोपलम्भेनानुमेयत्वात्' इत्येतन्न युक्तम्; करतलाद्युपरिस्थिते द्रव्यविशेषे पातानुपलम्भेपि गुरुत्वस्य प्रतिभासनात्। रजःप्रभृतीनामपि गुरुत्वं कस्मान्न गृह्यते इति चेत्? ग्रहणायोग्यत्वात्। १५ तावतैवातीन्द्रियत्वे गन्धरसादीनामप्यतीन्द्रियत्वं स्यात्। क्वचिद्दूरे तदाश्रयस्याम्रफलादेः प्रत्यक्षत्वेपि तेषां ग्रहणाभावादिति।

पृथिव्यनलयोरप्यस्ति द्रवत्वम्; इत्यनुपपन्नम्; सुवर्णादीनाम् "अग्नेरपत्यं प्रथमं सुवर्णम्" [ ] इत्यागमतः प्रसिद्धतैजसत्वानां जतुप्रभृतिपार्थिवद्रव्याणां चाप्यस्यैव द्रवत्वस्य संयु- २० क्तसमवायवशात्प्रतीतिसम्भवात्।

अथ 'सर्वं पार्थिवं तैजसं च द्रव्यं द्रवत्वसंयुक्तं रूपित्वात्तोयवत्' इत्यनुमानात्तस्य द्रवत्वसिद्धिः; तन्न; प्रत्यक्षेण स्प(स्य)न्दनकर्मानुपलम्भेन च बाधितविषयत्वात्। अथेत्थंधर्मकं तत्र द्रवत्वं जातं यत्प्रत्यक्षं न भवति स्प(स्य)न्दनक्रियां च न २५ करोतीत्युच्यते; तर्हि गुरुत्वरसावप्येवंधर्मकौ रूपित्वादेव किन्न तेजसोऽभ्युपगम्येते तुल्याक्षेपसमाधानत्वात्? तथा चाऽस्योर्ध्वगतिस्वभावता न स्यात्, 'रसः पृथिव्युदकवृत्तिः' इत्यस्य च विरोध इति।

---

१ परापररूपेषु इत्यर्थः। २ उभयत्र अपेक्षाबुद्धेः। ३ आदिना मस्तकस्कन्धादिग्रहणम्। ४ आदिपदेन हरितालरीतिकाग्रहणम्। ५ [illegible]ीयस्य। ६ प्रत्यक्षौ न भवतः पतनादिक्रियां च न कुरुत इति। ७ प्रत्यक्षेण पतनादिकर्मानुपलम्भेन च बाधितविषयत्वात् तेजसो गुरुत्वं रसत्वमित्याक्षेपः, अथेत्थंधर्मकं तेजसि गुरुत्वं रसत्वं च जातं यत्प्रत्यक्षं न भवति तत्पतनादिक्रियां च न करोतीति समाधानम्। ८ तेजोद्रव्यस्य गुरुत्वरसत्वोपगमे च। ९ तेजस्यपि रसस्य भावात्।

'स्नेहोऽम्भस्येव' इत्यप्ययुक्तम्; घृतादेरपि लोके वैद्यकादिशास्त्रे च स्निग्धत्वेन प्रसिद्धत्वात्। घृतादावन्य[1]निमित्तत्वेनौपचारिकः स्निग्धप्रत्ययः; इत्यप्यसाम्प्रतम्; विपर्ययस्यापि कल्पयितुं शक्यत्वात्। तथा हि—तोयसम्पर्केऽप्योदनादौ च स्निग्धप्रत्ययो नास्ति घृतादिसम्पर्के तु स्निग्धप्रत्ययः सर्वेषामस्त्येवेति। कणिकादौ तोयस्य बन्धहेतुत्वोपलम्भात्तस्यैव स्नेहो विशेषगुणः; इत्यप्यसारम्; भवता स्नेहरहितत्वेनाभ्युपगतस्यापि क्षीरजतुप्रभृतेर्बन्धहेतुत्वेन प्रतीतेः।

स्नेहस्य गुणत्वाभ्युपगमे च काठिन्यमार्दवादेरपि गुणत्वाभ्युपगमः कर्त्तव्यः, तथा च तत्संख्याव्याघातः स्यात्। ननु काठिन्यादेः संयोगविशेषरूपत्वात्कथं गुणसंख्याव्याघातहेतुत्वम्? तथा चोक्तम्-"अवयवानां प्रशिथिलसंयोगो मृदुत्वम्" [ ] इत्यादि; तदप्यसङ्गतम्; चक्षुषा संयोगेषु प्रतीयमानेष्वपि मार्दवादेरप्रतिभासनात्। यो हि यद्विशेषः स तस्मिन्प्रतीयमाने प्रतीयत एव यथा रूपे प्रतीयमाने तद्विशेषो नीलादिः, न प्रतीयते च संयोगेषु प्रतीयमानेष्वपि काठिन्यादिः, तस्मान्नासौ तद्विशेष इति। कटाद्यवयवानां प्रशिथिलसंयोगेपि मृदुत्वाप्रतीतेश्च, विशिष्टचर्माद्यवयवानामप्यप्रशिथिलसंयोगित्वेपि मृदुत्वोपलब्धेश्चेति

ननु काठिन्यादेः संयोगविशेषरूपत्वाभावे कथं कठिनमेव कणिकादिद्रव्यं मर्दनादिना मृदुत्वमापाद्यते? इत्यप्यसुन्दरम्; न हि तदेव द्रव्यं मृदु भवति। किं तर्हि? पूर्वकठिनपर्यायनिवृत्तौ मृदुपर्यायोपेतं द्रव्यान्तरमुत्पद्यते। संयोगविशेषमृदुत्ववादिनापि पूर्वद्रव्यनिवृत्तिरत्राभ्युपगतैव। ततः स्पर्शविशेषो मृदुत्वादिरभ्युपगन्तव्यः 'कठिनः स्पर्शो मृदुः स्पर्शः' इति प्रतीतिदर्शनात्। [4]तथा च पाकजत्वमपि स्पर्शस्योपपन्नं घटादिषु रूपादिवत् विलक्षणस्पर्शोपलम्भात् नान्यथा। न च काठिन्यादिव्यतिरेकेण स्पर्शस्यान्य[5]द्वैलक्षण्यं व्यवस्थापयितुं शक्यमिति।

वेगाख्यस्तु संस्कारो न केवलं पृथिव्यादावेवास्ति आत्मन्यप्यस्य सम्भवात्, [6]तस्यापि सक्रियत्वेन प्रसाधितत्वात्। न च

१ अन्यत्=जलम्। २ मृदुत्वमपि संयोगगुणविशेषः। ३ मृदुत्वादेः स्पर्शविशेषत्वे च। ४ मृदुत्वादेः स्पर्शविशेषत्वाभावे स्पर्शस्य न पाकजत्वं विलक्षणस्पर्शाभावादिति भावः। ५ काठिन्यादेः स्पर्शविशेषत्वाभावेपि स्पर्शस्यान्यद्वैलक्षण्यं सम्भविष्यति ततश्च विलक्षणस्पर्शोपलम्भेन पाकजत्वमप्यविरुद्धं स्पर्शस्येत्याशङ्कायामाह। ६ आत्मनो निष्क्रियत्वात्कथं वेगाख्यस्य संस्कारस्य सम्भव इत्युक्ते सत्याह।

क्रियातोऽर्थान्तरं वेगः; अस्याः शीघ्रोत्पादमात्रे वेगव्यवहारप्रसिद्धेः। 'वेगेन गच्छति' इति प्रतीतेः क्रियातोर्थान्तरं वेगः; इत्यप्ययुक्तम्; 'वेगेन गच्छति, शीघ्रं गच्छति' इत्यनयोरेकत्वात्। न च कर्मणः कर्मारम्भकत्वेऽनुपरमप्रसङ्गः; शब्दवत्तदुपरमोपपत्तेः। यथैव हि शब्दस्य शब्दान्तरारम्भकत्वेप्युपरमस्तथात्रापि। ५ "कर्म कर्मसाध्यं न विद्यते" [वैशे० सू० १।१।११] इत्यपि वचनमात्रत्वादविरोधकम्।

न च विभिन्नः संस्कारो बाणादीनामपातहेतुः प्रतीयते, अन्यथा कदाचिदपि तेषां पातो न स्यात्, तत्प्रतिबन्धकस्य वेगस्य सर्वदावस्थानात्। न च मूर्त्तिमद्वाय्वादिसंयोगोपहतशक्तित्वाद्वे- १० गस्य तेषां पतनम्; प्रथममेव पातप्रसक्तेः, तत्संयोगस्य तद्विरोधिनस्तदापि सम्भवात्। न च प्राग्वेगस्य बलीयस्त्वाद्विरोधिनमपि मूर्त्तद्रव्यसंयोगमपास्य शरं देशान्तरं प्रापयति; इत्यभिधातव्यम्; पश्चादप्यस्य बलीयस्त्वात्तथैव तत्प्रापकत्वप्रसक्तेः। न खलु वेगस्य पश्चादन्यथात्वम्; तथोत्पत्तिकारणाभावात्, तत्स- १५ मवायिकारणत्वस्येष्वादेः सर्वदाऽविशिष्टत्वात्। न च कर्माख्यं कारणं पश्चाद्विशिष्यते; तस्यापि तुल्यपर्यनुयोगत्वात्। न च प्रभूताकाशप्रदेशसंयोगोत्पादनात् संस्कारप्रक्षयादिषोः पातः; संस्कारस्यैकस्वभावत्वेनावस्थितस्य प्रागिव पश्चादपि प्रक्षयानुपपत्तेः। न चाकाशस्य प्रदेशाः परैरिष्यन्ते, येन तत्संयोगानां २० भूयस्त्वं संस्कारप्रक्षयहेतुत्वं वा युक्तियुक्तं भवेत्। कल्पनाशिल्पिकल्पितानां संयोगभेदकत्वं तदायत्तभेदानां च संयोगानां संस्कारप्रक्षयहेतुत्वं दूरोत्सारितमेव।

भावनाख्यस्तु संस्कारो धारणापरनामा नानिष्टः पूर्वपूर्वानुभवाहितसामर्थ्यलक्षणस्यात्मनोऽनर्थान्तरभूतस्य स्मृत्यादिहेतुत्वे- २५ नास्यास्माभिरपीष्टत्वात्।

स्थितस्थापकरूपस्तु संस्कारोऽसम्भाव्य एव। स हि किं स्वयमस्थिरस्वभावं भावं स्थापयति, स्थिरस्वभावं वा? न तावदस्थिरस्वभावम्; तत्स्वभावानतिक्रमात्। तथाविधस्यापि स्थापनेऽ-

---

१ शीघ्रत्वं च क्रियास्वरूपं परमते स्वमते च। २ वेगस्य क्रियात्वे क्रियातः क्रियोत्पद्यत इति भावः। ३ यद्यपि समवायिकारणमविशिष्टं तथापि कर्माख्यं कारणं विशिष्यत इत्युक्तेः सत्याह। ४ न खलु कर्माख्यस्य पश्चादन्यथात्वं तथोत्पत्तिकारणाभावादित्यादिरूपेण। ५ नित्यत्वाद्गुणानाम्। ६ आकाशप्रदेशानाम्। ७ संयोगानां नानाकारत्वम्।

तिप्रसङ्गः[1]। क्षणादूर्ध्वं चार्थस्य स्वयमेवाभावात्कस्यासौ स्थापकः स्यात्? भावे वाऽस्थिरस्वभावताविरोधः। अथ द्वितीयः पक्षः; तदा स्थिरस्वभावेऽवस्थितानामर्थानां स्वयमेवावस्थानात्किमकिञ्चित्करस्थापकप्रकल्पनया? ततः स्वहेतुवशात्तथा तथा परिणतिरेवार्थानां स्थितस्थापकः संस्कारो नान्यः।

धर्माधर्मशब्दानां तु गुणत्वं प्रागेव प्रतिविहितमित्यलमतिप्रसङ्गेन। ततः "कर्तुः फलदाय्यात्मगुण आत्ममनःसंयोगजः स्वकार्यविरोधी[2] धर्माधर्मरूपतया[3] भेदवानदृष्टाख्यो गुणः" [ ] इत्ययुक्तमुक्तम्। इदं तु युक्तम् "कर्तुः प्रिय[4]हित[5]मोक्षहेतुर्धर्मः, अधर्मस्त्वप्रिय[6]प्रत्ययहेतुः" [प्रश० भा० पृ० २७२-२८०] इति। तन्न गुणपदार्थोपि श्रेयान्।

नापि कर्मपदार्थः। स हि पञ्चप्रकारः परैः प्रतिपाद्यते- "उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि" [वैशे० सू० १।१।७] इत्यभिधानात्। तत्रोत्क्षेपणं यदूर्ध्वाधःप्रदेशाभ्यां संयोगविभागकारणं कर्मोत्पद्यते, यथा शरीरावयवे तत्सम्बद्धे वा मूर्तिमद्द्रव्ये ऊर्ध्वदिग्भाविभिराकाशदेशाद्यैः संयोगकारणमधोदिग्भागावच्छिन्नैश्च[7] तैर्विभागकारणम्। तद्विपरीत[8]संयोगकारणं च कर्मावक्षेपणम्। ऋजुद्रव्यस्य कुटिलत्वकारणं च कर्माकुञ्चनम्, यथा ऋजुनोङ्गुल्यादिद्रव्यस्य येऽग्रावयवास्तेषामाकाशादिभिः स्वसंयोगिभिर्विभागे सति मूलप्रदेशैश्च संयोगे सति येन कर्मणाङ्गुल्यादिरवयवी कुटिलः संपद्यते तदाकुञ्चनम्। तद्विपर्ययेण संयोगविभागोत्पत्तौ येनावयवी ऋजुः सम्पद्यते तत्कर्म प्रसारणम्। अनियतदिग्देशैर्यत्संयोगविभागकारणं तद्गमनम्। उत्क्षेपणादिकं तु चतुःप्रकारमपि कर्म नियतदिग्देशसंयोगविभागकारणमिति।

तदेतत्पञ्चप्रकारेणोपवर्णनं कर्मपदार्थस्याविचारितरमणीयम्; देशाद्देशान्तरप्राप्तिहेतुः परिस्पन्दात्मको हि परिणामोऽर्थस्य कर्मोच्यते। उत्क्षेपणादीनां चात्रैवान्तर्भावः। अत्रान्तर्भूतानामपि कश्चिद्विशेषमादाय भेदेनाभिधाने भ्रमणस्प(स्य)न्दनादीनामप्यतो[11] भेदेनाभिधानानुषङ्गात्कथं पञ्चप्रकारतैवास्य?

---

१ विद्युदादीनामपि स्थापकः स्यादित्यतिप्रसङ्गः। २ स्वकार्ये क्रियमाणे सति विरोधोऽभावो यस्य सः। ३ मुसलादिर्यथा। ४ प्रियः सुखदः। ५ हितः परिणामपथ्यः। ६ दुःखकारणम्। ७ ऊर्ध्वाधःप्रदेशाभ्यां विपरीतौ। अधऊर्ध्वप्रदेशौ। ८ ऊर्ध्वाः। ९ ऊर्ध्वाधःप्रदेशयोः १० गमनस्य यथाऽनियतदिग्देशैः संयोगविभागकारणत्वं तथोत्क्षेपणादेरनियतदिग्देशाभ्यां संयोगविभागकारणत्वं ततश्च कथमुत्क्षेपणादीनां भेद इत्युक्ते सत्याह। ११ पञ्चप्रकारात्कर्मणः।

न चैकरूपस्यार्थस्य क्रियासमावेशो युक्तः; सर्वदाऽविशिष्टत्वात्। यत्सर्वदाऽविशिष्टं न तस्य क्रियासम्भवो यथाकाशस्य, अविशिष्टं चैकरूपं वस्त्विति। न चैकरूपत्वेप्यर्थानां गन्तृस्वभावता युक्ता; निश्चलत्वाभावप्रसङ्गात्, सर्वदा गन्तृत्वैकरूपत्वात्। अथाऽगन्तृत्वरूपताप्येषामङ्गीक्रियते; तथा सत्याकाशवदगन्तृतैव स्यात्। एवं च गत्यवस्थायामप्यचलत्वमेषां प्रसक्तं तदपरित्यक्ताऽगतिरूपत्वान्निश्चलावस्थावत्। न चोभयरूपत्वादेषामयमदोषः; गन्तृत्वागन्तृत्वविरुद्धधर्माध्यासेनैकत्वव्याघातानुषङ्गादचलाऽनिलवत्।

यथा चाक्षणिकैकरूपस्यार्थस्य क्रिया नोपपद्यते तथा क्षणिकैकरूपस्यापि; उत्पत्तिप्रदेश एवास्य प्रध्वंसेन प्रदेशान्तरप्राप्त्यसम्भवात्। यो ह्युत्पत्तिप्रदेश एव ध्वंसमुपगच्छति न सोन्यदेशमाक्रामति यथा प्रदीपः, उत्पत्तिप्रदेश(श)ध्वंसमुपगच्छति च क्षणिको भाव इति। न चार्थस्य क्षणिकत्वाद्देशाद्देशान्तरप्राप्तिर्भ्रान्ता; क्षणिकवादस्य प्रतिषिद्धत्वात्। ततः परिणामिन्येवार्थे यथोक्तं कर्मोपपद्यते।

न चेदमर्थादर्थान्तरम्; तथाभूतस्यास्योपलब्धिलक्षणप्राप्तस्यानुपलम्भेनासत्त्वात्। प्रयोगः—यदुपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते तन्नास्ति यथा क्वचित्प्रदेशे घटः, नोपलभ्यते च विशिष्टार्थस्वरूपव्यतिरेकेण कर्मेति। न चोपलब्धिलक्षणप्राप्तत्वमस्याऽसिद्धम्; "संख्या परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च रूपिसमवायाच्चाक्षुषाणि" [वैशे० सू० ४।१।११] इत्यभिधानात्। तन्न कर्मपदार्थोपि परेषां घटते।

नापि सामान्यपदार्थः; तस्य पराभ्युपगतस्वभावस्य प्रागेव प्रतिषिद्धत्वादिति।

विशेषपदार्थोप्यनुपपन्नः। विशेषा हि नित्यद्रव्यवृत्तयः परमा-

१ निरंशस्याऽविचलितस्य जीवादेः। २ सर्वदाऽविशिष्टश्च स्यात्क्रियासमवेतश्च स्यादिति सन्दिग्धानैकान्तिकत्वे सत्याह। ३ गन्तृत्वमेवागन्तृत्वमेवेत्येकान्तप्रसङ्गलक्षणः। ४ पर्वतवायुवत्। ५ लब्धावसरो हि सौगतो ब्रूते—अर्थस्याक्षणिकैकरूपत्वे क्रिया न घटते तर्हि क्षणिकैकरूपत्वे घटिष्यत इत्याशङ्कायामाह। ६ बौद्धमतापेक्षयोदाहरणम्। ७ सर्वथाऽक्षणिके क्षणिके वार्थेऽर्थक्रिया न घटते यतः। ८ कर्मरूपतया परिणतो विशिष्टः। ९ विशेषणमसिद्धमित्युक्ते सत्याह। १० सामान्यनिराकरणसमये। ११ नित्यद्रव्यवृत्तयोऽत्यन्तव्यावृत्तिहेतवो विशेषाः, विशेषा इति बहुवचनेनानन्त्यं विवक्षितम्। १२ सामान्यरहितनित्यद्रव्यवृत्तयोऽन्त्या विशेषाः।

ण्वाकाशकालदिगात्ममनस्सु वृत्तेरत्यन्तव्यावृत्ति[1]बुद्धिहेतवः । ते च जगद्विनाशारम्भकोटिभूतेषु परमाणुषु मुक्तात्मसु मुक्तमनस्सु चान्तेषु भवा 'अन्त्याः[2]' इत्युच्यन्ते, तेषु स्फुटतरमालक्ष्यमाणत्वात् । वृत्तिस्तेषां सर्वेस्मिन्नेव परमाण्वादौ नित्ये द्रव्ये विद्यते एव । अत एव 'नित्यद्रव्यवृत्तयोऽन्त्याः' इत्युभयपदोपादानम् ।

व्यावृत्तिबुद्धिविषयत्वं च विशेषाणां सद्भावसाधकं प्रमाणम् । यथा ह्यस्मदादीनां गवादिषु[3] आकृति[4]गुण[5]क्रिया[6]वयव[7]संयोग[8]निमित्तोऽश्वादिभ्यो व्यावृत्तः प्रत्ययो दृष्टः, तद्यथा-'गौः, शुक्लः, शीघ्रगतिः, पीनककुदः, महाघण्टः' इति यथाक्रमम् । तथास्मद्विशिष्टानां योगिनां नित्येषु तुल्याकृतिगुणक्रियेषु परमाणुषु मुक्तात्ममनस्सु चान्यनिमित्ताभावे प्रत्याधारं यद्बलात् 'विलक्षणोयं विलक्षणोयम्' इति प्रत्ययप्रवृत्तिस्ते योगिनां विशेषप्रत्ययोन्नीत[9]सत्त्वा अन्त्या विशेषाः सिद्धाः ।

इत्यपि स्वाभिप्रायप्रकाशनमात्रम्; तेषां लक्षणासम्भवतोऽसत्त्वात् । तथाहि-यदेतेषां नित्यद्रव्यवृत्तित्वादिकं लक्षणमभिहितं तदसम्भवदोषदुष्टत्वादलक्षणमेव; यतो न किञ्चित्सर्वथा नित्यं द्रव्यमस्ति, तस्य पूर्वमेव[10] निरस्तत्वात् । तदभावे च तद्वृत्तित्वं लक्षणमेषां दूरोत्सारितमेव ।

यच्चायो(च-यो)गिप्रभवविशेषप्रत्ययबलादेषां सत्त्वं साध्यते; तदप्ययुक्तम्; यतोऽण्वादीनां स्वस्वभावव्यवस्थितं स्वरूपं परस्परासङ्कीर्णरूपं वा भवेत्, सङ्कीर्णस्वभावं वा? प्रथमे विकल्पे स्वत एवासङ्कीर्णाण्वादिरूपोपलम्भाद्योगिनां तेषु वैलक्षण्यप्रतिपत्तिर्भविष्यतीति व्यर्थमपरविशेषपदार्थपरिकल्पनम् । द्वितीये विशेषाख्यपदार्थान्तरसन्निधानेपि परस्परातिमिश्रितेषु परमाण्वादिषु तद्बलाद्व्यावृत्तप्रत्ययो योगिनां प्रवर्त्तमानः कथमभ्रान्तः? स्वरूपतोऽव्यावृत्तरूपेष्वण्वादिषु व्यावृत्ताकारतया प्रवर्त्तमानस्यास्या[11]ऽतस्मिंस्त[12]द्ग्रहणरूपतया भ्रान्तत्वानतिक्रमात्? तथा चैतत्[13]प्रत्यययोगिनस्तेऽयोगिन एव स्युः ।

---

१ अस्मादयं सर्वथा व्यावृत्त इत्यादिरूपेण । २ अन्तेऽवसाने भवन्ति सन्तीति यावत्, येभ्योऽपरे विशेषा न सन्तीत्यर्थः, सामान्यरूपेभ्यो विशेषेभ्योऽपरे गुणादयो विशेषाः सन्ति, एभ्यस्तु नापरे किन्त्वेष्वेव वैशिष्ट्यं समाप्यते । ३ खण्डमुण्डादिरूपेषु विशेषेषु । ४ आकृतिः=जातिः । ५ गुणः=श्वेतादिः । ६ क्रिया गच्छत्यादिः । ७ अवयवः ककुदादिः । ८ घण्टादिभिः । ९ उन्नीतं=ज्ञातम् । १० द्रव्यपरीक्षाप्रघट्टके । ११ सङ्कीर्णस्वरूपे । १२ तस्यासङ्कीर्णस्य । १३ भ्रान्तप्रत्ययसम्बन्धिन इत्यर्थः ।

यदि च विशेषाख्यपदार्थान्तरव्यतिरेकेण विलक्षणप्रत्ययोत्पत्तिर्न स्यात्; कथं तर्हि विशेषेषु तस्योत्पत्तिस्तत्रापरविशेषाभावात्? भावे वा अनवस्था, 'नित्यद्रव्यवृत्तयः' इत्यभ्युपगमक्षतिश्च स्यात्[1] । अथ स्वत एवात्रान्योन्यवैलक्षण्यप्रतिपत्तिः; तर्हि परमाण्वादीनामप्यत एव तत्प्रत्ययप्रवृत्तिर्भविष्यतीति कृतं विशेषाख्यपदार्थपरिकल्पनया ।

अथ विशेषेष्वपरविशेषयोगाद्व्यावृत्तबुद्धिपरिकल्पनायामनवस्थादि[2]बाधकोपपत्तेरुपचारात्तेषु[3] त[4]द्बुद्धिः[5] । ननु कोयं तद्बुद्धेरुपचारो नाम? [6]असतो वस्तुस्वभा[7]वस्य विषयत्वेनाक्षेपश्चेत्; कथं नास्या मिथ्यात्वं तद्योगिनां चायोगित्वम्?

किञ्च, [8]असौ व[9]स्तुस्वभावो विषयत्वेनाक्षिप्यमाणः संशयत्वेनाक्षिप्यते, विपर्यस्तत्वेन वा? तत्राद्ये पक्षे व्यावृत्तरूपतया चलितप्रतिपत्तिविषयाणां विशेषाणां यथावत्प्रतिपत्त्यसम्भवात्तद्योगिनोऽयोगित्वमेव । द्वितीयेप्येतदेव दूषणम्, विशेषरूपविकलानपि तान् विशेषरूपतया प्रतिपद्यमानस्याऽयोगित्वप्रसङ्गाविशेषात् ।

यदि च [10]बाधकोपपत्तेर्विशेषेषु व्यावृत्तबुद्धिर्नापरविशेषनिबन्धना; तर्हि परमाण्वादिष्वसौ तन्निबन्धना नाभ्युपगन्तव्या तद्विशेषात् । परमाण्वादौ हि विशेषेभ्योऽन्योन्यं व्यावृत्तबुद्ध्युत्पत्तौ सकलविशेषे[11]भ्यः परमाणूनां व्यावृत्तबुद्धिर्विशेषान्तरात्स्यादित्यनवस्था[12] । स्वतस्तेषां ततो व्यावृत्तबुद्धिहेतुत्वेऽन्योन्यमपि तद्धेतुत्वं स्वत एव स्यादिति व्यर्थमर्थान्तरविशेषपरिकल्पनम् ।

ननु यथाऽमेध्यादीनां स्वत एवाशुचित्वमन्येषां तु भावानां तद्योगात्तत्तथेहापि तत्स्वभावत्वाद्विशेषेषु स्वत एव व्यावृत्तप्रत्ययहेतुत्वं परमाण्वादिषु तु तद्योगात् ।

किञ्च, अतदात्[13]मकेष्वप्यन्य[14]निमित्तः प्रत्ययो भवत्येव, यथा प्रदीपा[15]त्पटादिषु[16], न पुनः पटादिभ्यः प्रदीपे, एवं विशेषेभ्य[17] एवाण्वादौ विशिष्टः प्रत्ययो नाण्वादिभ्यस्तत्र; इत्यप्यसमीचीनम्;

---

१ विशेषेषु विशेषाणां प्रवृत्तेः । २ आदिना नित्यद्रव्यवृत्तय इत्यभ्युपगमक्षतिश्चेति । ३ विशेषेषु । ४ तस्य=व्यावृत्तस्य । ५ अपरविशेषा उपचारभूतास्तत्संयोगात्तेषु जातोपि प्रत्यय उपचाररूप इत्यर्थः । ६ असतो वैलक्षण्यस्य । ७ अन्योन्यव्यावृत्तरूपस्य । ८ वैलक्षण्यरूपः । ९ उपचाररूपः । १० अनवस्थादिरूपो बाधकः । ११ परमाण्वादिभ्यः सर्वथा भिन्नेभ्यः । १२ विशेषान्तराणामप्यन्येभ्य इत्यादिप्रकारेण । १३ अव्यावृत्तेषु अणुषु मुक्तमनस्सु च । १४ अन्यो=विशेषः । १५ अन्यनिमित्तात् । १६ इमे पटादय इति प्रत्ययः । १७ सर्वथाभिन्नेभ्यः ।

यतोऽमेध्याद्यशुचिद्रव्यसंसर्गान्मोदकादयो भावा प्रच्युतप्राक्तनशुचिस्वभावा अन्ये एवाऽशुचिरूपतयोत्पद्यन्ते इति युक्तमेषामन्यसंसर्गादशुचित्वम्। न चाण्वादिष्वेतत्सम्भवति, तेषां नित्यत्वादेव प्राक्तनाविविक्तरूपपरित्यागेनापरविविक्तरूपतयानुपप(नुत्प)त्तेः। प्रदीपदृष्टान्तोप्यत एवासङ्गतः; पटादीनां प्रदीपादिपदार्थान्तरोपाधिकस्य रूपान्तरस्योत्पत्तेः, प्रकृते च तदसम्भवात्।

अनुमानबाधितश्च विशेषसद्भावाभ्युपगमः; तथाहि-विवादाधिकरणेषु भावेषु विलक्षणप्रत्ययस्तद्व्यतिरिक्तविशेषनिबन्धनो न भवति, व्यावृत्तप्रत्ययत्वात्, विशेषेषु व्यावृत्तप्रत्ययवदिति। तन्न विशेषपदार्थोपि श्रेयान् साधकाभावाद्बाधकोपपत्तेश्च।

नापि समवायपदार्थोऽनवद्यतल्लक्षणाभावात्। ननु च "अयुतसिद्धानामाधार्याधारभूतानामिहेदम्प्रत्ययहेतुर्यः सम्बन्धः स समवायः।" [प्रश० भा० पृ० १४] इत्यनवद्यतल्लक्षणसद्भावात्तदभावोऽसिद्धः। न चान्तरालाभावेन 'इह ग्रामे वृक्षाः' इतीहेदम्प्रत्ययहेतुना व्यभिचारः; सम्बन्धग्रहणात्। न चासौ सम्बन्धोऽभावरूपत्वात्। नापि 'इहाकाशे शकुनिः' इति प्रत्ययहेतुना संयोगेन; 'आधाराधेयभूतानाम्' इत्युक्तेः। न ह्याकाशस्य व्यापित्वेनाधस्तादेव भावोस्ति शकुनेरुपर्यपि भावात्। नापि 'इह कुण्डे दधि' इतिप्रत्ययहेतुना; 'अयुतसिद्धानाम्' इत्यभिधानात्। न खलु तन्तुपटादिवद्दधिकुण्डादयोऽयुतसिद्धाः, तेषां युतसिद्धेः सद्भावात्। युतसिद्धिश्च पृथगाश्रयवृत्तित्वं पृथग्गतिमत्त्वं चोच्यते। न चासौ तन्तुपटादिष्वप्यस्ति; तन्तून्विहाय पटस्यान्यत्रावृत्तेः।

तथापि 'इहाकाशे वाच्ये वाचक आकाशशब्दः' इति वाच्यवाचकभावेन 'इहात्मनि ज्ञानम्' इति विषयविषयिभावेन वा व्यभिचारोऽत्रायुतसिद्धेराधाराधेयभावस्य च भावात्; इत्यप्यसाम्प्रतम्; उभयत्रावधारणाऽऽश्रयणात्। एतयोश्च युतसिद्धष्वप्यना-

१ परमते। २ विशेषेभ्यो व्यावृत्तस्वरूपत्वेनोऽन्तिमत्वम्। ३ परमाण्वादीनां नित्यत्वादेव। ४ प्रकाशलक्षणस्य। ५ ग्राहकप्रमाणाभावाच्च। ६ गुणगुण्यादीनाम्। ७ आकाशपरमाण्वादीनां युतसिद्धत्वव्यवस्थापनार्थमिदं लक्षणम्। ८ य इहेदम्प्रत्ययहेतुः स समवाय इत्युच्यमाने। ९ कारणभूतेन। १० कारणभूतेन। ११ अयुतः= अपृथक्। १२ बसः, मल्लयोर्यथा। १३ मेषयोर्यथा वा। १४ अयुतसिद्धानामाधार्याधारभूतानामित्युभयपदोपादानेपि। १५ सम्बन्धेन। १६ आकाशतद्वाचकशब्दयोरात्मज्ञानयोश्च। १७ आधार्याधारभूतानामयुतसिद्धानां समवाय एवेति न नियम इति भावः। १८ अयुतसिद्धानामाधार्याधारभूतानामित्यत्र। १९ अवधारणम्= एवकारः, अयुतसिद्धानामेवाधार्याधारभूतानामेव समवाय इति।

धाराधेयभूतेष्वपि च भावात्, घटतच्छब्दज्ञानवत्[1][2]। नन्वेवम्[3] 'अयुतसिद्धानामेव' इत्यवधारणेऽप्यव्यभिचारात् 'आधाराधेयभूतानाम्' इति वचनमनर्थकम्, 'आधाराधेयभूतानामेव' इत्यवधारणे 'अयुतसिद्धनाम्' इतिवचनवत्, ताभ्यामव्यभिचारात्; इत्यप्यसारम्; एकद्रव्यसमवायिनां रूपरसादीनामयुतसिद्धानामेव पर- ५
स्परं समवायाभावात् एकार्थसमवायसम्बन्धव्यभिचारनिवृत्त्यर्थमुत्तरावधारणम्। न ह्ययं वाच्यवाचकभावादिवद्युतसिद्धानामपि सम्भवति। तथोत्तरावधारणे सत्यपि आधाराधेयभावेन संयोगविशेषेण सर्वदाऽनाधाराधेयभूतानामसम्भवता व्यभिचारो मा भूदित्येतदर्थं पूर्वावधारणम्। १०

इति भेदकलक्षणस्याशेषदोषरहितत्वादिदमुच्यते-तन्तुपटादयः सामान्यतद्वदादयो वा 'संयुक्ता न भवन्ति' इति व्यवहर्तव्यम्, नियमेनायुतसिद्धत्वादाधाराधेयभूतत्वाच्च, ये तु संयुक्ता न ते तथा यथा कुण्डबदरादयः, तथा चैते, तस्मात्संयोगिनो न भवन्तीति। यद्वा तन्तुपटादिसम्बन्धः संयोगो न भवति, निय- १५
मेनायुतसिद्धसम्बन्धत्वात्, ज्ञानात्मनोर्विषयविषयिभाववदिति।

ननु समवायस्य प्रमाणतः प्रतीतौ संयोगाद्वैलक्षण्यसाधनं युक्तम्, न चासौ तस्यास्ति; इत्यप्यसत्; प्रत्यक्षत एवास्य प्रतीतेः। तथाहि-तन्तुसम्बद्ध एव पटः प्रतिभासते तद्रूपादयश्च पटादिसम्बद्धाः, सम्बन्धाभावे सह्यविन्ध्यवद्विश्लेषप्रतिभासः स्यात्। २०

अनुमानाच्चासौ प्रतीयते; तथाहि-'इह तन्तुषु पटः' इत्यादीहप्रत्ययः सम्बन्धकार्योऽबाध्यमानेहप्रत्ययत्वात् इह कुण्डे दधीत्यादिप्रत्ययवत्। न तावदयं प्रत्ययो निर्हेतुकः; कादाचित्कत्वात्।

---

१ शब्दश्च ज्ञानं च शब्दज्ञाने, तस्य घटस्य शब्दज्ञाने तच्छब्दज्ञाने, घटश्च तच्छब्दज्ञाने चेति द्वन्द्वः। २ भूम्याकाशौ घटतच्छब्दाधारौ तौ तत्र सिद्धौ, घटतज्ज्ञाने आत्मभूम्याधारे ते तत्र सिद्धे इति। ३ आधाराधेयभूतानामितिवचनसमर्थनार्थमिदम्। आधाराधेयभावस्य रूपरसादावभावात्। ४ रूपरसादय एकार्थाः। ५ आधार्याधारभूतानामेवेति। ६ प्रथमावधारणेनैव तद्व्यभिचारनिवृत्तिः कुतो न भवतीत्याशङ्क्याह। ७ अस्मिन्पर्वते वृक्षा इति। ८ अयुतसिद्धानामेवेति। ९ अनेन प्रकारेणाशेषदोषरहितत्वमयुतसिद्धेत्यादिभेदकलक्षणस्य, इतरेभ्यो द्रव्यादिभ्यः समवायस्य भेदकत्वाल्लक्षणं भेदकमयुतसिद्धेत्यादि। १० अग्रेतनं प्रसक्तप्रतिषेधार्थमनुमानम्। संयोगानां प्रतिषेधात्समवायस्य सिद्धिर्यतो भवति ततः परिशेषानुमानमित्यर्थः। ११ आदिपदेन गुणगुणिनः क्रियातद्वन्तश्च। १२ प्रत्यक्षतः। १३ पटतद्रूपादीनाम्। १४ इहात्मनि रूपादय इत्यादीहप्रत्ययेन बाध्यमानेन व्यभिचारपरिहारार्थमिदम्।

नापि तन्तुहेतुकः पटहेतुको वा; तत्र[1] 'तन्तवः, पटः' इति वा प्रत्ययप्रसङ्गात् । नापि[2] वासनाहेतुकः; तस्याः कारणरहितायाः सम्भवाभावात् । पूर्वज्ञानस्य तत्कारणत्वे तदपि कुतः स्यात्? तत्पूर्ववासनातश्चेत्; अनवस्था । ज्ञान[3]वासनयोरनादित्वाद्यमदोषश्चेत्;
५ न; एवं नीलादि[4]सन्तानान्तरस्वसन्तानसंविदद्वैतादिसिद्धेरप्यभावानुषङ्गात्[6], अनादि[5]वासना[7]वशादेव नीलादि[8]प्रत्ययस्य स्वतो[10]ऽवभासस्य[11] च सम्भवात् । नापि[12] तादात्म्यहेतुकोयम्; तादात्म्यं ह्येकत्वम्, तत्र च सम्बन्धाभाव एव स्यात् द्विष्ट(ष्ठ)त्वात्तस्य । न च तन्तुपटयोरेकत्वम्; प्रतिभासभेदाद्विरुद्धधर्माध्यासात् परिमाणसंख्या-
१० जातिभेदाच्च घटपटवत् । नापि संयोगहेतुकः; युतसिद्धेष्वेवार्थेषु संयोगस्य सम्भवात् । न चात्र समवायपूर्वकत्वं साध्यते येन दृष्टान्तः साध्यविकलो हेतुश्च विरुद्धः[13] स्यात् । नापि संयोगपूर्वकत्वं येनाभ्युपगमविरोधः स्यात् । किं तर्हि? सम्बन्धमात्रपूर्वकत्वम् । तस्मिंश्च सिद्धे परिशेषात्समवाय एव तज्जनको भविष्यति ।

१५ त(य)च्चेदम्-'विवादास्पदमिदमिहेति ज्ञानं न समवाय[14]पूर्वकमबाधितेहज्ञानत्वात् इह कुण्डे दधीतिज्ञानवत्' इति विशेषे(ष) विरुद्धा[15]नुमानम्; तत्सकलानुमानोच्छेद[16]कत्वादनुमानवादिना[17] न प्रयोक्तव्यम् ।

यच्चोच्यते[18]-इदमिहेति ज्ञानं न समवायालम्बनम्; तत्सत्यम्;
२० विशिष्टाधारविषयत्वात्[19] । न हि 'इह तन्तुषु पटः' इत्यादीहप्रत्ययः केवलं समवायमालम्बते; समवायविशिष्टतन्तुपटालम्बनत्वात् । वैशिष्ट्यं चानयोः सम्बन्ध इति ।

---

१ तन्तवादी । २ सौगतं प्रत्याह । ३ विकल्पज्ञानाद्वासना वासनातो विकल्पज्ञानमिति बीजाङ्कुरवत् । ४ सन्तानान्तरं च स्वसन्तानश्च तौ नीलादीनां ग्राहकौ नीलसन्तानान्तरस्वसन्तानौ च स्वसंविदद्वैतादिश्च ज्ञानाद्वैतादिश्चेत्यर्थः, तेषां सिद्धिरिति वाक्यम् । ५ नीलादेः समुत्पद्यमानो नीलं नीलमिति प्रत्ययः सन्नेव समुत्पद्यते विद्यमानान्नीलादेः समुत्पद्यमानत्वान्न तु कल्पनाशिल्पिकल्पितवासनातः समुत्पद्यमानः सन्समुत्पद्यते । ६ ततोनादिवासनाहेतुकत्वमस्य प्रत्ययस्य नेत्यर्थः । ७ कुतः । ८ न तु नीलादेः । ९ आदिना सन्तानसंग्रहः । १० अन्यतोवभासमाने द्वैतप्रसक्तिस्तन्निरासार्थं स्वतो विशेषणम् । ११ संविदद्वैतस्य । १२ जैनमतमाशङ्क्याह । १३ सम्बन्धमात्रे साध्ये सम्बन्धविशेषसाधनात् । १४ किन्तु संयोगपूर्वकम् । १५ विशेषणसमवायपूर्वकत्वेन विरुद्धमसमवायपूर्वकत्वं तस्यानुमानम्, विशेषविरुद्धानुमाने इदमुदाहरणं पर्वतः पर्वतस्थेनाग्निनाग्निमान्न भवति धूमवत्त्वान्महानसवदिति । १६ पर्वतोग्निमान्धूमवत्त्वादित्यादेः सम्यगनुमानस्य यदुच्छेदकानुमानं तस्य वक्तुमशक्यत्वादिति भावः । १७ जैनादिना । १८ जैनादिना । १९ तस्य ज्ञानस्य ।

न चास्य संयोगवन्नानात्वम्; इहेति प्रत्ययाविशेषाद्विशेषलिङ्गाभावाच्च सत्प्रत्ययाविशेषाद्विशेषलिङ्गाभावाच्च सत्तावत्[1]। न च सम्बन्धत्वमेव विशेषलिङ्गम्[2]; अस्यान्यथासिद्धत्वात्। न हि संयोगस्य सम्बन्धत्वेन नानात्वं साध्यतेऽपि तु प्रत्यक्षेण भिन्नाश्रयसमवेतस्य[3] क्रमेणोत्पादोपलब्धेः। समवायस्य चानेकत्वे सति अनुगतप्रत्ययोत्पत्तिर्न[4] स्यात्। संयोगे तु संयोगत्वबलान्नानात्वेपि स्यात्। न[5] चैतत्समवाये सम्भवति; समवायत्वस्य[6] समवाये समवायाभावात्, अन्यथानवस्था[7] स्यात्। [8]संयोगस्य गुणत्वेन द्रव्यवृत्तित्वात्, संयोगत्वं[9] पुनः[10] संयोगे समवेतमिति।

न चैकत्वे समवायस्य द्रव्यत्ववद्गुणत्वस्याप्यभिव्यञ्जकं[11] द्रव्यं कुतो न भवतीति वाच्यम्[12]? आधारशक्ते[13]र्नियामकत्वात्[14]। द्रव्याणां[15] हि द्रव्यत्वाधारशक्तिरेव[16], गुणादेस्तु गुणत्वाद्या[17]धारशक्तिरिति[18]। न चानुगतप्रत्ययजनकत्वेन सामान्यादस्याऽभेदः; भिन्न[19]लक्षणयोगित्वात्।

यद्वा, 'समवायीनि द्रव्याणि' इत्यादिप्रत्ययो विशेषणपूर्वको विशेष्यप्रत्ययत्वाद्दण्डी[20]त्यादिप्रत्ययवत्' इत्यतः समवायसिद्धिः। न चान्येषा[21]मत्रा[22]नुरागः[23] सम्भवति। किन्तर्हि? समवायस्यैव। अतः स एव विशेषणम्। अप्रतिपन्नसमयस्य 'समवायी' इतिप्रतिभासाभावादस्याऽविशेषणत्वम्, दण्डादावपि समानं तस्य[24]

---

१ सत्प्रत्ययाविशेषाद्विशेषलिङ्गाभावाच्च सत्ताया नानात्वं नास्ति यथा। २ समवायो नाना सम्बन्धत्वात्संयोगवदिति। ३ संयोगस्य। ४ अयं समवायोऽयं समवाय इति। ५ ननु समवायेपि समवायत्वबलान्नानात्वेप्यनुगतप्रत्ययोत्पत्तिः स्यादिति शङ्कायामाह। ६ सामान्यस्य। ७ समवायत्वस्य समवाये सद्भावेऽपरः समवायः समायातस्तत्रापि समवायत्वसमवायेऽपरः समवायः समायात इति। ८ तर्हि संयोगस्याप्यपरसंयोगपूर्वकत्वेनानवस्था कुतो न स्यादित्याह। ९ कथं तर्हि संयोगत्वमित्याह। १० संयोगान्तरापेक्षा नास्तीति भावः। ११ येन समवायेन द्रव्ये द्रव्यत्वं समवेतं तेनैव समवायेन गुणे गुणत्वमपि समवेतं समवायस्यैकत्वात्, ततश्चात्मनि समवेतस्य द्रव्यत्वस्य द्रव्यं यथाभिव्यञ्जकं भवति तथा गुणत्वस्याप्यभिव्यञ्जकं कुतो न भवति एकसमवायसमवेतत्वाविशेषादिति भावः। १२ जैनादिना। १३ द्रव्यस्वरूपायाः। १४ द्रव्यस्य। १५ घटादीनाम्। १६ द्रव्यत्वमेव स्वरूपशक्तिरिति भावः, निजा हि शक्तिः पृथिव्यादीनां पृथिवीत्वादिकमेव। १७ गुणत्वादिकमेव स्वरूपं शक्तिः। १८ स्वाभिधेयस्यैवाभिव्यञ्जकं नान्यथेति भावः। १९ अबाधितानुगतप्रत्ययहेतुः सामान्यमिति लक्षणं सामान्यस्य, समवायस्य त्वयुतसिद्धेत्यादि। २० दण्डलक्षणविशेषणपूर्वकत्वमत्र। २१ तादात्म्यसंयोगादीनाम्। २२ समवायीनि द्रव्याणीति वचने। २३ विशेषणत्वम्। २४ अप्रतिपन्नदण्डस्य।

दण्डाद्युल्लेखेन 'दण्डी' इत्यादिप्रत्ययानुत्पत्तेः । दण्डादेरभिधानयोजनाभावेपि 'अनेन[2] वस्तुना तद्वानयम्' इत्यनुरागप्रतीतिः 'संसृष्टा एते तन्तुपटादयः' इति सम्बन्धमात्रेपि[1] तुल्या । केवलं सङ्केताभावात् 'अयं समवायः' इति व्यपदेशाभावः । प्रतिपन्नसमयस्तु दण्डादेरिव समवायस्यापि विशेषणतामभिधानयोजनाद्वारेण प्रतिपद्यते ।

यच्चान्यत्समवाये बाधकमुच्यते—'[3]नानिष्पन्नयोः समवायः सम्बन्धिनोरनुत्पादे सम्बन्धाभावात् । निष्पन्नयोश्च संयोग एव । असम्बन्धे[4] चास्य 'समवायिनोः समवायः' इति व्यपदेशानुपपत्तिः । सम्बन्धे[5] वा न स्वतोसौ; संयोगादीनामपि तथा तत्प्रसङ्गात् । परतश्चेदनवस्था । न च गुणादीनामाधेयत्वं निष्क्रियत्वात् । गतिप्रतिबन्धकश्चाधारो जलादेर्घटादिवत् । तथा न [6]स्वरूपसंश्लेषः समवायो यतस्तस्मिन्सत्येकत्वमेव न सम्बन्धः । नापि पारतन्त्र्यम्; अनिष्पन्नयोराधारस्यैवासत्त्वात् । स्वतन्त्रेण निष्पन्नयोश्च न पारतन्त्र्यम्'; इत्यप्यसमीचीनम्; यतो न निष्पन्नयोरनिष्पन्नयोर्वा समवायः, स्वकारणसत्तासम्बन्धस्यैव निष्पत्तिरूपत्वात् । न हि निष्पत्तिरन्या समवायश्चान्यो येन पौर्वापर्यम् ।

एतेन[7] 'रूपसंश्लेषः पारतन्त्र्यं वा' इत्याद्यपास्तम् । नापि समवायस्य सम्बन्धान्तरेण[9] सम्बन्धो[8] युक्तो येनानवस्था स्यात्, सम्बन्धस्य समानलक्षणसम्बन्धेन सम्बन्धस्यान्यत्रादृष्टेः संयोगवत्[10] । [11]अग्नेरुष्णतावत्तु स्वत एवास्य सम्बन्धो युक्तः स्वत एव सम्बन्धरूपत्वात्, न संयोगादीनां तदभावात् । न ह्येकस्य स्वभावोऽन्य[12]स्यापि, अन्यथा स्वतोग्नेरुष्णत्वदर्शनाज्जलादीनामपि तत्स्यात् ।

यच्चोक्तम्-'निष्क्रियत्वात्तेषां[13] नाधेयत्वम्' इति; तदप्यसत्; संयोगिद्रव्यविलक्षणत्वाद्गुणादीनाम्, संयोगिनां[14] सक्रियत्वेनेव तेषां निष्क्रियत्वेप्याधाराधेयभावस्य प्रत्यक्षेण प्रतीतेश्चेति[15] ।

१ समवायस्याभिधानयोजनाभावेपि संसृष्टा एते तन्तुपटादय इति सम्बन्धमात्रेपि अनुरागप्रतीतिः । २ अनेनादिना । ३ असौ समवायः सम्बन्धिनोरनिष्पन्नयोः स्यान्निष्पन्नयोर्वेति विकल्पद्वयं हृदि निधाय दूषयति । ४ किञ्चासौ समवायः समवायिभ्यामसम्बद्धः सम्बद्धो वेति विकल्पद्वयं विधाय प्रथमविकल्पे दूषणमाह । ५ सम्बद्धश्चेत्स्वतः परतो वेति विकल्पद्वयमत्रापि योज्यम् । ६ स्वरूपयोः स्वभावयोः संश्लेषः सम्बन्धः । ७ स्वकारणसत्तासम्बन्धस्यैव निष्पत्तिरूपत्वादित्यनेन ग्रन्थेन । ८ समवायिना सह । ९ अपरसमवायेन । १० संयोगिनोः संयोगस्य च समवायेन सम्बन्धसद्भावात् । ११ कथं तर्ह्यस्य सम्बन्ध इत्याशङ्कायामाह । १२ संयोगस्य । १३ गुणादीनाम् । १४ द्रव्याणाम् । १५ संयोगिनां सक्रियत्वादेव तेषामाधेयत्वमिति भावः ।

अत्र प्रतिविधीयते। यत्तावदुक्तमयुतसिद्धेत्यादि; तत्रेदमयुतसिद्धत्वं शास्त्रीयम्, लौकिकं वा? तत्राद्यः पक्षोऽयुक्तः; तन्तुपटादीनां शास्त्रीयायुतसिद्धत्वस्यासम्भवात्। वैशेषिकशास्त्रे हि प्रसिद्धम्-अपृथगाश्रयवृत्तित्वमयुतसिद्धत्वम्, तच्चेह नास्त्येव, 'तन्तूनां स्वावयवांशुषु वृत्तेः पटस्य च तन्तुषु' इति पृथगाश्रय- ५ वृत्तित्वसिद्धेरपृथगाश्रयवृत्तित्वमसदेव। एवं गुणकर्मसामान्यानामप्यपृथगाश्रयवृत्तित्वाभावः[1] प्रतिपत्तव्यः। लोकप्रसिद्धंकभाजनवृत्तिरूपं त्वयुतसिद्धत्वम् दुग्धाम्भसोर्युतसिद्धयोरप्यस्तीति[2]।

ननु यथा कुण्डदध्यवयवाख्यौ[3] पृथग्भूतावाश्रयौ तयोश्च[4] कुण्डस्य दध्नश्च वृत्तिर्न तथात्र[5] चत्वारोर्थाः प्रतीयन्ते[6]-'द्वावाश्रयौ[7] १० पृथग्भूतौ द्वौ चाश्रयिणौ, तन्तोरेव स्वावयवापेक्षयाश्रयित्वात् पटापेक्षया चाश्रयत्वात्त्रयाणामेवार्थानां प्रसिद्धेः[8], 'पृथगाश्रयाश्रयित्वं युतसिद्धिः' इत्यस्य युतसिद्धिलक्षणस्याभावाद्[9][10]युतसिद्धत्वं तेषामिति चेत्[11]; कथमेवमाकाशादीनां[12] युतसिद्धिः स्यात्? तेषामन्याश्रयविवेकतः[13] पृथगाश्रयाश्रयित्वाभावात्। १५

'नित्यानां[14] च पृथग्गतिमत्त्वम्[15]' इत्यपि तत्रासम्भाव्यम्; न खलु विभुद्रव्यपरमाणुवद्विभुद्रव्याणामन्यतरपृथग्गतिमत्त्वं[16] परमाणुद्वयवदुभयपृथग्गतिमत्त्वं वा सम्भवति; अविभुत्वप्रसङ्गात्। तथैक[17]द्रव्याश्रयाणां[18] गुणकर्मसामान्यानां परस्परं पृथगाश्रयवृत्तेरभावादयुतसिद्धिप्रसङ्गतोऽन्योन्यं समवायः स्यात्। स च नेष्टस्तेषामा- २० श्रयाश्रयिसमवाय(यिभावा)भावात्। इतरेतराश्रयभावा(यश्च समवाय) सिद्धौ हि पृथगाश्रयसमवायित्वलक्षणा युतसिद्धिः, तन्सिद्धौ च तन्निषेधेन समवायसिद्धिरिति।

ननु लक्षणं विद्यमानस्यार्थस्यान्यतो भेदेनावस्थापकं न तु सद्भावकारकम्, तेनायमदोषश्चेत्; ननु ज्ञापकपक्षे सुतरामितरे- २५ तराश्रयत्वम्। तथाहि-नाऽज्ञातया युतसिद्ध्या समवायो ज्ञातुं शक्यते, अनधिगतश्चासौ न युतसिद्धिमवस्थापयितुमुत्सहते इति।

---

१ गुणादीनां गुणवदादिषु वृत्तिरेषा च स्वावयवेष्वाश्रयभूतेषु वृत्तिरिति भावः। २ अतिव्याप्तिदूषणमिदम्। ३ कुण्डं च दधि च तयोस्के तयोरवयवौ। ४ अधिकरणभूतयोः। ५ तन्तुपटादिषु। ६ ते के चत्वारोर्था इत्युक्ते सत्याह। ७ कुण्डदध्यवयवौ। ८ आश्रयौ दधिकुण्डावयवलक्षणौ विद्येते ययोर्दधिकुण्डयोस्तावाश्रयिणौ। ९ समवाये। १० ततश्च। ११ ततश्च तेषां समवायसिद्धिरिति भावः। १२ आदिना आत्मकालदिशां च। १३ विवेकः=अभावः, व्यापकत्वात्तेषामेकाश्रयवृत्तेः। १४ पृथगाश्रयाश्रयित्वं युतसिद्धिलक्षणं नित्येषु यद्यपि नास्ति तथापि पृथग्गतिमत्त्वं भविष्यतीत्याह। १५ लक्षणम्। १६ मध्ये। १७ एकद्रव्यं=विभु आत्माकाशादि। १८ वसः।

न चातो लक्षणात्समवायः सिद्ध्यति व्यभिचारात्। तथाहि–नियमेनायुतसिद्धसम्बन्धत्वमाधाराधेयभूतसम्बन्धत्वं च 'आकाशे वाच्ये वाचकस्तच्छब्दः' इति वाच्यवाचकभावे 'आत्मनि विषयभूते अहमिति ज्ञानं विषयि' इति विषयविषयिभावे च विद्यते ५ इति। ननु सर्वस्य वाच्यवाचकवर्गस्य विषयविषयिवर्गस्य च नियमेनायुतसिद्धसम्बन्धत्वासम्भवो युतसिद्धेष्वप्यस्य सम्भवाद्घटतच्छब्दज्ञानवत्[2], अतो न व्यभिचारः; इत्यप्यसारम्; वर्गापेक्षयापि लक्षणस्य विपक्षैकदेशवृत्तेर्व्यभिचारित्वात्[3]। इष्टं च विपक्षैकदेशादव्यावृत्तस्य सर्वैरप्यनैकान्तिकत्वम्।

१० यच्चोक्तम्–तन्तुपटादयः संयोगिनो न भवन्तीत्यादि; तत्सत्यम्; तत्र तादात्म्योपगमात्।

यत्तूक्तम्–प्रत्यक्षत एव समवायः प्रतीयत इत्यादि; तदयुक्तम्; असाधारणस्वरूपत्वे हि सिद्धे सिध्येदर्थानां प्रत्यक्षता पृथुबुध्नोदराद्याकारघटादिवत्। न चास्य तन्सिद्धम्। तद्धि किमयुतसिद्ध१५ सम्बन्धत्वम्, सम्बन्धमात्रं वा? न तावदयुतसिद्धसम्बन्धत्वम्; सर्वैरप्रतीयमानत्वात्। यत्पुनर्यस्य स्वरूपं तत्तेनैव स्वरूपेण सर्वस्यापि प्रतिभासते यथा पृथुबुध्नोदराद्याकारतया घट इति। न चैकस्य सामान्यात्मकं स्वरूपं युक्तम्; समानानामभावे सामान्याभावाद्गगने गगनत्ववत्। नापि सम्बन्धमात्रं समवायस्यासा२० धारणं स्वरूपम्; संयोगादावपि सम्भवात्।

किञ्च, तद्रूपतयासौ सम्बन्धबुद्धौ प्रतिभासेत, इहेति प्रत्यये वा, समवाय इत्यनुभवे वा? यदि सम्बन्धबुद्धौ, कोऽयं सम्बन्धो नाम–किं सम्बन्धत्वजातियुक्तः सम्बन्धः, अनेकोपादानजनितो वा, अनेकाश्रितो वा, सम्बन्धबुद्ध्युत्पादको वा, सम्बन्धबुद्धिवि२५ षयो वा? न तावत्सम्बन्धत्वजातियुक्तः; समवायस्यासम्बन्धत्वप्रसङ्गात्। द्रव्यादित्रयान्यतमरूपत्वाभावेन[10] समवायान्तरासत्त्वेन[11] चात्र सम्बन्धत्वजातेरप्रवर्त्तनात्। अथ संयोगवदनेकोपादानजनितः; तर्हि घटादेरपि सम्बन्धत्वप्रसङ्गः[12]। नाप्यनेकाश्रितः; घट-

---

१ विपक्षे। २ शब्दश्च ज्ञानं च शब्दज्ञाने, तस्य घटस्य शब्दज्ञाने तच्छब्दज्ञाने इति द्वन्द्वः। ३ वाच्यवाचकभावविषयविषयिभावसमूहे विपक्षे नास्ति तथापि तस्यैकदेशवृत्तित्वादनैकान्तिकः। ४ असाधारणस्वरूपम्। ५ समवायस्य। ६ समवायेन सह समानानां वस्तूनाम्। ७ तस्यैकत्वात्सामान्यस्यानेकवृत्तित्वात्। ८ अयं सम्बन्ध इति ज्ञाने। ९ समवायस्य। १० सम्बन्धत्वजातेर्वृत्त्यर्थं समवाये। ११ समवायान्तरासत्त्वं च समवायस्यै[illegible]ादवगन्तव्यम्। १२ अनेकोपादानजनितत्वाविशेषात्।

त्वादेः सम्बन्धत्वानुषङ्गात्। नापि सम्बन्धबुद्ध्युत्पादकः; लोचनादेरपि[1] तत्त्वप्रसक्तेः। नापि सम्बन्धबुद्धिविषयः; सम्बन्धसम्बन्धिनोरेकज्ञानविषयत्वे सम्बन्धिनोपि तद्रूपतानुषङ्गात्। न[2] च प्रतिविषयं ज्ञानभेदः; मेचकज्ञानाभावप्रसङ्गात्।

अथेहबुद्धौ समवायः प्रतिभासते; न[3]; इहबुद्धेरधिकरणाध्यवसायरूपत्वात्। न चान्यस्मिन्नाकारे प्रतीयमानेऽन्याकारोर्थः कल्पयितुं युक्तोतिप्रसङ्गात्।

अथ समवायबुद्ध्यासौ प्रतीयते; तन्न; समवायबुद्धेरसम्भवात्। नहि 'एते तन्तवः, अयं पटः, अयं च समवायः' इत्यन्योन्यविविक्तं त्रितयं बहिर्ग्राह्याकारतया कस्याञ्चित्प्रतीतौ प्रतीयते तथानुभवाभावात्।

सर्वसमवाय्यनुगतैकस्वभावो ह्यसौ तत्र प्रतिभासेत, तद्व्यावृत्तस्वभावो वा? न तावत्तद्व्यावृत्तस्वभावः; सर्वतो व्यावृत्तस्वभावस्यान्यासम्बन्धित्वेन गगनाम्भोजवत्समवायत्वानुपपत्तेः। नापि तदनुगतैकस्वभावः; सामान्यादेरपि समवायत्वानुषङ्गात्। न चाखिलसमवाय्यऽप्रतिभासे तदनुगतस्वभावतयासौ प्रत्यक्षेण प्रत्येतुं शक्यः। अथानुगतव्यावृत्तरूपव्यतिरेकेण सम्बन्धरूपतयासौ प्रतीयते; तन्न; सम्बन्धरूपतायाः प्रागेव कृतोत्तरत्वात्।

यदप्युक्तम्-'इह तन्तुषु पटः' इत्यादीहप्रत्ययः सम्बन्धकार्योऽबाध्यमानेहप्रत्ययत्वादिह कुण्डे दधीत्यादिप्रत्ययवदित्यनुमानाच्चासौ प्रतीयते' इत्यादि; तदप्यसमीक्षिताभिधानम्; हेतोराश्रयासिद्धत्वात्। तदसिद्धत्वं च 'इह तन्तुषु पटः' इत्यादिप्रत्ययस्य धर्मिणोऽसिद्धेः। अप्रसिद्धविशेषणश्चायं हेतुः; 'पटे तन्तवो वृक्षे शाखाः' इत्यादिरूपतया प्रतीयमानप्रत्ययेन 'इह तन्तुषु पटः' इति प्रत्ययस्य बाध्यमानत्वात्। स्वरूपासिद्धश्चायम्; तन्तुपटप्रत्यये

१ आदिपदेन प्रकाशादेश्च, लोचनादिरपि वस्तुषु सम्बन्धबुद्धिं जनयति। २ प्रतिविषयं ज्ञानभेदात्कथं सम्बन्धिनोरेकज्ञानविषयत्वं यतः सम्बन्धिनोरपि सम्बन्धरूपता स्यादित्याशङ्कायामाह। ३ इति चेदिति शेषः। ४ समवायस्याधाराधेयभावलक्षणसम्बन्धाकारोल्लेखित्वात्समवाय इति न घटते। ५ इहेति बुद्धेरपि सम्बन्धप्रत्ययत्वं कुतो न स्यादित्युक्ते सत्याह। ६ अधिकरणलक्षणेर्थे। ७ सम्बन्धलक्षणः। ८ घटप्रतिभासे पटप्रतिभासप्रसङ्गात्। ९ कोयं सम्बन्धो नाम? किं सम्बन्धत्वजातियुक्तः इत्यादिरीत्या। १० प्रतिवादिनं प्रति। ११ अवयविनि। १२ इह तन्तुषु पट इति अवयवेष्ववयविनो वृत्तिद्वारेण प्रत्ययोत्पत्तिर्यथा तथेह पटे तन्तवो वृक्षे शाखा इत्यवयविष्ववयवानां वृत्तिद्वारेणापि प्रत्ययोत्पत्तिर्लोकप्रसिद्धैव यतः।

इहप्रत्ययत्वस्यानुभवाभावात्, 'पटोयम्' इत्यादिरूपतया हि प्रत्ययोनुभूयते[1]।

अनैकान्तिकश्च: 'इह प्रागभावेऽनादित्वम्, इह प्रध्वंसाभावे प्रध्वंसाभावाभावः' इत्यबाध्यमानेहप्रत्ययस्य सम्बन्धपूर्वकत्वाभावात्। न चात्र विशेषणविशेष्यभावः सम्बन्धो वाच्यः; सम्बन्धमन्तरेण विशेषणविशेष्यभावस्याऽसम्भवात्, अन्यथा सर्वं सर्वस्य विशेषणं विशेष्यं च स्यात्। सम्बन्धे सत्येव हि द्रव्यगुणकर्मादावेकस्य विशेषणत्वमपरस्य विशेष्यत्वं दृष्टम्। तदभावेपि विशेषणविशेष्यभावकल्पनायामतिप्रसङ्गः[2] स्यात्।

न चात्रा[3]दृष्टलक्षणः सम्बन्धो विशेषणविशेष्यभावनिबन्धनम् इत्यभिधातव्यम्; षोढासम्बन्धवादित्वव्याघातानुषङ्गात्। न चास्य सम्बन्धरूपता। सम्बन्धो हि द्विष्ठो भवताभ्युपेतः। अदृष्टश्चात्मवृत्तितया प्रागभावाऽनादित्वयोरतिष्ठन्[4]कथं द्विष्ठो भवतीति चिन्त्यमेतत्? यदि चात्राऽदृष्टः सम्बन्धः; तर्हि गुणगुण्यादयोप्यत एव सम्बद्धा भविष्यन्तीत्यलं समवायादिसम्बन्धकल्पनया।

किञ्च, अतोनुमाना[5]त्सम्बन्धमात्रं साध्यते, तद्विशेषो वा? प्रथमपक्षे सिद्धसाध्यता, तादात्म्यलक्षणसम्बन्धस्येष्टत्वा[6]त्तन्तुपटादीनाम्। ननु तेषां तादात्म्ये सति तन्तवः पटो वा स्यात्, तथा च सम्बन्धिनोरेकत्वे कथं सम्बन्धो नामास्य द्विष्ठत्वात्? तदप्ययुक्तम्; यो हि द्विष्ठः सम्बन्धस्तस्येत्थ[7]मभावो युक्तः, यस्तु तत्स्वभावता[8]लक्षणः कथं तस्याभावो युक्तः? तन्तुस्वभाव एव हि पटो नार्थान्तरम्, आतानवितानीभूततन्तुव्यतिरेकेण देशभेदादिना पटस्यानुपलभ्यमानत्वात्।

अथ सम्बन्धविशेषः साध्यते; स किं संयोगः, समवायो वा? संयोगश्चेत्; अभ्युपगमबाधा। समवायश्चेत्; दृष्टान्त[9]स्य साध्यविकलता।

अथोच्यते-न संयोगः समवायो वा साध्यते किन्तु सम्बन्धमात्रम्, तत्सिद्धौ च परिशेषात् समवायः सिध्यतीति; तदप्युक्तिमात्रम्; परिशेषन्यायेन समवायस्य सिद्धेरसंभवात्, तस्यानेक-

१ यतः। २ सह्यविन्ध्ययोरपि विशेषणविशेष्यभावप्रसङ्गः सम्बन्धाभावाविशेषात्। ३ प्रागभावे। ४ अप्रवर्त्तमानः सन्। ५ इह तन्तुषु पट इत्यादीहप्रत्ययः सम्बन्धकार्योऽबाध्यमानेहप्रत्ययत्वादित्यतः। ६ जैनानाम्। ७ सम्बन्धिनोरेकत्वप्रकारेण। ८ तन्तव एव स्वभावो यस्य पटस्यासौ तथोक्तस्तस्य भावस्तत्स्वभावता सैव लक्षणं यस्य सम्बन्धस्येति बसः। ९ इह कुण्डे दधीत्यादिप्रत्ययवदित्यस्य।

दोषदुष्टत्वेन प्रतिपादितत्वात् । यदि हि संबन्धान्तरमनेकदोषदुष्टं समवायस्तु निर्दोषः स्यात्, तदासौ तन्न्यायात् सिध्येत् । न चैवमित्युक्तम् ।

कश्चायं परिशेषो नाम ? प्रसक्तप्रतिषेधे विशि(षे शि)ष्यमाणसंप्रत्ययहेतुः स इति चेत्; स किं प्रमाणम्, अप्रमाणं वा ? न तावदप्रमाणमभिप्रेतसिद्धौ समर्थम्; अतिप्रसङ्गात् । प्रमाणं चेत्किं प्रत्यक्षम्, अनुमानं वा ? न तावत्प्रत्यक्षम्; तस्य प्रसक्तप्रतिषेधद्वारेणाभिप्रेतसिद्धावसमर्थत्वात् । अथ केवलव्यतिरेक्यनुमानं परिशेषः; तर्हि प्रकृतानुमानोपन्यासवैयर्थ्यम्, तस्योपन्यासेपि परिशेषमन्तरेणाभिप्रेतसिद्धेरभावात् । परिशेषस्तु प्रमाणान्तरमन्तरेणापि तत्सिद्धौ समर्थ इति स एवोच्यताम्, न चासावुक्तः, तत् कथं समवायः सिध्येत् ?

ननु चेहप्रत्ययस्य समवायाहेतुकत्वे निर्हेतुकत्वप्रसङ्गात् कादाचित्कत्वविरोधः; तदसत्; तादात्म्यहेतुकतयास्य प्रतिपादितत्वात् । महेश्वरहेतुकत्वाद्वा कादाचित्कत्वाविरोधः । तस्य तदहेतुकत्वे वा तेनैव कार्यत्वादिहेतोर्व्यभिचारः । ननु महेश्वरोऽसम्बन्धत्वात्कथं सम्बन्धबुद्धेः कारणमिति चेत् ? प्रभुशक्तेरचिन्त्यत्वात् । यो हीश्वरस्त्रैलोक्यकार्यकरणसमर्थः स कथं 'पटे रूपादयः' इति बुद्धिं न विदध्यात् ? प्रभुः खलु यदेवेच्छति तत्करोति, अन्यथा प्रभुत्वमेवास्य हीयते । नच 'इह कुण्डे दधि' इत्यादिप्रत्यये सम्बन्धपूर्वकत्वोपलम्भादत्रापि तत्पूर्वकत्वस्यैव सिद्धिः; तत्रापीश्वरहेतुकत्वं कार्यस्येच्छतस्तच्चोद्यानिवृत्तेः । संयोगश्चार्थान्तरभूतस्तन्निमित्तत्वेनात्राप्यसिद्धः; तस्यासिद्धस्वरूपत्वात् ।

"ननु संयोगो नामार्थान्तरं न स्यात्तदा क्षेत्रे बीजादयो निर्विशिष्टत्वात् सर्वदैवाङ्कुरादिकार्यं कुर्युः, न चैवम् । तस्मात्सर्वदा

---

१ संयोगतादात्म्यादिरूपम् । २ प्रसक्तः=प्रसङ्गप्राप्तः सर्वजनप्रसिद्धो वा संयोगतादात्म्यरूपः, तस्य प्रतिषेधे सति विशिष्यमाणः समवायरूपस्तस्य सम्यक् प्रतीतिहेतुरित्यर्थः । ३ परिशेषः । ४ प्रत्यक्षस्य सन्निहितरूपादिष्वेव प्रवर्तमानत्वात् । ५ परिशेषोपि प्रमाणान्तरमन्तरेण तत्सिद्धावसमर्थो भविष्यतीत्युक्ते सत्याह । ६,७ इहेदमिति प्रत्ययस्य । ८ इहेदमिति प्रत्ययस्य । ९ इह तन्तुषु पट इत्यादीहप्रत्ययेपि । १० इह कुण्डे दधीत्यादिप्रत्यये । ११ दधीत्यादिप्रत्ययस्य । १२ वैशेषिकस्य । १३ तच्चोद्यं हि महेश्वरहेतुकत्वाद्वा कादाचित्कत्वाविरोध इत्यादि । १४ अर्थौ संयोगक्रियाधारौ ताभ्यामन्यः संयोग इत्यर्थः । १५ इहेति प्रत्ययनिमित्तत्वेन । १६ इह कुण्डेपि । १७ संयोगे सत्यप्यपूर्वसामर्थ्योद्भवाभावादित्यर्थः । १८ गृहे स्थापिताः सन्तोपीत्यर्थः ।

कार्यानारम्भात् तेऽङ्कुरादिकार्योत्पत्तौ कारणान्तरसापेक्षाः, यथा मृत्पिण्डदण्डादयो घटकरणे कुम्भकारादिसापेक्षाः। योऽसावपेक्ष्यः स संयोग इति।

किञ्च, द्रव्ययोर्विशेषणभावेनाध्यक्षत एवासौ प्रतीयते; तथाहि-कैश्चित्केनचित् 'संयुक्ते द्रव्ये आहर' इत्युक्ते ययोरेव द्रव्ययोः संयोगमुपलभते ते एवाहरति, न द्रव्यमात्रम्।

किञ्च, 'कुण्डली देवदत्तः' इत्यादिमतिरुपजायमाना किन्निबन्धनेत्यभिधातव्यम्? न तावत्पुरुषकुण्डलमात्रनिबन्धना; सर्वदा तस्याः सद्भावप्रसङ्गात्।

किञ्च, यदेव केनचित्क्वचिदुपलब्धसत्त्वं तस्यैवान्यत्र विधिप्रतिषेधमुखेन लोके व्यवहारप्रवृत्तिर्दृष्टा। यदि तु संयोगो न कदाचिदुपलब्धस्तत्कथमस्य 'चैत्रोऽकुण्डली कुण्डली' वा इत्येवं विभागेन व्यवहारो भवेत्? 'चैत्रोऽकुण्डली' इत्यत्र हि न कुण्डलं चैत्रो वा प्रतिषिध्यते देशादिभेदेनानयोः सतोः प्रतिषेधायोगात्। तस्माच्चैत्रस्य कुण्डलसंयोगः प्रतिषिध्यते। तथा 'चैत्रः कुण्डली' इत्यनेनापि विधिवाक्येन चैत्रकुण्डलयोर्नान्यतरस्य विधानं तयोः सिद्धत्वात्। पारिशेष्यात्संयोगस्यैव विधिर्विज्ञायते।" [न्यायवा० पृ० २१८-२२२]

इत्यप्युद्द्योतकरस्य मनोरथमात्रम्; तथाहि-यत्तावदुक्तम्-निर्विशिष्टत्वाद्बीजादयः सर्वदैवाङ्कुरं कुर्युः; तदयुक्तम्; तेषां निर्विशिष्टत्वासिद्धेः, सकलभावानां परिणामित्वात्। ततो विशिष्टपरिणामापन्नानामेव तेषां जनकत्वं नान्यथा।

यच्चोक्तम्-'सर्वदा कार्यानारम्भात्' इत्यादि; तत्रापि कारणमात्रसापेक्षत्वसाधने सिद्धसाध्यता, अस्माभिरपि विशिष्टपरिणामापेक्षाणां तेषां कार्यकारित्वाभ्युपगमात्। अथाभिमतसंयोगाख्यपदार्थान्तरसापेक्षत्वं साध्यते; तदानेन हेतोरन्वयासिद्धेरनैकान्तिकता, तमन्तरेणापि संभवाविरोधात्। दृष्टान्तस्य च साध्यविकलता। यदि च संयोगमात्रसापेक्षा एव ते तज्जनकाः; तर्हि प्रथमोपनिपाते एव क्षित्यादिभ्योऽङ्कुरादिकार्योदयप्रसङ्गः पश्चा-

१ कारणान्तरं=संयोगः। २ द्रव्ये संयोगवती इति। ३ पुमान्। ४ पुंसा। ५ संयोगरूपापूर्वस्वभावप्रादुर्भावानपेक्षा। ६ पुरुषकुण्डलयोः पार्थक्येन स्थितावस्थायामपीत्यर्थः। ७ चैत्रोऽकुण्डलीति निषेधवाक्येन। ८ अन्वयः=अविनाभावः। ९ मृत्पिण्डादयः कुम्भकारापेक्षा घटकरणे प्रभवन्ति तथापि नासौ कुम्भकारः संयोगस्वरूप इति।

दिवाविकलकारणत्वात्। तदा तदनुत्पत्तौ वा पश्चादप्यनुत्पत्तिप्रसङ्गो विशेषाभावात्।

यदप्युक्तम्-द्रव्ययोर्विशेषणभावेनेत्यादि; तदप्ययुक्तम्; यतो न द्रव्याभ्यामर्थान्तरभूतः संयोगः प्रतिपत्तुः प्रत्यक्षे प्रतिभाति यतस्तद्दर्शनाद्विशिष्टे द्रव्ये आहरेत्। किं तर्हि? प्रागभाविसान्तरावस्थापरित्यागेन निरन्तरावस्थारूपतयोत्पन्ने वस्तुनी एव संयुक्तशब्दवाच्ये, अवस्थाविशेषे प्रभावितत्वात् संयोगशब्दस्य। तेन यत्र तथाविधे वस्तुनी संयोगशब्दविषयभावापन्ने पश्यति ते एवाहरति, नान्ये।

यदप्युक्तम्-कुण्डलीत्यादि; तदप्युक्तिमात्रम्; यतो यथैव हि चैत्रकुण्डलयोर्विशिष्टावस्थाप्राप्तिः संयोगः सर्वदा न भवति, तद्वत् 'कुण्डली' इति मतिरप्यवस्थाविशेषनिबन्धना कथं तदभावे भवेत्? विधिप्रतिषेधावपि न केवलयोश्चैत्रकुण्डलयोः, किन्त्ववस्थाविशेषस्यैवेत्युक्तदोषानवकाशः। ततो ये अनेकवस्तुसन्निपाते सत्युपजायन्ते प्रत्यया न ते परपरिकल्पितसंयोगविषयाः यथा प्रविरलावस्थितानेकतन्तुविषयाः प्रत्ययाः, तथा चैते संयुक्तप्रत्यया इति।

यच्चान्यदुक्तम्-'विशेषविरुद्धानुमानं सकलानुमानोच्छेदकत्वान्न वक्तव्यमिति' तत्किमनुमानाभासोच्छेदकत्वान्न वाच्यम्, सम्यगनुमानोच्छेदकत्वाद्वा? तत्राद्यः पक्षोऽयुक्तः; न हि कालात्ययापदिष्टहेतूत्थानुमानोच्छेदकस्य प्रत्यक्षादेरनुमानवादिनोपन्यासो न कर्तव्योऽतिप्रसक्तेः। द्वितीयपक्षोऽप्ययुक्तः; न हि धूमादिसम्यगनुमानस्य विशेषविरुद्धानुमानसहस्रेणापि प्रत्यक्षादिभिरपहृतविषयेण बाधा विधातुं पार्यते। न च विशेषविरुद्धानुमानत्वादेवेदमवाच्यम्; यतो न विशेषविरुद्धानुमानत्वमसिद्धत्वादिवद्धेत्वाभासनिरूपणप्रकरणे दोषो निरूपितो येनानुमानवादिभिस्तदसिद्धत्वादिवन्न प्रयुज्यते। ततो यद्दुष्टमनुमानं तदेव विशेषविघाताय न प्रयोक्तव्यम्-यथा 'अयं प्रदेशोऽत्रत्येनाग्निनाग्निमान्न भवति धूमवत्त्वान्महानसवत्' इत्यादिकम्। यतस्तेन यो विशेषो निराक्रियते स प्रत्यक्षेणैव तद्देशोपसर्पणे

---

१ कुम्भकारस्य संयोगरूपत्वाभावादेव। २ उच्चारितत्वात्। ३ अवस्थात्र संयुक्तरूपा। ४ चैत्रकुण्डलयोर्विधिप्रतिषेधलक्षण उक्तदोषः। ५ इन्द्रियाणां सन्निकर्षे। ६ अत्र प्रकरणे विशेषः=समवायः। ७ कालात्ययापदिष्टहेत्वाभासस्येव प्रत्यक्षादेरप्युच्छेदानुप्रसङ्गात्। ८ जैनाद्यैः। ९ तस्य=अग्नेः।

सति प्रतीयते। न चैतत् समवाये संभवति; प्रत्यक्षाद्यगोचरत्वेनास्य प्रतिपादितत्वात्। न चातद्विषयं बाधकमतिप्रसङ्गात्[1]।

यत्पुनरुक्तम्-न चास्य संयोगवन्नानात्वमित्यादि; तदप्यसमीचीनम्; तदेकत्वस्यानुमानबाधितत्वात्। तथाहि-अनेकः सम-५वायो विभिन्नदेशकालाकारार्थेषु सम्बन्धबुद्धिहेतुत्वात्[2]। यो य इत्थंभूतः स सोनेकः यथा संयोगः, तथा च समवायः, तस्मादनेक इति। प्रसिद्धो[3] हि दण्डपुरुषसंयोगात् कटकुड्यादिसंयोगस्य भेदः। 'निबिडः संयोगः शिथिलः संयोगः' इति प्रत्ययभेदात्संयोगस्य भेदाभ्युपगमे 'नित्यं[4] समवायः कदाचित्समवायः[5]' इति प्रत्यय-१०भेदात्समवायस्यापि भेदोस्तु। समवायिनोर्नित्यकादाचित्कत्वाभ्यां समवाये तत्प्रत्ययोत्पत्तौ संयोगिनोर्निबिडत्वशिथिलत्वाभ्यां संयोगे तथा प्रत्ययोत्पत्तिः स्यान्न पुनः संयोगस्य निबिडत्वादिस्वभावभेदात्[6], इत्येकं संधित्सोरन्यत् प्रच्यवते।

तथा, 'नाना समवायोऽयुतसिद्धावयविद्रव्याश्रितत्वात् संख्या-१५वत्' इत्यतोप्यस्यानेकत्वसिद्धिः। न चेदमसिद्धम्; अनाश्रितत्वे हि समवायस्य "[7]षण्णामाश्रितत्वमन्यत्र[8] नित्यद्रव्येभ्य" [प्रश० भा० पृ १६] इत्यस्य[9] विरोधः। अथ न परमार्थतः समवायस्याश्रितत्वं नाम धर्मो[10] येनानेकत्वं स्यात् किन्तूपचारात्। निमित्तं तूपचारस्य समवायिषु[11] सत्सु समवायज्ञानम्[12]। तत्त्वतो ह्याश्रितत्वेस्य स्वाश्र-२०यविनाशे विनाशप्रसङ्गो[13] गुणादिवत्; इत्यप्ययुक्तम्; विशेषपरि[14]त्यागेनाश्रितत्वसामान्यस्य हेतुत्वात्[15], दिगादीनामाश्रितत्वापत्तेश्च, मूर्त्तद्रव्येषूपलब्धिलक्षणप्राप्तेषु दिग्लिङ्गस्य 'इदमतः पूर्वेण' इत्यादिप्रत्ययस्य काललिङ्गस्य च परत्वापरत्वादिप्रत्ययस्य सद्भावात्। तथा[16] च 'अन्यत्र नित्यद्रव्येभ्यः' इति विरुध्यते[17]। सामान्यस्या-२५नाश्रितत्वप्रसङ्गश्च; आश्रयविनाशेप्यविनाशात् समवायवत्।

अस्तु वानाश्रितत्वं समवायस्य, तथाप्यनेकत्वमनिवार्यम्; तथाहि-अनेकः समवायोऽनाश्रितत्वात्परमाणुवत्। नाकाशादि-

---

१ गगनकुसुमस्यापि बाधकत्वप्रसङ्गात्। २ संबन्ध इति बुद्धिः संबन्धबुद्धिः, तस्याः। ३ दृष्टान्तं समर्थयति। ४ परमाणुतद्रूपयोः। ५ तन्तुपटयोः। ६ समवायस्य। ७ वैशेषिकस्य। ८ द्रव्यगुणकर्मसामान्यविशेषसमवायानाम्। ९ ग्रन्थस्य। १० स्वरूपम्। ११ तन्तुपटादिषु। १२ समवाय इति ज्ञानम्। १३ स्वाश्रयादभिन्नत्वात्। १४ गुणो गुण्याश्रितः, अवयवोवयव्याश्रित इति विशेषपरित्यागेन। १५ आश्रयविनाशेप्याश्रितत्वसामान्यस्याविनाश एव तस्य नित्यत्वात्। १६ दिगादीनामाश्रितत्वे च सति। १७ नित्यद्रव्याणामाश्रितत्वात्।

भिर्व्यभिचारः; तेषामपि[1] कथंचिन्नानात्वसाधनात् । ततो[2]ऽयुक्त-
मुक्तम्- 'इहेति प्रत्ययाविशेषाद्विशेषलिङ्गाभावाच्चैकः समवायः'
इति । विशेषलिङ्गाभावस्यानन्तरप्रतिपादितलिङ्गसद्भावतोऽसि-
द्धत्वात्। इहेति प्रत्ययाविशेषोप्यसिद्धः; 'इहात्मनि ज्ञानमिह पटे
रूपादिकम्' इतीहेति प्रत्ययस्य विशेषात् । विशेषणानुरागो[3] ५
हि प्रत्ययस्य[4] विशिष्टत्वम्[5] । न चानुगतप्रत्ययप्रतीतितः समवाय-
स्यैकत्वं सिध्यति; गोत्वादि[6]सामान्येषु षट्पदार्थेषु चानुगतस्यै-
कत्वस्याभावेप्यनुगतप्रत्ययप्रतीतेः ।

'सत्तावत्' इति दृष्टान्तोपि साध्यसाधनविकलः; सर्वथैकत्वस्य
सत्प्रत्ययाविशेषस्य चासिद्धत्वात् । सर्वथैकत्वे हि सत्तायाः १०
'पटः सन्' इति प्रत्ययोत्पत्तौ सर्वथा सत्तायाः प्रतीत्यनुषङ्गात्
क्वचित् सत्तासंदेहो न स्यात् । तस्याः सर्वथा प्रतीतावपि तद्वि-
शेष्यार्थानामप्रतीतेः क्वचित्सत्तासंदेहे पटविशेषणत्वं तस्या अन्य-
दन्यदर्थान्तरविशेषणत्वम् इत्यायातमनेकरूपत्वं तस्याः ।

यदप्युक्तम्-समवायीनि द्रव्याणीत्यादिप्रत्ययो विशेषणपूर्वको १५
विशेष्यप्रत्ययत्वादित्यादि; तदप्यनल्पतमोविलसितम्; हेतो-
र्विशेषणासिद्धत्वात् । तदसिद्धत्वं च समवायानुरागस्याप्रतीतेः ।
प्रतीतौ वानुमानानर्थक्यम् । को हि नाम समवायानुरक्तं द्रव्या-
दिकं मन्यमानः समवायं न मन्येत? तदनुरागाभावेपि तेनास्य
विशेष्यत्वे खरशृङ्गेणापि तत्स्यादविशेषात् । ननु सम्बन्धानुरक्तं २०
द्रव्यादिकं प्रतिभाति । सत्यं प्रतिभाति, समवाये तु किमायातम्?
न च स एव स इति वाच्यम्; तादात्म्यादपि तत्संभवात् संयो-
गवत् । तथाप्यत्रैवाग्रहे खरविषाणेप्याग्रहः किन्न स्यात्? 'खर-
विषाणी पट इति प्रत्ययो विशेषणपूर्वको विशेष्यप्रत्ययत्वात्'
इति । अत्राश्रयासिद्धतान्यत्रापि समाना । न खलु 'समवायी २५
पटः' इति प्रत्ययः केनाप्यनुभूयते ।

अथाप्रतिपन्नसमयस्य संश्लेषमात्रं प्रतिपन्नसमयस्य तु 'सम-
वायी' इति प्रतिभातीति चेत्; न; ज्ञानाद्वैतादेः प्रसङ्गात् ।
शक्यते हि तत्राप्येवं वक्तुम्-अप्रतिपन्नसमयस्य वस्तुमात्रम-

---

१ प्रदेशभेदापेक्षया । २ समवायस्य नानात्वं सिद्धं यतः । ३ भिन्नभिन्नविशे-
षणसंबन्धः । ४ इहेतिप्रत्ययस्य । ५ भिन्नत्वम् । ६ गोत्वमपि सामान्यं घटत्वमपि
सामान्यमिति, अयमपि पदार्थोयमपि पदार्थ इत्येवं प्रकारेण । ७ दण्डाभावे दण्डीति
प्रत्ययो यथा न स्यात्तथा समवायलक्षणविशेषणाभावेपि विशेष्यप्रत्ययो न स्यादिति
भावः । ८ समवाय एवानुरागः संबन्धस्तस्य । ९ समवायेन । १० द्रव्यादेः ।
११ तस्य=अनुरागस्य । १२ आदिना ब्रह्माद्वैतादेश्च ।

भिधान[1]योजनारहितं प्रतिभाति, संकेतवशाच्चैतत्सर्वं ज्ञानाद्व्यादि। स्वशास्त्रजनितसंस्कारवशाद्धिज्ञानाद्व्यादिप्रतिभासोऽप्रमाणम्; इत्यन्य[2]त्रापि समानम्। न हि तत्रापि स्वशास्त्रसंस्काराद्दते 'समवायी' इति ज्ञानमनुभवत्यन्य[3]जनः। न चैतच्छास्त्रमप्रमाण-
५ मेतच्च प्रमाणमिति प्रेक्षावतां वक्तुं युक्तमविशेषात्।

समवाय इति प्रत्ययेनानैकान्तिक[4]श्चायं[5] हेतुः; स हि विशेष्यप्रत्ययो न च विशेषणमपेक्षते। अथात्र स[6]मवायिनो विशेषणम्। नन्वस्तु तेषां विशेषणत्वं यत्र 'समवायिनां समवायः' इति प्रतिभासते, यत्र तु 'समवायः' इत्येतावाननुभवस्तत्र किं विशेषणमिति
१० चिन्त्यताम्? अथ विशेषणाभावान्नेदं विशेष्यज्ञानम्; तर्ह्यन्य[7]स्य विशेष्यस्यात्रासंभवाद्विशेषणज्ञानमपि तन्मा भूत्। न चैत[8]द्युक्तम्। कथं चैवं 'पटः' इति प्रत्ययो विशेष्यः स्यात् विशेषणाभावाविशेषात्? अथात्र पटत्वं विशेषणम्, तर्हि 'समवायः' इति प्रत्यये किं विशेषणम्? न तावत्समवायत्वम्; अनभ्युपगमात्।

१५ अथ येन सता विशिष्टः प्रत्ययो जायते तद्विशेषणम्, तत्र 'समवायः' इति प्रत्ययोत्पादे समवायत्वसामान्यस्यानभ्युपगमात्, द्र[10]व्यादेश्चाप्रतिभासनाददृ[11]ष्टस्यैव विशेषणत्वमिति; तन्न; यतः किं येन सता विशेष्यज्ञान[12]मुत्पद्यते तद्विशेषणम्, किं वा यस्या[13]नुरागः प्रतिभा[14]सते तदिति? प्रथमपक्षे चक्षुरालोकादेरपि
२० तदनिवार्यम्। अथ यस्यानुरागस्तद्विशेषणम्; न तर्हि 'दण्डी' इति प्रत्यये द[15]ण्डवद्दण्डशब्दोल्लेखेन 'समवायः' इति प्रत्ययेऽप्यदृष्टस्य तच्छब्दयोजनाद्वारेणानुरागं जनो मन्यते। त[16]थाप्यदृष्टस्य विशेषणत्वकल्पनायाम् 'दण्डी' इत्यादिप्रत्ययेष्वस्यैव तत्कल्पनास्तु किं द्र[17]व्यादेर्विशेषणभावकल्पनया?

२५ यच्चोक्तम्-स्वकारणसत्तासंबन्ध एवात्म[18]लाभ इत्यादि; तन्न; आत्मलाभस्य स्वकारणसत्तासमवायपर्यायतायां नित्यत्वप्र[19]सङ्गात्, तन्नित्यत्वे च कार्यस्याविनाशित्वं स्यात्।

---

१ अभिधानः शब्दः। २ समवाये। ३ वैशेषिकः। ४ विशेषणपूर्वकलक्षणसाध्याभावात्। ५ विशेष्यप्रत्ययत्वादिति। ६ तन्तुपटादयः। ७ समवायिभ्यां भिन्नस्य। ८ समवायिप्रकरणे। ९ उभयं मा भूदिति। १० समवायः प्रतिभासते इति प्रत्यये विशेषणभूतस्य तन्तुपटादेः। ११ अदर्शनीभूतस्य (पुण्य-पापरूपस्य)। १२ इदं विशेष्यमिति ज्ञानम्। १३ संबन्धः। १४ विशेष्ये। १५ दण्डीति प्रत्यये दण्डशब्दोल्लेखेन दण्डस्य यथानुरागं मन्यते जनो न तथा प्रकृतेऽदृष्टशब्दयोजनाद्वारेणादृष्टस्यानुरागमिति संबन्धः। १६ अदृष्टानुरागाभ्युपगमाभावेपि। १७ दण्डादेस्तन्तुपटादेर्वा। १८ कार्यरूपस्य वस्तुनः स्वरूपोद्भवः। १९ सत्तासमवाययोर्नित्यत्वात्।

किञ्च, असौ सतां सत्तासमवायः, असतां वा स्यात्? न तावदसताम्; व्योमोत्पलादीनामपि तत्प्रसङ्गात्। अथात्यन्तासत्त्वात्तेषां न तत्प्रसङ्गः; गुणगुण्यादीनामत्यन्तासत्त्वाभावः कुतः? समवायाच्चेत्; इतरेतराश्रयः-सिद्धे हि समवाये तेषामत्यन्तासत्त्वाभावः, तदभावाच्च समवायः। नापि सताम्; समवायात्पूर्वं ५ हि सत्त्वं तेषां समवायान्तरात्, स्वतो वा? समवायान्तराच्चेत्; न अस्यैकत्वाभ्युपगमात्। अनेकत्वेपि अतोपि पूर्वं(वं)समवायान्तरात्तेषां सत्त्वमित्यनवस्था। स्वतः सत्त्वाभ्युपगमे तु समवायपरिकल्पनानर्थक्यम्। ननु न समवायात् पूर्वं तेषां सत्त्वमसत्त्वं वा, सत्तासमवायात्सत्त्वाभ्युपगमात्; इत्यप्यसङ्गतम्; १० परस्परव्यवच्छेदरूपाणामेकनिषेधस्यापरविधाननान्तरीयकत्वेनोभयनिषेधविरोधात्। न चानुपकारिणोः सत्तासमवाययोः परस्परसम्बन्धो युक्तोतिप्रसङ्गात्।

अव्यापि चेदं सत्त्वलक्षणम् सत्तासमवायान्त्यविशेषेषु तस्यासंभवात्। "त्रिषु पदार्थेषु सत्करी सत्ता" [ ] इत्यभिधा- १५ नात्। अतिव्यापि चाकाशकुशेशयादिष्वपि भावात्। न च तेषामसत्त्वान्न सत्तासमवायः; अन्योन्याश्रयानुषङ्गात्-असत्त्वे हि तेषां सत्तासमवायविरहः, तद्विरहाच्चासत्त्वमिति। न च सत्तासमवायः सत्त्वलक्षणं युक्तमर्थान्तरत्वात्। न ह्यर्थान्तरमर्थान्तरस्य स्वरूपम्; अतिप्रसङ्गादर्थान्तरत्वहानिप्रसङ्गाच्च। २०

किञ्च, सत्तासमवायात्पदार्थानां सत्त्वे तयोः कुतः सत्त्वम्? असत्संबन्धात्सत्त्वे अतिप्रसङ्गात्। सत्तासमवायान्तराच्चेत्; अनवस्था। स्वतश्चेत्; पदार्थानामपि तत्स्वत एवास्तु किं सत्तासमवायेन?

यदप्यभिहितम्-अग्नेरुष्णतावदित्यादि; तदप्यभिधानमात्रम्; २५ यतः प्रत्यक्षसिद्धे पदार्थस्वभावे स्वभावैरुत्तरं वक्तुं युक्तम्। न च 'समवायस्य स्वतः सम्बन्धत्वं संयोगादीनां तु तस्मात्' इत्यध्यक्ष-

१ व्योमोत्पलादीनां सर्वथा असत्त्वे प्रतिपादिते आचार्याः प्राहुः। २ अस्य=समवायस्य। ३ अतोपि=विवक्षितसमवायान्तरादपि। ४ सताम्। ५ व्यवच्छेदो हि परस्परं विरुद्धधर्मयोगिनामेव स्यात्। ६ परस्परम्। ७ द्वन्द्वोत्र ज्ञेयः। ८ तेषां स्वरूपेणैव सत्त्वस्वभावत्वात्। ९ तेषां हि सत्तासंबन्धादेव सत्त्वं स्वयं त्वसत्त्वमेवेति भावः। १० घटस्य पटस्वरूपत्वप्रसङ्गात्। ११ सद्भ्यां सत्तासमवायाभ्यां संबन्धः सत्संबन्धः, न सत्संबन्धोऽसत्संबन्धः। १२ गगनकुसुमादिषु। १३ अपरसत्तासमवायाभ्यां संबन्धाभावेपीत्यर्थः।

प्रसिद्धम्, तत्[1]स्वरूपस्याध्यक्षाद्यगोचरत्वप्रतिपादनात्। 'समवायोन्येन[2] संबध्यमानो न स्वतः संबध्यते संबध्यमानात्वाद्रूपादिवत्' इत्यनुमानविरोधाच्च। यदि चाग्निप्रदीपगङ्गोदकादीनामुष्णप्रकाशपवित्रतावत्समवायः स्वपरयोः[3] सम्बन्धहेतुः; तर्हि तद्दृष्टान्तावष्टम्भेनै[4]व ज्ञानं स्वपरयोः प्रकाशहेतुः किन्न स्यात्? तथाच "ज्ञानं ज्ञानान्तरवेद्यं प्रमेयत्वात्" [ ] इति प्लुवते।

यच्चोच्यते-'समवायः सम्बन्धान्तरं नापेक्षते, स्वतः सम्बन्धत्वात्, ये तु सम्बन्धान्तरमपेक्षन्ते न ते स्वतः सम्बन्धाः यथा घटादयः, न चायं न स्वतः सम्बन्धः, तस्मात्सम्बन्धान्तरं नापेक्षते इति; तदपि मनोरथमात्रम्; हेतोरसिद्धेः[5]। न हि समवायस्य स्वरूपासिद्धौ स्वतः सम्बन्धत्वं तत्र सिध्यति। संयोगेनानेकान्ताच्च[6]; स हि स्वतः सम्बन्धः सम्बन्धान्तरं चापेक्षते। न हि स्वतोऽसम्बन्धस्वभावत्वे संयोगादेः[7] परतस्तद्युक्तम्[8]; अतिप्रसङ्गात्। घटादीनां[10] च सम्बन्धित्वान्न परतोपि[11] सम्बन्धत्वम्। इत्ययुक्तमुक्तम्-'न ते स्वतःसम्बन्धाः' इति। तन्नास्य स्वतः सम्बन्धो युक्तः।

परतश्चेत्[12]किं संयोगात्, समवायान्तरात्, विशेषणभावात्, अदृष्टाद्वा? न तावत्संयोगात्; तस्य गुणत्वेन द्रव्याश्रयत्वात्, समवायस्य चाद्रव्यत्वात्। नापि समवायान्तरात्; तस्यै[13]करूपतयाभ्युपगमात्, "तत्त्वं[15] भावेन[16]" व्याख्यातम् [वैश० सू० ७।२।२८] इत्यभिधानात्।

नापि विशेषणभावात्; सम्बन्धान्तराभि[17]सम्बद्धार्थेष्वेवास्य[18] प्रवृत्तिप्रतीतेर्दण्डविशिष्टः पुरुष इत्यादिवत्, अन्यथा सर्वं सर्वस्य विशेषणं विशेष्यं च स्यात्। समवायादिसम्बन्धानर्थक्यं च, तदभावेपि गुणगुण्यादिभावोपपत्तेः। समवायस्य समवायिविशेषणतानुपपत्तिश्च, अत्यन्तमर्थान्तरत्वेनातद्धर्मत्वादाकाशवत्। न[19] खलु 'संयुक्ताविमौ' इत्यत्र संयोगिधर्मतामन्तरेण संयोगस्य

१ तस्य=समवायस्य। २ तन्तुपटादिलक्षणसंबन्धिना सह। ३ समवायसमवायिनोः। ४ अवष्टम्भोऽवलम्बः साहाय्यं वा। ५ स्वतःसंबन्धत्वादिति हेतोः। ६ न केवलं हेतोरसिद्धेरेव। ७ आदिना संयुक्तसमवायादिसंबन्धग्रहणम्। ८ समवायात्। ९ तत्=संबन्धत्वम्। १० दृष्टान्तभूतानाम्। ११ संयोगात्। १२ 'समवायस्य संबन्धः स्वसमवायिषु' इति शेषः। १३ समवायस्य। १४ परेण। १५ एकत्वम्। १६ सत्तया। १७ संबन्धान्तरं=तादात्म्यसंयोगादि। समवायसमवायिलक्षणेष्वित्यपरा टिप्पणी। १८ विशेषणभावस्य। १९ अतद्धर्मत्वं च स्यात्समवायिनां विशेषणत्वं च स्यादिति सन्दिग्धानैकान्तिकत्वपरिहारार्थमिदमाह।

तद्विशेषणता दृष्टा। न च समवायसमवायिनां सम्बन्धान्तराभिसम्बद्धत्वम्; अनभ्युपगमात्।

किञ्च, विशेषणभावोप्येतेभ्योऽत्यन्तं भिन्नस्तत्रैव कुतो नियाम्येत? समवायाच्चेत्; इतरेतराश्रयः–समवायस्य नियमसिद्धौ हि ततो विशेषणभावस्य नियमसिद्धिः, तत्सिद्धेश्च समवायस्य तत्सिद्धिरिति।

किञ्च, अयं विशेषणभावः षट्पदार्थेभ्यो भिन्नः, अभिन्नो वा? भिन्नश्चेत्; किं भावरूपः, अभावरूपो वा? न तावद्भावरूपः; 'षडेव पदार्थाः' इति नियमविरोधात्। नाप्यभावरूपः; अनभ्युपगमात्। अभेदेपि न तावद्द्रव्यम्; गुणाश्रितत्वाभावप्रसङ्गात्। अत एव न गुणोपि। नापि कर्म; कर्माश्रितत्वाभावानुषङ्गात्। "अकर्म कर्म" [ ] इत्यभिधानात्। नापि सामान्यम्; समवाये तदनुपपत्तेः, पदार्थत्रयवृत्तित्वात्तस्य। नापि विशेषः; विशेषाणां नित्यद्रव्याश्रितत्वात्। अनित्यद्रव्ये चास्योपलम्भात् समवाये चाभावानुषङ्गात्। युगपदनेकसमवायिविशेषणत्वे चास्यानेकत्वप्राप्तिः। यदिह युगपदनेकार्थविशेषणं तदनेकं प्रतिपन्नम् यथा दण्डकुण्डलादि, तथा च समवायः, तस्मादनेक इति। न च सत्त्वादिनाऽनेकान्तः; तस्यानेकस्वभावत्वप्रसाधनात्। तन्न विशेषणभावेनाप्यसौ सम्बद्धः।

नाप्यऽदृष्टेन; अस्य सम्बन्धरूपत्वासम्भवात्। सम्बन्धो हि द्विष्ठो भवताभ्युपगतः, अदृष्टश्चात्मवृत्तितया समवायसमवायिनोरतिष्ठन् कथं द्विष्ठो भवेत्? षोढा सम्बन्धवादित्वव्याघातश्च। यदि चाऽदृष्टेन समवायः सम्बध्यते; तर्हि गुणगुण्यादयोप्यत एव सम्बद्धा भविष्यन्तीत्यलं समवायादिकल्पनया। न चादृष्टोप्यसम्बद्धः समवायसम्बन्धहेतुः अतिप्रसङ्गात्। सम्बद्धश्चेत्; कुतोस्य सम्बन्धः? समवायाच्चेत्; अन्योन्यसंश्रयः। अन्यतश्चेत्; अभ्युपगमव्याघातः। तन्न सम्बद्धः समवायः।

नाप्यसम्बद्धः; 'षण्णामाश्रितत्वम्' इति विरोधानुषङ्गात्। कथं चासम्बद्धस्य सम्बन्धरूपतार्थान्तरवत्? सम्बन्धबुद्धिहेतुत्वाच्चेत्; महेश्वरादेरपि तत्प्रसङ्गः। कथं चासम्बद्धोसौ सम-

---

१ समवायस्य। २ समवायिभ्यः। ३ विशेषा नित्यद्रव्यवृत्तय इति वचनात्। ४ विशेषणभावस्य। ५ पूर्वम्। ६ समवायसिद्धौ हि समवायेनादृष्टस्य सम्बन्धत्वं सिध्यति तत्सिद्धौ चाऽदृष्टस्य सम्बद्धस्य समवायहेतुत्वं सिध्यति। ७ समवायः स्वत एव सम्बद्ध इत्यभ्युपगमः। ८ मतस्य।

वायिनोः सम्बन्धबुद्धिनिबन्धनम् ? न ह्यङ्गुल्योः संयोगो घट-पटयोरप्रवर्त्तमानस्तयोः सम्बन्धबुद्धिनिबन्धनं दृष्टः । तथा, 'इहात्मनि ज्ञानमित्यादिसम्बन्धबुद्धिर्न सम्बन्ध्यऽसम्बद्धसम्बन्धपूर्विका सम्बन्धबुद्धित्वात् दण्डपुरुषसम्बन्धबुद्धिवत्' इत्यनु-
५ मानविरोधश्च ।

किञ्च, अयं समवायः समवायिनोः परिकल्प्यते, असमवायिनोर्वा ? यद्यसमवायिनोः; घटपटयोरप्येतत्प्रसङ्गः । अथ समवायिनोः; कुतस्तयोः समवायित्वम्–समवायात्, स्वतो वा ? समवायाच्चेत्; अन्योन्याश्रयः–सिद्धे हि समवायित्वे तयोः सम-
१० वायः, तस्माच्च तत्त्वमिति ।

किञ्च, अभिन्नं तेनानयोः समवायित्वं विधीयते, भिन्नं वा ? न तावदभिन्नम्; तद्विधाने गगनादीनां विधानानुषङ्गात् । भिन्नं चेत्; तयोस्तत्सम्बन्धित्वानुपपत्तिः । सम्बन्धान्तरकल्पने चानवस्था । तत एव तन्नियमे चेतरेतराश्रयः–सिद्धे हि समवायिनोः
१५ समवायित्वनियमे समवायनियमसिद्धिः, ततश्च तन्नियमसिद्धिरिति । स्वत एव तु समवायिनोः समवायित्वे किं समवायेन ?

ननु संयोगेप्येतत्सर्वं समानम्; इत्यप्यवाच्यम्; संश्लिष्टतयोत्पन्नवस्तुस्वरूपव्यतिरेकेणास्याप्यसम्भवात् । भिन्नसंयोगवशात्तु संयोगिनोर्नियमे समानमेवैतत् ।

२० यच्चान्यदुक्तम्-संयोगिद्रव्यविलक्षणत्वाद्गुणत्वादीनामित्यादिः तदप्यनुक्तसमम्; यतो निष्क्रियत्वेप्येषामाधेयत्वमल्पपरिमाणत्वात्, तत्कार्यत्वात्, तथाप्रतिभासाद्वा ? तत्राद्यः पक्षोऽयुक्तः; सामान्यस्य महापरिमाणगुणस्य चानाधेयत्वप्रसङ्गात् । द्वितीयपक्षोप्यत एवायुक्तः ।

२५ तृतीयपक्षोप्यविचारितरमणीयः; तेषामाधेयतया प्रतिभासाभावात् । तदभावश्च रूपादीनां स्वाधारेष्वन्तर्बहिश्च सत्त्वात् । न ह्यन्यत्र कुण्डादावधिकरणे बदरादीनामाधेयानां तथा सत्त्वमस्ति । अथ रूपादीनामाधेयत्वे सत्यपि युतसिद्धेरभावादुपरि-

१ सम्बन्धी । २ घटपटाभ्यां पृथग्भूतः । ३ शब्दगगनाभ्यां समवायभिन्नस्य समवायित्वस्य समवायेन विधानात्तयोरपि विधानमित्यर्थः, एवं ज्ञानात्मादिष्वपि । ४ समवायिनोरिदं समवायित्वमिति सम्बन्धाभाव इति भावः । ५ तत्सम्बन्धित्व-सिध्यर्थम् । ६ तस्य=गुण्यादेः । ७ आधेयतया । ८ गगनवर्तिनः । ९ अल्पपरि-माणत्वाभावात् । १० घटादिषु । ११ आधेयस्य बहिरेव सत्त्वसद्भावादिति भावः । १२ अन्तर्बहिःप्रकारेण ।

तनतया प्रतिभासाभावः; न[1]; युतसिद्धत्वस्योपरितनत्वप्रतीत्य-हेतुत्वात्, अन्यथोर्ध्वावस्थितवंशादेः क्षीरनीरयोश्च[2] सम्बन्धे तत्प्रसङ्गात्[3]। ततः परपरिकल्पितपदार्थानां विचार्यमाणानां स्वरूपाव्यवस्थितेः कथं 'षडेव पदार्थाः' इत्यवधारणं घटते स्वरूपासिद्धौ संख्यासिद्धेरभावात्? 5

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवा-दजल्पवितण्डाहेत्वाभासच्छल[जाति]निग्रहस्थानानां नैयायिका-भ्युपगतषोडशपदार्थानां षट्पदार्थाधिक्येन व्यवस्थानाच्च। न च पदार्थषोडशकस्य षट्स्वेवान्तर्भावान्नातोऽधिकपदार्थव्यवस्थे-त्यभिधातव्यम्; द्रव्यादीनामपि षण्णां प्रमाणप्रमेयरूपपदार्थद्वये-ऽन्तर्भावात्पदार्थषट्कस्याप्यनुपपत्तेः[4]। अथ तदन्तर्भावेऽप्यवान्तर-विभिन्नलक्षणवशात् प्रयोजनवशाच्च द्रव्यादिषट्कव्यवस्था; तर्हि तत एव प्रमाणादिषोडशव्यवस्थाप्यस्तु विशेषाभावात्[5]। न च सापि युक्ता; परोपगतस्वरूपाणां प्रमाणादीनां यथास्थानं प्रति-षेधात्, विपर्ययानध्यवसाययोश्च प्रमाणादिषोडशपदार्थेभ्यो-ऽर्थान्तरभूतयोः प्रतीतेः। 10 15

धर्माधर्मद्रव्ययोश्च। कुतः प्रमाणात्तत्सिद्धिरिति चेत्? अनुमा-नात्; तथाहि-विवादापन्नाः सकलजीवपुद्गलाश्रयाः सकृद्गतयः साधारणबाह्यनिमित्तापेक्षाः, युगपद्भाविगतित्वात्, एकसरःस-लिला[6]श्रयानेकमत्स्यगतिवत्। तथा सकलजीवपुद्गलस्थितयः साधारणबाह्यनिमित्तापेक्षाः, युगपद्भाविस्थितित्वात्, एककु-ण्डाश्रयानेकबदरादिस्थितिवत्। यत्तु[7] साधारणं निमित्तं स धर्मोऽधर्मश्च[8], ताभ्यां विना तद्गतिस्थितिकार्यस्यासम्भवात्। 20

गतिस्थितिपरिणामिन एवार्थाः परस्परं तद्धेतवश्चेत्; न; अन्योन्याश्रयानुषङ्गात्—सिद्धायां हि तिष्ठत्पदार्थेभ्यो गच्छत्पदा-र्थानां गतौ तेभ्यस्तिष्ठत्पदार्थानां स्थितिसिद्धिः, तत्सिद्धौ च गच्छत्पदार्थानां गतिसिद्धिरिति। साधारणनिमित्तरहिता एवा-खिलार्थगतिस्थितयः प्रतिनियतस्वकारणपूर्वकत्वादिति चेत्; कथमिदानीं नर्त्तकीक्षणो[9][10] निखिलप्रेक्षकजनानां नानातद्धेदनो-[11] 25

---

१ इति चेन्न इत्यर्थः। २ युतसिद्धयोः। ३ उपरितनतया प्रतिभासस्य। ४ प्रमाणप्रमेयपदार्थद्वयेन्तर्भावः षण्णां विश्वतत्त्वप्रकाशिकायाम्। ५ विभिन्नलक्षण-वशात्प्रयोजनवशाच्च द्रव्यादिषट्कव्यवस्था भवति प्रमाणादिषोडशव्यवस्था च न भवतीति विशेषं नोत्पश्यामः। ६ बसः। ७ बाह्यं निमित्तं धर्मः। ८ अत्र निमित्तमधर्मः। ९ तस्य=सकलजीवादेः। १० नर्त्तकी एव क्षणः पर्यायः। ११ कामोत्कटहर्षादि।

त्पत्तौ साधारणं निमित्तम्? सहकारिमात्रत्वेन चेत्; तर्हि सकलार्थगतिस्थितीनां सकृद्भुवां धर्माधर्मौ सहकारिमात्रत्वेन साधारणं निमित्तं किन्नेष्यते?

पृथिव्यादिरेव साधारणं निमित्तं तासाम्; इत्यप्यसङ्गतम्; ५ गगनवर्त्तिपदार्थगतिस्थितीनां तदसम्भवात्। तर्हि नभः साधारणं निमित्तं तासामस्तु सर्वत्र भावात्; इत्यप्यपेशलम्, तस्यावगाह-निमित्तत्वप्रतिपादनात्। तस्यै[1]कस्यैवानेक[2]कार्यनिमित्ततायाम् अनेकसर्वगतपदार्थपरिकल्पनानर्थक्यप्रसङ्गात्, कालात्मदिक्सामान्यसमवायकार्यस्यापि यौगपद्यादिप्रत्ययस्य बुद्ध्यादेः १० 'इदमतः पूर्वेण' इत्यादिप्रत्ययस्य अन्वयज्ञानस्य 'इहेदम्' इति प्रत्ययस्य च नभोनिमित्तस्योपपत्तेस्तस्य सर्वत्र सर्वदा सद्भावात्। कार्यविशेषात्कालादिनिमित्तभेदव्यवस्थायाम् तत एव धर्मादि-निमित्तभेदव्यवस्थाप्यस्तु सर्वथा विशेषाभावात्[3]।

एतेना[4]दृष्टनिमित्तत्वमप्यासां प्रत्याख्यातम्; पुद्गलानामदृष्टा-१५ सम्भवाच्च। ये यदात्मोपभोग्याः पुद्गलास्त[5]द्गतिस्थितयस्त[6]दा-त्माऽदृष्टनिमित्ताश्चेत्; तर्ह्यसाधारणं निमित्तमदृष्टं तासां प्रति-नियतात्मादृष्टस्य प्रतिनियतद्रव्यगतिस्थितिहेतुत्वप्रसिद्धेः। न च तदनिष्टं तासां क्ष्मादेरिवासाधारणकारणस्यादृष्टस्यापीष्टत्वात्। साधारणं तु कारणं तासां धर्माधर्मावेवेति सिद्धः कार्यविशेषा-२० त्तयोः सद्भाव इति*।

अथेदानीं[10] फलविप्रतिपत्तिनिराकरणार्थमज्ञाननिवृत्तिरित्या-द्याह—

अज्ञाननिवृत्तिः हानोपादानोपेक्षाश्च फलम् ॥ ५।१ ॥

२५ प्रमाणादभिन्नं भिन्नं च ॥ ५।२ ॥

१ तस्याः। २ अनेकानि=गतिस्थित्यवगाहलक्षणानि। ३ कार्यविशेषत्वस्य। ४ सकृद्भुवां सकलार्थगतिस्थितीनां नभोनिमित्तत्वनिराकरणेन। ५ तेषां पुद्गलानाम्। ६ येनात्मना ते पुद्गला उपभुज्यन्ते तस्य। ७ गत्यादीनाम्। ८ पृथिव्यादेः। ९ जनानाम्। १० विषयविप्रतिपत्तिनिराकरणानन्तरम्। ११ प्रमाणाद्भिन्नमेव फलमिति यौगाः अभिन्नमेवेति सौगता इति भिन्नाभिन्नत्वाभ्यां फले विप्रतिपत्तिः।

* (परीक्षामुखे-प्रमेयरत्नमालायां च अत्रैव चतुर्थपरिच्छेदस्य समाप्तिः 'अज्ञान-निवृत्तिः' इत्यादिसूत्रं तु पंचमाध्याये संगणितम्)

द्विविधं हि प्रमाणस्य फलं ततो भिन्नम्, अभिन्नं च। तत्राज्ञाननिवृत्तिः प्रमाणादभिन्नं फलम्। ननु[1] चाज्ञाननिवृत्तिः प्रमाणभूतज्ञानमेव, न तदेव तस्यैव कार्यं युक्तं विरोधात्, तत्कुतोसौ प्रमाणफलम्? इत्यनुपपन्नम्; यतोऽज्ञानमज्ञप्तिः स्वपररूपयोर्व्यामोहः, तस्य निवृत्तिर्यथावत्तद्रूपयोर्ज्ञप्तिः, प्रमाणधर्मत्वात्[2] तत्कार्यतया　５
न विरोधमध्यास्ते। स्वविपर्यये[3] हि स्वार्थस्वरूपे प्रमाणस्य व्यामोहविच्छेदाभावे निर्विकल्पकदर्शनात् सन्निकर्षाद्यविशेषप्रसङ्गतः प्रामाण्यं न स्यात्। न च धर्मधर्मिणोः सर्वथा भेदोऽभेदो वा; तद्भावविरोधानुषङ्गात् तदन्यतरवदर्थान्तरवच्च[4]।

अथाज्ञाननिवृत्तिर्ज्ञानमेवेत्यनयोः सामर्थ्यसिद्धत्वा[5]न्यथा[6]नुपप-　१०
त्तेरभेदः; तन्न; अस्या[7]ऽविरुद्धत्वात्। सामर्थ्यसिद्धत्वं हि भेदे सत्येवोपलब्धं निमन्त्रणे आकारणवत्[8]। कथं चैवं वादिनो[9] हेतावन्वयव्यतिरेकधर्मयोर्भेदः सिध्येत्? 'साध्यसद्भावेऽस्तित्वमेव हि साध्याभावे हेतोर्नास्तित्वम्' इत्यनयोरपि सामर्थ्यसिद्धत्वाविशेषात्।　१५

न[10] चानयो[11]रभेदे कार्यकारणभावो विरुध्यते; अभेदस्य तद्भावाविरोधकत्वाज्जीवसुखादिवत्। साधकतमस्वभावं हि प्रमाणम् स्वपररूपयोर्ज्ञप्तिलक्षणामज्ञाननिवृत्तिं निर्वर्त्तयति तत्रान्येना[12]स्या निर्वर्त्तनाभावात्। साधकतमस्वभावत्वं चास्य स्वपरग्रहणव्यापार एव तद्ग्रहणाभिमुख्यलक्षणः। तद्धि स्वकारणकलापादुपजायमानं　२०
स्वपरग्रहणव्यापारलक्षणोपयोग[13]रूपं सत्स्वार्थव्यवसायरूपतया परि[?]मते इत्यभेदेऽप्यनयोः[14] कार्यकारणभावाऽविरोधः।

नन्वेवमज्ञाननिवृत्ति[15]रूपतयेव हानादि[16]रूपतयाप्यस्य परिणमनसम्भवात् तदप्यस्याऽभिन्नमेव फलं स्यात्; इत्यप्यसुन्दरम्; अज्ञाननिवृत्तिलक्षणफलेनास्य[17] व्यवधान[18]सम्भवतो भिन्नत्वाविरोधात्।　२५

---

१ सौगतः प्राह। २ अज्ञाननिवृत्तेः। ३ प्रमाणविषये। ४ प्रमाणधर्मत्वादित्येतस्याऽसिद्धत्वनिरासार्थमिदम्। ५ ज्ञानाज्ञाननिवृत्त्योः सामर्थ्यमस्ति तच्चाभेदमन्तरेण नोपपद्यते तस्मादनयोरभेद इति भावः। ६ अभेदमन्तरेण। ७ भेदस्य। ८ आह्वानवत्। ९ अज्ञाननिवृत्तिर्ज्ञानमेवेत्यनयोः सामर्थ्यसिद्धत्वान्यथानुपपत्तेरभेद इत्येवंवादिनः। १० नन्वज्ञाननिवृत्तिः प्रमाणादभिन्नं फलमित्यनेन प्रकारेण प्रमाणफलयोरभेदे कार्यकारणभावो विरुध्यत इत्युक्ते सत्याह। ११ प्रमाणाज्ञाननिवृत्त्योः। १२ सन्निकर्षादिना। १३ अर्थग्रहणे व्यापारो ह्युपयोग इति वचनात्। १४ प्रमाणफलयोः। १५ साक्षात्फलमेतत्। १६ परम्पराफलमेतत्। १७ हानादेः। १८ प्रमाणादज्ञाननिवृत्तिः फलं स्यात्, अज्ञाननिवृत्तिफलात्पश्चाद्धानोपादानोपेक्षाश्च फलं स्यादिति भावः।

अत आह-हानोपादानोपेक्षाश्च प्रमाणाद्भिन्नं फलम् । अत्रापि कथञ्चिद्भेदो द्रष्टव्यः । सर्वथा भेदे प्रमाणफलव्यवहारविरोधात् । अमुमेवार्थं स्पष्टयन् यः प्रमिमीते इत्यादिना लौकिकेतरप्रतिपत्तिप्रसिद्धां प्रतीतिं दर्शयति—

५ **यः प्रमिमीते स एव निवृत्ताज्ञानो जहात्यादत्त उपेक्षते चेति प्रतीतेः ॥ ५।३ ॥**

यः प्रतिपत्ता प्रमिमीते स्वार्थग्रहणपरिणामेन परिणमते स एव निवृत्ताज्ञानः स्वविषये व्यामोहविरहितो जहात्यभिप्रेतप्रयोजनाप्रसाधकमर्थम्, तत्प्रसाधकं त्वादत्ते, उभयप्रयोजनाऽप्र-
१० साधकं तूपेक्षणीयमुपेक्षते चेति प्रतीतेः प्रमाणफलयोः कथञ्चिद्भेदाभेदव्यवस्था प्रतिपत्तव्या ।

ननु[2]एवं प्रमातृप्रमाणफलानां भेदाभावात्प्रतीतिप्रसिद्धस्तद्व्यवस्थाविलोपः स्यात्; तदसाम्प्रतम्; कथञ्चिल्लक्षणभेदतस्तेषां भेदात् । आत्मनो हि पदार्थपरिच्छित्तौ साधकतमत्वेन व्याप्रि-
१५ यमाणं स्वरूपं प्रमाणं निर्व्यापारम्, व्यापारं[3] तु क्रियोच्यते, स्वातन्त्र्येण पुनर्व्याप्रियमाणं प्रमाता, इति कथञ्चित्तद्भेदः । प्राक्तनपर्यायविशिष्टस्य कथञ्चिदवस्थितस्यैव बोधस्य परिच्छित्तिविशेषरूपतयोत्पत्तेरभेद इति । साधनभेदाच्च तद्भेदः; करणसाधनं हि प्रमाणं साधकतमस्वभावम्, कर्तृसाधनस्तु
२० प्रमाता स्वतन्त्रस्वरूपः, भावसाधना तु क्रिया स्वार्थनिर्णीतिस्वभावा इति कथञ्चिद्भेदाभ्युपगमादेव कार्यकारणभावस्याप्यविरोधः ।

यच्चोच्यते-आत्मव्यतिरिक्तक्रियाकारि प्रमाणं कारकत्वाद्वास्यादिवत्; तत्र कथञ्चिद्भेदे साध्ये सिद्धसाध्यता, अज्ञाननिवृत्ते-
२५ स्तद्धर्मतया हानादेश्च तत्कार्यतया प्रमाणात्कथञ्चिद्भेदाभ्युपगमात् । सर्वथा भेदे तु साध्ये साध्यविकलो दृष्टान्तः, वास्यादिना

---

१ इतरः शास्त्रज्ञः । २ यः प्रतिपत्ता प्रमिमीते इत्यादिप्रकारेण । ३ आत्मस्वरूपम् । ४ परिच्छित्तिरूपा । ५ प्रमाणस्य । ६ फलरूपतया । ७ साधनं करणकर्त्रादि । ८ प्रमातृप्रमाणपरिच्छित्तिभेदः । ९ करणे साधनं व्युत्पादनं यस्य, प्रमीयते वस्तुतत्त्वं येनेति तत्करणसाधनं प्रमाणम् । १० कर्तरि साधनं व्युत्पादनं यस्य प्रमातुः, प्रमिमीते इति तथोक्तः । ११ प्रमितिः प्रमाणम् । १२ यः प्रतिपत्ता प्रमिमीते इत्यनेन प्रकारेण प्रमाणफलयोरभेदे कार्यकारणभावविरोध इत्युक्ते सत्याह । १३ आत्मा=स्वरूपम् ।

हि काष्ठादेश्छिदा निरूप्यमाणा[1] छेद्यद्रव्यानुप्रवेशलक्षणैवावतिष्ठते। स चानुप्रवेशो वास्यादेरात्मगत एव धर्मो नार्थान्तरम्। ननु छिदा काष्ठस्था वास्यादिस्तु देवदत्तस्थ इत्यनयोर्भेद एव; इत्यप्यसुन्दरम्; सर्वथा भेदस्यैव[2]मसिद्धेः, सत्त्वादिनाऽभेदस्यापि प्रतीतेः। न च 'सर्वथा करणाद्भिन्नैव क्रिया' इति नियमोस्ति[3]; 5 'प्रदीपः स्वात्मनात्मानं प्रकाशयति' इत्यत्राभेदेनाप्यस्याः प्रतीतेः। न खलु प्रदीपात्मा[4] प्रदीपाद्भिन्नः; तस्या[5]ऽप्रदीपत्वप्रसङ्गात् पटवत्। प्रदीपे प्रदीपात्मनो भिन्नस्यापि समवायात्प्रदीपत्वसिद्धिरिति चेत्; न; अप्रदीपेपि घटादौ प्रदीपत्वसमवायानुषङ्गात्। प्रत्यासत्तिविशेषात्प्रदीपात्मनः प्रदीप एव समवायो नान्यत्रेति चेत्; स 10 कोऽन्योन्यत्र कथञ्चित्तादात्म्यात्।

एतेन[6] प्रकाशनक्रियाया अपि प्रदीपात्मकत्वं प्रतिपादितं प्रतिपत्तव्यम्। तस्यास्ततो भेदे प्रदीपस्याऽप्रकाशकद्रव्यत्वानुषङ्गात्। तत्रास्याः समवायान्नायं दोषः; इत्यप्यसमीचीनम्; अनन्तरोक्ताऽशेषदोषानुषङ्गात्। तन्नानयो[7]रात्यन्तिको भेदः। 15

नाप्यभेदः; तदऽव्यवस्थानुषङ्गात्। न[8] खलु 'सारूप्य[9]मस्य[10] प्रमाणमधिगतिः फलम्' इति सर्वथा तादात्म्ये व्यवस्थापयितुं शक्यं विरोधात्।

ननु सर्वथाऽभेदेप्यनयोर्व्यावृत्तिभेदात्प्रमाणफलव्यवस्था घटते एव, अप्रमाणव्यावृत्त्या हि ज्ञानं प्रमाणमफलव्यावृत्त्या च फलम्; 20 इत्यप्यविचारितरमणीयम्; परमार्थतः स्वेष्ट[11]सिद्धिविरोधात्। न च स्वभावभेदमन्तरेणान्यव्यावृत्तिभेदोप्युपपद्यते इत्युक्तं सारूप्यविचारे। कथं चास्याऽप्रमाणफलव्यावृत्त्या प्रमाणफलव्यवस्थावत् प्रमाणफलान्तरव्यावृत्त्याऽप्रमाणफलव्यवस्थापि न स्यात्? ततः पारमार्थिके प्रमाणफले प्रतीतिसिद्धे कथञ्चिद्भिन्ने प्रतिपत्तव्ये 25 प्रमाणफलव्यवस्था[12]न्यथानुपपत्तेरिति स्थितम्।

---

१ दृश्यमाना क्रियमाणा वा। २ भिन्नाधिकरणत्वेन। ३ लोके। ४ आत्मा=स्वरूपं प्रदीपत्वमिति यावत्। ५ अन्यथा। ६ प्रदीपप्रदीपात्मनोरभेदप्रतिपादनेन। ७ प्रमाणफलयोः। ८ सौगतमाशङ्क्योच्यते। ९ अर्थेन सादृश्यं प्रमाणम्। १० निर्विकल्पकज्ञानस्य। ११ स्वेष्टः प्रमाणफलयोर्भेदः। १२ पारमार्थिककथञ्चिद्भिन्नत्वव्यतिरेकेण।

योऽनेकान्तपदं प्रवृद्धमतुलं स्वेष्टार्थसिद्धिप्रदम्,
प्राप्तोऽनन्तगुणोदयं निखिलविन्निःशेषतो निर्मलम्।
स श्रीमानखिलप्रमाणविषयो जीयाज्जनानन्दनः,
मिथ्यैकान्तमहान्धकाररहितः श्रीवर्द्धमानोदितः॥

५ इति श्रीप्रभाचन्द्रविरचिते प्रमेयकमलमार्तण्डे परीक्षामुखालङ्कारे
चतुर्थः परिच्छेदः ॥ श्रीः ॥

---

१ अखिलप्रमाणविषयपक्षे निखिलवित् केवलज्ञानं यस्मादनेकान्तपदात्तन्निखिलविदनेकान्तपदम्। सर्वज्ञपक्षे तु निखिलं वेत्तीति निखिलवित्। एतत्पदं सर्वज्ञापरनामकं विशेष्यमपराणि विशेषणानि। ततश्च निखिलवित्सर्वज्ञो जीयात्। विषयपक्षेऽखिलानां प्रमाणानां विषयोऽर्थ इति यत्पूर्वकस्तासः। सर्वज्ञपक्षे तु निखिलवित्कथम्भूतः अखिलप्रमाणविषयः सर्वप्रमाणग्राह्य इत्यर्थः।

श्रीः।

अथ पञ्चमः परिच्छेदः ॥

अथेदानीं तदाभासस्वरूपनिरूपणाय—

ततोन्यत्तदाभासम् ॥ १ ॥

इत्याद्याह।

प्रतिपादितस्वरूपात्प्रमाणसंख्याप्रमेयफलाद्यदन्यत्तत्तदाभासमिति। त[1]देव तथाहीत्यादिना यथाक्रमं व्याचष्टे। तत्र प्रतिपादितस्वरूपात्स्वार्थव्यवसायात्मकप्रमाणादन्ये—

अस्व[2]संविदितगृहीतार्थदर्शन[3]संशयाद[4]यः प्रमाणाभासाः ॥ २ ॥

प्रवृत्तिविषयोपदर्शकत्वाभावात् ॥ ३ ॥

[5]पुरुषान्तरपूर्वार्थगच्छत्तृणस्पर्शस्थाणुपुरुषादिज्ञानवत् ॥ ४ ॥

[6]चक्षूरसयोर्द्रव्ये संयुक्तसमवायवच्च[7] ॥ ५ ॥

एतच्च सर्वं प्रमाणसामान्यलक्षणपरिच्छेदे विस्तरतोऽभिहितमिति पुनर्नेहाभिधीयते। तथा

अवैशद्ये प्रत्यक्षं तदाभासं बौद्धस्याकस्माद्धूमदर्शनाद् वह्निविज्ञानवत् ॥ ६ ॥

विशदं प्रत्यक्षमित्युक्तं ततोन्यस्मिन्नऽवैशद्ये सति प्रत्यक्षं तदा-

---

१ तेषां=प्रमाणसंख्याविषयफलानाम्। २ अस्वसंविदितस्य स्वग्राहकत्वाभावेनार्थप्रतिपत्त्ययोगात्प्रवृत्तिविषयोपदर्शकत्वाभावः। ३ निर्विकल्पकं दर्शनम्, तस्य प्रवृत्तिविषयोपदर्शकत्वाभावस्तज्जनितविकल्पस्यैव तदुपदर्शकत्वात्। ४ आदिना विपर्ययानध्यवसायौ। ५ अत्रोदाहरणानि यथाक्रममाह। ६ सन्निकर्षवादिनं प्रत्यपरं च दृष्टान्तमाह। ७ अयमर्थो—यथा चक्षूरसयोः संयुक्तसमवायः सन्नपि न प्रमाणं तथा चक्षूरूपयोरपि। तस्मादयमपि प्रमाणाभास एवेति।

भासं बौद्धस्याकस्मिकधूमदर्शनाद्वह्निविज्ञानवत् इत्यप्युक्तं प्रपञ्चतः प्रत्यक्षपरिच्छेदे।

वैशद्येपि परोक्षं तदाभासं मीमांसकस्य करणज्ञानवत् ॥ ७ ॥

५ न हि करणज्ञानेऽव्यवधानेन प्रतिभासलक्षणं वैशद्यमसिद्धं स्वार्थयोः प्रतीत्यन्तरनिरपेक्षतया तत्र प्रतिभासनादित्युक्तं तत्रैव। तथाऽनुभूतेर्थे तदित्याकारा स्मृतिरित्युक्तम्। अननुभूते—

अतस्मिंस्तदिति ज्ञानं स्मरणाभासं जिनदत्ते स देवदत्तो यथेति ॥ ८ ॥

१० तथैकत्वादिनिबन्धनं तदेवेदमित्यादि प्रत्यभिज्ञानमित्युक्तम्। तद्विपरीतं तु—

सदृशे तदेवेदं[2] तस्मिन्नेव तेन सदृशं[3] यमलकवदित्यादि[4] प्रत्यभिज्ञानाभासम् ॥ ९ ॥

असम्बन्धे तज्ज्ञानं तर्काभासम्, यावाँस्तत्पुत्रः स श्यामः इति यथा ॥ १० ॥

१५

व्याप्तिज्ञानं तर्क इत्युक्तम्। ततोन्यत्पुनः असम्बन्धे-अव्याप्तौ[5] तज्ज्ञानं=व्याप्तिज्ञानं तर्काभासम्। यावाँस्तत्पुत्रः स श्याम इति यथा।

इदमनुमानाभासम् ॥ ११ ॥

२० साधनात्साध्यविज्ञानमनुमानमित्युक्तम्। तद्विपरीतं त्विदं वक्ष्यमाणमनुमानाभासम्। पक्षहेतुदृष्टान्तपूर्वकश्चानुमानप्रयोगः प्रतिपादित इति। तत्रेत्यादिना यथाक्रमं पक्षाभासादीनुदाहरति।

तत्र अनिष्टादिः पक्षाभासः ॥ १२ ॥

---

१ यथा धूमबाष्पादिविवेकनिश्चयाभावाद्व्याप्तिग्रहणाभावादकस्माद्धूमदर्शनाज्जातं यद्वह्निविज्ञानं तत्तदाभासं भवति कस्मादनिश्चयात्, तथा बौद्धपरिकल्पितं यन्निर्विकल्पकप्रत्यक्षं तत् प्रत्यक्षाभासं भवति कस्मादनिश्चयात्। २ एकत्वप्रत्यभिज्ञानाभासम्। ३ सादृश्यप्रत्यभिज्ञानाभासम्, स्वयं स्वेन सदृशमित्यर्थः। ४ यमलकं=युगलम्। ५ अविनाभावाभावे।

तत्रानुमानाभासेऽनिष्टादिः पक्षाभासः। तत्र—

अनिष्टो मीमांसकस्याऽनित्यः शब्द इति ॥ १३ ॥

स हि प्रतिवाद्याद्यादिदर्शनात्कदाचिदाकुलितबुद्धिर्विसंस्मरन्ननभिप्रेतमपि पक्षं करोति।

तथा सिद्धः श्रावणः शब्दः ॥ १४ ॥ ५

सिद्धः पक्षाभासः, यथा श्रावणः शब्द इति, वादिप्रतिवादिनोस्तत्राऽविप्रतिपत्तेः। तथा—

बाधितः प्रत्यक्षानुमानागमलोकस्ववचनैः ॥ १५ ॥

पक्षाभासो भवति।

तत्र प्रत्यक्षबाधितो यथा— १०

अनुष्णोऽग्निर्द्रव्यत्वाज्जलवत् ॥ १६ ॥

अनुमानबाधितो यथा—

अपरिणामी शब्दः कृतकत्वाद्घटवत् ॥ १७ ॥

तथाहि—'परिणामी शब्दोऽर्थक्रियाकारित्वात्कृतकत्वाद् घटवत्' इति अर्थक्रियाकारित्वादयो हि हेतवो घटे परिणामित्वे १५ सत्येवोपलब्धाः, शब्देष्वप्युपलभ्यमानाः परिणामित्वं प्रसाधयन्ति इति 'अपरिणामी शब्दः' इति पक्षस्यानुमानबाधा।

आगमबाधितो यथा—

प्रेत्याऽसुखप्रदो धर्मः पुरुषाश्रितत्वादधर्मवदिति ॥ १८ ॥ २०

आगमे हि धर्मस्याभ्युदयनिःश्रेयसहेतुत्वं तद्विपरीतत्वं चाधर्मस्य प्रतिपाद्यते। प्रामाण्यं चास्य प्रागेव प्रतिपादितम्।

लोकबाधितो यथा—

शुचि नरशिरःकपालं प्राण्यङ्गत्वाच्छङ्खशुक्तिवदिति ॥ १९ ॥ २५

---

१ बाधितः। २ आदिना सभ्यसभापत्यादिग्रहः। ३ स्वाभिप्रेतं नित्यः शब्द इति पक्षम्।

लोके हि प्राण्यङ्गत्वाविशेषेपि किञ्चिदपवित्रं किञ्चित्पवित्रं च वस्तुस्वभावात्प्रसिद्धम्। यथा गोपिण्डोत्पन्नत्वाविशेषेपि वस्तुस्वभावतः किञ्चिद्दुग्धादि शुद्धं न गोमांसम्। यथा वा मणित्वाविशेषेपि कश्चिद्विषापहारादिप्रयोजनविधायी महामूल्योऽन्यस्तु ५तद्विपरीतो वस्तुस्वभाव इति।

स्ववचनबाधितो यथा—

माता मे वन्ध्या पुरुषसंयोगेप्यगर्भत्वात्प्रसिद्धवन्ध्यावत् ॥ २० ॥

अथेदानीं पक्षाभासानन्तरं हेत्वाभासेत्यादिना हेत्वाभासानाह—

१० **हेत्वाभासा असिद्धविरुद्धानैकान्तिकाऽकिञ्चित्कराः ॥ २१ ॥**

साध्याविनाभावित्वेन निश्चितो हेतुरित्युक्तं प्राक्। तद्विपरीतास्तु हेत्वाभासाः। के ते? असिद्धविरुद्धानैकान्तिकाऽकिञ्चित्कराः।

१५ तत्रासिद्धस्य स्वरूपं निरूपयति—

असत्सत्तानिश्चयोऽसिद्धः इति ॥ २२ ॥

सत्ता च निश्चयश्च [सत्तानिश्चयौ] असन्तौ सत्तानिश्चयौ यस्य स तथोक्तः। तत्र—

अविद्यमानसत्ताकः परिणामी शब्दश्चाक्षुषत्वादिति ॥ २३ ॥ २०

कथमस्याऽसिद्धत्वमित्याह—

स्वरूपेणासिद्धत्वात् इति ॥ २४ ॥

चक्षुर्ज्ञानग्राह्यत्वं हि चाक्षुषत्वम्, तच्च शब्दे स्वरूपेणासत्त्वादसिद्धम्। पौद्गलिकत्वात्तत्सिद्धिः[1]; इत्यप्यपेशलम्; तदविशेषेप्यनु-२५द्भूतस्वभावस्यानुपलम्भसम्भवा[2]ज्जलकनकादिसंयुक्तानले[3] भासुररूपोष्णस्पर्शवदित्युक्तं तत्पौद्गलिकत्वसिद्धिप्रघट्टके।

ये च विशेष्यासिद्धादयोऽसिद्धप्रकाराः परैरिष्टास्तेऽसत्सत्ता-

१ श्रावणज्ञानग्राह्यत्वमस्येति। २ रूपादिकक्षणस्य, यतः। ३ चक्षुषा।

कत्वलक्षणासिद्धप्रकारान्नार्थान्तरम्, तल्लक्षणभेदाभावात्। यथैव हि स्वरूपासिद्धस्य स्वरूपतोऽसत्त्वादसत्सत्ताकत्वलक्षणमसिद्धत्वं तथा विशेष्यासिद्धादीनामपि विशेष्यत्वादिस्वरूपतोऽसत्त्वात्तल्लक्षणमेवासिद्धत्वम्।

तत्र विशेष्यासिद्धो यथा–अनित्यः शब्दः सामान्यवत्त्वे सति चाक्षुषत्वात्।

विशेषणासिद्धो यथा–अनित्यः शब्दश्चाक्षुषत्वे सति सामान्यवत्त्वात्।

आश्रयासिद्धो यथा–अस्ति प्रधानं[1] विश्वपरिणामित्वात्।

आश्रयैकदेशासिद्धो यथा–नित्याः परमाणुप्रधानात्मेश्वरा[2] अकृतकत्वात्[3]।

व्यर्थविशेष्यासिद्धो यथा–अनित्याः परमाणवः कृतकत्वे सति सामान्यवत्त्वात्।

व्यर्थविशेषणासिद्धो[4] यथा–अनित्याः परमाणवः सामान्यवत्त्वे सति कृतकत्वात्। व्यर्थविशेष्यविशेषणश्चासावसिद्धश्चेति[5]।

व्यधिकरणासिद्धो[6] यथा–अनित्यः शब्दः पटस्य कृतकत्वात्। व्यधिकरणश्चासावसिद्धश्चेति। ननु शब्दे कृतकत्वमस्ति तत्कथमस्यासिद्धत्वम्? तदयुक्तम्; तस्य[7] हेतुत्वेनाप्रतिपादितत्वात्। न[8] चान्यत्र प्रतिपादितमन्यत्र सिद्धं भवत्यतिप्रसङ्गात्[9]।

भागासिद्धो[10] यथा–[अ]नित्यः शब्दः प्रयत्नानन्तरीयकत्वात्[11]। व्यधिकरणासिद्धत्वं भागासिद्धत्वं च परप्रक्रियाप्रदर्शनमात्रं[12] न वस्तुतो[13] हेतुदोषः; व्यधिकरणस्यापि 'उदेष्यति शकटं कृत्तिकोदयात्, उपरि वृष्टो देवोऽधः पूरदर्शनात्' इत्यादेर्गमकत्वप्र-

---

१ परमार्थतः प्रधानं नास्तीति भावः। २ अयमाश्रयस्तत्र प्रधानेश्वरौ न स्त एव। ३ कृतकत्वेनाऽनित्यत्वसिद्धिर्यतः। ४ व्यर्थं विशेषणं यस्य स तथोक्तः, स चासावसिद्धश्चेति विग्रहः। ५ विशेष्यं च विशेषणं च विशेष्यविशेषणे, व्यर्थे विशेष्यविशेषणे यस्येति विग्रहः। ६ विभिन्नमधिकरणमस्येति विग्रहः। ७ शब्दस्थस्य कृतकत्वस्य। ८ तथा प्रतिपादितमपि कृतकत्वं शब्दे सिद्धं भविष्यतीत्युक्ते सत्याह। ९ एकत्र हेतूपन्यासे सर्वत्र साध्यसिद्धिप्रसङ्गात्। १० पक्षैकभागे असिद्धः, आश्रयैकदेशासिद्धभागासिद्धयोरयं विशेषः–तत्राश्रयैकदेशोऽसिद्धो हेतुश्च सिद्ध एव, अत्र स्वाश्रयैकदेशे हेतुरसिद्ध आश्रयैकदेशस्तु सिद्ध एव। ११ प्रयत्नानन्तरीयकत्वं पुरुषव्यापारोत्पन्ने शब्दे न तु मेघादिशब्दे इति भावः। १२ परे नैयायिकादयः। १३ जैनानाम्।

तीतेः। अविनाभावनिबन्धनो हि गम्यगमकभावः, न तु व्यधिकरणाव्यधिकरणनिबन्धनः 'स श्यामस्तत्पुत्रत्वात्, धवलः प्रासादः काकस्य कार्ष्ण्यात्' इत्यादिवत्[1]।

न[2] च व्यधिकरणस्यापि गमकत्वे अविद्यमानसत्ताकत्वलक्षणमसिद्धत्वं विरुध्यते; न हि पक्षेऽविद्यमानसत्ताकोऽसिद्धोऽभिप्रेतो गुरूणाम्। किं तर्हि? अविद्यमाना साध्येनासाध्येन[3]ोभयेन वाऽविनाभाविनी सत्ता यस्या[4]सावसिद्ध इति।

भागासिद्धस्याप्यविनाभावसद्भावाद्गमकत्वमेव। न खलु प्रयत्नानन्तरीयकत्वं[5]मनित्यत्वमन्तरेण क्वापि दृश्यते। यावति[6] च तत्प्रवर्त्तते तावतः शब्दस्यानित्यत्वं ततः प्रसिद्ध्यति, अन्यस्य[7] त्वन्यतः कृतकत्वादेरिति। यद्वा-'प्रयत्नानन्तरीयकत्वहेतूपादानसामर्थ्यात्' प्रयत्नानन्तरीयक एव शब्दोऽत्र पक्षः। तत्र चास्य सर्वत्र प्रवृत्तेः कथं भागासिद्धत्वमिति?

अथेदानीं द्वितीयमसिद्धप्रकारं व्याचष्टे—

अविद्यमाननिश्चयो मुग्धबुद्धिं प्रत्यग्निरत्र धूमादिति ॥ २५ ॥

कुतोस्याविद्यमाननियततेत्याह—

तस्य वाष्पादिभावेन भूतसंघाते सन्देहात् ॥ २६ ॥

मुग्धबुद्धेर्वाष्पादिभावेन भूतसंघाते[8] सन्देहात्[9]। न खलु साध्यसाधनयोरव्युत्पन्नप्रज्ञः 'धूमादिरीदृशो वाष्पादिश्चेदृशः' इति विवेचयितुं समर्थः।

साङ्ख्यं प्रति परिणामी शब्दः कृतकत्वादिति ॥ २७ ॥

चाविद्यमाननिश्चयः। कुत एतत्?

तेनाज्ञातत्वात् ॥ २८ ॥

---

१ अव्यधिकरणव्यधिकरणत्वमुभयत्रास्ति तथाप्यविनाभावाभावेनासद्धेतुत्वमिति भावः। २ न चाशङ्कनीयम्। ३ दृष्टान्तेन। ४ हेतोः। ५ साधनम्। ६ पुरुषव्यापारोत्पन्ने शब्दे। ७ मेघादिशब्दस्य धर्मिरूपस्य। ८ पृथिव्यादिलक्षणानां भूतानां संघातो धूमस्तस्मिन् धूमे। ९ विद्यमानधूमेपि।

न ह्यस्याविर्भावादन्यत् कारणव्यापारादसतो रूपस्यात्मलाभलक्षणं कृतकत्वं प्रसिद्धम् ।

सन्दिग्धविशेष्यादयोऽप्यविद्यमाननिश्चयतालक्षणातिक्रमाभावान्नार्थान्तरम् । तत्र सन्दिग्धविशेष्यासिद्धो यथा-अद्यापि रागादियुक्तः कपिलः[2] पुरुषत्वे सत्यद्याप्यनुत्पन्नतत्त्वज्ञानत्वात्[3] । सन्दिग्धविशेषणासिद्धो यथा-अद्यापि रागादियुक्तः कपिलः सर्वदा तत्त्वज्ञानरहितत्वे सति पुरुषत्वात् । एते एवासिद्धभेदाः केचिदन्यतरासिद्धाः[4] केचिदुभयासिद्धाः[5] प्रतिपत्तव्याः ।

ननु नास्त्यन्यतरासिद्धो हेत्वाभासः[6]; तथाहि-परेणासिद्ध इत्युद्भाविते यदि वादी तत्साधकं प्रमाणं न प्रतिपादयति, तदा प्रमाणाभासवदुभयोरसिद्धः । अथ प्रमाणं प्रतिपादयेत्; तर्हि प्रमाणस्यापक्षपातित्वादुभयोरप्यसौ सिद्धः । अन्यथा[7] साध्यमप्यन्यतरासिद्धं न कदाचित्सिद्ध्येदिति व्यर्थः प्रमाणोपन्यासः स्यात्; इत्यप्यसमीचीनम्; यतो वादिना प्रतिवादिना वा सभ्यसमक्षं स्वोपन्यस्तो हेतुः प्रमाणतो यावन्न परं प्रति साध्यते तावत्तं प्रत्यस्य प्रसिद्धेरभावात्कथं नान्यतरासिद्धता? नन्वेवमप्यस्यासिद्धत्वं गौणमेव स्यादिति चेत्; एवमेतत्, प्रमाणतो हि सिद्धेरभावादसिद्धोऽसौ न तु स्वरूपतः । न खलु रत्नादिपदार्थस्तत्त्वतोऽप्रतीयमानस्तावत्कालं मुख्यतस्तदाभासो भवतीति ।

अथेदानीं विरुद्धहेत्वाभासस्य विपरीतस्येत्यादिना स्वरूपं दर्शयति—

विपरीतनिश्चिताविनाभावो विरुद्धः अपरिणामी शब्दः कृतकत्वात् ॥ २९ ॥

साध्यस्वरूपाद्विपरीतेन प्रत्यनीकेन[11] निश्चितोऽविनाभावो यस्यासौ[12] विरुद्धः । यथाऽपरिणामी[13] शब्दः कृतकत्वादिति । कृतकत्वं हि पूर्वोत्तराकारपरिहारावाप्तिस्थितिलक्षणपरिणामेनैवावि-

१ यतस्तस्य सर्वस्य वस्तुनः सद्भावः सदेति वचः । २ सांख्यगुरुः । ३ सांख्येनोक्तं भवतां जैनानां विशेष्यासिद्धो हेतुरिति भावः । ४ वादिप्रतिवादिनोर्मध्ये एकस्य । ५ वादिप्रतिवादिनोः । ६ किन्तर्हि ? उभयासिद्ध एव । ७ प्रतिवादिना । ८ उपन्यस्तेपि निर्दुष्टे हेतुसाधके प्रमाणे यद्यसौ नोभयोः सिद्धः स्यात्तर्हि । ९ साध्यस्यान्यतरासिद्धत्वात् । १० यावत्प्रमाणतः सिद्धेरेवाभावस्तावत्स्वरूपतोऽप्यसिद्धः कुतो न स्यादित्युक्ते सत्याह । ११ सह । १२ हेतोः । १३ एकस्वभाव्यऽक्षणिकलक्षणो नित्यैकलक्षणः । १४ साध्यविपरीतेन ।

नाभूतं बहिरन्तर्वा प्रतीतिविषयः सर्वथा नित्ये क्षणिके वा तद्भावप्रतिपादनात्।

ये चाष्टौ विरुद्धभेदाः परैरिष्टा[1]स्तेऽप्येत[2]ल्लक्षणलक्षितत्वाविशेषतोऽत्रैवान्तर्भवन्तीत्युदाह्रियन्ते। सति सपक्षे चत्वारो विरुद्धाः। ५ पक्षविपक्षव्यापकः सपक्षावृत्ति[3]र्यथा-नित्यः शब्द उत्पत्तिधर्मकत्वात्। उत्पत्तिधर्मकत्वं हि पक्षीकृते शब्दे प्रवर्त्तते, नित्यविपरीते चानित्ये घटादौ विपक्षे, नाकाशादौ सत्यपि सपक्षे[4] इति।

विपक्षैकदेशवृत्तिः पक्षव्यापकः सपक्षावृत्तिश्च यथा—नित्यः शब्दः सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियप्रत्यक्षत्वात्। बाह्ये-१० न्द्रियग्रहणयोग्यतामात्रं हि बाह्येन्द्रियप्रत्यक्षत्वमत्र विवक्षितम्, तेनास्य पक्षव्यापकत्वम्। विपक्षैकदेशव्यापकत्वं चानित्ये घटादौ भावात्सुखादौ चाभावात् सिद्धम्। सपक्षावृत्तित्वं चाकाशादौ नित्येऽवृत्तेः। सामान्ये वृत्तिस्तु 'सामान्यवत्त्वे सति' इति विशेषणाद्व्यवच्छिन्ना।

१५ पक्षविपक्षैकदेशवृत्तिः सपक्षावृत्तिश्च यथा-सामान्यविशेषवती अस्मदादिबाह्यकरणप्रत्यक्षे वाग्मनसे नित्यत्वात्। नित्यत्वं[5] हि पक्षैकदेशे मनसि वर्त्तते न वाचि, विपक्षे चास्मदादिबाह्यकरणाप्रत्यक्षे गगनादौ नित्यत्वं वर्त्तते न सुखादौ। सपक्षे च घटादावस्याऽवृत्तेः सपक्षावृत्तित्वम्। सामान्यस्य[6] च सपक्षत्वं २० सामान्या(न्य)विशेषवत्त्वविशेषणाद्व्यवच्छिन्नम्। योगिबाह्यकरणप्रत्यक्षस्य चाकाशादेरस्मदाद्यऽग्रहणादसपक्षत्वम्।

पक्षैकदेशवृत्तिः सपक्षावृत्तिर्विपक्षव्यापको यथा-नित्ये वाग्मनसे उत्पत्तिधर्मकत्वात्। उत्पत्तिधर्मकत्वं हि पक्षैकदेशे वाचि वर्त्तते न मनसि, सपक्षे चाकाशादौ नित्ये न वर्त्तते, विपक्षे[7] २५ च घटादौ सर्वत्र वर्त्तते इति।

तथाऽसति सपक्षे चत्वारो विरुद्धाः। पक्षविपक्षव्यापकोऽविद्यमानसपक्षो यथा-आकाशविशेषगुणः शब्दः प्रमेयत्वात्। प्रमेयत्वं हि पक्षे शब्दे वर्तते। विपक्षे चानाकाशविशेषगुणे घटादौ, न तु सपक्षे तस्यैवाभावात्। न ह्याकाशे शब्दादन्यो विशेषगुणः ३० कश्चिदस्ति यः सपक्षः स्यात्। परममहापरिमाणादे[8]रन्यत्रापि[9] प्रवृत्तितः साधारणगुणत्वात्।

---

१ नैयायिकादिभिः। २ एतत्=विपरीतनिश्चिताविनाभावता। ३ सपक्षे अवृत्तिरवर्त्तनं यस्य स तथोक्तः। ४ नित्यरूपे सपक्षे ५ नित्यत्वस्य हेतोः। ६ सामान्यस्य सपक्षत्वं भविष्यतीत्युक्ते सत्याह। ७ अनित्यत्वेन। ८ आदिना संख्यादेश्च। ९ आत्मादावपि।

पक्षविपक्षैकदेशवृत्तिरविद्यमानसपक्षो यथा–सत्तासम्बन्धिनः षट् पदार्था उत्पत्तिमत्त्वात्। अत्र हि हेतुः पक्षीकृतषट्पदार्थैकदेशे अनित्यद्रव्यगुणकर्मण्येव वर्त्तते न नित्यद्रव्यादौ। विपक्षे चासत्तासम्बन्धिनि प्रागभावाद्येकदेशे प्रध्वंसाभावे वर्त्तते न तु प्रागभावादौ। सपक्षस्य चासम्भवादेव तत्रास्यावृत्तिः सिद्धा। ५

पक्षव्यापको विपक्षैकदेशवृत्तिरविद्यमानसपक्षो यथा–आकाशविशेषगुणः शब्दो बाह्येन्द्रियग्राह्यत्वात्। अयं हि हेतुः पक्षीकृते शब्दे वर्त्तते। विपक्षस्य चानाकाशविशेषगुणस्यैकदेशे रूपादौ वर्त्तते, न तु सुखादौ। सपक्षस्य चासम्भवादेव तत्रास्याऽवृत्तिः सिद्धा। १०

पक्षैकदेशवृत्तिर्विपक्षव्यापकोऽविद्यमानसपक्षो यथा–नित्ये वाङ्मनसे कार्यत्वात्। कार्यत्वं हि पक्षस्यैकदेशे वाचि वर्त्तते न मनसि। विपक्षे चानित्ये घटादौ सर्वत्र प्रवर्त्तते सपक्षे चावृत्तिस्तस्याभावात्सुप्रसिद्धा।

अथानैकान्तिकः कीदृश इत्याह— १५

विपक्षेप्यविरुद्धवृत्तिरनैकान्तिकः ॥ ३० ॥

न केवलं पक्षसपक्षेऽपि तु विपक्षेपीत्यपिशब्दार्थः[1]। एकस्मिन्नन्ते नियतो ह्येकान्तिकस्तद्विपरीतोऽनैकान्तिकः सव्यभिचार इत्यर्थः। कः पुनरयं व्यभिचारो नाम? पक्षसपक्षान्यवृत्तित्वम्[2]। यः खलु पक्षसपक्षवृत्तित्वे सत्यन्यत्र वर्त्तते स व्यभिचारी २० प्रसिद्धः। यथा लोके पक्षसपक्षविपक्षवर्ती कश्चित्पुरुषस्तथा चायमनैकान्तिकत्वेनाभिमतो हेतुरिति। स च द्वेधा निश्चितवृत्तिः शङ्कितवृत्तिश्चेति। तत्र—

निश्चितवृत्तिर्यथाऽनित्यः शब्दः प्रमेयत्वाद् घटवदिति ॥ ३१ ॥ २५

कथमित्याह—

आकाशे नित्येप्यस्य सम्भवादिति ॥ ३२ ॥

शङ्कितवृत्तिस्तु नास्ति सर्वज्ञो वक्तृत्वादिति ॥ ३३ ॥

---

१ धर्मे। २ अन्यो विपक्षः।

कुतोऽयं शङ्कितवृत्तिरित्याह—

सर्वज्ञत्वेन वक्तृत्वाविरोधात् ॥ ३४ ॥

एतच्च सर्वज्ञसिद्धिप्रस्तावे प्रपञ्चितमिति नेहोच्यते। परैरभ्युपगतश्च पक्षत्रयव्यापकाद्यनैकान्तिकप्रपञ्च एतल्लक्षणलक्षितत्वाविशेषान्नातोऽर्थान्तरम्, सर्वत्र विपक्षस्यैकदेशे सर्वत्र वा विपक्षे वृत्त्या विपक्षेप्यविरुद्धवृत्तित्वलक्षणसम्भवादित्युदाह्रियते। पक्षत्रयव्यापको यथा-अनित्यः शब्दः प्रमेयत्वात्। पक्षे सपक्षे विपक्षे चास्य सर्वत्र प्रवृत्तेः पक्षत्रयव्यापकः।

सपक्षविपक्षैकदेशवृत्तिर्यथा-नित्यः शब्दोऽमूर्त्तत्वात्। अमूर्त्तत्वं हि पक्षीकृते शब्दे सर्वत्र वर्त्तते। सपक्षैकदेशे चाकाशादौ वर्त्तते, न परमाणुषु। विपक्षैकदेशे च सुखादौ वर्त्तते न घटादाविति।

पक्षसपक्षव्यापको विपक्षैकदेशवृत्तिर्यथा-गौरयं विषाणित्वात्। विषाणित्वं हि पक्षीकृते पिण्डे वर्त्तते, सपक्षे च गोत्वधर्माध्यासिते सर्वत्र व्यक्तिविशेषे, विपक्षस्य चागोरूपस्यैकदेशे महिष्यादौ वर्त्तते न तु मनुष्यादाविति।

पक्षविपक्षव्यापकः सपक्षैकदेशवृत्तिर्यथा-अगौरयं विषाणित्वात्। अयं हि हेतुः पक्षीकृतेऽगोपिण्डे वर्त्तते। अगोत्वविपक्षे च गोव्यक्तिविशेषे सर्वत्र, सपक्षस्य चागोरूपस्यैकदेशे महिष्यादौ वर्तते न तु मनुष्यादाविति।

पक्षत्रयैकदेशवृत्तिर्यथा-अनित्ये वाग्मनसेऽमूर्त्तत्वात्। अमूर्त्तत्वं हि पक्षस्यैकदेशे वाचि वर्त्तते न मनसि, सपक्षस्य चैकदेशे सुखादौ न घटादौ, विपक्षस्य चाकाशादेर्नित्यस्यैकदेशे गगनादौ न परमाणुष्विति।

पक्षसपक्षैकदेशवृत्तिर्विपक्षव्यापको यथा-द्रव्याणि दिक्कालमनांस्यमूर्तत्वात्। अमूर्तत्वं हि पक्षस्यैकदेशे दिक्काले वर्तते न मनसि, सपक्षस्य च द्रव्यरूपस्यैकदेशे आत्मादौ वर्तते न घटादौ, विपक्षे चाद्रव्यरूपे गुणादौ सर्वत्रेति।

---

१ सर्वज्ञे वक्तृत्वस्य बाधकप्रमाणाभावात्किं वक्तृत्वं तत्र वर्त्तते न वेति संदेहः। २ परैः नैयायिकादिभिः। ३ पक्षसपक्षविपक्षाः पक्षत्रयम्। ४ विपक्षेप्यविरुद्धवेति। ५ इयत्तावच्छिन्नपरिमाणयोगित्वं मूर्तिमत्त्वम्। निर्गुणा गुणा इति वचनादियत्तावच्छिन्नपरिमाणाभावः।

पक्षविपक्षैकदेशवृत्तिः सपक्षव्यापको यथा-अद्रव्याणि दिक्कालमनांस्यमूर्तत्वात्। अत्रापि प्राक्तनमेव व्याख्यानम् अद्रव्यरूपस्य गुणादेस्तु सपक्षतेति विशेषः।

सपक्षविपक्षव्यापकः पक्षैकदेशवृत्तिर्यथा-पृथिव्यप्तेजोवाय्वाकाशान्यनित्यान्यगन्धवत्त्वात्। अगन्धवत्त्वं हि पृथिवीतोऽन्यत्र[1] पक्षैकदेशे वर्तते न तु पृथिव्याम्, सपक्षे चानित्ये गुणे कर्मणि च, विपक्षे चात्मादौ नित्ये सर्वत्र वर्तत इति। 5

अथेदानीमकिञ्चित्करस्वरूपं सिद्ध इत्यादिना व्याचष्टे—

सिद्धे प्रत्यक्षादिबाधिते च साध्ये हेतुरकिञ्चित्करः ॥ ३५ ॥ 10

सिद्धे निर्णीते प्रमाणान्तरात्साध्ये प्रत्यक्षादिबाधिते च हेतुर्न किञ्चित्करोतीत्यकिञ्चित्करोऽनर्थकः।

यथा श्रावणः शब्दः शब्दत्वादिति ॥ ३६ ॥

न ह्यसौ स्वसाध्यं साधयति, तस्याध्यक्षादेव प्रसिद्धेः। नापि साध्यान्तरम्; तत्रावृत्तेरित्यत आह— 15

किञ्चिदकरणात् ॥ ३७ ॥

प्रत्यक्षादिबाधिते च साध्येऽकिञ्चित्करोऽसौ—

अनुष्णोऽग्निर्द्रव्यत्वादित्यादौ यथा किंचित्कर्त्तुमशक्यत्वात् ॥ ३८ ॥

कुतोस्याऽकिञ्चित्करत्वमित्याह-किञ्चित्कर्तुमशक्यत्वात्। 20

ननु प्रसिद्धः प्रत्यक्षानुमानागमलोकस्ववचनैश्च बाधितः पक्षाभासः प्रतिपादितः। तद्दोषेणैव चास्य दुष्टत्वात् पृथगकिञ्चित्कराभिधानमनर्थकमित्याशङ्क्य लक्षण एवेत्यादिना प्रतिविधत्ते—

लक्षण एवासौ दोषो व्युत्पन्नप्रयोगस्य पक्षदोषेणैव दुष्टत्वात् ॥ ३९ ॥ 25

लक्षणे लक्षणव्युत्पादनशास्त्रे एवासावकिञ्चित्करत्वलक्षणो दोषो विनेयव्युत्पत्त्यर्थं व्युत्पाद्यते, न तु व्युत्पन्नानां प्रयोगकाले[2]। कुत एतदित्याह-व्युत्पन्नप्रयोगस्य पक्षदोषेणैव[3] दुष्टत्वात्।

---

१ जलादिषु। २ उपन्यासकाले। ३ पक्षाभासलक्षणेन।

अथेदानीं दृष्टान्ताभासप्रतिपादनार्थं दृष्टान्तेत्याद्युपक्रमते । दृष्टान्तो ह्यन्वयव्यतिरेकभेदाद्द्विधेत्युक्तम्[1] । तद्विपरीतस्तदाभासोपि तद्भेदाद्द्विधैव द्रष्टव्यः । तत्र—

दृष्टान्ताभासा अन्वये असिद्धसाध्य-

५ **साधनोभयाः ॥ ४० ॥**

अपौरुषेयः शब्दोऽमूर्त्तत्वादिन्द्रियसुख-पर-

माणु-घटवदिति ॥ ४१ ॥

इन्द्रियसुखे हि साधनममूर्त्तत्वमस्ति, साध्यं त्वपौरुषेयत्वं नास्ति पौरुषेयत्वात्तस्य । परमाणुषु तु साध्यमपौरुषेयत्वमस्ति, १० साधनं त्वमूर्त्तत्वं नास्ति मूर्त्तत्वात्तेषाम् । घटे तूभयमपि पौरुषेयत्वान्मूर्त्तत्वाच्चास्तीति । न केवलमेत एवान्वये दृष्टान्ताभासाः

किन्तु—

विपरीतान्वयश्च यदपौरुषेयं तदमूर्त्तम् ॥ ४२ ॥

विपरीतोऽन्वयो व्याप्तिप्रदर्शनं यस्मिन्निति । यथा यदपौरुषेयं १५ तदमूर्त्तमिति । 'यदमूर्त्तं तदपौरुषेयम्' इति हि साध्येन व्याप्ते साधने प्रदर्शनीये कुतश्चिद्व्यामोहात् 'यदपौरुषेयं तदमूर्त्तम्' इति प्रदर्शयति । न चैवं प्रदर्शनीयम्—

विद्युदादिनाऽतिप्रसङ्गादिति ॥ ४३ ॥

विद्युद्वनकुसुमादौ ह्यपौरुषेयत्वेप्यमूर्त्तत्वं नास्तीति ।

२० व्यतिरेके दृष्टान्ताभासाः—

व्यतिरेके असिद्धतद्व्यतिरेकाः परमा-

ण्विन्द्रियसुखाकाशवत् ॥ ४४ ॥

असिद्धतद्व्यतिरेकाः—असिद्धस्तेषां साध्यसाधनोभयानां व्यतिरेको [व्या]वृत्तिर्येषु ते तथोक्ताः[2] । यथाऽपौरुषेयः शब्दोऽमू- २५ र्त्तत्वादित्युक्त्वा यन्नापौरुषेयं तन्नामूर्त्तं परमाण्विन्द्रियसुखाकाशवदिति व्यतिरेकमाह । परमाणुभ्यो ह्यमूर्त्तत्वव्यावृत्तावप्यपौरुषेयत्वं न व्यावृत्तमपौरुषेयत्वात्तेषाम् । इन्द्रियसुखे त्वपौरुषेयत्वव्यावृत्तावप्यमूर्त्तत्वं न व्यावृत्तममूर्त्तत्वात्तस्य । आकाशे तूभयं[3]

---

१ अन्वयव्यतिरेकभेदात् । २ योग्निमान्स धूमवानिति यथा । ३ दृष्टान्तम् ।

न व्यावृत्तमपौरुषेयत्वादमूर्त्तत्वाच्चास्येति । न केवलमेत एव व्यतिरेके दृष्टान्ताभासाः किंतु—

विपरीतव्यतिरेकश्च यन्नामूर्त्तं तन्नापौरुषेयम् ॥ ४५ ॥

विपरीतो व्यतिरेको व्यावृत्तिप्रदर्शनं यस्येति । यथा यन्नामूर्त्तं ५ तन्नापौरुषेयमिति । 'यन्नापौरुषेयं तन्नामूर्तम्' इति हि साध्यव्यतिरेके साधनव्यतिरेकः प्रदर्शनीयस्तथैव प्रतिबन्धादिति ।

अव्युत्पन्नव्युत्पादनार्थं पञ्चावयवोपि प्रयोगः प्राक् प्रतिपादितस्तत्प्रयोगाभासः कीदृश इत्याह—

बालप्रयोगाभासः पञ्चावयवेषु कियद्धीनता ॥४६॥ १०

यथाग्निमानयं देशो धूमवत्त्वात्, यदित्थं तदित्थं यथा महानस इति ॥ ४७ ॥

धूमवांश्चायमिति वा ॥ ४८ ॥

यो ह्यव्युत्पन्नप्रज्ञोऽनुमानप्रयोगे पञ्चावयवे गृहीतसङ्केतः स उपनयनिगमनरहितस्य निगमनरहितस्य वानुमानप्रयोगस्य तदा- १५ भासतां मन्यते । न केवलं कियद्धीनतैव बालप्रयोगाभासः किंतु तद्विपर्ययश्च—तेषामवयवानां विपर्ययस्तत्प्रयोगाभासो यथा—

तस्माद्ग्निमान् धूमवांश्चायमिति ॥ ४९ ॥

स ह्युपनयपूर्वकं निगमनप्रयोगं साध्यप्रतिपत्त्यङ्गं मन्यते, नान्यथा । कुत एतदित्याह— २०

स्पष्टतया प्रकृतप्रतिपत्तेरयोगात् ॥ ५० ॥

स्पष्टतया प्रकृतस्य साध्यस्य प्रतिपत्तेरयोगात् । यो हि यथा गृहीतसङ्केतः स तथैव वाक्प्रयोगात्प्रकृतमर्थं प्रतिपद्येत नान्यथा लोकवत् । यस्तु सर्वप्रकारेण वाक्प्रयोगे व्युत्पन्नप्रज्ञः स यथा यथा वाक्प्रयुज्यते तथा तथा प्रकृतमर्थं प्रतिपद्येत २५ लोके सर्वभाषाप्रवीणपुरुषवत् । तथा च न तं प्रत्यनन्तरोक्तः कश्चित्प्रयोगाभास इति ।

---

१ कुत इत्याह । २ अविनाभावात् । ३ अनुमानप्रयोगः । ४ बालव्युत्पत्त्यर्थमेव । ५ पञ्चावयवानुमानवादी बालो वा । ६ निगमनपूर्वकमुपनयप्रयोगं न मन्यते ।

अथेदानीमागमाभासप्ररूपणार्थमाह—

रागद्वेषमोहाक्रान्तपुरुषवचनाज्जातमागमाभासम् ॥ ५१ ॥

रागाक्रान्तो हि पुरुषः क्रीडावशीकृतचित्तो विनोदार्थं[1] वस्तु
५ किञ्चिदप्राप्नुवन्माणवकैरपि सह क्रीडाभिलाषेणेदं[2] वाक्यमुच्चारयति—

यथा नद्यास्तीरे मोदकराशयः सन्ति धावध्वं माणवका इति ॥ ५२ ॥

तथा क्वचित्कार्ये व्यासक्तचित्तो माणवकैः कदर्थितो द्वेषाक्रा-
१० न्तोप्यात्मीयस्थानात्तदुच्चाटनाभिलाषेणेदमेव वाक्यमुच्चारयति। मोहाक्रान्तस्तु सांख्यादिः—

अङ्गुल्यग्रे हस्तियूथशतमास्ते[3] इति च ॥ ५३ ॥

उच्चारयति। न खल्वज्ञानमहामहीधराक्रान्तः पुरुषो यथावद्वस्तु विवेचयितुं समर्थः।

१५ ननु चैवंविधपुरुषवचनोद्भूतं ज्ञानं कस्मादागमाभासमित्याह—

विसंवादात् ॥ ५४ ॥

प्रतिपन्नार्थविचलनं हि विसंवादो विपरीतार्थोपस्थापकप्रमाणावसेयः[4]। स चात्रास्तीत्यागमाभासता[5]।

अथेदानीं संख्याभासोपदर्शनार्थमाह—

२० **प्रत्यक्षमेवैकं प्रमाणमित्यादि संख्याभासम् ॥५५॥**

कस्मादित्याह—

लौकायतिकस्य प्रत्यक्षतः परलोकादिनिषेधस्य परबुद्ध्यादेश्चासिद्धेः अतद्विषयत्वात् ॥ ५६ ॥

कुतोऽसिद्धिरित्याह-अतद्विषयत्वात्। यथा चाध्यक्षस्य परलो-
२५ कादिनिषेधादिरविषयस्तथा विस्तरतो द्वितीयपरिच्छेदे प्रतिपादितम्।

---

१ क्रीडाकारणम्। २ वक्ष्यमाणव्यतिरिक्तम्। ३ सांख्यमते सर्वं सर्वत्र विद्यते यतः। ४ रजते नेदं रजतमिति यथा। ५ रागाद्याक्रान्तपुरुषवचनाज्जाते ज्ञाने। ६ आदिना परबुद्ध्यादिग्रहः।

अमुमेवार्थं समर्थयमानः सौगतादिपरिकल्पितां च संख्यां निराकुर्वाणः सौगतेत्याद्याह—

सौगतसांख्ययौगप्राभाकरजैमिनीयानां प्रत्यक्षानुमानागमोपमानार्थापत्त्यभावैः एकैकाधिकैः व्याप्तिवत् ॥ ५७ ॥

यथैव हि सौगतसांख्ययौगप्राभाकरजैमिनीयानां मते प्रत्यक्षानुमानागमोपमानार्थापत्त्यभावैः प्रमाणैरेकैकाधिकैर्व्याप्तिर्न सिध्यत्य[1]तद्विषयत्वात् तथा प्रकृतमपि । प्रयोगः—यद्यस्याऽविषयो न ततस्तत्सिद्धिः यथा प्रत्यक्षानुमानाद्यविषयो व्याप्तिर्न ततः सिद्धिसौधशिखरमारोहति, अविषयश्च परलोकनिषेधादिः[2] प्रत्यक्षस्येति ।

मा भूत्प्रत्यक्षस्य तद्विषयत्वमनुमानादेस्तु भविष्यतीत्याह[3]—

अनुमानादेस्तद्विषयत्वे प्रमाणान्तरत्वम् ॥ ५८ ॥

चार्वाकं प्रति । सौगतादीन्प्रति—

तर्कस्येव व्याप्तिगोचरत्वे प्रमाणान्तरत्वम् अप्रमाणस्य अव्यवस्थापकत्वात् ॥ ५९ ॥

कुत एतदित्याह अप्रमाणस्याव्यवस्थापकत्वात्[4] ।

[3]प्रतिभासादिभेदस्य च भेदकत्वादिति ॥ ६० ॥

प्रतिपादितश्चायं प्रतिभासभेदः सामग्रीभेदश्चाध्यक्षादीनां प्रपञ्चतस्तद्धेत्यत्रेत्युपरम्यते ।

अथेदानीं विषयाभासप्ररूपणार्थं विषयेत्याद्युपक्रमते—

विषयाभासः सामान्यं विशेषो द्वयं वा स्वतन्त्रम् ॥ ६१ ॥

विषयाभासाः—सामान्यं यथा सत्ताद्वैतवादिनः । केवलं विशेषो वा यथा सौगतस्य । द्वयं वा स्वतन्त्रं[5] यथा यौगस्य । कुतोऽस्य विषयाभासतेत्याह—

---

१ अनुमानस्य । २ परलोकनिषेधादेः । ३ अस्तु प्रामाण्यमनुमानस्य किन्तु तत्प्रत्यक्षे एवान्तर्भविष्यतीत्युक्ते सत्याह । ४ ततः प्रत्यक्षेऽनुमानस्यान्तर्भावाभाव इत्यर्थः । ५ अन्योन्यनिरपेक्षम् ।

तथाऽप्रतिभासनात् कार्याऽकरणाच्च ॥ ६२ ॥

स ह्येवंविधोर्थः स्वयमसमर्थः समर्थो वा कार्यं कुर्यात्? न तावत्प्रथमः पक्षः;

स्वयमसमर्थस्याऽकारकत्वात्पूर्ववत् ॥ ६३ ॥

५ एतच्च सर्वं विषयपरिच्छेदे विस्तारतोभिहितमिति नेहाभिधीयते।

नापि द्वितीयः पक्षः;

समर्थस्य करणे सर्वदोत्पत्तिरनपेक्षत्वात् ॥ ६४ ॥

परापेक्षणे परिणामित्वमन्यथा

१० **तदभावादिति ॥ ६५ ॥**

अथेदानीं फलाभासं प्ररूपयन्नाह—

फलाभासं प्रमाणादभिन्नं भिन्नमेव वा ॥ ६६ ॥

कुतोस्य फलाभासतेत्याह—

अभेदे तद्व्यवहारानुपपत्तेः ॥ ६७ ॥

१५ न खलु सर्वथा तयोरभेदे 'इदं प्रमाणमिदं फलम्' इति व्यवहारः शक्यः प्रवर्त्तयितुम्।

ननु व्यावृत्त्या तयोः कल्पना भविष्यतीत्याह—

व्यावृत्त्यापि न तत्कल्पना फलान्तराद्व्यावृत्त्याऽफलत्वप्रसङ्गात् ॥ ६८ ॥

२० **प्रमाणान्तराद्व्यावृत्तौ वाऽप्रमाणत्वस्येति ॥ ६९ ॥**

एतच्च फलपरीक्षायां प्रपञ्चितमिति पुनर्नेह प्रपञ्च्यते।

तस्माद्वास्तवो भेदः ॥ ७० ॥

---

१ केवलसामान्यतया केवलविशेषतया द्वयस्य स्वतन्त्रतया वा। २ केवलसामान्यरूपः केवलविशेषरूपश्च। ३ पश्चादपि। ४ परस्य। ५ अनपेक्षाकारपरित्यागेनापेक्षाकारेण परिणमनात्। ६ सर्वथा। ७ तयोः प्रमाणफलयोः। ८ अफलाद्व्यावृत्तिः यथा तथा फलान्तराद्व्यावृत्त्या भाव्यम्, तथा सति फलान्तराद्व्यावृत्तिः फलविशेषाद्व्यावृत्तिरित्यर्थः, अफलत्वप्रसङ्गः गोर्व्यावृत्त्याऽगोत्वं भवति यथा।

प्रमाणफलयोस्तद्व्यवहारान्यथानुपपत्तेरिति प्रेक्षादक्षैः प्रतिपत्तव्यम्।

अस्तु तर्हि सर्वथा तयोर्भेद इत्याशङ्कापनोदार्थमाह—

भेदे त्वात्मान्तरवत्तदनुपपत्तिः (त्तेः) ॥ ७१ ॥

समवायेऽतिप्रसङ्गः ॥ ७२ ॥ ५

इत्यप्युक्तं तत्रैव।

अथेदानीं प्रतिपन्नप्रमाणतदाभासस्वरूपाणां विनेयानां प्रमाणतदाभासावित्यादिना फलमादर्शयति—

प्रमाण-तदाभासौ दुष्टतयोद्भावितौ परिहृता-ऽपरिहृतदोषौ वादिनः साधन-तदाभासौ प्रतिवादिनो दूषण-भूषणे च ॥ ७३ ॥ १०

प्रतिपादितस्वरूपौ हि प्रमाणतदाभासौ यथावत्प्रतिपन्नाप्रतिपन्नस्वरूपौ जयेतरव्यवस्थाया निबन्धनं भवतः। तथाहि-चतुरङ्गवादमुररीकृत्य विज्ञातप्रमाणतदाभासस्वरूपेण वादिना सम्यक्प्रमाणे स्वपक्षसाधनायोपन्यस्ते अविज्ञाततत्स्वरूपेण तु तदाभासे। प्रतिवादिना वाऽनिश्चिततत्स्वरूपेण दुष्टतया सम्यक्प्रमाणेपि तदाभासतोद्भाविता। निश्चिततत्स्वरूपेण तु तदाभासे तदाभासतोद्भाविता। एवं तौ प्रमाणतदाभासौ दुष्टतयोद्भावितौ परिहृतापरिहृतदोषौ वादिनः साधनतदाभासौ प्रतिवादिनो दूषणभूषणे च भवतः। १५ २०

ननु चतुरङ्गवादमुररीकृत्येत्याद्ययुक्तमुक्तम्; वादस्याविजिगीषुविषयत्वेन चतुरङ्गत्वासम्भवात्। न खलु वादो विजिगीषतोर्वर्त्तते तत्त्वाध्यवसायसंरक्षणार्थरहितत्वात्। यस्तु विजिगीषतोर्नासौ तथा सिद्धः यथा जल्पो वितण्डा च, तथा च वादः,

१ वास्तवभेदाभावे। २ वादिना प्रतिपन्नाप्रतिपन्नस्वरूपौ प्रतिवादिनापि तथेत्यर्थः। ३ सभ्यसभापतिवादिप्रतिवादीति चत्वार्यङ्गानि यस्य स तथोक्तः। ४ अन्यवादिना। ५ उपन्यस्ते। ६ अन्यप्रतिवादिना। ७ प्रतिवादिना। ८ वादिनेति शेषः। ९ स्वपक्षस्य। १० यौगः प्राह। ११ जैनैः। १२ वीतरागकथा वादो यौगमते यतः। १३ जयेच्छाऽभावात्तेषां सभ्यादीनां प्रयोजनाभावो वादे इति भावः। १४ जल्पो वितण्डा च विजिगीषतोरतो न वादरूपः, व्यतिरेकी दृष्टान्तः।

तस्मान्न विजिगीषतोरिति। न हि वादस्तत्त्वाध्यवसायसंरक्षणार्थो भवति; जल्पवितण्डयोरेव तत्त्वात्। तदुक्तम्—

"तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कंटकशाखावरणवत्" [न्यायसू० ४।२।५०] इति। तदप्यसमीचीनम्; वादस्याविजिगीषुविषयत्वासिद्धेः। तथाहि-वादो नाविजिगीषुविषयो निग्रहस्थानवत्त्वात् जल्पवितण्डावत्। न चास्य निग्रहस्थानवत्त्वमसिद्धम्; 'सिद्धान्ताविरुद्धः' इत्यनेनापसिद्धान्तः, 'पञ्चावयवोपपन्नः' इत्यत्र पञ्चग्रहणात् न्यूनाधिके, अवयवोपपन्नग्रहणाद्धेत्वाभासपञ्चकं चेत्यष्टनिग्रहस्थानानां वादे नियमप्रतिपादनात्।

ननु वादे सतामप्येषां निग्रहबुद्ध्योद्भावनाभावान्न विजिगीषास्ति। तदुक्तम्-"तर्कशब्देन भूतपूर्वगतिन्यायेन वीतरागकथात्वज्ञापनादुद्भावननियमोपलभ्यते" [ ] तेन सिद्धान्ताविरुद्धः पञ्चावयवोपपन्न इति चोत्तरपदयोः समस्तनिग्रहस्थानाद्युपलक्षणार्थत्वाद्वादेऽप्रमाणबुद्ध्या परेण छलजातिनिग्रहस्थानानि प्रयुक्तानि न निग्रहबुद्ध्योद्भाव्यन्ते किन्तु निवारणबुद्ध्या। तत्त्वज्ञानायावयोः प्रवृत्तिर्न च साधनाभासो दूषणाभासो वा तद्धेतुः। अतो न तत्प्रयोगो युक्त इति। तदप्यसाम्प्रतम्; जल्पवितण्डयोरपि तथोद्भावननियमप्रसङ्गात्। तयोस्तत्त्वाध्यवसायसंरक्षणाय स्वयमभ्युपगमात्। तस्य च छलजातिनिग्रहस्थानैः कर्त्तुमशक्यत्वात्। परस्य तूष्णींभावार्थं जल्पवितण्डयोश्छलाद्यु-

१ वादो न विजिगीषतोर्वर्तमानः तत्त्वाध्यवसायसंरक्षणार्थश्च भवतीति सन्दिग्धानैकान्तिकत्वे सत्याह। २ स्तः। ३ प्रमाणतर्क(विचार)साधनो(स्वपक्षस्य)पालम्भः (परपक्षस्य दूषणं) सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वाद इति परकीयं वादलक्षणसूत्रम्। जैनमते तु समर्थ(वादिप्रतिवादिनोर्जयपराजयार्थं)वचनं वाद इति वादलक्षणम्। ४ प्रतिज्ञोपपन्न इत्यनेनाश्रयासिद्धहेत्वाभासग्रहणं, हेतूपपन्न इत्यनेन स्वरूपासिद्धहेत्वाभासस्य, अन्वयदृष्टान्तोपपन्न इत्यनेन विरुद्धहेत्वाभासस्य व्यतिरेकदृष्टान्तोपपन्न इत्यनेनानैकान्तिकहेत्वाभासस्योपनयोपपन्न इत्यनेन कालात्ययापदिष्टस्य, निगमोपपन्न इत्यनेन सत्प्रतिपक्षस्य च ग्रहणम्। ५ अनेनात्र भवितव्यं मान्येनेति सम्भावनाप्रत्ययस्तर्को विचार इति यावत्, वादलक्षणे गृहीतेन। ६ व्याख्यानकाले क्रियमाणे विचारे वीतरागत्वं वादिप्रतिवादिनोस्तथा वादकालेपि तत्स्यात्। कुत एतत्? वादलक्षणे तर्कशब्दोपादानात् ज्ञायते। ७ व्याख्यानकाले विचारो वीतरागत्वस्य हेतुस्तथा वादेपीति तात्पर्यम्। ८ अपसिद्धान्तादीनि निग्रहबुद्ध्या नोद्भावनीयमिति। ९ प्रमाणतर्कसाधनोपालम्भ इति प्रथमपदापेक्षयोत्तरपदत्वमनयोः। १० ततश्च छलजात्यादीनां निवारणबुद्ध्योद्भावनमिति भावः, निग्रहस्थानैः प्रतिवादिनो निराकरणं न तु तत्त्वनिर्णय इति भावः।

श्रावनमिति चेत्; न; तथा परस्य तूष्णींभावाभावादऽसदुत्तराणामानन्त्यात्।

[न च] तत्त्वाध्यवसायसंरक्षणार्थत्वरहितत्वं च वादेऽसिद्धम्; तस्यैव तत्संरक्षणार्थत्वोपपत्तेः। तथाहि–वाद एव तत्त्वाध्यवसायसंरक्षणार्थः, प्रमाणतर्कसाधनोपालम्भत्वे सिद्धान्ताविरुद्धत्वे पञ्चावयवोपपन्नत्वे च सति पक्षप्रतिपक्षपरिग्रहवत्त्वात्, यस्तु न तथा स न तथा यथाक्रोशादिः, तथा च वादः, तस्मात्तत्त्वाध्यवसायसंरक्षणार्थ इति। न चायमसिद्धो हेतुः;

"प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः।" [न्यायसू० १।२।१] इत्यभिधानात्। 'पक्षप्रतिपक्षपरिग्रहवत्त्वात्' इत्युच्यमाने जल्पोपि तथा स्यादित्यवधारणविरोधः, तत्परिहारार्थं प्रमाणतर्कसाधनोपालम्भत्वविशेषणम्। न हि जल्पे तदस्ति, "यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः।" [न्यायसू० १।२।२] इत्यभिधानात्। नापि वितण्डा तथानुषज्यते; जल्पस्यैव वितण्डारूपत्वात्, "स प्रतिपक्षस्थापनाहीनो वितण्डा।" [न्यायसू० १।२।३] इति वचनात्। स यथोक्तो जल्पः प्रतिपक्षस्थापनाहीनतया विशेषितो वितण्डात्वं प्रतिपद्यते। वैतण्डिकस्य च स्वपक्ष एव साधनवादिपक्षापेक्षया प्रतिपक्षो हस्तिप्रतिहस्तिन्यायेन। तस्मिन्प्रतिपक्षे वैतण्डिको हि न साधनं वक्ति। केवलं परपक्षनिराकरणायैव प्रवर्त्तते इति व्याख्यानात्।

पक्षप्रतिपक्षौ च वस्तुधर्मावेकाधिकरणौ विरुद्धावेककालावनवसितौ। वस्तुधर्माविति वस्तुविशेषौ वस्तुनः। सामान्येनाधिगतत्वाद्विशेषतोऽनधिगतत्वाच्च विशेषावगमनिमित्तो विचारः।

---

१ हेतुः। २ न जल्पवितण्डे इत्यर्थः। ३ एवकारेण। ४ केवलम्। ५ यथोक्तेन वादलक्षणेनोपपन्नः, यथोक्तोपपन्नग्रहणेन प्रमाणतर्कसाधनोपालम्भमात्रमुपलक्ष्यते न समस्तं वादलक्षणं सिद्धान्ताविरुद्धः पञ्चावयवोपपन्न इत्युत्तरपदद्वयस्य निग्रहस्थाननियमनिबन्धनस्यात्र सम्बन्धाऽभावात् जल्पे समस्तनिग्रहस्थानासम्भवात्। ६ तत्त्वाध्यवसायसंरक्षार्थत्वेन। ७ प्रतिवादि। ८ हस्त्येव प्रतिहस्ती हस्त्यन्तरापेक्षया, तस्य न्यायेन। ९ स्वपक्षसाधनाय हेतुम्। १० प्रतिवादी यं कञ्चन सिद्धान्तमवलम्ब्यावस्थितः प्रतिपक्षभङ्गमात्रेण विजयी भवति न तु जल्पवत्स्वपक्षसाधनेनेति भावः। ११ पक्षप्रतिपक्षयोर्लक्षणं कृत्वा जल्पवितण्डयोः पक्षप्रतिपक्षपरिग्रहत्वं निराकरोति जैनः। १२ शब्दाद्याश्रितनित्यानित्यत्वादिलक्षणौ। १३ शब्दादिलक्षणस्य। १४ भवतीति शेषः।

एकाधिकरणा[1]विति, नानाधिकरणौ विचारं न प्रयोजयत[2] उभयोः[3] प्रमाणोपपत्तेः[4]; तद्यथा–अनित्या बुद्धिर्नित्य आत्मेति[5]। अविरुद्धा-वप्येवं[6] विचारं न प्रयोजयतः, तद्यथा–क्रियावद्द्रव्यं गुणवच्चेति[7]। एककालाविति, भिन्नकालयोर्विचाराप्रयोजकत्वं प्रमाणोपपत्तेः[8], यथा क्रियावद्द्रव्यं निष्क्रियं च कालभेदे सति। तथाऽवसितौ[9] विचारं न प्रयोजयतः; निश्चयोत्तरकालं[10] विवादाभावादित्यनव-सितौ तौ निर्दिष्टौ। एवंविशेषणौ धर्मौ पक्षप्रतिपक्षौ। तयोः परिग्रह इत्थंभावनियमः 'एवंधर्मा[11]यं धर्मी[12] नैवंधर्मा[13]' इति च। ततः प्रमाणतर्कसाधनोपालम्भत्वविशेषणस्य पक्षप्रतिपक्षपरि-ग्रहस्य जल्पवितण्डयोरसम्भवात्[14] सिद्धं वादस्यैव तत्त्वाध्यवसा-यसंरक्षणार्थत्वं लाभपूजाख्यातिवत्[15]।

तत्त्वस्याध्यवसायो हि निश्चयस्तस्य संरक्षणं न्यायबलान्निखिल-बाधक[16]निराकरणम्, न पुनस्तत्र बाधकमुद्भावयतो यथाकथञ्चि-न्निर्मुखीकरणं लकुटचपेटादिभिस्तस्य[17]करणस्यापि तत्त्वाध्यवसाय-संरक्षणार्थत्वानुषङ्गात्। न[18] च जल्पवितण्डाभ्यां निखिलबाधक-निराकरणम्; छलजात्युपक्रम[19]परतया ताभ्यां संशयस्य विपर्ययस्य वा जननात्। तत्त्वाध्यवसाये सत्यपि हि परनिर्मुखीकरणे[20] प्रवृत्तौ[21] प्राश्निकास्तत्र संशेरते[22] विपर्ययस्यन्ति वा–'किमस्य तत्त्वाध्यवसा-योस्ति किं वा नास्तीति, नास्त्येवेति वा' परनिर्मुखीकरणमात्रे तत्त्वाध्यवसायरहितस्यापि प्रवृत्त्युपलम्भात् तत्त्वोपप्लववादिवत्। तथा[23] चाख्याति[24]रेवास्य[25] प्रेक्षावत्सु स्यादिति कुतः पूजा लाभो वा?

ततः[26] सिद्धश्चतुरङ्गो वादः स्वाभिप्रेतार्थ[27]व्यवस्थापनफलत्वाद्वाद-त्वाद्वा लोकप्रख्यातवादवत्। एकाङ्गस्यापि वैकल्ये प्रस्तुतार्थाऽप-

१ एकाश्रयौ नित्यानित्यलक्षणौ यथा। २ प्रवर्त्तयते यत इत्यध्याहार्यम्। ३ प्रति। ४ वादिप्रतिवादिनो। ५ नानाधिकरणयोर्वस्तुधर्मयोः। ६ वस्तुधर्मद्वयस्यैकाधिकरणत्वे सति विचारो भवति, न तु नानाधिकरणे सतीति भावः। ७ अनित्यस्य बुद्ध्यधिकरणं नित्यस्य त्वात्माधिकरणम्, अत्र यथा प्रमाणोपपत्तेर्विचारो न स्यात्। ८ वादिप्रति-वादिनो। ९ वादिप्रतिवादिनोः। १० प्रति। ११ अनित्यलक्षणः। १२ शब्दादिः। १३ नित्यलक्षणः। १४ प्रमाणतर्काभ्यां पक्षप्रतिपक्षौ साधनोपालम्भस्वरूपौ जल्पवितण्ड-योर्न भवतस्तत्र तयोर्विचारत्वात्। १५ लाभपूजाख्यातयो यथा वादस्यैव। १६ बाधकं विरुद्धप्रमाणम्। १७ तस्य परस्य। १८ जल्पवितण्डाभ्यां निखिलबाधकनिराकरणं भविष्यतीत्युक्ते सत्याह। १९ उपक्रमः प्रस्तावः। २० परः प्रतिवादी। २१ सत्याम्। २२ सन्देहं कुर्वन्ति। २३ तत्त्वाध्यवसायाभावेन। २४ अप्रसिद्धिः। २५ वादिनः। २६ हेतोः। २७ चतुरङ्गत्वाभावसाधनमविजिगीषुविषयत्वसाधनं तत्त्वाध्यवसाय-संरक्षणार्थरहितत्वसाधनमसिद्धं यतः। २८ सन्दिग्धानैकान्तिकत्वपरिहारमाह।

रिसमाप्तेः। तथा हि। अहङ्कारग्रहग्रस्तानां मर्यादातिक्रमेण प्रवर्तमानानां शक्तित्रयसमन्वितौदासीन्यादिगुणोपेतसभापतिमन्तरेण

"अपक्षपतिताः प्राज्ञाः सिद्धान्तद्वयवेदिनः।
असद्वादनिषेद्धारः प्राश्निकाः प्रग्रहा इव।" इत्येवंविधप्राश्निकांश्च विना को नाम नियामकः स्यात्? प्रमाणतदाभासपरि- ५ ज्ञानसामर्थ्योपेतवादिप्रतिवादिभ्यां च विना कथं वादः प्रवर्तेत?

ननु चास्तु चतुरङ्गता वादस्य। जयेतरव्यवस्था तु छलजातिनिग्रहस्थानैरेव न पुनः प्रमाणतदाभासयोर्दुष्टतयोद्भावितयोः परिहृतापरिहृतदोषमात्रेण; इत्यप्यपेशलम्; छलादीनामसदुत्तरत्वेन स्वपरपक्षयोः साधनदूषणत्वासम्भवतो जयेतरव्यवस्थानि- १० बन्धनत्वायोगात्। ततः परेषां सामान्यतो विशेषतश्च छलादीनां लक्षणप्रणयनमयुक्तमेव।

तत्र सामान्यतश्छललक्षणम्—

"वचनविघातोऽर्थविकल्पोपपत्त्या छलम्" [न्यायसू० १।२।१०] इति। "तत्त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं च" १५ [न्यायसू० १।२।११] इति।

तत्र वाक्छललक्षणं तेषाम्—"अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम्" [न्यायसू० १।२।१२] इति। अस्योदाहरणम्—'आढ्यो वै वैधवेयोयं वर्तते नवकम्बलः' इत्युक्ते प्रत्यवस्थानम् कुतोस्य नव कम्बलाः? नवकम्बलशब्दे हि सामा- २० न्यवाचिन्यत्र प्रयुक्ते 'नवोस्य कम्बलो जीर्णो नैव' इत्यभिप्रायो वक्तुः, तस्मादन्यस्यासम्भाव्यमानार्थस्य कल्पना 'नव अस्य कम्बला नाष्टौ' इति। एवं प्रत्यवस्थातुरन्यायवादित्वात्पराजयः। न खलु प्रेक्षावतां तत्त्वपरीक्षायां छलेन प्रत्यवस्थानं युक्तमिति यौगाः; तेप्यतत्त्वज्ञाः; यतो यद्येतावतैव जिगीषुर्निगृह्येत तर्हि पत्रवाक्य- २५ मनेकार्थं व्याचक्षाणोपि निगृह्यताम्। न चैवम्। यत्र हि पक्षे वादिप्रतिवादिनोर्विप्रतिपत्त्या प्रवृत्तिस्तत्सिद्धेरेवैकस्य जयोन्यस्य पराजयः न त्वनेकार्थत्वप्रतिपादनमात्रम्। एवं च 'आढ्यो वै

१ प्रभूत्साहमन्त्रभेदात्। २ उदासीनःपक्षपातरहितः। ३ आदिना पापभीरुत्वादिसंग्रहः। ४ वादिप्रतिवादिनोः। ५ शकटोपयुक्तबलीवर्दद्वन्द्वधरणाशय (बलीवर्दावरोधकरज्जवः) इव। ६ इति चतुरङ्गत्वं सिद्धं वादस्य। ७ इति चातुर्विध्यम्। ८ छलजात्यादिवादिनाम्। ९ न मुखपिधानेन। १० प्रतिवादिना। ११ दूषणदातुः प्रतिवादिनः। १२ गुरुशिष्याणाम्। १३ ब्रुवन्ति। १४ अनेकार्थप्रतिपादनमात्रेण। १५ छलवादी।

वैधवेयो नवकम्बलत्वाद्देवदत्तवत्' इति प्रयोगे यदि वक्तुः 'नवः कम्बलोस्येति, नवास्य कम्बलाः' इति चार्थद्वयं 'नवकम्बलः' इति शब्दस्याभिप्रेतं भवति तदा–'कुतोस्य नव कम्बलाः' इति प्रत्यवतिष्ठमानो हेतोरसिद्धतामेवोद्भावयति। अन्यस्तु तदुभयार्थसम-
५ र्थनेन तदेकतरार्थसमर्थनेन वा हेतुसिद्धिं प्रदर्शयति। नवस्तावदेकः कम्बलोस्य प्रतीतो भवता, अन्येऽप्यष्टौ कम्बला गृहे तिष्ठन्तीत्युभयथा नवकम्बलत्वस्य सिद्धेर्नासिद्धतोद्भावनीया। नवकम्बलयोगित्वस्य वा हेतुत्वेनोपादानात्सिद्ध एव हेतुः। इति स्वपक्षसिद्धौ सत्यामेव वादिनो जयः परस्य च पराजयो
१० नान्यथा। तन्न वाक्छलं युक्तम्।

नापि सामान्यच्छलम्। तस्य हि लक्षणम्–"सम्भवतोर्थस्यातिसामान्ययोगादसद्भूतार्थकल्पना सामान्यच्छलम्" [न्यायसू० १।२।१३] इति। तथा हि–'विद्याचरणसम्पत्तिर्ब्राह्मणे सम्भवेत्' इत्युक्तेऽस्य वाक्यस्य विघातोऽर्थविकल्पोपपत्त्याऽसद्भूतार्थकल्प-
१५ नया क्रियते। यदि ब्राह्मणे विद्याचरणसम्पत्सम्भवेति व्रात्येपि सम्भवेद्ब्राह्मणत्वस्य तत्रापि सम्भवात्। तदिदं ब्राह्मणत्वं विवक्षितमर्थं विद्याचरणसम्पल्लक्षणं 'क्वचिद्ब्राह्मणे तादृश्येति क्वचित्तु व्रात्येऽत्येति तदभावेपि भावात्' इत्यतिसामान्यम्, तेन योगाद्वक्तुरभिप्रेतादर्थात्सद्भूतादन्यस्यासद्भूतार्थस्य कल्पना सामान्य-
२० च्छलम्। तच्चायुक्तम्; हेतुदोषस्यानैकान्तिकत्वस्यात्रोपरेणोद्भावनात्। न चानैकान्तिकत्वोद्भावनमेव सामान्यच्छलम्; 'अनित्यः शब्दः प्रमेयत्वाद्घटवत्' इत्यादेरपि सामान्यच्छलत्वानुषङ्गात्। अत्रापि हि प्रमेयत्वं क्वचिद्घटादावनित्यत्वमेति, आकाशादौ तदभावेपि भावादत्येतीति। तथाप्यस्यानैकान्तिकत्वेपि
२५ प्रकृतेपि तदस्तु विशेषाभावात्। तन्न सामान्यच्छलमप्युपपन्नम्।

१ प्रतिवादी। २ वादी। ३ प्रतिवादिना। ४ अन्येऽप्यष्टौ गृहे तिष्ठन्तीति, नवकम्बलयोगित्वस्य वा हेतुत्वेनोपादानात्सिद्ध एव हेतुरित्युभयथा नवकम्बलत्वस्य सिद्धेर्नासिद्धतोद्भावनीया, इति स्वपक्षसिद्धौ सत्यामेव वादिनो जयः परस्य च पराजयो नान्यथेति वाक्यरचना द्रष्टव्या। ५ नवो नूतनः। ६ स्वपक्षासिद्ध्यभावे जयपराजयौ न भवतो वादिप्रतिवादिनोरिति। ७ जायमानस्य। ८ अयं विद्याचरणसम्पत्तिमान्भवति ब्राह्मणत्वात्तादृशब्राह्मणवदिति। ९ वादिना। १० अर्थस्य विकल्पो भेदस्तस्योपपत्त्या कृत्वा। ११ तर्हि। १२ भ्रष्टे ब्राह्मणे। १३ वर्तते। १४ व्यक्त्यन्तरे सपक्षे। १५ प्राप्नोति। १६ विपक्षरूपे। १७ विद्याचरणसम्पल्लक्षणमर्थं ब्राह्मणत्वं अतिक्रम्य वर्तते इत्यर्थः। १८ ब्राह्मणत्वस्य। १९ अतिशयेन ब्राह्मणत्वम्। २० अनुमाने। २१ अन्यथा। २२ अनुमाने। २३ अतिसामान्ययोगेपि।

नाप्युपचारच्छलम्। तस्य हि लक्षणम्–"धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेध उपचारच्छलम्" [न्यायसू० १।२।१४] इति। धर्मस्य हि क्रोशनादेर्विकल्पोऽध्यारोपस्तस्य निर्देशे 'मञ्चाः क्रोशन्ति गायन्ति' इत्यादौ तात्स्थ्यात्तच्छब्दोपचारेणासद्भूतार्थस्य तु परिकल्पनं कृत्वा परेण प्रतिषेधो विधीयते–'न मञ्चाः क्रोशन्ति किन्तु मञ्चस्थाः पुरुषाः क्रोशन्ति' इति। तच्च परस्य पराजयाय जायते यथावक्तुरभिप्रायमप्रतिषेधात्। शब्दप्रयोगो हि लोके प्रधानभावेन गुणभावेन च प्रसिद्धः। ततो यदि वक्तुर्गौणोर्थोभिप्रेतः, तदा तस्यानुज्ञानं प्रतिषेधो वा विधातव्यः। अथ प्रधानभूतः; तदा तस्य ताविति। यदा तु वक्ता गौणमर्थमभिप्रैति प्रधानभूतं परिकल्प्य परः प्रतिषेधति तदा तेन स्वमनीषा प्रतिषिद्धा स्यान्न परस्याभिप्राय इति नास्यायमुपालम्भः स्यात्, तदनुपालम्भाच्चासौ पराजीयते; इत्यप्यविचारितरमणीयम्; यतो यद्येतावतैवासौ निगृह्येत तर्हि यौगोपि सकलशून्यवादिनं प्रति मुख्यरूपतया प्रमाणादिप्रतिषेधं कुर्वन्निगृह्येत, संव्यवहारेण प्रमाणादेस्तेनाभ्युपगमात्। ततः स्वपक्षसिद्ध्यैव परस्य पराजयो न पुनश्छलमात्रेण।

नापि जातिमात्रेण। तथाहि–तस्याः सामान्यलक्षणम्–"साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः" [न्यायसू० १।२।१८] इति। तस्याश्चानेकत्वं साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य भेदात्। तथा च न्यायभाष्यकारः–"साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पाज्जातिबहुत्वमिति" [न्यायभा० ५।१।१]। ताश्च खल्विमा जातयः स्थापनाहेतौ प्रयुक्ते चतुर्विंशतिः प्रतिषेधहेतवः–"साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुपपत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः" [न्यायसू० ५।१।१] इति सूत्रकारवचनात्।

---

१ मुख्यार्थप्रतिषेधः। २ उपचारः। ३ प्रयोगे कृते। ४ प्रतिवादिना। ५ वक्तुरभिप्रायानतिक्रमेण प्रतिषेधः स्यादिति भावः। ६ अनुज्ञानप्रतिषेधौ विधातव्यौ, इयं व्यवस्था भवतु। ७ सा व्यवस्थात्रापि भविष्यतीत्युक्ते सत्याह। ८ प्रतिवादिना। ९ वादिनः। १० प्रतिषिद्धः। ११ वादिनः। १२ पराजयः। १३ तस्य=वादिनः। १४ प्रतिवादी। १५ गौणेर्थेभिप्रेते मुख्यार्थप्रतिषेधमात्रेण। १६ ननु सकलशून्यवादिनाऽमुख्यरूपतयाभ्युपगतस्य प्रमाणादेर्मुख्यरूपतयैव प्रतिषेधं विदधानः कथं यौगो निगृह्येतेत्याशङ्कायामाह। १७ उपचारेण। १८ नैतावता प्रतिवादिनः पराजयो यतः। १९ दूषणम्। २० भेदात्। २१ विधिसाध्यस्य। २२ कार्याणि, तैः समाः।

तत्र[1] साधर्म्यसमां जातिं न्यायभाष्यकारो व्याचष्टे-साधर्म्येणोपसंहारे[2] कृते[3] साध्यधर्मविपर्ययोपपत्तेः[4] साधर्म्येण प्रत्यवस्थानं[5] साधर्म्यसमः प्रतिषेधः। निदर्शनम्-'क्रियावानात्मा[6], क्रियाहेतुगुणाश्रयत्वात्[7], यो यः क्रियाहेतुगुणाश्रयः स स क्रियावान् यथा ५लोष्टः, तथा चात्मा, तस्मात्क्रियावान्' इति साधर्म्योदाहरणेनोप[8]संहारे कृते[9] परः[10] साध्यधर्मविपर्ययोपपत्तितः साधर्म्योदाहरणेनैव प्रत्यवतिष्ठते-'निष्क्रिय आत्मा विभुद्रव्यत्वादाकाशवत्' इति। न[11] चास्ति विशेषः-'क्रियावत्साधर्म्यात्क्रियावता[12] भवितव्यं न पुनर्निष्क्रियत्वसाधर्म्यान्निष्क्रियेण' इति साधर्म्यसमो दूषणाभासः। न १०ह्यात्मनः क्रियावत्त्वे साध्ये क्रियाहेतुगुणाश्रयत्वस्य हेतोः स्वसाध्येन व्याप्तिः विभुत्वान्निष्क्रियत्वसिद्धौ विच्छिद्यते[13]। न च[14] तद्विच्छेदे तद्दूषणत्वम्[15], साध्यसाधनयोर्व्याप्तिविच्छेदसमर्थस्यैव दोषत्वेनोपवर्णनात्।

वार्त्तिककारस्त्वेवमाह-साधर्म्येणोपसंहारे कृते तद्विपरीतसा[16]-१५धर्म्येण प्रत्यवस्थानं वैधर्म्येणोपसंहारे[17] तत्साधर्म्येण[18] प्रत्यवस्थानं साधर्म्यसमः। यथा 'अनित्यः शब्द उत्पत्तिधर्मकत्वात्कुम्भादिवत्' इत्युपसंहृते[19] परः[20] प्रत्यवतिष्ठते-यद्यऽनित्यघटसाधर्म्यादयमनित्यो[21] नित्येनाप्याकाशेनास्य साधर्म्यममूर्त्तत्वमस्तीति नित्यः प्राप्तः। तथा 'अनित्यः शब्द उत्पत्तिधर्मकत्वात्, यत्पुनरनित्यं २०न भवति तन्नोत्पत्तिधर्मकम् यथाकाशम्' इति प्रतिपादिते[22] परः[23] प्रत्यवतिष्ठते-यदि नित्याकाशवैधर्म्यादनित्यः[24] शब्दस्तदा साधर्म्यमप्यस्याकाशेनास्त्यमूर्त्तत्वम्, अतो नित्यः प्राप्तः। अथ[25] सत्यप्येतस्मिन्साधर्म्ये[26] नित्यो न भवति, न तर्हि वक्तव्यम्-'अनित्यघटसाधर्म्यान्नित्याकाशवैधर्म्याच्चा[27]ऽनित्यः शब्दः[28]' इति।

२५ वैधर्म्यसमायास्तु जातेः-वैधर्म्येणोपसंहारे कृते साध्यधर्मविपर्ययाद्वैधर्म्येण साधर्म्येण वा प्रत्यवस्थानं लक्षणम्। 'यथात्मा

१ जातिषु मध्ये। २ साध्यस्य। ३ साधनवादिना। ४ सक्रियत्वलक्षणान्निष्क्रियत्वं यथा विपर्ययः। ५ जातिवादिना। ६ गमनादि। ७ प्रयत्नोऽत्र गुणः। ८ अन्वयेन। ९ वादिना। १० प्रतिवादी। ११ क्रियावत्साधर्म्यात्क्रियावान्भवतु निष्क्रियत्वसाधर्म्यान्निष्क्रियो न भविष्यतीत्युक्ते सत्याह। १२ आत्मना। १३ निराक्रियते। १४ व्याप्तिविच्छेदो मा भवतु तद्दूषणत्वं च भवत्वित्युक्ते सत्याह। १५ साध्यसम इति। १६ उक्तसाधर्म्यात्। १७ वैधर्म्यस्य। १८ वादिना। १९ जातिवादी। २० प्रतिकूलतया परिवर्त्तते। २१ तर्हि। २२ वादिना। २३ जातिवादी। २४ उक्तवैधर्म्यात्। २५ यदि। २६ आकाशेन सह शब्दस्य। २७ घटेन सह शब्दस्य साधर्म्यात्। २८ शब्दस्य।

निष्क्रियो विभुत्वात्, यत्पुनः सक्रियं तन्न विभु यथा लोष्टादि, विभुश्चात्मा, तस्मान्निष्क्रियः' इत्युक्ते परः प्राह—निष्क्रियत्वे सत्यात्मनः क्रियाहेतुगुणाश्रयत्वं न स्यादाकाशवत्, अस्ति चैतत्, ततो नायं निष्क्रिय इति। साधर्म्येण तु प्रत्यवस्थानम्—'क्रियावानेवात्मा क्रियाहेतुगुणाश्रयत्वात्, य ईदृशः स ईदृशो दृष्टः यथा लोष्टादिः, तथा चात्मा, तस्मात्क्रियावानेव' इति। ५

उत्कर्षसमादीनां लक्षणम्—"साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः" [न्यायसू० ५।१।४] इति।

तत्रोत्कर्षसमायास्तावल्लक्षणम्—दृष्टान्तधर्मं साध्ये समासञ्जयतो मतोत्कर्षसमा जातिः। तद्यथा—'क्रियावानात्मा क्रियाहेतुगुणाश्रयत्वाल्लोष्टवत्' इत्युक्ते परः प्रत्यवतिष्ठते—यदि क्रियाहेतुगुणाश्रयो जीवो लोष्टवत्क्रियावांस्तदा तद्वदेव स्पर्शवान्भवेत्। अथ न स्पर्शवांस्तर्हि क्रियावानपि न स्यादविशेषात्। १०

यस्तु तत्रैव क्रियावज्जीवसाधने प्रयुक्ते साध्ये साध्यधर्मिणि धर्मस्याभावं दृष्टान्तात्समासञ्जयन्वक्ति सोऽपकर्षसमां जातिं वक्ति। यथा लोष्टः क्रियाश्रयोऽसर्वगतो दृष्टस्तद्वदात्माप्यसर्वगतोऽस्तु, विपर्यये विशेषो वा वाच्य इति। १५

ख्यापनीयो वर्ण्योऽख्यापनीयोऽवर्ण्यः। तेन वर्ण्येनावर्ण्येन च समा जातिः। तद्यथात्रैव साधने प्रयुक्ते परः प्रत्यवतिष्ठते—यद्यात्मा क्रियावान् वर्ण्यः साध्यस्तदा लोष्टादिरपि साध्योऽस्तु। अथ लोष्टादिरवर्ण्यस्तर्ह्यात्माप्यवर्ण्योऽस्तु विशेषाभावादिति। २०

विकल्पो विशेषः, साध्यधर्मस्य विकल्पं धर्मान्तरविकल्पात्प्रसञ्जयतो विकल्पसमा जातिः। यथात्रैव साधने प्रयुक्ते परः प्रत्यवतिष्ठते—क्रियाहेतुगुणोपेतं किञ्चिद्गुरु दृश्यते यथा लोष्टादि, किञ्चित्तु लघूपलभ्यते यथा वायुः, तथा क्रियाहेतुगुणोपेतमपि किञ्चित्क्रियाश्रयं युज्येत यथा लोष्टादि, किञ्चित्तु निष्क्रियं यथात्मेति। २५

---

१ वादिना। २ आत्मा। ३ सामान्यलक्षणम्। ४ साध्यः=पक्षः। ५ विकल्पः=समारोपः। ६ समारोपयतः। ७ क्रियाहेतुगुणाश्रयत्वस्य। ८ पक्षे। ९ सर्वगतत्वलक्षणस्य। १० सर्वगतत्वे। ११ वादिना त्वया। १२ साध्यधर्मिधर्मः। १३ पक्षः। १४ दृष्टान्तोऽपि। १५ पक्षोऽस्तु। १६ क्रियाश्रयत्वस्य। १७ भेदम्। १८ धर्मान्तरविकल्पेन प्रत्यवस्थानं विकल्पसमा जातिः। १९ प्रतिवादिनः।

हेत्वाद्यवयवयोगी धर्मः साध्यः, तमेव दृष्टान्ते प्रसञ्जयतः साध्यसमा जातिः। यथात्रैव साधने प्रयुक्ते परः प्राह-यदि यथा लोष्टस्तथात्मा तदा यथात्मायं तथा लोष्टः स्यात्। 'सक्रियः' इति साध्यश्चात्मा लोष्टोपि तथा साध्योस्तु। अथ लोष्टः क्रियावान्न
५ साध्यः; तदात्मापि क्रियावान्साध्यो मा भूद्विशेषो वा वाच्य इति।

दूषणाभासता चासाम्-सत्साधने दृष्टान्तादिसामर्थ्ययुक्ते सति साध्यदृष्टान्तयोर्धर्मविकल्पमात्रात्प्रतिषेधस्य कर्तुमशक्यत्वात्। यत्र हि लौकिकेतरयोर्बुद्धिसाम्यं तस्य दृष्टान्तत्वान्न साध्यत्वमिति।

सम्यक्साधने प्रयुक्ते प्राप्त्या यत्प्रत्यवस्थानं सा प्राप्तिसमा
१० जातिः। अप्राप्त्या तु प्रत्यवस्थानमप्राप्तिसमेति। तद्यथा-हेतुः साध्यं प्राप्य, अप्राप्य वा साधयेत्? 'प्राप्य चेत्; हेतुसाध्ययोः प्राप्तयोर्युगपत्सम्भवात्कथमेकस्य हेतुतान्यस्य साध्यता युज्येत्' इति प्रत्यवस्थानं प्राप्तिसमा जातिः। अथ 'अप्राप्य हेतुः साध्यं साधयेत्; तर्हि सर्वसाध्यमसौ साधयेत्। न चाप्राप्तः प्रदीपः
१५ पदार्थानां प्रकाशको दृष्टः' इति प्रत्यवस्थानमप्राप्तिसमेति।

ताविमौ दूषणाभासौ प्राप्तस्यापि धूमादेरग्न्यादिसाधकत्वोपलम्भात्, कृत्तिकोदयादेस्त्वप्राप्तस्य शकटोदयादौ गमकत्वप्रतीतेरिति।

दृष्टान्तस्यापि साध्यविशिष्टतया प्रतिपत्तौ साधनं वक्तव्यमिति
२० प्रसङ्गेन प्रत्यवस्थानं प्रसङ्गसमा जातिः। यथात्रैव साधने प्रयुक्ते परः प्रत्यवतिष्ठते-'क्रियाहेतुगुणयोगात्क्रियावाँल्लोष्टः' इति हेतुर्नोक्तः। न च हेतुमन्तरेण साध्यसिद्धिः।

अस्याश्च दूषणाभासत्वम्-यथैव हि रूपं दिदृक्षूणां प्रदीपोपादानं प्रतीयते न पुनः स्वयं प्रकाशमानं प्रदीपं दिदृक्षूणाम्।
२५ तथा साध्यस्यात्मनः क्रियावत्त्वस्य प्रसिद्ध्यर्थं लोष्टस्य दृष्टान्तस्य ग्रहणमभिप्रेतं न पुनस्तस्यैव सिद्ध्यर्थं साधनान्तरस्योपादानम्, वादिप्रतिवादिनोरविवादविषयस्य दृष्टान्तस्य दृष्टान्तत्वोपपत्तेस्तत्र साधनान्तरस्याफलत्वादिति।

प्रतिदृष्टान्तरूपेण प्रत्यवस्थानं प्रतिदृष्टान्तसमा जातिः। यथा-
३० त्रैव साधने प्रयुक्ते प्रतिदृष्टान्तेन परः प्रत्यवतिष्ठते-क्रिया-

१ आदिना प्रतिज्ञाहेतुदृष्टान्तोपनयनिगमनानि। २ उभयोरपि दृष्टान्तसाध्ययोः साध्यत्वापादनेन प्रत्यवस्थानं साध्यसमा जातिः। ३ प्राक्तनवाक्यं विवृणोति। ४ सक्रिय इति। ५ अस्ति चेत्तर्हि। ६ त्वया वादिना। ७ उत्कर्षसमादिषण्णाम्। ८ विकल्प आरोपः। ९ विशेषाभावात्। १० हेतुमन्तरेण साध्यसिद्धिर्भविष्यतीत्युक्ते सत्याह। ११ कथम्? तथा हि।

हेतुगुणाश्रयमाकाशं निष्क्रियं दृष्टमिति[1] । कः पुनराकाशस्य क्रियाहेतुगुणः? संयोगो वायुना सह । कालत्रयेप्यसम्भवादाकाशे क्रियायाः । न क्रियाहेतुर्वायुना संयोगः; इत्यप्यसारम्; वायुसंयोगेन वनस्पतौ क्रियाकारणेन समानधर्मत्वादाकाशे वायुसंयोगस्य । यत्त्वसौ तत्र क्रियां न करोति तन्नाकारणत्वात्, ५ किन्तु परममहापरिमाणेन प्रतिबद्धत्वात् । अथ क्रियाकारणवायुवनस्पतिसंयोगसदृशो वाय्वाकाशसंयोगो न पुनः क्रियाकारणम्; न कश्चिदप्येवं हेतुरनैकान्तिकः स्यात्-'अनित्यः शब्दोऽमूर्त्तत्वात्सुखादिवत्' इत्यत्राप्यमूर्त्तत्वं हेतुः शब्देऽन्योन्यश्चाकाशे तत्सदृश इति कथमस्याकाशेनानैकान्तिकत्वम्? सकलानुमानो- १० च्छेदश्च, अनुमानस्य सादृश्यादेव प्रवर्त्तनात् । न खलु ये धूम[2]धर्माः क्वचिद्धूमे[3] दृष्टास्त एवान्यत्र दृश्यन्ते तत्सदृशानामेव दर्शनात् । ततोऽनेन[4] कस्यचिद्धेतोरनैकान्तिकत्वं क्वचिद[5]नुमानात्प्रवृत्तिं चेच्छता तद्धर्मसदृशास्तद्धर्मानुमन्तव्य इति क्रियाकारणवायुवनस्पतिसंयोगसदृशो वाय्वाकाशसंयोगोपि क्रियाकारणमेव । तथा १५ च प्रतिदृष्टान्तेनाकाशेन प्रत्यवस्थानं प्रतिदृष्टान्तसमः प्रतिषेधः ।

स चायुक्तः; अस्य दूषणाभासत्वात् । तथाहि-यदि ताव[6]दयं ब्रूते-'यथायं त्वदीयो दृष्टान्तो लोष्टादिस्तथा मदीयोऽप्याकाशादिः[7]' इति, तदा व्याघातः-एकस्य[8] हि दृष्टान्तत्वेऽन्यस्यादृष्टान्तत्वमेव, उभयोस्तु दृष्टान्तत्वविरोधः । अथैवं ब्रूते-'यथायं मदीयो न २० दृष्टान्तस्तथा त्वदीयोपि' इति । तथापि व्याघातः-प्रतिदृष्टान्तस्य ह्यदृष्टान्तत्वे दृष्टान्तस्यादृष्टान्तत्वव्याघातः, प्रतिदृष्टान्ताभावे तस्य दृष्टान्तत्वोपपत्तेः । दृष्टान्तस्य वाऽदृष्टान्तत्वे प्रतिदृष्टान्तस्यादृष्टान्तत्वव्याघातः, दृष्टान्ताभावे तस्य तत्त्वोपपत्तेरिति ।

"प्रागुत्पत्तेः[9] कारणा[10]भावादा प्रत्यवस्थितिः[11] सानुत्पत्तिसमा २५ जातिः" [न्यायसू० ५।१।१२] तद्यथा-'विनश्वरः शब्दः प्रयत्नानन्तरीयकत्वात्कटकादिवत्' इत्युक्ते परः प्राह-'प्रागुत्पत्तेरनुत्पन्ने शब्दे विनश्वरत्वस्य यत्कारणं[12] प्रयत्नानन्तरीयकत्वं तन्नास्ति ततोऽयमविनश्वरः, शाश्वतस्य च शब्दस्य न प्रयत्नानन्तरं जन्म इति ।

सेयमनुत्पत्त्या प्रत्यवस्था दूषणाभासो न्यायातिलङ्घनात्[13] । उत्पन्न- ३० स्यैव हि शब्दस्य धर्मिणः प्रयत्नानन्तरीयकत्वमुत्पत्तिधर्मकत्वं वा

---

१ तद्वदात्मापि निष्क्रियो भवत्विति । २ तार्णत्वादयः । ३ महानसादौ । ४ आदिना । ५ पर्वतादौ । ६ जातिवादी । ७ दृष्टान्तः । ८ व्याघातं भावयति । ९ शब्दस्य । १० कारणं तात्वादि । ११ प्रतिकूलता । १२ लिङ्गम् । १३ न्यायातिलङ्घनमेव भावयति ।

भवति नानुत्पन्नस्य। प्रागुत्पत्तेः शब्दस्याऽसत्त्वे किमाश्रयोयमुपालम्भः? न ह्ययमनुत्पन्नोऽसन्नेव 'शब्दः' इति 'प्रयत्नानन्तरीयकः' इति 'अनित्यः' इति वा व्यपदेष्टुं शक्यः। सत्त्वे तु सिद्धमेव प्रयत्नानन्तरीयकत्वकारणं नश्वरत्वे साध्ये, अतः कथमस्य ५प्रतिषेध इति?

"सामान्यघटयोरैन्द्रियिकत्वे समाने नित्यानित्यसाधर्म्यात्संशयसमा जातिः।" [न्यायसू० ५।१।१४] यथा 'अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवत्' इत्युक्ते परः सद्दूषणमपश्यन् संशयेन प्रत्यवतिष्ठते-प्रयत्नानन्तरीयकेपि शब्दे सामान्येन साध- १०र्म्यमैन्द्रियिकत्वं नित्येनास्ति घटेन चानित्येनास्ति, संशयः शब्दे नित्यत्वानित्यत्वधर्मयोरिति।

अस्याश्च दूषणाभासत्वम्-शब्दाऽनित्यत्वाऽप्रतिबन्धित्वात्। यथैव हि पुरुषे शिरःसंयमनादिना विशेषेण निश्चिते सति न स्थाणुपुरुषसाधर्म्यादूर्ध्वत्वात् संशयस्तथा प्रयत्नानन्तरीयकत्वेन १५विशेषेणानित्ये शब्दे निश्चिते न घटसामान्यसाधर्म्यादैन्द्रियिकत्वात् संशयो युक्त इति।

"उभयसाधर्म्यात्प्रक्रियासिद्धेः प्रकरणसमा जातिः।" [न्यायसू० ५।१।१६] 'यथा अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवत्' इत्यनित्यसाधर्म्यात्प्रयत्नानन्तरीयकत्वाच्छब्दस्यानित्यतां कश्चि- २०त्साधयति। अपरः पुनर्गोत्वादिना सामान्येन साधर्म्यात्तस्य नित्यताम् इति, अतः पक्षे विपक्षे च प्रक्रिया समानेति।

ईदृश्यं च प्रक्रियाऽनतिवृत्त्या प्रत्यवस्थानमयुक्तम्; विरोधात्। प्रतिपक्षप्रक्रियासिद्धौ हि प्रतिषेधो विरुध्यते। प्रतिषेधोपपत्तौ तु प्रतिपक्षप्रक्रियासिद्धिर्व्याहन्यते इति।

२५ "त्रैकाल्यासिद्धेर्हेतोरहेतुसमा जातिः।" [न्यायसू० ५।१।१८] यथा सत्साधने दूषणमपश्यन्परः प्राह-'साध्यात्पूर्वं वा साधनम्, उत्तरं वा, सहभावि वा स्यात्? न तावत्पूर्वम्; असत्यर्थे तस्य साधनत्वानुपपत्तेः। नाप्युत्तरम्; असति साधने पूर्वं साध्यस्य साध्यस्वरूपत्वासम्भवात्। नापि सहभावि; स्वतन्त्रतया प्रसिद्धयोः

१ भूयोदर्शनाभिश्चितव्याप्तेः साधर्म्यवैधर्म्योपाधिप्रतिकूलतर्कादिना पक्षे सन्देहोपादानं संशयसमा जातिः। २ शब्दत्वलक्षणेन। ३ साधर्म्यम्। ४ केशबन्धादिना। ५ अनित्यनित्याभ्यां घटसामान्याभ्यां। ६ प्रत्यनुमानेन प्रत्यवस्थानं प्रकरणसमा जातिः। ७ ऐन्द्रियिकत्वात्। ८ प्रक्रिया अनुमानरचना। ९ साध्यस्य प्रागेव सिद्धत्वात्किमनेन हेतुनेति भावः।

साध्यसाधनभावासम्भवात्सह्यविन्ध्यवत्' इत्यहेतुसमत्वेन प्रत्यवस्थानमयुक्तम्; हेतोः प्रत्यक्षतो धूमादेर्वन्ह्यादौ प्रसिद्धेरिति ।

"अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमा जातिः।" [न्यायसू० ५।१।२१] यथात्रैव साधने प्रयुक्ते परः प्राह-'यदि प्रयत्नानन्तरीयकत्वेनानित्यः शब्दो घटवत्तदार्थापत्तितो नित्याकाशसाधर्म्या- ५ न्नित्योस्तु । यथैव ह्यस्पर्शवत्त्वं खे नित्ये दृष्टं तथा शब्देपि' इति ।

अस्याश्च दूषणाभासत्वम्; सुखादिनानैकान्तिकत्वात् । नचानैकान्तिकाद्धेतोः प्रतिपक्षसिद्धिरिति ।

"एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सत्त्वोपपत्तितोऽविशेषसमा जातिः।" [न्यायसू० ५।१।२३] यथात्रैव साधने १० प्रयुक्ते परः प्रत्यवतिष्ठते-प्रयत्नानन्तरीयकत्वलक्षणैकधर्मोपपत्तेर्घटशब्दयोरनित्यत्वाविशेषे सत्त्वधर्मस्याप्यखिलार्थेषूपपत्तेरनित्यत्वाविशेषः स्यात् ।

तस्याश्च दूषणाभासता; तथा साधयितुमशक्यत्वात् । न खलु यथा प्रयत्नानन्तरीयकत्वं साधनधर्मः साध्यमनित्यत्वं शब्दे १५ साधयति तथा सर्वार्थे सत्त्वम्, धर्मान्तरस्यापि नित्यत्वस्याकाशादौ सत्त्वे सत्युपलम्भात्, प्रयत्नानन्तरीयकत्वे च सत्यऽनित्यत्वस्यैवोपलम्भादिति ।

"उभयकारणोपपत्तेरुपपत्तिसमा जातिः।" [न्यायसू० ५।१। २५] यथात्रैव साधने प्रयुक्ते परः प्राह-'यद्यनित्यत्वे कारणं २० प्रयत्नानन्तरीयकत्वं शब्दस्यास्तीत्यनित्योसौ तदा नित्यत्वेप्यस्य कारणमस्पर्शवत्त्वमस्तीति नित्योप्यस्तु' इत्युभयस्य नित्यत्वस्यानित्यत्वस्य च कारणोपपत्त्या प्रत्यवस्थानमुपपत्तिसमो दूषणाभासः । एवं ब्रुवता स्वयमेवानित्यत्वकारणं प्रयत्नानन्तरीयकत्वं तावदभ्युपगतम् । एवं तदभ्युपगमाच्चानुपपन्नस्तत्प्रतिषेध इति । २५

"निर्दिष्टकारणाभावेप्युपलम्भादुपलब्धिसमा जातिः।" [न्यायसू० ५।१।२७] यथात्रैव साधने प्रयुक्ते परः प्रत्यवतिष्ठते-'शाखादिभङ्गजे शब्दे प्रयत्नानन्तरीयकत्वाभावेप्यनित्यत्वमस्ति' इति ।

दूषणाभासत्वं चास्याः; प्रकृतसाधनाप्रतिबन्धित्वात् । न खलु ३० 'साधनमन्तरेण साध्यं न भवति इति' नियमोस्ति, साधनस्यैव

१ अर्थापत्त्या प्रत्यवस्थानम् । २ घटसाधर्म्येण । ३ अनित्येन । ४ अस्पर्शवत्त्वादिति । ५ परेणाङ्गीक्रियमाणे । ६ यथा सर्वार्थेषु साधनधर्मः सत्त्वमनित्यत्वं न साधयति तथा प्रयत्नानन्तरीयकत्वसाधनधर्मोऽनित्यत्वं न साधयतीत्युक्ते सत्याह । ७ निर्दिष्टस्य साध्यधर्मसिद्धिकारणस्याभावेपि साध्यधर्मोपलब्ध्या प्रत्यवस्थानम् । ८ साध्यस्य ।

साध्याभावेऽभावनियमव्यवस्थितेः । न चानित्यत्वे प्रयत्नानन्तरीयकत्वमेव गमकम्; उत्पत्तिमत्त्वादेरपि तद्गमकत्वात् ।

"तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमा जातिः ।" [न्यायसू० ५।१।२९] 'यथा अविद्यमानः शब्द उच्चारणात्पूर्वमनुपलब्धेरुत्पत्तेः पूर्वं घटादिवत् । न खलूच्चारणात्प्राग्विद्यमानस्य शब्दस्यानुपलब्धिः तदावरणानुपलब्धेः, उत्पत्तेः प्राग्घटादेरिव । यस्य तु दर्शनात् प्राग्विद्यमानस्यानुपलब्धिस्तस्य नावरणानुपलब्धिः, यथा भूम्याद्यावृतस्योदकादेः, आवरणानुपलब्धिश्च श्रवणात्प्राक् शब्दस्य ।' इत्युक्ते परः प्राह–तस्य शब्दस्यानुपलब्धेरप्यनुपलम्भादभावसिद्धौ सत्यां शब्दस्याभावविपरीतत्वेन भावस्योपपत्तेरनुपलब्धिसमा जातिः ।

अस्याश्च दूषणाभासत्वम्; अनुपलब्धेरनुपलब्धिस्वभावतयोपलब्धिविषयत्वात् । यथैव ह्युपलब्धिरुपलब्धेर्विषयस्तथानुपलब्धिरपि । कथमन्यथा 'अस्ति मे घटोपलब्धिः तदनुपलब्धिस्तु नास्ति' इति संवेदनमुपपद्यते ?

"साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमा जातिः ।" [न्यायसू० ५।१।३२] यथा 'अनित्यः शब्दः कृतकत्वाद् घटवत्' इत्युक्ते परः प्रत्यवतिष्ठते–यदि शब्दस्य घटेन साधर्म्यं कृतकत्वादिनाऽनित्यत्वं साधयेत्, तदा सर्वं वस्त्वनित्यं प्रसज्येत घटादिनाऽनित्यत्वेन सत्त्वेन कृत्वा साधर्म्यमात्रस्य सर्वत्राऽविशेषात् ।

तस्याश्च दूषणाभासत्वम्; प्रतिषेधकस्याप्यसिद्धिप्रसङ्गात् । पक्षो हि प्रतिषेध्यः प्रतिषेधकस्तु प्रतिपक्षः । तयोश्च साधर्म्यं प्रतिज्ञादियोगः तेन विना तयोरसम्भवात् । ततः प्रतिज्ञादियोगाद्यथा पक्षस्यासिद्धिस्तथा प्रतिपक्षस्यापि । अथ सत्यपि साधर्म्ये पक्षप्रतिपक्षयोः पक्षस्यैवासिद्धिर्न प्रतिपक्षस्य; तर्हि घटेन साधर्म्यात्कृतकत्वाच्छब्दस्याऽनित्यतास्तु, सकलार्थानां त्वनित्यता तेन साधर्म्यमात्रात् मा भूदिति ।

---

१ तस्य=शब्दस्य । २ सन्दिग्धानैकान्तिकत्वपरिहारमाह । ३ व्यतिरेकनिदर्शनमाह । ४ जातिवादी । ५ अनुपलब्धेरप्यभावसिद्धिः कथमित्युक्ते सत्याह । ६ द्वितीयानुमानमाश्रित्य जातिं वदति । ७ कुतः । ८ अनुपलब्धेरुपलब्धिविषयत्वं यदि न स्यात् । ९ एकस्यानित्यत्वे सर्वस्यानित्यत्वापादनमनित्यसमा जातिः । १० धर्मेण । ११ पूर्वोक्ताया जातेः । १२ अन्यथा । १३ प्रतिपक्षस्य । १४ कथम् । १५ प्रतिज्ञादियोगेन ।

"शब्दाऽनित्यत्वोक्तौ नित्यत्वप्रत्यवस्थितिर्नित्यसमा जातिः।" [न्यायसू० ५।१।३५?] तद्यथा-'अनित्यः शब्दः' इत्युक्ते परः प्रत्यवतिष्ठते-शब्दाश्रयमनित्यत्वं किं नित्यम्, अनित्यं वा? यदि नित्यम्; तर्हि शब्दोपि नित्यः स्यात्, अन्यथास्य तदाधारत्वं न स्यात्। अथानित्यम्; तथाप्ययमेव दोषः-अनित्यत्वस्याऽनित्यत्वे हि शब्दस्य नित्यत्वमेव स्यात्।

दूषणाभासत्वं चास्याः; प्रकृतसाधनाऽप्रतिबन्धित्वात्। प्रादुर्भूतस्य हि पदार्थस्य प्रध्वंसोऽनित्यत्वमुच्यते, तस्य प्रतिज्ञाने प्रतिषेधविरोधः। स्वयं तदप्रतिज्ञाने च प्रतिषेधो निराश्रयः स्यात्। तस्मानित्यता शब्दे नित्यत्वप्रत्यवस्थितेर्निराकर्तुं शक्येति।

"प्रयत्नानेककार्यत्वात्कार्यसमा जातिः।" [न्यायसू० ५।१।३७] यथा 'अनित्यः शब्दः प्रयत्नानन्तरीयकत्वात्' इत्युक्ते परः प्रत्यवतिष्ठते-प्रयत्नानन्तरं घटादीनां प्रागऽसतामात्मलाभोपि प्रतीतः, आवारकापनयनात् प्राक्सतामेवाभिव्यक्तिश्च। तत्कथमतः शब्दस्यानित्यतेति?

दूषणाभासता चास्याः; प्रकृतसाधनाप्रतिबन्धित्वादेव। शब्दस्य हि प्रागसतः स्वरूपलाभलक्षणं जन्मैव प्रयत्नानन्तरीयकत्वमुपपद्यते प्रागनुपलब्धिनिमित्तस्याभावेप्यनुपलब्धितः सत्त्वासम्भवादिति।

तदेतद्यौगकल्पितं जातीनां सामान्यविशेषलक्षणप्रणयनमयुक्तमेव; साधनाभासेपि साधर्म्यादिना प्रत्यवस्थानस्य जातित्वप्रसङ्गात्। तथेष्टत्वान्न दोषः; तथा हि-असाधौ साधने प्रयुक्ते यो जातीनां प्रयोगः सोनभिज्ञतया वा साधनदोषस्य स्यात्, तद्दोषप्रदर्शनार्थं वा प्रसङ्गव्याजेन; इत्यप्यसमीचीनम्; साधनाभासे प्रयोगे जातिप्रयोगस्य उद्योतकरेण निराकरणात्।

जातिवादी च साधनाभासमेतदिति प्रतिपद्यते वा, न वा? यदि प्रतिपद्यते; तर्हि य एवास्य साधनाभासत्वं हेतुदोषोऽनेन प्रतिपन्नः स एव वक्तव्यो न जातिः, प्रयोजनाभावात्। प्रसङ्गव्याजेन दोषप्रदर्शनार्थं सा; इत्यप्ययुक्तम्; अनर्थसंशयात्। यदि हि परप्रयु-

---

१ पक्षस्यानित्यत्वधर्मस्य नित्यत्वापादनेन तृतीयासः प्रत्यवस्थानं नित्यसमा जातिः। २ शब्दाधारे। ३ उत्पत्तेः। ४ प्रयत्नेन। ५ उच्चारणात्। ६ शब्दस्यानुपलब्धेर्निमित्तमावारकम्। ७ दूषणस्य। ८ मम यौगस्य। ९ पूर्वपक्षवादिना। १० जातिवादिना प्रयुक्तः। ११ पूर्वपक्षवादिना प्रयुक्ते। १२ प्रतिवादिप्रयुक्तस्य। १३ नैयायिकाचार्येण। १४ वादिनः। १५ अनर्थः दोषः।

कायां जातौ साधनाभासवादी स्वप्रयुक्तसाधनदोषं पश्यन् सभायामेवं ब्रूयात् 'मया प्रयुक्ते साधनेऽयं दोषः स चानेन नोद्भावितः, जातिस्तु प्रयुक्ता' इति तदा तावज्जातिवादिनो न जयः प्रयोजनम्; उभयोरज्ञानसिद्धेः। नापि साम्यम्; सर्वथा जयस्यासम्भवे तस्याभिप्रेतत्वात् "ऐकान्तिकं पराजयाद्वरं सन्देहः" [ ] इत्यभिधानात्। तदप्रयोगेपि चैतत्समानम्-पूर्वपक्षवादिनो हि साधनाभासाभिधाने प्रतिवादिनश्च तूष्णींभावे यत्किञ्चिदभिधाने वा द्वयोरज्ञानप्रसिद्धितः प्राश्निकैः साम्यव्यवस्थापनात्। यदा च साधनाभासवादी स्वसाधने दोषं प्रच्छाद्य परप्रयुक्तां जातिमेवोद्भावयति तदा न तद्वादिनो जयः साम्यं वा प्रयोजनम्; पराजयस्यैव सम्भवात्।

अथ साधनाभासमेतदित्यप्रतिपाद्य जातिं प्रयुङ्क्ते; तथाप्यफलस्तत्प्रयोगः प्रोक्तदोषानुषङ्गात्। सम्यक्साधने तु प्रयुक्ते तत्प्रयोगः पराजयायैव[3]। अथ तूष्णींभावे पराजयोऽवश्यंभावी, तत्प्रयोगे तु कदाचिदसदुत्तरेणापि निरुत्तरः स्यात् इत्यैकान्तिकपराजयाद्वरं सन्देह इत्यसौ युक्त एवेति चेत्; न; तथाप्यैकान्तिकपराजयस्यानिवार्यत्वात्। यथैव ह्युत्तरपक्षवादिनस्तूष्णींभावे सत्युत्तराऽप्रतिपत्त्या पराजयः प्राश्निकैर्व्यवस्थाप्यते तथा जातिप्रयोगेप्युत्तराप्रतिपत्तेरविशेषात्, तत्प्रयोगस्यासदुत्तरत्वेनानुत्तरत्वात्।

ननु चास्य पराजयस्तैर्व्यवस्थाप्येत यद्युत्तराभासत्वं पूर्वपक्षवाद्युद्भावयेत्, अन्यथा पर्यनुयोज्योपेक्षणात्तस्यैव पराजयः स्यात्। नन्वेवमुत्तराभासस्योत्तरपक्षवादिनोपन्यासेपि अपरस्योद्भावनशक्त्यशक्त्यपेक्षया जयपराजयव्यवस्थायामनवस्था स्यात्। न खलु जातिवादिवदस्यापि तूष्णींभावः सम्भवति, सम्यगुत्तराप्रतिपत्तावपि उत्तराभासस्योपन्याससम्भवात्। ततश्चोपन्यस्तजातिस्वरूपस्यातोऽन्यस्य चोद्भावनेपि उत्तरपक्षवादिनस्तत्परिहारे शक्तिमशक्तिं चापेक्ष्यैव पूर्वपक्षवादिनो जयः पराजयो वा व्यवस्थाप्येत जातिवादिन इवेतरस्योद्भावनशक्त्यशक्त्यपेक्ष इति। जातिलक्षणासदुत्तरप्रयोगादेव तत्परिहाराशक्तिनिश्चयात् पुनरुपन्यासवैफल्ये सत्साधनाभिधानादेवोत्तराभासत्वोद्भावनशक्तेरध्यवसायाद् इतरस्यापि कथं तद्वैफल्यं न स्यात्? सत्साधनाभिधानात्तदभिधानसामर्थ्यमेवास्यावसीयते न परोपन्यस्तजात्युद्भा-

१ पराजयायैव न जयायेति। २ वादिना। ३ प्रतिवादिनः। ४ जातिवादिनः। ५ त्वया जातिः प्रयुक्तेति वचनीयं तस्योपेक्षणात्। ६ तस्य उद्भावितस्य। ७ उपन्यासो हि जातेः। ८ निश्चयात्। ९ तस्य=जात्युद्भावनस्य।

वनसामर्थ्यम्; तर्हि जातिप्रयोगेऽप्युत्तराभासवादिनः सम्यगुत्तराभिधानासामर्थ्यमेवावसीयेत न परोद्भावितजातिपरिहारासामर्थ्यम्। ननु सदुत्तराभिधानासामर्थ्यादेव तत्परिहारासामर्थ्यनिश्चयः, तत्सद्भावे हि न सदुत्तराभिधानासामर्थ्यं स्यात्; एवं तर्हि सत्साधनाभिधानसामर्थ्यादेवास्य परोपन्यस्तजात्युद्भाव- ५ नशक्त्यवसायोऽस्तु, तदभावे तदभिधानसामर्थ्यायोगात्। सत्साधनाभिधानसमर्थस्यापि कदाचिदऽसदुत्तरेण व्यामोहसम्भवान्न तदुद्भावनसार्थ्यमवश्यंभावीति चेत्; तर्हि जातिवादिनः सदुत्तराभिधानासमर्थस्यापि स्वोपन्यस्तपरोद्भावितोत्तराभासपरिहारसामर्थ्यसम्भवात्पुनरुपन्यासश्चतुर्थोऽपेक्षणीयः स्यात्। साधन- १० वादिनोऽपि तत्परिहारनिराकरणाय पञ्चमः। पुनर्जातिवादिनस्तन्निराकरणयोग्यतावबोधार्थं षष्ठ इत्यनवस्थानं स्यात्।

ननु नायं दोषः पर्यनुयोज्योपेक्षणस्य प्रतिवादिनाऽनुद्भावनात्, 'कस्य पराजयः' इत्यनुयुक्ताः प्राश्निका एव हि पूर्वपक्षवादिनः पर्यनुयोज्योपेक्षणमुद्भावयन्ति। न खलु निग्रहप्राप्तो जातिवादी स्वं १५ कौपीनं विवृणुयात्। तर्हि जात्यादिप्रयोगमपि तं एवोद्भावयन्तु न पुनः पूर्वपक्षवादी। पर्यनुयोज्योपेक्षणं ते पूर्वपक्षवादिन एवोद्भावयन्ति न जात्यादिवादिनो जात्यादिप्रयोगमिति महामाध्यस्थ्यं तेषां येनैकस्य दोषमुद्भावयन्ति नापरस्येति। ततः पूर्वपक्षवादिनं तूष्णींभावादिकमाचरयन्तमुत्तराप्रतिपत्तिमुद्भावयन्नेव २० जातिवादी निगृह्णातीत्यभ्युपगन्तव्यम्।

तत्रापि कथम्भूतेनोत्तराप्रतिपत्त्युद्भावनेनासौ विजेयते? किं स्वोपन्यस्तजात्यपरिज्ञानोद्भावनरूपेण, परोद्भावितजात्यन्तरनिराकरणलक्षणेन वोऽ(त्त. उ)त्तराप्रतिपत्तिमात्रोद्भावनाऽऽकारेण वा? तत्राद्यविकल्पे 'अपकर्षसमाऽन्या वा जातिर्मया प्रयुक्तापि २५ न ज्ञातानेन' इत्येवं स्वोपन्यस्तजात्यपरिज्ञानमुद्भावयन्नात्मनः सम्यगुत्तराप्रतिपत्तिमसम्बद्धाभिधायित्वं परकीयसाधनसम्यक्त्वं चोद्भावयतीति जात्युपन्यासवैयर्थ्यम्, अवश्यम्भावित्वात्प-

१ प्राश्निकानाम्। २ आद्यपक्षवादिनः। ३ ततश्च तृतीया जातिरुद्भावनीयेत्यर्थः। ४ पृष्टाः। ५ जातिवाद्यहं जातिमुक्तवान् त्वया वादिना न सम्भावितेति न प्रतिपादयतीति भावः। ६ गुह्येन्द्रियम्। ७ प्राश्निकाः। ८ नोद्भावयन्तीति संबन्धः। ९ उपहासवचनमिदम्। १० प्राश्निकानाम्। ११ प्राश्निकाना माध्यस्थ्याभावो यतः। १२ जानन्। १३ परेण। १४ पक्षे। १५ वादिनम्। १६ पूर्वपक्षवादिनः। १७ परः=वादी। १८ जात्यन्तरं=जातिविशेषः। १९ त्रिषु विकल्पेषु मध्ये। २० उत्कर्षसमा वा जातिः। २१ पूर्वपक्षवादिना। २२ जातिवादी।

राजयस्य। परेणाविज्ञातमात्मनो दोषं स्वयमुद्भावयन्नपि न पराजयमास्कन्दतीति चेत्; परेणाविज्ञातः स दोष इति कुतोऽवसितम्? तूष्णींभावादन्यस्य चोद्भावनादिति चेत्; न; वादविस्तरपरिहारार्थत्वात्तस्य। स्ववाग्यन्त्रिता हि वादिनो न विचलिष्यन्तीति ५स्वयमुद्भावनीयं दोषं परेणोद्भावयितुं तूष्णींभावोऽन्यस्य चोद्भावनं नाज्ञानात्। स्वयमुद्भाविते हि दोषे जात्यादिवादी तत्परिहारार्थं किञ्चिदन्यद्ब्रूयादिति न वादावसानं स्यात्। परस्याऽज्ञानमाहात्म्यख्यापनार्थं वा; पश्यतैवंविधमस्याज्ञानमाहात्म्यं येन स्वयमेव स्वदोषकलापमस्मत्साधनस्य सम्यक्त्वं चोद्भावयतीति। १०एवं साध्येन पूर्वपक्षवादिना प्रत्यवस्थिते किमत्र जातिवादी ब्रूयात्-'जातिर्मया प्रयुक्तापि न ज्ञातानेनेति वचनादुत्तरकालमनेनावसितो दोषकलापो न प्राक्, अतोऽज्ञानेनैव प्रतिवादिना तूष्णींभूतमन्यद्वोद्भावितम्' इति। अत्रापि शपथः शरणम्। ननु यदि नाम जाननेव पूर्वपक्षवादिना तूष्णींभूतमन्यद्वोद्भावितं १५तथापि तेन सदुत्तरानभिधानात्कथं नास्य पराजयः स्यात्? तदेतज्जातिवादिनो जात्युपन्यासेपि समानं जातीनां दूषणाभासत्वात्। तस्माच्च स्वोपन्यस्तजात्यपरिज्ञानोद्भावनरूपेणोत्तराऽप्रतिपत्त्युद्भावनेन तूष्णींभूतमन्यद्वोद्भावयन्तमितरं निगृह्णाति।

द्वितीयविकल्पे स्वोपन्यस्ता जातिः कथं परोद्भावितजात्यन्त२०ररूपा न भवतीति वादिनेतरः प्रतिपाद्यते? न तावत्स्वोपन्यस्तजातिस्वरूपानुवादेन, यथा नेयमुत्कर्षसमा जातिरपकर्षसमन्वादस्या इतिः प्रथमपक्षोदितदोषप्रसङ्गात्। नाप्यनुपलम्भात्; अनुपलम्भमात्रस्याप्रमाणत्वात्। अनुपलम्भविशेषस्यापि स्वोपन्यस्तजातिस्वरूपोपलम्भलक्षणत्वात्, तत्र चोक्तदोषप्रसङ्गात्। तच्च २५जातिवादी जात्यन्तरमुद्भावयन्तं प्रतिवादिनं तदुद्भावितजात्यन्तरनिराकरणलक्षणेनोत्तराप्रतिपत्त्युद्भावनेन विजयते।

नाप्युत्तराप्रतिपत्तिमात्रोद्भावनरूपेण; 'त्वया न ज्ञातमुत्तरम्' इत्युत्तराप्रतिपत्तिमात्रोद्भावने हि पूर्वपक्षवादिनस्तद्विशेषविषयः प्रश्नोऽवश्यंभावी 'मया तावदुत्तरमुपन्यस्तमेतच्च कथमनुत्तरम्' ३०इति। जातिवादिना चास्योत्तराप्रतिपत्तिर्विशेषेणोद्भावनीया

१ वादिना। २ तूष्णींभावादेः। ३ प्रतिवादिना। ४ वादिना जात्युद्भावनेपि वादावसानं न भविष्यति ततश्च तूष्णींभावोऽन्योद्भावनं च वादावसानाय व्यर्थमित्युक्ते सत्याह। ५ प्रयोजनान्तरं तूष्णींभावादेराह। ६ निरीक्षध्वं यूयं सभ्याः। ७ वसः। ८ पर्यनुयुक्ते सति। ९ सकाशात्। १० पूर्वपक्षवादिना। ११ दोषम्। १२ पूर्वपक्षवादी। १३ दोषः=उत्तराप्रतिपत्तिः। १४ जातिवादी।

'मयोपन्यस्ताप्येषा जातिस्त्वया न ज्ञाता जात्यन्तरं चोद्भावितम्' इति। अत्र च प्रागुक्ताशेषदोषानुषङ्गः। तदेवमुत्तराऽप्रतिपत्त्युद्भावनत्रयेपि जातिवादिनः पराजयस्यैकान्तिकत्वात् 'ऐकान्तिकपराजयाद्वरं सन्देहः' इति जानन्नपि जात्यादिकं प्रयुङ्क्ते इत्येतद्वचो नैयायिकस्यानैयायिकतामाविर्भावयेत्। ततः स्वपक्षसिद्ध्यैव ५ जयस्तदसिद्ध्या तु पराजयः, न तु मिथ्योत्तरलक्षणजातिशतैरपीति।

नापि निग्रहस्थानैः। तेषां हि "विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्" [न्यायसू० १।२।१९] इति सामान्यलक्षणम्। विपरीता कुत्सिता वा प्रतिपत्तिर्विप्रतिपत्तिः। अप्रतिपत्तिस्त्वा- १० रम्भविषयेऽनारम्भः, पक्षमभ्युपगम्य तस्याऽस्थापना, परेण स्थापितस्य चाऽप्रतिषेधः, प्रतिषिद्धस्य चाऽनुद्धार इति। प्रतिज्ञाहान्यादिव्यक्तिगतं तु विशेषलक्षणम्।

तत्र प्रतिज्ञाहानेस्तावल्लक्षणम्-"प्रतिदृष्टान्तधर्म्य(र्मा)नुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः" [न्यायसू० ५।२।२] "साध्यधर्मप्रत्यनीकेन १५ धर्मेण प्रत्यवस्थितः प्रतिदृष्टान्तधर्मं स्वदृष्टान्तेऽनुजानन् प्रतिज्ञां जहातीति प्रतिज्ञाहानिः। यथा 'अनित्यः शब्द ऐन्द्रियिकत्वाद् घटवत्' इत्युक्ते परः प्रत्यवतिष्ठते-सामान्यमैन्द्रियिकं नित्यं दृष्टम्, कस्मान्न तथा शब्दोपि? इत्येवं स्वप्रयुक्तस्य हेतोराभासतामवस्यन्नपि कथावसानमकृत्वा प्रतिज्ञात्यागं करोति-यद्यै- २० न्द्रियिकं सामान्यं नित्यं कामं घटोपि नित्योऽस्त्विति। न (स) खल्वयं ससाधनस्य दृष्टान्तस्य नित्यत्वं प्रसजन्निगमनान्तमेव पक्षं जहाति। पक्षं च परित्यजन्प्रतिज्ञां जहातीत्युच्यते प्रतिज्ञाश्रयत्वात्पक्षस्य" [न्यायभा० ५।२।२]।

इति भाष्यकारमतमसङ्गतमेव; साक्षाद्दृष्टान्तहानिरूपत्वात्त- २५ स्यास्तत्रैव साध्यधर्मपरित्यागात्। परम्परया तु हेतूपनयनिगम-

१ प्रागुक्तः=उत्तराप्रतिपत्तिलक्षणादिः। २ पराजयो न भवतीति। ३ तत्त्वप्रतिपत्तेरभावो विप्रतिपत्तिः। ४ कथम्? तथा हि। ५ वादिपक्षस्य। ६ अपरिहारः। ७ उक्ते हेतौ दूषणोद्भावने सति पक्षाभ्युपगमः प्रतिज्ञा। ८ अभ्युपगमः। ९ धर्मधर्मिसमुदायः प्रतिज्ञा तस्या हानिः। १० प्रतिवादिना पर्यनुयुक्तो वादी। ११ परकीयोदाहरणधर्मम्। १२ वादिनः। १३ इन्द्रियग्राह्यत्वात्। १४ वादिना। १५ प्रतिवादी। १६ जानन्। १७ कथा वादः। १८ साधनवादी। १९ वादी। २० अभ्युपगच्छन्। २१ घटादिर्दृष्टान्तः। २२ प्रतिज्ञाहानेः। २३ शब्दानित्यत्वं साध्यधर्मः।

नानां त्यागः, दृष्टान्तासाधुत्वे तेषामप्यसाधुत्वात्। तथा च 'प्रतिज्ञाहानिरेव' इत्यसङ्गतम्।

वार्त्तिककारस्त्वेवमाचष्टे-"दृष्टश्चासावन्ते स्थितश्चेति दृष्टान्तः पक्षः स्वपक्षः, प्रतिदृष्टान्तः प्रतिपक्षः। प्रतिपक्षस्य धर्मं स्वपक्षेऽ-
५ भ्यनुजानन् प्रतिज्ञां जहाति। यदि सामान्यमैन्द्रियिकं नित्यं शब्दोप्येवमस्त्विति।" [न्यायवा० ५।२।२]

तदेतदप्युद्द्योतकरस्य जाड्यमाविष्करोति; इत्थमेव प्रतिज्ञाहानेरवधारयितुमशक्यत्वात्। प्रतिपक्षसिद्धिमन्तरेण च कस्यचिन्निग्रहाधिकरणत्वायोगात्। न खलु प्रतिपक्षस्य धर्मं स्वपक्षेऽ-
१० भ्यनुजानत एव प्रतिज्ञात्यागो येनायमेक एव प्रकारः प्रतिज्ञाहानौ स्यात्। अधिक्षेपादिभिराकुलीभावात् प्रकृत्या सभाभीरुत्वादऽन्यमनस्कत्वादेर्वा निमित्तात्किञ्चित्साध्यत्वेन प्रतिज्ञाय तद्विपरीतं प्रतिजानतोप्युपलम्भात् पुरुषभ्रान्तेरनेककारणत्वोपपत्तेरिति।

तथा "प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञा-
१५ न्तरम्।" [न्यायसू० ५।२।३] प्रतिज्ञातार्थस्याऽनित्यः शब्द इत्यादेरैन्द्रियिकत्वाख्यस्य हेतोर्व्यभिचारोपदर्शनेन प्रतिषेधे कृते तं दोषमनुद्धरन् धर्मविकल्पं करोति 'किमयं शब्दोऽसर्वगतो घटवत्, किं वा सर्वगतः सामान्यवत्' इति। यद्यसर्वगतो घटवत्; तर्हि तद्वदेवानित्योस्त्वित्यनन्प्रतिज्ञान्तरं नाम निग्रहस्थानं साम-
२० र्थ्याऽपरिज्ञानात्। स हि पूर्वस्याः 'अनित्यः शब्दः' इति प्रतिज्ञायाः साधनायोत्तराम् 'असर्वगतः शब्दोऽनित्यः' इति प्रतिज्ञामाह। न च प्रतिज्ञा प्रतिज्ञान्तरसाधने समर्थाऽतिप्रसङ्गात्।

इत्यप्येतेनैव प्रत्युक्तम्; प्रतिज्ञाहानिवत्तस्याप्यनेकनिमित्तत्वोपपत्तेः। प्रतिज्ञाहानितश्चास्य कथं भेदः पक्षत्यागस्योभयत्राऽविशे-
२५ षात्? यथैव हि प्रतिदृष्टान्तधर्मस्य स्वदृष्टान्तेऽभ्यनुज्ञानात्पक्षत्यागस्तथा प्रतिज्ञान्तरादपि। यथा च स्वपक्षसिद्ध्यर्थं प्रतिज्ञान्तरं विधीयते तथा शब्दाऽनित्यत्वसिद्ध्यर्थम्, भ्रान्तिवशात्तद्वच्छब्दोपि नित्योस्त्वित्यभ्यनुज्ञानम्। यथा चाभ्रान्तस्येदं विरुध्यते तथा प्रतिज्ञान्तरमपि। निमित्तभेदाच्च तद्भेदेऽनिष्टनिग्रहस्थानान्तरा-

१ विचारान्ते। २ नित्यत्वलक्षणम्। ३ अनित्ये। ४ वादी। ५ ऐन्द्रियिकत्वाविशेषात्। ६ प्रतिपक्षस्य स्वपक्षेऽभ्युपगमनेनैव। ७ वादिनः प्रतिवादिनो वा। ८ प्रतिदृष्टान्तधर्मस्य स्वपक्षेऽभ्युपगमः। ९ अधिक्षेपस्तिरस्कारः। १० सामान्येन। ११ भेदम्। १२ वादी। १३ वादिनः। १४ ननु प्रतिज्ञान्तरात्पक्षत्यागस्तस्य स्वपक्षसिद्ध्यर्थं विधीयमानत्वादित्युक्ते सत्याह।

णामप्यनुषङ्गः स्यात् । तेषां तत्रान्तर्भावे वा प्रतिज्ञान्तरस्यापि प्रतिज्ञाहानावन्तर्भावः स्यादिति ।

"प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः" [न्यायसू० ५।२।४] यथा गुणव्यतिरिक्तं द्रव्यं रूपादिभ्यो भेदेनानुपलब्धेः । इत्यप्य-सुन्दरम्; यतो हेतुना प्रतिज्ञायाः प्रतिज्ञात्वे निरस्ते प्रकारान्तरतः ५ प्रतिज्ञाहानिरेवेयमुक्ता स्यात्, हेतुर्दोषो वात्र विरुद्धतालक्षणः, न प्रतिज्ञादोष इति ।

"पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः ।" [न्याय-सू० ५।२।५] यथा 'अनित्यः शब्द ऐन्द्रियिकत्वाद् घटवत्' इत्युक्ते पूर्ववत्सामान्येनानैकान्तिकत्वे हेतोरुद्भाविते प्रतिज्ञा- १० संन्यासं करोति-क एवमाह 'नित्यः(अनित्यः)शब्दः'? इत्यपि प्रतिज्ञाहानितो न भिद्यते हेतोरनैकान्तिकत्वोपलम्भेनात्रापि प्रतिज्ञायाः परित्यागाविशेषादिति ।

"अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ।" [न्यायसू० ५।२।६] निदर्शनम्-'एकप्रकृतीदं व्यक्तं विकाराणां १५ परिमाणात्मृत्पूर्वकघटशरावोदञ्चनादिवत्' इत्यस्य व्यभिचारेण प्रत्यवस्थानम्-नानाप्रकृतीनामेकप्रकृतीनां दृष्टं परिमाणमित्यस्य हेतोरहेतुत्वं निश्चित्य 'एकप्रकृतिसमन्वये विकाराणां परि-माणात्' इत्याह । तदिदमविशेषोक्ते हेतौ प्रतिषिद्धे विशेषं ब्रुवतो हेत्वन्तरं नाम निग्रहस्थानम् । २०

इत्यप्यसुन्दरम्; एवं सत्यविशेषोक्ते दृष्टान्तोपनयनिगमने प्रतिषिद्धे विशेषमिच्छतो दृष्टान्ताद्यन्तरमपि निग्रहस्थानान्तर-मनुपज्येत तत्राक्षेपसमाधानानां समानत्वादिति ।

"प्रकृतादर्थादप्रतिसम्बन्धार्थमर्थान्तरम् ।" [न्यायसू० ५।२।७] यथोक्तलक्षणे पक्षप्रतिपक्षपरिग्रहे हेतुतः साध्यसिद्धौ प्रकृतायां २५

१ प्रतिज्ञाहान्यादौ । २ यत्र प्रतिज्ञा विरुध्यते हेतुना हेतुर्वा प्रतिज्ञया विरुध्यते स प्रतिज्ञाविरोधः । ३ उक्तहेतौ दूषणोद्भावने स्वसाध्यपरित्यागः प्रतिज्ञासंन्यासः । ४ वादिना । ५ त्यागम् । ६ अविशेषोक्ते हेतौ व्यभिचारेण प्रतिषिद्धे पश्चाद्वि-शेषणोपादानं हेत्वन्तरम् । ७ प्रतिवादिना । ८ प्रधानम् । ९ महदादिकार्यम् । १० वस्तुभेदानाम् । ११ वादिनोक्तानुमानस्य । १२ घटमुकुटपटलकुटशकटादीनाम् । १३ एककारणानुस्यूतत्वे सतीत्यर्थः । १४ वादी । १५ दृष्टान्ताद्यन्तरं निग्रहस्थानं न स्याच्चेद्धेत्वन्तरमपि निग्रहस्थानं मा भूदिति । १६ प्रकृतप्रमेयानुपयोगिवचनमर्थान्तरं नाम निग्रहस्थानम् । १७ वस्तुधर्मावेकाधिकरणावित्यादि ।

प्रकृतं हेतुं[1] प्रमाणसामर्थ्येनाहमसमर्थः समर्थयितुमित्यवस्यन्नपि कथामपरित्यजन्नर्थान्तरमुपन्यस्यति-नित्यः शब्दोऽस्पर्शवत्त्वादिति हेतुः। हेतुश्च हिनोतेर्धातोस्तुप्रत्यये कृदन्तं पदम्, [पदं]च नामाख्यातोपसर्गनिपाता इति प्रस्तुत्य नामादीनि व्याचष्टे।

५ तदेतदप्यर्थान्तरं निग्रहस्थानं समर्थे साधने दूषणे वा प्रोक्ते निग्रहाय कल्प्येत, असमर्थे वा? न तावत्समर्थे; स्वसाध्यं प्रसाध्य नृत्यतोपि दोषाभावाल्लोकवत्। असमर्थेपि प्रतिवादिनः पक्षसिद्धौ तन्निग्रहाय स्यात्, असिद्धौ वा? प्रथमपक्षे तत्पक्षसिद्ध्यैवास्य निग्रहो न त्वतो निग्रहस्थानात्। द्वितीयपक्षेप्यतो न निग्रहः पक्ष-
१० सिद्धेरुभयोरप्यभावादिति।

"वर्णक्रमनिर्देशवन्निरर्थकम्।" [न्यायसू० ५।२।८] यथाऽनित्यः शब्दो जबगडदश्त्वात् झभघढधष्वत्। इत्यपि सर्वथार्थशून्यत्वान्निग्रहाय कल्प्येत, साध्यानुपयोगाद्वा? तत्राद्यविकल्पोऽयुक्तः; सर्वथार्थशून्यस्य शब्दस्यैवासम्भवात्। वर्णक्रमनिर्देशस्या-
१५ प्यनुकार्येणार्थेनार्थवत्त्वोपपत्तेः। द्वितीयविकल्पे तु सर्वमेव निग्रहस्थानं निरर्थकं स्यात्; साध्यसिद्धावनुपयोगित्वाविशेषात्। केनचिद्विशेषमात्रेण भेदे वा खात्कृताकम्पहस्तास्फालनकक्षापिट्टिकादेरपि साध्यसिद्ध्यनुपयोगिनो निग्रहस्थानान्तरत्वानुषङ्ग इति।

"परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम्।"
२० [न्यायसू० ५।२।९] अत्रेदमुच्यते-वादिना त्रिरभिहितमपि वाक्यं परिषत्प्रतिवादिभ्यां मन्दमतित्वादविज्ञातम्, गूढाभिधानतो वा, द्रुतोच्चाराद्वा? प्रथमपक्षे सत्साधनवादिनोप्येतन्निग्रहस्थानं स्यात्, तत्राप्यनयोर्मन्दमतित्वेनाविज्ञातत्वसम्भवात्। द्वितीयपक्षे तु पत्रवाक्यप्रयोगेपि तत्प्रसङ्गो गूढाभिधानतया परिषत्प्रतिवादि-
२५ नोर्महाप्राज्ञयोरप्यविज्ञातत्वोपलम्भात्। अथाभ्यामविज्ञातमप्येतद्वादी व्याचष्टे; गूढोपन्यासमप्यात्मनः स एव व्याचष्टाम्। अव्याख्याने तु जयाभाव एवास्य न पुनर्निग्रहः, परस्य पक्षसिद्धेरभावात्। द्रुतोच्चारेपि अनयोः कथञ्चित् ज्ञानं सम्भवत्येव सिद्धान्तद्वयवेदित्वात्। साध्यानुपयोगिनि तु वादिनः प्रलापमात्रे

१ अस्पर्शवत्त्वादिति। २ वादी। ३ वादम्। ४ प्रकृतार्थं परित्यज्यान्यमर्थं ब्रूते इत्यर्थः। ५ तस्य वादिनः। ६ वादिप्रतिवादिनोः। ७ अर्थरहितशब्दोच्चारणं निरर्थकं नाम निग्रहस्थानम्। ८ पश्चात्क्रियमाणेन। ९ निरर्थकत्वान्निग्रहस्थानानाम्। १० वादिना। ११ वादिना त्रिरुपन्यस्तमपि परिषत्प्रतिवादिभ्यामविज्ञातमविज्ञातार्थं नाम निग्रहस्थानं वादिनः। प्रतिवादिनोप्येवम्। १२ तत्स्वार्थम्।

तयोरज्ञानं नाविज्ञातार्थं वर्णक्रमनिर्देशवत् । ततो नेदमभि(वि)ज्ञातार्थं निरर्थकाद्भिद्यते इति ।

"पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकम् ।" [न्यायसू० ५।२।१०] यथा दश दाडिमानि षडपूपाः कुण्डमजाऽजिनं पललपिण्डः । ५

इत्यपि निरर्थकान्न भिद्यते-यथैव हि जबगडदशत्वादौ वर्णानां नैरर्थक्यं तथात्र पदानामिति । यदि पुनः पदनैरर्थक्यं वर्णनैरर्थक्यादन्यत्वान्निग्रहस्थानान्तरमभ्युपगम्यते; तर्हि वाक्यनैरर्थक्यस्याप्याभ्यामन्यत्वान्निग्रहस्थानान्तरत्वं स्यात् । पदवत् पौर्वापर्येणा(ण)प्रयुज्यमानानां वाक्यानामप्यनेकधोपलम्भात् । १०

"शङ्खः कदल्यां कदली च भेर्यां तस्यां च भेर्यां सुमहद्विमानम् ।

तच्छङ्खभेरीकदलीविमानमुन्मत्तगङ्गप्रतिमं बभूव ॥" [ ]

इत्यादिवत् । यदि पुनः पदनैरर्थक्यमेव वाक्यनैरर्थक्यं पदसमुदायात्मकत्वात्तस्य; तर्हि वर्णनैरर्थक्यमेव पदनैरर्थक्यं स्याद्वर्णसमुदायात्मकत्वात्तस्य । वर्णानां सर्वत्र निरर्थकत्वात्पदस्यापि तत्प्रसङ्गश्चेत्; तर्हि पदस्यापि निरर्थकत्वात् तत्समुदायात्मनो वाक्यस्यापि नैरर्थक्यानुषङ्गः । पदार्थापेक्षया पदस्यार्थवत्त्वे वर्णार्थापेक्षया वर्णस्यापि तदस्तु प्रकृतिप्रत्ययादिवर्णवत् । न खलु प्रकृतिः केवला पदं प्रत्ययो वा, नाप्यनयोरनर्थकत्वम् । अभिव्यक्तार्थाभावादनर्थकत्वे पदस्यापि तत्स्यात् । यथैव हि प्रकृत्यर्थः प्रत्ययेनाभिव्यज्यते प्रत्ययार्थश्च प्रकृत्या तयोः केवलयोरप्रयोगात्, तथा 'देवदत्तस्तिष्ठति' इत्यादिप्रयोगे सुबन्तपदार्थस्य तिङन्तपदेन तिङन्तपदार्थस्य च सुबन्तपदेनाभिव्यक्तः केवलस्याप्रयोगः । पदान्तरापेक्षस्य पदस्य सार्थकत्वं प्रकृत्यपेक्षस्य प्रत्ययस्य तदपेक्षस्य च प्रकृत्यादिवर्णस्य समानमिति । १५ २० २५

"अवयवविपर्यासवचनमप्राप्तकालम् ।" [न्यायसू० ५।२।११] अवयवानां प्रतिज्ञादीनां विपर्यासेनाभिधानमप्राप्तकालं नाम निग्रहस्थानम् । इत्यप्यपेशलम्; प्रेक्षावतां प्रतिपत्तॄणामवयवक्रमनियमं विनाप्यर्थप्रतिपत्त्युपलम्भाद्देवदत्तादिवाक्यवत् । ननु यथापशब्दा-

१ पूर्वापराऽसङ्गतपदकदम्बकोच्चारणादप्रतिष्ठितवाक्यार्थमपार्थकं नाम निग्रहस्थानम् । २ उन्मत्ता गङ्गा यस्मिन्प्रदेशेऽसावुन्मत्तगङ्गः । ३ वाक्ये पदे च । ४ प्रकृत्यादावपि पदानामेवार्थवत्त्वं न पुनर्वर्णानां येन दृष्टान्तः सिद्धः स्यादित्युक्ते सत्याह । ५ वर्णस्य । ६ पदस्य । ७ सार्थकत्वम् । ८ यथाक्रमोल्लङ्घनेन प्रयुज्यमानमनुमानवाक्यम् । ९ अप्राप्तावसरम् । १० देवदत्त गामभ्याज शुक्लां दण्डेनेत्यादिवत् ।

च्छ्रुताच्छब्दस्मरणं ततोऽर्थप्रत्यय इति शब्दादेवार्थप्रत्ययः परम्परया तथा प्रतिज्ञाद्यवयवव्युत्क्रमात् तत्क्रमस्मरणं ततो वाक्यार्थप्रत्ययो न तद्व्युत्क्रमात्; इत्यप्यसारम्; एवंविधप्रतीत्यभावात्। यस्माद्धि शब्दादुच्चरितादयत्रार्थे प्रतीतिः स एव तस्य वाचको ५ नान्यः, अन्यथा 'शब्दात्तत्क्रमाच्चापशब्दे तद्व्युत्क्रमे च स्मरणं ततोऽर्थप्रतीतिः' इत्यपि वक्तुं शक्येत। एवं शब्दाद्यन्वाख्यानवैयर्थ्यं चेत्; न; एवं वादिनोऽनिष्टमात्रापादनात्, अपशब्देपि चान्वाख्यानस्योपलम्भात्। 'संस्कृताच्छब्दात्सत्याद्धर्मोन्यस्मादऽधर्मः' इति नियमे चान्यधर्माधर्मोपायानुष्ठानवैयर्थ्यम्। धर्माधर्मयोश्चाप्रति- १० नियमप्रसङ्गः अधार्मिके धार्मिके च तच्छब्दोपलम्भात्। भवतु वा तत्क्रमादर्थप्रतीतिः, तथाप्यर्थप्रत्ययः क्रमेण स्थितो येन वाक्येन व्युत्क्रम्यते तन्निरर्थकं न त्वऽप्राप्तकालमिति।

"शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात्।" [न्यायसू० ५।२।१४] तत्रार्थपुनरुक्तमेवोपपन्नं न शब्दपुनरुक्तम्; अर्थभेदे १५ शब्दसाम्येप्यस्याऽसम्भवात्,

"हसति हसति स्वामिन्युच्चैरुदत्यतिरोदिति,
कृतपरिकरं स्वेदोद्गारि प्रधावति धावति।
गुणसमुदितं दोषापेतं प्रणिन्दति निन्दति,
धनलवपरिक्रीतं यन्त्रं प्रनृत्यति नृत्यति।"

२० [वादन्यायपृ० ११३]

इत्यादिवत्। ततः स्वेष्टार्थवाचकैस्तैरेवान्यैर्वा शब्दैः सत्याः प्रतिपादनीयाः। तत्प्रतिपादकशब्दानां तु सकृत्पुनः पुनर्वाभिधानं निरर्थकं न तु पुनरुक्तम्। यद्य(द)प्यर्थादापन्नस्य स्वशब्देन पुनर्वचनं पुनरुक्तमुक्तम्। यथा 'उत्पत्तिधर्मकमनित्यम्' २५ इत्युक्त्वाऽर्थादापन्नस्यार्थस्य योऽभिधायकः शब्दस्तेन स्वशब्देन ब्रूयात् 'नित्यमनुत्पत्तिधर्मकम्' इति। तदपि प्रतिपन्नार्थप्रतिपादकत्वेन वैयर्थ्यान्निग्रहस्थानं नान्यथा। तथा चेदं निरर्थकान्न विशिष्येतेति।

१ सत्यशब्दस्य। २ स्मृतशब्दात्। ३ विपर्ययात्। ४ स्मृतक्रमात्। ५ स्मृतापशब्दात्स्मृततत्क्रमात्। ६ शब्दादेरपशब्दादिस्मरणप्रकारेण। ७ पुनः पुनः कथनमन्वाख्यानम्। ८ संस्कृताच्छब्दाद्धर्मोऽन्यस्मादधर्म इति नियमाच्चापशब्देऽन्वाख्यापनमस्तीत्युक्ते सत्याह। ९ इज्याऽध्ययनादिरन्यः। १० सति। ११ क्रियाविशेषणम्। १२ क्रियाविशेषणम्। १३ मौल्येन सङ्कृतीतम्। १४ यन्त्रमिव यन्त्रं=भृत्यः। १५ शब्दपौनरुक्त्यमुपपन्नं न भवेद्यतः। १६ प्रथमोच्चारितैः। १७ कथनानन्तरमेकवारम्। १८ अर्थस्य। १९ पुनरुक्तत्वप्रकारेण।

"विज्ञातस्य परिषदा त्रिरभिहितस्याऽप्रत्युच्चारणमननुभाषणम्।" [न्यायसू० ५।२।१६] अप्रत्युच्चारयन्किमाश्रयं परपक्षप्रतिषेधं ब्रूयात्? इत्यत्रापि किं सर्वस्य वादिनोक्तस्याननुभाषणम्, किं वा यन्नान्तरीयिका साध्यसिद्धिस्तस्येति? तत्राद्यः पक्षोऽयुक्तः; परोक्तमशेषमप्रत्युच्चारयतोपि दूषणवचनाऽव्याघातात्। यथा ५ 'सर्वमनित्यं सत्त्वात्' इत्युक्ते 'सत्त्वात् इत्ययं हेतुर्विरुद्धः' इति हेतुमेवोच्चार्य विरुद्धतोद्भाव्यते-'क्षणक्षयाद्येकान्ते सर्वथार्थक्रियाविरोधात्सत्त्वानुपपत्तेः' इति, समर्थ्यते च, तावता च परोक्तहेतोर्दूषणात्किमन्योच्चारणेन? अतो यन्नान्तरीयिका साध्यसिद्धिस्तस्यैवाऽप्रत्युच्चारणमननुभाषणं प्रतिपत्तव्यम्। अथैवं दूषयितुमसमर्थः शास्त्रार्थपरिज्ञानविशेषविकलत्वात्; तदाऽयमुत्तराऽप्रतिपत्तेरेव तिरस्क्रियते न पुनरननुभाषणादिति। १०

"अविज्ञातं चाज्ञानम्।" [न्यायसू० ५।२।१७] विज्ञातार्थस्य परिषदा प्रतिवादिना यदविज्ञातं(नं)तदज्ञानं नाम निग्रहस्थानम्। अजानन् कस्य प्रतिषेधं ब्रूयात्? इत्यप्यसारम्; प्रतिज्ञाहान्यादिनिग्रहस्थानानां भेदाभावानुषङ्गात् तत्राप्यज्ञानस्यैव सम्भवात्। तेषां तत्प्रभेदत्वे वा निग्रहस्थानप्रतिनियमाभावप्रसङ्गः परोक्तस्यार्द्धाज्ञानादिभेदेन निग्रहस्थानानेकत्वसम्भवात्। १५

"उत्तरस्याप्रतिपत्तिरप्रतिभा।" [न्यायसू० ५।२।१८] साप्यज्ञानान्न भिद्यत एव। २०

"निग्रहप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम्।" [न्यायसू० ५।२।२१] पर्यनुयोज्यो हि निग्रहोपपत्त्या चोदनीयस्तस्योपेक्षणं 'निग्रहं प्राप्तोसि' इत्यननुयोग एव। एतच्च 'कस्य पराजयः' इत्यनुयुक्तया परिषदा वचनीयम्। न खलु निग्रहप्राप्तः स्वं कौपीनं विवृणुयात्। इत्यप्यज्ञानान्न व्यतिरिच्यत एव। २५

"अनिग्रहस्थाने निग्रहस्थानानुयोगो निरनुयोज्यानुयोगः।" [न्यायसू० ५।२।२२] तस्याप्यज्ञानात्पृथग्भावोनुपपन्न एव।

---

१ वादिना। २ प्रतिवादिना। ३ प्रतिवाद्युक्तस्य। ४ प्रतिवादिना। ५ अन्यत् धर्मिसाध्यादि। ६ सर्वस्य वादिनोक्तस्याननुभाषणं न घटते यतः। ७ परेण। ८ हेतूच्चारणं कृत्वा। ९ प्रतिवादी। १० प्रतिवादी। ११ परिषदा विज्ञातस्यापि वादिवाक्यस्य प्रतिवादिना यदविज्ञातं तदज्ञानं नाम। १२ प्रतिवादी। १३ आदिना अर्द्धोर्द्धादिग्रहः। १४ प्राप्तदोषानुद्भावनं पर्यनुयोज्योपेक्षणं नाम निग्रहस्थानम्। १५ प्रतिवादिनः। १६ इदं ते निग्रहस्थानमायातमतो निगृहीतोसीति वचनीयः। १७ पृष्टया। १८ गुह्यम्। १९ दोषरहिते दोषोद्भावनं निरनुयोज्यानुयोगो नाम निग्रहस्थानम्।

"कार्यव्यासङ्गात्कथाविच्छेदो विक्षेपः।" [न्यायसू० ५।२।१९] सिसाधयिषितस्यार्थस्याऽशक्यसाध्यतामवसीय कालयापनार्थं यत्कर्त्तव्यं व्यासज्य कथां विच्छिनत्ति-इदं मे करणीयं परिहीयते, तस्मिन्नवसिते पश्चात्कथयिष्यामि। इत्यप्यज्ञानतो नार्थान्तरमिति ५ प्रतिपत्तव्यम्।

"स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा।" [न्यायसू० ५।२।२०] यः परेण चोदितं दोषमनुद्धृत्य ब्रवीति-'भवत्पक्षेप्ययं दोषः समानः' इति, स स्वपक्षे दोषाभ्युपगमात्परपक्षे दोषं प्रसजन् परमतमनुजानातीति मतानुज्ञा नाम निग्रहस्थान-१० मापद्यते। इत्यप्यज्ञानान्न भिद्यते एव। अनैकान्तिकता चात्र हेतोः; तथाहि-'तस्करोयं पुरुषत्वात्प्रसिद्धतस्करवत्' इत्युक्ते 'त्वमपि तस्करः स्यात्' इति हेतोरनैकान्तिकत्वमेवोक्तं स्यात्। स चात्मीयहेतोरात्मनैवानैकान्तिकत्वं दृष्ट्वा प्राह-भवत्पक्षेप्ययं दोषः समानः-त्वमपि पुरुषोसि इत्यनैकान्तिकत्वमेवोद्भाव-१५ यतीति।

"हीनमन्यतमेनाप्यवयवेन न्यूनम्।" [न्यायसू० ५।२।१२] यस्मिन्वाक्ये प्रतिज्ञादीनामन्यतमोऽवयवो न भवति तद्वाक्यं हीनं नाम निग्रहस्थानम्। साधनाभावे साध्यसिद्धेरभावात्, प्रतिज्ञादीनां च पञ्चानामपि साधनत्वात्; इत्यप्यसमीचीनम्; पञ्चावयवप्रयोग-२० मन्तरेणापि साध्यसिद्धेः प्रतिपादितत्वात्, पक्षहेतुवचनमन्तरेणैव तत्सिद्धेरभावात् अतस्तद्धीनमेव न्यूनं निग्रहस्थानमिति।

"हेतूदाहरणाधिकमधिकम्।" [न्यायसू० ५।२।१३] यस्मिन्वाक्ये द्वौ हेतू द्वौ वा दृष्टान्तौ तदधिकं निग्रहस्थानम्; इत्यपि वार्त्तम्; तथाविधाद्वाक्यात्पक्षप्रसिद्धौ पराजयायोगात्। कथं चैवं प्रमा-२५ णसंप्लवोभ्युपगम्यते? अभ्युपगमे वाधिकत्वान्निग्रहाय जायेत। 'प्रतिपत्तिदार्ढ्य-संवादसिद्धिप्रयोजनसद्भावान्न निग्रहः' इत्यन्यत्रापि समानम्। हेतुना दृष्टान्तेन चैकेन प्रसाधितेप्यर्थे द्वितीयस्य हेतोर्दृष्टान्तस्य वा नानर्थक्यम्, तत्प्रयोजनसद्भावात्। न चैवमनवस्थाः कस्यचित्क्वचिन्निराकांक्षतोपपत्तेः प्रमाणान्तरवत्। कथं ३० चास्य कृतकत्वादौ स्वार्थिककप्रत्ययवचनम्, 'यत्कृतकं तदनि-

१ ज्ञात्वा। २ स्वपक्षोक्तदोषमपरिहृत्य परपक्षेपि दूषणमुद्भावयतो मतानुज्ञा नाम निग्रहस्थानम्। ३ वादी। ४ प्रतिवादिना। ५ स्वपक्षे। ६ सम्बन्धयन्। ७ वादी। ८ स्वयम्। ९ अनुमानस्य। १० अधिकस्य निग्रहस्थानत्वप्रकारेण। ११ एकस्मिन्प्रमाणविषये प्रमाणान्तरवर्तनं प्रमाणसंप्लवः। १२ परेण। १३ हेतुदृष्टान्तान्तरान्वेषणप्रकारेण। १४ अनुमाने। १५ अधिकनिग्रहस्थानवादिनः। १६ साधने।

त्यम्' इति व्याप्तौ यत्तद्वचनम्, वृत्तिपदप्रयोगादेव चार्थप्रतिपत्तौ वाक्यप्रयोगः अधिकत्वान्निग्रहस्थानं न स्यात्? तथाविधस्याप्यस्य प्रतिपत्तिविशेषोपायत्वात्तन्नेति चेत्; कथमनेकस्य हेतोर्दृष्टान्तस्य वा तदुपायभूतस्य वचनं निग्रहाधिकरणम्? निरर्थकस्य तु वचनं निरर्थकत्वादेव निग्रहस्थानं नाधिकत्वादिति। ५

"सिद्धान्तमभ्युपेत्यानियमात्कथाप्रसङ्गोऽपसिद्धान्तः।" [न्यायसू० ५।२।२३] प्रतिज्ञातार्थपरित्यागान्निग्रहस्थानम्। यथा नित्यानऽभ्युपेत्य शब्दादीन् पुनरनित्यान् ब्रूते। इत्यपि प्रतिवादिनः प्रतिपक्षसाधने सत्येव निग्रहस्थानं नान्यथा।

"हेत्वाभासाश्च यथोक्ताः।" [न्यायसू० ५।२।२४] असिद्धविरुद्धानैकान्तिककालात्ययापदिष्टप्रकरणसमा निग्रहस्थानम्। इत्यत्रापि विरुद्धहेतूद्भावने प्रतिपक्षसिद्धेर्निग्रहाधिकरणत्वं युक्तम्। असिद्धाद्युद्भावने तु प्रतिवादिना प्रतिपक्षसाधने कृते तद्युक्तं नान्यथेति। १०

एतेनासाधनाङ्गवचनादि निग्रहस्थानं प्रत्युक्तम्; एकस्य स्वपक्षसिद्ध्यैवान्यस्य निग्रहप्रसिद्धेः। ततः स्थितमेतत्— १५

"स्वपक्षसिद्धेरेकस्य निग्रहोऽन्यस्य वादिनः।
नासाधनाङ्गवचनमदोषोद्भावनं द्वयोः॥" [ ] इति।

इदं चानवस्थितम्—

"असाधनाङ्गवचनमदोषोद्भावनं द्वयोः। २०
निग्रहस्थानमन्यत्तु न युक्तमिति नेष्यते॥" [वादन्यायपृ० १]

इति। अत्र हि स्वपक्षं साधयन् वादिप्रतिवादिनोरन्यतरोऽसाधनाङ्गवचनादऽदोषोद्भावनाद्वा परं निगृह्णाति, असाधयन्वा? प्रथमपक्षे स्वपक्षसिद्ध्यैवास्य पराजयादन्योद्भावनं व्यर्थम्। द्वितीयपक्षे तु असाधनाङ्गवचनाद्युद्भावनेपि न कस्यचिज्जयः पक्षसिद्धेरुभयोरभावात्। २५

यच्चास्य व्याख्यानम्–"साधनं सिद्धिः तदङ्गं त्रिरूपं लिङ्गम्, तस्याऽवचनं तूष्णींभावो यत्किञ्चिद्भाषणं वा। साधनस्य वा

१ समासोऽत्र वृत्तिः। २ स्यादेव। ३ अधिकत्वान्निग्रहस्थानत्वं कः कारयेत्तद्वचनस्य। ४ निरर्थकत्वान्निग्रहस्थानं भविष्यतीत्युक्ते सत्याह। ५ स्वीकृतागमविरुद्धप्रसाधनमपसिद्धान्तो नाम निग्रहस्थानम्। ६ प्रतिपक्षसिद्ध्यभावे। ७ सौगतमतमेतत्। ८ आदिना अदोषोद्भावनादि। ९ वादिप्रतिवादिनोः। १० एतदीयं व्याख्यानमस्त्यग्रे। ११ असाधनाङ्गवचनं वादिन एव निग्रहस्थानमदोषोद्भावनं तु प्रतिवादिन एवेति द्वयोरिति पदमुक्तम्। १२ हेतोः। १३ अन्यस्य दोषस्य।

त्रिरूपलिङ्गस्याङ्गं समर्थनम् विपक्षे बाधकप्रमाणदर्शनरूपम्, तस्याऽवचनं वादिनो निग्रहस्थानम्" [वादन्यायपृ० ५-६] इति। तत्पञ्चावयवप्रयोगवादिनोपि समानम्-शक्यं हि तेनाप्येवं वक्तुम्-सिद्ध्यङ्गस्य पञ्चावयवप्रयोगस्यावचनात्सौगतस्य वादिनो ५ निग्रहः। ननु चास्य तदवचनेपि न निग्रहः, प्रतिज्ञानिगमनयोः पक्षधर्मोपसंहारस्य सामर्थ्याद्गम्यमानत्वात्। गम्यमानयोश्च वचने पुनरुक्तत्वानुषङ्गात्। ननु तत्प्रयोगेपि हेतुप्रयोगमन्तरेण साध्यार्थाप्रसिद्धिः; इत्यप्यपेशलम्; पक्षधर्मोपसंहारस्याप्येवमवचनानुषङ्गात्। अथ सामर्थ्याद्गम्यमानस्यापि 'यत्सत्तत्सर्वं क्षणिकं यथा १० घटः संश्च शब्दः' इति पक्षधर्मोपसंहारस्य वचनं हेतोरपक्षधर्मत्वेनासिद्धत्वव्यवच्छेदार्थम्; तर्हि साध्याधारसन्देहापनोदार्थं गम्यमानस्यापि पक्षस्य निगमनस्य च पक्षहेतूदाहरणोपनयानामेकार्थत्वप्रदर्शनार्थं वचनं किन्न स्यात्? न हि पक्षादीनामेकार्थत्वोपदर्शनमन्तरेण सङ्गतत्वं घटते; भिन्नविषयपक्षादिवत्।

१५ ननु प्रतिज्ञातः साध्यसिद्धौ हेत्वादिवचनमनर्थकमेव स्यात्, अन्यथा नास्याः साधनाङ्गतेति चेत्; तर्हि भवतोपि हेतुतः साध्यसिद्धौ दृष्टान्तोनर्थकः स्यात्, अन्यथा नास्य साधनाङ्गतेति समानम्। ननु साध्यसाधनयोर्व्याप्तिप्रदर्शनार्थत्वाद् दृष्टान्तो नानर्थकः तत्र तदप्रदर्शने हेतोरगमकत्वात्; इत्यप्यसङ्गतम्; सर्वानित्यत्व- २० साधने सत्त्वादेर्दृष्टान्ताऽसम्भवतोऽगमकत्वानुषङ्गात्। विपक्षव्यावृत्त्या सत्त्वादेर्गमकत्वे वा सर्वत्रापि हेतौ तथैव गमकत्वप्रसङ्गाद् दृष्टान्तोनर्थक एव स्यात्। विपक्षव्यावृत्त्या च हेतुं समर्थयन् कथं प्रतिज्ञां प्रतिक्षिपेत्? तस्याश्चानभिधाने क्व हेतुः साध्यं वा वर्त्तेत? गम्यमाने प्रतिज्ञाविषये एवेति चेत्; तर्हि गम्यमानस्यैव २५ हेतोरपि समर्थनं स्यान्न तूक्तस्य। अथ गम्यमानस्यापि हेतोर्मन्दमतिप्रतिपत्त्यर्थं वचनम्; तथा प्रतिज्ञावचने कोऽपरितोषः?

यच्चेदम्-'असाधनाङ्गम्' इत्यस्य व्याख्यान्तरम्-"साधर्म्येण हेतोर्वचने वैधर्म्यवचनं वैधर्म्येण वा प्रयोगे साधर्म्यवचनं गम्यमानत्वात् पुनरुक्तम्। अतो न साधनाङ्गम्।" [वादन्यायपृ० ३० ६५] इत्यप्यसाम्प्रतम्; यतः सम्यक्साधनसामर्थ्येन स्वपक्षं साधयतो वादिनो निग्रहः स्यात्, असम्साधयतो वा? प्रथमपक्षे कथं

१ व्याख्यानन्। २ यौगस्य। ३ सौगतमतमालम्ब्याचार्येणोच्यते। ४ प्रतिज्ञानिगमनप्रकारेण। ५ व्यतिरेकेण। ६ सौगतस्य। ७ हेतुतः साध्यसिद्धिर्न भवतीति चेत्। ८ साध्यस्याऽज्ञापको भवति हेतुरिति भावः। ९ विपक्षोत्र नित्यः। १० सौगतः। ११ प्रतिपादनम्। १२ हेतोर्वचने। १३ प्रतिपादनम्।

साध्यसिद्ध्यऽप्रतिबन्धिवचनाधिक्योपलम्भमात्रेणास्य निग्रहो विरोधात्? नन्वेवं नाटकादिघोषणातोप्यस्य निग्रहो न स्यात्; सत्यमेवैतत्; स्वसाध्यं प्रसाध्य नृत्यतोपि दोषाभावाल्लोकवत्। अन्यथा ताम्बूलभक्षणभ्रूक्षेपखात्कृताकम्पहस्तास्फालनादिभ्योपि सत्यसाधनवादिनो निग्रहः स्यात्। अथ स्वपक्षमप्रसाधयतोस्य ५ निग्रहः; नन्वत्रापि किं प्रतिवादिना स्वपक्षे साधिते वादिनो वचनाधिक्योपलम्भान्निग्रहो लक्ष्येत, असाधिते वा? प्रथमविकल्पे स्वपक्षसिद्ध्यैवास्य निग्रहाद्वचनाधिक्योद्भावनमनर्थकम्, तस्मिन् सत्यपि स्वपक्षसिद्धिमन्तरेण जयायोगात्। द्वितीयपक्षे तु युगपद्वादिप्रतिवादिनोः पराजयप्रसङ्गो जयप्रसङ्गो वा स्यात्स्व- १० पक्षसिद्धेरभावाविशेषात्।

ननु न स्वपक्षसिद्ध्यसिद्धिनिबन्धनौ जयपराजयौ तयोर्ज्ञानाज्ञाननिबन्धनत्वात्। साधनवादिना हि साधु साधनं ज्ञात्वा वक्तव्यं दूषणवादिना च तद्दूषणम्। तत्र साधर्म्यवचनाद्वैधर्म्यवचनाद्वाऽर्थस्य प्रतिपत्तौ तदुभयवचने वादिनः प्रतिवादिना सभायामसा- १५ धनाङ्गवचनस्योद्भावनात् साधुसाधनाभिधानाज्ञानसिद्धेः पराजयः, प्रतिवादिनस्तु तद्दूषणज्ञाननिर्णयाज्जयः स्यात्; इत्यप्यविचारितरमणीयम्; विकल्पानुपपत्तेः। स हि प्रतिवादी निर्दोषसाधनवादिनो वचनाधिक्यमुद्भावयेत्, साधनाभासवादिनो वा? तत्राद्यविकल्पे वादिनः कथं साधुसाधनाभिधानाऽज्ञानम्, २० तद्वचनेयत्ताज्ञानस्यैवासम्भवात्? द्वितीयविकल्पे तु न प्रतिवादिनो दूषणज्ञानमवतिष्ठते साधनाभासस्यानुद्भावनात्। तद्वचनाधिक्यदोषस्य ज्ञानाद्दूषणज्ञोसाविति चेत्; साधनाभासाज्ञानाददूषणज्ञोपीति नैकान्ततो वादिनं जयेत्, तद्दोषोद्भावनलक्षणस्य पराजयस्यापि निवारयितुमशक्तेः। अथ वचनाधिक्यदोषोद्भाव- २५ नादेव प्रतिवादिनो जयसिद्धौ साधनाभासोद्भावनमनर्थकम्; नन्वेवं साधनाभासानुद्भावनात्तस्य पराजयसिद्धौ वचनाधिक्योद्भावनं कथं जयाय प्रकल्प्येत? अथ वचनाधिक्यं साधनाभासं चोद्भावयतः प्रतिवादिनो जयः; कथमेवं साधर्म्यवचने वैधर्म्यवचनं तद्वचने वा साधर्म्यवचनं जयाय प्रभवेत्? ३०

---

१ सम्यक्साध्यसिद्धिश्चेन्निग्रहः कथं निग्रहश्चेत्सा कथमिति विरोधः। २ साध्यसिद्ध्यप्रतिबन्धिवचनाधिक्यमात्रतोपि न निग्रह इति प्रकारेण। ३ साधनदूषणं ज्ञात्वा वक्तव्यम्। ४ साध्यलक्षणस्य। ५ एतावत्परिमाणेन साधुसाधनं वाच्यमिति ज्ञानस्य। ६ सर्वथा। ७ ततश्च जयायैवोभयवचनम्।

कथं चैवं वादिप्रतिवादिनोः पक्षप्रतिपक्षपरिग्रहवैयर्थ्यं न स्यात्? क्वचिदेकत्रापि पक्षे साधनसामर्थ्यज्ञानाज्ञानयोः सम्भवात्। न खलु शब्दादौ नित्यत्वस्यानित्यत्वस्य वा परीक्षायाम् एकस्य साधनसामर्थ्ये ज्ञानमन्यस्य चाज्ञानं जयस्य पराजयस्य वा ५ निबन्धनं न सम्भवति। युगपत्साधनसामर्थ्यस्य ज्ञानेन वादिप्रतिवादिनोः कस्य जयः पराजयो वा स्यात्तदविशेषात्? न कस्यचिदिति चेत्; तर्हि साधनवादिनो वचनाधिक्यकारिणः साधनसामर्थ्याऽज्ञानसिद्धेः प्रतिवादिनश्च वचनाधिक्यदोषोद्भावनात्तद्दोषमात्रे ज्ञानसिद्धेर्न कस्यचिज्जयः पराजयो वा १० स्यात्। न हि यो यद्दोषं वेत्ति स तद्गुणमपि, कुतश्चिन्मारणशक्तिवेदनेपि विषद्रव्यस्य कुष्ठापनयनशक्तौ संवेदनानुदयात्। तन्न तत्सामर्थ्यज्ञानाज्ञाननिबन्धनौ जयपराजयौ शक्यव्यवस्थौ यथोक्तदोषानुषङ्गात्। स्वपक्षसिद्ध्यसिद्धिनिबन्धनौ तु तौ निरवद्यौ पक्षप्रतिपक्षपरिग्रहवैयर्थ्याभावात्। कस्यचित्कुतश्चित्स्वपक्षसिद्धौ १५ सुनिश्चितायां परस्य तत्सिद्ध्यभावतः सकृज्जयपराजयाप्रसङ्गात्।

यच्चेदम्-'अदोषोद्भावनम्' इत्यस्य व्याख्यानम्-"प्रसज्यप्रतिषेधे दोषोद्भावनाऽभावमात्रमदोषोद्भावनम्, पर्युदासे तु दोषाभासानामन्यदोषाणां चोद्भावनं प्रतिवादिनो निग्रहस्थानम्" [ ] इति; तद्वादिना दोषवति साधने प्रयुक्ते २० सत्यनुमतमेव, यदि वादी स्वपक्षं साधयेत्, नान्यथा। वचनाधिक्यं तु दोषः प्रागेव प्रतिविहितः। यथैव हि पञ्चावयवप्रयोगे वचनाधिक्यं निग्रहस्थानम्, तथा त्र्यवयवप्रयोगे न्यूनतापि स्याद्विशेषाभावात्। प्रतिज्ञादीनि हि पञ्चाप्यनुमानाङ्गम्-"प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः" [न्यायसू० १।१।३२] इत्य- २५ भिधानात्। तेषां मध्येऽन्यतमस्याप्यनभिधाने न्यूनताख्यो दोषोऽनुषज्यत एव। "हीनमन्यतमेनापि न्यूनम्" [न्यायसू० ५।२।१२] इति वचनात्। ततो जयेतरव्यवस्थायाः 'प्रमाणतदाभासौ' इत्यादितो नान्यनिबन्धनं व्यवतिष्ठते, इत्यलच्छलादौ तन्निबन्धनत्वेनाग्रहग्रहं परित्यज्य विचारकभावमादायाऽमलमनसि प्रामाणिकाः ३० स्वयमेव सम्प्रधारयन्तु, कृतमतिप्रसङ्गेन।

१ वादिनः। २ प्रतिवादिनः। ३ अत्यन्ताभावमात्रम्। ४ प्रतिवादिना। ५ वचनाधिक्यदोषनिराकरणसमये। ६ यौगस्य। ७ सौगतस्य। ८ निग्रहस्थानम्।

साभासं गदितं प्रमाणमखिलं संख्याफलस्वार्थतः,
सुव्यक्तैः सकलार्थसार्थविषयैः स्वल्पैः प्रसन्नैः पदैः ।
येनासौ निखिलप्रबोधजननो जीयाद्गुणाम्भोनिधिः,
वाक्कीर्त्योः परमालयोऽत्र सततं माणिक्यनन्दिप्रभुः ॥ १ ॥

इति श्रीप्रभाचन्द्रविरचिते प्रमेयकमलमार्तण्डे परीक्षामुखालङ्कारे ५
पञ्चमः परिच्छेदः समाप्तः ॥

(परीक्षामुखसूत्रपाठापेक्षया तु 'सम्भवदन्यद्विचारणीयम्'
इति सूत्रान्तं षष्ठपरिच्छेदसमाप्तिः)

श्रीः।

अथ षष्ठः परिच्छेदः ॥

प्राचां वाचाममृततटिनीपूरकर्पूरकल्पान्,
बन्धान(न्म)न्दा नवकुकवयो नूतनीकुर्वते ये।
तेऽयस्काराः सुभटमुकुटोत्पाटिपाण्डित्यभाजम्,
भित्त्वा खड्गं विदधति नवं पश्य कुण्ठं कुठारम् ॥

५ ननूक्तं प्रमाणेतरयोर्लक्षणमक्षूणं नयेतरयोस्तु लक्षणं नोक्तम्, तच्चावश्यं वक्तव्यम्, तदवचने विनेयानां नाऽविकला व्युत्पत्तिः स्यात् इत्याशङ्कमानं प्रत्याह—

सम्भवदन्यद्विचारणीयम् ॥ ६।७४ ॥

इति।

१० सम्भवद्विद्यमानं कथितात्प्रमाणतदाभासलक्षणादन्यत् नय-नयाभासयोर्लक्षणं विचारणीयं नयनिष्ठैर्दिग्मात्रप्रदर्शनपरत्वादस्य प्रयासस्येति। तल्लक्षणं च सामान्यतो विशेषतश्च सम्भवतीति तथैव तद्व्युत्पाद्यते। तत्राऽनिराकृतप्रतिपक्षो वस्त्वंशग्राही ज्ञातु-रभिप्रायो नयः। निराकृतप्रतिपक्षस्तु नयाभासः। इत्यनयोः १५ सामान्यलक्षणम्। स च द्वेधा द्रव्यार्थिक-पर्यायार्थिकविकल्पात्। द्रव्यमेवार्थो विषयो यस्यास्ति स द्रव्यार्थिकः। पर्याय एवार्थो यस्यास्त्यसौ पर्यायार्थिकः। इति नयविशेषलक्षणम्। तत्राद्यो नैगमसङ्ग्रहव्यवहारविकल्पात् त्रिविधः। द्वितीयस्तु ऋजुसूत्र-शब्दसमभिरूढैवंभूतविकल्पाच्चतुर्विधः।

२० तत्रानिष्पन्नार्थसङ्कल्पमात्रग्राही नैगमः। निगमो हि सङ्कल्पः, तत्र भवस्तत्प्रयोजनो वा नैगमः। यथा कश्चित्पुरुषो गृहीतकु-ठारो गच्छन् 'किमर्थं भवान्गच्छति' इति पृष्टः सन्नाह-'प्रस्थमा-नेतुम्' इति। एधोदकाद्याहरणे वा व्याप्रियमाणः 'किं करोति भवान्' इति पृष्टः प्राह-'ओदनं पचामि' इति। न चासौ प्रस्थप-

१ कल्पः सदृशः। २ 'बन्धान्' इति विशेष्यपदमध्याहार्यम्। ३ परीक्षामुखस्य। ४ प्रकरणस्य। ५ विकलादेशविशेषमाश्रित्य प्रवृत्तो ज्ञातुरभिप्रायो (ज्ञानस्वरूपः) नयः। ६ सामान्यलक्षणलक्षितो नयः। ७ द्रवति द्रोष्यत्यदुद्रुवच्चेति द्रव्यं जीवादि। ८ जीवस्य यथा नरनारकादिः सुखदुःखादिर्वा। ९ प्रस्थो मानविशेषः। १० एधः= काष्ठम्। दकमुदकम्।

र्याय ओदनपर्यायो वा निष्पन्नस्तन्निष्पत्तये सङ्कल्पमात्रे प्रस्थादिव्यवहारात् । यद्वा नैकङ्गमो नैगमो धर्मधर्मिणोर्गुणप्रधानभावेन विषयीकरणात् । 'जीवगुणः सुखम्' इत्यत्र हि जीवस्याप्राधान्यं विशेषणत्वात्, सुखस्य तु प्राधान्यं विशेष(ष्य)त्वात्। 'सुखी जीवः' इत्यादौ तु जीवस्य प्राधान्यं न सुखादेर्विपर्ययात् । न चास्यैवं प्रमाणात्मकत्वानुषङ्गः; धर्मधर्मिणोः प्राधान्येनात्र ज्ञप्तेरसम्भवात् । तयोरन्यतर एव हि नैगमनयेन प्रधानतयानुभूयते । प्राधान्येन द्रव्यपर्यायद्वयात्मकं चार्थमनुभवद्धिज्ञानं प्रमाणं प्रतिपत्तव्यं नान्यदिति ।

सर्वथानयोरर्थान्तरत्वाभिसन्धिस्तु नैगमाभासः । धर्मधर्मिणोः सर्वथार्थान्तरत्वे धर्मिणि धर्माणां वृत्तिविरोधस्य प्रतिपादितत्वादिति ।

स्वजात्यविरोधेनैकध्यमुपनीयार्थानाक्रान्तभेदान् समस्तग्रहणात्संग्रहः । स च परोऽपरश्च । तत्र परः सकलभावानां सदात्मनैकत्वमभिप्रैति । 'सर्वमेकं सदविशेषात्' इत्युक्ते हि 'सत्' इतिवाग्विज्ञानानुवृत्तिलिङ्गानुमितसत्तात्मकत्वेनैकत्वमशेषार्थानां संगृह्यते । निराकृताऽशेषविशेषस्तु सत्ताऽद्वैताभिप्रायस्तदाभासो दृष्टेष्टबाधनात् । तथाऽपरः संग्रहो द्रव्यत्वेनाशेषद्रव्याणामेकत्वमभिप्रैति । 'द्रव्यम्' इत्युक्ते ह्यतीतानागतवर्तमानकालवर्त्तिविवक्षिताविवक्षितपर्यायद्रवणशीलानां जीवाजीवतद्भेदप्रभेदानामेकत्वेन संग्रहः । तथा 'घटः' इत्युक्ते निखिलघटव्यक्तीनां घटत्वेनैकत्वसंग्रहः ।

सामान्यविशेषाणां सर्वथार्थान्तरत्वाभिप्रायोऽनर्थान्तरत्वाभिप्रायो वाऽपरसङ्ग्रहाभासः, प्रतीतिविरोधादिति ।

सङ्ग्रहगृहीतार्थानां विधिपूर्वकमवहरणं विभजनं भेदेन प्ररूपणं व्यवहारः । परसंग्रहेण हि सद्धर्माधारतया सर्वमेकत्वेन 'सत्' इति संगृहीतम् । व्यवहारस्तु तद्विभागमभिप्रैति । यत्सत्तद्द्रव्यं

१ अन्योन्यगुणप्रधानभूतभेदाभेदप्ररूपणो नैगमः । २ गौणमुख्यरूपेण । ३ धर्मो धर्मी वा । ४ अभिप्रायः । ५ भिन्नते । ६ स्वस्यार्थस्य जातिः सदात्मिका । ७ एकप्रकारम् । ८ अन्तर्लीनविशेषान् । ९ प्रति । १० वस्तूनाम् । ११ विषयीकरोति । १२ द्वन्द्वः । १३ इदं सदिदं सदिति । १४ एता एव लिङ्गं तेन । १५ ब्रह्मवादः । १६ सङ्ग्रहाभासः । १७ दृष्टेन प्रत्यक्षेणेष्टेनानुमानेन च । १८ परिणमनस्वभावानाम् । १९ विशेषस्य सव्यपेक्षः सन्मात्रग्राही सङ्ग्रहः । २० भेदरूपेण । २१ अभेदरूपेण । २२ यौगस्य मीमांसकस्य च ।

पर्यायो वा । तथैवापरः सङ्ग्रहः सर्वद्रव्याणि 'द्रव्यम्' इति, सर्वपर्यायांश्च 'पर्यायः' इति संगृह्णाति । व्यवहारस्तु तद्विभागमभिप्रैति–यद्द्रव्यं तज्जीवादि षड्विधम्, यः पर्यायः स द्विविधः सहभावी क्रमभावी च । इत्यपरसङ्ग्रहव्यवहारप्रपञ्चः प्रागृजुसूत्रात्प-
५ रसङ्ग्रहादुत्तरः प्रतिपत्तव्यः, सर्वस्य वस्तुनः कथञ्चित्सामान्यविशेषात्मकत्वसम्भवात् । न चास्यैवं नैगमत्वानुषङ्गः; सङ्ग्रहविषयप्रविभागपरत्वात्, नैगमस्य तु गुणप्रधानभूतोभयविषयत्वात् ।

यः पुनः कल्पनारोपितद्रव्यपर्यायप्रविभागमभिप्रैति स व्यवहाराभासः, प्रमाणबाधितत्वात् । न हि कल्पनारोपित एव द्रव्यादि-
१० प्रविभागः; स्वार्थक्रियाहेतुत्वाभावप्रसङ्गाद्गगनाम्भोजवत् । व्यवहारस्य चाऽसत्यत्वे तदानुकूल्येन प्रमाणानां प्रमाणता न स्यात् । अन्यथा स्वप्नादिविभ्रमानुकूल्येनापि तेषां तत्प्रसङ्गः । उक्तं च—

"व्यवहारानुकूल्यात्तु प्रमाणानां प्रमाणता ।
नान्यथा बाध्यमानानां ज्ञानानां तत्प्रसङ्गतः ॥" [लघी० का०
१५ ७०] इति ।

ऋजु प्राञ्जलं वर्तमानक्षणमात्रं सूत्रयतीत्यृजुसूत्रः 'सुखक्षणः सम्प्रत्यस्ति' इत्यादि । द्रव्यस्य सतोऽप्यनर्पणात्, अतीतानागतक्षणयोश्च विनष्टानुत्पन्नत्वेनासम्भवात् । न चैवं लोकव्यवहारविलोपप्रसङ्गः; नयस्याऽस्यैवं विषयमात्रप्ररूपणात् । लोकव्यवहारस्तु
२० सकलनयसमूहसाध्य इति ।

यस्तु बहिरन्तर्वा द्रव्यं सर्वथा प्रतिक्षिपत्यखिलार्थानां प्रतिक्षणं क्षणिकत्वाभिमानात् स तदाभासः, प्रतीत्यतिक्रमात् । बाधविधुरा हि प्रत्यभिज्ञानादिप्रतीतिर्बहिरन्तश्चैकं द्रव्यं पूर्वोत्तरविवर्त्तवर्त्ति प्रसाधयतीत्युक्तमूर्ध्वतासामान्यसिद्धिप्रस्तावे । प्रतिक्षणं क्षणिकत्वं
२५ च तत्रैव प्रतिव्यूढमिति ।

कालकारकलिङ्गसंख्यासाधनोपग्रहभेदाद्भिन्नमर्थं शपतीति

१ जीवाऽजीवधर्माऽधर्मनभःकालभेदात् । २ यथा चैतन्यम् । ३ सुखादिर्यथा । ४ द्रव्यपर्यायविभिन्नत्वप्रकारेण । ५ नैगमोऽपि संग्रहनयप्रविभागपरो भविष्यतीत्युक्ते सत्याह । ६ व्यवहारानुकूल्याभावेन । ७ व्यक्तम् । ८ बोधयति । ९ शुद्धपर्यायग्राही प्रतिपक्षसापेक्ष ऋजुसूत्रः । क्षणिकैकान्तनयस्तु तदाभासः । १० क्षणः पर्यायः । ११ द्रव्यस्यातीतानागतक्षणयोश्च सूचकः कुतो न स्यादित्युक्ते सत्याह । १२ विवक्षाऽभावात् । १३ सुखक्षणः सम्प्रतीत्यादिप्रकारेण । १४ निराकरोति । १५ जैनैः । १६ संख्या=एकवचनादिः । १७ साधनो युष्मदस्मदस्वभेदाभिधा । १८ उपग्रहः=उपसर्गः ।

शब्दो नयः शब्दप्रधानत्वात्। ततोऽपास्तं वैयाकरणानां मतम्। ते हि "धातुसम्बन्धे प्रत्ययाः" [पाणिनिव्या० ३।४।१] इति सूत्रमारभ्य 'विश्वदृश्वाऽस्य पुत्रो भविता' इत्यत्र कालभेदेऽप्येकं पदार्थमादृताः-'यो विश्वं द्रक्ष्यति सोऽस्य पुत्रो भविता' इति, भविष्यत्कालेनातीतकालस्याऽभेदाभिधानात् तथा व्यवहारोपलम्भात्। ५ तच्चानुपपन्नम्; कालभेदेऽप्यर्थस्याऽभेदेऽतिप्रसङ्गात्, रावणशङ्खचक्रवर्तिशब्दयोरप्यतीतानागतार्थगोचरयोरेकार्थतापत्तेः। अथानयोर्भिन्नविषयत्वान्नैकार्थता; 'विश्वदृश्वा भविता' इत्यनयोरप्यसौ मा भूत्तत एव। न खलु 'विश्वं दृष्टवान्=विश्वदृश्वा' इति शब्दस्य योऽर्थोऽतीतकालः, स 'भविता' इति शब्दस्यानागतकालो १० युक्तः; पुत्रस्य भाविनोऽतीतत्वविरोधात्। अतीतकालस्याप्यनागतत्वाध्यारोपादेकार्थत्वे तु न परमार्थतः कालभेदेऽप्यभिन्नार्थव्यवस्था स्यात्।

तथा 'करोति क्रियते' इति कर्तृकर्मकारकभेदेऽप्यभिन्नमर्थं त एवाद्रियन्ते। 'यः करोति किञ्चित् स एव क्रियते केनचित्' इति १५ प्रतीतेः। तदप्यसाम्प्रतम्; 'देवदत्तः कटं करोति' इत्यत्रापि कर्तृकर्मणोर्देवदत्तकटयोरभेदप्रसङ्गात्।

तथा, 'पुष्यस्तारका' इत्यत्र लिङ्गभेदेपि नक्षत्रार्थमेकमेवाद्रियन्ते, लिङ्गमशिष्यं लोकाश्रयत्वात्तस्य; इत्यसङ्गतम्; 'पटः कुटी' इत्यत्राप्येकत्वानुषङ्गात्। २०

तथा, 'आपोऽम्भः' इत्यत्र संख्याभेदेऽप्येकमर्थं जलाख्यं मन्यन्ते, संख्याभेदस्याऽभेदकत्वाद्गुर्वादिवत्। तदप्ययुक्तम्; 'पटस्तन्तवः' इत्यत्राप्येकत्वानुषङ्गात्।

तथा 'एहि मन्ये रथेन यास्यसि न हि यास्यसि यातस्ते पिता' इति साधनभेदेऽप्यर्थाऽभेदमाद्रियन्ते "प्रहासे मन्यवाचि युष्मन्मन्यतेऽसदेकवच्च" [जैनेन्द्रव्या० १।२।१५३] इत्यभिधानात्। २५ तदप्यपेशलम्; 'अहं पचामि त्वं पचसि' इत्यत्राप्येकार्थत्वप्रसङ्गात्।

तथा, 'सन्तिष्ठते प्रतिष्ठते' इत्यत्रोपग्रहभेदेऽप्यर्थाभेदं प्रतिपद्यन्ते उपसर्गस्य धात्वर्थमात्रोद्योतकत्वात्। तदप्यचारु; 'सन्तिष्ठते प्रतिष्ठते' इत्यत्रापि स्थितिगतिक्रिययोरभेदप्रसङ्गात्। ततः ३०

१ कालादिभेदाद्भिन्नमर्थं प्रतिपादयति शब्दो नयो यतः। २ शब्दभेदादर्थभेदमकुर्वताम्। ३ प्रतिज्ञावन्तः। ४ अत एवातीतार्थको विश्वदृश्वशब्दो द्रक्ष्यतीति वर्त्स्यत्कालेन विगृह्यते। ५ वैयाकरणाः। ६ वैयाकरणाः। ७ आदिना लघ्वादिग्रहः। ८ जैनेन्द्रव्याकरणस्य सूत्रम्। मूल'क'पुस्तके 'प्रहसे' इति पाठोऽस्ति। ९ वैयाकरणाः।

कालादिभेदाद्भिन्न एवार्थः शब्दस्य। तथाहि–विवादापन्नो विभिन्न-
कालादिशब्दो विभिन्नार्थप्रतिपादको विभिन्नकालादिशब्दत्वात्
तथाविधान्यशब्दवत्। नन्वेवं लोकव्यवहारविरोधः स्यादिति
चेत्; विरुध्यतामसौ तत्त्वं तु मीमांस्यते, न हि भेषजमातुरे-
५ च्छानुवर्ति।

नानार्थान्समेत्याभिमुख्येन रूढः समभिरूढः। शब्दनयो हि
पर्यायशब्दभेदान्नार्थभेदमभिप्रैति कालादिभेदत एवार्थभेदाभि-
प्रायात्। अयं तु पर्यायभेदेनाप्यर्थभेदमभिप्रैति। तथा हि–'इन्द्रः
शक्रः पुरन्दरः' इत्याद्याः शब्दा विभिन्नार्थगोचरा विभिन्नशब्द-
१० त्वाद्वाजिवारणशब्दवदिति।

एवमित्थं विवक्षितक्रियापरिणामप्रकारेण भूतं परिणतमर्थं
योभिप्रैति स एवम्भूतो नयः। समभिरूढो हि शकनक्रियायां
सत्यामसत्यां च देवराजार्थस्य शक्रव्यपदेशमभिप्रैति, पशोर्गमन-
क्रियायां सत्यामसत्यां च गोव्यपदेशवत्, तथा रूढेः सद्भावात्,
१५ अयं तु शकनक्रियापरिणतिक्षणे एव शक्रमभिप्रैति न पूजनाभिषे-
चनक्षणे, अतिप्रसङ्गात्। न चैवम्भूतनयाभिप्रायेण कश्चिदक्रिया-
शब्दोस्ति, 'गौरश्वः' इति जातिशब्दाभिमतानामपि क्रियाशब्द-
त्वात्, 'गच्छतीति गौराशुगाम्यश्वः' इति। 'शुक्लो नीलः' इति
गुणशब्दा अपि क्रियाशब्दा एव, 'शुचिभवनाच्छुक्लो नीलना-
२० न्नीलः' इति। 'देवदत्तो यज्ञदत्तः' इति यदृच्छाशब्दा अपि क्रिया-
शब्दा एव, 'देवा एनं देयासुः' इति देवदत्तः, 'यज्ञे एनं देयात्'
इति यज्ञदत्तः। तथा संयोगिसमवायिद्रव्यशब्दाः क्रियाशब्दाः
एव, दण्डोस्यास्तीति दण्डी, विषाणमस्यास्तीति विषाणीति।
पञ्चतयी तु शब्दानां प्रवृत्तिर्व्यवहारमात्रान्न निश्चयात्।

२५ एवमेते शब्दसमभिरूढैवम्भूतनयाः सापेक्षाः सम्यग्, अन्यो-
न्यमनपेक्षास्तु मिथ्येति प्रतिपत्तव्यम्।

एतेषु च नयेषु ऋजुसूत्रान्ताश्चत्वारोर्थप्रधानाः शेषास्तु त्रयः
शब्दप्रधानाः प्रत्यतव्याः।

---

१ विश्वदृश्वा भविता करोति क्रियते इत्यादिः। २ रावणशङ्खचक्रवर्त्यादिशब्दवत्। ३ लिङ्गवचनादिभेदेनार्थभेदप्रकारेण। ४ समाश्रित्य। ५ पर्यायभेदात्पदार्थनानात्व-प्ररूपकः समभिरूढः। ६ क्रियाश्रयेण भेदप्ररूपणमित्थम्भावोत्र। ७ यथा नमन-क्रियां कुर्वतोपि पाचकत्वप्रसङ्गः स्यात्। ८ क्रियाप्रधानतया। ९ अस्तीति क्रियात्र। १० जातिक्रियागुणयदृच्छासम्बन्धवाचकप्रकारेण।

कः पुनरत्र बहुविषयो नयः को वाल्पविषयः कश्चात्र कारण-भूतः कार्यभूतो वेति चेत्? 'पूर्वः पूर्वो बहुविषयः कारणभूतश्च परः परोल्पविषयः कार्यभूतश्च' इति ब्रूमः। संग्रहाद्धि नैगमो बहुविषयो भावाऽभावविषयत्वात्, यथैव हि सति सङ्कल्प-स्तथाऽसत्यपि, सङ्ग्रहस्तु ततोल्पविषयः सन्मात्रगोचरत्वात्, ५ तत्पूर्वकत्वाच्च तत्कार्यः। संग्रहाद्व्यवहारोपि तत्पूर्वकः सद्विशे-षावबोधकत्वादल्पविषय एव। व्यवहारात्कालत्रितयवृत्त्यर्थगो-चरात् ऋजुसूत्रोपि तत्पूर्वको वर्तमानार्थगोचरतयाल्पविषय एव। कारकादिभेदेनाऽभिन्नमर्थं प्रतिपद्यमानादृजुसूत्रतः तत्पू-र्वकः शब्दनयोप्यल्पविषय एव तद्विपरीतार्थगोचरत्वात्। शब्द- १० नयात्पर्यायभेदेनार्थाभेदं प्रतिपद्यमानात् तद्विपर्ययात् तत्पूर्वकः समभिरूढोप्यल्पविषय एव। समभिरूढतश्च क्रियाभेदेनाऽभिन्न-मर्थं प्रतियतः तद्विपर्ययात् तत्पूर्वक एवम्भूतोप्यल्पविषय एवेति।

नन्वेते नयाः किमेकस्मिन्विषयेऽविशेषेण प्रवर्त्तन्ते, किं वा विशेषोस्तीति? अत्रोच्यते—यत्रोत्तरोत्तरो नयोऽर्थांशे प्रवर्त्तते १५ तत्र पूर्वः पूर्वोपि नयो वर्त्तते एव, यथा सहस्रेऽष्टशती तस्यां वा पञ्चशतीत्यादौ पूर्वसंख्योत्तरसंख्यायामविरोधतो वर्त्तते। यत्र तु पूर्वः पूर्वो नयः प्रवर्त्तते तत्रोत्तरोत्तरो नयो न प्रवर्त्तते; पञ्च-शत्यादावऽष्टशत्यादिवत्। एवं नयार्थे प्रमाणस्यापि सांशवस्तु-वेदिनो वृत्तिरविरुद्धा, न तु प्रमाणार्थे नयानां वस्त्वंशमात्रवेदि- २० नामिति।

कथं पुनर्नयसप्तभङ्ग्याः प्रवृत्तिरिति चेत्? 'प्रतिपर्यायं वस्तुन्ये-कत्राविरोधेन विधिप्रतिषेधकल्पनायाः' इति ब्रूमः। तथाहि—सङ्क-ल्पमात्रग्राहिणो नैगमस्याश्रयणाद्विधिकल्पना, प्रस्थादिकं कल्पना-मात्रम्-'प्रस्थादि स्यादस्ति' इति। संग्रहाश्रयणात्तु प्रतिषेधक- २५ ल्पना; न प्रस्थादि सङ्कल्पमात्रम्-प्रस्थादिसन्मात्रस्य तथाप्रतीतेर-सतः प्रतीतिविरोधादिति। व्यवहाराश्रयणाद्वा द्रव्यस्य पर्यायस्य

१ विद्यमाने वस्तुनि। २ अतीतेऽनागते च। ३ पर्यायभेदेन भिन्नार्थगोचरत्वा-दित्यर्थः। ४ प्राप्नुवतः प्रकटयतो वा। ५ उत्तरोत्तरनयविषये पूर्वपूर्वनयप्रवर्तनप्र-कारेण उत्तरोत्तरसंख्यायां पूर्वपूर्वसंख्याप्रवर्तनप्रकारेण वा पञ्चशत्यादावष्टशत्याद्यऽप्रव-र्तनप्रकारेण वा। ६ अविरोधेनेत्यभिधानात्प्रत्यक्षादिविरुद्धविधिप्रतिषेधकल्पनायाः, एकत्र वस्तुनीत्यभिधानादनेकवस्त्वाश्रयविधिप्रतिषेधककल्पनायाश्च सप्तभङ्गीरूपता प्रत्युक्ता। ७ विधिप्रतिषेधौ अस्तित्वनास्तित्वे। ८ संग्रहो नयः। ९ प्रस्थादित्वेन। १० गगन-कुसुमवत्।

वा प्रस्थादिप्रतीतिः; तद्विपरीतस्याऽसतः सतो वा प्र[1]त्येतुमशक्तेः। ऋजुसूत्राश्रयणाद्वा पर्यायमात्रस्य प्रस्थादित्वेन प्र[2]तीतिः, अन्यथा प्रतीत्यनुपपत्तेः। शब्दाश्रयणाद्वा[3] कालादिभिन्नस्यार्थस्य प्रस्था[4]दित्वम्, अन्यथातिप्रसङ्गात्[5]। समभिरूढाश्रयणाद्वा पर्यायभेदेन[6] भिन्नस्यार्थस्य प्रस्था[7]दित्वम्; अन्यथाऽतिप्रसङ्गात्। एवंभूताश्रयणाद्वा[8] प्रस्थादिक्रियापरिणतस्यैवार्थस्य प्रस्था[9]दित्वं नान्यस्य[10] अतिप्रसङ्गा[11]दिति। तथा स्यादुभ[12]यं क्रमार्पितोभयनयार्पणात्। स्यादवक्तव्यं सहा[13][14]र्पितोभयनयाश्रयणात्। एवमवक्तव्योत्तराः शेषास्त्र[15]यो भङ्गा यथायोगमुदाहार्याः।

नयसप्तभङ्गी। प्रमाणसप्तभङ्गीतस्तु तस्याः किङ्कृतो विशेष इति चेत्? 'सकलविकलादेशकृतः' इति ब्रूमः। विकलादेशस्वभावा हि नयसप्तभङ्गी वस्त्वंशमात्रप्ररूपक[16]त्वात्। सकलादेशस्वभावा तु प्रमाणसप्तभङ्गी यथावद्वस्तुरूपप्ररूपकत्वात्। तथा[17] हि-स्यादस्ति जीवादिवस्तु स्वद्रव्या[18]दिचतुष्टयापेक्षया। स्यान्नास्ति परद्रव्यादिचतुष्टयापेक्षया। स्यादुभयं क्रमार्पितद्वयापेक्षया। स्यादवक्तव्यं सहार्पितद्वयापेक्षया। एवमवक्तव्योत्तरास्त्रयो भङ्गाः प्रतिपत्तव्याः।

कस्मात्पुनर्नयवाक्ये प्रमाणवाक्ये वा सप्तैव भङ्गाः सम्भवन्तीति चेत्? प्रतिपाद्यप्रश्नानां तावतामेव सम्भवात्। प्रश्नवशादेव हि सप्तभङ्गीनियमः। सप्तविध एव प्रश्नोऽपि कुत इति चेत्? सप्तविधजिज्ञा[19]सासम्भवात्। सापि सप्तधा कुत इति चेत्? सप्तधा संशयोत्पत्तेः। सोऽपि सप्तधा कथमिति चेत्? तद्विषयवस्तुधर्म[20]स्य सप्तविधत्वात्। तथा हि-सत्त्वं तावद्वस्तुधर्मः तदनभ्युपगमे[21] वस्तुनो[22] वस्तुत्वायोगात् खरशृङ्गवत्। तथा कथञ्चिदसत्त्वं तद्धर्म एव; स्वरू[23]पादिभिरिव पररूपादिभिरप्यस्याऽसत्त्वा-

१ सङ्कल्पमात्रस्य प्रस्थादित्वेन ज्ञातुम्। २ प्रतिषेधकल्पना स्यात्। ३ सङ्कल्पमात्रेण। ४ प्रतिषेधकल्पनेति सम्बन्धः। ५ पटादेरपि प्रस्थादित्वं स्यात्। ६ प्रतिषेधकल्पना। ७ संकल्पमात्रेण। ८ सङ्कल्पमात्रेण। ९ प्रतिषेधकल्पना। १० सङ्कल्पमात्रस्य। ११ एतावता स्यादस्ति स्यान्नास्तीति भङ्गद्वयं सिद्धम्। १२ प्रस्थादिः स्यादस्ति नास्ति च। १३ सह=युगपत्। १४ अर्पितः=विवक्षितः। १५ प्रस्थादिः स्यादस्त्यवक्तव्यः, स्यान्नास्त्यवक्तव्यः, स्यादस्तिनास्त्यवक्तव्यश्चेति। १६ कथनात्। १७ नयप्रमाणसप्तभङ्ग्या यथाक्रमं भेदज्ञानार्थमुल्लेखः कथ्यते स्यादस्ति स्यान्नास्तीत्यादिः। तथा च स्यादस्ति जीवादिवस्तु स्यान्नास्ति जीवादिवस्तु इत्यादि। १८ आदिना क्षेत्रकालभावग्रहः। १९ ज्ञातुमिच्छा जिज्ञासा। २० स्वरूपस्य। २१ परेणाङ्गीक्रियमाणे। २२ जीवादिपदार्थस्य। २३ अन्यथा।

नि[1]ष्ठौ प्रतिनियतस्वरूपा[2]ऽसंभवाद्वस्तुप्रतिनियमविरोधः स्यात् । एतेन[3] क्रमार्पितोभयत्[4]वादीनां वस्तुधर्मत्वं प्रतिपादितं प्रतिपत्तव्यम् । तदभावे क्रमेण सदसत्त्वविकल्प[5]शब्दव्यवहारविरोधात्, सहाऽवक्तव्यत्वोपलक्षितोत्तरधर्मत्रयविकल्पस्य शब्दव्यवहारस्य चासत्त्वप्रसङ्गात् । [6]न चामी व्यवहारा निर्विषया एव; वस्तुप्र- ५
तिपत्तिप्रवृत्तिप्राप्तिनिश्चयात् तथा[7]विधरूपादिव्यवहार[8]वत् ।

ननु च प्रथमद्वितीयधर्मवत् प्रथमतृतीया[9]दिधर्माणां क्रमेतरा[10]र्पितानां धर्मान्तरत्वसिद्धेर्न सप्तविधधर्मनियमः सिद्ध्येत्; इत्यप्यसुन्दरम्; क्रमार्पितयोः प्रथमतृतीयधर्मयोः धर्मान्तरत्वेनाऽप्रतीतेः, सत्त्वद्वयस्यासम्भवाद्विवक्षित[11]स्वरूपादिना सत्त्वस्यै[12]कत्वात् । १०
त[13]दन्य[14]स्वरूपादिना सत्त्वस्य द्वितीयस्य सम्भवे विशेषादेशात्[15] तत्[16]प्रतिपक्षभूतासत्त्वस्याप्यपरस्य सम्भवादपरधर्मसप्तक[17]सिद्धिः(द्धेः) सप्तभङ्ग्यन्तरसिद्धितो न कश्चिदुपालम्भः । ए[19]तेन द्वितीयतृतीयधर्मयोः क्रमार्पितयोर्धर्मान्तरत्वमप्रातीति[20]कं व्याख्यातम् । कथमेवं[21] प्रथमचतुर्थयोर्[22]द्वितीय[23]चतुर्थयोस्तृतीय[24]चतुर्थयोश्च सहितयोर्धर्मा- १५
न्तरत्वं स्यादिति चेत् ? चतुर्थेऽवक्तव्यत्वधर्मे सत्त्वासत्त्वयोरपरामर्शात्[25] । न खलु सहार्पितयोस्तयोरवक्तव्यशब्देनाभिधानम् । किं तर्हि ? तथार्पितयोस्तयोः सर्वथा वक्तुमशक्तेरवक्तव्यत्वस्य धर्मान्तरस्य तेन प्रतिपादनमिष्यते । न च तेन सहितस्य सत्त्वस्यासत्त्वस्योभयस्य वाऽप्रतीतिर्धर्मान्तरत्वासिद्धिर्वा; प्रथमे भङ्गे २०
सत्त्वस्य प्रधानभावेन प्रतीतेः, द्वितीये त्वसत्त्वस्य, तृतीये क्रमार्पितयोः सत्त्वासत्त्वयोः, चतुर्थे त्ववक्तव्यत्वस्य, पञ्चमे

१ परेण । २ [illegible] प्रतिनियतस्वरूपः । ३ सत्त्वासत्त्वयोर्वस्तुधर्मत्वमनेनप्रकारेण ग्रन्थेन । ४ सहार्पितोभयत्वादीनां च । ५ अवक्तव्यं सदवक्तव्यमसदवक्तव्यं सदसदवक्तव्यं चेति । ६ ननु येभ्यः शब्दव्यवहारेभ्योऽन्यथानुपपत्त्या क्रमार्पितोभयत्वादयः पञ्च धर्मा अवस्थाप्यन्ते ते निर्विषयाः स्युः, कथं तेभ्यस्तत्सिद्धिरित्याशङ्कायामाह । ७ तथाविधः प्रतिपत्तिप्रवृत्तिप्राप्तिनिश्चयहेतुभूतः । ८ तस्यापि निर्विषयत्वे सकलप्रत्यक्षादिव्यवहारापह्नवान्न कस्यचिदिष्टतत्त्वव्यवस्था स्यात् । ९ आदिना द्वितीयतृतीयादिग्रहः । १० युगपत् । ११ मनुष्यस्वरूपे स्वद्रव्यक्षेत्रकालभावाः स्वरूपम्, आदिना पररूपसंग्रहः, ते च यतः परकीया द्रव्यादयः । १२ एकजीवस्य । १३ तस्मात् । १४ अन्यस्य देवादेः । १५ भवान्तरापेक्षया । १६ पर्यायकथनात् । १७ सः=द्वितीयसत्त्वः । १८ यतः । १९ प्रथमतृतीयधर्मयोर्धर्मान्तरत्वनिराकरणेन । २० इति । २१ प्रथमतृतीयादिप्रकारेण । २२ स्यादस्त्यवक्तव्यमिति । २३ स्यान्नास्त्यवक्तव्यमिति । २४ स्यादस्ति नास्त्यवक्तव्यमिति । २५ अप्रतीतेः ।

सत्त्वसहितस्य, षष्ठे पुनरसत्त्वोपेतस्य, सप्तमे क्रमे क्रमवर्त्तदुभययुक्तस्य सकलजनैः सुप्रतीतत्वात्।

ननु चावक्तव्यत्वस्य धर्मान्तरत्वे वस्तुनि वक्तव्यत्वस्याष्टमस्य धर्मान्तरस्य भावात्कथं सप्तविध एव धर्मः सप्तभङ्गीविषयः ५स्यात्? इत्यप्यपेशलम्; सत्त्वादिभिरभिधीयमानतया वक्तव्यत्वस्य प्रसिद्धेः, सामान्येन वक्तव्यत्वस्यापि विशेषेण वक्तव्यतायामवस्थानात्। भवतु वा वक्तव्यत्वावक्तव्यत्वयोर्धर्मयोः प्रसिद्धिः; तथाप्याभ्यां विधिप्रतिषेधकल्पनाविषयाभ्यां सत्त्वासत्त्वाभ्यामिव सप्तभङ्ग्यन्तरस्य प्रवृत्तेर्न तद्विषयसप्तविधधर्मनियमव्या-१० घातः, यतस्तद्विषयः संशयः सप्तधैव न स्यात् तद्धेतुर्जिज्ञासा वा तन्निमित्तः प्रश्नो वा वस्तुन्येकत्र सप्तविधवाक्यनियमहेतुः। इत्युपपन्नेयम्-प्रश्नवशादेकवस्तुन्यविरोधेन विधिप्रतिषेधकल्पना सप्तभङ्गी। 'अविरोधेन' इत्यभिधानात् प्रत्यक्षादिविरुद्धविधिप्रतिषेधकल्पनायाः सप्तभङ्गीरूपता प्रत्युक्ता, 'एकवस्तुनि' इत्यभि-१५ धानाच्च अनेकवस्त्वाश्रयविधिप्रतिषेधकल्पनाया इति।

अथवा प्रागुक्तश्चतुरङ्गो वादः पत्रावलम्बनमप्यपेक्षते, अतस्तल्लक्षणमत्रावश्यमभिधातव्यम् यतो नास्याऽविज्ञातस्वरूपस्यावलम्बनं जयाय प्रभवतीति ब्रुवाणं प्रति सम्भवदित्याह। सम्भवद्विद्यमानमन्यत् पत्रलक्षणं विचारणीयं तद्विचारचतुरैः। तथाहि-२० स्वाभिप्रेतार्थसाधनानवद्यगूढपदसमूहात्मकं प्रसिद्धावयवलक्षणं वाक्यं पत्रमित्यवगन्तव्यं तथाभूतस्यैवास्य निर्दोषतोपपत्तेः। न खलु स्वाभिप्रेतार्थासाधकं दुष्टं सुस्पष्टपदात्मकं वा वाक्यं निर्दोषं पत्रं युक्तमतिप्रसङ्गात्। न च क्रियापदादिगूढं काव्यमप्येवं पत्रं प्रसज्यते; प्रसिद्धावयवत्वविशिष्टस्यास्य पत्रत्वाभिधानात्। २५ न हि पदगूढादिकाव्यं प्रमाणप्रसिद्धप्रतिज्ञाद्यवयवविशेषणतया किञ्चित्प्रसिद्धम्, तस्य तथा प्रसिद्धौ पत्रव्यपदेशसिद्धेरबाधनात्। तदुक्तम्—

"प्रसिद्धावयवं वाक्यं स्वेष्टस्यार्थस्य साधकम्।
साधु गूढपदप्रायं पत्रमाहुरनाकुलम्॥" [पत्रप० पृ० १]

---

१ तदुभयं सत्त्वासत्त्वम्। २ आदिना क्रमसत्त्वं सत्त्वासत्त्वे च संगृह्येते। ३ वस्तुनः। ४ सदादिभङ्गत्रयरूपेण संघटते इत्यादिप्रकारेण। ५ कल्पना भेदः। ६ यथा स्यादस्ति स्यान्नास्तीत्यादि तथा स्याद्वक्तव्यं स्यादवक्तव्यं स्याद्वक्तव्यावक्तव्यमित्यादिप्रकारेण। ७ यतः। ८ परीक्षामुखे। ९ पत्रस्य। १० अपशब्दबहुलम्। ११ काव्यादेरपि पत्रत्वप्रसङ्गात्। १२ अबाधितम्।

कथं प्रागुक्तविशेषणविशिष्टं वाक्यं पत्रं नाम, तस्य श्रोत्रसमधिगम्यपदसमुदयविशेषरूपत्वात्, पत्रस्य च तद्विपरीताकारत्वात्? न च यद्यतोऽन्यत्तत्तेन व्यपदेष्टुं शक्यमतिप्रसङ्गादिति चेत्; 'उपचरितोपचारात्' इति ब्रूमः। 'श्रोत्रपथप्रस्थायिनो हि वर्णात्मकपदसमूहविशेषस्वभाववाक्यस्य लिप्यामुपचारस्तत्रास्य जनैरारोप्यमाणत्वात्, लिप्युपचरितवाक्यस्यापि पत्रे, तत्र लिखितस्य तत्रस्थत्वात्' इत्युपचरितोपचारात्पत्रव्यपदेशः सिद्धः। न च यद्यतोन्यत्तत्तेनोपचारादुपचरितोपचाराद्वा व्यपदेष्टुमशक्यम्, शक्रादन्यत्र व्यवहर्तृजनाभिप्राये शक्रोपचारोपलम्भात्, तस्माच्चान्यत्र काष्ठादावुपचरितोपचाराच्छक्रव्यपदेशसिद्धेः। अथवा प्रकृतस्य वाक्यस्य मुख्य एव पत्रव्यपदेशः-'पदानि त्रायन्ते गोप्यन्ते रक्ष्यन्ते परेभ्यः स्वयं विजिगीषुणा यस्मिन्वाक्ये तत्पत्रम्' इति व्युत्पत्तेः। प्रकृतिप्रत्ययादिगोपनाद्धि पदानां गोपनं विनिश्चितपदस्वरूपतदभिधेयतत्त्वेभ्योपि परेभ्यः सम्भवत्येव। तस्योक्तप्रकारस्य पत्रस्यावयवौ क्वचिद्द्वावेव प्रयुज्येते तावतैव साध्यसिद्धेः। तद्यथा—

"स्वान्तभासितभूत्याद्यत्र्यन्तात्मतदुभान्तवाक्।
परान्तद्योतितोद्दीप्तमितीतस्वात्मकत्वतः॥" [ ]

इति। अन्त एव ह्यान्तः, स्वार्थिकोऽण् वानप्रस्थादिवत्। प्रादिपाठापेक्षया सोरान्तः स्वान्तः उत्, तेन भासिता द्योतिता भूतिरुद्भूतिरित्यर्थः। सा आद्या येषां ते स्वान्तभासितभूत्याद्याः ते च ते त्र्यन्ताश्च उद्भूतिव्ययध्रौव्यधर्मा इत्यर्थः। ते एवात्मानः तांस्तनोतीति स्वान्तभासितभूत्याद्यत्र्यन्तात्मतत् इति साध्यधर्मः। उभान्ता वाग्यस्य तदुभान्तवाक्=विश्वम्, इति धर्मि। तस्य साध्यधर्मविशिष्टस्य निर्देशः। उत्पादादित्रिस्वभावव्यापि सर्वमित्यर्थः। परान्तो यस्यासौ परान्तः प्रः, स एव द्योतितं द्योतनमुपसर्ग इत्यर्थः। तेनोद्दीप्ता चासौ मितिश्च तया इतः स्वात्मा यस्य तत्परान्तद्योतितोद्दीप्तमितीतस्वात्मकं 'प्रमितिप्राप्तस्वरूपम्' इत्यर्थः। तस्य भावस्तत्त्वं 'प्रमेयत्वम्' इत्यर्थः, प्रमाणविषयस्य प्रमेयत्वव्यवस्थितेः इति साधनधर्मनिर्देशः। दृष्टान्ताद्यभावेऽपि च हेतोर्गमकत्वम् "एतद्द्वयमेवानुमानाङ्गम्" [परीक्षामु० ३।३७]

१ घटस्य पटव्यपदेशप्रसङ्गात्। २ पुंसि। ३ प्रतिवादिभ्यः। ४ अनुमानवाक्ये। ५ विश्वम्। ६ प्रमेयत्वात्। ७ प्रपराऽपसमन्वादिः प्रादिः। ८ व्याप्नोति। ९ परान्तद्योतितेन। १० प्राप्तः। ११ स्वसाध्यप्रतिपादकत्वम्।

इत्यत्र समर्थितम् । अन्यथानुपपत्तिबलेनैव हि हेतोर्गमकत्वम्, सा चात्रास्त्येव एकान्तस्य प्रमाणागोचरतया विषयपरिच्छेदे समर्थनात् । एवं प्रतिपाद्याशयवशात्त्रिप्रभृतयोऽप्यवयवाः पत्र-वाक्ये द्रष्टव्याः । तथाहि—

५ "चित्राद्यदन्तराणीयमारेकान्तात्मकत्वतः ।
यदित्थं न तदित्थं न यथाऽकिञ्चिदिति त्रयः ॥ १ ॥
तथा चेदमिति प्रोक्तौ चत्वारोऽवयवा मताः ।
तस्मात्तथेति निर्देशे पञ्च पत्रस्य कस्यचित् ॥ २ ॥"
[पत्रप० पृ० १०]

१० चित्रमेकानेकरूपम्, तदततीति चित्रात्-एकानेकरूपव्यापि अनेकान्तात्मकमित्यर्थः । सर्वविश्वयदित्यादिसर्वनामपाठापेक्षया यदन्तो विश्वशब्दो 'यत् अन्ते यस्य' इति व्युत्पत्तेः । तेन राणीयं शब्दनीयं विश्वमित्यर्थः । तदनेकान्तात्मकं विश्वमिति पक्ष-निर्देशः । आरेका संशयः, सा अन्ते यस्येत्यारेकान्तः प्रमेयः
१५ "प्रमाणप्रमेयसंशय" [न्यायसू० १।१।१] इत्यादिपाठापेक्षया, स आत्मा यस्य तदारेकान्तात्मकम्, तस्य भावस्तत्त्वं तस्मात्, इति साधनधर्मनिर्देशः । यदित्थं न भवति यच्चित्रान्न भवति तदित्थं न भवति आरेकान्तात्मकं न भवति यथाऽकिञ्चित्=न किञ्चित् अथवा अकिञ्चित् सर्वथैकान्तवाद्यभ्युपगतं तत्त्वम् । इति त्रयोऽ-
२० वयवाः पत्रे क्वचित्प्रयुज्यन्ते । तथा चेदमिति पक्षधर्मोपसंहार-वचने चत्वारः । तस्मात्तथाऽनेकान्तव्यापीति निर्देशे पञ्चेति ।

यच्चेदं यौगैः स्वपक्षसिद्ध्यर्थं पत्रवाक्यमुपन्यस्तम्- सैन्यलङ्ग-भाग् नाऽनन्तरानर्थार्थप्रस्वापकृदाऽऽशैद्रस्यतोऽनीक्षोनेनलङ्युङ्कु-कुलोद्भवो वैपोप्यनैश्यतापैस्तत्रऽनृरङ्लङ्जुङ् परापरतत्त्ववित्त-
२५ दन्योऽनादिरवायनीयत्वत एवं यदीदृक्तत्सकलविद्वर्गवदेतच्चैव-मेवं तदिति पत्रम् । अस्यायमर्थः—इन आत्मा सकलस्यैहिकपार-लौकिकव्यवहारस्य प्रभुत्वात्, सह तेन वर्तते इति सेनः । स एव चातुर्वर्ण्यादिवत्स्वार्थिके ष्यणि कृते 'सैन्यम्' इति भवति । तस्य लङ्=विलासः, तं भजते सेवते इति सैन्यलङ्गभाक्-'देहः'

१ जैनैः । २ सर्वथा नित्यस्य क्षणिकस्य वा वस्तुनः । ३ अत सातत्यगमने । ४ खरविषाणवत् । ५ आरेकान्तात्मकम् । ६ देहः । ७ प्रबोधकारीन्द्रियादिकारण-कलापः । ८ आसमुद्रात् । ९ गिरिनिकरो भुवनसन्निवेशश्च । १० इनलङ्युङ्कु= सूर्याचन्द्रमसौ । ११ पृथिव्यादिकार्यद्रव्यसमूहः । १२ वक्ष्यते स्वयमेवाग्रे स्वार्थः । १३ ज्ञानभोगादिपदार्थः । १४ लष विकासे ।

इति यावत्। अर्थः प्रयोजनं तस्मै अर्थार्थः, न अर्थार्थोऽनर्थार्थः। प्रकृष्टो लौकिकस्वापाद्विलक्षणः स्वापः प्रस्वापः=बुद्ध्यादिगुणवियुक्तस्यात्मनोऽवस्थाविशेषः मोक्ष इति यावत्। न हि तत्साध्यं किञ्चित्प्रयोजनमस्ति; तस्य सकलपुरुषप्रयोजनानामन्ते व्यवस्थानात्। अनर्थार्थश्चासौ प्रस्वापश्च[1]। नन्वेवं सौगतस्वापस्यापि ग्रहणं ५ स्यात्, सोपि ह्यनर्थार्थप्रस्वापो भवति सकलसन्ताननिवृत्तिलक्षणस्य मोक्षस्य[2] सौगतैरभ्युपगमात्। तदुक्तम्—

"दीपो यथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम्।
दिशं न काञ्चिद्विदिशं न काञ्चित्स्नेहक्षयात्केवलमेति शान्तिम्॥
जीवस्तथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम्। १०
दिशं न काञ्चिद्विदिशं न काञ्चित्क्लेशक्षयात्केवलमेति शान्तिम्॥"
[सौन्दरनन्द १६।२८,२९]

अत्राह–नानन्तरेति। अन्तो विनाशस्तं राति[3] पुरुषाय ददातीत्यन्तरः। नान्तरोऽनन्तरः पुरुषस्य विनाशदायको नेत्यर्थः। अनन्तरश्चासावनर्थार्थप्रस्वापश्चानन्तराऽनर्थार्थप्रस्वापः। नेति निपातः १५ प्रतिषेधवाची। नानन्तरानर्थार्थप्रस्वापो लौकिको निद्राकृतः स्वाप इत्यर्थः। तं कृन्तति छिनत्तीति नानन्तरानर्थार्थप्रस्वापकृत्–'प्रबोधकारीन्द्रियादिकारणकलापः' इति यावत्। शिषु इत्ययं धातुर्भौवादिकः सेचनार्थः, "जिषु ञिषु शिषु विषु उक्ष पृषु वृषु सेचने"
[ ] इत्यभिधानात्। तस्माच्छेषणं भावे घञि कृते २० 'शेषः' इति भवति। तस्मात्स्वार्थिकेऽणि कृते 'शैषः[4]' इति जायते। शैषं करोति "तत्करोति तदाचष्टे, तेनातिक्रामति धुरूपं च"
[ ] इति णिचि कृते टेः खे[5] च कृते शैषीति भवति। "तदन्ता धवः" [जैनेन्द्रव्या० २।१।३९] इति धुसंज्ञायां[6] सत्यां "प्राग्धोस्ते" [जैनेन्द्रव्या० १।२।१४८] इत्याङा योगः। आशैष- २५ यति समन्ताद्भुवः सेकं करोतीति क्विपि तस्य च सर्वापहारेण लोपे डत्वे च कृते आशैडिति भवति। आशैट् चासौ स्यश्चाशैट्स्यत् लोकप्रसिद्धः समुद्रः। तस्मादाशैट्स्यतः–आ समुद्रादिति यावत्। निपूर्वे इष् इत्ययं धातुर्गत्यर्थः परिगृह्यते–"इष् गतिहिंसनयोश्च" [ ] इति वचनात्। नीषते ३० गच्छतीति नीट्, न नीडनीट्। तस्मात्स्वार्थिके के प्रत्ययेऽनीड्क इति भवति। अचलो गिरिनिकर इत्यर्थः। यदि वा अं विष्णुं नीषति गच्छति समाश्रयतीत्यनीट्=भुवनसन्निवेशः। तदुक्तम्[7]—

---

१ अनर्थार्थप्रस्वापः। २ परममोक्षस्य न तु जीवन्मोक्षस्य। ३ रा दाने। ४ शेष एव शैषः। ५ लोपे। ६ 'धु' इति धातुसंज्ञा। ७ (माघे)।

"युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकासमासते।
तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः॥"
[शिशुपालव० १।२३]

न विद्यते ना समवायिकारणभूतो यस्यासावऽना, "ऋणमोः" ५(न्मोः) [जैनेन्द्रव्या० ४।२।१५३] इति कप् सान्तो न भवति "सान्तो विधिरनित्यः" [ ] इति परिभाषाश्रयणात्। इनो भानुः। लषणं लट् कान्तिः-"लष् कान्तौ" [ ] इति वचनात्। लषा युक् योगो यस्यासौ लड्युक् चन्द्रः। इनश्च लड्युक् चेनलड्युक् सूर्याचन्द्रमसौ। कुलमिव कुलं सजातीयार- १०म्भकावयवसमूहः। तस्मादुद्भव आत्मलाभो यस्यासौ कुलोद्भवः पृथिव्यादिकार्यद्रव्यसमूहः। 'वा' इत्यनुक्तसमुच्चये, तेनानित्यस्य गुणस्य कर्मणश्च ग्रहणम्। एषः प्रतीयमानः। अतो नाश्रयासिद्धिः। अङ्को हितोऽप्यः-समुद्रादिः। निशायाः कर्म नैश्यमन्धकारादि। ताप औष्ण्यम्। स्तनतीति स्तन् मेघः। एतेषां द्वन्द्वैकवद्भावः। १५किम्भूतः स तैश्च। न विद्यते ना पुरुषो निमित्तकारणमस्येति। रटनं परिभाषणं तस्य लट् विलासः, तं जुषते सेवते इति-"जुषी प्रीतिसेवनयोः" [ ] इत्यभिधानात्। अनूरट्- लट्जुट्। अत्रापि कचऽभावे निमित्तमुक्तम्।

